# CRITICAL COMPARATIVE STUDY OF COMMENTARIES OF *CHARAK SAMHITA - VIMAN STHANA*

A thesis submitted to

Tilak Maharashtra Vidyapeeth, Pune

For the Degree of Doctor of Philosophy (Ph.D.)

In SAMHITA

Under the Board of Studies

Faculty of Ayurved

Submitted by

**Vd. Abhijit Prakash Saraf**

Under the Guidance of

**Prof. Dr. Sadanand Prabhakar Sardeshmukh**

August 2016

# DECLARATION

I hereby declare that the thesis entitled "Critical comparative study of commentaries on Charaka Samhita – Vimana Sthana" completed and written by me has not previously formed the basis for the award of any degree or other similar title or any other university or examining body.

Place - Pune

Date – 29-08-2016

Vd. Saraf Abhijit Prakash

Research Scholar.

# CERTIFICATE

This is to certify that the thesis entitled **"Critical comparative study of commentaries on Charaka Samhita – Vimana Sthana"** which is being submitted herewith for the award of the Degree of Vidyavachaspati (Ph. D.) in Ayurveda of Tilak Maharashtra Vidyapeeth, Pune is the result of original research work completed by **Vd. Saraf Abhijit Prakash** under my supervision and guidance. To the best of my knowledge and belief the work incorporated in this thesis has not formed the basis for the award of any degree or similar title of this or any other University or examining body.

Place - Pune

Date – 29-08-2016



Prof. Dr.Sardeshmukh Sadanand Prabhakar

A.V.P., Ph.D. (Ayurved)

## ACKNOWLEDGEMENT

Completion of this dissertation was possible with support of several people. I would like to express my sincere thanks to all of them.

First of all, I am extremely grateful to my research guide and mentor, **Dr. Sadanand Prabhakar Sardeshmukh**, Director, Integrated Cancer Treatment & Research Centre, Wagholi, Pune & Dean, Faculty of Ayurved, Tilak Maharashtra Vidyapeeth, Pune for his valuable guidance, scholarly inputs, facilities provided to carry out research work at the institute and consistent encouragement throughout the research work. I consider myself fortunate to complete my work under his guidance.

This study of charak samhita and commentaries was not possible without unconditional support provided by my Guru **Dr. Anant Dharmadhikari**, Ex-Director of Ayurved, Maharashtra for his constant support and valuable suggestions and unconditional love encourage me to complete this study.

I thank **Dr. Abhijit Joshi**, H.O.D., Ayurved Department, Tilak Maharashtra Vidyapeeth for his important suggestions and specailly allowing me to do this study in Sanskrit langauge. his expertised administration helps me to complete this difficult task thoroughly. Also I thank **Dr. Mrunalini Kulkarni, Dr. Manoja Joshi, Mrs. Sushama Pathak** and all the staff of Tilak Maharashtra Vidyapeeth for their support.

**Dr. Vineeta Deshmukh**, Deputy Director, Integrated Cancer Treatment and Research centre, has been very encouraging and supportive, and I express my gratitude to her for her valuable suggestions and concise comments on some of the chapters of the thesis. Madam was always there to clarify my doubts despite her busy schedule.

I am indeed obliged and overwhelmed to thank **Dr. Dnyanada Pandit, Dr. Rajani Gokhale** and **Dr. Vineeta Deshmukh** for accepting the praposal of being expert to criticize and assessing this study and giving their valuable inputs.

I am thankful for my research center Bhartiya Sanskrit Darshan Trust, Wagholi for everything.

I grateful for the support & guidance from **Dr. Ramesh Nanal, Dr. Anant Bakre, Dr. Dilip Gadgil, Dr. Shriprasad Bawadekar, Dr. Girish Tillu, Dr. Supriya Bhalerao, Dr. Mallika K.J., Dr. L. Mahadevan, Dr.Yogini Patil, Dr. Shrirang Galgali, Dr. Prama Joshi, Dr. Jayant Deopujari, Dr.Yashashree Joshi, Dr. Madhuri Bhide, Vd. Anand Tembhurnikar, Vd. Pankaj Wanjarkhedkar**

have been very kind enough to extend their help at various phases of this research, whenever I approached them, and I do hereby acknowledge all of them.

I thank **Dr. Nilima Mone-Kshirsagar** and **Dr. Madhavi Gadgil**, Department of Sanskrit, Deccan college, pune for their valuable inputs.

The thesis would not have come to a successful completion, without the help I received from **Mrs. Sarita Deshmukh, Mrs. Tejashree Vedvikhyat** and **Mrs. Shraddha Shah** for their help in Sanskrit translation of this work.

I acknowledge **Dr.Prabhatai Godbole, Dr. Renuka Gayal, Dr. Sumati Khot, Dr. Umesh Tekawade, Dr. Jyoti Badwe, Dr. Anand Kulkarni, Dr. Nilesh Kulkarni, Dr.Suvarna Bidaye, Dr. Vasanti Godse, Dr. Sudhatai Akalujkar,** for their good wishes.

I thank **Dr. Ranibala Nemade** who has extended her support in fundamental thinking process and guidance regarding Tantrayukti and I thank her for this contributions.

I acknowledge **Dr. Balasaheb Aher**, SSAM & H ,nashik, **Dr. Milind Aware**, Principal SSAM & H., Nashik, **Dr. Parshuram Pawar, Dr. Sanjay Khedekar, Dr. Arun Bhujbal, Dr. Dnyanada Bhujbal, Dr Nitin Jadhav, Dr. Ravi Sonawane, Dr Yogesh Surase** for their support and suggestions throghout the study.

I thank libraries and their staff of IGPT & H.,Jamnagar, Deccan college, pune, BSDT ayurved college, wagholi, Tilak ayurved college, pune, bharati vidyapeeth, pune, SSAM&H.Nashik, ASS, Ayurved mahavidyalaya, Nashik

I thank **Dr. Gaurav Gupte, Dr. Sabir Mujawar, Dr. Manoj Madne, Dr. Shreeram Agashe, Dr. Siddhesh Tawade, Dr. Amit thorawe, Dr. Sushrut Sardeshmukh, Dr. Sukumar Sardeshmukh, Dr. Bhagyashree Sardeshmukh, Dr. Shilpa Kawade, Dr. Meghana Bakre, Dr. Vivek Solapurkar, Dr. Shriharsh, Dr. Prajjwal Narayan, Dr. Rochan Sharma, Dr. Akshar Kulkarni** for being with me always and encouraging me.

I thank all my students from wagholi and nashik who help me in this study. I thank **Mrs. Sunetra Mulye** for her statistical data analysis. I am really greatful for support and help from **Mr. Rahul Gholap**, **Mr.Mukesh Kale and Mrs. Rajashri Sonawane** for computing this study.

A special thanks to my family. Words cannot express how grateful I am to my mother **Mrs. Sushama Saraf** and father, **Dr. Prakash Saraf** for all of the sacrifices that you've made on my behalf. Your prayer for me was what sustained me thus far.

My father was very keen regarding this study and he support me in every stage of my life. he could be very very happy to see this study completed. without him, i have to walk on the path of my life, i ask him an etern support now.

I thank my Uncle-Aunt, **Mr. Rajendra Saraf - Mrs Rashmi Saraf** and **Mr. Ashok Kulkarni- Mrs Mangala Kulkarni** for being with me always and standing with us after my father`s death. I also thank my father in law, **Adv. Anilkumar Deshpande** and all the Deshpande Family for their good wishes and support.

I thank my brother **Dr.Anand Saraf** and **Mr. Tanay Saraf** and sister **Dr. Manasi Deshpande, Mrs. Sukhada Shukla** and **Mrs. Bakul Thombare** for their support and love.

I am overwhelmed to thank my behalf **Mrs. Anjali Saraf** for her constant support, tremendous patience and encouraging me in every possible way to strive towards my goal. Because of her i could able to complete this study.

I acknowledge Bharatratna, **Lata Dinanath Mangeshkar** for being a role model in my life.

Above all, I owe it all to **Shree Sripada ShriVallabha, Shree Loknathtirth Swami Maharaj, Shree Narayankaka Dhekane maharaj, Shree Prabhakarnath Sardeshmukh Maharaj and my father** for granting me the wisdom, health and strength to undertake this research task and enabling me to its completion.

Vd. Saraf Abhijit Prakash

Research Scholar.

## अनुक्रमणिका


| Serial No. | Topic | Page No. |
|---|---|---|
| १ | अध्ययनस्य प्रस्तावना Introduction | १ |
| २ | लक्ष्यम् उद्देशा: च Aim & Objectives | ४ |
| ३ | अध्ययनसामग्री अध्ययनपद्धति:च Materials & Methodology | ५ |
| ४ | अध्ययनपद्धति: – पूर्वपीठिका | ९ |
| ५ | व्याकरणपदार्थ:, ग्रन्थशैलि: तन्त्रयुक्ति: इ. – Retrival stage | ११ |
| ६ | संहिता टीका: च अभ्यसनीया: तासां पूर्णरुपेण परिशीलनम् –Revival stage | २७ |
| | चरकसंहिताया: रचना | २७ |
| | टीका रचना | ३१ |
| | ऐतिहासिकम् अध्ययनम् – पुनर्वसु: आत्रेय: | ३२ |
| | महर्षि: अग्निवेश: | ३३ |
| | महर्षि: चरक: | ३४ |
| | महर्षि: दृढबल: | ३४ |
| | कविराज: चक्रपाणिदत्त | ३५ |
| | कविराज: गङ्गाधर: रॉय: | ३९ |
| | कविराज: योगीन्द्रनाथसेन: | ४६ |
| | कविराज: ज्योतिषचन्द्र सरस्वति: | ४८ |
| | चरकसंहितायां विमानस्थाने उल्लिखितानि भिषक्विशेषणानि | ४९ |
| | चरकसंहितायां विमानस्थाने उल्लिखितानि आत्रेयाग्निवेशयो: विशेषणानि | ५० |
| ७ | अतीतावेक्षणं / अनागतावेक्षणं स्वतन्त्रप्रत्यय: – Transliteration stage | ५२ |
| ८ | परतन्त्रप्रत्यय: – Technical correlation stage | ५४ |

| | | |
|---|---|---|
| ९ | सर्वासां टीकानां विवेचनम् – Translation Stage | ५७ |
| | प्रथमोऽध्याय: – रसविमानम् । | ६७ |
| | द्वितीयोऽध्याय: – त्रिविधकुक्षीयं विमानम् । | १२९ |
| | तृतीयोऽध्याय: – जनपदोद्ध्वंसनीयं विमानम् । | १५२ |
| | चतुर्थोऽध्याय: – त्रिविधरोगविशेषविज्ञानीयं विमानम् । | १९९ |
| | पञ्चमोऽध्याय: – स्त्रोतो विमानम् । | २२८ |
| | षष्ठोऽध्याय: – रोगानीकं विमानम् । | ३०६ |
| | सप्तमोऽध्याय: – व्याधितरुपीयं विमानम् । | ३३० |
| | अष्टमोऽध्याय: – रोगभिषग्जितीयं विमानम् । | ३४७ |
| १० | वैधर्म्यस्थानानां विवेचनम् – Editing Stage | ५०३ |
| | वैधर्म्याणां सूचि: – | ५०३ |
| | वैधर्म्याणां ऊहापोहम् – | ५०७ |
| ११ | शास्त्रीयअनुसंधान: पद्धत्या निश्चय: – Vetting Stage<br>Meta Analysis stage & statistical analysis | ७१४ |
| १२ | ऊहापोह: – Discussion | ७३८ |
| | टीकानाम् अभ्यासपद्धतीनां विवरणम् | ७३९ |
| | अध्ययनपद्धति: | ७४० |
| | टीकालेखनस्य आवश्यकता – कालत: ऐतिहासिकं विवेचनम् | ७४६ |
| | ऐतिहासिकम् अध्ययनम् – भौगोलिक: सन्दर्भ: | ७५१ |
| | टीकानाम् अध्ययनस्य महत्त्वम् | ७५७ |
| | टीकालेखनस्य उद्देश: | ७५९ |
| | विमानस्थानस्य वैशिष्ट्यम् | ७६१ |
| | टीकानां टीकाकाराणां च वैशिष्ट्यानि | ७७१ |
| | वैधर्म्यम्–सारतरोच्चय: | ७७६ |

| | | |
|---|---|---|
| | वनस्पतिजद्रव्यनामसंज्ञावैधर्म्यम्<br>पाठभेदविचारा:<br>टीकानां तौलनिकाभ्यासस्य महत्वम्<br>Knowledge Gaps – ज्ञानविकल्पभेदं अन्तरम् | ७८५<br>७८६<br>७८९<br>८०६ |
| १३ | अध्ययन निष्कर्ष: – Conclusion | ८१३ |
| १४ | सारतरोच्चय: – Summary | ८२३ |
| १५ | परिशिष्टानि –<br>परिभाषा<br>पाठभेदा:<br>तन्त्रयुक्ति:<br>चरकसंहिताया: टीका<br>टीकानाम् अध्ययने अधिगम्यानि विषयानि ।<br>व्याकरणसन्दर्भ:<br>टीकाकारै: उल्लेखिता: अन्ये आचार्या: ।<br>टीकाकारै: वर्णिता: आयुर्वेदेतर अन्यशास्त्राणां सन्दर्भा:<br>समानतन्त्रप्रत्यय:<br>द्रव्यनामसंज्ञा – टीकाकारै: वर्णिता: 'इति लोके' सन्दर्भा:<br>वमनादीनां द्रव्याणां कल्पसंग्रह:<br>वनस्पतिनां टीकाकारकृतविवरणे वैधर्म्याणि<br>वनस्पतिनां पाठभेदा: | ८२४<br>८२४<br>८९१<br>९३९<br>९४३<br>९४५<br>९४६<br>९५०<br>९५४<br>९६२<br>९७०<br>९७२<br>९८३<br>९८६ |
| १६ | सन्दर्भ: सूचि: | ९८८ |

# अध्ययनस्य प्रस्तावना

चरकसंहितायाः महत्त्वं विचारपद्धतिं च स्पष्टीकुर्वन्त्यः / वर्णयन्त्यः नैकाः टीकाः सन्ति । उदाहरणार्थं 'जलकल्पतरुः' 'आयुर्वेददीपिका' 'चरकोपस्कारः' 'चरकतत्वप्रदीपिका' इत्यादयः । तन्मध्ये चरकसंहितायाः सुप्रसिद्धः टीकाकारः चक्रपाणिः अस्ति । परं अन्यैः विचारांशैः अपरे टीकाकाराः यथा गङ्गाधरः शिवदाससेनः जेज्झटः योगीन्द्रनाथसेनः गयदासः च एते अपि महत्वम् अर्हति । अतः पण्डितैः चिकित्सकैः च एताः टीकाः तुलयित्वा वाचनीयाः उपयोजितव्याः च ।

चरकसंहितायाम् एतादृशाः तुलनात्मकाः टीकाग्रन्थाः न उपलब्धाः अतः टीकाकाराणां विविधानि मतानि योग्यतया न ज्ञायन्ते ।

अस्य मूलकारणम्

१) संहितागताः पाठभेदाः ।

२) स्थलकालाभ्यां खण्डितः ज्ञानप्रवाहः ।

३) ग्रन्थानाम् अनुपलब्धिः तथा ज्ञानपरम्पराणाम् अभावः ।

४) टीकानाम् अध्ययने अज्ञानम् अनादरः च ।

५) संस्कृतभाषायाः ज्ञानस्य अभावः ।

१) संहितागताः पाठभेदाः ।

– योनिव्यापदसन्दर्भे अतिस्त्रावं नियतुम् औषधिविशेषाणां क्राथः कथितः अस्ति । अत्र जेज्झटेन स्वीकृतः पाठभेदः चक्रपाणेः पाठभेदान् बह्वंशेन भिन्नः । उदाहरणार्थम्

करीरधवनिम्बार्कबूकपुल्लासजाम्बवैः । जेज्झट च. चि. ३०–८२

करीरधवनिम्बार्कवेणूकोशाम्रजाम्बवैः । चक्रपाणि च. चि. ३०–८२

– जेज्झटः बूकपुल्लासद्रव्ये: असूचयत् । पुल्लासस्य अयम् एकमेव संदर्भः तेन केवलं चक्रपाणेः संहिताम् अनुसरन्तः पण्डिताः अस्याः सूचनायाः वञ्चिताः ।

२) <u>स्थलकालाभ्यां खण्डित: ज्ञानप्रवाह: –</u>

<u>देशकालत: उत्पन्ना: ज्ञानविकल्पभेदम् अन्तरम्</u>




यदि वयम् इदं रेखापटं पश्याम: तदा चरकसंहिताया: बहव: टीकाकारा: विभिन्नेषु कालेषु स्थानेषु च सन्ति इति निष्कर्षितुं शक्यम् । तासां भौगोलिकवैविध्यात् तथा कालविभिन्नतया चरकसंहिताया: विभिन्नेषु स्थानेषु टीकाकाराणां मतभेदा: सन्ति । अत: अनेन खण्डितेन ज्ञानप्रवाहेण चरकसंहिताया: पण्डित: संभ्राम्येत् । अत: एतासां टीकानां विविधांगै: तुलनात्मक: अभ्यास: आवश्यक: ।

३) <u>साहित्यस्य (ग्रन्थानाम्) अनुपलब्धि: तथा ज्ञानपरम्पराणाया: अभाव: ।</u>

– एतासु टीकासु कै. यादवजी त्रिकमजी आचार्येण सम्पादिता चक्रपाणिटीका (आयुर्वेददीपिका) एव सर्वत्र पण्डितेभ्य: उपलब्धा अस्ति । परम् अन्या: टीका: सहजतया न उपलब्धा । तासु काश्चन अप्रकाशितहस्तलिखितस्वरुपेण सन्ति अथवा प्रकाशिता: तथापि न उपलब्धा: । अत: वयं ता: सहजतया अध्येतुं न शक्नुम: । अत: एव टीकानां तुलनात्मक: अभ्यास: कर्तव्य: ।

– नैकै: कारणै: ज्ञानस्य प्राचीना गुरुशिष्यपरम्परा खण्डिता । तेनैव संहिताया: प्रमादरहिता ज्ञानप्राप्ति: कठिना ।

– अपि च यद् अद्यापि न भूतं तादृशं महत्वपूर्णं कार्यमस्ति यद् एतासां टीकानां तुलनात्मक: अभ्यास: । अत: अस्माभि: एता: टीका: तौलनीकरुपेण अभ्यासनीया: ।

योगेन्द्रनाथसेनमहोदयस्य मतम्

मन्दभाग्यात् गङ्गाधरसंहितायाः आवृत्याः टीकादृष्ट्या तुलना, पुनर्शुद्धिः च अद्ययावत् न अभवताम् । परिणामतः प्रमादाः अपबोधाः च तस्मिन् प्रविष्टाः । पश्चात् कृतप्रयत्नः न कोऽपि सम्पादकः एतां संहितां तोलयित्वा सुबोधान् प्राप्तुं गम्भीरतया प्रयत्नवान् । तथा एतद् स्पष्टं यत् चरकस्य छात्राणां कृते एषः महावरोधः (योगिन्द्रनाथ सेन – चरकोपस्कारटीका प्रस्तावना )

४) **टीकानाम् अध्ययने अज्ञानम् अनादरः च** ।

– संहिताग्रन्थानां सूत्रेषु टीकाः नाम भाष्यस्वरुपेण कृतं विवेचनम् । तासाम् अध्ययनेन गर्भितार्थाः स्पष्टीभवति । परं टीकाभ्यासः अतीव आवश्यकः इति सद्यस्थितौ आयुर्वेदस्य सामान्यछात्राः न ज्ञायते । किं बहुना एषः विचारः तेषां कर्णपथम् अपि न आयाति ।

– आधुनिकस्य विज्ञानस्य प्रभावेण तथा संस्कृतभाषायाः ज्ञानाभावेन टीकाभ्यासविषये अनादरः उत्पद्यते । अतः मूलतः टीकानाम् अध्ययनं न भवति । तथैव तौलनिकम् अध्ययनं तु विरलतया एव दृश्यते ।

५) **संस्कृतभाषायाः ज्ञानस्य अभावः** ।

– सम्प्रति आङ्ग्लप्रधानशिक्षणप्रणाल्या संस्कृतभाषायाः अनध्ययनम् अथवा तद्विषये भयम् इति दृश्यते । आयुर्वेदस्य संहिताग्रन्थाः तथा तेषु रचिताः टीकाः संस्कृतभाषायां एव शब्दबद्धाः सन्ति । संस्कृतभाषायाः ज्ञानाभावात् तथा अनध्ययनात् एतेषां ग्रन्थानां टीकानां च अध्ययनम् अशक्यम् ।

**विमानस्थानस्य महत्वम् ।**

चरकसंहितायां अष्टस्थानानि सन्ति । तेषु विमानम् इन्द्रियं च विशेषे स्थाने । विमानस्थाने आयुर्वेदचिकित्सायाः महद्घटकाः वर्णिताः । विमानस्थाने अष्ट अध्यायाः सन्ति । तेषु केचन विशेषाः घटकाः वर्णिताः । उदाहरणार्थम् – स्रोतस्, वादमार्गपदानि, आहारः, अनुमानं, प्रमाणं, जनपदोद्ध्वंसः इत्यादीनि । अपि च एतेषां स्थानानां टीकाः निदानचिकित्साशारीरादि विषये महत्वपूर्णाः । अतः अधिकम् अनुषंगिकज्ञानार्थं विमानस्थानस्य उपलब्धाः टीकाः तोलयित्वा अभ्यासनीयाः ।

# लक्ष्यम् उद्देशा: च (AIMS & OBJECTIVES)

## लक्ष्यम्

चरकसंहिताया: विमानस्थानस्य उपलब्धा: टीका: तोलयित्वा अभ्यासनीया: ।

## उद्देशा:

१) टीकानाम् अभ्यासपद्धतीनां सावधानं सविस्तरं च पुरस्करणम् ।

२) टीकानां महिमा प्रस्थापना ।

३) शब्दार्थाभिप्रेतार्थयो: सावधानस्पष्टीकरणाय ज्ञानविकल्पभेदं अन्तराणां पूर्तता ।

४) टीकागतानां वैधर्म्याणां अभ्यास: ।

## अध्ययनसामग्री अध्ययनपद्धति:च (MATERIALS & METHODOLOGY)

### अध्ययनसामग्री (MATERIALS)

उपरोक्तानां टीकाकाराणां विमानस्थाने कृता: केवलम् अधोक्ता: टीका: उपलब्धा: ।

१) चक्रपाणि: – आयुर्वेददीपिका

– प्रकाशनम् – चौखम्भा प्रकाशनम्, वाराणसी

– सम्पादक: – यादवजी त्रिकमजी आचार्य:

२) गङ्गाधर: – जल्पकल्पतरु:

– प्रकाशनम् – चौखम्भा प्रकाशनम्, वाराणसी

– सम्पादक: – कविराज: नरेन्द्रनाथ: सेनगुप्त:

– कविराज: बलाईश्चन्द्र: सेनगुप्त:

३) योगीन्द्रनाथसेन: – चरकोपस्कार:

– प्रकाशनम् – जे.एन्.सेन, कलकत्ता, १९४५

– सम्पादक: – स्वयम् ।

४) ज्योतिषचन्द्रसरस्वति: – चरकप्रदीपिका

– प्रकाशनम् – मोतीलाल: बनारसीदास:, लाहौर, प्रथम संस्करण १९१८

– सम्पादक: – स्वयम्

एता: चतस्त्र: टीका: उपलब्धा: सन्ति । अत: अध्ययनार्थं ता: स्वीकृता: ।

### अध्ययनपद्धति: (METHODOLOGY)

अध्ययनप्रकार : सैन्धान्तिकअनुसंधान: – Fundamental research

तस्य अवस्था: अधोक्तवत् –

१) टीकाया: निर्वाचनम् – Collection of commentaries

२) विमानस्थानस्य तौलनिकअध्ययनम्

Comparative reading of commentaries of each Adhyaya.

३) तौलनिकअध्ययनस्य पद्धति: – Comparison –

i) Retrival – व्याकरणपदार्थ:, ग्रन्थशैलि: तन्त्रयुक्ति: इ.

ii) Revival – संहिता टीका: च अभ्यसनीया: तासां पूर्णरुपेण परिशीलनम्

iii) Transliteration – अतीतावेक्षणं / अनागतावेक्षणं स्वतन्त्रप्रत्यय:

iv) Technical correlation – परतन्त्रप्रत्यय:

v) Translation – सर्वासां टीकानां विवेचनम्

vi) Editing – वैधर्म्यस्थानस्य विवेचनम्

– अनावश्यकानां घटकानां निषेध:

– साधर्म्यस्य अध्यवसानम्

vii) Vetting – शास्त्रीयअनुसंधान: पद्धत्या निश्चय:

viii) Review – सर्वअध्ययनस्य पुनरवलोकनम्

ix) Publication – अध्ययननिष्कर्षस्य प्रकाशनम्

४) Interpretation – सर्वअध्ययनस्य ऊहापोह:

५) Critical comments – सर्वे अध्ययने शास्त्रोक्त: विवेचनात्मक: निर्णय:

(i) Retrieval Stage - व्याकरणपदार्थ:, ग्रन्थशैलि: तन्त्रयुक्ति: इ.

अत्र संहिताया: पूर्णतया अभ्यास: क्रियते ।

१) शैली – अ) भाषाशैली ब) रचनाशैली

– वृत्तानि अलंकारादि व्याकरणं, छन्दासि, गद्यपद्यमयता, समासा: उपमा रुपक उत्प्रेक्षा यमका: वाक्यशैली (चूर्णकम् उत्कलिका आविद्धम्) उक्ति: व्युत्पत्ति: निरुक्ति: इत्यादय: ।

२) तन्त्रयुक्ति:

३) पंचायवयवाक्यम् प्रमाणं प्रमेयं वादमार्गपदानि इत्यादय:

४)परिभाषा–लक्षणं द्रव्यं रोग: च एतेषां विषयाणां नानाविधपरिभाषाणां सङ्कलनं तथा विवेचनम् ।

यथा आनाह मलविबन्धनम् । गङ्गाधर: टीका च. सू. १७

उदर्द उरोऽभिषन्द: उदर्द: । योगीन्द्रनाथ सेन च. सू. ४–१२

(ii) Retrieval Stage - संहिता टीका: च अभ्यसनीया: तासां पूर्णरुपेण परिशीलनम्

१) चरकसंहिताया: रचना ।

२) चरकसंहिताया: ऐतिहासिकम् अध्यापनम् ।

३) चक्रपाणिटीका – सम्पूर्णा टीका उपलब्धा ।

४) गङ्गाधरटीका – सम्पूर्णा टीका उपलब्धा ।

५) योगीन्द्रनाथ सेन – कल्पं, सिद्धि: चिकित्सा १५–३० विहाय ।

६) ज्योतिषचन्द्रसरस्वति – सूत्रस्थानं निदानस्थानं विमानस्थानं शारीरस्थानं उपलब्धा ।

विमानस्थानगतविषयान् अधिकृत्य परस्परसन्दर्भार्थं टीकादृष्ट्या सर्वासाम् उपलब्धानां टीकानाम् अभ्यास: भविष्यति: ।

(iii) Transliteration Stage - स्वतन्त्रप्रत्यय: (अतीतावेक्षणं / अनागतावेक्षणम्)

– इत्यर्थ: यद् शास्त्रस्य अभ्यास: प्रचलति तत् सम्बन्धिनां अन्यग्रन्थानां सन्दर्भा: विमर्शितव्या: ।

अस्य अपि प्रकारद्वयम् ।

अ) तस्मिन् एव ग्रन्थे अन्यत्र उल्लिखितानां सन्दर्भानां दर्शनम् ।

उदाहरणार्थम् – चरकसंहिताया: विमानस्थानस्य पञ्चमे अध्याये 'विमार्गगमनम्' इति विषये टीकाकारेषु वैधर्म्यं दृश्यते । तदा 'विमार्गमगनम्' इत्यस्य चरकसंहितायां अन्यत्र उल्लिखिता: सन्दर्भा: विमर्शितव्या: ।

एतद् एव अतीतावेक्षणं अनागतवेक्षणं च तन्त्रयुक्ति: इति वदन्ति ।

आ) वर्ण्यविषयस्य शास्त्रविषये अन्यग्रन्थस्था: सन्दर्भा: विचारणीया: ।.

उदाहरणार्थम् 'विमार्गगमनम्' इत्यस्य सुश्रुतसंहिता, अष्टाङ्गहृदयम् आदिषु अन्येषु ग्रन्थेषु सन्त: सन्दर्भा: विचारणीया:।

(iv) Technical Correlation Stage - परतन्त्रप्रत्यय:

– वर्ण्यविषयस्य शास्त्रात् भिन्नेषु अन्येषु सर्वशास्त्रेषु ये सन्दर्भा: तान् अन्विष्य विमर्शितव्या: ।

उदाहरणम् – 'विमार्गगमनम्' इति पदस्य आयुर्वेदस्य व्यतिरिक्ते दर्शनसाहित्यकाव्यादिषु शास्त्रेषु ये सन्दर्भा: मिलन्ति तेषां विचार: करणीय: ।

'धातुपाकः' इति विषयानुषङ्गेन 'पाक' पदस्य अर्थाः पाकशास्त्रं लौहशास्त्रं धातुवादः खगोलशास्त्रम् आहारशास्त्रं साहित्यम् इत्यादिभ्यः आवश्यकेभ्यः शास्त्रेभ्यः गवेषणीयाः ।

– इत्यर्थः प्राचीनश्रेष्ठसंहितागतान् सम्बन्धितान् संदर्भात् संलक्ष्य सहसम्बन्धाः द्रक्ष्यन्ते / दर्शयिष्यते । तस्याः संहितायाः सूत्रपदयोः सम्बधं तथा टीकाकाराणां विभिन्नमतेषु सम्बधं च एते स्थापयिष्यतः ।

उदाहरणार्थम् – गङ्गाधरस्य न्यायदर्शनम् ।

– कणादस्य सिद्धान्तः ओजसः सिद्धान्तः च । साङ्ख्यदर्शनम् सामान्यविशेष न्यायः च ।

कणादकृत परमाणुवादः वातसंकल्पना च इत्यादयः । स्वभावोपरमवादः बुद्धदर्शनं च ।

उदाहरणार्थम् – आयुर्वेदावतरणम् – च. सू. १ प्रतिसंस्कारे चरकेण लिखितं ''पौराणिक छाया'' । यतः पुराणचरकयोः समानः कालः । (भारतीय संस्कृतिकोषः पुराणं तथा चरकः)

च. चि. १/४ – आयुर्वेदसमुत्थानीयः अग्निवेशकृतः स्यात् । यतः तत् काश्यपसंहिताविवरणेन सह साम्यं दर्शयति ।

v) Translation – सर्वासां टीकानां विवेचनम्

vi) Editing – वैधर्म्यस्थानस्य विवेचनम् अनावश्यकानां घटकानां निषेधः

– साधर्म्यस्य अध्यवसानम्

vii) Vetting – शास्त्रीयअनुसंधानः पद्धत्या निश्चयः ससाक्षं परीक्षा

– अस्याम् अवस्थायां Meta Analysis क्रियते ।

– तौलनीकअभ्यासानन्तरं कृतं निरीक्षणानुसारं निरीक्षणवृत्तं स्थाप्यते ।

– न्यूनातिन्यूनं स्वीकृतिः त्रयः विव्दांसः ये वैद्याः अथवा चरकसंहितासंस्कृतयोः पण्डिताः तेभ्यं प्राप्स्यते ।

- statistical test - correlation test is applied for meta analysis.

viii) Review – सर्वअध्ययनस्य पुनरवलोकनम्

ix) Publication – अध्ययननिष्कर्षस्य प्रकाशनम्

# अध्ययनपद्धतिः – पूर्वपीठिका

– अस्मिन्नध्ययने चरकसंहितायां विमानस्थानविषये चतस्रां टीकानां तौलनिकः अभ्यासः कृतः ।

– टीकानां तौलनिकाभ्यासं कृत्वा यत्र वैधर्म्याणि दृष्टानि तेषां समन्वयः यथाशक्ति यथामति च निराकरणार्थं प्रयतितम् ।

– एताः टीकाः अध्ययनार्थं स्वीक्रियमाणाः याः मुद्रिताः सन्ति तासामेव उपयोगः कृतः ।

– हस्तलिखितटीकानाम् उपयोगः अस्मिन् अध्ययने न कृतम् ।

– प्रत्येकः अध्यायः अधिकरणानुसारं विभज्य तत्रस्थानाम् उपाधिकरणानुसारं टीकानां तौलनिकः अभ्यासः कृतः ।

– तं प्रत्येकम् उपाधिकरणम् अनुसृत्य तत्र दृश्यमानानि वैधर्म्याणि उल्लिख्य पश्चात् भिन्ने प्रकरणे वैधर्म्याणां सविस्तरं विवेचनं कृतम् ।

– चक्रपाणिकृता आयुर्वेददीपिका इति टीकानाम् आधारभूतां प्रथमां टीकां मत्वा पश्चात् अन्यासां टीकानां विवेचनं कृतम् ।

– टीकानां कालक्रमेण यथाक्रमं प्रत्येकस्मिन् अधिकरणे टीकानां विवेचनं कृतम् ।

– तस्मिन् अधिकरणे चरकसंहितायाः सूत्रे विवरणमस्ति । तं वर्णयित्वा अनन्तरं क्रमेण टीकाकाराणां विवेचनं कृतम् ।

अधिकरणम् – उपाधिकरणम्
↓
चरकसूत्रवर्णनम्
↓
१) चक्रपाणिः
२) गङ्गाधरः
३) योगेन्द्रनाथः सेनः
४) ज्योतिषचन्द्रः सरस्वतिः
↓
साधर्म्यं वा वैधर्म्यं

अनया पद्धत्या विमानस्थानगतानां सर्वेषाम् अष्टाध्यायानां विवेचनं कृतमस्ति ।

– श्लोकानां क्रमाङ्काः चक्रपाणिटीकायां वर्णितक्रमाङ्कानुसारं सन्ति ।

– सम्पूर्णम् अध्ययनं तथा तस्य विवेचनं संस्कृतभाषायां कृतम् । किन्तु यद् स्थाने कोशस्य अथवा आधुनिकशास्त्रस्य सन्दर्भा: सन्ति तत्र आङ्ग्लभाषाया: उपयोग: कृत: । मुद्रितटीकानां सम्पादनं कुर्वता सम्पादकै: क्वचित् पाठभेदा: उल्लेखिता: । तेषां पाठभेदानां विचार: अस्मिन् अध्ययने न कृत: ।

– किन्तु यत्र टीकाकारै: मूलसूत्रे पाठभेदं गृहीत्वा टीका कृता अस्ति तत्र एतेषां पाठभेदानां विचार: कृत: ।

– सम्पूर्णे विमानस्थाने पाठभेदानां सङ्कलितं वर्णनं कृतमस्ति । तस्मात् संशोधकेभ्य: भविष्यकाले अध्ययनार्थं विषया: प्राप्स्यन्ति ।

## **Retrieval – व्याकरणपदार्थ:, ग्रन्थशैलि: तन्त्रयुक्ति: इ**

– अध्ययनस्य एतस्यां प्रथमावस्थायां य: ग्रन्थ: (तन्त्रं / शास्त्रं) अथवा तद् ग्रन्थस्य एक: भाग: अध्ययनार्थं स्वीकृत: अस्ति , तस्य सम्पूर्णं परिशीलनम् आवश्यकम् ।

– एतद् अन्तर्गतम् अग्रिमाणां घटकानां समावेश: भवति ।

१) ग्रन्थरचनाया: शैली

२) व्याकरणसन्दर्भ:

३) भाषाविषयकसन्दर्भ:

४) तन्त्रयुक्तिसन्दर्भ:

५) उपयोजिता परिभाषा

– अस्मिन् अध्ययने चरकसंहितायां विमानस्थानं तथा तस्योपरि चतसृणां टीकानां विमर्श: भविष्यति ।

– तदा अस्मिन् अवस्थायां उपरोक्तघटकानाम् आधारेण चरकसंहिता–विमानस्थानं तथा तस्य चतसृणां टीकानां परिशीलनं करवाम ।

– येन ग्रन्थस्य तथा टीकानां महत्त्वं,वैशिष्ट्यं उपयोगित्वं च एतेषां प्रत्यय: भवति ।

– चरकसंहिताया: शैलीं बोधनात् पूर्वं संहिता आयुर्वेद: उपवेद: इत्यादीन् विमर्शामहे ।

१) संहिता – संहिताया: विविधानि लक्षणानि अग्रिमानुसारम् –

अ) पर: सन्निकर्ष: संहिता । (पाणिनिसूत्रम् १ । ४ । १०९)

स्वराणां स्वरसंमिश्रव्यञ्जनानां च परस्परस्वाभाविकार्धमात्रापेक्षया अधिककालस्य व्यवधानेन उच्चारणं नाम संहिता ।

आ) पदप्रकृति: संहिता । (यास्कनिरुक्तम् १ । ६ । १२)

अस्य द्विविधौ अर्थौ निष्पन्नौ भवत: ।

१.पदानां संधीयमानानां प्रकृति: संहिता । षष्ठीतत्पुरुषसमास: । परस्परसन्धीभावां प्राप्तवताम् अनेकपदानां एकत्रीकरणस्य हेतु: नाम संहिता ।

संहिता प्रकृति: अस्ति तथा पदं तस्य विकृति: इति ।

२.पदान्येव प्रकृतिर्यस्या: सा संहिता । बहुव्रीहिसमास: । पदम् इति प्रकृति: संहिता तस्य विकृति: च ।

इ) संहन्यन्ते एकत्रीक्रियन्ते मन्त्रा: सूक्तानि वा अस्यां सा संहिता । मन्त्रं सूक्तं च एकत्रीकृत्य या सिध्यति सा संहिता इति ।

ई) एकपदद्विपदत्रिपदचतु:पदानेकपदा: पादा: वर्णानामेक: प्राणयोग: संहिता ।

(कात्यायनाचार्येण कृत प्रातिशाख्य१ । १५७,१५८)

एकद्वेत्रीभि: अथवा अनेकपदै: युक्ता: पादा: तस्मिन् वर्णेभ्य: एक: प्राणयोग: अस्ति सा संहिता ।

उ) संहितायाः प्रकारा: –

– संहिताया: प्रकारा: अग्रिमानुसारं सन्ति ।




ऊ) तन्त्रं संहिता च ।

– यद् सूत्ररुपे निबद्धम् अस्ति , तद् तन्त्रम् इति भाषते ।

तन्त्रणात् तन्त्रम् ।

यस्मिन् विषयाणां पदानां च सूत्रबद्धा तन्त्रणा अस्ति ।

– प्रत्युत या भाष्यरुपे निबद्धा अस्ति सा संहिता इति भणति ।

अग्निवेशस्य तन्त्रम् आसीत् । चरकेण तस्मिन् भाष्यात्मकं प्रतिसंस्कारं कृत्वा तस्मै तन्त्राय संहिताया: स्वरुपं प्रापितम् ।



ए) कस्यापि विषयस्य सर्वेषां वर्णनीयानां विषयाणां यस्मिन् विवेचनम् अस्ति तां संहिता इति भाषते उपरिगतानां सर्वसंहितानां लक्षणानि चरकसंहितायां दृश्यन्ते अतः एव चरकसंहिता संहिताग्रन्थः अस्ति ।

३) वेदः

– विद् (भावः , कर्म, करणम्) + घञ्

अस्य अर्थः ज्ञानं, ज्ञानस्य विषयः, ज्ञानस्य साधनम् इति भवति ।

– वेद्यन्ते ज्ञाप्यन्ते धर्मादिचतुष्टयोपाया येन स वेदः ।

धर्मादिचतुर्विधपुरुषार्थाणां प्राप्तेः उपायाः यस्य द्वारा कथिताः सन्ति तस्मै 'वेदः' इति वदति ।

– इष्टप्राप्त्यनिष्टपरिहारलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । (सायणाचार्यः)

इष्टप्राप्तेः अनिष्टपरिहारस्य च लौकिकाः उपायाः यस्मिन् ग्रन्थे वर्णिताः सन्ति तं 'वेदः' इति उच्यते

३) आयुर्वेदः

– आयुषो वेदः आयुर्वेदः ।

–वेदस्य व्याख्यायाम् 'आयुः' इति पदस्य अनुबन्धं योजित्वा अग्रिमानुसारं व्याख्याः कर्तुं शक्यते ।

– आयुषः ज्ञानं वा आयुषः ज्ञानस्य विषयः वा आयुषः ज्ञानस्य साधनम् ।

– चतुर्विधपुरुषार्थाणां प्राप्तये सुखायुः हितायुः दीर्घायुः च प्राप्तेः साधनं नाम आयुर्वेदः ।

– आयुषः सन्दर्भे इष्टप्राप्तेः उपायाः तथा अनिष्टपरिहारस्य उपायाः यस्मिन् वर्णिताः तम् आयुर्वेदः इति वदति ।

– हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते । च. सू. १

– आयुर्वेदः उपवेदः अस्ति । अथर्ववेदस्य उपवेदः इति आयुर्वेदः प्रसिद्धः अस्ति ।

४) आयुर्वेदस्य तथा चरकसंहिताया: विमानस्थानस्य साहित्ये स्थानं –




ग्रन्थशैली –

प्रत्येकस्य ग्रन्थस्य स्वस्य एकविशिष्टा शैली अस्ति । एषा शैली द्विविधा अस्ति ।

– अ) रचनाशैली

आ) भाषाशैली

१) चरकसंहिता (मूलत: अग्निवेशतन्त्रम् )संस्कृतभाषायां रचिता अस्ति ।

२) ब्रह्मणा एतद् सूत्रस्वरुपिणम् आयुर्वेदं स्मृत्वा तद् प्रजापतये दक्षाय दत्तम् । अमुना अश्विनीकुमाराभ्याम् अमुभ्यां च इन्द्राय दत्तम् । इन्द्रात् एतद् ज्ञानं महर्षिषु सम्क्रमितम् । तस्मिन् पुनर्वसुआत्रेयेण एतस्य सूत्रस्वरूपस्य ज्ञानस्य उपदेश: अग्निवेशादिभ्य: शिष्येभ्य: कृत: । अग्निवेशतन्त्रं सूत्रबद्धपद्धत्या रचितमासीत् । आचार्येण पुनर्वसुआत्रेयेण कृतोपदेश: अग्निवेशेन सूत्रपद्धत्या रचित: ।

– अस्मिन् सूत्रस्वरुपे तन्त्रे महर्षिणा चरकेन भाष्यस्वरुपात्मक: प्रतिसंस्कार: कृत: ।

– कालान्तरेण सप्तदश अध्यायानां सम्पूरणम् आचार्येण दृढबलेन कृतम् ।

सूत्रस्वरुपम् अग्निवेशतन्त्रम्

↓

भाष्यस्वरुपा चरकसंहिता

↓

सम्पूरणम् – दृढबल:

– एवं रीत्या चरकसंहिता सूत्रभाष्यस्वरुपात्मकं वर्तते । तथैव यन्मध्ये संग्रहस्वरुपात्मका: विषय: अपि प्रतिसंस्कारसमये समाविष्टा: । एवं प्रकारेण चरकसंहिता सूत्रभाष्यसंग्रहस्वरुपात्मका अस्ति ।

सुप्रणीतसूत्रभाष्यसंग्रहक्रमम् । च. वि. ८ । ३

त्रिविधस्यायुर्वेदसूत्रस्य ससंग्रहव्याकरणस्य । च. सू. २९ । ७

– मूलत: एषा संहिता सूत्ररुपेण वर्तमान इति उल्लेखा: ग्रन्थे दृश्यन्ते ।

श्रुत्वा सूत्रणमर्थानाम् । च. सू. १ । ३४

सूत्रकृतामृषीणाम् । च. शा. ६ । १८

तत्रायुर्वेद: शाखा विद्या सूत्रं ज्ञानं शास्त्रं लक्षणं तन्त्रमित्यनर्थान्तरम् । च. सू. ३० । २९

३) 'इति ह स्माह भगवानात्रेय: ।' इति सूत्रद्वारे अध्यायस्य–प्रारभणस्य चरकसंहिताया: एषा शैली ब्राह्मणकालस्य अन्त: तथा उपनिषद्कालस्य प्रारम्भ: एतयो: कालयो: पद्धत्यनुसारम् अस्ति ।

४) अध्याये वर्णिते प्रथमशब्दात् अध्यायस्य नामकरण–शैली अपि प्राचीना अस्ति ।

उदा– कियन्त:शिरसीय:, अष्टोदरीय:, आत्रेयभद्रकाप्यीय: इत्यादय: ।

५) चतुष्पादरचना –

– चरकसंहिताया: चिकित्सास्थानस्य आदौ द्वौ अध्यायै 'रसायनम्' 'वाजीकरणम्' च एतयो: रचना चतुष्पादेषु कृता अस्ति ।

–एवं पद्धत्या रचना पद्धति: वैदिककालस्य अस्ति । एषा शैली ब्राह्मणकाले अधिका विस्तृता ।

– छांदोग्यउपनिषदि ३ । १८ । २ ब्रह्मचतुष्पादस्य वर्णनमस्ति ।

– तदेच्चतुष्पाद ब्रह्म वाक् पाद: प्राण: पाद: चक्षु पाद: श्रोतं पाद: इत्यध्यात्मम् ।

(छांदोग्यउपनिषद् ३ । १८ । २)

– गायत्री चतुष्पादा अस्ति । एतस्य वर्णनम् अपि छान्दोग्यउपनिषदि वर्तते ।

सैषा चतुष्पदा ------- गायत्री । (छान्दोग्यपनिषद् ३ । १२ । ५)

– तथैव माण्डूक्योपनिषदि वैश्वानरः,तैजसः,प्राज्ञः,तुरीयः च एवं ब्रह्मणाः चत्वारः पादाः वर्णिताः सन्ति । (माण्डूक्योपनिषद् २ –७)

– मनुस्मृतौ तथा चरकसंहितायां धर्मः चतुष्पादः अस्ति इति वर्णनमस्ति ।

– पाणिनिकृता अष्टाध्यायी अपि चतुष्पादस्वरुपात्मका अस्ति ।

– तदा चरकसंहितायां एतस्या शैल्याः प्रतिबिम्बं दृश्यते ।

६) चतुष्करचना –

– चरकसंहितायाः सूत्रस्थानस्य रचना ७ चतुष्कः २ सङ्ग्रहाध्यायौ च एवं प्रकारेण कृता अस्ति ।

– एकस्मिन् चतुष्के चत्वारः अध्यायः सन्ति । प्रत्येकस्य चतुष्कस्य एकः विषयः सन् तस्मिन् तत्सम्बन्धिनः वर्णिताः अध्यायाः समावेशिताः सन्ति ।

– एवं प्रकारस्य रचना अपि उपनिषद्कालस्य अस्ति ।

७) उपनिषत्सु 'सौम्य' इति पदेन शिष्यः सम्बोधितः । एवं प्रकारेण चरकसंहितायाम् अपि अग्निवेशाय 'सौम्य' इति सम्बोधनं दत्तम् । सन्दर्भ – च. वि. ३ । ४

८) 'स्कन्धः' इति पदम् अपि उपनिषद्कालस्य अस्ति ।

छान्दोग्योपनिषदि २ । २३ । १ 'त्रयो धर्मस्कन्धाः ।' एवं वर्णनमस्ति ।

तथैव चरकसंहितायाम् आयुर्वेदाय 'त्रिस्कन्धाः' इति विशेषणं प्राप्तम् । एवमेव अन्येषु स्थानेषु अपि स्कन्धः इति पदस्य योजना दृश्यते । उदा – मधुरस्कन्धः, अम्लस्कन्धः ( च. वि. ८)

विमानस्थानस्य रचनाशैली

– विमानस्थानं चरकसंहितायाः तृतीयं स्थानम् अस्ति ।

– निदानस्थानानन्तरं तथा शारीरस्थानस्य पूर्वं विमानस्थानं वर्णितम् ।

– विमानस्थाने आकलय्य ८ अध्यायाः सन्ति ।

– दोषादीनां घटकानां विशेषज्ञानार्थम् एतद् स्थानं वर्णितम् ।

– चरकसंहितायाः वैशिष्ट्यपूर्णं स्थानम् ।

– विमानस्थानस्य रचनाशैली:

| अध्याय: | वर्णनस्य पद्धति: |
|---|---|
| १ | उपदेश: |
| २ | उपदेश: |
| ३ | उपदेश: तथा प्रश्नोत्तर: |
| ४ | उपदेश: |
| ५ | उपदेश: |
| ६ | उपदेश: |
| ७ | उपदेश: तथा प्रश्नोत्तर: |
| ८ | उपदेश: |

– उपदेशस्वरुपात्मका प्रश्नोत्तरात्मका च वर्णनपद्धती स्त: । सम्भाषात्मकं विवेचनं विमानस्थाने नास्ति ।

– उर्वरितरचनाया: वैशिष्ट्यानि अग्रिमे Revival stage मध्ये वर्णितानि सन्ति ।

भाषाशैली

– सम्पूर्णा चरकसंहिता संस्कृतभाषायां वर्णिता अस्ति ।

– संस्कृतभाषाया: अनेकविधानि वैशिष्ट्पूर्णानि सौन्दर्यस्थानानि चरकसंहितायाम् अपि दृश्यन्ते ।

– चरकसंहिता इति ग्रन्थ: सूत्रभाष्यसङ्ग्रहस्वरुपात्मकस्य विवरणस्य अस्ति ।

– चरकसंहिता ‘चम्पूग्रन्थ:’ अस्ति । यस्मिन् ग्रन्थे गद्यात्मकं तथा पद्यात्मकं उभयस्वरुपी वर्णनम् अस्ति तं चम्पूग्रन्थ: इति वदति ।

‘गद्यपद्यात्मकं चम्पूरित्यभिधीयते ।’

– काव्यं त्रिविधम् अस्ति । गद्यं, पद्यं तथा गद्यपद्ये (चम्पू) च

१. गद्यम्

– लौकिककाव्यस्य प्रकार: ।

– वैदिककालत: मध्यकालपर्यन्तम् एतद् तन्त्रं विकसितम् ।

– वृत्तबद्धोज्झितं गद्यम् ।

– यद् वृत्तेन बद्धं न भवति तद् गद्यम् । गद्ये पादक्रमं वा वृत्तं न भवति ।

– गद् धातो: एतद् पदं निर्मितम् । गद् नाम भाषणम् । तदा लौकिकभाषायां भाषणम् इति यस्य रचना अस्ति, तद् गद्यम् इति सम्बोधते ।

– चरकसंहितायाम् आकलय्य ९२९५ सूत्राणि सन्ति । तन्मध्ये आकलय्य ११५९ सूत्राणि गद्यस्वरुपात्मकानि सन्ति ।

– विमानस्थाने आकलय्य २६७ सूत्राणि गद्यस्वरुपात्मकानि सन्ति ।

– संहिता ग्रन्थ: सन् गद्यवर्णने अपि छन्दरचना अस्ति ।

– भाषाया: मुख्यकार्यं 'भावव्यक्तता' । एतद् कार्यं पद्यापेक्षया गद्ये सुगमम् ।

– गद्ये परीक्ष्यविषया: त्रिविधा: सन्ति ।

–१) शुद्धता – शब्दक्रम: महत्त्वपूर्ण:

२) योग्यता – अल्पाक्षरं , शुदिध: , स्पष्टता

३) सुन्दरता – लालित्यपूर्णा रचना, शब्दविन्यास:, शब्दरचना, विशेषणं, क्रियापदादीनि

गद्यप्रकारा:

१) मुक्तकम् – समासविरहितं लघुलघुवाक्यानि ।

उदा – अन्नं वृत्तिकराणां श्रेष्ठम् , उदकम् आश्वासकराणां क्षीरं जीवनीयानां मांसं बृंहणीयानां – ।

च. सू. २५ । ४४

– इत्येवमेते षड्रसा: पृथक्त्वेनैकत्वेन वा मात्रश: सम्यगुपज्यमाना उपकाराय भवन्त्यध्यात्मलोकस्य अपकारपरा: पुनरतोऽन्यथा भवन्त्युपयुज्यमाना: । च. सू. २६ । ४४

२) वृत्तगन्धि: – वृत्तस्य कोऽपि भाग: अस्ति ।

उदा – भगवानुवाच य इमे कुलीना: पर्यवदातश्रुता: परिदृष्टकर्मणो दक्षा: शुचयो: जितहस्ता जितात्मान: सर्वोपकरणवन्त: ––––– । च. सू. २९ । ६

३) उत्कलिकां – प्राय: गुरुगुरुसमासयुक्तानि वाक्यानि ।

उदा.– प्राणकामा: शुश्रुषध्वमिदमुच्यमानममृतमिवापरमदितिसुतहितकरमचिन्त्याद्भुतप्रभावमायुष्यमा –रोग्यकरं वयस: स्थापनं निद्रातन्द्राश्रमक्लमालस्यदौर्बल्यापहरमनिलकफपित्तसाम्यकरं स्थैर्यकरमबद्धमांसहरमन्तरग्निसन्धुक्षणं प्रभावर्णस्वरोत्तरमकरं रसायनविधानम् ।

च. चि. १/२/३

४) चूर्णक: – लघुलघुसमासै: युक्तानि वाक्यानि ।

उदा. – वायुस्तन्त्रयन्त्रधर: प्राणोदानसमानव्यानापानात्मा प्रवर्तकश्चेष्टानामुच्चावचानां नियन्ता प्रणेता च मनस: सर्वेन्द्रियाणामुद्योजक: ..... । च. सू. १२/८

– चरकसंहिताया: विमानस्थाने गद्यस्य एते चत्वार: अपि प्रकारा: दृश्यन्ते । परन्तु विशेषत: चूर्णक: तथा मुस्तक: इति प्रकारौ अत्याधिकौ ।

चरकोक्तानि गद्यवैशिष्ट्यानि

१) वाक्यानि महन्ती दीर्घानि दीर्घानि अपि नीरसानि न भवन्ति ।

२) महती वाक्यरचना अपि सरला आकर्षन्ती च ।

३) वाक्यानां वाचनं न कष्टप्रदम् ।

४) वाक्यानि न कर्णकठोराणि ।

५) ईदृशी रचना बाणभट्टस्य रचनायै साधर्म्यम् अर्हति ।

६) कादम्बरीवत् लघु लघु वाक्यानामपि चरकसंहितायां रचना वर्तते ।

७) उपनिषद्वत् लघु सरला स्पष्टा वाक्यरचना अपि दृश्यते ।

उदा.–नानृतं ब्रुयात् । नान्यस्वमाददीत । नान्यस्त्रियमभिलषेन्नान्याश्रियं न वैरं रोचयेत् न कुर्यात् पापं न पापेऽपि पापी स्यात् नान्यदोषान् ब्रुयात् .......... ।। च. सू. ८/१९

८) महाभाष्यसमाना अपि रचना अस्ति । श्लेषकूटादि अलङ्कारयुक्ता रचना नास्ति । सरलानि, स्पष्टार्थानि वाक्यानि सन्ति ।

९) व्यर्थनिरर्थकानि अक्षराणि न सन्ति । एकमपि अक्षरं विनाप्रयोजनं नास्ति ।

१०) सीमिता शब्दरचना, निश्चित: अर्थ: च स्त: । अत: विना विवक्षितम् अर्थम् अन्य: अर्थ: न शक्य: ।

२) <u>पद्यम्</u>

– चरकसंहितायां २/३ रचना पद्यस्वरुपात्मका अस्ति ।

– अतीव लालित्यपूर्णा रचना ।

– चरकेण पद्यरचनायां अनुष्टुप छन्दसः सर्वाधिकः उपयोगः कृतः । तत्पश्चात् उपजातेः ।

– चरक संहितायां आकलय्य त्रयोदश छन्दसां उपयोगः कृतः ।

| | | |
|---|---|---|
| अनुष्टुप | – | च. वि. ५/२३ |
| आर्या | – | च. सू. १ |
| इन्द्रवज्रा | – | च. सू. ३/९ |
| इन्द्रवंशा | – | च. सू. १३/११ |
| कुसुमितलतावेल्लिता | – | च. चि. १२/२० |
| पुष्पिताग्रा | – | च. वि. ८/१५५ |
| रुचिरा | – | च. वि. ८/१५६ |
| स्वगता | – | च. वि. ३/१७ |
| उपजाति | – | च. सू. २१/५८ |
| उपेन्द्रवज्रा | – | च. चि. १/१/७४ |
| वंशस्थ | – | च. चि. ५/१७ |
| वियोगिनी | – | च. सि. ११/१२ |

– विमानस्थाने अध्यायानुसारं अग्रिमानि जातिवृत्तानि उपयोजितानि सन्ति ।

| | | |
|---|---|---|
| अध्याय– | १) अनुष्टुप् | ५) अनुष्टुप् |
| | २) अनुष्टुप् उपजातिः | ६) अनुष्टुप् |
| | ३) अनुष्टुप् | ७) अनुष्टुप् |
| | ४) अनुष्टुप् | ८) अनुष्टुप्, पुष्पिताग्रा रुचिरा |

– पद्यस्य द्वे स्वरुपे स्त: ।

१) वृत्तम् – अक्षरगणना – अ) समम्

ब) अर्धसमम्

क) विषमम्

२) जाति: – मात्रागणना

चरकसंहितायां एतयो: उभयप्रकारयो: पद्यानाम् उपयोग: अस्ति ।

– पद्ये पादक्रम: वृत्तं च स्त: ।

– रीति: – पद्यस्थानां पदानां संघटनां रीति: इति वदन्ति । एषा चतुर्विधा ।

१) वैदर्भी – लालित्यपूर्णा रचना, मधुरवर्णा च

२) गौडी – समासाधिक्या रचना

३) पाञ्चालि: – वैदर्भी गौडी च एतयो: मिश्रणम् ।

४) लाटिका – कोमलपदानाम् उपयोग: ।

चरकसंहितायां एतेषां चतुर्णां प्रकाराणाम् उपयोग: कृत: ।

लाटिका – सरिद्ह्रदानां हिमवद्दरीणां चन्द्रोदयानां कमलाकराणाम् ।

मनोऽनुकूला: शिशिराश्च सर्वा: कथा: सरक्तं शमयन्ति पित्तम् ।। च. चि. ४/१०९

गौडी – श्वासज्वरारोचकमेहगुल्मप्लीहात्रिदोषोदरपाण्डुरोगाम् ।

कार्श्यामवातावसृगम्लपित्तवैवर्ण्यमूत्रनिलशुक्रदोषान् ।। च. चि. १२/५२

पाञ्चालि: – विनीय रक्तपित्तघ्नं पेयं स्यात्तण्डुलाम्बुना ।

युक्तं वा मधुसर्पिभ्यां लिह्याद्गोश्वशकृद्रसम् ।। च. चि. ४/६९

वैदर्भी – उशीरकालीयकलोध्रपद्मक

प्रियङ्गुकाकट्फलशङ्खगैरिका: ।

पृथक् पृथक् चन्दनतुल्यभागिका:

स शर्करास्तण्डुलाधावनाप्लुता: ।।

– विमानस्थाने लाटिका रीते: उपयोग: अत्यधिक: कृत: ।

यतिः – इत्यर्थः सूत्रस्य मध्ये मध्ये आगच्छन् विरामः ।

''श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः ।'' (दण्डी)

– पादान्ते तथा श्लोकार्धस्थाने विशेषतः यतिः भवति ।

– चरकसंहितायां एष नियमः दक्षतया पालितः अस्ति ।

३) संज्ञा

– चरकाचार्येण विषयं वर्णयता द्विविधे संज्ञे उपयोजिते ।

अर्थवाहिनी – अर्थपरा संज्ञा

शब्दवाहिनी – शब्दानुगामिनी संज्ञा

– अर्थवाहिनी संज्ञा । अर्थपरा – प्राणः उद्धूय इत्यादयः

– शब्दानुगामिनी संज्ञा – दोषः, अग्निः रसः इत्यादि.

४) उपनिषद्कालस्य भाषा

– स्कन्ध सौम्य इत्यादीनां शब्दादीनां उपयोगः ।

– उपनिषदि अपि गद्यपद्यात्मका रचना अस्ति । उत वैदिकं साहित्यं सूत्रीरुपि वर्तते ।

– चरकसंहितायां उपनिषद् पदमपि उपयोजितम् । विस्तरेण कल्पोपनिषदि व्याख्यास्यामः ।

च. सू. ४/४

– चरकसंहितायां उल्लिखितानि पाञ्चालक्षेत्रम् काम्पिल्य, विदेहः बाल्हिकः चीनः सौराष्ट्रः च इत्यादि अन्य देशानां नामानि उपनिषदकाले महाभारतकाले सतां प्रदेशानाम् अस्ति ।

५) अध्यायवर्णने 'भवन्ति चात्र' तथैव 'तत्र श्लोकः' इति वैशिष्ट्यपूर्णानि विवेचनात्मकानि रचनासूत्राणि सन्ति ।

'भवति/भवन्ति चात्र – गद्यस्वरुपिणः विषयस्य वर्णनस्य पश्चात् तस्य सुगमपठणार्थं पद्ये रुपान्तरं कृत्वा पुनः वर्णनं करणम् । तत्समये उपरोक्तानि सूत्रपदानि उपयोजितानि ।

इदं वर्णनं प्रतिसंस्कर्ता कृतम् इति सम्भवति ।

तत्र श्लोकः – अखिलस्य अध्यायस्य वर्णनानन्तरं तत्रस्थानां विषयाणाम् उल्लेखं कृत्वा अध्यायस्य उपसंहारार्थम् अस्याः पद्धतेः उपयोगः अस्ति ।

प्राय: एकस्मिन् अधिकरणे समाप्ते अग्रिमस्य अधिकरणस्य वर्णनात् पूर्वं 'तत्र श्लोका:' इत्यस्मिन् प्रथमं अधिकरणस्य सारांशं वर्ण्यते ।

– विमानस्थाने एतादृशां सूत्राणां संख्या अधोक्ता

| अध्याय: | भवन्ति चात्र | तत्र श्लोक: |
|---|---|---|
| १ | १ (१/२६) | २ |
| २ | २ (२/९, २/१४) | १ |
| ३ | ७ (३/९–११, ३/२५–२६, ३/४१, ३/४६) | ४ |
| ४ | ४ (४/९–१२) | २ |
| ५ | १३ (५/१०–२२) | -- |
| ६ | १ (६/१९) | ३ |
| ७ | ६ (७/५–७, ७/२८–३०) | २ |
| ८ | ---- | ११ |

६) अध्यायनामकरणस्य शैली

चरकसंहितायां अध्यायस्य नामकरणपद्धति: द्विविधा अस्ति ।

अ) विषयानुसारम्

ब) प्रथमशब्दानुसारम्

इदं वैशिष्ट्यं संहिताकालस्य ग्रन्थरचनाया: अस्ति ।

| अध्याय: | विषयानुसारम् | प्रथमशब्दानुसारम् |
|---|---|---|
| १ | √ | |
| २ | | √ |
| ३ | √ | |
| ४ | | √ |
| ५ | √ | |
| ६ | | √ |
| ७ | | √ |
| ८ | √ | |

– यदा अध्याय: अथवा अनुवाक् (दैनंदिनस्य वेदपठणस्य अंश:) एतयो: नाम विषयानुसारं स्यात् तर्हि अध्यायस्य नाम्ने छ प्रत्यय नाम ईय् प्रत्ययं लगति ।

उदा – रोगभिषग्जितीय , दीर्घञ्जीवितीय अष्टोदरीय व्याधितरूपीय इत्यादिः

परं यदा अध्यायगतस्य विषयस्य हेतो: अनुषङ्गेन अध्यायस्य नामकरणम् अस्ति तदा एष: छ प्रत्यय न लगति ।

उदा – रसविमानम् स्त्रोतोविमानम् स्वेदाध्याय: महाचतुष्पाद: इत्यादि:

अत्र स्त्रोतसां विमानम् इति अध्यायनाम् विशेषम् अस्ति ।

स्त्रोतोविमानीयम् इति न अपि तु स्त्रोतसां विमानम् इति नाम अभवत् । यत: रोगपरीक्षणार्थ शारीरभावानां ज्ञानप्रापणम् इति अस्य अध्यायस्य हेतु: अस्ति । अस्मिन् स्त्रोतसाम् उपलक्षणमात्रं वर्णितम् । अत: अध्यायस्य नाम्नि छ प्रत्ययस्य लोप: जात: ।

'स्त्रोतसाम्' इति स्त्रोतस् सकारान्त नपुंसकलिङिगन: पदस्य षष्ठी विभक्ति: बहुवचनं च अस्ति । यदा वाक्ये यत् पदं कर्ता, कर्म, क्रियापदम् अपादानं अधिकरणं सम्प्रदानं नास्ति तदा तत्पदस्य षष्ठी विभक्ति: क्रियते ।

षष्ठी शेषे । (पाणिनि:)

स्त्रोतसां विमानम् इति अध्यायस्य विषयहेतु: ।

## २) व्याकरणस्य सन्दर्भ:

चरकसंहिताया: विमानस्थानं तथा तदुपरितना: टीका: एतयो: दृश्यमाना: व्याकरणसन्दर्भा: अत्र उद्धृता: । एभ्य: सन्दर्भेभ्य: टीकाकाराणां संस्कृतभाषा विषयकं ज्ञानं , व्याकरणज्ञानं तथा वैदुष्यं दृश्यते ।

एते सन्दर्भा: परिशिष्टे वर्णिता: ।

## ३) तन्त्रयुक्ते: सन्दर्भा: ।

चरकसंहिताया: विमानस्थानं तथा तदुपरितना: टीका: एतयो: दृश्यमाना: तन्त्रयुक्तिसन्दर्भा: अत्र उद्धृता: । टीकाकारै: मूलसूत्रेषु टीकां लिखद्भि: विभिन्नानां तन्त्रयुक्तिनाम् उपयोग: कृत: । नैकस्मिन् स्थाने तन्त्रयुक्तिनां स्पष्ट: उल्लेख: अस्ति उत् अन्यत्र एता: तन्त्रयुक्तय: अध्याहृता: भवन्ति ।

एते सन्दर्भा: परिशिष्टे वर्णिता: ।

## ४) परिभाषा:

चरकसंहिताया: विमानस्थानं तथा तस्मिन् रचिता: टीका: एताभि: वर्णिता: परिभाषा: अत्र संकलिता: । तस्मात् पदयोजना वाक्ययोजना च एतयो: महत्वं प्रकट्यते । तथैव टीकाकाराणां विस्तृतम् अध्ययनं व्यवहार: तथा शाब्दज्ञानस्य प्राकट्यं अस्मात् भवति । एते परिभाषा: परिशिष्टे वर्णिता: ।

### विमानस्थानम् व्यूत्पत्ति: निरुक्ति: च

विमानस्थानम् इति चरकसंहिताया: वैशिष्टपूर्वं स्थानम् अस्ति ।

इदृशं स्थानम् अन्यसंहितायां नास्ति ।

व्यूत्पत्ति – वि + मा – ल्युट् वा । (वाचस्पत्यम् / खण्ड ६/४९१६)

निरुक्ति –

१. देवयाने रथे २. सार्वभौमगृहभेदे ३. यानमात्रे ४. अश्वे ५. परिमाणे

(वाचस्पत्यम् / खण्ड ६/४९१६)

६. साधनम् ७. परिच्छेदकम् ८. विमीयतेऽनेन फलमिति विमानम् ।

९. यज्ञादिकर्मसाधनम् १०. अवज्ञात: (शब्दकल्पद्रुम / खण्ड ४)

टीकाकारकृता व्याख्या

सर्वै: अपि टीकाकारै: विमानस्थानस्य व्याख्या वर्णनं च कृतम् ।

विमानम्

अ) विशेषेण मीयते ज्ञायते दोषभेषजाद्यनेनेति विमानम् । दोषभेषजादीनां प्रभावादिविशेष: इत्यर्थ:

(चक्रपाणि, च. वि. १/१)

आ) निरुक्तिश्च दोषादयो विशेषेण मीयन्ते ज्ञायन्ते एभिरिति विमानानि ।

(चक्रपाणि च. वि. ८/१५७)

इ) विशेषेण यथायोग्यता मीयतेऽनेनेति विमानम् । (गंगाधर , च. वि. १/१)

ई) विमीयते ऽ नेनेति विमानम् । (गंगाधर , च. वि. ३/१)

उ) विमानं रसादीनां विशेषमानम् । (योगीन्द्रनाथ सेन , च. वि. १/१)

ऊ) दोषादीनां विशेषेण मानं विमानम् । (योगीन्द्रनाथ सेन , च. वि. ८/१५७)

विमानस्थानम्

एवंभूतं विमानमभिधेयतया यत्र तिष्ठति तद्विमानस्थानम् । (चक्रपाणि च. वि. १/१)

विमानस्थानस्य निरुक्ति चरकाचार्येण विमानस्थानस्य अष्टमे अध्याये समाप्तिसूत्रे अग्रिमवत् वर्णिता अस्ति ।

दोषादीनां तु भावानां सर्वेषामेव हेतुमत् ।

मानात् सम्यग्विमानानि निरुक्तानि विभागशः । (च. वि. ८/१४७)

एवं 'विमानम्' इति आयुर्वेदशास्त्रस्य स्वसंज्ञा वर्तते ।

## टीका व्याख्या च

नैकवारं टीका व्याख्या च इति पदद्वयं परस्पर पर्यायम् इति योजितं भवति । टीकाकारः अपि सूत्ररुपस्थस्य भाष्यस्वरुपाय टीका व्याख्या च इति द्वाभ्यां संज्ञाभ्यां सम्बोधयन्ति ।

टीका – स्त्री , टीक + घञर्थे कः । टाप् च ।

टीक – ऋ ङ गत्याम् । इति कविकल्पद्रुम । भ्वां – आत्मं – सकं – सेट् । अटिटीकत् ।

ङ टीकते । इति दुर्गादासः ।

टीक्यते गम्यते प्रविश्यते ज्ञायते वा अनया । विवरणग्रन्थः । (अमरः)

(शब्दकल्पद्रुम /खण्ड २)

– स्त्री , टीक – करणे घञ् घञर्थे क वा । टीक्यते गम्यते ग्रन्थार्थोऽनया ।

विषमपद्व्याख्यारूपे ग्रन्थभेदे । (वाचस्पत्यम् / खण्ड ४)

व्याख्या – स्त्री , वि + आ + ख्या + ''आतश्चोपसर्गे ।'' इत्यङ् + ततष्टाप् । व्याख्यानमिति ।

विवरणम् । इति हलायुधः । ग्रन्थः । (शब्दकल्पद्रुम / खण्ड ५)

– स्त्री; वि + आ + ख्या – अच् । विवरणात्मके ग्रन्थे । (वाचस्पत्यम् /खण्ड ६)

इति उभयां व्यूत्पत्तिम् अनुसृत्य टीका व्याख्या च इति पदद्वयं एकार्थवाचकम् अस्ति ।

## Revival Stage

– अध्ययन पद्धतिगता एषा द्वितीया अवस्था अस्ति । अस्याम् अवस्थायां या: संहिता: टीका: च अभ्यसनीया: तासां पूर्णरुपेण परिशीलनम् अभिप्रेतम् ।

– अस्मिन् अध्ययने अधोक्तम् आयुर्वेदसाहित्यम् अध्ययनाय स्वीकार्यम् भवति ।

– चरक संहितायां विमानस्थानम् – अष्टा: अध्याया: ।

– तदुपरितना: अग्रिमा: व्याख्या:

| | | |
|---|---|---|
| चक्रपाणिदत्त: | – | आयुर्वेददीपिका । |
| गङ्गाधररॉय: | – | जल्पकल्पतरु: । |
| योगीन्द्रनाथसेन: | – | चरकोपस्कार: । |
| ज्योतिषचन्द्रसरस्वति: | – | चरकप्रदीपिका । |

– अत: एतान् सर्वान् परिशीलयाम: ।

– एषा अवस्था सम्पूर्णं अध्ययनविषयं सामान्यम् अस्ति ।

### चरकसंहिताया: रचना

– चरकसंहिताया: रचना अग्रिमवत् अस्ति ।

१) निर्मितिम् अनुसृत्य रचना

चरकसंहिता विविधासु अवस्थासु निर्मिता । एता: अवस्था: अधोक्ता: –

| | | |
|---|---|---|
| मूल: उपदेष्टा | – | पुनर्वसु: आत्रेय: । |
| तन्त्रकर्ता | – | आचार्य: अग्निवेशमहर्षि: । |
| प्रतिसंस्कर्ता | – | आचार्य: चरक महर्षि: । |
| संपूरणम् | – | आचार्य दृढबल: । |

अस्मिन् विविधासु अवस्थासु चरकसंहिताया: रचना क्रमेण अभवत् । मूलम् अग्निवेशतन्त्रम् चरकाचार्यस्य प्रतिसंस्करणानन्तरं ‘चरकसंहिता’ नाम्ना विख्यातम् ।

२) विभागश: ग्रन्थरचना

– चरकसंहिता संगृह्य अष्टस्थानेषु १२० अध्यायेषु विभज्य रचिता अस्ति ।

– एतानि स्थानानि तथा तत्रस्था: अध्यायसंख्या: अग्रिमवत् तन्त्रस्याष्टौ स्थानानि तद्यथा – श्लोकनिदानविमानशारीरेन्द्रियचिकित्सितकल्पसिद्धिस्थानानि । तत्र त्रिंशदध्यायकं श्लोकस्थानम् अष्टाष्टाध्यायकानि निदानविमानशारीरस्थानानि द्वादशकमिन्द्रियाणां त्रिंशकं चिकित्सितानां द्वादशके कल्पसिद्धिस्थाने भवत: ।     (चरक सूत्रस्थानम् ३०/३३)

| स्थानम् | अध्याय संख्या |
|---|---|
| सूत्रस्थानम् | ३० |
| निदानस्थानम् | ८ |
| विमानस्थानम् | ८ |
| शारीरस्थानम् | ८ |
| इन्द्रियस्थानम् | १२ |
| चिकित्सास्थानम् | ३० |
| कल्पस्थानम् | १२ |
| सिद्धिस्थानम् | १२ |
| | १२० अध्याया: |

– संपूर्ण: ग्रन्थ: अधिकरणै: युक्त: अस्ति ।

तन्त्राधिकरणम् – स्थानाधिकरणम् – अध्यायाधिकरणम् – प्रकरणाधिकरणम् – वाक्याधिकरणम्

– एवम् अधिकरणस्य पञ्चप्रकारा: अरुणदत्तेन वर्णिता: ।

विमानस्थानम्

– विमानस्थानम् चरकसंहिताया: तृतीयं स्थानं निदानस्थानानन्तरं तथा शारीरस्थानात् पूर्वं वर्णितम् ।

– चरकसंहिताया: वैशिष्ट्यपूर्णं स्थानम् ।

– अष्ट अध्यायेषु अस्या: रचना कृता अस्ति ।

– प्रत्येक: अध्याय: गद्यपद्यस्वरुपात्मक: नाम चम्पुपद्धत्या वर्णित: ।

– सूत्रात्मका सर्वा रचना ।

– विमानस्थानस्थानाम् अध्यायानां नामानि अधोक्तानि ।

| | |
|---|---|
| प्रथमोऽध्याय: | – रसविमानम् । |
| द्वितीयोऽध्याय: | – त्रिविधकुक्षीयं विमानम् । |
| तृतीयोऽध्याय: | – जनपदोद्ध्वंसनीयं विमानम् । |
| चतुर्थोऽध्याय: | – त्रिविधरोगविशेषविज्ञानीयं विमानम् । |
| पञ्चमोऽध्याय: | – स्त्रोतो विमानम् । |
| षष्ठोऽध्याय: | – रोगानीकं विमानम् । |
| सप्तमोऽध्याय: | – व्याधितरुपीयं विमानम् । |
| अष्टमोऽध्याय: | – रोगभिषग्जितीयं विमानम् । |

–

अस्य अध्यायानुसारं गद्यपद्यात्मक सूत्राणां संख्या अधोक्तवत् –

विमानस्थाने

गद्य सूत्राणि २६७

पद्य सूत्राणि ८८

एवं संगृह्य ३५५ सूत्राणि वर्णितानि ।

| अध्याय क्रमाङ्क: | गद्यसूत्राणि | पद्यसूत्राणि | कुलितम् |
|---|---|---|---|
| १ | २५ | ०३ | २८ |
| २ | १२ | ०७ | १९ |
| ३ | २५ | २७ | ५२ |
| ४ | ०८ | ०६ | १४ |
| ५ | ०९ | २२ | ३१ |
| ६ | १८ | ०४ | २२ |
| ७ | २४ | ०८ | ३२ |
| ८ | १४६ | ११ | १५७ |
| कुलितम् | २६७ | ८८ | ३५५ |

– विमानस्थाने प्रतिअध्यायानुसारं शब्दसंख्या अग्रिमोक्ता

| अध्याय: क्रमाङ्क: | शब्दसंख्या |
|---|---|
| १ | १०५० |
| २ | ६४३ |
| ३ | १६७१ |
| ४ | ५१३ |
| ५ | ६९४ |
| ६ | १०७३ |
| ७ | १३९१ |
| ८ | ६७२२ |
| कुलितम् | १३७५७ |

एवं विमानस्थाने संगृह्य १३७५७ शब्दा: उपयोजिता: ।

– विमानस्थाने अध्यायस्था वर्णनपद्धति: अग्रिमवत् ।

| अध्याय | वर्णनपद्धति: |
|---|---|
| १ | उपदेश: |
| २ | उपदेश: |
| ३ | उपदेश: प्रश्नोत्तराणि च |
| ४ | उपदेश: |
| ५ | उपदेश: |
| ६ | उपदेश: |
| ७ | उपदेश: प्रश्नोत्तराणि च |
| ८ | उपदेश: |

एवं विमानस्थानस्य रचना कृता ।

टीका रचना –

– चरकसंहितायां आकलय्य ६२ टीका: लिखिता: आसन् ।

– एता: टीका: विविधकालेषु विविधदेशस्थै: विविधटीकाकारै: लिखिता: आसन् ।

– एतासु अधुना केवलम् अष्टटीका: उपलब्धा: ।

– अस्माकं सौकर्यार्थं तासां पूर्वकालिक्य: तथा आधुनिक्य: एवं प्रकारा: कर्तुं शक्या: ।

पूर्वकालिकी

१) भट्टार: हरिश्चन्द्र: – चरकन्यास:

२) स्वामीकुमार: – चरकपञ्जिका

३) जेज्झट: – निरन्तरपदव्याख्या

४) चक्रपाणि: – आयुर्वेददीपिका

आधुनिकी

५) शिवदाससेन: – तत्वचन्द्रिका

६) गङ्गाधर: – जल्पकल्पतरु:

७) योगीन्द्रनाथ: सेन: – चरकोपस्कार:

८) ज्योतिषचन्द्र: सरस्वति: – चरकप्रदीपिका

– अस्मिन् अध्ययने चतुर्णां टीकानां समावेश: कृत: ।

– एतासां टीकानाम् उपलब्धि: अग्रिमवत् ।

चक्रपाणि: – संपूर्णायां चरकसंहितायाम् उपलब्धा ।

गङ्गाधर: – संपूर्णायां चरकसंहितायाम् उपलब्धा ।

योगेन्द्रनाथसेन: –

सूत्रस्थानं निदानस्थानं विमानस्थानं शारीरस्थानम् इन्द्रियस्थानं चिकित्सास्थानम् एकत: त्रयोदशपर्यंतम् उपलब्धा शेषा अनुपलब्धा ।

ज्योतिषचन्द्रसरस्वति: –

सूत्रस्थानं निदानस्थानं विमानस्थानं शारीरस्थानं उपलब्धा शेषा अनुपलब्धा ।

– चतस्त्रः अपि टीकाः संस्कृतभाषायां देवनागरीलिप्यां च सन्ति ।

– भाष्यस्वरुपा वर्णनपद्धतिः ।

– गद्यात्मकं वर्णनम् अस्ति । ज्योतिषचन्द्रसरस्वतिना क्वचित् परतन्त्रप्रत्ययं वर्णयता तद्ग्रन्थस्थानां सूत्राणां उल्लेखः कृतः ।

– परं चतुर्णां टीकाकाराणां स्वव्याख्या गद्यात्मका एव ।

## चरकसंहितायाः ऐतिहासिकम् अध्ययनम् ।

– अस्य अध्ययनस्य प्रारम्भे चरकसंहितायाः ऐतिहासिकं परिशीलनं संक्षेपेण आवश्यकम् ।

– वस्तुतः 'चरकसंहितायाः ऐतिहासिकमध्ययनम् ' एषः एव अध्ययनस्य भिन्नः महान् विषयः अस्ति ।

– नैकैः आचार्यैः अद्ययावत् विभिन्ने काले चरकसंहितायाः ऐतिहासिकं परिशीलनस्य यथाशक्ति यथामति च प्रयत्नाः कृताः।

– तथैव चरकसंहितायाः विविधाः निर्मितिअवस्थाः तथा तासां कर्तॄणां कालखण्डाः निश्चेतुं यशस्वी प्रयत्नाः कृताः । अतः अस्मिन् विषये विशेषं गहनं विवेचनं न कृत्वा अस्य अध्ययनस्य अधिकरणस्य अनुषंगेन यावन्तः विषयांशाः आवश्यकाः तावताम् ऊहनं कुर्मः ।

### पुनर्वसुः आत्रेयः

– अत्रेः अपत्यम् आत्रेयः ।

– महाभारतस्य शान्तिपर्वस्य दशोत्तरद्विशते भागे अत्रभवतः उल्लेखः अस्ति ।

– महाभारतीये युद्धप्रसङ्गे आत्रेयः चिकित्सकः इति पदेन उपस्थितः ।

– मत्स्यपुराणानुसारं ब्रह्मणः वीर्यस्य हवनोत्तरं ताभ्यः अग्निशिखाभ्यः अत्रिमुनेः उत्पत्तिः जाता ।

(सन्दर्भः – मत्स्यपुराणम् १९४/७–९)

– मत्स्यपुराणे १९६ तमे अध्याये संपूर्णस्य अत्रिवंशस्य वर्णनं कृतम् ।

– कायचिकित्साप्रधानस्य आयुर्वेदस्य प्रधानः चिकित्सकः ।

– गान्धर्वं नारदो वेदं भरद्वाजो धनुर्ग्रहम् ।

देवर्षिचरितं गार्ग्यः कृष्णात्रेयाश्चिकित्सितम् ।। (महाभारतम् / शान्तिपर्व/ २१० )

– अग्निवेशतन्त्रस्य मूल: उपदेष्टा ।

– नैका: शिष्या: प्रशिष्या: च । तेषु अग्निवेशादय: षड् शिष्या: प्रमुखा: आसन् ।

अग्निवेशश्च भेलश्च जतुकर्ण: पराशर: ।

हारित: क्षारपाणिश्च जगृहुस्तन्मुनेर्वच: ।। (च. सू. १)

– आत्रेयेण आयुर्वेदस्य समग्रं ज्ञानं भरद्वाजात् सम्पादितम् । तथा तस्य सङ्क्रमणं शिष्येषु कृतम् ।

– गान्धारस्य राजा नग्नजित् पुनर्वसुआत्रेयस्य मित्रम् आसीत् । तस्य कालात् आत्रेयस्य कालनिश्चिति: शक्या ।

– महाभारते आत्रेयस्य चिकित्सक: इति सन्दर्भा: सन्ति ।

– आत्रेय: अग्रिमै: विशेषणै: सम्मानित: । भगवान्, चान्द्रभाग:, कृष्णात्रेय: इत्यादय: ।

– आत्रेयस्य समकालिन: महर्षीणाम् उल्लेखा: चरकसंहितायां दृश्यन्ते । मैत्रेय: पारिक्षि: मौद्गल्य: शरलोमा वार्योविद: हिरण्याक्ष: कुशिक: कौशिक: भद्रकाप्य: बडिशधामार्गव: भरद्वाज: काङ्कायन: भिक्षुआत्रेय: इत्यादय: ।

## महर्षि: अग्निवेश:

– पुनर्वसु: आत्रेय: महर्षि: अगस्ति: च अमुयो: शिष्य: ।

– महाभारते अमुष्य उल्लेख: ।

– कौरवपाण्डवानां गुरुणा द्रोणाचार्येण धनुर्वेदस्य शिक्षणम् अग्निवेशात् प्राप्तम् । महर्षि: अग्निवेश: द्रोणाचार्यस्य गुरु: आसीत् ।

– अग्निवेशस्य आश्रम: हरिद्वारस्य समीपे आसीत् । तत्र असौ आयुर्वेदधनुर्वेदयो: अध्यापनम् अकरोत् ।

– द्वादशवर्षाणि अगस्ते: धनुर्वेदस्य तथा अनन्तरं द्वादशवर्षाणि आत्रेयात् आयुर्वेदस्य अध्ययनं कृतम् ।

– अग्निवेशतन्त्रस्य रचना ।

– तद् व्यतिरिक्तम् अञ्जननिदान स्थानं निदानस्थानं च एतयो: ग्रन्थयो: रचना ।

– भेल:, जतुकर्ण:, पराशर:, हारित:, क्षारपाणि: इत्यादया: अग्निवेशस्य सहाध्यायिन: आसन् ।

## महर्षि: चरक:

– वैशंपायनमहर्षे: शिष्य: ।

– चरक: एक: व्यक्ति: वा शिष्याणां सङ्घा: इति विषये सम्भ्रम: अस्ति ।

– कार्यम् – अग्निवेशतन्त्रे भाष्यरुपे संस्करणम् ।

– अग्निवेशतन्त्रं संहिताया: स्वरुपं दत्तम् ।

– पिता – विशुद्ध: ऋषि: (सन्दर्भ: भावप्रकाश:)

– चरकगोत्रप्रवर्तक: ऋषि:

– जन्म: – कपिस्थलम्

– वादमार्गपदानां तथा अतिरिक्तस्य ५ स्वेदप्रकाराणां तथा चरकशारीरस्थानस्य चतुर्थस्य अध्यायस्य वर्णनम् ।

## महर्षि: दृढबल:

– स्थानम् – पञ्चनदपूरम् ।

– काल: – ख्रिस्ताब्दस्य ९ त: १० शतकम् ।

– पिता – कपिलबलि: ।

– शिलोच्छवृत्त्या चरकसंहिताया: सम्पूरणं कृतम् ।

– चिकित्सास्थानस्य: १७ अध्याय:, कल्पस्थानस्य: १२ अध्याय: तथा सिद्धिस्थानस्य: १२ अध्याय: एवम् आकलय्य ४१ अध्यायानां सम्पूरणम् ।

– महान् शिवभक्त: ।

## टीकाकाराणां ऐतिहासिकं विवेचनम्

### कविराज:

– व्यावसायिकं उपाधि: । आयुर्वेदस्य चिकित्साव्यवसायं कुर्वाणं वैद्यं वङ्गे कवि: अथवा कविराज: इति उपाधि: दीयते स्म ।

– एते सर्वे कविराजा: तत्कालीनां राजानां राजसभायां राजवैद्य: इति पदे नियुक्ता: सन्ति स्म ।

– विशेषत: कविराज: पदं वङ्ग: आसाम बिहार ओरिसा च एतेषु पूर्वभारतप्रदेशे युज्यते ।

### चक्रपाणिदत्त:

चरकसंहिताया: टीकाकारेषु अधिकतर: प्रसिद्ध: टीकाकार: अस्ति । अत्रभवत: चरकसंहितायां सुश्रुतसंहितायां च रचिते: टीके अधिकतरे अभ्यस्येते ।

काल: – ख्रिस्ताब्दस्य एकादशं शतकम् ।

देश: – वङ्देश: । मयुरेश्वरं ग्राम, वीरेन्द्रभूमि: जनपदम् वङ्ग: प्राचीने काले इमं प्रदेशं पुण्ड्र अथवा पुण्ड्रवर्धनम् इति वदन्ति स्म । वर्तमाने बोग्रा, दिनापुरम् राजशाही तथा पुषना च एतानि वङ्गदेशस्य उत्तरभागगतानि मण्डलानि वीरेन्द्रभूम्यां समाविष्टा: ।

सम्प्रति अयं भूप्रदेश: बांगलादेशे अस्ति ।

वङ्गदेशे मयूरेश्वरे ग्रामे चक्रपाणिना निर्मितं चक्रपाणिवरालयं मन्दिरं अद्यापि वर्तते ।

जन्मस्थलम् – मयुरेश्वरं ग्राम , वीरेन्द्रभूमि: (वीरभूमि:) जनपदम् , वङ्ग: ।

पिता – गौडाधिनाथस्य रसवति अधिकारिपात्र: तथा गौडाधिनाथस्य विश्वस्तवैद्यराज: श्रीमान् नारायणदत्त: ।

ज्येष्ठ: बन्धु: – गौडाधिनाथस्य अन्तरङ्ग: श्रीमान् भानुदत्त: । भानुदत्त: प्रसिद्ध वैद्य: सेनापति: अध्यापक: च आसीत् । अत्रभवत: परिचय: "History of Bengal' नाम्नि गोविन्द मुखोपाध्यायस्य पुस्तके वर्णित: ।

गौडाधिनाथनयपालदेवभिषजश्चक्रदत्तस्य अनुजो भानुदत्तोऽभूत् । नयपालनृपतिश्च वङ्गबिहारशासकस्य पालराजवंशप्रतिष्ठापकस्य गोपालभूपतेरेकादशपुरुष:, तस्य प्रधानसेनापति:

आसीत् भानुदत्तः । तद्वंश्यत्वेनात्मपरिचयं ख्यापयन्तः केचन द्वरिद्राजनाः अद्यापि तत्र दृश्यन्ते । परं भानुदत्तस्य वंशजाः पूर्वस्मृतिसमृद्धया भूम्याधिकरणश्चासन् । (गणनाथः सेनकृतः)

कुलम् – लोध्रावलीसंज्ञकं दत्तकुलं वङ्गदेशस्थं प्रसिद्धं वैद्यकुलम् । अतीव समृद्धम् प्रसिद्धम् वैद्यकुलम् लोध्रावली कुलम् । अद्यापि अस्य वंशस्य चिकित्सापरंपरा प्रचलति ।

– असौ महान् शिवभक्तः आसीत् ।

उपाधिः – चरकचतुराननः सुश्रुतसहस्राननः च ।

– विद्या तथा कुलसंपन्नः वैद्यः भवति स्म तस्मै वङ्गदेशे अन्तरङ्गः इति उपाधिः लभते स्म ।

– चक्रपाणिः तत्रभवतः भ्राता भानुदत्तः जनकः नारायणदत्तः च एतेभ्यः अन्तरङ्गः इति पदवी आसीत् ।

– चक्रपाणेः जनकः नारायणदत्तः रसवति अधिकारी तथा पात्रः इति अधिके द्वे पदव्यौ धारयति स्म । रसवति इत्यर्थः महानसः । नारायणदत्तः तस्य प्रधानः आसीत् । पात्रः इत्यर्थः मन्त्री । नयपालराज्ञः राजसभायां नारायणदत्तः मन्त्री अपि आसीत् ।

– भानुदत्तः अन्तरङ्गः, राजवैद्यः तथा नयपालराज्ञः सेनापतिः अपि आसीत् ।

गुरुः – भिषग्वरः नरदत्तः ।

– प्रसिद्धः आयुर्वेदचिकित्सकः संस्कृतपण्डितः राज्ञः रामपालदेवस्य राजवैद्यः तथा अन्तरङ्गमित्रम्

कालनिर्णयः –शिवदाससेनेन स्वव्याख्यायां लिखितं यत् चक्रपाणेः पिता गौडाधिपतेः नयपालदेवस्य अन्तरङ्गः वैद्यः तथा महानसाध्यक्षः मन्त्री च आसीत् । अस्य नयपालदेवस्य कालं इतिहासतज्ज्ञाः ख्रिस्ताब्दस्य १०४० वर्षतः १०७० पर्यंतं मन्यन्ते । चक्रपाणेः जनकः अस्य राज्ञः महानसाध्यक्षः वैद्यः च आसीत् । अतः चक्रपाणिः अस्य समकालीनः अथवा स्वल्पं कालम् अग्रे आसीत् इति सिध्यति । एतस्मात् चक्रपाणेः कालः एकादशस्य शतकस्य अन्तिमः भागः भवति ।

– चक्रपाणिः राज्ञः नयपालदेवस्य उत्तराधिकारी राजा रामपालदेवः इत्यस्य अन्तरङ्गमित्रं तथा राजवैद्यः आसीत् इति वैद्येन प्रियव्रतशर्मणा सप्रमाणं सिद्धं कृतम् ।

अस्य एव राज्ञः रामपालदेवस्य नामतः चिकित्सासंग्रहग्रन्थे षड्विंशे अध्याये चक्रपाणिः 'राम मण्डूर' कल्पस्य वर्णनं करोति ।

– चक्रपाणिना चरकसंहितायां सिद्धिस्थाने द्वादशे अध्याये द्विपञ्चाशत्तमे सूत्रे उपसंहारं कुर्वता स्वपरिचयः दत्तः ।

''गौडाधिनाथ रसवत्यधिकारिपात्रनारायणस्य तनयः सुनयोऽन्तरङ्गात् ।

भानोरनु प्रथितलोध्रवलीकुलीनः श्रीचक्रपाणिरिह कर्तृपदाधिकारी ।।''

(चक्रपाणिटीका च. सि. १२/५२)

तथैव चरकसंहितायां सूत्रस्थाने प्रथमे अध्याये टीकां प्रारभमाणः तत्रभवान् अधोक्तं वर्णयति ।

''नरदत्तगुरुद्दिष्ट चरकार्थानुगामिनी । क्रियते चक्रदत्तेन टीकाऽऽयुर्वेददीपिका ।।''

(चक्रपाणिटीका च. सू. १/१)

–एवं अतीव मनोरमा गूढगम्भीरा विषयं विस्तृतं वर्णयन्ती व्याख्या तत्रभवता चरकसंहितायां कृता ।

ग्रन्थसंपद् –

१) आयुर्वेददीपिका – चरकसंहितायां व्याख्याग्रन्थः ।

२) भानुमतिः – सुश्रुतसंहितायां व्याख्याग्रन्थः ।

३) चिकित्सासंग्रहः – चक्रदत्त नाम्ना प्रसिद्धः ।

४) द्रव्यगुणम्

५) सर्वसारसङ्ग्रहः

६) व्याकरणतत्त्वचन्द्रिका

७) शब्दचन्द्रिका कोशः

८) व्यग्रपरिद्रशुभङ्करः

९) मुक्तावलिः

१०)शैलचन्द्रिका

११) गौतमन्यायसूत्रेषु विवेचनम्

१२) माघसाहित्ये टीका ।

१३) बाणभट्टकृत कादम्बर्यां टीका ।

१४) दशकुमारचरितस्य उत्तर पीठिका ।

आयुर्वेददीपिका

– संपूर्णायां चरकसंहितायां संपूर्णा टीका उपलब्धा ।

– अतीव मूलगामिन्य महत्वपूर्णा: च व्याख्या: ।

– चिकित्सकीय दृष्टिकोणेन तथा सैद्धान्तिकविवेचनेन परिपूर्ण: ग्रन्थ: ।

भानुमति:

– सुश्रुतसंहिताया: सूत्रस्थाने टीका उपलब्धा ।

– अन्येषु स्थानेषु टीका आसीत् वा न वा इति न ज्ञायते ।

चिकित्सासङ्ग्रह:

– चक्रदत्त: इति नाम्ना प्रसिद्ध: ग्रन्थ: ।

– अस्मिन् ग्रन्थे चक्रपाणे: अतुलनीयं चिकित्सापाटवं प्रकटीभूतम् ।

– न केवल आर्ष चिकित्सापद्धति: अपि तु रसवैद्यानां रसपर्पटी, ताम्रयोग: लोहादिप्रयोग: च एता: चिकित्सापद्धत्य: अपि वर्णिता: ।

– कायचिकित्सा इति आयुर्वेदस्य अङ्गेन सह शल्यतान्त्रिककर्मण: अपि सम्यक् वर्णनं कृतम् । उदा. अश्मरीविपाटनम्, गृधस्यां नाड्यन्तछेदनम्, व्रणशोथे पाटनादि कर्म, भगङ्दरे क्षाराग्निकर्मछेदनम् प्लीहायां यकृते च सिराव्यधनं, लिङ्गनाश काच तिमिरशल्यकर्म,

द्रव्यगुणसङ्ग्रह:

– परमोपादेय: स्वल्पकायो चरकसुश्रुतोक्तद्रव्यगुणपूर्वार्धस्य सारसङ्ग्रहरुप: ग्रन्थ: ।

– धारणार्थं स्मरणार्थं च सुखकर: ग्रन्थ: ।

शब्दचन्द्रिका – वैद्यकशास्त्रगतेषु विविधेषु शब्देषु व्याख्यानपर: ग्रन्थ: ।

व्याकरणचन्द्रिका – पाणिने: व्याकरणे विवरणात्मक: ग्रन्थ: ।

## कविराज: गङ्गाधर: रॉय:

– चरकसंहितायां प्रख्यात: महत्त्वपूर्ण: च आधुनिक: व्याख्याकार: ।

– सम्पूर्णायां चरकसंहितायां अतिविस्तृता तथा मूलगामिनी व्याख्या कृता ।

– एकोनविंशे शतके लॉर्ड मेकॉलस्य सूचनाभि: युरोपियनचिकित्सापद्धतिं पाठयत् महाविद्यालयं आरब्धम् आयुर्वेदस्य परम्परागतम् अध्ययनम् अपिहितम् ।

– तावत् कालपर्यन्तम् आयुर्वेदस्य अध्ययनं परम्परागतया गुरुकुलपद्धत्या एव भवति स्म । एषा पद्धति: पिहिता ।

– एतादृशे कराले काले कविराजेन गङ्गाधर: रॉयेण वङ्गप्रान्ते आयुर्वेदशास्त्रसम्बन्धिनम् अत्यन्तं महत्त्वपूर्णं कार्यं कृतम् । तस्मात् आयुर्वेदस्य अध्ययनाध्यापनं चिकित्साव्यवहार: च अस्मिन् कराले कालेऽपि संस्थितम् ।

– गुरुकुलपद्धत्या असंख्या: शिष्योत्तमा: निर्मिता: । येषां वैद्यकपरम्परा अद्यापि सर्वदूरे भारतदेशे कार्यरता अस्ति ।

– कविराज: गङ्गाप्रसाद: सेन: कविराज: चन्द्रकिशोर: सेन: च गङ्गाधररस्य समकालिनौ वैद्यौ आस्ताम् ।

– अमीषां कार्येण एव आयुर्वेदस्य परम्परा संस्थिता ।

– आयुर्वेदाय तस्य पूर्ववैभवस्थानं नीत्वा अधिष्ठापनकार्ये गङ्गाधररस्य महासहभाग: अस्ति ।

– सम्पूर्णे एकोनविंशतितमे शतके तथा विशंतिशतकस्य प्रथमे द्विदशके सशिष्यं: गङ्गाधर: अतीव दुष्करे काले मूलभूतं कार्यं कृतवान् ।

जन्म – भागुरा ग्रामम्, जैस्सोर जनपदम्, वङ्गदेश: १७९८ ख्रिस्ताब्दे ।

– सम्प्रति एष: भूभाग: बाङ्गलादेशे अस्ति ।

जीवनकाल: – ख्रिस्ताब्दं १७९८ त: १८८५ पर्यन्तम् ।

पिता – कविराज: भवनीप्रसाद: रॉय:

– एष: प्रसिद्ध: आयुर्वेदचिकित्सक: आसीत् ।

पुत्र: – कविराज: धरणीधर: रॉय: । एष: अपि प्रसिद्ध: आयुर्वेदचिकित्सक: आसीत् ।

गुरुः – वैद्यवेलधरिया ग्रामम्, राजशाहीस्थः कविराजः रामकान्तः सेनः ।

अध्ययनम् – वङ्गदेशेः राजशाही इति गुरुगृहे वयसः १८ तः २१ पर्यंतं त्रीणि वर्षाणि अध्ययनम् कृतम् । गुरोः आज्ञया वयसः २१ वर्षे कोलकत्तां गत्वा चिकित्साव्यवसायं आरब्धवान् ।

–अध्ययनोत्तरं गङ्गाधरः कोलकत्तां आगत्य ख्रिस्ताब्दस्य १८१९ तः १८३५ पर्यन्तं तत्र उषितवान् । अमुष्य उद्दिष्टम् आयुर्वेदचिकित्सा व्यवसायः आयुर्वेदस्य अध्ययने प्रसारः च इति आसीत् एव । परम् असौ चरकसंहितां प्रकाशितुम् अभिलाषी आसीत् ।

असौ एवं ज्ञातवान् आसीत् यत् कोलकत्तानगरे कस्यापि धनिकस्य स्वामित्वे चरकसंहितायाः सम्पूर्णं हस्तलिखितम् अस्ति । अतः अनेन हेतुना असौ कोलकत्ताम् आगतः तथा चरकसंहितायाः कार्यम् अपि कृतम् ।

१८३५ ख्रिस्ताब्दे असौ कोलकत्तानगरे परित्यक्तवान् । यतः अमुष्य शारीरस्वास्थे तत्रस्थ वायुमानस्य विपरीतं परिणामम् अभवत् ।

तत्पश्चात् गङ्गाधरः रॉयः शाहिदाबादनगरे (बेरहमपूर) उषितवान् तथा मुर्शिदाबादे नबाबस्य राजवैद्यः अभवत् ।

कार्यम् –

१) स्वगृहे आयुर्वेदस्य अध्ययनकेन्द्रं प्रचालितम् । यत्र अनेके छात्राः आयुर्वेदम् अधीतवन्तः ।

२) आयुर्वेदशिक्षाप्रणालिप्रवर्तकेषु श्रेष्ठः पुरुषः । शिष्य–प्रशिष्याणां सुदीर्घा परम्परा प्रवाहिता ।

३) आयुर्वेदस्य शास्त्रीयअध्ययनपद्धतिः प्रचालिता ।

४) नैदानिकपद्धतिः नाडीपरीक्षा विषचिकित्सा च एताभिः असौ अतीव लोकप्रियः अभवत् ।

५) आधुनिकचिकित्सां पद्धतिं परित्यज्य आयुर्वेदशास्त्रस्य शुद्धत्वं संस्थापितवान् ।

६) आयुर्वेदचिकित्साव्यवसायं अतीव विस्तृतमात्रं कृतवान् । अमुष्य चिकित्सापद्धतिः औषधयोजना च प्रमादरहिता प्रभावपूर्णा आसीत् ।

७) विविधप्रकाराणां ओषधीनां निर्माणं स्वयमेव करोति स्म ।

८) चिकित्साकार्ये यावान् कुशलः आसीत् यत् लोकेषु कलियुगस्य श्रेष्ठः चिकित्सकः इति ख्याति प्राप्तवान् ।

९) <u>ग्रन्थसम्पद्</u> –

– अतीव अपरपरा ग्रन्थनिर्मिति: कृता । आहत्य ७६ ग्रन्था: उपलब्धा: सन्ति ।

– तन्त्रं, व्याकरणं, साहित्यम् आयुर्वेद: दर्शनं काव्यं धर्मशास्त्रं ज्योतिषं च आदिषु विषयेषु ग्रन्थलेखनं कृतम् । अस्मिन् बहुतिथा: द्वादशग्रन्था: आयुर्वेदविषयका: सन्ति ।

– जल्पकल्पतरु: व्याख्या – चरकसंहितायां टीका (१८७९ ख्रिस्ताब्दे समाप्तिं नीता)

आरोग्यस्त्रोत:

नाडी विज्ञानम्

आयुर्वेदीया परिभाषा

आग्नेयायुर्वेदव्याख्या (अग्निपुराण उपरि टीका)

राजवल्लभीयद्रव्यगुणविवृत्ति:

मृत्युञ्जयसंहिता

भास्करोदय:

प्रयोगचन्द्रोदय:

आयुर्वेदसंग्रह:

पथ्यापथ्यम्

वैद्यतत्वविनिश्चय:

अन्येषां शास्त्राणां उपरि ग्रन्था:

काव्यप्रभा – भाषाशास्त्रे ग्रन्था:

लोकालोकपुरुषीय: – ऐतिहासिक:, १७ खण्डा:

राजविजय: – काव्यम्

तारावतीस्वयंवरम् – नाटकम्

तैत्तिरीयोपनिषद् वृत्ति:

हर्षोदय: – काव्यात्मकं, ललितम्

तत्वविद्याकर: – दर्शनशास्त्रे ग्रन्थ:

प्रमाद्भावजनी – मनुसंहितायाः संस्करणम्

मुग्धबोधमहावृत्तिः – मुग्धबोधकृता व्याकरणे टीका

– अनेकाविधानि काव्यानि नाटकानि च वङ्ग भाषायां तथा संस्कृतभाषायां लिखितानि ।

– ७६ ग्रन्थाः यन्मध्ये – ११ – आयुर्वेदः, २– तन्त्रग्रन्थः, ८– व्याकरणम्, १२ – साहित्यम्, ७ – धर्मशास्त्रम्, ८ – उपनिषद्, १४ – दर्शनशास्त्रं, १ – ज्योतिषं तथा १३ – अन्यप्रकाराः, एवं रीत्या विविधेषु शास्त्रेषु ग्रन्था लिखिताः ।

१०) १९११ तमे वर्षे 'गङ्गाधर मनीषा' नाम एकं वृत्तपत्रं प्रसारितम् , यन्मध्ये गङ्गाधरः रॉयस्य सर्वाणि साहित्यानि वर्णितानि आसन् ।

११) कासिम बाजार, वङ्देशः अत्र श्रीमती स्वर्णमयी नाम महाराज्ञ्याः चिकित्सा कृता । अनया यशस्विन्या चिकित्सया असौ वङ्गदेशे प्रख्यातः अभवत् ।

१२) तत्कालिनः आधुनिकविज्ञानस्य तज्ञः वैद्याः अपि असाध्या रोगग्रस्तान् रुग्णान् कविराजं गङ्गाधरं प्रति चिकित्सायै प्रेषयन्ति स्म ।

१३) गङ्गाधरस्य पत्न्याः अकाले निधनम् अभवत् । तेन पुत्रस्य धरणीधरस्य सङ्गोपनं तथा आयुर्वेदस्य अध्ययनमध्यापनं चिकित्सा च इत्यादये कार्याय अमुना सम्पूर्णम् आयुष्यं समर्पितम् ।

१४) आयुर्वेदस्य अध्यापनम् –

– मुर्शिदाबादनाम्नि नगरे स्वगृही आयुर्वेदगुरुकुलं प्रारब्धम् ।

– एतद् गुरुकुलं सम्पूर्णे भारते आयुर्वेदाध्ययनविषये प्रसिद्धम् आसीत् ।

– नैके प्रकाण्डपण्डिताः शिष्याः प्रशिक्षिताः ।

– अमुष्य प्रियशिष्येण कविराजेन द्वारकानाथसेनेन लिखितमासीत् यत् गुरुदेवेन अध्यापनं प्रारब्धे सम्पूर्णा रात्रिः कथं व्यतिता भवति स्म तद् वयं न ज्ञातवन्तः ।

१५) कविराजस्य गङ्गाधरस्य नाम बेरहमपूर नाम्नि नगर्या एकस्मै मार्गाय कृतम् । अद्यापि 'गङ्गाधरः कविराजः मार्गः' बेरहमपूर नाम्नि नगर्याम् वर्तते ।

१६) जल्पकल्पतरुः – १८७९ ख्रिस्ताब्दे गङ्गाधरेण एतां टीकां लिखित्वा समाप्तिं नीता ।

– चरकसंहितायाः उपरि संस्कृतव्याख्या ।

– दार्शनिकविषयस्य तथा आयुर्वेदस्य विस्तारेण वर्णनम् ।

– कठिनशब्दैः तथा क्लिष्टदीर्घवाक्यरचनया सर्वसामान्याय छात्राय एषा टीका दुर्बोधा जाता ।

– प्रथमं संस्करणं १९२७ तमे ख्रिस्ताब्दे कोलकत्तानगरे अभवत् ।

– अनन्तरं गङ्गाधरस्य पुत्रेण कविराजेन धरणीधररॉयेण प्रमादभञ्जनं मुद्रणयन्त्रशाला साईदाबाद इत्यतः प्रसिद्धा ।

– अनन्तरं कविराजः नरेन्द्रनाथः सेनगुप्तः तथा कविराजः बलाईचन्द्रः सेनगुप्तः एताभ्यां सम्पादिता आवृत्तिः चौखम्भा प्रकाशनं वाराणसीतः प्रसिद्धा ।

१७) <u>शिष्यपरम्परा</u> –

– नैके शिष्याः प्रशिक्षिताः ।

– गङ्गाधरस्य शिष्य–प्रशिष्यैः सम्पूर्णे भारते आयुर्वेदस्य अध्ययनं तथा चिकित्सा एतयोः उज्ज्वला परम्परा संस्थिता ।

– अधुनापि एषा परम्परा कार्यरता अस्ति ।

<u>प्रमुखाः शिष्याः</u> –

– कविराजः गयनाथः सेनः – पुरुलिया – अस्य पुत्रः कविराजः सितानाथ सेनः ।

– कविराजः द्वारकानाथः सेनः – कलकत्ता – अस्य पुत्रः कविराजः योगेन्द्रनाथः सेनः ।

– कविराजः परेशनाथः सेनः – बनारस

– कविराजः यदुनाथ भट्टाचार्यः – पुवना

– कविराजः गोविन्दचन्द्रः रॉयः – मुर्शिदाबाद

– कविराजः श्रीचरणः सेनः – कलकत्ता

– कविराजः आनन्दचन्द्रः चक्रवर्तिः – कलकत्ता

– कविराजः हाराणचन्द्रः चक्रवर्तिः–कलकत्ता – अस्य शिष्यः कविराजः ज्योतिषचन्द्रः सरस्वतिः

– कविराजः धरणीधरः रायः – मुर्शिदाबाद

– कविराजः ईश्वरचन्द्र सेनः – कलकत्ता

एवं प्रकारेण कविराजः गङ्गाधरः उच्चकोटेः विलक्षणः प्रतिभासम्पन्नः विद्वान् तथा लोकप्रियः प्रतिभायुक्तः विशिष्टव्यक्तिमत्वसम्पन्नः महापुरुषः आसीत् ।

- आयुर्वेदेन सह अध्यात्मक्षेत्रे अपि अमुष्य महाधिकारः आसीत् ।
- केवलं धीमतां बुद्धिविलासस्य विषयेषु विविधसाहित्यं निर्मितम् ।
- कविराजस्य गङ्गाधरस्य आयुर्वेदस्य इतिहासे अतिमहत्त्वपूर्णं स्थानमस्ति ।

मृत्युः – इ. स. १८८५, मुर्शिदाबाद



कलिकाता ग्रेष्टीटावसथः—
श्रीज्योतिषचन्द्र सरस्वती ।

कविराजः ज्योतिषचन्द्र सरस्वतिः



कविराजः गङ्गाधरः रॉयः


कविरज गङ्गाधरः राय
हाराणचन्द्र चक्रवर्तिः
ईश्वरचन्द्र सेन
द्वारकानाथःसेनः
गोविन्दचन्द्र सेनः
श्रीचरणः सेनः
परेशनाथः सेनः
गयनाथः सेनः
ज्योतिषचन्द्र सरस्वतिः
स्वामी लक्ष्मीरामः
योगेन्द्रनाथः सेनः (कोलकत्ता)
उमाचरणः चक्रवर्तिः
ज्ञानेन्द्रनाथः सेनः
सितानाथ सेनः
स्वामी जसरामदासजी
स्वामी रामप्रकाशः
कविराजः स्वामी सुन्दरदासः (जयपुरपरम्परा)
हरिरंजनः मुजुमदारः
उपेन्द्रनाथः दासः
आशुतोषः मुजुमदारः
अशोकः मुजुमदारः
(देहली–परम्परा)
मुकुन्दीलालः द्विवेदी
वेरेन्द्रकुमारः शर्मा
अनन्तराम शर्मा
(हरिद्वार ऋषिकुल परम्परा)
धर्मदासः
सत्यनारायण शास्त्री
राजेश्वरदत्तः शास्त्री
विश्वनाथः द्विवेदी
चन्द्रदत्त त्रिपाठी
बृजमोहनः दीक्षितः
(वाराणसी परम्परा)
श्यामादासः
धरणीधर राय
जयदेवः विद्यालङ्कारः
अत्रिदेव विद्लङ्कारः
(गुरुकुलं काङगड हरिद्वारः)
यदुनन्दनः उपाध्यायः
शिवदत्तः शुक्लः
रमानाथः द्विवेदी
दामोदरः शर्मा गौडः
प्रियव्रत शर्मा
गङ्गासहायः पाण्डेय
पूर्णचन्दः जैनः
प्रभाकर देशपाण्डे
चन्द्रवली दुबे

## कविराज: योगीन्द्रनाथसेन:

– आधुनिके काले चरकसंहिताया: टीकाकारेषु अन्यतम: महान् टीकाकार: ।

काल: – ख्रिस्ताब्द १८७१ त: १९१८

जन्म – १८७१ ख्रिस्ताब्दे वङ्गदेशे कोलकाता नगरे ।

मृत्यु: – १९१८ ख्रिस्ताब्दे जुलै मासे प्रथमे दिनाङ्के पञ्चत्वं गतवान् ।

देश: – कोलकाता वङ्ग:

कुलम् – खाण्डापारा, फरिदपूरम् इत्यत्र प्राचीने प्रसिद्धे च वैद्यकुले जनिम् अलभत ।

– महामहोपाध्याय: अभिरामकवीन्द्र: अमुष्य पूर्वज: आसीत् ।

निवास – योगीन्द्रनाथसेन: कोलकत्ता नगरे पथरिया घाट इत्यत्र वसति स्म । तत्रैव असौ आयुर्वेद गुरुकुलम् चिकित्सा केन्द्रं च संचालितवान् ।

पिता – महामहोपाध्याय: कविराज: द्वारकानाथसेन: । गुरु: च ।

– अत्रभवत: जनक: द्वारकानाथसेन: कविराजस्य गङ्गाधर रायस्य प्रधान: शिष्य: आसीत् ।

कविराज: गङ्गाधर रॉय:

↓

कविराज: द्वारकानाथ सेन:

↓

कविराज: योगीन्द्रनाथ सेन:

बन्धु: – १) योगीन्द्रनाथ सेन: सर्वेषु अग्रज: आसीत् । तत्पश्चात्

२) जोगीन्द्रनाथ सेन: – न्यायाधीश: च आसीत्

३) सुधीन्द्रनाथ सेन: – आयुर्वेद चिकित्सक: स्वातन्त्र्ययुद्धे सेनानी च आसीत् ।

४) ज्ञानेन्द्रनाथ सेन: – पटना नगरे आयुर्वेद महाविद्यालयस्य मुख्याध्यापक: । लाहौर नगरे D. A. V. महाविद्यालये तथा हरिद्वारनगरे ऋषिकुल आयुर्वेद महाविद्यालये मुख्याध्यापक: । हरिद्वार नगरे आयुर्वेद चिकित्साया: परंपरा रक्षिता । हरिद्वारे कालकवलीभूत: ।

ग्रन्थसम्पद् –

– चरकोपस्कार: – चरकसंहितायां टीका ग्रन्थ: ।

– अत्रभवत: टीकाया: मूलं हस्तलिखितं संस्कृतभाषायां वङ्गलिप्याम् अस्ति ।

– १९२० तमे ख्रिस्ताब्दे एषा टीका प्रथमं प्रकाशिता चरकचिकित्सास्थानस्य त्रयोदश अध्यायपर्यंत उपलब्धा आसीत् । पश्चात् जयपूरस्थया स्वामी लक्ष्मीराम ट्रस्ट इति संस्थया संपूर्णा टीका प्रसिद्धा ।

– अत्र भवत: टीकाया: महत् वैशिष्ट्यम् – वर्गीकरणात्मकं विवेचनम् ।

–सर्वादौ चरकोपस्कारव्याख्या विद्योदय मुद्रणायलम् कोलकत्ता इत: १९२० ख्रिस्ताब्दे प्रकाशिता ।

– चरकोपस्कारटीका अकस्मात् मृत्युवशात् अपूर्णा अवस्थिता ।

कार्यम्

– कोलकाता नगरे आयुर्वेद पाठशाला तथा रुग्णालयं च प्रचालिते ।

– आयुर्वेदविषये ग्रन्थलेखनम् ।

– नैकान् शिष्योत्तमान् अघटयत् ।

– आयुर्वेदचिकित्साया: व्यवसाय: तथा अध्यापनम् ।

– नेपालनरेशस्य तथा नैकानां भारतीयानां नेतृणां राजवंशीयानां श्रेष्ठानां यशस्विनी चिकित्सा असौ कृतवान् ।

– १९१७ ख्रिस्ताब्दे ढाका नगरे संपन्नस्य बंगाल विभाग आयुर्वेद संमेलनस्य अध्यक्ष: आसीत्

– कानपुरे १९१२ ख्रिस्ताब्दे तथा कोलम्बोनगरे १९१३ ख्रिस्ताब्दे संपन्नस्य आयुर्वेद महासंमेलनस्य असौ अध्यक्ष: आसीत्।

विभूषिते पदे

– आयुर्वेदिक विद्यापीठस्य अध्यक्ष: ।

– अष्टाङ्ग आयुर्वेद महाविद्यालयस्य कुलपति (Dean) पदम् ।

– १९१२ तमे ख्रिस्ताब्दे कानपूरनगरे सम्पन्नस्य अखिलभारतीय आयुर्वेद सम्मेलनस्य अध्यक्षपदं भूषितवान् ।

उपाधि: – कोलकत्ता विद्यापीठात् M. A. उपाधि: अधिगता ।

– तत्कालीनेन वङ्शासनेन वैद्यरत्न इति उपाधि: प्रदत्ता ।

– वङ्गशासनेन वैद्यभूषण: तथा भारतशासनेन वैद्यरत्न: उपाधिना सभाजित: ।

## कविराजः ज्योतिषचन्द्र सरस्वतिः

– चरक संहितायाः आधुनिकः टीकाकारः ।

कालः – खिस्ताब्दस्य विंशं शतकम् ।

देशः – वङ्गः । कोलकत्ता इत्यत्र निवासः आसीत् ।

गुरुः – कविराज गङ्गाधरस्य शिष्यः कविराजः हाराणचन्द्रचक्रवर्तिः ।

कविराजः गङ्गाधररॉयः ।
↓
कविराजः हाराणचन्द्र चक्रवर्तिः ।
↓
कविराजः ज्योतिषचन्द्रसरस्वतिः ।

कार्यम्

१) ग्रन्थसंपद् – अ) चरक संहितायां चरकप्रदीपिका नाम्नी टीका लिखिता । सूत्रस्थानतः शारीरस्थानपर्यंतं टीका उपलब्धा ।

आ) सुश्रुतसंहितायां अपि टीका लिखिता परं सम्प्रति अनुपलब्धा ।

इ) 'अष्टाङ्गहृदयउत्तरतन्त्रम्' शिवदाससेनकृत तत्वबोधटीकायाः सम्पादनं प्रकाशनं च ।

ई) आयुर्वेदस्य इतिहासः विशेषतः वङ्गदेशीयानां कविराजानाम् इतिहासः तथा शिवदाससेनः च एतेषु संस्कृते उपोद्घातः । एषः उपोद्घातः अत्यन्तं मौलिकः महत्वपूर्णः च ।

उ) शारीरविनिश्चयः इति शारीरे मौलिकः ग्रन्थः ।

२) ज्योतिषचन्द्रसरस्वतेः गुरुः कविराजः हाराणचन्द्रचक्रवर्तिः आसीत् प्रसिद्धः शल्यतज्ज्ञः । तस्मिन् समये आयुर्वेदस्य शल्यम् इति अङ्गस्य अध्ययनम् अध्यापनम् व्यवहारः च एतदर्थं असौ प्रसिद्धः आसीत् ।

तेनैव ज्योतिषचन्द्रसरस्वतिः अपि शारीरं निदानं शल्यं च एतेषु विषयेषु अधिकारी आसीत् । अमुष्य व्याख्यायाः अस्य प्रचीतिः प्रकटिता भवति ।

३)असौ उच्चकोट्यः संस्कृत वैय्याकरणः दार्शनिकः अध्यात्मक्षेत्रीयः च अधिकारी पुरुषः आसीत् ।

४) कोलकत्ता नगरे आयुर्वेदचिकित्सालयं अध्यापनं केन्द्रं च प्रारब्धे ।

५)कविराजगणनाथसेनस्य आधुनिकविज्ञानदृष्टेः आयुर्वेदाध्ययनपद्धतिं ज्योतिषचन्द्रसरस्वतिना

आजीवनं विरोधं कृतवान् ।

६) 'जनरल कौन्सिल तथा वङ्गशासनस्य आयुर्वेदचिकित्साविभाग: च एतयो असौ सदस्य: आसीत् ।

७) भारतीयविज्ञानमहामंडलस्य असौ मानद: सदस्य: पदाधिकारी च आसीत् ।

८) असौ यादवजीत्रिकमजीआचार्यस्य परममित्रम् आसीत् । उभाभ्यां संमिल्य नैका: मूलसंहिताग्रन्था: संपाद्य प्रकाशिता:।

चरक प्रदीपिका

– चरक प्रदीपिका इति अत्रभवत: टीका इंडियन प्रेस, बनारसत: १९३७ ख्रिस्ताब्दे प्रसिद्धा अभवत् ।

– अतीव सुगमायां भाषायां सरलया शैल्या टीका लिखिता अस्ति ।

– अस्य: टीकाया: शारीरविषयस्य विशेष: ऊहापोह: ज्ञायते ।

– ज्योतिषचन्द्रसरस्वते: सङ्केत: संपादितेषु ग्रन्थेषु दृश्यते । – ४०/२, ए ग्रे स्ट्रीट कोलकत्ता

## चरकसंहितायां विमानस्थाने उल्लिखितानि भिषक्विशेषणानि

चरकसंहिताया: विमानस्थाने मूलेषु सूत्रेषु विषयं वर्णयता वैद्यार्थं कर्तव्यकर्माणि नियमानि च वर्णितानि । तथैव योग्यायोग्यस्य वैद्यस्य लक्षणानि अपि कथितानि ।

अस्मिन् वर्णने वैद्यानां प्रकारा: गुणा: विशेषणानि च उल्लिखितानि । तानि अधोनिर्दिष्टानि –

| | |
|---|---|
| अमानज्ञ | – १/३ |
| भिषक् | – १/३, १/२६, २/१२, ३/४५, ३/४१, ७/१६, ७/१८ |
| कुशला: | – १/७, २/१३, ३/७, ८/१५, १८, २०, २३, ६८ |
| ज्ञ: भिषक् | – ७/३१ |
| अज्ञ: भिषक् | – ७/३१ |
| प्राज्ञ: | – ७/७ |
| अज्ञानमोहित: | – ७/६ |

बाला – ७/५

प्राणपति – ६/१९

शारीरज्ञानसंपन्नः – ५/३१

विदितवेदितव्याः भिषजः – ७/४, ३/३६

ज्ञानमभिमन्यमानाः – ७/४

अकुशलः – ७/३

अज्ञानवताम् – ५/६

ज्ञानवताम् – ८/८३, ४/५, ५/६

विधिज्ञः – ८/१३९, १४०, १४१,१४२, १४३, १४४

बुद्धिमान् – ८/१४९

बुद्धिमताम् – ८/१४९, ३/४६

विजज्ञिवान् – ८/१५६

अर्थवित् – ३/१०, ४/१०

विशेषवित – ३/११

तत्ववित् – ४/१२

भिषग्विदः – ३/४१

भिषजः – ७/३०, ३/३९,४०, ६/११,१३

बुद्धिमन्तः – ४/६

विचक्षणः – ४/९

कार्यतत्वविशेषज्ञः – ४/११

अमूढः – ४/११

– चरक संहितायां विमानस्थाने पुनर्वसु आत्रेयः अग्निवेशः च एतयोः विशेषणानि अधोनिर्दिष्टानि –

**आत्रेयाग्निवेशयोः विशेषणानि**

पुनर्वसुः आत्रेयः

| | |
|---|---|
| धीर | – २/१५ |
| बुद्धिमन् | – २/१५ |
| अन्तेवासिगणपरिवृत्तः | – ३/३ |
| महर्षि | – ६/२२ |
| परमर्षि | – ७/३२ |
| भगवान् | – ३/३, ६, २०,२९, ३८, ४०, ७/९ |
| भगवन्तम् | – ३/५, १९, २८, ७/८ |
| भगवन् | – ३/५, १९, २८, ३७, ३९ |
| मुनिसत्तमः | – ३/५२ |
| मुनिः | – ४/१४ |
| उदारधीः | – ४/१४ |

अग्निवेशः

| | |
|---|---|
| सौम्य | – ३/४ |
| शिष्य | – ७/३२ |
| | ३/३ |

## **Transliteration**

– अध्ययनस्य अस्याम् अवस्थायां वर्ण्यविषयस्य अनुषङ्गेन प्रस्तुतस्य विषयस्य अन्यशास्त्रगतैः सन्दर्भैः सह ऊहापोहः क्रियते ।

– अस्य अध्ययनस्य अधिकरणं 'चरक संहितायाः चतुर्णां टीकाकाराणां अभ्यासः तथा तेषु सतः वैधर्म्यस्य निर्णयकरणम्' इति अस्ति ।

– यत्र वैधर्म्यं स्यात् तत् पदस्य वा विषयस्य सन्दर्भान् अन्येभ्यः आयुर्वेदविषयकेभ्यः तथा अन्यसाहित्यग्रन्थेभ्यः अन्विष्य तदनुसारं तत्पदस्य ऊहापोहकरणम् अस्याम् अवस्थायाम् अभिप्रेतम् । एषः अन्यशास्त्रसम्बधः द्वौ प्रकारकौ अस्ति । येषां समावेशः अर्थाश्रये कृतः ।

१) स्वतन्त्र प्रत्ययः ।   २) परतन्त्र प्रत्ययः ।

स्वतन्त्र प्रत्ययः – इत्यर्थः यद् शास्त्रस्य अभ्यासः प्रचलति तत् सम्बन्धिनां अन्यग्रन्थानां सन्दर्भाः विमर्शितव्याः । अस्य अपि प्रकारद्वयम् ।

अ) तस्मिन् एव ग्रन्थे अन्यत्र उल्लिखितानां सन्दर्भानां दर्शनम् ।

उदाहरणार्थम् – चरकसंहितायाः विमानस्थानस्य पञ्चमे अध्याये 'विमार्गगमनम्' इति विषये टीकाकारेषु वैधर्म्यं दृश्यते । तदा 'विमार्गमगनम्' इत्यस्य चरकसंहितायां अन्यत्र उल्लिखिताः सन्दर्भाः विमर्शितव्याः । एतद् एव अतीतावेक्षणं अनागतवेक्षणं च तन्त्रयुक्तिः इति वदन्ति ।

आ) वर्ण्यविषयस्य शास्त्रविषये अन्यग्रन्थस्थाः सन्दर्भाः विचारणीयाः ।उदाहरणार्थम् 'विमार्गगमनम्' इत्यस्य सुश्रुतसंहिता, अष्टाङ्गहृदयम् आदिषु अन्येषु ग्रन्थेषु सन्तः सन्दर्भाः विचारणीयाः।

### अतीतावेक्षणं तन्त्रयुक्तिः ।

संहिताग्रन्थे यस्मिन् अध्याये वर्ण्यविषयः स्यात् तदपूर्वतने अध्याये सन्तः सन्दर्भाः अभ्यसनीयाः ।

– अतीतं नाम पूर्वतनीयं भूतपूर्वं च । अवेक्षणं नाम दर्शनं परीक्षणम् ऊहनम् च इति ।

उदाहरणार्थम् – चरकसंहितायां विमानस्थानस्य पञ्चमे अध्याये प्राणवहस्त्रोतसः विवरणसमये चरकसंहितायाः सूत्रस्थाने एकोनत्रिंशे (२९) दशप्राणायतनीये अध्याये लिखितस्य प्राण पदस्य सन्दर्भः अभ्यासार्थं ग्राह्यः ।

– चरक संहितायाः विमानस्थाने द्वितीये अध्याये मात्रा विषयस्य ऊहापोहं कुर्वता चरकसंहितायाः

सूत्रस्थाने पञ्चमे अध्याये लिखितस्य मात्राशितीयविषयः तथा चरकसंहिताया विमानस्थाने प्रथमे अध्याये रसविमानस्थः 'मात्राशी स्यात्' 'राशि' च एतौ विषयौ च परामर्शणीयाः ।

## अनागतावेक्षणं तन्त्रयुक्तिः

– यस्मिन् अध्याये वर्ण्यविषयः अस्ति तस्य परतने अध्याये स्थिताः तत्सम्बन्धिनां विषयाणां सन्दर्भाः अभ्यसनीयाः । अनागतः नाम 'यस्य आगमनं भवनीयं, भावि इति उत अवेक्षणं इत्यर्थः दर्शनं निरीक्षणम् इति । उदा. चरकसंहितायां विमानस्थाने षष्ठे अध्याये अग्निः विषयं चिन्तनसमये चरकसंहितायां चिकित्सास्थाने ग्रहणी चिकित्सा इति पञ्चदशे अध्याये स्थितः अग्निविषयकः विषयांशः अभ्यसनीयः ।

– चरकसंहितायां विमानस्थाने तृतीये अध्याये कालाकालमृत्युः इति विषयस्य अध्ययनस्य समये चरकसंहिताया शारीरस्थानगतानि मृत्युविषयकानि सूत्राणि अभ्यसनीयानि ।

## अनुमतं तन्त्रयुक्तिः

– स्वविषयस्य स्थापना समये अन्ये ग्रन्थकाराः अथवा अन्यशास्त्रस्थाः सन्दर्भाः उद्धरणीयाः । तेन माध्यमेन स्वविषयः पोषणीयः । परं अत्र अन्येषां शास्त्रीयविचारणां खण्डनं न भवति ।

उदाहरणार्थम् – वादमार्गपदानां टीकां कुर्वता गङ्गाधरेण न्यायवैशेषिकदर्शनं विष्णुस्मृतिः आदीनां ग्रन्थानां सन्दर्भान् संलक्ष्य विषयः सविस्तरं वर्णितः ।

## स्वतन्त्रप्रत्ययस्य उपयोगाः

– तस्मिन् शास्त्रे किमपि पदं कति विभिन्नैः अर्थैः उपयोजितम् इत्यस्य विचारः शक्यः ।

उदाहरणार्थम् – रसम् इति पदं आयुर्वेदशास्त्रे षड्रसाः (स्वादः) आद्यः धातुः आहाररसः मांसरसः स्वरसः पारदः इत्यादिभिः अर्थे योजितम् ।

– ग्रन्थकारेण विभिन्ने स्थाने एकस्य एव पदस्य विभिन्नाः व्याख्याः वर्णिताः इति ज्ञायते ।

– यदि कस्यापि पदस्य समाना व्याख्या अन्यत्र दृष्टा चेत् तर्हि तद्विषये अध्यवसायः भवति ।

– ग्रन्थकारस्य एकस्य एव विषयस्य विविधाः दृष्टिकोणाः ज्ञायन्ते ।

– चतुर्षु अपि टीकासु स्वतन्त्रप्रत्ययाणां सन्दर्भाणां अध्यायानुसारम् उल्लेखः अग्रे परिशिष्टे कृतः अस्ति ।

## <u>Technical correlation – परतन्त्रप्रत्यय:</u>

''एकं शास्त्रमधीयानो न विद्यात् शास्त्रनिश्चय: ।''

इत्युक्तं सुश्रुताचार्येण । कस्यापि शास्त्रं अभ्यासता तस्य शास्त्रस्य शब्दार्थं अभिप्रेतार्थं च निश्चितं कुर्वता तद्शास्त्रसम्बन्धितं वा तद्वर्ण्यविषयसम्बन्धितं अन्यशास्त्रम् अथवा अन्यशास्त्रविषयांश: एतेषां संदर्भ: आधारभूत: गणनीय: ।

अरुणदत्तेन 'परतन्त्रप्रत्यय:' इति अस्य वर्णनम् अर्थाश्रये वर्णितम् । यदा ग्रन्थकार: अन्यस्य शास्त्रस्य अथवा शास्त्रज्ञस्य मतं न खण्डयित्वा तम् स्वीकरोति तम् अनुमत तन्त्रयुक्ति: इति उच्यते । परन्तु यदा इतरेषां मतं वर्णयित्वा स्वमतेन तस्य खण्डनं कृतं भवति तदा तं तन्त्रयुक्ति: इति वदन्ति ।

कस्यापि विषयस्य पूर्णत्वेन आकलनाय टीकाकार: टीकां लिखति । तदा वर्ण्यं विषयं विस्तारेण कथयता नैकस्मिन् स्थाने तस्य वर्ण्यविषयस्य अन्यस्मिन् शास्त्रे वर्षितस्य अभिप्रेतार्थाय सकलाकलनाय च अन्यशास्त्रगतस्य कस्यापि सूत्रस्य आधार: गृह्यते ।

टीकां लिखन् टीकाकार: तेन ग्रन्थेन सह एव तात्कालीनम् पूर्वकालीनान् च सर्वान् उपलब्धान् ग्रन्थान् आधारीभूतान् मन्यते । तस्मात् टीकाकारस्य बहुश्रुतत्वं वाचनं आकलनक्षमतां बौद्धिकीं क्षमतां विवेचनक्षमतां च ज्ञायते ।

– वर्ण्यविषयस्य शास्त्रात् भिन्नेषु अन्येषु सर्वशास्त्रेषु ये सन्दर्भा: तान् अन्विष्य विमर्शितव्या: ।

उदाहरणम् – 'विमार्गगमनम्' इति पदस्य आयुर्वेदस्य व्यतिरिक्ते दर्शनसाहित्यकाव्यादिषु शास्त्रेषु ये सन्दर्भा: मिलन्ति तेषां विचार: करणीय: ।

'धातुपाक:' इति विषयानुषङ्गेन 'पाक' पदस्य अर्था: पाकशास्त्रं लौहशास्त्रं धातुवाद: खगोलशास्त्रम् आहारशास्त्रं साहित्यम् इत्यादिभ्य: आवश्यकेभ्य: शास्त्रेभ्य: गवेषणीया: ।

<u>परतन्त्रप्रत्ययस्य लाभा:</u>

१. युगपद विविधानां शास्त्राणां संदर्भा: एकत्रं वाचनार्थं लभ्यन्ते ।

२. कस्यापि वर्णविषयस्य अभिप्रेतार्थ: संपूर्णतया ज्ञायते ।

३. कस्यापि पदस्य अधिक विवेचनाय तस्य पदस्य अन्यशास्त्रगतं विवरणं उद्धृतं क्रियते । तस्मात् तस्य पदस्य अर्थव्याप्ति: ज्ञायते ।

४. कस्यापि पदस्य भिन्नां अर्थच्छटां ज्ञातुं उपयोग: भवति ।

५. शास्त्रस्य परिपूर्णतया अभ्यासाय ।

६. शब्दार्थान् अभिप्रेतार्थान् च आकलयितुम् ।

७. विषयविस्तारार्थम् ।

८. अन्यशास्त्रगतं विवेचनं ज्ञातुम् ।

९. कस्मिन् अपि शास्त्रे कोऽपि विषय: अल्पांशेन वर्णित: भवति । सैव विषय: कस्यापि अन्यशास्त्रस्य प्रमुख: वर्ण्यविषय: भवितुं शक्यते । तेन शास्त्रद्वयस्य समन्वयेन विषयं साकल्येन ज्ञातुम् ।

१०. शास्त्रभूतं कालत: परिवर्तनं ज्ञातुम् ।

११. खण्डिता ज्ञानधारा अखण्डयितुम् ।

१२. शास्त्रद्वयस्थं वैधर्म्यं ज्ञातुम् ।

१३. शास्त्रद्वयस्थं साधर्म्यं ज्ञातुम् ।

१४. द्वयो अथवा अधिकेषु शास्त्रेषु समन्वयं साधयितुम् ।

१५. शास्त्रतत्वविवरणार्थम् ।

१६. शास्त्रार्थविवेचनार्थम् ।

१७. अवबोधनार्थम् ।

१८. अनुक्तज्ञानार्थम् ।

१९. अव्यक्त – अनुक्त – अल्पोक्त – अव्याप्त दोषपरिहारार्थम् ।

२०. कस्यापि विषयस्य विभिन्नानां अर्थच्छटानां परिज्ञानार्थम् ।

२१. द्वयो शास्त्रयो: तौलनिकाभ्यासार्थम् ।

२२. एकमेव पदं अथवा एक: विषय: एका संकल्पना वा विभिन्नेषु शास्त्रेषु भिन्नै: अर्थै: प्रयोजनेन युज्यते । तस्य ज्ञानं परतन्त्रप्रत्ययेन भवति ।

उदाहरणार्थम् – 'रस:' इति पदस्य आयुर्वेदगता: अर्था: साहित्ये अर्था: च एते भिन्न: सन्ति ।

२३.नैकवारं कापि संकल्पना सर्वेषु शास्त्रेषु समानपद्धत्या वर्ण्यते । परतन्त्रप्रत्ययेन तद्विषयस्य निश्चय: निर्णीयते । उदाहरणार्थं चतुष्पादसिद्धान्त: मूलत: वैदिककालीन: सिद्धान्त: सन्ति ।

चरकेण सूत्रस्थाने त्रिंशे (३०) अध्याये वर्णिता हृदयस्य रचना छांदोग्य उपनिषदि ३।१४।१३ बृहदारण्यकोपनिषदि ४।३।२० ईदृशम् अस्ति ।

२४ तत्वात्मकस्य पुरुषवर्णनं सांख्यदर्शने तथा महाभारते शान्तिपर्वे १।२८ अपि समानपद्धत्या वर्णितम् ।

चरकसंहितायां शारीरस्थाने १।२८ आगता भूतान्तरानुप्रवेश: एषा संकल्पना सांख्यदर्शनस्य माठरवृत्तौ समानपद्धत्या वर्णिता ।

बृहदारण्यकोपनिषदि ३।५।१ इत्यत्र तथा चरक सूत्रस्थाने एकादशे अध्याये त्रिविधानाम् एषणानां वर्णनं समानम् अस्ति ।

२४. कालत: देशत: च निष्पन्नस्य वैधर्म्यस्य विवेचनं ज्ञायते ।

२५. कस्यापि पदस्य विशिष्टे शास्त्रे निष्पन्नस्य अर्थस्य यथार्थज्ञानं भवति ।

२६. स्वशास्त्रपुष्ट्यर्थम् उपयोग: भवति ।

२७. अनुक्तम् अव्याप्तम् एतान् दोषान् नाशयितुम् उपयोग: भवति ।

## विमानस्थाने चरकाचार्येण उल्लिखिता: अन्ये आचार्या:

विमानस्थाने अन्येषाम् आचार्याणाम् अथवा तेषां विचारप्रवाहानां विशेषा: उल्लेखा: न दृश्यन्ते । केषुचित् सन्दर्भेषु अन्ये, एके इति उल्लिखितम् । ते अधोनिर्दिष्टवत् –––

| | |
|---|---|
| ऐके | – ३/३४, ५/५, ८/१३, ८/२० |
| केचित् | – ६/१३, ५/४ |
| तन्त्रान्तरीय भिषक् | – ६/१५ |
| बार्हस्पत्य | – ८/५४ |
| औशनस | – ८/५४ |
| अन्ये | – ५/४ |

## Translation – सर्वासां टीकानां विवेचनम्

– अत्र विमानस्थानगतानां अध्यायानां अधिकरणानुसारं तौलनिकम् अध्ययनम् कृतम् ।

चरकसंहितायाः विमानस्थानस्य अध्यायानां अधिकरणानि

### अध्यायः प्रथमः

अधिकरण १ – विमानार्थम् – विमानस्थानस्थ प्रयोजनं स्थानसम्बन्ध: च । सूत्राणि १ – ३

अधिकरण २ – रसदोषद्रव्यविकारप्रभाव:

अ) रसप्रभाव:– १) पृथक् रसदोषप्रभाव: – सूत्रे ४ – ५

२) असंसृष्टरसदोषयो: सम्बन्ध: – सूत्रम् ६

३) रसदोषसमसमवेतत्वम् – सूत्रम् ७

४) संसर्गविकल्पविस्तार: – सूत्रम् ८

५) रसदोषप्रभावेण द्रव्यविकारप्रभावत्व व्यवस्था । – सूत्र ९

६) विषमसमवेतानां प्रभावतत्वनिर्णयम् – सूत्रम् १०

७) समुदायप्रभावतत्व व्यवस्था । – सूत्रे ११ – १२

ब) द्रव्यप्रभावः

१) अभ्यस्तानि त्रीणि – सूत्रम् १४

२) अनभ्यस्तानि त्रीणि – सूत्राणि १५ – १८

– अ) पिप्पली ब) क्षार: क) लवणम्

अधिकरण ३ – ओकसात्म्यम् – सूत्रम् २०

अधिकरण ४ – अष्टौ आहारविधिविशेषायतनानि – सूत्राणि २१ – २३

अधिकरण ५ – आहारविधिविधानम् तथा भोज्यसाद्गुण्यम् – सूत्रे २४ – २५

अधिकरण ६ – भिषक् व्याख्या – सूत्रम् २६

अधिकरण ७ – अध्यायस्य उपसंहारः – सूत्रे २७ – २८

## द्वितीयः अध्यायः

अधिकरण १ मात्रामात्रयोः विचारः

अ) मात्रानिश्चयार्थं त्रिविधं कुक्षिप्रमाणम् । – सूत्राणि ३–५

आ) मात्रावत् लक्षणानि । – सूत्रम् ६

इ) अमात्रावत् लक्षणानि ।

१) हीनमात्रा – सूत्रम् ७

२) अतिमात्रा – सूत्रम् ७

अधिकरण २ आमप्रदोषः

अ) आमप्रदोषकरः हेतुः – सूत्रे ८–९

आ) द्विविधौ आमप्रदोषौ – सूत्रम् १०

इ) विसूचिका – सूत्रम् ११

ई) अलसक – दण्डालसकौ आमविषौ । – सूत्रम् १२

उ) आमप्रदोषचिकित्सा – सूत्रम् १३

ऊ) आमाशयप्रमाणम् – सूत्राणि १५–१८

अधिकरण ३ अध्यायस्य उपसंहारः – सूत्रम् १४

## तृतीयः अध्यायः

अधिकरण १ – जनपदोद्ध्वंस :

अ) उद्देशः – सूत्रम् ३

आ) पूर्वरुपम् – सूत्रम् ४

इ) हेतुः सलक्षणानि – सूत्राणि ५ ते ७

ई) भेषजानि – सूत्राणि ८ ते १८

१) जनपदोद्ध्वंससम्बन्धिताः भेषजसिद्धान्ताः

२) चतुर्भावानां सोपपत्तितः प्रधानता लाघवत्वम् च

३) सामान्यं भेषजम्

४) भेषजविवेचनम्

उ) हेतूनां मूलम् – सूत्राणि १९ ते २३

अधिकरण २ – प्राग् विकारसमुत्पत्ति: आयुष: क्षयक्रम: – सूत्राणि २४ ते २७

अधिकरण ३ – काल – अकाल मरणम् – सूत्राणि २८ – ३८

क) भूतानां मरणं प्रति कालाकालविनिश्चय:

अ) नियतानियतत्वे संशय: उत्तरम् च – सूत्रे २८ – २९

ब) दैवपुरुषकारयो: कर्मपरिभाषा – सूत्राणि ३० – ३४

क) कर्मण: नियतानियतत्वम् – सूत्रम् ३५

ड) आयुष: नियतानियतत्वे निदर्शनम् – सूत्रम् ३६

इ) आरोग्यानुवृत्तौ हेतु: – सूत्रम् ३६

ख) भूतानां कालाकालमरणम् – सूत्रे ३७–३८

अधिकरण ४ – ज्वरे उष्णजलम् – मिथ्योपचारसंशय: – सूत्रम् ३९

अधिकरण ५ – चिकित्सा सिद्धान्त: – सूत्राणि ४० – ४४

अ) शीतोष्णसमुत्थ ज्वरप्रतीकार : – सूत्रे ४० – ४१

आ) निदानविपरीतं भेषजम् – सूत्रम् ४२

इ) अपतर्पणम् – सूत्रे ४३ – ४४

अधिकरण ६ – अचिकित्स्य रूग्ण: – सूत्रम् ४५

अधिकरण ७ – चिकित्सकस्य कर्तव्यानि – सूत्रम् ४६

अधिकरण ८ – देशलक्षणम् – सूत्रे ४७ – ४८

अधिकरण ९ – अध्यायोपसंहार: – सूत्राणि ४९ – ५२

## चतुर्थः अध्यायः

अधिकरण १ – त्रिविधरोगविशेषविज्ञानम्

अ) त्रिविधरोगविज्ञानानां नामानि व्याख्या च । सूत्रे ३ – ४

१) आप्तोपदेश:

२) प्रत्यक्षम्

३) अनुमानम्

आ) परीक्षणस्य महत्त्वं पद्धति: परीक्षा च । सूत्रम् ५

इ) त्रिविधापरीक्षाभि: ज्ञेया: भावा: । सूत्राणि ६ – ८

ई) परीक्षाणां फलम् – सूत्राणि ९ – १२

अधिकरण २ – अध्यायस्य उपसंहारः – सूत्रे १३ – १४

## पञ्चमः अध्याय:

अधिकरण १ – स्त्रोतस् संकल्पना

अ) स्त्रोतस: संकल्पना – मूर्तद्रव्याणां स्त्रोतसामेव वर्णनम् । – सूत्रम् ३

आ) परिणमनं प्राप्यानां धातूनां अभिवहनम् । सूत्रम् ३

इ) स्त्रोतसां संख्येयत्वम् – सूत्रम् ५

ई) स्त्रोतोमयपुरुषस्य विचार: तस्य खण्डनं च । – सूत्रम् ४

उ) यथास्थूलं स्त्रोतोप्रकारा: बुदिधमतां अज्ञानां च कृते । सूत्रम् ६

ऊ) स्त्रोतसां प्राकृतवैकृतत्वम् । – सूत्रम् ६

अधिकरण २ – त्रयोदशस्त्रोतसां मूलस्थानानि दुष्टिलक्षणानि च । सूत्रे ७–८

अधिकरण ३ – स्त्रोतसां पर्याया: दुष्टि च । सूत्रम् ९

अ) स्त्रोतसां नामपर्यायाणि

आ) स्त्रोतस: धातो: च दुष्टिविवेचनम् ।

इ) दोषाणां दुष्टिकर्तृत्वम् ।

अधिकरण ४ – त्रयोदश स्त्रोतसां दुष्टिहेतुः । सूत्राणि १०–२२

अधिकरण ५ – स्त्रोंतसां सामान्यदुष्टिहेतुः लक्षणं च ।

अ) सामान्यदुष्टिहेतुः – सूत्रम् २३

आ) सामान्यदुष्टिलक्षणम् – सूत्रम् २४

अधिकरण ६ – स्त्रोतसां स्वरुपवर्णनम् – सूत्रम् २५

अधिकरण ७ – स्त्रोत्रोदुष्टेः सामान्या चिकित्सा – सूत्राणि २६–२८

अधिकरण ८ – अध्यायार्थम उपसंहारः – सूत्रम् २९

अधिकरण ९ – स्त्रोतप्रभृति शारीरज्ञानमहत्वंम् च । सूत्रम् ३०

## षष्ठः अध्यायः

अधिकरण १ – रोगानीकम् – सूत्रम् ३

अधिकरण २ – दोष विवेचनम्

अ) रोगदोषयोः सामान्यम् सूत्राणि ४–६

आ) विकाराणां एकदेशप्रकोपणम् – सूत्राणि ७–९

इ) शारीरदोषानुबन्धः तथा अनुबन्ध्यानुबन्ध विचारः – सूत्रे १०–११

अधिकरण ३ – अग्निविवेचनम् – सूत्रम् १२

अधिकरण ४ – प्रकृतिविवेचनम् – सूत्राणि १३–१८

अधिकरण ५ – राज्ञः प्राणपति – सूत्रम् १९

अधिकरण ६ – अध्यायस्य उपसंहारः – सूत्राणि २०–२२

## सप्तमः अध्यायः

अधिकरण १ – व्याधितरुपाधिकरणम् – सूत्राणि ३–८

अधिकरण २ – कृमि अधिकारः – सूत्राणि ९–१३

अ)	सामान्यवर्णनम्

आ)	समुत्थानम्

इ)	स्थानम्

ई)	संस्थानम् – वर्णः

उ)	नाम

ऊ)	प्रभावः

ए)	चिकित्सा सूत्रम्

अधिकरण ३ – कृमिचिकित्सा

अ)	समासत: चिकित्सा – सूत्रे १४–१५

आ)	विस्तारश: चिकित्सा

अपकर्षणम्	– सूत्राणि १६–२०

प्रकृतिविघात:	– सूत्राणि २१–२७

निदानपरिवर्जनम् – सूत्रम् २७

अधिकरण ४ – अध्यायस्य उपसंहारः – सूत्राणि २८–३२

**अष्टमः अध्यायः**

अधिकरण १ – लक्षणाचार्यशिष्याणां परीक्षाकारणम् । सूत्राणि ३–५

अ)	तन्त्रपरीक्षाकारणम्  सूत्रम् ३

आ)	आचार्यपरीक्षाकारणम् सूत्रे ४–५

इ)	शिष्यपरीक्षाकारणम् सूत्रम्८

अधिकरण २ – शास्त्रदृढतादौ त्रिविधा: उपाया: (सूत्राणि ६ –१४)

अ)	अध्ययनविधि	– सूत्रे ६–७

आ)	अध्यापनविधि

१) शिष्यगुणः	– सूत्रम् ८

२) अध्ययनारम्भः – सूत्रम् ९

३) अध्ययनपूर्वकर्म

अ) हवनम् – सूत्रम् ११

ब) स्वस्तिवाचनम् – सूत्रम् १२

क) प्रणिपातः – सूत्रम् १२

४) अध्ययनकाले अनुशासनम् – सूत्रे १३–१४

इ) सम्भाषाविधि – सूत्राणि १५–२६

१) सम्भाषा स्वरुपं गुणः च – सूत्रम् १५

२) सम्भाषाप्रकाराः – सूत्रम् १६

३) संधायसम्भाषा

अ) संधायसंभाषया अधिकारीः– सूत्रम् १७

आ) संधायसंभाषा विधि– सूत्रम् १७

४) विगृह्यसम्भाषाविधि – सूत्रम् १८

५) अल्पकः गुणदोषौ – सूत्रम् १८

६) परलक्षणम् – सूत्रम् १९

७) परिषद् परीक्षणम् – सूत्रम् २०

८) परिषद् प्रकारानुसारेण सम्भाषा – सूत्रे २० – २१

९) निग्रहोपायः – सूत्रम् २१

१०) वादप्रवृत्तौ कार्यम् – सूत्रे २४ – २५

११) वादमर्यादालक्षणम् – सूत्रम् २६

अधिकरण – ३ भिषग्वादमार्गज्ञानार्थम् अधिगम्यानि पदानि ।

अ) उद्देशः – सूत्रम् २७

आ) ४४ वादमार्गपदानि – सूत्राणि २८ ते ६६

इ) वादः – आयुर्वेदे कर्तव्यम् – सूत्रम् ६७

अधिकरण – ४

भिषजां ज्ञानार्थं कानिचित् प्रकरणानि

अ) कारणादि दशपदानि – (सूत्राणि ६८ – ७९ )

१) प्रकरणस्य उद्देशः – सूत्रम् ६८

२) कारणादिवर्णनम् – सूत्राणि ६९ – ७८

३) प्रकरणं उपसंहारः – सूत्रम् ७९

आ) वमनादि परीक्षादेः नवकः संप्रश्नः

– उद्देशः – सूत्रे ८० – ८२

– नवकः संप्रश्नः – सूत्राणि ८३ – १५१

१) कतिविधया परीक्षया भिषजा कर्माणि प्रयोक्तृकामेन परीक्षण? – सूत्रम् ८३

२) कतिविधं च परीक्ष्यम् ? – सूत्रम् ८४

३) कः अत्र परीक्ष्यविशेषः ?– सूत्रम् ८४

४) कथं च परीक्षितव्यः ? सूत्राणि ८५–१३१

प्रकरणस्य उद्देशः– सूत्रम् ८५

कारणपरीक्षा – सूत्रम् ८६

करणपरीक्षा – सूत्रम् ८७

कार्ययोनिपरीक्षा – सूत्रम् ८८

कार्यपरीक्षा – सूत्रम् ८९

कार्यफलपरीक्षा – सूत्रम् ९०

अनुबन्धपरीक्षा – सूत्रम् ९१

देशपरीक्षा – सूत्राणि ९२ – १२४

भूमिपरीक्षा – आतुरपरिज्ञानहेतोः – सूत्रे ९२–९३

आतुरपरीक्षा – बलदोषप्रमाण ज्ञानहेतोः – सूत्रम् ९४

दशविध परीक्ष्यभावानि –

| | | |
|---|---|---|
| प्रकृतित: | – | सूत्राणि ९५ – १०० |
| विकृतित: | – | सूत्रम् १०१ |
| सारत: | – | सूत्राणि १०२ – ११५ |
| संध्ननत: | – | सूत्रम् ११६ |
| प्रमाणत: | – | सूत्रम् ११७ |
| सात्म्यत: | – | सूत्रम् ११८ |
| सत्त्वत: | – | सूत्रम् ११९ |
| आहारशक्तित: | – | सूत्रम् १२० |
| व्यायामशक्तित: | – | सूत्रम् १२१ |
| वयत: | – | सूत्रम् १२९ |
| उपसंहारः | – | सूत्रे १२३ – १२४ |

कालपरीक्षा

अ) संवत्सररुपा परीक्षा – सूत्राणि १२५ – १२७

– हेमन्ते संशोधनम् अकर्तव्यता

– वर्षाया: संशोधनम् अकर्तव्यता

– ग्रीष्मे संशोधनम् अकर्तव्यता

– आत्ययिकअवस्थाया: संशोधनार्थं नियमन्ति

आ) आतुरावस्थारूपा परीक्षा – सूत्रम् १२८

प्रवृत्तिपरीक्षा – सूत्रम् १२९

उपायपरीक्षा – सूत्रम् १३०

प्रकरणस्य उपसंहारः – सूत्रम् १३१

५) किं प्रयोजना परीक्षा? – सूत्रम् १३२

६) क्व: वमनादीनां प्रवृत्ति:? – सूत्रम् १३३

७) क्व: वमनादीनां निवृत्ति: – सूत्रम् १३३

८) किं प्रवृत्तिनिवृत्तिलक्षणसंयोगे नैष्ठिकम्  सूत्रम् १३४

९) कानि वमनादीनां भेषजद्रव्याणि उपयोग: गच्छन्ति ?

अ) वमनद्रव्याणां कल्पसङ्ग्रह: – सूत्रम् १३५

ब) विरेचनद्रव्याणां कल्पसङ्ग्रह: – सूत्रम् १३६

क) आस्थापनद्रव्याणां कल्पसङ्ग्रह:

– षड् आस्थापना: स्कन्धा: – सूत्राणि १३० – १४९

– मधुरस्कन्ध:

– अम्लस्कन्ध:

– लवणस्कन्ध:

– कटुस्कन्ध:

– तिक्तस्कन्ध:

– कषायस्कन्ध:

ड) अनुवासनद्रव्याणि  – सूत्रम् १५०

इ) शिरोविरेचनद्रव्याणि – सूत्रम् १५१

अधिकरण – ५

अध्यायस्य उपसंहारः – सूत्राणि १५२ – ५४

अधिकरण – ६ अध्यायप्रशस्ति  – सूत्रे १५५ – १५६

अधिकरण – ७ विमानस्थानप्रशस्ति – सूत्रम् १५७

## प्रथमोऽध्याय:

## रसविमानम्

अस्मिन् अध्यायस्य अभिधाने 'छ' नाम ईय प्रत्यय: योजित: नास्ति । तेन रसविमानीयम् इति न भूत्वा 'रसविमानम्' इति तत्पुरुषसमास: स्वीकृत: अस्ति । यदा कस्यापि विषयस्य हेतु: अध्याये वर्णित: भवति तदा स: 'छ' नाम ईय प्रत्ययेन योजित: भवति । तथैव यदा कस्यापि विषयस्य विवरणं कृतमस्ति तदा अध्यायस्य नाम्नि 'छ' प्रत्यय: न भवति ।

अत: अस्मिन् अध्याये 'रस' विषयस्य विशेषं वर्णनं कृतम् । अत: अध्याय नाम्नि 'छ' प्रत्यय: न योजित: ।

अस्मिन् अध्याये सप्तसु अधिकरणेषु विषयवर्णनमस्ति ।

१) विमानार्थम् – विमानस्थानस्य प्रयोजनं स्थानसम्बन्ध: च ।

२) रसदोषद्रव्यविकारप्रभाव: –

अ) रसप्रभाव: –

१) पृथक्रसदोषप्रभाव: ।

२) असंसृष्टरसदोषप्रभावयो: सम्बन्ध: ।

३) रसदोषसमसमवेतत्वम् ।

४) संसर्गविकल्पविस्तार: ।

५) रसदोषप्रभावेण द्रव्यविकारप्रभावतत्वव्यवस्था ।

६) विषमसमवेतानां प्रभावतत्वनिर्णय: ।

७) समुदायतत्वप्रभावव्यवस्था ।

ब) द्रव्यप्रभाव: –

१) अभ्यस्तानि त्रीणि

२) अनभ्यस्तानि त्रीणि – १) पिप्पली । २) क्षार: । ३) लवणम् ।

४) तेषां सात्म्यस्य क्रमश: त्याग: ।

३) ओकसात्म्यम् ।

४) अष्टौआहारविधिविशेषायतनानि ।

५) आहारविधिविधानं तथा भोज्यसाद्गुण्यम् ।

६) भिषक् व्याख्या ।

७) अध्यायस्य उपसंहार: ।

## अधिकरणम् प्रथमम्

### विमानार्थम् – विमानस्थानस्य प्रयोजनम् स्थानसम्बन्ध: च ।

सूत्राणि १ त: ३

चरक: – निदानस्थाने व्याधीनां निमित्तादिघटकानां वर्णनं कृतम् । तदनन्तरं दोषभेषजादि घटकानां ज्ञानं अस्मिन् स्थाने वर्णितम् ।

– वैद्यै: दत्तचित्तै: एतेषां दोषभेषजादिघटकानां ज्ञानं प्राप्तव्यम् । यत: चिकित्साक्रियाया: आधारा: दोषादीनां ज्ञानम् एव ।

''दोषादिमानज्ञानायत्वात् क्रियाया:''।

– य: वैद्य: एतान् दोषादीन् न जानाति स व्याधिनिग्रहे असमर्थ: विद्यते ।

– अत: दोषादीनां ज्ञानप्रयोजनेन एतद् विमानस्थानं वर्णितमस्ति ।

सूत्रविशेष: – गुरुसूत्रमस्ति । अग्निवेशाय उद्दिश्य आत्रेयेन सूत्रमेतत् उच्चारितमस्ति । 'अर्थपदं' प्रयोजनं इति अर्थेन तथा च 'मानपदं' ज्ञानं प्रमाणं च रताभ्यां अर्थाभ्यां योजितम् । :

टीका – चक्रपाणि: –

निदानस्थाने वर्णितस्य हेत्वादिपञ्चकस्य चिकित्सोपयोजनार्थं दोषभेषजादीनां विशेषं ज्ञानमपेक्षितम् । तदर्थं दोषभेषजादिघटकानां विशेषज्ञानं विमानस्थाने वर्णितम् ।

– तेषु घटकेषु अपि दोषभेषजयो: प्राधान्यत्वात् तेषां वर्णनार्थं प्रथमं 'रसविमानं' नाम्न: अध्याय: वर्णित: । एवं स्थानसम्बन्धस्य वर्णनं कृतमस्ति ।

– विमाननिरुक्ति: – ''विशेषेण मीयते ज्ञायते दोषभेषजादि अनेन इति विमानम्'' ।

यस्मिन् दोषभेषजादिघटकानां विशेषज्ञानं तद् विमानम् । अत: स्पष्टं यत् दोषभेषजादिघटकानां वर्णनं प्रभावादिभि: कृतम् ।

– विमानस्थाननिरुक्तिः –''एवं भूतं विमानमभिधेयतया यत्र तिष्ठति तद् विमानस्थानम्''।

दोषादिघटकानां विशेषज्ञानं यत्र वर्णितं तं विमानस्थानमिति वदन्ति ।

– निदानस्थाने वर्णितेषु विषयेषु सम्प्राप्तिप्रकाराणां नाम्नां उल्लेखः अस्ति । परन्तु हेतुपूर्वरुपरुपाणां भेदानां उल्लेखः नास्ति । सः ग्रन्थविस्तारभयेन कृतः नास्ति । परं तेषामपि भेदानां समावेशः तेषां ग्रहणं च आवश्यकम् ।

मानम् – 'मानमिति प्रभावादिविशेषः' । कस्यापि घटकस्य प्रभावादिविशेषाणां वर्णनं नाम मानम् ।

– शेषा टीका अविशेषा ।

गङ्गाधरः –

– स्थानोद्देशक्रमेण निदानस्थानानन्तरं विमानस्थानस्य प्रारम्भः कृतः ।

विमानम् – विशेषेण यथायोग्यता मीयतेऽनेनेति विमानम् ।

रसविमानम् – रसस्य विमानं रसविमानम् । तं अधिकृत्य कृतोऽध्यायः ।

– सम्प्राप्तीनां संख्यादयः भेदाः स्फुटतया ज्ञापनार्थं वर्णितः । व्याधेः निदानपञ्चकानां सम्पूर्णं ज्ञानं निदानस्थानात् प्राप्ते तस्याः व्याधेः आरम्भकदोषादीनां मानज्ञानं महत्त्वं अर्हति ।

– शेषा टीका शब्दार्थः ।

योगीन्द्रनाथसेनः

– पूर्वं रोगपरीक्षणं करणीयं पश्चात् भेषजपरीक्षणम् । अतः निदानस्थाने पूर्वं रोगं ज्ञात्वा अनन्तरं चिकित्सायै रसादिविषयाणां ज्ञानस्य अपेक्षया एतद् विमानस्थानं वर्णितम् अस्ति ।

विमानम् – विमानं रसादिनां विशेषमानम् ।

– भेषजद्रव्यस्थान् रसान् ज्ञातुं रसविमानं वर्णितं अस्ति । एतेषां रसादीनां विविधाभिः परीक्षाभिः यथावत् मानं नाम प्रमाणं वर्णितमस्ति ।

– शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्रसरस्वति

– पूर्वतने स्थानयद्वये विकारभेषजयोः सम्यक् परीक्षणं महर्षिणा कृतम् । अस्यैव ज्ञानस्य उपयोगेन चिकित्सा कर्तुं शक्यम् । परं रसादिमानविषये यः अज्ञः सः क्रियाकुशलः भवितुमशक्यम् ।

– स्थानस्य प्रयोजनाभिधेये वर्णिते स्तः ।

– शेषा टीका शब्दार्थः ।

निष्कर्ष : पाठभेदमस्ति । परं वैधर्म्यं नास्ति ।

## अधिकरणं द्वितीयम्

## रसद्रव्यदोषविकारप्रभावाः

अस्मिन् अधिकरणे अधो निर्दिष्टानि उपअधिकरणानि सन्ति ।

अ) रसप्रभावः –

१) पृथक्‌रसदोषप्रभावत्वम् – सूत्रे ४, ५ च ।

२) असंसृष्टरसदोषप्रभावयोः सम्बन्धः । सूत्रम् – ६

३) रसदोषसमसमवेतत्वम् – सूत्रम् ७ (रसदोषसन्तिपात)

४) संसर्गविकल्पविस्तारः – सूत्रम् – ८

५) रसदोषप्रभावेण द्रव्यविकारप्रभावतत्वव्यवस्था । सूत्रम् – ९

६) विषमसमवेतानां प्रभावत्वम् – सूत्रम् १०

७) समुदायप्रभावतत्वव्यवस्था – सूत्रे ११, १२ च ।

ब) द्रव्यप्रभावः –

१) अभ्यस्यानि त्रीणि – सूत्रम् – १४

२) अनभ्यस्यानि त्रीणि – सूत्राणि १५ तः १८

– पिप्पली क्षारः लवणम् , तेषां सात्म्यस्य क्रमशः त्यागः ।

उपाधिकरणम् – अ) रसदोषप्रभावः – १) पृथक्‌रसदोषप्रभावः

चरकः – षड्रस – मधुराम्ललवणकटुतिक्तकषायाः । एते षड्रसाः यदि सम्यगुपयोजिताः तर्हि ते शरीरस्य यापनं कुर्वन्ति । यदि च मिथ्या उपयोजितः तदा दोषप्रकोपान् कुर्वन्ति ।

– दोषाः त्रयः । वातपित्तश्लेष्माणः। यदि दोषाः प्रकृतिभूताः तदा ते शरीरोपकाराः सन्ति। अपि च यदि विकृताः तर्हि नानाविधैः विकारैः शरीरे उपतापान् उत्पादयन्ति।

चक्रपाणि: –

– दोषभेषजे दोषापेक्षया भेषजस्य उपयोग: करणीय: । अत: दोषोल्लेख: प्रथमं कृत: ।

– रसयुक्त द्रव्यरुपेण भेषजेन रोगप्रशमनमपेक्षितम् । तथा दोषा: अपि रसद्रव्याणां कारणत्वे तिष्ठन्ति । अत: भेषजशब्देन रसयुक्तद्रव्यमेव अपेक्षितम् । अत: प्रथमं रसद्रव्याणां वर्णनं कृत्वा तदनन्तरं दोषविकाराणां वर्णनमस्ति।

– प्रभाव: – प्रकृष्टभाव: प्रभाव: शक्ति: इत्यर्थ: । कस्यापि द्रव्यस्थ: घटकस्थ: प्रकृष्टभाव: नाम प्रभाव: । शक्ति: एव प्रभाव: ।

एष प्रभाव: द्विविध: भवति । – १) चिन्त्य: ।

२) अचिन्त्य ।

– अस्मिन् अध्याये रसदोषयो: माध्यमेन द्रव्यविकारयो: प्रभाव: वर्णित: अस्ति । एष चिन्त्यप्रभाव: अस्ति । अत: अस्मिन् अध्याये केवलं चिन्त्यप्रभावस्य वर्णनमेव कृतम् ।

– यापयन्ति इति साम्येन अवस्थापयन्ति । शरीरे साम्यावस्थाया: स्थिरीकरणं नाम यापनकरणम् । मिथ्याशब्देन अयोगातियोगमिथ्यायोगानां ग्रहणे करणीयम् ।

– दोषवर्णने शारीरदोषाणां वर्णनमस्ति । 'पुन:' पदेन मानसदोषा: पृथक् दर्शिता: । अत्र मानसदोषाणां वर्णनं नास्ति।

गङ्गाधर: –

– रसादीनां प्रभाववर्णनं एषा प्रतिज्ञा ।

– रसशब्देन रसाश्रयिद्रव्यं अभिप्रेतम् । अत: रसोपदेशेन तस्य द्रव्यस्य उपदेश: भवति ।

प्रभाव: –

'प्रभवन्ति प्रभवो भवन्ति भावा: कर्मसमर्था भवन्त्येतै: स्वभावैर्वा गुणैर्वा कर्मभि: वा इति प्रभावा:'।

– द्रव्ये प्रकर्षेण उपतिष्ठन् कोऽपि भाव: नाम प्रभाव: । अनेन द्रव्ये कर्मसामर्थ्यं आगच्छति । स्वभाव: वा गुण: वा कर्म वा एतै: प्रभावा: प्रकटयति ।

– रसयुक्तद्रव्याणां सम्यगुपयोगेन शरीरे आरोग्यसम्पदं भवति ।

– यापयन्ति इति गमयन्ति । – शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन –

– पृथक् रसदोषाणां प्रभाव: वर्णित: । अत्र अधिकरणेन द्रव्यपदस्य अर्थ: भेषजद्रव्यमिति गृहीतव्य: । तेन पृथिव्यादय: अन्ये अर्था: व्यावृत्ता: । सम्यग् उपयोग: इत्यस्य अर्थ: तस्या: तस्या: दोषप्रकृते: विपरीता: सन्त: । धातूनां सम: सन्त: एव सेवनीया: इति अस्ति ।

– शरीरं यापयन्ति वातादीन् साम्ये अवस्थाप्य स्वास्थ्ये वर्तयन्ति ।

– प्रकृतिभूत: इत्यस्य अर्थ: स्वप्रमाणे स्थिर: सम: इति ।

– योगक्षेमकर: – ''योग: इति स्थिति: । क्षेमं इति आरोग्यम्'' ।

यदा दोषा: प्रकृतिस्था: सन्ति शरीरस्य प्राकृतास्थिति: (योगं) आरोग्यं च निर्मिमते ।

– शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति

– यापयन्ति इति पालयन्ति ।

– रसानां प्रकृत्यादिसेवनस्य वर्जनं, तथा एकरसाभ्यास: इत्यस्य अर्थ: मिथ्यासेवनम् इति ।

– प्रकृतिभूता: साम्यावस्थायामवस्थिता: ।

– शेषा टीका शब्दार्थ: ।

निष्कर्ष: – 'यापयन्ति' इति पदे वैधर्म्यं दृश्यते ।

२) असंसृष्टरस: दोष: च एतयो: प्रभावसम्बन्ध: –

चरक: –

| दोष: | जननम् | शमनम् |
|---|---|---|
| वात: | कटुतिक्तकषाया: | मधुराम्ललवणानि |
| पित्तम् | कटुअम्ललवणानि | मधुरतिक्तकषाया: |
| कफ: | मधुराम्ललवणानि | कटुतिक्तकषाया: |

– त्रय: त्रय: रसा: एकैकं दोषं उत्पादयन्ति । तथा त्रय: त्रय: रसा: एकैकं दोषं शमयन्ति ।

चक्रपाणि: – असंसृष्टरसानां कर्म वर्णितमस्ति । रसानां एतेन कर्मोपदेशेन दोषाणां अपि तद् तद् रसमाध्यमेन उपाद्यत्वं शमनं च वर्णितम् ।

– यदा रसविरोधिनः अन्ये घटकाः न सन्ति तदा एतेषां असंसृष्टरसानां कर्म घटति । उदाहरणार्थम् – अर्कः अगुरुः गुडूची इत्यादीनि द्रव्याणि तिक्तरसीयानि सन्तः अपि वातनिर्मितिः न कुर्वन्ति । यतः तेषु उष्णवीर्यं इति विरोधीघटकः अस्ति । तेन वातजननं न भवति ।

– चक्रपाणिना परिपन्थिनी पदं गुणवैपरीत्यं दर्शयितुं योजितमस्ति । यै रसैः दोषाः निर्मिमते तेषां विपरीतरसैः सर्वात्मवैपरीत्यात् ते दोषाः शाम्यन्ति ।

– जागरणादिभिः कर्मभिः उत्पन्नेषु वायुषु तत् विपरीतं स्वप्नादि कर्म पथ्यं भवति । चक्रपाणिना एतत् कर्मण उदाहरणं तत् तम् ।

गङ्गाधरः –

– रसप्राकृतावस्थायां शरीरयापना अपि च विकृतावस्थायां शरीरोपघाताः कथं कर्म कुर्वन्ति अस्य उत्तरं अस्मिन् सूत्रे अस्ति ।

– रसाः दोषेषु कार्यं कृत्वा तन्माध्यमेन शरीरयाप उपघातान् च इत्यादीनि कर्माणि कुर्वन्ति ।

– रसदोषयोः प्रभावसाम्यं स्यात् तदा दोषाणां वृद्धिः प्रभाववैशेष्यं स्यात् तर्हि दोषाः प्रशाम्यन्ति ।

उदाहरणार्थम् – कटुतिक्तकषायाणां यस्य स्वरुपस्य प्रभावः सः वायोः प्रभावसमः न भवति । अतः प्रभाववैशेष्यात् ते रसाः ऱ्हासं कुर्वन्ति ।

– अनया पध्द्त्या एव पित्तकफयोः तथा रसानां प्रभावसाम्यस्य प्रभाववैशेष्यस्य वर्णनमस्ति ।

– अत्र रसदोषयोः गुणसामान्य – गुणविशेष – कर्मसामान्य – कर्मविशेषाः च न सन्ति ।

– अपि तु एतत् कार्यं प्रभावसामान्यविशेषेण भवति ।

– एते प्रभावसामान्य – प्रभावविशेषयुताः रसाः तद्द्रव्याश्रिताः वातादिदोषाणां वृद्धिं वा ऱ्हासं कुर्वन्ति । अतः द्रव्यं एव तेन रसेन कर्म करोति इति उच्यते ।

– द्रव्याणि कानिचन कर्माणि स्वप्रभावेण कुर्वन्ति अपि तु कानिचन गुणप्रभावेण अथवा कर्मप्रभावेण कुर्वन्ति ।

– प्रभावः अचिन्त्यः अस्ति । अस्य भावपदार्थस्य उत्पत्तिकाले तस्य आरम्भकद्रव्यं नाम आरम्भकमहाभूतानां संयोगः तस्मिन् संयोगे तस्य द्रव्यस्य निष्ठकर्मणः विजातीयकर्मस्य एषः प्रभावः प्रारम्भं करोति । एतत् एव अचिन्त्यं कर्म इति वदन्ति ।

– भावपदार्थस्य आरम्भकमहाभूतसंयोगे आरम्भकद्रव्याणां स्वरुपात् भिन्नं एकं वा द्वे वा कर्मणी घटतः । एषः एव अचिन्त्यः प्रभावः इति वदन्ति ।

– तस्य कार्यस्य एष प्रभावः द्रव्यस्य वा गुणस्य वा कर्मणः वा इति वदन्ति । एषः शक्तिस्वरुपः अस्ति । एषः शक्तिरुपः प्रभावः कर्मणः भिन्नः ।

योगीन्द्रनाथ सेन

– रसानां दोषप्रभावः अत्र वर्णितः अस्ति । सामान्यविशेषसिद्धान्तस्य संदर्भ गृहीत्वा (च. सू. १) योगेन्द्रनाथेन अत्र सुश्रुतस्य वचनं वर्णितं अस्ति ।

''एते रसाः स्वयोनिवर्धनाः । अन्ययोनिप्रशमनाः च ।'' (सु. सू. ४२)

– येभ्यः महाभूतेभ्यः रसाः उत्पन्नाः तत् समानेभ्यः महाभूतेभ्यः उत्पन्नानां भावधारकानां ते वृद्धिं कुर्वन्ति । तथा च तद्विपरीतेभ्यः महाभूतेभ्यः उत्पन्नानां भावघटकानां शमनं कुर्वन्ति ।

– रसाः समानगुणत्वं सतः दोषान् वर्धयन्ति विपरीतगुणत्वं सतः दोषान् प्रशाम्यन्ति च ।

– गुणः पदं महाभूतवाचकं अस्ति ।एतत् योगीन्द्रनाथसेनस्य अत्रस्थायाः टीकायाः वैशिष्ट्यमस्ति ।

| दोषः | महाभूत |
|---|---|
| वायुः | वायुः + आकाशम् |
| पित्तम् | अग्निः |
| श्लेष्मा | जलम् + पृथिवी |

| महाभूतबाहुल्यम् | रसः |
|---|---|
| पृथ्वी+ जलबाहुल्यम् | मधुरम् |
| पृथ्वी + तेजबाहुल्यम् | अम्लम् |
| जल + तेजबाहुल्यम् | लवणम् |
| वायुः + अग्निबाहुल्यम् | कटु |
| वायुः + आकाशबाहुल्यम् | तिक्तम् |
| वायुः + पृथ्वीबाहुल्यम् | कषायम् |

– एवं समानगुणभूयिष्ठकारणात् नाम समानमहाभूतसंघटनस्य आधिक्यात् रसाः दोषान् वर्धयन्ति ।

– कटुतिक्तकषायाः वा वायोः समानगुणाः सन्ति । गुणः नाम महाभूतः । अतः एतेषां त्रयाणां रसानां वायोः च महाभूतसंघटनं समानम् । अतः ते वायुं उत्पादयन्ति । प्रत्युत मधुराम्ललवणानां महाभूतसंघटनं वायोः विपरीतम् अतः ते वायुं प्रशामयन्ति ।

– अनया एव रीत्या पित्तकफयो: वर्णनं कृतम् ।

– दोषशमनत्वं दोषकोपनत्वं च रसस्य प्रभावौ । अतीतावेक्षयण–तन्त्रयुक्ते: उपयोगं कृत्वा योगीन्द्रनाथसेनेन अस्य विषयस्य पुष्ट्यर्थं चरकस्य सूत्रस्थानस्य प्रथमाध्यायस्य संदर्भ: दत्त: अस्ति । तस्य एव स्वरूपस्य वायो: प्रभाव: भवति । अत: तै: रसै: वायुवृद्धि: भवति । प्रत्युत मधुराम्ललवणानां यस्य यस्य स्यरूपस्य प्रभाव: तथैव अनुमत तन्त्रयुक्ते: आधारेण भेलसंहिताया: विमानस्थानप्रथमस्य सन्दर्भ: दत्त: अस्ति ।

– भेलसंहिताया: विमानस्थानप्रथमस्य मतम् –

– कषायकटुतिक्ता: वायो: तुल्यगुणा: सन्ति । कटुअम्ललवणा: पित्तस्य तुल्यगुणा: मधुराम्ललवणा: कफस्य तुल्यगुणा: सन्ति । तेषां अभ्यासेन देहस्था: दोषा: वर्धन्ते । एषा वृद्धि: गुणसामान्यत्वात् भवति ।

- दृष्टान्त: – यथा एकत्रकृतौ राशी इह द्वौ महत्तं अर्च्छत: । तेषां विपरीतदोषाणां ह्रास: ।
- दृष्टान्त: – यथा उदकं समासाद्य शान्तिं गच्छति पावक: ।
- कषायतिक्तकटव: रुक्षगुणेन वायो: रुक्षगुणं वर्धयन्ति । अन्येषु रसेषु स्निग्ध: गुण: अस्ति अत: ते वायुं प्रशामयन्ति ।
- कटुअम्ललवणा: उष्णगुणेन पित्तस्य उष्णगुणं वर्धयन्ति । अन्ये रसा: शीतत्वात् पित्तं शमयन्ति ।मधुराम्ललवणा: स्निग्धगुणेन कफस्य स्निग्धगुणं वर्धयन्ति । अन्ये रसा: रुक्षत्वात् तं शमयन्ति ।

ज्योतिषचन्द्र सरस्वति

– रसदोषयो: स्वप्रभावस्य कथनान्तरं तत्रस्थ प्रभावस्य वर्णनं कृतम् ।

– कार्यकारणभावेन रसा: दोषाणां वृद्धिं वा ह्रासं कुर्वन्ति ।

– शरीरे सूक्ष्मपचनेन पक्वा: रसा: दोषान् उत्पादयन्ति अथवा शमयन्ति ।

– शेष: अविशेष: ।

निष्कर्ष: –अ) असंसृष्टरसदोषयो: परस्परसम्बन्धानां कारणं गङ्गाधर: प्रभावसामान्य वैशेष्यं मन्यते अपि च योगीन्द्रनाथसेन: महाभूतसामान्य वैशेष्यं इति मन्यते । अस्य वैर्धम्यस्य ऊहापोह: वैधर्म्यविवेचने कृत: अस्ति ।

आ) शेषं साधर्म्यं अस्ति ।

उपाधिकरणम् ३) रसदोषसम्बन्धयुक्ति: (योजना) – सूत्रं ७

चरक: –

– रसदोषयो: सन्तिपाते ये रसा: येषां गुणानां समानगुणे वा समानगुणभूयिष्ठे सन्ति ते तान् वर्धयन्ति । विपरीतगुण: वा विपरीतगुणभूयिष्ठा: रसा: दोषशमनं कुर्वन्ति ।

– एषा व्यवस्था परस्परयो: असंसृष्टरसदोषयो: अस्ति ।

– एवं परस्पर–असंसृष्टरसानां षट्त्वं तथा दोषाणां त्रित्वं भवति ।

चक्रपाणि: –

– रसा: दोषाणां उत्पत्तिं वा शमनं कथं कुर्वन्ति अस्य युक्ति: अस्मिन् सूत्रे वर्णिता अस्ति ।

सन्तिपाते इति अन्त: शरीरमेलके ।

– सन्निपात: एतत् पदं अत्र मेलनं इति अर्थेन धपयोजितम् । अधिकरणं पदार्थ: स्वसंज्ञा एतासां तन्त्रयुक्तिनां उपयोग: अत्र अस्ति ।

– 'तु' इति पदं विशेषेण अर्थेन उपयोजितम् अस्य अर्थ: विपरीत गुणा: विपरीतगुणभूयिष्ठापेक्षया विशेषं शमनकार्यं कुर्वन्ति ।

– ''गुणागुणाश्रयानोक्ता'' । चरक सूत्र २६ एतद् सूत्रानुसारं रसा: गुणा: सन्ति । अत: अन्ये गुणा: तेषु आश्रिता: भवितुं न शक्नुवन्ति । रसानां गुणा: अस्य अर्थ: तद्रसयुक्तानां द्रव्याणां गुणा: एवं गृहीतव्या: । एतान् गुणान् चक्रपाणि: रसानां उपचारगुणा: इति वदति ।

– रसेभ्य: दोषाणां वृद्धिं वा क्षयं वा एकवारं सेवनेन न भवति । अपि तु तस्य रसस्य अभ्यासेन भवति । रसदोषयो: संसर्गाधिक्यं विहाय रसानां षट्त्वं दोषाणां त्रित्वं च कथं भवति एवम् । परस्परेषु असंसृष्टरसेषु परस्परे:असंसृष्टदोषेषु एषा व्यवस्था भवति ।

– व्यवस्था इति रसदोषसंसर्गप्रपंचसंक्षेप: ।

गङ्गाधर: –

– पृथक् रसदोषयो: प्रभावं कथयित्वा संसृष्टरसदोषप्रभाववर्णनं कृतं अस्ति ।

– रससन्निपात: – द्वयो: त्रयाणां चतुर्णां पञ्चरसानां प्रकृतिसमसमवायसंसर्ग: ५६ प्रकाराणां भवति (संदर्भ: – आत्रेयभद्रकाप्यीय अध्याय:)

– दोषसन्निपात: – द्वयो: वा त्रयाणां दोषाणां प्रकृतिसमसमवायसंसर्ग: ५९ प्रकाराणां भवति (संदर्भ: – कियन्त: शिरसीय अध्याय:)

– ये रसा: यादृशां संसर्गस्वरुपाणां स्यु: ते । तथैव ये दोषा: यादृशां संसर्गस्वरुपाणां स्यु: तन्मध्ये ये समानगुणानां समानप्रभावाणां कार्यगुणेषु गुणाभावात् समानगुणभूयिष्ठा: स्यु: अथवा समानप्रभावभूयिष्ठा: स्यु: ते रसा: तेषां समानप्रभावदोषाणां वृद्धिं करिष्यन्ति ।

– दोषा: क्षीणा: समा: वा वृद्धा: स्यु: तै: तत् समानप्रभावरसानां वृद्धि: भविष्यति ।

– परस्परविरोधिनो: रसदोषयो: समपरिमाणे मेलनं न भवति । यत: समबलत्वात् विरोध: अस्ति । यदा विषममाने विरोधिनो रसदोषयो: मेलनं भवति तदा य: बलवान् स: अल्पबलिनि विजयं प्राप्नुयात् । तन्मध्ये तेषां य: न्यूनमध्यादि–अंशांवशेषं स्यात् तादृशे स्वरुपे हीन–मध्यादिमेलनं भविष्यति । अस्या: विपरीतप्रक्रिया विपरीतगुणानां विपरितगुणभूयिष्ठाणां वा रसदोषयो: भवेत् दोषशम: भवेत् च ।

– शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन –

– 'सन्निपात: इह समसमवेततया' । अत्र सन्निपात: पदस्य अर्थ: समस्थितौ रसदोषाणां समवाय: एव मेलनम् ।

– अत्रस्था सन्निपातस्था/मेलनस्था व्यवस्था अस्मिन् सूत्रे वर्णिता अस्ति ।

– रस: इत्यस्य अर्थ: तद्रसाश्रितन्द्रद्रव्यम् ।

– समानगुणा: नाम समानप्रकृतिका: । अस्य अर्थ: येषां प्रकृति: नाम महाभूतानि समानानि सन्ति ते समानगुणा:।

| रसद्रव्य | समानगुण | समानगुणभूयिष्ठ | विपरीतगुण | विपरितगुणभूयिष्ठ |
|---|---|---|---|---|
| कटुतिक्तकषाय | वात | --- | श्लेष्मा | पित्त |
| मधुराम्ललवण | श्लेष्मा | पित्त | वात | --- |

– एवं प्रत्येकरसयुक्तानां द्रव्याणां विचार: करणीय: ।सामान्यविपर्ययेण वृद्धिह्रयासौ सर्वत्र ज्ञातव्यौ ।

रसानां षट्त्वं वा दोषाणां त्रित्वं च

– सामान्यविपर्ययाणां य: वृद्धिह्रास: नियम: अस्ति तस्य व्यवस्थाया: कृते परस्पर–असंसृष्टरसानां षट्त्वं परस्परअसंसृष्टदोषाणां त्रित्वं च एतयो: उपदेश: कृत: ।

– असंसृष्टरसा: षड् असंसृष्टदोषा: त्रय: सन्ति । अत्रैव एषा सामान्यविपर्ययेन माध्यमेन रसदोषसन्निपातोत्तरदोषाणां वृद्धिऱ्हासयो: व्यवस्था सम्भवति ।

– यदा रसदोषाणां संसर्ग: स्यात् तत्र एषा व्यवस्था न सम्भवति ।

ज्योतिषचन्द्र सरस्वति

– रसदोषयो: वर्धनोपशमनानां युक्ति: अत्र वर्णिता अस्ति ।

– सन्निपाते अन्त: शरीरमेलने । चक्रपाणे: समाना एव व्याख्या कृता अस्ति ।

– समानगुणा: इति एकगुणविशिष्ठा: । समानगुणभूयिष्ठा: अधिक्येन तद् गुणसमन्विता: ।

उदाहरणम् – रसयुक्तं द्रव्यं जरणकाले प्रथमं देहश्लेष्मसंसर्गेण्य मधुरी भवति । तस्मिन् समये उत्पन्नस्य मधुररसस्य अंशेन उत्पन्नेन कफेन च शरीरस्थ: कफ: वर्धते । तदनन्तरं अग्रिमायां प्रक्रियायां देहस्थपित्तसंसर्गेण द्रव्यं अम्लं भवति । तत्रस्थात् अम्लांशात् उत्पन्नपित्तात् च शरीरस्थं पित्तं वर्धते ।

एवं द्रव्यस्य पित्तकषायादि रसानां आविर्भावात् शरीरस्थ: वायु: वर्धते ।

– इदानीं केवलं यदि मधुररसस्य अभ्यास: कृत: तर्हि तेन इतरदोषापेक्षया कफोत्पति: आधिक्येन भवति तस्य वृद्धि: भवति च । एवं एव इतरेषां दोषोत्पादकरसानां विषये ज्ञातव्यम् ।

– शेषा टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति । ज्योतिषचन्द्रसरस्वतिना कृतमवस्थापाकानां वर्णनं विशेषमस्ति । योगीन्द्रनाथसेनस्य टीका विशेषा ।

उपाधिकरणम् ४) संसर्गविकल्पविस्तार: – सूत्रम् ८

चरक: – रसदोषाणां संसर्गविकल्पयो: विस्तार: अपरिसंख्येय: अस्ति । यत: विकल्पानां भेदा: अपरिसंख्येया: सन्ति ।

चक्रपाणि:

– रसदोषाणां संसर्गप्रपंचवर्णनस्थ: हेतु: अत्र वर्णिता अस्ति । संसर्गभेदानां विस्तार: अपरिसंख्येय: अस्ति । अत: असंसृष्टरसानां षट्त्वं दोषाणां च त्रित्वं वर्णितम् ।

– रसदोषाणां संसर्गस्य विजातीय: विकल्पभेद: भवति । एष प्रकार: अपरिसंख्येय: अस्ति ।

– रसानां मधुराम्ल: मधुरलवण: च एवं विजातीयौ भैदौ स्त: । तथैव मधुर: मधुरतर: मधुरतम: च रसस्य तरतमाणां संसर्गभेद: अपि भवितुमर्हति । एते भेदा: अपरिसंख्येया: सन्ति ।

– रसास्तरतमाभ्यां तां संख्यामतिपतन्ति हि । (च.सू. २६)

गङ्गाधर: –

–दोषाणां ५९ रसानां ५६ संसर्गा: सन्ति । एतादृशानां रसदोषाणां परस्परसंसर्गस्य विकल्पभेदा: अपरिसंख्येया: सन्ति । यत: तेषां गणना अशक्या ।

– रसस्य रसान्तरेण दोषस्य च दोषान्तरेण संसर्ग: अनेकै: भेदै: भवितुं शक्य: ।

१) अंशांशत: २) परिमाणविशेषत: ३) कर्मविशेषत:

योगीन्द्रनाथ सेन –

– सामान्यविपर्ययेण वृद्धिक्षयौ एष: नियम: केवलं असंसृष्टरसदोषाणां अस्ति । रसदोषाणां संसर्गे एतादृशी व्यवस्था न भवति ।

– संसर्ग इह विषमसमवेततया । ‘अत्र’ संसर्ग: इति पदं विषमपद्धत्या मिलितानां रसदोषाणां अनुषंगेण योजित: अस्ति ।

– अस्यैव विषमसमवेतरुपे संसर्गे विकल्प: सम्भवितुं शक्नोति । अस्मिन् संसर्गे ये विकल्पा: सन्ति तेषां विस्तार: अपरिसंख्येया: भवति । यत: संसर्गकृता: विकल्पभेदा: असंख्या: सन्ति ।

– रसानां य: दोषकोपनशमनत्वं लक्षणरुपीप्रभाव: अस्ति । सकेवलं असंसृष्टानां न संसृष्टानाम् ।

– आत्रेयभद्रकाप्यीयोक्त – तस्मान्न संसृष्टानां रसानां कर्मोपदिशन्ति बुद्धिमन्त: । (च.सू. २६)

– अत: षड्रसानां त्रयाणां दोषाणां च य: यथास्व: प्रभाव: अस्ति स तेषां समसमवायरुपिषु मिलित संसर्गेषु एव ज्ञायते, विषमसमवायेषु न ज्ञायते ।

– मिलितानां रसानां दोषेषु वृद्धिक्षयरुपिणी व्यवस्था कर्तुं न शक्यम् । यत: रसानां संसर्गानुसारेण विकल्पा: अपरिसंख्येया: सन्ति । तेन तेषां दोषेषु प्रभाव: अंशांशानुसारं विभिन्नप्रकारक: भवेत् ।

– रसानां दोषेभ्य: सन्निपात: (मेलनं) यदा समसमवेत: अस्ति तदा एव रसानुसारं दोषाणां वृद्धिक्षयरुपिणी व्यवस्था कर्तुं न शक्यम् ।

– परं यदा एतद् रसदोषमेलनं विषमसमवेतं अस्ति तदा तेषां विकल्पविस्तार: अपरिसंख्येय: अस्ति । तेन दोषस्य: कार्यव्यवस्था निर्णेतुं कठिनं भवति ।

ज्योतिषचन्द्र सरस्वति –

– रसदोषाणां संसर्गस्य आनन्त्यं कथितमस्ति । रसदोषाणां एष संसर्गविकल्पविस्तार: संसर्गविकल्पाभ्यां अपरिसंख्येय: अस्ति । संसर्ग: नाम सममात्रसंयोग: विकल्प: नाम अंशांशभेद: च । एतेन रसदोषाणां संसर्गसमूह: भवति स: असंख्येय: भवति ।

– शेषा टीका अविशेषा ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

उपाधिकरणम् ५) रसदोषप्रभावेण द्रव्यविकारप्रभावतत्वव्यवस्था – सूत्र – ९

चरक: – नैकेषु रसात्मकद्रव्येषु नैकेषु दोषात्मकविकारेषु रसदोषाणां प्रभावं एकैकश: समीक्षणं कृत्वा अनन्तरं द्रव्यविकारयो: प्रभावस्य तत्वं निश्चितं करणीयम् ।

चक्रपाणि: –

– परस्परसंसृष्टानां रसदोषाणां प्रभाव: कथं ज्ञातव्य: इति एतस्मिन् सूत्रे वर्णितमस्ति ।

– नैकेषु रसात्मकद्रव्येषु एकैकस्य रसस्य प्रभावस्य परीक्षणं कृत्वा अनन्तरं द्रव्यस्य प्रभाव: निश्चित: करणीय: । तथैव नैकेषु दोषात्मकविकारेषु एकैकं दोषं विचार्य अनन्तरं विकारस्य प्रभाव: निश्चित: करणीय:।

– एष एव नियम: एकरसात्मकं द्रव्यस्य एकदोषात्मकं विकारस्य च प्रभावनिश्चित्यै उपयोजितव्य: ।

गङ्गाधर: –

– एतादृशा: अपरिसंख्येया: संसर्गविकल्पभेदा: यदा सन्ति तदा षट्त्वं त्रित्वं च इति रसदोषाणां वर्णनं कुर्वता व्यवसायवृद्धि: कथं निर्णेतव्या? अस्य उत्तरम् =

– प्रकृतिसमसमवेत – अनेकरसात्मकद्रव्येषु तथैव प्रकृतिसमसमवेत – अनेकदोषात्मकविकारेषु रसदोषाणां प्रभाव: अस्ति ।

– अनेकरसात्मकद्रव्येषु रसानां एकैकश: प्रभावं विचार्य तदनन्तरं दोषाणां एकैकश: प्रभाव: विचारणीय: । अनन्तरं तेषां तेषां रसवत् द्रव्याणां तेषां तेषां दोषप्रकृतिकविकाराणां प्रभावस्य तत्वं निश्चितव्यम् ।

योगीन्द्रनाथ सेन

– एकं द्रव्यं – अनेकरससमसमवेतम्

– एक: विकार: – अनेकदोषसमसमवेत:

– अत: रसदोषाणां प्रभावं एकैकश: परीक्ष्य तदनुसारं तद् द्रव्यस्य विकारस्य च व्यवस्था करणीया

– यत्र एक: रस: वा एक: दोष: स्यात् तत्र अनुक्रमेण द्रव्यप्रभाव: विकारप्रभाव: च अबाधित: भवति । अनपवादित: अस्ति । तथैव यत्र अनेकरसा: वा अनेकदोषा: वा समसमवेततया मिलिता: सन्ति तत्रापि ते षट्त्वं वा त्रित्वं अनतिक्राम्यन्ति तेन एकैकस्य रसस्य वा दोषस्य वा प्रभावं ज्ञात्वा तत: द्रव्यविकाराणां प्रभावं ज्ञातुं शक्यं भवति ।

ज्योतिषचन्द्र सरस्वति – अविशेषा टीका – शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

उपाधिकरणम् – ६) विषमसमवेतानां प्रभावतत्वस्य निर्णय: सूत्रम् – दशमम्

चरक: – अनेकरसात्मक दोषेषु अनेकदोषात्मकविकारेषु च एकैक रसदोषाणां प्रभाव: परीक्ष्य अनन्तरं द्रव्यविकारयो: प्रभाव: निश्चितव्य: ।परं एष: नियम: सर्वत्र न चलति । विकृतिविषमसमवेतेषु नानात्मकेषु परस्परान् उपघातयतान् अन्यविकल्पनाभि: विकल्पितानां अंशांत्मकप्रभावस्य अनुमानात् समुदायात्मकस्य प्रभावतत्वस्य निश्चयं कर्तुं अशक्यम् ।

टीका – चक्रपाणि: –

– रसदोषप्रभावात् द्रव्यविकाराणां प्रभावं ज्ञातुं सर्वत्र न शक्यम् । तस्य हेतव: अस्मिन् सूत्रे वर्णिता: सन्ति ।

– विकृतिविषमसमवेतानाम् –

विकृतिसमवेतानां तथा विषमसमवेतानां च इति विकृतिविषमसमवेतानाम् ।

– समवेतानां इति मिलितानां रसानां दोषाणां च । रसानां दोषाणां च मिलितत्वं नाम समवेतम् ।

– अ) विकृतिसमवाय: – रसस्य विकृतिसमवाय: – तण्डुलीयके मधुररस: स्वभावत: मधुररस स्नेहवृषत्वादि कर्म करोति परं एतत् कर्म तण्डुलीयकं न करोति । एष: विकृतिसमवेत: अस्ति ।

– आ) विषमसमवाय: – तिलेषु कषायकटुतिक्तमधुरा: चत्वार: रसा: सन्ति । यदि एते रसा: समानमात्रायां समवेता: (मिलिता:) स्यु: तर्हि तद् द्रव्यं पित्तश्लेष्महरं अथवा त्रिदोषहरं कार्यं कुर्वत् आवश्यकम् । परं एतै: रसै: युक्तं तिलद्रव्यं पित्तश्लेष्मकरं अस्ति । अत: रसमाध्यमेन क्वचित् कर्तृत्वं अपि च क्वचित् अकर्तृत्वं दृश्यते । एवं विकृतिविषमसमवेतेन कर्मविषये वैषम्यं दृश्यते ।

१) नानात्मकानाम् – अत्र द्विविधौ अर्थौ प्रकटितौ

अ) 'नानात्मकानां इति नानारूपहेतु जनितानाम् ।'

अस्य अर्थ: रसदोषा: नानाविधस्वरुपस्य हेतुभि: उत्पन्ना: सन्ति । एतेषां हेतुनां बलभेदेन रसदोषाणां विकृत: अथवा विषम: समवाय: (मेलनं) भवति ।

ब) 'नानात्मकानां इति नानाप्रमाणानाम् ।'

अस्य अर्थ: रसदोषेषु विविधप्रकारकं प्रमाणवैविध्यं अस्ति । तेन तेषां विषमसमवाय: शक्य: ।

२) परस्परेण उपहतानाम् – ''इति अन्योन्यं उपघातिगुणानाम् ।''

– यदा द्वौ अथवा अधिका: भावपदार्था: सम्मिलन्ति तदा ते परस्परान् गुणान् उपघ्नन्त: सन्ति तर्हि तेषां प्रभावस्य ज्ञानं अशक्यम् ।

– प्राय: दोषा: परस्परान् गुणान् न उपघ्नन्ति । दोषा: परस्परविरूद्धानां गुणानां सन्त: अपि शरीरे एकत्रस्थित्वा शरीरधारणाया: कार्यं कुर्वन्ति ।

– परं चक्रपाणिवचनानुसारं अदृष्टवशात् ते क्वचित् परस्परगुणान् उपहन्तुं शक्नुवन्ति । रसः तु स्वप्रबलगुणेन दुर्बलानां गुणयुक्तानाम् अन्यरसानाम् उपघातं कुर्वन्ति ।

३) अन्यैः विकल्पनैः

– विकल्पः नाम भेदः । स्वरसकल्कादिभिः कल्पनाभेदैः एकद्रव्यस्थे रसे गुणान्तराधानं भवति । दोषाणामपि दूष्यविशेषानुसारं तैः विकल्पैः गुणान्तरं भवति । पश्यतु ।

स एव कुपितो दोषः समुत्थानविशेषतः ।
स्थानान्तरगतश्चैव विकारान् कुरते बहुन् ।। च. सू. १८

– एवं विविधैः कारणैः अनेकरसात्मकेषु द्रव्येषु तथा अनेकदोषात्मकेषु विकारेषु एकैकस्य प्रभावज्ञानेन समुदायप्रभावस्य ज्ञानं न शक्यम् ।

– चक्रपाणि निर्मिता आशङ्का –

परं अस्मिन् व्याख्याने रसदोषाणां उत्कर्षापकर्षत्वान् भवन् यः विषमसमवायः पृथक् कथितः स न उचितः । यतः विषमसमवाये उत्कृष्टगुणयुक्तरसः दोषाणां उत्कृष्ट गुणः एतयोः अपकृष्टस्य अपकृष्टगुणः भवति इति विज्ञाय पश्चात् अवयवप्रभावस्य अनुमानेन समुदायप्रभावस्य अनुमानं शक्यम् ।

अधुना यदि एवं उच्यते यत् अस्मिन् विषमसमवाये रसदोषाणां गुणाः उत्कृष्टाः वा अपकृष्टाः न भवन्ति प्रत्युत केवलं गुणान्तरं भवति तर्हि एष विकृतसमवायः एव विसदृशं कार्यं भवेयुः । तर्हि नैतद् वचनं योग्यम् । अस्य विषमसमवायस्य अन्यप्रकारेण विवेचनं कर्तुं शक्यम् ।

– रसदोषाणां मेलनं (समवायः) द्विविधम् अस्ति । – १) प्रकृत्यनुगुणः २) प्रकृत्यननुगुणः

– प्रकृति अनुगुणः – यस्मिन् मिलितानां प्राकृत गुणस्यउपघातः न भवति तेषां मेलनं भवति च स प्रकृतिअनुगुणः । एष एव प्रकृतिसमसमवायः इति भणन्ति ।

– प्रकृति अननुगुणः – यस्मिन् मिलितानां प्राकृतगुणानाम् उपघातं भूत्वा अनन्तरं मेलनं भवति तं प्रकृति अननुगुणः इति वदन्ति। एष एव विकृतिविषमसमवायः इति उच्यते ।

– विकृतैः हेतुभिः विषमप्रकृतेः गुणानां यः प्रतिकुलः संयोगः भवति सः विकृतिविषमसमवायः इति उच्यते । अस्मिन् विकृतिविषमसमवाये नानात्मकादयः त्रयः हेतवः सन्ति ।

– विषमसमवायस्य वैषम्यस्य तरतमभेदेन अधिक: विस्तार: भवति । तेन तस्य विषमावयवानां गुणानाम् अनुमानं कष्टसाध्यम् । तदर्थं बहुप्रयासा: आवश्यका: स्यु: । अत: अत्रापि द्रव्यविकारस्य समुदायात्मक–प्रभावस्य एव विचार: आवश्यक: ।

– चक्रपाणिमतानुसारं प्रतिस्थानं एकैकांशस्य प्रभावज्ञानेन पूर्णस्य समुदायस्य प्रभावज्ञानं कर्तुम् अशक्यम् । तत्र नैकानि बाधकानि कारणानि सन्ति । अत: एतादृशे स्थाने पूर्णस्य समुदायस्य प्रभावं ज्ञात्वा व्यवहर्तव्यम् । एकैकांशस्य प्रभावस्य विचार: अतीव कठिण: अस्ति ।

गङ्गाधर: –

– अत्र गङ्गाधरेण अतीव वैशिष्ट्यपूर्णं विवेचनं कृतम । पूर्वपक्षं संस्थाप्य पश्चात् तस्य स्पष्टीकरणार्थ उत्तरपक्षस्य वर्णनं ईदृशी पद्धति तत्रभवता अवलम्बिता ।

– पूर्वपक्ष: कार्यं कारणसमानम् अस्ति । असंसृष्टेषु रसेषु कार्यकारणयो: समवाय: अस्ति । तर्हि रसदोषयो: संसर्गे तु कार्ये कारणसमवाय: न भवति । किम् अत्र कारणम् ?

तथैव कारणगुणवैषम्येन कारणसमानरुपं सदपि क्वचित् कार्ये कारणसमवाय: न दृश्यते । अस्य क: हेतु: ? एतेषां विषयाणां सन्दर्भ: चरकाचार्येण अस्मिन् सूत्रे कृत: ।

उत्तरपक्ष:

– सर्वेषु रससंसर्गेषु दोषसंसर्गेषु च कारण–कार्य समवायितत्वम् इति व्यवस्था न भवति । यत: वैद्य: अग्रिमतत्वानाम् अध्यवसायं कर्तुं न शक्नोति ।

१) विकृतिविषमसमवेतानां भावानां अवयवप्रभावतत्वम् ।

२) नानात्मकानां भावानाम् अवयवप्रभावतत्त्वम् ।

एतयो: द्विविधानां घटकानां विचार: करणीय: भवति ।

अ) नानारसात्मकानां द्रव्याणां प्रभावतत्त्वम् ।

आ) नानादोषात्मकानां विकाराणां प्रभावतत्त्वम् ।

३) रसानां द्रव्यगतं तथा दोषाणां विकारगतं संसृष्टप्रभावतत्त्वम्

अस्य अपि द्विविधौ घटकौ स्त: । ⟹

**रस–द्रव्य**

नानारसानाम् आरम्भकाणाम्
↓
द्रव्यकार्यारम्भे
↓
आश्रयद्रव्यस्थ कर्माणि
↓
कालदेशवशात्
↓
प्रकृतिस्थान् रसान् विकृत्य
↓
परस्परेण उपहत्य
↓
तत्तद्रसप्रभावत: विषमरुपेण

अपूर्वविशिष्टस्वरुपेण
↓
कार्यरसेषु समवायिन: कुर्वन्ति
↓
परस्परेण उपहतरसानां

द्रव्याणां प्रभावतत्त्वम्

**दोष–विकार**

नानादोषाणाम् आरम्भकाणाम्
↓
ज्वरादि कार्यारम्भे
↓
तद् तद् दोषस्थ कर्माणि
↓
कालदेशनिदानविशेषवशात्
↓
विकृत्य प्रकृतिस्थस्वरुपं विहाय
↓
परस्परेण उपहत्य
↓
विषमकर्मरुपेण

अपूर्वविशिष्ट स्वरुपेण परिणम्य
↓
क्रियमाणे ज्वरादौ समवायीनि भवन्ति
↓
परस्परेण उपहतकर्मवातादिदोषजानां

ज्वरादिविकाराणां प्रभावतत्त्वम्

अन्यभि: विकल्पितभावानां अवयवप्रभावतत्त्वम्

↓ एकैकरसप्रभावस्य कर्मविकल्पनै: → भिन्नविकल्पनै:

↓ एकैकदोषप्रभावस्य विकल्पनै: → भिन्नविकल्पनै:

भिन्नविकल्पनै:
↓
गुणकृतगुणविकल्पनै: विकल्पितानाम्

कार्यरसानाम् अवयवप्रभावानुमानेन
↓
तद् आरम्भकरसाश्रयद्रव्यस्थकृतै: गुणै:
↓
अवयवै: अनुमानेन
↓
विकृतिविषमसमवेतस्य नानारसात्मकद्रव्यस्य

समुदायस्य प्रभावतत्त्वम् → अध्यवसातुं न शक्यम् ।

कार्यज्वरादिविकाराणाम् अवयवप्रभावानुमानेन
↓
तद् आरम्भदोषस्य गुणकृतै: गुणै:
↓
अवयवै: अनुमानेन
↓
विकृतिविषमसमवेतस्य नानादोषात्मकस्य

ज्वरादे: समुदायस्य प्रभावतत्त्व → अध्यवसातुं न शक्यम् ।

– सर्वे भावा: समवायीकारणै: देशकालकारणविशेषत्वेन द्विविधौ स्त: ।

अ) प्रकृतिसमसमवाय: ।

आ) विकृतिविषमसमवाय: ।

– प्रकृतिसमसमवाय: –

द्रव्यस्य आरम्भका: चेतनया स्वस्वकर्मभि: परस्परं संयुज्य पुन: पुन: संयोगविभागस्य आवर्तनं भूत्वा विभज्यन्ति । देशकालाकारणादिभि: स्वाश्रयद्रव्याणाम् अनुरुपै: गुणै: मिलित्वा एकीकृता: भवन्ति । निसर्गत: समवायिषु भावेषु उत्पद्यन्ते एतम् प्रकृतिसमसमवाय: इति वदन्ति । अस्मिन्

– सजातीयानि द्रव्याणि द्रव्यान्तरम् उत्पादयन्ति ।

– सजातीया: गुणा: गुणान्तरम् उत्पादयन्ति ।

– सजातीयानि कर्माणि कर्मान्तरम् उत्पादयन्ति ।

– विकृतिविषमसमवाय:

येषु द्रव्येषु अन्यभावा: निर्मिमते, येषां भावानाम् उत्पत्तिसमये चेतनया स्वस्वकर्मभि: एकीभूय विजातीयं रुपं प्राप्यते । संयोगविभागानाम् आवर्तनं भूत्वा विजातीया: अचिन्त्या: परिणतभावा: उत्पद्यन्ते । एतान् विकृतिविषमसमवाय: इति वदन्ति । अस्मिन्

– द्रव्याणि सजातीयानि द्रव्याणि उत्पादयन्ति ।

– गुणा: सजातीयान् गुणान् उत्पादयन्ति । कारणगुणपूर्वको हि कार्यगुणो भवति ।

– कर्माणि सजातीयं विजातीयं च एवं विरोधिकर्मणी आरभन्ते । एष: संहतरुपिणां कर्मभावानां प्रभाव: अस्ति इति वदन्ति ।

– प्रश्न: पूर्वपक्ष: –

द्रव्यं वा गुण: वा कर्म वा एते यदि विकृतिविषमसमवेता: सन्ति तर्हि सजातीयम् आरम्भकत्वं किं केवलं द्रव्यगुणानाम् अस्ति ? कथं न कर्मण: ?

उत्तरपक्ष: –

– न एवम् । अस्य कारणम् – यत: द्रव्यगुणौ कर्म च इति त्रिविधानां घटकानुसारं ऊहनं कृतम् ।

द्रव्यम् – द्रव्यं सजातीयं द्रव्यान्तरं आरभते । यथा बाह्यं पृथ्वी द्रव्यं शरीरस्था मूर्ति: आदीनां भावानाम् उत्पत्ति: करोति । पृथ्वीद्रव्यं अन्येषां विजातीयानां जलादिभावविशेषाणाम् उत्पत्तिं कर्तुं न शक्नोति । आपद्रव्येण शारीरजलेषु जलान्तरं भवति । तेजद्रव्येण शारीरतेजसु तेजान्तरं भवति । विकृतिविषमसमवेते अपि द्रव्येण तस्य सजातीयद्रव्ये रुपान्तरणं भवति न विजातीये ।

गुण: – द्रव्यस्थ: रसादय: गुणा: सजातीय गुणान्तरम् उत्पद्यन्ते । उदाहरणार्थम् – साधारणरसयुक्ते द्रव्ये भूतान्तरं संयोगं सता अभिव्यञ्जनं भूत्वा सजातीय: मधुरादिरसा: उत्पद्यन्ते । इत्यर्थ: प्रकृतिसमसमवाय: स्यात् अथवा विकृतिविषमसमवाय: कोऽपि गुणा: तस्य सजातीये गुणे परिवर्तते ।

रस: ⟶ रसान्तरम् ।

रस: रुपान्तरं गन्धान्तरं वा शब्दान्तरं इति विजातीयान् गुणान् उत्पादयितुं न शक्नोति ।

कर्म – प्रकृतिसमसमवाये द्रव्यस्थानि कर्माणि सजातीयं कर्मान्तरं कुर्वन्ति । परं विकृतिविषमसमवाये द्रव्यस्थानि सर्वाणि कर्माणि एकीभूय विजातीयानि अचिन्त्यानि कर्माणि उत्पादयन्ति । एतं एव प्रभाव: इति उच्यते ।

योगीन्द्रनाथ सेन

– एवं रीत्या रसदोषप्रभावेन द्रव्यविकाराणां प्रभावे रसदोषप्रभाव: एव वर्णित: । पृथक् द्रव्यविकारप्रभाव: न वर्णित: । एतादृशं रसदोषाणां प्रभावेन द्रव्यविकारप्रभावस्थ ज्ञानं सर्वेषु द्रव्येषु अथवा विकारेषु प्राप्तुं शक्यं न भवति ।

– यदा रसानां वा दोषाणां समसमवेतमेलनम् अस्ति तदा एव रसप्रभावेन द्रव्यप्रभावं दोषप्रभावेन विकारप्रभावं च ज्ञानं प्राप्तुं शक्यं भवति । अपि तु रसानां वा दोषाणां विषमसमवेत: संयोग: स्यात् तदा तु एतादृशं ज्ञानं न भवति । यत: विषमसमवाये अपरिसंख्येया: विकल्पा: सन्ति ।

– प्रकृतविकृतानां दोषाणां संसर्ग: द्विविध: भवति । समसमवेत: विषमसमवेत: च ।



अत्रस्थस्य विकृतिविषमसमवेतस्य वर्णनम् अत्र कृतमस्ति ।

– अस्मिन् विकृतिविषमसमवेतानां विकृति: नाम आहारादिवशात् स्वप्रमाणच्युति: अस्ति । एतेन विषम: समवाय: भवति ।

– आहारादिनां विकृतहेतुनां सेवनेन दोषाणां द्रव्यत: गुणत: कर्मत: च स्वप्रमाणच्युति: भवति । एवं विकृतभूतानां दोषाणां विषम: समवाय: भवति । तं विकृतिविषमसमवेत: इति भणन्ति ।

– वैषम्यं इति ऊनाधिकभाव: ।

– अपि च एष न्यूनाधिकभाव:, वृद्ध: वा क्षीण:, दोषाणां तारतम्यकल्पनया भवति । (अंशांशकल्पनया भवति) अथवा युगपद् दोषाणां वृद्धिक्षयाभ्यां भवति ।

| |
|---|
| दोषवैषम्यम् – दोषाणां न्यूनाधिकभाव: । |
| तद् द्विविधं भवति । |
| अ) वृद्धानां क्षीणानां दोषाणां तारतम्यकल्पना । |
| आ) युगपत् दोषाणां वृद्धिक्षयावस्था । |

– विषमसमवाय: प्राकृतदोषाणां भवितुं शक्य: । अस्य अपवाद: करणीय: इत्यत: सूत्रे स्पष्टतया विकृति विषमसमवेतस्य उल्लेख: अस्ति: ।

– प्रकृतिविषमसमवाये प्रभावतत्त्वं निश्चेतुं शक्यम् परं विकृतिविषमसमवाये न शक्यम् अत: तेषाम् उल्लेख: कृत: ।

नानात्मकम् – वृद्धानां वा क्षीणानां दोषाणां द्युल्बणा: वा एकोल्वणादय: नानाविधत्वम् ।

उपहतप्रकृतिक: – युगपत् वृद्धक्षीणदोषाणां परस्परविरोधात् परस्पराणां उपघातकरणम् ।

अन्यै: विकल्पनै: – युगपद् वृद्धिक्षयाभ्यां भवतां दोषाणां विविधा: विकल्पा: ।

एतेषां संदर्भ: चरकसूत्रस्थाने सप्तदशे अध्याये अस्ति ।

–

| | | | |
|---|---|---|---|
| दोषाणां – | विकृतिविषमसमवाय: | – | अनेका: |
| – | विकृतिसमसमवाय: | – | एक: |

– विकृतियुतानां दोषाणां समसमवाय: एकमेव अस्ति । (संदर्भ: च: सू. १७)

– तस्मिन् विषमसमवेतानां रसानां वा दोषाणां अवयवानां (एकैकस्य) प्रभावस्य अनुमानेन समुदायप्रभावस्य ज्ञानं कारणीयम् अशक्यम् ।

– एकैकरसस्य प्रभावस्य अनुमानात् तस्य द्रव्यस्य संपूर्णप्रभावस्य ज्ञानं कारणीयम् अशक्यम् । तथैव एकैकदोषस्य प्रभावस्य अनुमानात् संपूर्णविकारप्रभावस्य ज्ञानं कारणीयम् अशक्यम् ।

– प्रस्तुते स्थाने उपक्रम – उपक्रम्यभावानुसारं एकैकस्य प्रभावज्ञानेन समुदायप्रभावस्य ज्ञानं कारणीयम् अशक्यम् ।

– विषमसमवेतानां रसदोषाणाम् अपरिसंख्येया: विकल्पा: सन्त: एकैकप्रभावस्य ज्ञानं कारयितुं असंभवनीयम् ।

ज्योतिषचन्द्र सरस्वति

– संसृष्टदोषाणां वा रसानां संसर्ग: द्विविध: भवति । – प्रकृतिसमसमवाय:

– विकृतिविषमसमवाय:

– प्रकृतिसमसमवाये रसेभ्य: द्रव्यपप्रभाव: दोषेभ्य: च विकारप्रभावस्य निश्चय: कर्तुं शक्य: । अस्मिन् रसा: वा दोषा: प्राकृतावस्थायामेव संम्मिश्रिता: भवन्ति । तथा स्वानुरुपगुणानां द्रव्यं अथवा स्वानुरुपलक्षणानां विकार: उत्पद्यते ।

– तेन अवयवप्रभावेन समुदायप्रभावत्वं ज्ञातुं शक्यं भवति ।

– अपि तु यत्र द्रव्यावयवा: वा विकारावयवा: विषमतया विकृतरुपेण प्रकृते: प्रतिकुला: सन्त: सम्मिश्रिता: सन्ति । तत्र अवयवप्रभावेण समुदायप्रभाव: पृथक् ज्ञातुं न शक्यम् ।

– एते विकृतिविषमसमवेता: अवयवा: कुत्र भवन्ति ? अस्य वर्णनं अस्मिन् सूत्रे कृतमस्ति ।

१) नानात्मकानाम् – एकस्य द्रव्यस्य रुपभेदेन पृथक् प्रभाव: भवति तथैव एकेनैव संसृष्टदोषेण व्याधौ पार्थक्यं दृश्यते । अत: नानारुपत्वं इति विकृतिविषमसमवेतस्य एक: हेतु: अस्ति ।

२) परस्परोपहतानाम् – अनेकरसयुक्तेषु द्रव्येषु एकेन रसेन अपरस्य रसस्य उपघात: भवति । उदाहरणम् – लवणाधिक्ये सति मधुररसस्य उपघात: भवति ।

तथैव संसृष्टदोषाणां व्याधौ एकेन दोषेण विरुद्धगुणस्य अपरस्य दोषस्य विकृतिविषमसमवाये उपघात: भवति । यथा पारदगन्धकसंयोगवत् काऽपि तृतीय: गुणयुक्तविकार: उत्पद्यते ।

३) अन्यैः विकल्पनैः – नानाविधसंस्कारादियोगेन अपि अवयवप्रभावमाध्यमेन समुदायप्रभावतत्वं ज्ञातुं न शक्यम् । उदाहरणार्थम् – व्रीहौ गुरुत्वमस्ति । परं तेषु व्रीहिषु संस्कारं कृत्वा यदि लाजाः निर्मियन्ते । तर्हि तत्र लाघवत्वं आगच्छति ।

– तथैव, विकारे अपि अंशांशतः पृथक् दोषेण विकल्पिते विकारे सम्पूर्णतः अवयवप्रभावेन विकारप्रभावतत्वं ज्ञातुं न शक्यते ।अतः तन्त्रकारैः एकस्मिन् एव सन्निपातजे ज्वरे स्वीकृतिविषम समवायस्य अंशेन त्रयोदशप्रकाराः वर्णिताः सन्ति ।

निष्कर्षः – वैधर्म्यं नास्ति । वर्णने तथा उदाहरणेषु विशेषत्वमस्ति ।

उपाधिकरणम् – ७) समुदायप्रभावतत्वस्य व्यवस्था – सूत्रे – ११, १२

चरकः –

– मिश्रिते समुदाये समुदायप्रभावतत्वं ज्ञात्वा द्रव्यविकारयोः प्रभावतत्वस्य निश्चियः करणीयः ।

– अतः रसप्रभावतः द्रव्यप्रभावतः दोषप्रभावतः विकारप्रभावतः च तत्वस्य उपदेश क्रियेत ।

– तत्रस्थस्य रसप्रभावस्य उपदेशः पूर्वस्मिन् अधिकरणे कृतः ।

टीका – चक्रपाणिः –

– विकृतिविषमसमवाये समुदायस्वरुपिणां रसदोषाणां प्रभावतत्वस्य विचारः करणीयः । उदाहरणार्थम् – सम्मेलिते मधुसर्पिसंयोगे मधुघृतस्य गुणाः क्रमागतरुपेण बाधकाः न भवन्ति ।

– दोषसमुदायरुपी सूर्यावर्तः नाम्नि व्याधौ दोषप्रभावेण पीडा न भवति । प्रत्युत सूर्यवृध्दिसमानपीडायां वृध्दिः भवति ।

– एवं विकृतिविषमसमवाये पूर्णस्य समुदायप्रभावस्य विचारः कर्तुं आवश्यकः ।

– अवयवप्रभावस्य पृथक् विचारः अत्र उपयुक्तः न भवति ।

– दोषरसानां मेलकस्य गतिः द्विविधा अस्ति । – प्रकृतिसमसमवायः ।

– विकृतिविषमसमवायः ।

उदाहरणार्थम् – १) सन्निपातज्वरः –

प्रकृतिसमसमवायः–ज्वरनिदानाध्याये दोषलक्षणमेलकेन उत्पनः सन्निपातज्वरः ।(चरक.नि १/२९)

विकृतिविषमसमवाय: –ज्वरचिकित्साध्याये विकृतिविषमसमवेतै: त्रिदोषै: उत्पन: सन्निपातज्वर: ।

(च. चि. ३)

२) आम्रातकफलम् – अस्मिन् मधुरत्वं प्रकृतिसमसमवेतस्वरुपं सता मधुरत्वस्य वातपित्तहरं कर्म दृश्यते ।

३) वार्ताकम् – कटुतिक्तरसस्य सता वातकर: स्यात् इति अपेक्ष्यते । परं कटुतिक्तरस: विकृतिविषमसमवेत: अस्ति तेन वार्ताकं वातघ्नम् अस्ति । 'वार्ताकं वातघ्नम्'(चरकसूत्र – २७)

**– द्रव्याणां वीर्यप्रभाव: विपाकप्रभाव: च एतौ अपि द्रव्यप्रभावे तथा रसप्रभावे च समावेशनीयौ ।**

**– तन्मध्ये ये रसानुगुणा: वीर्यविपाकप्रभावा: स्यु: ते रसप्रभावे समावेशनीया: । तथा ये वीर्यविपाकप्रभावा: रसविपरीता: स्यु: तेषां समावेशनं द्रव्यप्रभावे करणीयम् ।**

– एष: रसद्रव्यदोषविकाराणां प्रभाव: सम्पूर्णे ग्रन्थे विस्तारेण कथित: स्यात् अस्य उपदेशसूत्रमत्र अस्ति । अस्मिन् अध्याये संक्षेपत: रसप्रभाव: कथित: ।

गङ्गाधर: –

– कारणविशेषात् विकृतिविशेषेण परस्वराणां उपघातं कुर्वतां आरम्भका: इति प्रकृतिभूतकारणानां विकृत्या स्वकर्मस्य विपरीतरुपस्य कर्मानुसारं समवाययुक्तरसे एकीभूतरुपस्य समुदायप्रभावस्य तत्वं ज्ञातव्यम् ।

– तदनन्तरं तद् समुदायप्रभावतत्वानुसारं द्रव्यविकारप्रभावतत्वस्य व्यवस्था करणीया । कारणानुसारि कार्यरुपि द्रव्यविकारप्रभावस्य तत्वं ज्ञातव्यम् ।

– प्रभावतत्वं नाम स्वस्वकर्मकरत्वस्य स्वभावस्य तत्वम् ।

–रसप्रभावत:– समुदायप्रभावतत्वव्यवस्था व्यतिरिक्त द्रव्यविकारयो: ज्ञानाभावात् प्रकृतिसमसमवेत द्रव्यमानज्ञानार्थम् ।

– द्रव्यप्रभावत: – विकृतिविषमसमवेतभूतारब्धद्रव्यमानज्ञानार्थन्तु ।

– दोषप्रभावत: – प्रकृतिसमसमवेतदोषारब्धविकारमानज्ञानार्थम् ।

– विकारप्रभावत: – विकृतिविषमसमवेतदोषारब्धरोगमानज्ञानार्थम् ।

अनेन माध्यमेन तत्वं नाम द्रव्यविकाराणां यथार्थं ज्ञानं प्राप्तव्यम् ।

– अत्र य: रस: यद् कर्म करोति तस्य रसस्य तत् कर्मकरत्वं एतादृशस्य शक्तिरुपप्रभावस्य उपदेशकथनं समाप्तम् ।

योगीन्द्रनाथ सेन –

– द्रव्यविकाराणां प्रभावस्य अध्यवसाय: कथं करणीय: इति अस्मिन् सूत्रे कथितमस्ति ।

– यत्र रसानां वा दोषाणां विषमसमुदाय: अस्ति एतादृशे स्थाने समुदाये अवयवि द्रव्यविकाराणां मध्ये समुदायस्य प्रभावतत्वं ज्ञात्वा तस्यएव प्रभावतत्वस्य व्यवस्था करणीया ।

– द्रव्यप्रभावतत्वम् – द्रव्यस्य व्याधिउपशमसामर्थ्यम् ।

– विकारप्रभावतत्वम् – व्याधे: बलम् ।

– एवं उपक्रमोपक्रम्याख्यरुपिण: प्रभावतत्वस्य विनिश्चय: करणीय: ।

– रसप्रभाव: – रसानां दोषकोपनशमनत्वम् । – शेषा: शब्दार्था: ।

ज्योतिषचन्द्र सरस्वति –

– अवयवप्रभावात् समुदायप्रभाव: यत्र पृथक् अस्ति तत्र तस्य तस्य द्रव्यस्य अथवा तस्य तस्य विकारस्य पृथक् भूतस्य प्रभावस्य निर्णय: करणीय: भवति । शेष: अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् द्वितीयम् – आ) द्रव्यप्रभाव:

अस्य द्वे उपाधिकरणे स्त: । १) अभ्यस्य त्रीणि – सूत्रे १३ – १४

२) अनभ्यस्य त्रीणि – सूत्राणि १५ – १८

१) अभ्यस्य त्रीणि –

चरक: – द्रव्यप्रभावस्य उपदेश: । तैलसर्पिमधु एते क्रमश: वातपित्तश्लेष्माप्रशमनं कुर्वाणा: सन्ति ।

| तैलम् | वायु: | |
|---|---|---|
| स्नेह: | रौक्ष्य | तैलं वातस्य |
| औष्ण्यम् | शैत्यम् | विरुद्धगुणा: |
| गौरवम् | लाघवम् | भवन्ति । |

| | | |
|---|---|---|
| मधु | श्लेष्मा | |
| रौक्ष्यम् | स्निग्धम् | मधु: कफस्य विरुद्धगुणा: भवन्ति । |
| तैक्ष्ण्यम् | मन्दत्वम् | |
| कषायत्वम् | मधुरत्वम् | |

| | | |
|---|---|---|
| सर्पि: | पित्तम् | |
| माधुर्यम् | अमधुरम् | सर्पि: पित्तस्य विरुद्धगुणा: भवन्ति । |
| शैत्यम् | उष्णम् | |
| मन्दत्वम् | तीक्ष्णम् | |

–सततं अभ्यस्यमानेन तैलेन वायो: प्रशम: भवति । सतताभ्यासमानेन सर्पिषा पित्तप्रशम: भवति । सततअभ्यासमानेन मधुना कफप्रशम:भवति । विरुद्धगुणसन्निपाते: हि भूयसाऽल्पमवजीयते

– अनया एव पद्धत्या अन्यद् किमपि द्रव्यं यद् वातपित्तकफानां गुणानां विपरीतमस्ति तद् अभ्यासेन तस्य तस्य दोषस्य प्रशमं करोति ।

टीका – चक्रपाणि: –

– द्रव्यप्रभावेण शृङ्गग्राहिकन्यायेन तैलादिद्रव्याणां प्रभावस्य वर्णनं कृतमस्ति ।

– प्रशमनार्थं अस्य अर्थ: प्रशमनस्य प्रयोजनाय इति अस्ति ।

– सततं अभ्यस्यमानं इति कोऽपि विच्छेद: न भूत्वा सेवनीयम् ।

– विरुद्धगुणसन्निपात: अत्र सन्निपात: इति पदं मेलक: इति अर्थेन उपयोजितमस्ति ।

– विरुद्धगुणानां मेलके य: अधिक: अस्ति स: अल्पं जयति । अत्र तैलस्य गुणा: वायो: गुणापेक्षया अधिकं कथं भवन्ति ? प्रत्युत अभ्यासेन निरन्तरसेवनेन च तैलस्य गुणाधिक्यं वायो: गुणापेक्षया भवति ।

– पित्तरस: अमधुर: इति कथितम् । अमधुर: अस्य अर्थ: मधुरविपरीत: कटुरस: ।

– प्रभाव: – अस्य सूत्रस्य टीकायां चक्रपाणिना प्रभावविषये विशेषा व्याख्या कृता अस्ति । अस्मिन् अधिकरणे 'प्रभाव:' इति पदेन द्रव्यशक्ति: इति अर्थ: गृहीतव्य: । प्रभावपदस्य अचिन्त्यशक्ति: इति अपर: अर्थ: अत्र न अभिप्रेत: । तेन तैलादीनां वातादीदोषशमनत्वं तेषां गुणै: तथा तस्य द्रव्यस्य शक्त्या भवति एष: द्रव्यप्रभाव: अस्ति ।

–घृतं केवलं तस्य मधुररसेन पित्तशमनस्य कार्यं न करोति । अपितु तस्य माधुर्यशैत्यमन्दत्वादिभि: सर्वै: गुणै: पित्तप्रशमनस्य कार्यं करोति । एवं द्रव्यप्रभावस्य विचार: क्रियते ।

– यदा केवलं रसमाध्यमेन एकस्य द्रव्यकार्यस्य अन्वय: योजित: भवति तदैव तं रसप्रभाव: इति उच्यते । उदाहरणार्थम् – मधो: कषाय अनुरसत्वम् ।

– परं केषांचित् आचार्याणां मतेन तैलादिद्रव्याणां दोषशमनस्य कार्यं अचिन्त्यशक्तिरुपी प्रभावज: भवति । तदर्थं ते आचार्या: कारणं आहु: यत् तैलं वात: च विरुद्धगुणानां भवत: । तेषां विरुद्धगुणानां मेलनेन तैलं एव वायो: प्रशमं करोति । वायु: तैलस्य प्रशमं न करोति तेन तस्य तैलस्य अचिन्त्य: प्रभाव: एव अस्ति ।

– परं एतेषां अन्येषां आचार्याणां मतेषु पुन: अन्यै: आचार्यै: आक्षेप: दर्शित: इति उक्ति: अयोग्या यत: तैलं सतताभ्यासेन तस्य आधिक्यात् वातशमनं करोति ।

– अत: चक्रपाणे: स्वमतं सिध्यति यत् द्रव्याणां दोषशमनत्वं द्रव्यप्रभाव: अस्ति ।

गङ्गाधर: –

– द्रव्यप्रभाव: –यद् द्रव्यं यत् कर्म कर्तुं यथा प्रभवति तत् कर्मकरत्वेन तस्य प्रभुत्वं प्रभाव: तम् ।

– तैलादीनि त्रीणि द्रव्याणि अनुक्रमेण त्रयाणां दोषाणां प्रशमं कुर्वन्ति । एतद् कार्यं तत्रस्थेन समुदायप्रभावेण भवति । न एकैकं रसप्रभावेण ।

– तिलोद्भवं स्नेहरुपि पाञ्चभौतिकं तैलं तस्य स्वप्रभावेण (द्रव्यप्रभावेण) स्नेहादिगुणोपपन्नत्वात् वायो: शमनं करोति ।

– वातप्रभावात् तैलप्रभाव: विशेष: भवति । तथा 'ह्रासहेतु: विशेषश्च' एतेन नियमेन तैलेन वायो: प्रशम: भवति ।

– गंगाधरेण अत्र प्रश्नं उपस्थितं कृत्वा तस्य उत्तरं दत्तम् । प्रश्न: – वायौ सूक्ष्मत्वं कषायानुस्यत्वं च अस्ति । वायो: गुण: – रूक्ष: शीत: लघु: सूक्ष्म: चल: विशद: खर:च । तैलस्य गुणा: – सूक्ष्मम्, कषायानुरसं, स्वादु, उष्णम् व्यवायि च । एवं यदि वायुतैलयो: सूक्ष्म: गुण: समान: अस्ति तर्हि तैलं सौक्ष्म्यत्वेन वायो: वर्धनं कथं न करोति ? तथैव तैलम् स्वान्त:स्थेन कषायरसेन वातवर्धनं कथं न करोति ?

उत्तरम् – यस्य गुणस्य यो यो गुण: विरुद्ध: अस्ति एतादृशा: ते गुणा: तथा तेषां विरुद्धगुणा: एतेषां सन्निपाते (मेलने) य: गुण: बहुतम: (अधिकमात्रायां) अस्ति स: अल्पं गुणं जयति ।

– एकस्मिन् एव द्रव्ये परस्परविरुद्धा: गुणा: न भवन्ति । यत्र शैत्यं अस्ति तत्र औष्ण्यं नास्ति । यत्र गुरूत्वं तत्र लघुत्वं न भवति, यत्र स्निग्धत्वं तत्र न रूक्षत्वम् ।

– अत: एकस्य द्रव्यस्य ये गुणा: स्यु: ते अपरस्य द्रव्यस्य विपरितगुणानां सन्ति । ते विरूद्धगुणा: इति उच्यन्ते । तथा ये गुणा: न विरोधिन: ते अविरूद्धगुणा: इति उच्यन्ते ।

– एवं विरूद्धाविरूद्धानां गुणानां सन्निपाते ये गुणा: मानत: वा संख्यात: भूयतमा: सन्ति ते मानत: वा संख्यात: ये अल्पा: गुणा: तान् जयन्ति । (उपघातं कुर्वन्ति ।)

– विरूद्धाविरूद्धगुणसन्निपाते हि भूयसाल्पमवजीयते । ईदृश: पाठ: अपि अस्ति । परं एष: पाठ: सम्यक् नास्ति ।

– जैमिनिना अपि एवम् उक्तम् यत् विरूद्धधर्मसमवाये सधर्मकत्वम् भूयसां स्यात् ।(जैमिनिदर्शनम्)

अनेन सूत्रानुसारेण यस्य द्रव्यस्य य: गुण: अपरस्य द्रव्यस्य समानासमानौ अस्ति तौ समानासमानगुणानां समवाये य: भूय: अस्ति स अल्पस्य उपघातं करोति ।

– क्वचिद् एकवारं द्रव्यस्य सेवनेन तद् दोषकार्यं न करोति अपि तु सततम् अभ्यासेन एव कार्यं भवति इति 'भूयसा' पदेन ज्ञायते ।

– तैलं सतताभ्यासेन विरुद्धगुणेन वातशमनं करोति । तदा एव पित्तस्य स्नेह द्रव उष्णगुरूणाम् गुणानां समान: । तेषां मानत: वा संख्यात: भूयस्त्वात् कषायसूक्ष्मत्वम् अवजय्य तैलं पित्तं वर्धयति

– एष: तैलद्रव्यप्रभाव: । तथैव वातदोषस्य प्रभाव: ज्ञायते ।

– अमधुरम् नाम मधुरविपरितं, तिक्तं, विदग्धम् अम्लम्, तीक्ष्णं एतादृशां विरूद्ध गुणानां भवति ।

– माधुर्यशैत्यमान्द्यै: त्रीभि: गुणै: बहुतमत्वात् स्निग्धद्रवाभ्यां गुणाभ्यां समान: स्यादपि सर्पि: पित्तप्रशमनं करोति ।

– रौक्ष्यं तैक्ष्ण्यं कषायं च मधो: प्रभाव: प्रत्युत स्निग्धं मन्दं मधुरं च श्लेष्माया: प्रभाव: ।

– शीतं गुरूं मधुरं च एवं श्लेष्माया: समानगुणानां सन्त: अपि रूक्षतीक्ष्णकषायाणां गुणबहुत्वेन श्लेष्माया: प्रशमनं करोति ।

– एवं सर्वेषु निजागन्तेषु शारीरव्याधिषु दोषाणां अव्यवचारिणा संबंधेन तदात्मकत्वेन दोषप्रभावाणाम् उपदेशेन सर्वेषां विकाराणां प्रभाव: ज्ञायताम् ।

योगीन्द्रनाथ सेन –

– 'सतताभ्यासमानेन' इति पदेन तेषां तैलादीनां द्रव्याणां 'सात्म्यं' निर्दिष्टम् अस्ति । यदा तस्य तस्य द्रव्यस्य सात्म्यम् अस्ति तदा तद् तद् द्रव्यं तदविपरीतगुणानां दोषप्रशमं करोति ।

– विरुद्धगुणानां संयोगे य: गुण: अधिकतर: अस्ति । स अल्पबलवन्तं पराजयते ।

– विरोधिनो: मध्ये यो बलवत्तर: स हि दुर्बलम् अभिभवति इति नियम: ।

– वातापेक्षया तैलद्रव्यं भूयस्त्वात् तद् वायुं प्रशाम्यति । एष द्रव्यप्रभाव: ।

– अमधुरम् नाम मधुरविपरितं कटु । तद् अम्लउष्णतीक्ष्णानां गुणानां भवति ।

– भेलविमानस्थाने प्रथमाध्याये अस्य विषयस्य सूत्रस्य सन्दर्भ: दत्त: अस्ति ।

– अनुक्तशमनद्रव्यसंग्रह: – तैलादीनां त्रयाणां द्रव्याणां वातादिदोषशमनत्वं वर्णितम् । एवम् एव अन्यं किमपि द्रव्यं वातादिदोषाणां गुणत: विपरीतं चेत् तस्य अभ्यासे (निरंतरेण सेवनेन) तद् द्रव्यं तस्य दोषस्य प्रशमं करिष्यति ।

अस्मै भेल विमानस्थानं प्रथमअध्यायस्य इति संदर्भ: दत्त: अस्ति ।

''आनुपमांसजा वापि रसामज्ञान एव च । तैलवन्मारूतं घ्नन्ति स्नेहौष्ण्यगुरूभावत: ।।
शाखादविष्किराणां च रसा मज्ञाव एव च । घृतवत् हन्ति ते पित्तं शैत्यमाधुर्यभावत: ।।
कषायतिक्तकटुक यच्च किंचिदिहौषधम् । मधुवत् तत् कफं हन्ति गुणान्यत्वेन देहिनाम् ।।''

(भेलविमानस्थानम् १)

– शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति –

– स्वस्नेहोउष्णगुरूभि: गुणै: तैलं वायो: प्रशमं करोति । तथैव स्नेहगुरूभ्यां गुणाभ्यां श्लेष्मावृद्धिम् अपि च उष्णगुणेन पित्तवृद्धिं करोति । एवं वर्धितवातावस्था प्रशमकं नाम धातुसाम्यं उत्पादयति ।

– अभ्यासस्य सततक्रियारूपत्वेऽपि पुन: सततमिति कथनम् अतिसातत्यद्योतनार्थम् ।

– तैलसर्पिमधुषु अवयवप्रभावत्वेन समुदायप्रभावतत्वं ज्ञातव्यम् ।

निष्कर्ष: – अस्मिन् अधिकरणे 'अमधुरम्' पदस्य टीकायां वैधर्म्यम् अस्ति । तस्य ऊहापोह: वैधर्म्येषु कृत: । शेष: यथार्थ: वर्णनम् ।

अधिकरणम् द्वितीयम् ।

ब) द्रव्यप्रभाव: – २) अनभ्यस्य त्रीणि – सूत्राणि १५ त: १९ पर्यंतम् ।

अस्मिन् उपाधिकरणे अधोल्लिखितेषु प्रकरणेषु वर्णनमस्ति ।

अ) पिप्पली ब) क्षार क) लवणम्

चरक: –

– त्रयाणां द्रव्याणां सेवनम् अन्यद्रव्यापेक्षा अधिकं न कुर्यात् – पिप्पली, क्षार: लवणम्

टीका – चक्रपाणि: –

– अभ्यस्यानां द्रव्याणां प्रभावस्य वर्णनानन्तरं अनभ्यस्यानां वर्णनं कृतमस्ति ।

– 'अधिकमन्येभ्य:' इति पदेन अन्यानां चित्रकभल्लातकादीनां एवंजातीयानां द्रव्याणां समावेश: न अतिउपक्तव्ये करणीय: ।

गङ्गाधर: –

– रसद्रव्यदोषविकाराणां प्रभावस्य वर्णनानन्तरं द्रव्यप्रभावस्य प्रसंगेन प्रभावस्य वर्णनार्थं केषांचन द्रव्याणां अतिमात्रसेवनेन दोषा: प्रादुर्भवन्ति । एतद् द्रव्यस्य समुदायप्रभावस्य उपदेशप्रसंगेन वर्णितम् अस्ति ।

– 'अधिकम्' पदं क्रियाविशेषणम् अस्ति । अस्य अर्थ: 'सततम्' इति गृहीतव्य: । अधिकपरिमितम् (मात्रायाम् अधिकम्) इति न स्वीकरणीयम् ।

योगीन्द्रनाथ सेन – शब्दार्थ: अविशेषा टीका

ज्योतिषचन्द्र सरस्वति – त्रीणि द्रव्याणि हितकराणि सन्ती इति तेषाम् अभ्यासेन दोषा: उत्पद्यन्ते एतद् कथयितुम् अस्य विषयस्य वर्णनं कृतम् ।

निष्कर्ष: – वैधर्म्यं नास्ति । अधिकम् इति पदस्य सर्वै: टीकाकारै: अभ्यास: (सततं सेवनम्) इत्येव अर्थ: स्वीकृत: अस्ति ।

अ) पिप्पली

चरक: – गुणकर्म – कटु, मधुरविपाकी, गुरु:, नात्यर्थम् ,स्निग्धोष्णा, प्रक्लेदिनी, भेषजाभिमता, आपातभद्र सद्य: शुभाशुभकारिणी, प्रयोगसमसाद्गुण्यात् दोषसञ्चयानुबन्धा ।

अतियोग: – सततसेवनं यदि कृतम् – गुरु:, प्रक्लेदिनी–श्लेष्मा उत्क्लेश:, औष्ण्यम्–पित्तं उत्क्लेश:, अल्पस्नेह: उष्णम् च –न वातप्रशमनम् योगवाहिनी च तस्मात् पिप्पली: नात्युपयुञ्जीत

टीका– चक्रपाणि: – पिप्पल्या: अनभ्यासेन अत्यभ्यासेन च भवतां परिणामानां वर्णनम् अस्मिन् सूत्रे कृतम् । सद्य: सेवनेन (अनभ्यासेन) पिप्पली शुभकारिणी अस्ति प्रतुत अत्यभ्यासप्रयोगेन अशुभकारिणी अस्ति ।

– प्रयोगसमसाद्गुण्यम् – समस्य प्रयोगस्य सद्गुणत्वात् । पिप्पल्या: समप्रयोगेण सद्गुणा: उत्पद्यन्ते । समप्रयोग: – अल्पकाले, अल्पमात्रायां प्रयोगं करोति ।

– अल्पमात्रायां अल्पकाले यदि सेविता तर्हि पिप्पली उत्तमं फलं यच्छति ।

– पिप्पल्या: अत्योपयोग: कृत: चेत् सा दोषाणां संचयं करोति ।'अनुबन्ध:' इति पदं 'अत्युपयोग:' इति अर्थेन योजितम् ।

– पिप्पली योगवाहिनी अस्ति । अत: सा वृष्ययोगेषु ज्वरगुल्मकुष्ठहरादियोगेषु च योजिता भवति ।

– पिप्पल्या: अतियोग: न करणीय: एतस्मै नियमाय केचन अपवादा: सन्ति ।

– रसायनप्रयोग:

– गुल्मादिषु व्याधिषु पिप्पलीवर्धमानक: प्रयोग: अत्र यथोक्तविधिना कृत: पिप्पल्य: अतियोग: ऋषिवचनानुसारेण ज्ञातव्य: ।

– अत्र चक्रपाणिना अपवर्ग तथा उपदेशतन्त्रयुक्त्या: उपयोग: कृत: अस्ति । अन्यत्र / ऋषिभि: अन्नसंस्करणे पिप्पल्या: शास्त्रोक्त: अतिप्रयोग: न निषिद्ध: । अत्र अन्यमतं उपस्थाय तस्य खंडनं न कृतम् । अत: मतमिदं चक्रपाणिना सम्मतम् । अत्र अनुमततन्त्रयुक्ते: उपयोग: कृत: अस्ति ।

– अतिमात्रत्वेन तथैव सततप्रयोगेन (अभ्यासेन) पिप्पल्या: सेवनं नाम सततोपयोग: अस्ति ।

गङ्गाधर: –

– पिप्पली पदस्य अंतिमवाक्यपर्यंतम् अनुवृत्ति: करणीया ।

– कटुरसतः दोषसंचयानुबन्धपर्यंतम् एते पिप्पल्याः प्रभावाः सन्ति । शेषा टीका शब्दार्थः ।

योगीन्द्रनाथ सेन –

– पिप्पल्याः गुणकर्म तथा अतियोगदोषवर्णनम्

– प्रक्लेदिनी नाम शरीरधातुषु क्लेदजनयत्री । भेषजाभिमताः – भेषजत्वेन अभिमताः ।

– पिप्पली सद्यः शुभाशुभकरी अस्ति । परं तस्याः एतद् शुभाशुभकारित्वं चिरकालं न उपयोगि भवति । आपातभद्रा – आपाते तत्काले भद्राः शुभाः समप्रयोगस्य अनुरुपं साद्गुण्यं अस्ति समप्रयोगेण तत्काले शुभं भवति ।

– सततोपयोगेन परिणामेन च दोषाणां सञ्चयः भवति । पिप्पल्यां स्नेहत्वं उष्णत्वं च सद् अपि एतौ गुणौ अल्पबलवन्तौ अतः वायोः प्रकृष्टशमनं न कुर्वतः । योगं द्रव्यान्तरेण संयोगं वहन्ति इति योगवाहिन्यः । यादृक् द्रव्येण संयुज्यन्ते तादृक् कर्म कुर्वन्ति ।

– रसायनप्रयोगः विहाय अन्यत्र पिप्पल्याः अत्युपयोगः वर्ज्यः भवति । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वति –

– पिप्पली कटुरसस्य सन्ती अपि मधुरविपाकिनी अस्ति । एषः अन्यथाभावः द्रव्यप्रभावात् अस्ति

– मधुरविपाकेन एव पिप्पली गुरुः अस्ति । प्रक्लेदिन्यः रसप्रभावात् श्लेष्मोत्क्लेशकत्वेन ।

– भेषजाभिमता – भेषजभावेन अनेकानि कार्याणि कुरुते ।

– विषादीनांवत् सद्यः हिताहितकरी अस्ति । यथावत् प्रयोगसामर्थ्यात् सद्यो मङ्गलप्रदाः ।

– गुरुप्रक्लेदगुणैः श्लेष्मोत्क्लेशमं उष्णत्वात् पित्तोत्क्लेशमं तथा अल्पस्नेहोष्णभावेन वातप्रशमं न करोति । एवं रीत्या क्रमेण दोषसञ्चयं करोति ।

– योगवाहिन्यः सर्वयोगसम्मताः । अतः पिप्पल्याः स्वल्पोपयोगः हितकरः । अत्युपयोगः अहितकरः

निष्कर्षः – वैधर्म्यं नास्ति ।

ब) क्षारः – सूत्रम् – १७

चरकः –

गुणकर्माणि – उष्णः तीक्ष्णः लघुः आदौ क्लेदयति पश्चात् विशोषयति पचनदहनभेदनार्थम् उपयुज्यते ।

अतियोग: – केशाक्षिहृदयपुंस्त्वोपघातकर: । ये ग्रामनगरनिगमजनपदा: क्षारम् सततमुपयुञ्जते ते आन्ध्यषाण्ढयखालित्यपालित्यभाजो हृदयापकर्तिन: च भवन्ति । यथा प्राच्या: चीना: च । तस्मात् क्षारं नात्युपयुञ्जीत ।

चक्रपाणि: – 'हृदयापकर्तिन:' नाम हृदये कर्तनवत् वेदनानां उत्पत्ति: ।

गङ्गाधर: –

– क्षार इति भस्मप्रसृतोदकनिर्य्यास: सारभाग: । गङ्गाधरेण क्षारस्य व्याख्या कृता अस्ति ।

– उष्णं तैक्ष्णं लाघवं च एष: गुणप्रभाव: अस्ति । प्रत्युत आदौ क्लेदयति पश्चात् विशोषयति एष: क्षारस्य द्रव्यप्रभाव: अस्ति । पचनदहनभेदनादय: क्रियारुपा: गुणप्रभावा: सन्ति ।

– केशोपघात: – अकालपालित्यं खालित्यं च । अक्ष्युपघात: – आन्ध्यम् । हृदयोपघात: – वक्षसि कर्तनवत् पीडा । पुंस्त्वोपघात: – षाण्ढ्यम् । सततं क्षारसेवनेन उपरोक्ता: उपद्रवा: भवन्ति । एष: अव्यभिचारी सम्बन्ध: अस्ति ।

– जनपदा: इति जनसमूहा: । गङ्गाधरेण जनपदम् इति पदं ग्रामनगरनिगमान् संयोज्य ग्रामीणजनपदं नागरिकजनपदं निगमवासिन: जनपदं एते शब्दप्रयोगा: कृता: सन्ति । एष: विशेष: । ग्रामादिषु जनपदेषु नि सन्त: सर्वे जना: अथवा अल्पसंख्य: जना: अथवा ये जना: सततं क्षारसेवनं कुर्वन्ति तान् आन्ध्यादय: उपद्रवा: भवन्ति । – षाण्ढ्यं इति क्लैब्यम् ।

– खालित्यं इन्द्रलुप्तरोगं केशस्य च्यवनाद् अपुनर्भव: । पालित्यं अकाले केशपक्वता ।

– प्राच्या: नाम प्राचीदिक्स्थेषु देशेषु वसन्त: जना: ।

योगीन्द्रनाथ सेन

– योगीन्द्रनाथसेनेन गङ्गाधरवत् 'लवणोपपन्न ' इत्येव पाठ: स्वीकृत: अस्ति ।

– क्षार: 'आदौ क्लेदयति' कर्म करोति । अस्य अर्थ: क्षारेण प्रारम्भे आर्द्रता उत्पद्यते । संघातं भिन्नत्ति इति शोकादिकं पिण्डितं दारयति । आग्नेयौषधिगुणभूयिष्ठत्वात् दहनपचनादिकर्म घटते ।

– ग्राम: प्रसिद्ध: । नगर: आढ्यानां निवास: । निगम नगरासन्न: निगम:। जनपद: देश: ।

– खालित्यं केशानां प्रच्युति: । पालित्यं केशानां पाक: ।

– प्राच्य: कामरूपादय: ।

ज्योतिषचन्द्र सरस्वति –

– निपातानन्तरं (जिव्हासंपर्कानन्तरं) क्षार: क्लिन्नतां उत्त्पादयति । तथा पाके भूते तस्य क्लेदस्य विशेषणं करोति । संघातं भिन्नत्ति इति अस्थ्यादि दृढसंश्लेषं भिनत्ति । भित्वा अवकाशबहुलं करोति ।

– ग्राम: – विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि । स तु ग्राम इति प्रोक्त: शूद्राणां वास एव च ।

– नगरम् – पथ्ये क्रियादिनिपुणै: चातुर्वर्ण्यजनैर्युतम् । अनेकजातिसम्बन्धं नैकशिल्पसमाकुलम् । सर्वदैवतसम्बन्धं नगरन्त्वभिधीयते ।।

– निगम: – प्राकारादिना दुर्गं योजनविस्तीर्णं नगरमेव । जनपद: – बहुग्रामपूर्णा: प्रदेश: ।

– खालित्यपालित्यानां सुश्रुतस्य व्याख्या: ससूत्रं दत्ता: सन्ति । हृदयापकर्तनं इति वक्षसि कर्तनवत् पीडा ।

निष्कर्ष: – द्वौ पाठभेदौ तथा वैधर्म्यौ स्त: ।

क) लवणम्    सूत्र १८

चरक: – गुणकर्माणि – उष्णम्, तीक्ष्णम्, अनतिगुरू, अनतिस्निग्धम्, उपक्लेदि विस्त्रंसनसमर्थम् । अन्नद्रव्यरूचिकरम् । आपातभद्रं प्रयोगसमसादुगुण्यात् । दोषसञ्चयानुबन्धम् । रोचनपाचनोपक्लेदनविस्त्रंसनार्थम् उपयुज्यते ।

– अतियोग: – ग्लानिशौथिल्यदौर्बल्यकरम् । ये ग्रामनगरनिगमजनपदा: लवणं सततमुपयुञ्जते ते भूयिष्ठं ग्लास्नव: शिथिलमांसशोणिता: अपरिक्लेशसहा: च भवन्ति । यथा – बाल्हिकसौराष्ट्रिक सैन्धवसौवीरका: ते हि पयसाऽपि सह लवणमश्नन्ति । ये अपि भूमे: अत्युषरा देशा: तेषु लवणोपहतत्वात् औषधिवीरूद्वनस्पतिवानस्पत्या न जायन्ते अल्पतेजसो वा भवन्ति । ये हि अतिलवणसात्म्या: पुरूषा: तेषां अपि अकाले खालित्यपालित्यानि वलय: च भवन्ति । तस्मात् लवणं न अति उपयुञ्जीत ।

टीका – चक्रपाणि: –

– ग्लानि: मांसापचय: हर्षक्षय: वा । लवणरसस्य अतियोग: न केवलं शरीरोपघातकर: अस्ति प्रत्युत लवणाधिक्यं भूमे: अपि उपघातं करोति । ऊषरा इति लवणप्रधाना ।

– लवणस्य अत्युपयोग: न कुर्यात् अस्य अर्थ: अतिमात्रायां सातत्येन दीर्घकालं लवणस्य सेवनं न कुर्यात् ।

– अन्नद्रव्ये संस्कारकरूपेण लवणस्य स्तोकमात्रायां अभ्यासयुक्तं सेवनम् उपयुक्तं भवति । न एतादृशं सेवनम् उपघातकरम् ।

– केवलं बाल्हिकादिषु देशेषु लवणातिसेवनस्य उपद्रव्या: दृश्यन्ते इति न प्रत्युत अन्येषु देशेषु अपि यदि लवणस्य अतियोग: भूयात्, अथवा अतिलवणस्य सात्म्यम् अपि भूयात् तदा शैथिल्यादया: उपद्रवा: दृश्यन्ते । एते उपद्रवा: न देशस्वभावजा: ।

– चक्रपाणे: एतस्या: टीकाया: अर्थ: विपर्ययतन्त्रयुक्तिना एवं भवितुम् अर्हति यत् बाल्हिकादिषु देशेषु दृश्यन्त: शैथिल्यादया: उपद्रवा: देशस्वभावजा: सन्ति ।

<u>गङ्गाधर:</u> –

– औष्ण्यतैक्ष्ण्यादय: गुणप्रभावा: सन्ति । अपि च उपक्लेदित्वादय: तै: गुणै: उत्पन्नस्य कर्मण: प्रभावा: सन्ति ।

– मध्यगुरूस्नेहत्वाभ्यां मध्यवातहरत्वं मध्यमकफकरत्वम् ।

– प्रयोगसमसाद्गुण्यात् आपातभद्रत्वं तथा दोषसञ्चयानुबन्धत्वं च लवणद्रव्यस्य स्वप्रभावे ।

– शैथिल्यं इति मांसादिश्लथभावा।

– लवणातिसेवनेन भवन् उपघात: अव्यभिचारीसम्बन्ध: अस्ति ।

– नगरं महावसति: भूपालाद्याढ्यसमूहवासस्थानम् निगम: नगरपुरोवर्तिग्राम: ।

– अस्यां पृथिव्यां ये देशा: वा प्रदेशा: वा अत्युषरा: सन्ति तत्रापि उपघाता: दृश्यन्ते । वनस्पतय: अल्पतेजस: सन्ति ।

<u>योगीन्द्रनाथ सेन</u> –

– सततं लवणसेवने उष्णतीक्ष्णत्वम् – पित्तोत्क्लेश:

गुरुप्रक्लेदित्वम् – श्लेष्मोत्क्लेश्:

अल्पस्नेहगौरवत्वम् – न वातप्रशम: एवं प्रकारेण दोषसंचय: भवति ।

– ग्लानि हर्षपरिक्षय: । शैथिल्यं मांसादीनां श्लथत्वम् ।

– लवणस्य अतिसेवनस्य अन्ये दोषाः चरकसंहितायाम् सूत्रस्थानस्य आत्रेयभद्रकाप्यीये अध्याये वर्णिताः सन्ति ।(अतीतावेक्षणतन्त्रयुक्तिः)

– दुग्धेन सह लवणभक्षणं विरुद्धाहारः अस्ति । विरुद्धाशनेन उद्भवन्तः अन्ये व्यापदः अपि अत्र उद्भवितुं शक्यम् ।

– लवणस्य अतियोगः केवलं शरीरस्य एव उपघातं करोति इति न प्रत्युत भूमेः अपि उपघातं करोति । ऊषरभूम्यां लवणाधिक्येन तत्रस्थाः वनस्पतयः वानस्पत्याः ओषधयः इत्यादयः अपि उपहताः भवन्ति । एकतः तत्र वनस्पतयः न अङ्कुरिताः भवन्ति अथवा अल्पतेजयुक्तः भवन्ति । तदर्थं दीर्घञ्जीवितीये अध्याये संदर्भः दत्तः अस्ति । (अतीतावेक्षणतन्त्रयुक्तिः)

– अतिलवणसात्म्याः लवणम् अतिमात्रया अभ्यस्यन्ति । अतिक्षारोपसेवनसमानं अतिलवणसेवने उपद्रवाः दृश्यन्ते । अतिलवणसात्म्यं अपथ्यकरमात्रायाः अभ्यासस्य उपलक्षणम् अस्ति । अस्याः अपथ्यकरमात्रायाः सेवनं क्रमेण त्याज्यम् ।

– वलयः चर्मणां आकुञ्चनानि ।

ज्योतिषचन्द्र सरस्वति

– लवणस्य हिताहित्वं वर्णितम् । विस्रंसनम् इति शरीरभेदनम् । हि अवधारणे ।

– अन्यदेशीयेषु अपि अतिलवणाभ्यासः खालित्यादीन् उत्पन्नं करोति ।

– खालित्ये तथा इन्द्रलुप्ते ऊहनम् ।

– अस्मिन् सूत्रे खालित्य – इन्द्रलुप्तयोः एकत्रं वर्णनं कृतम् तेन तयोः किंचित् पृथकत्वम् अस्ति इति सिध्यति । परं सुश्रुतमतेन इन्द्रलुप्तं खालित्यं च परस्परयोः पर्यायाः सन्ति । कार्तिककुण्डेन तु इन्द्रलुप्तं श्मश्रुस्थाने अपि च खालित्यं शिरोरुहस्थाने भवति एवं पार्थक्यं वर्णितम् अस्ति । वृद्धेन वाग्भटेन सुश्रुतानुसारेण इन्द्रलुप्तस्य वर्णनं कृत्वा खालित्यस्य पृथक लक्षणं कथितम् ।

– खलतेरपि जन्मैवं शातनं तत्र तु क्रमात् ।

– परमाचार्येण गंगाधरेण अस्मिन् सूत्रे इन्द्रलुप्तपदस्य पाठः न स्वीकृतः ।

– वलयः गात्रत्वचां कुञ्चनरुपाः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

ड) प्रकरणस्य उपसंहार: सूत्रम् १९

चरक: – अत: पिप्पलीक्षारलवणादीनां द्रव्याणां अतियोगस्य सात्म्यं सद्भि: जनै: एतेषां द्रव्याणां सेवनं क्रमेण त्याज्यम् । सात्म्यस्य क्रमेण उपनिर्वर्तनं दोषरहितं अथवा अल्पदोषकरं भवति ।

चक्रपाणि: – अयोग्यस्य अथवा अपथ्यस्य सात्म्यस्य क्रमेण सेवन त्याग: सूत्रस्थानस्य 'न वेगान्धारणीयम्' नामके नवमे अध्याये वर्णित: अस्ति । (अतीतावेक्षणतन्त्रयुक्ति:)

– अत्र 'सातत्य' शब्देन ओकसात्म्यम् (अभ्याससातत्यम्) अभिप्रेतमस्ति ।

– 'अल्पदोषमदोषं वा ' इति पदेन सूच्यन्ते यत् यदा अत्याधिकप्रमाणेन ओकसात्म्यम् अस्ति तदा क्रमेण सेवनत्याग: अल्पदोषकर: भवति तथा यदा ओकसात्म्यम् अल्पप्रमाणे अस्ति तदा क्रमेण सेवनत्याग: दोषरहित: भवति ।

गङ्गाधर:

– अपगमनम् इत्यस्य अर्थ: निवृत्ति: । सात्म्यस्य अस्य निवृत्ति: क्रमेण कर्तव्या । न तु हठात् ।

– यदि सात्म्यनिर्वर्तनं हठात् क्रियते तदा बहुदोषा: (उपद्रवा:) दृश्यन्ते ।

योगीन्द्रनाथ सेन –

– अतिलवणादीनां अपथ्यमात्राया: अभ्यासस्य सात्म्यस्य निवर्तनं क्रमेण कर्तव्यम् ।

प्रक्षेपापचये ताभ्यां क्रम: पादांशिको भवेत् ।
एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा ।। ( च. सू. ७ )

– अपथ्यपथ्यरुपिणो: सात्म्यासात्म्यो: एष हानोपादानक्रम: सूत्रस्थानस्य नवमे अध्याये सविस्तरं वर्णित: अस्ति ।

– सात्म्यस्य सहसा एव परित्यागे शरीरबाधा स्यात् ।

ज्योतिषचन्द्र सरस्वति

– अपगमनं इति परिहार: ।

– श्रेय: इति कल्याणकरं भवति ।

– अहितस्य अपि अभ्यस्तद्रव्यस्य अक्रमेण त्याग: अहिताय एव भवेत् । यद् उक्तम्

उचितादहिताद् धीमान् क्रमश: विरमेन्नर: । हितं क्रमेण सेवेत –––– ।। (च. सू. ७)

निष्कर्ष: – अस्मिन् ‘अनभ्य  स्य त्रिणि’ उपाधिकरणे केचन पाठभेदा: तथा द्वे वैधर्म्ये स्त: । तेषां विवेचनं वैधर्म्ये कृतमस्ति ।

– ज्योतिषचन्द्र सरस्वतिना गंगाधरस्य उल्लेख: परमाचार्य: इति कृत: अस्ति । तस्यार्थ: आचार्याणाम् आचार्य: इति भवति । एतेन ज्यो. स. गंगाधरस्य शिष्यस्य शिष्य: आसीत् इति अनेन आभ्यन्तरप्रमाणै: सिध्यति।

## अधिकरणम् – तृतीयम्

## ओकसात्म्यम् – सूत्रम्  २०

चरक: –

– सात्म्यं नाम तद् यद् आत्मनि उपशेते । सात्म्यार्थ: हि उपशयार्थ: ।

– तत् त्रिविधं – प्रवरम् अवरं मध्यम् च । सप्तविधं – षड्रसानुसारेण तथा सर्वरसोपयोगेन ।

– सर्वरसं प्रवरम् । एकरसम् अवरम् । मध्यं प्रवरावरमध्यस्थम् ।

– मध्यावरे सात्म्ये क्रमश: प्रवरसात्म्ये परिवर्तितुमावश्यकम् ।

– सर्वरसस्य सात्म्यं सद् अपि प्रकृत्यादीनां अष्टौ आहारविधिविशेषायतनानां विचारं कृत्वा हितकराणां एव सेवनमावश्यकम् ।

टीका – चक्रपाणि: –

– अत्र सात्म्यं पदेन ओकसात्म्यं अभिप्रेतं अस्ति । ओक: इति अभ्यास: । ओकसात्म्यं (अभ्याससात्म्यं) त्रिविधं भवति ।

– उपशयार्थ: इति उपशयशब्दाभिधेय इत्यर्थ: ।

– अत्र वाक्यशेषतन्त्रयुक्ते: तथा आदिलोपआश्रयस्य उपयोग: कृत: अस्ति । ‘सात्म्यं ’ नाम ओकसात्म्यं । अत्र ‘ओक‘ अभ्यासवाचकपदस्य आदिलोप: अस्ति । सात्म्यसंकल्पनासम्बन्धेन च.शा. ६, च. वि. ८ च अत्र वर्णनं कृतम् ।

– प्रवरावरमध्यस्थं नाम द्वित: पञ्चरसाणां संयोगस्य सात्म्यम् ।

– यथोक्तेन विधिपूर्वकेण अभ्यासक्रमं अवरस्य (एकरसाभ्यासस्य) तथा मध्यस्य (द्वित: पञ्चरसाभ्यासस्य) च सात्म्यस्य प्रवरसात्म्ये परिवर्तनं करणीयम् ।

– 'अभिसमीक्ष्य' अस्य अर्थः 'हिताहितत्वस्य' विचारं कृत्वा इति भवति । 'हित' इत्यस्य अर्थः प्रकृत्यादीनां आहारविधिविशेषायतनानां अनुषंगेण यः हितकरः आहारः स्यात् स एव सेवनीयः । अनुरुध्येत इति सेवेत ।

गङ्गाधरः –

– मध्यन्तु द्वित्रिचतुः पञ्चरससात्म्यम् ।

– यस्य रसस्य सेवनं न भवति सः प्रथमम् अल्पः सेवनीयः । अनन्तरं क्रमशः तस्य प्रमाणं वर्धयित्वा प्रवररसस्य सात्म्यं करणीयम् ।

– आहारविधिविशेषायतनानि साकल्येन अवलम्ब्य पश्चात् सर्वरससात्म्यमिति हितकराः सेवनीयाः ।

योगीन्द्रनाथ सेन –

– सात्म्यस्य लक्षणम् – अत्र ' सात्म्यम्' इति लक्ष्यनिर्देशम् अस्ति । तथा ' यदात्मन्युपशेते ' इदं लक्षणमस्ति ।

– यद् आत्मनि उपशेते सुखयते तद् सात्म्यम् । अत्र अभ्यस्तसात्म्यम् अभिप्रेतमस्ति ।

– यद् सततमुपयुज्यते इति एतदेव तत् लक्षणमस्तु ।

सात्म्यं नाम तद् यद् आत्मनि उपशेते ।
(सात्म्यं ↓ लक्ष्य; यद् आत्मनि उपशेते ↓ लक्षण)

– एतत् लक्षणं कथं क्रियते, तद् आह–सात्म्यार्थो हि उपशयार्थः ।

– सात्म्यार्थो हि उपशयार्थः । अस्मिन् सूत्रे सात्म्योपशयौ एकार्थेन एव योजितौ ।

– सात्म्यं नाम उपशयः ।

सात्म्यम् ⇄ उपशयः

– एतेन प्रकृत्यादीनां विपरीतगुणानां अपि सात्म्यं शक्यम् ।

– एवं प्रकृतिवयोदेशर्तुदोषव्याधिवशात् बहुविधं सात्म्यं शक्यम् ।तस्य विचाराः अत्र कर्तुं शक्यम् ।

– सात्म्यं अभ्यस्तं इति सह आत्मना भवति । अभ्यस्तत्वात् तत् उपशेते ।

– प्रकृत्यादीनां विपरीतगुणानां यद् भवति तद् अपि अभ्यस्तं शक्यम् ।तद्रूपेण उपशयकरः भवितुं शक्यम् ।

– तेन उपशयमात्रं अङ्गीकृत्य चरकेण सात्म्यलक्षणं वर्णितम् । सात्म्यं लक्षयित्वा तद् भेदम् ।

– सात्म्यं इह ओकसात्म्यम् ।

– अत्र अवरमध्यसात्म्याभ्यां पादांशिकक्रमेण वर्जिताभ्यां प्रवरं सात्म्यं उपपादयेत् । एतत् समधातु अपेक्षया उच्यते ।

– न केवलं सर्वरसरूपी प्रवरसात्म्यत्वेन आहार: पथ्य: भवति । आहारस्य पथ्यापथ्यत्वे अन्ये अपि आहारविधिविशेषायतनसंज्ञिता: हेतव: सन्ति । तद् अपेक्षया हि आहारो हित: ।

– आहारविधिविशेषायतनस्य व्याख्या –

– आहारस्य विधि विधानं कल्पना तस्य विशेषा: तेषां आयतनानि पथ्यापथ्यत्वे हेतव: । विधि इति विधानं कल्पना । नाम आहारस्य विशेषकल्पनानां पथ्यापथ्यत्वे हेतु: । एते अष्ट सन्ति ।

– अभिसमीक्ष्य इति विचार्य ।

– यत्र एतत् अधिकरणे हितं हि आहारविधिविशेषायतनै: यत् पथ्यम् ।

– अस्य आहारस्य हितलक्षणम् यज्ञ:पुरुषीये अध्याये वर्णितं अस्ति । ''यदाहारजातमग्निवेश समांश्च शरीरधातुन् प्रकृतौ स्थापयति विषमांश्च समीकरोति इति एतत् हितं विद्धि ।।''

ज्योतिषचन्द्र सरस्वति –

– यद् अभ्यवहृतं द्रव्यं भुक्तं आत्मनि उपशेते यस्य उपयोग: सुखावहो भवति, औचित्यादपि न विकृतिकृद् भवति ।

– अवधारणार्थे: अयं हि शब्द: इतरं व्यवच्छिद्य तमेवार्थं समर्थयति ।

– देशादिभेदेन विविधभेदस्वरुपी सात्म्यस्य अत्रस्थ: अभिप्रेतार्थ: ओकसात्म्यं इति अस्ति ।

– आहारविधिविशेषायतनस्य व्याख्या – आहारविधिविशेषस्य हिताहितरुपस्य आयतनानि कारणानि ।

– शेषा टीका शब्दार्थ: ।

निष्कर्ष: – अस्मिन् अधिकरणे वैधर्म्यं नास्ति । योगीन्द्रनाथसेनस्य टीका विशेषा ।

## अधिकरणम् चतुर्थम्

## अष्टौआहारविधिविशेषायतनम् ।

चरक: – सूत्राणि २१ त: २३

– आहारविधिविशेषायतनानि अष्ट सन्ति ।

– प्रकृति: करणं संयोग: राशि: देश: काल: उपयोगसंस्था उपयोक्ता च इति । (सूत्रम् – २१)

टीका – चक्रपाणि: – आहारस्य विधि प्रकारो विधानं वा इति आहारविधि: । आहारविधे: विशेष: हितत्वं अहितत्वं च । आहारविधिविशेषस्य आयतनानि हेतव: । आहारप्रकारस्य हितत्वमहितत्वं च प्रकृत्यादिहेतुकम् इति आहारविधिविशेषायतनानि ।

– आहारस्य प्रकार: वा विधानं वा तस्य हिताहितत्वस्य हेतु: नाम आहारविधिविशेषायतनम् ।

आहार:
↓
विधि: – विधान: प्रकार: वा
↓
विशेष: – हिताहितत्वम्
↓
आयतनम् – प्रकृत्यादि अष्ट हेतव:
↓
आहारविधिविशेषायतनानि

गङ्गाधर: – अस्मिन् सूत्रे द्वन्द्वसमास: उपयोजित: अस्ति । शेषा टीका शब्दार्था: ।

योगीन्द्रनाथ सेन – उपयोगसंस्था इति उपयोगव्यवस्था । उपयोक्ता इति पुरुष: । शेषा: शब्दार्थ: ।

– उद्देशतन्त्रयुक्ते: उपयोग: ।

ज्योतिषचन्द्र सरस्वति–तानि खलु इदं भोक्तव्यं इदं न भोक्तव्यं इति विशेषस्य कारणानि भवन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### १) प्रकृति:

चरक: – स्वभाव: प्रकृति: उच्यते । स: आहारौषधद्रव्याणां स्वाभाविक: गुर्वादिगुणयोग: । यथा – माषमुद्गयो: शूकरैणयो: ।

टीका– चक्रपाणि: – स्वाभाविक इति संस्कारादि अकृत: ।प्रकृत्या माषे गुरूत्वं, मुद्गे लघुत्त्वं च । प्रकृत्या शूकरे गुरूत्वं एणे च लघुत्वम् ।

गङ्गाधरः – स्वभावस्य व्याख्या – ''यो भावो याद्रूपेण भवति स स्वः । तस्य ताद्रूपेण भवनं भावः इति स्वभावः ।''

– गङ्गाधारेण प्रश्नः उपस्थितः कृतः अस्ति यत् ''एतेन ताद्रूप्येण विना भवनमात्रः स्वभावः भवति किम् ? तथैव ताद्रूप्यं तद् भवनं च एते द्वे अपि घटने घटित्वा एव स्वभावः अस्ति ? तस्य उत्तरम् – स्वभावः नाम आहारौषधरुपिणां द्रव्याणां स्वाभाविकः ( नैसर्गिकः ) गुणः । स्वाभाविकः स्वभावात् स्वस्थ एव तद् असाधारणभवनात् जातः ।

– गुर्वादिगुणयोगः नाम द्रव्यस्य समुदायत्वे ये असाधारणाः गुर्वादयः गुणाः तथा असाधारणं अनुलोमनादि कर्म एव ।

– असाधारणं गुणकर्म नाम गुर्वादिगुणयोगः । असाधारणं नाम द्रव्यस्य अवश्यंभावि तथा विशेषं गुणकर्म । एतादृशानां असाधारणघटकानां उत्पत्तिः एव प्रभावः वा स्वभावः अस्ति । तथा तद् माध्यमेन उत्पन्नेन गुणकर्मणा सह सम्बन्धितः स्वभावः अस्ति । एवं एषः वस्तुनिष्ठः स्वभावः अस्ति

– एभिः वस्तुभिः (द्रव्यैः) स्वभावजाः ये कर्मगुणाः निर्मियन्ते ते कर्तव्यस्य (क्रियायाः कर्तृत्वस्य) निष्ठाः सन्ति । तद् वस्तुतः स्वभावः न भवति । अतः तस्य वस्तुनः कार्यस्थ कर्म निवारयितुं 'योगः' इति पदं योजितम् ।

– 'गुण' इति पदं अत्र गुणीभूतानां निःश्चेष्टकारणानां गुर्वादीनां तथा अनुलोमनादि कर्मणः बोधकः अस्ति । उदाहरणार्थम् – गुरुणां व्रीहीणां लाजाः यदा सिध्यन्ते तदा ताः लघवः सन्ति । एवं रीत्या यथास्वाः गुरुलघ्वादिगुणाः विचारणीयाः ।

योगीन्द्रनाथ सेन – पूर्वसूत्रे ये उल्लेखितः तेषां निर्देशः अग्रे कृतः अस्ति । यज्ञःपुरुषीये अध्याये वर्णितानां गुर्वादिगुणानां विचाराः अत्र करणीयाः भवन्ति ।

– एणाः इति लावकपिञ्जलाः ।

– स्वाभाविकगुणाः ये द्रव्याणां उत्पत्तिकाले जायन्ते ।

ज्योतिषचन्द्र सरस्वति –

– कानिचित् द्रव्याणि स्वभावेन गुरवः वा लघवः सन्ति । तेषां अनयोः गुरुत्वलाघवत्वयोः कारणं प्रकृति एव भवति ।

– यथा एकस्मिन् देशे युगपत् उत्पन्नेषु माषमुद्गेषु माषा: गुरव: प्रत्युत: मुद्गा: लघव: सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) **करणम्** –

चरक: – स्वाभाविकानां द्रव्याणां अभिसंस्कार: इति करणम् ।

– संस्कार: हि गुणान्तराधानं उच्यते ।

– एते गुणा: तोयसन्निकर्ष: अग्निसन्निकर्ष: शौचं मन्थनं देश: काल: वासनं भावना इत्यादिभि: तथा च कालप्रकर्षभाजनादिभि: उत्पन्ना: भवन्ति ।

चक्रपाणि: – उत्पत्तिकाले उत्पन्नेषु स्वाभाविकगुणेषु तोयादिभि: गुणान्तराधानं करणीयम् ।

– येन प्राकृतगुणस्य उपघातभूतेन तस्य कार्यं व्यक्तं न भवति ।

– चक्रपाणिना पूर्वपक्ष: पुरस्कृत: यत् ''यदि संस्कारेण स्वाभाविका: गुणा: परिवर्तन्ते तर्हि स्वभावो निष्प्रतिक्रिय:'' इति सिद्धान्त: बाधित: भवेत् किम् ? अस्य उत्तरम्– १) द्रव्याणां उत्पत्तिषु उत्पन्नान् स्वाभाविकान् गुणान् किमपि कर्तुं न शक्नोति । यथा जातिप्रतिबद्धेषु माषेषु गुरुत्वं गुणं वयं तेभ्य: पृथक् कर्तुं न शक्नुम: । संस्कारेण तेषु कापि भिन्नता भवति एतत् अनुमतम् ।

२) केचन गुणा: संस्कारादिभि: अपि न परिवर्तन्ते । एतादृशा: गुणा: यावद् द्रव्यभाविन: सन्ति । नाम यावत् द्रव्यस्य अस्तित्वं अस्ति तावद् तस्य गुणस्य अपि अस्तित्वम् । उदाहरणार्थम् – अग्निस्थं औष्ण्यं वायो: चलत्वं तैलस्य स्निग्धत्वं इत्यादय: ।

३) केचन गुणा: कालादिभि: परिवर्तन्ते । उदाहरणार्थं – गौरवादय: गुणा: धान्ये पुरातने जाते निर्गच्छन्ति ।

४) द्रव्यस्था: गुणा: प्रथमत: द्रव्यविनाशानन्तरं अथवा गुणान्तरोपधानानन्तरं नश्यन्ति ।

५) यत्र व्रीहिषु संस्कारोत्तरं लाजा: उत्पद्यन्ते तत्र नूतनमेव द्रव्यं उत्पद्यते । तेन नूतनद्रव्यस्य नूतनगुणा: निर्मियन्ते ।

गङ्गाधर: – गंगाधरेण 'गुणाधानम्' इति पाठभेद: स्वीकृत: ।

– गुणाधानम् इति ये गुणा: न स्वाभाविका: तेषां योग आधानम् उत्तरकालं गुणयोग: करणम् । तोयम् – कठिणखरादि गुण: मृदुमसृणादिगुण:

अग्नि: – शीतमृदुद्रवमसृणादि: उष्णकठिणसान्द्र खरत्वादि:

मन्थनम् – दधि: ⟶ तक्रम्–स्वादुसौगन्ध्यादि:

शौचम् – विषवत् ताम्रम् ⟶ गुणान्तराधानम्

–कालवशेन संवत्सरांश: ऋतु: दिन: रात्रि: इत्यादिनावशेन स्थावरजंगमानां गुणविशेष: परिवर्तन्ते । फलादिषु अपक्वस्य कालान्तरेण पचमानस्य गुणा: परिवर्तन्ते ।तथैव बाल्ययौवनवार्धक्यावस्थारूपेण कालसंस्कारेण रूपप्रमाणबुद्धिषु गुणेषु परिवर्तनं घटते ।

– भावना – भावनया गुणाधानं भवति । द्रव्येषु द्रव्यस्य आलोडनेन दिवसे आतपेन शोषणं रात्रौ स्थापनेन तस्य द्रव्यस्य गुणा: परिवर्तन्ते । एवं रीत्या क्वथनं फाण्ट: शीतीकरणं मंत्रादिभि: क्रियाभि: गुणाधानं भवति ।

– यथा उपनयनेन वेदाध्ययनादिषु कर्मसु अधिकार: प्राप्नोति । विवाहेन गृहस्थाश्रमकर्मसु योग्यता लभते । तथा केनचिद् एकेन संस्कारेण द्रव्यस्था: गुणा: परिवर्तन्ते । नूतना गुणयोग्यता लभते ।

– भाजनम् – चित्रकादौ लिप्तकुम्भे स्थिते अरिष्टे गुणान्तरणं भवति ।

– दशरात्रं कांस्यपात्रस्थं घृतस्य विषवत् गुणाधानम् मरकतवत् रुपाधानम् ।

<u>योगीन्द्रनाथ सेन</u> –

– स्वाभाविकगुणापेक्षया भिन्नगुणानां उत्पत्ति: नाम संस्कार: ।

– कालस्य प्रकर्ष: इति कालाधिक्यम् ।

– अधीयन्ते इति उत्पाद्यन्ते ।

– स्वाभाविका: गुणा: द्रव्येण सह एव उत्पन्ना: सन्ति । एतादृशेषु उत्पन्नेषु गुणेषु विविधै: संस्कारै: गुणान्तरणं भवति ।

<u>ज्योतिषचन्द्र सरस्वति</u>

– अभिसंस्कार: गुणान्तराधानम् । शेषा टीका शब्दार्थ: ।

<u>निष्कर्ष:</u> – अभिप्रेतार्थत: वैधर्म्यं नास्ति ।

– गङ्गाधरेण 'गुणाधानम्' इति भिन्न: पाठ: स्वीकृत: । तस्य ऊहापोह: तद् प्रकरणे क्रियते ।

३) **संयोग:** –

चरक: – द्वयो बहुनां वा द्रव्याणां संहतिभाव: । संयोग: विशेषकार्यम् आरभते । यथा मधुसर्पिष: मधुमत्स्यपयसां च संयोग: ।

चक्रपाणि: –

– 'विशेषमारभते' इत्यस्य अर्थ: संयुक्तं द्रव्यम् एकदेशेन अदृष्टं कार्यं कर्तुम् आरभते । एकैकं द्रव्यं यद् कार्यं न करोति एतादृशं नूतनं कार्यं तेषां द्रव्याणां संयोगेन भवति । यथा मधु घृतं च एकैकश: सेविते तदा न मारका: परंतु संयोगेन सेविते तर्हि संयोग: मारक: भवति । क्षीरमत्स्यादि: संयोग: कुष्ठकर: भवति ।

– अत्र संयोग: प्राधान्येन उपलब्धानां द्रव्याणामेव अपेक्षिता । यदा भावनादिषु अपि द्वि वा अधिकद्रव्याणां संयोग: अस्ति । परं तन्मध्ये एकं द्रव्यं प्रधानम् अपरम् अप्रधानम् अस्ति । तेन ते संयोगे न गृहिता: ।

गङ्गाधर: – एकस्मिन् द्रव्ये अनेका: गुणा: समवायेन सन्ति एष न संयोग: । एतद् निवारयितुं 'द्रव्याणाम्' इति विशेषस्य पदस्य योजना कृता । येन द्वि वा अधिकद्रव्याणामेव संयोग: भवति इति स्पष्टं भवति ।

योगीन्द्रनाथ सेन – केवलं शब्दार्थ: अविशेषा टीका ।

ज्योतिषचन्द्र सरस्वति – एकस्य एव द्रव्यस्य सेवनेन शरीरे या: क्रिया: उत्पत्स्यन्ते ता: द्वि वा अधिकद्रव्याणां मेलनेन कदाचित् भिन्ना: एव क्रिया: उत्पद्यन्ते । शेष: शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

४) **राशि:** –

चरक: – राशि: तु द्विविध: – सर्वग्रह: परिग्रह: च । स: मात्रामात्राफलविनिश्चयार्थ: ।

– सर्वस्य आहारस्य एकपिण्डेन प्रमाणग्रहणम् इति सर्वग्रह: ।

– एकैकश: आहारद्रव्याणां प्रमाणग्रहणं परिग्रह: ।

– सर्वस्य ग्रह: – सर्वग्रह: ।

– सर्वत: ग्रह: – परिग्रह: ।

चक्रपाणिः – राशिः इति प्रमाणम् ।

– मात्रावत् आहारस्य औषधस्य च फलं–शुभम् ।

– अमात्रावत् नाम हीनायां अथवा अतिरिक्तायां मात्रायाम् आहारस्य औषधस्य च फलम् अशुभम् ।

– उचितेन अनुचितेन च प्रमाणेन आहारस्य परिणामज्ञानार्थं राशिः वर्णिता अस्ति ।

सर्वग्रहः – सर्वेषां अस्य अर्थः मिश्रितानाम् अन्नमांससूपादीनां एकपिण्डेन गृहीतं प्रमाणम् ।

परिग्रहः – एकैकशः पदार्थस्य प्रमाणम् । शालेः कुडवः सूपस्य पलम्, मांसस्य द्विपलम् एवं प्रमाणं योजयित्वा पश्चात् तस्य समुदायस्य प्रमाणनिश्चितिः करणीया ।

– अवयवमानेन समुदायमानं निर्दिश्यते ।

– सर्वग्रहेषु अवयवमानवत् नियमाः न सन्ति । तेन अनियतस्य मानस्य केनापि आहारेण संपूर्णा आहारमात्रा नियमनीया इति सर्वग्रहे भवति ।

– चरकेणैव शब्दानां व्युत्पत्तिः वर्णिता अस्ति ।

– सर्वतः – प्रत्येकतः अवयवतः ।

गङ्गाधरः – मात्रामात्रयोः फलस्य प्रयोजनाय राशिः वर्णिता

– राशीणां प्रयोजनं मात्रामात्रयोः फलविनिश्चयः अस्ति ।

सर्वग्रहः – सर्वेषां नाम मूर्तामूर्तस्य आहारस्य एकपिण्डे (समुदायरुपेण) परिमाणग्रहणम् ।

परिग्रहः एकीपण्डेन गृहीतानां आहारद्रव्याणां एकैकत्वेन प्रत्येकस्य भिन्नभिन्नं परिमाणग्रहणम् ।

योगीन्द्रनाथ सेन – राशिः इति मात्रा ।

– सर्वग्रहः – समुदितद्रव्यापेक्षया परिमाणम् । परिग्रहः – एकैकद्रव्यापेक्षया परिमाणम् ।

– मात्रा द्विविधाः – सर्वग्रहः परिग्रहः च ।

– अमात्रा द्विविधा – हीनत्वेन अधिकत्वेन वा ।

– एतेषां फलम् – शुभाशुभम् पथ्यापथ्यत्वम् फलस्य अस्य विनिश्चयं करणं इति राशेः प्रयोजनम् ।

– सर्वस्य समुदायस्य ग्रहः सर्वग्रहः । परितः सर्वतः । परिः अत्र सर्वार्थे ग्रहः परिग्रहः ।

– आहारमात्रा अग्निबलं आहारद्रव्यं च अपेक्षते ।

**– अग्निबलापेक्षया मात्रा – सर्वग्रहः । द्रव्यापेक्षया मात्रा – परिग्रहः ।**

ज्योतिषचन्द्र सरस्वति – राशिः इति मानम् ।

– सर्वग्रहं सर्वेषां आहारद्रव्याणां साकल्येन मानग्रहणरुपम् ।

– परिग्रहः प्रत्येकशः आहारद्रव्याणां पृथक्मानग्रहणम् ।

निष्कर्षः – वैधर्म्यं नास्ति । योगीन्द्रनाथसेनस्य अग्निद्रव्यापेक्षया अनुक्रमेण सर्वग्रहः परिग्रहः च राशी स्तः इति वर्णनं विशेषम् अस्ति ।

५) **देशः**

चरकः – देशः इति स्थानम् । द्रव्याणाम् उत्पत्तिः द्रव्याणां प्रचारः तथा देशसात्म्यं स्थानपदेन आचष्टे ।

चक्रपाणिः – स्थानग्रहणेन आहारद्रव्यस्य तथा आहारभोक्तुः स्थानम् अभिप्रेतम् ।

– द्रव्याणां उत्पत्त्या प्रचारेण च तत्रस्थानां उत्पन्नगुणानां ज्ञानस्य हेतुः देशः इति ।

– द्रव्य उत्पत्तिः – हिमालये जातं गुणवत् भवति । मरौ जातं लघु भवति ।

– द्रव्यप्रचारः – लघुभक्ष्याणां धन्वप्रचारिणां बहुक्रियाणां प्राणिनां मांसं लघु । विपर्यये च गुरू ।

– देशसात्म्यम् – देशविपरीतं गुणं देशसात्म्यं गृह्यते । यथा – आनुपे उष्णरूक्षादि सेवनम् । धन्वनि – शीतस्निग्धादिसेवनम् ।

– ओकसात्म्यं तु उपयोक्तृग्रहणेन गृहीतम् ।

गङ्गाधरः –

– यस्मिन् देशे यद् द्रव्यम् उत्पद्यते तदनुसारं तद्रूपिणः गुणाः उत्पद्यन्ते । यथा आनूपे मृदुत्वं जाङ्गले तीक्ष्णत्वं । प्रचारेण देशान्तरं द्रव्याणां कालप्रकर्षात् गुणान्तरं ज्ञापयति ।

– जाङ्गलदेशीयः बहुभुक् भवति । प्राच्याः मत्स्यसात्म्याः भवन्ति । अनेन देशज्ञानेन देहदोषादीनां बलाबलादिघटकाः ज्ञायन्ते ।

योगीन्द्रनाथ सेन – देशः स्थानम् । देशसात्म्यं तत् देशविपरीगुणं यत् ।

ज्योतिषचन्द्र सरस्वति – द्रव्याणाम् उत्पत्तिस्थानं तथा भोक्तृणां निवासस्थानमपि विचार्यम् भवति । मरुजे देशे यत् सात्म्यं तद् आनूपे देशे असात्म्यम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

६) काल:

चरक: – काल: द्विविध: । नित्यग: – ऋतुसात्म्यापेक्ष: । आवस्थिक: – विकारापेक्ष: ।

चक्रपाणि: – नित्यग: इति अहोरात्रादिरुप: । आवस्थिक: इति रोगित्वबाल्यादि: अवस्थाविशेष: ।

– बाल्यादिकालानुसारं श्लेष्माविकारादीनां विचार: करणीय: तथा ज्वरादिविकारानुसारं आहारनियमा: विचारणीया: ।

गङ्गाधर: –

– प्रात: इत्यादे: स्वस्थस्य नित्यग: तथा रुग्णस्य आवस्थिक: ईदृश: प्रतिलोम: तन्त्रयुक्तिना कालद्वयस्य विचार: क्रियते ।

– आवस्थिक: काल: – प्रातर्मध्याह्नादय: त्रिपञ्चाष्टादय: एतादृशस्य आतुरस्य अपेक्षया विकारस्य अपेक्षया च कालविचार: । आतुर्य्यं विना हि न अवस्था भवति । यथा नवज्वरी न अश्नीयात् । आमे तु स्तम्भनं न आचरेत् ।

प्रयोजनम् – आतुरस्य अवस्थानुसारं आहारोपयोग: करणीय: ।

– नित्यग: काल: – संवत्सररुप: काल: स्वस्थस्य ।

ऋतुसात्म्यम् – यस्मिन् ऋतौ यत् सात्म्यं तस्मिन् ऋतौ स्वस्थेन त त आहार्य्यं इति अपेक्षया कालविचारम् ।

प्रयोजनम् – संवत्सररुपस्य कालस्य आहारोपयोगेषु हेतुत्वम्

योगीन्द्रनाथ सेन – आतुर्यावस्थालक्षण: काल : आवस्थिक: । संवत्सरात्मा शीतोष्णवर्षलक्षण: काल: नित्यग: ।

– आवस्थिक: काल: – विकारापेक्षया । नित्यग: काल: – ऋतुसात्म्यापेक्षया

– ऋतुसात्म्यम् – तत्तद् ऋतुविपरीतगुणं यत् तद् अपेक्षते इति ऋतुसात्म्यापेक्ष: ।

– आवस्थिककालस्य प्रयोजनम् – व्याधिकाल औचित्यम् ।

– नित्यगकालस्य प्रयोजनम् – ऋतुसात्म्यत्वम् ।

ज्योतिषचन्द्र सरस्वति – शब्दार्थ: टीका ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

७) उपयोगसंस्था

चरक: – उपयोगसंस्था इति उपयोगनियम: । स जीर्णलक्षणापेक्ष: ।

चक्रपाणि: –

– एवं आहारोपयोग: करणीय: एवं न करणीय: च एष: उपयोगनियम: इति उच्यते । एते नियम: जीर्णाहारस्यापेक्षया: कथिता: ।

– उपयोगनियम: एव आहारविधिविधानम् इति अग्रे वर्णितम् ।

– अजीर्णे यदि भोजनं क्रियते तर्हि महान् त्रिदोषप्रकोप: उत्पद्यते अत: उपयोगसंस्थाया: विचार: आवश्यक: ।

गङ्गाधर: – जीर्णलक्षणानां सूत्रं वर्णितम् ।

– ''उद्गारशुद्धिरुत्साहो वेगोत्सर्गे यथोचित: । लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ।''

– आहारविधिविधाने एतेषां विचार: कृत: ।

योगीन्द्रनाथ सेन – आहारविधिविधाने चरकविमानस्थाने प्रथमे अध्याये पंचविशतित्तमे सूत्रे जीर्णलक्षणानि वर्णितानि सन्ति ।

– तथैव केचन उपयोगनियमा: इन्द्रियोपक्रमणीये अध्याये वर्णिता: केचन तु आहारविधिविधाने अग्रे वर्णिता: ।

ज्योतिषचन्द्र सरस्वति – शब्दार्थ: अविशेषा टीका ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

८) उपयोक्ता

चरक: – य: तम् आहारम् उपयुङ्क्ते स उपयोक्ता । ओकसात्म्यं उपयोक्तु: आयत्तम् भवति ।

चक्रपाणि: – भोक्तु: पुरुषस्य अपेक्षया अभ्याससात्म्यं अस्ति ।

– केभ्यश्चन व्यक्तिभ्य: कस्यचित् द्रव्यस्य अभ्यासेन पथ्यसात्म्यं भवति अपि तु कदा कदा अपथ्यसात्म्यं भवति ।

गङ्गाधर: – य: पुरुष: प्रवरसात्म्यरुपिणं आहारं सेवमान: अग्रिमघटकान् विचार्य स्वस्यै उचित द्रव्यस्य योग्यां आहारकल्पनां कृत्वा तस्या: सेवनं करोति तं उपयोक्ता इति उच्यते ।

– आहारकल्पनाया: घटका:

- द्रव्यस्य अभाव: ।
- प्रकृत्याग्निबलादि अनुरुपं करणम् ।
- विरुद्धाविरुद्धरुपसंयोग: ।
- आहारद्रव्याणां मात्रा: ।
- द्रव्यस्य उत्पत्ति: प्रचार: देशसात्म्यं च ।
- आवस्थिक: नित्यग: च एतयो: कालानुरुपस्य आहारद्रव्यस्य स्वरुपं प्रमाणं च ।
- जीर्णाजीर्णलक्षणै: उपयोगसंस्था ।

– ओकसात्म्यं – यस्य यत् उचिततया सहात्मना युज्यते तद् ओकसात्म्यम् ।

योगीन्द्रनाथ सेन –

ओकसात्म्यं अभ्याससात्म्यम् । ओकसात्म्यस्य ज्ञानार्थं उपयोक्तु: विचार: करणीय: ।

ज्योतिषचन्द्र सरस्वति – उपयोक्ता इति भोक्ता। प्रतिपुरुषनियतसात्म्यम् अपेक्षते ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

प्रकरणस्य उपसंहार: सूत्रम् २३

चरक: – एवं शुभाशुभफलं यच्छन्ती प्रकृत्यादीनि अष्ट आयतनानि परस्परेभ्य: उपकुर्वन्ति । वैद्य: तानि अवगच्छतु । सम्यक् ज्ञात्वा एव हितकरमेव सेवनीयम् । मोहात् वा प्रमादात् अहितस्य विकाररुपि उदर्कस्वरुपि च फलं यच्छत: आहारजातस्य सेवनं न करणीयम् ।

चक्रपाणि: –

– प्रकृत्यादय: लाघवादय: शुभफलदायिन: सन्ति अपि तु प्रकृत्यादय: गुर्वादय: अशुभफलदायिन: सन्ति । करणादय: शास्त्रोक्ता: आधेया: शुभफलदायिन: सन्ति अपि तु निषिद्धा: आधेया: अशुभफलदायिन: सन्ति ।

– देशानुसारम् असात्म्ये अथवा निन्दितदेशे उत्पन्नानि द्रव्याणि अशुभफलदायीनि सन्ति ।

– अजीर्णभोजनादीनि काल असात्म्यानि अपि अशुभफलदायीनि भवन्ति ।

– ओक असात्म्यमपि शुभाशुभफलदं अस्ति । अस्यार्थ: पथ्यस्य ओकसात्म्यं शुभकरं प्रत्युत अपथ्यस्य ओकसात्म्यम् अशुभकरम् अस्ति ।

– मोहम् इति अज्ञानम् । प्रमादं इति ज्ञात्वा अपि रागम् । प्रियम् इति तदात्वप्रियम् ।

– असुखोदर्क निरुक्ति: – असुखं दु:खरुपम् । उदर्कं उत्तरकालीनं फलम् । अत: दु:खरुपि उत्तरकालीनं फलम् ।

गङ्गाधर: –

– एतेषां प्रकृत्यादीनां व्यस्त: उपयोग: कथं भवति? तथा समस्त: उपयोग: कथं भवति? तस्य शुभं वा अशुभं फलमस्ति?

उत्तरम् – अष्टकारणानां विशेषा: नाम प्रकृत्यादि–अन्यतम–स्वाभाविक–गुर्वादिगुणानां शुभाशुभं फलं परस्परोपकारकं भवति ।

– यदि देहाग्निदोषरोगबलप्रकृति आदीनां अनुरुप: गुरुलाघवादीनां प्रयोग: कृत: तर्हि स स्वास्थ्यारोग्यलक्षणरुपि शुभफलं यच्छति । अस्य विपरीतम् आतुरावस्थारुपि अशुभफलं यच्छति ।

– अत: प्रकृत्यादीनां अष्ट कारणानां केवलं शुभफलं न भवति । अयोग्येन उपयोगेन अशुभफलं अपि लभते । तथैव केवलं व्यस्त विचार: (एकैकस्य) उपयुक्त: नास्ति । एतानि अष्ट कारणानि परस्परोपकारकाणि सन्ति ।

– अत्र मोह पदस्य अर्थ: प्रकृत्यादि अष्टकस्य अज्ञानम् इति भवति । तथैव प्रमादस्य अत्रस्थ: अर्थ: प्रकृत्यादे: ज्ञानं सदपि अनवधानेन अयोग्यं सेवनम् ।

– प्रियम् इति आपातत: स्वादनादिना प्रियम् । आपातत: प्रियं सदपि उत्तरकालीनं दु:खरुपिफलं यच्छत: आहारजातस्य विहारजातस्य उपसेवनं मोहेन वा प्रमादेन न करणीयम् ।

– दोषादीनां मानविज्ञानहेतुत्वात् अष्ट प्रकृत्यादीनां विमानस्थाने वर्णनं कृतम् ।

योगीन्द्रनाथ सेन

– परस्परोपकारकं नाम आहारफलसौष्ठवजननात् परस्परसहाय्यकत्वम् ।

– प्रकृत्यादीनि अष्टकारणानि सम्यक् रीत्या उपयोजितानि तर्हि तानि आहारफलसौष्ठवं उत्पद्यन्ते ।

– हितकरं इत्यस्यार्थ: समधातून् प्रकृतिस्थं कुर्वन्ती तथा विषमधातून् समं कुर्वन्ती इति भवति ।

– मोहम् इति अज्ञानम् । प्रमादम् इति अनवधानम् । प्रियम् इति आपातप्रियम् ।

– असुखं इति दु:खलक्षण: विकार: । उदर्क: उत्तरफलम् ।

ज्योतिषचन्द्र सरस्वति – शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् पञ्चमम्

## भोज्यसाद्गुण्यम् तथा आहारविधिविधानम् ।

सूत्रे २४, २५ च

चरक: –सूत्रम् २४

– आहारविधिविधानम् स्वस्थातुराभ्याम् उचितकाले स्वभावत: हिततमम् ।

– अस्य आहारविधानस्य नामनिर्देशं कृत्वा पश्चात् तेषां विस्तृतं वर्णनं कृतम् ।

चक्रपाणि: –

– 'केषाञ्चित' पदेन कमपि आतुरम् 'उष्णं स्निग्धम् अश्नीयात्' एतद् आहारविधिविधानं हितकरं न स्यात् । उदाहरणार्थं रक्तपित्ते शीताहार: कफविकारेषु च रुक्षाहार: एव हितकरम् अस्ति ।

– अत्र वाक्यशेषस्य विपर्ययतन्त्रयुक्ते: च उपयोग: कृत: । इत्यर्थ: सर्वेषु आतुरव्यक्तिषु अत्र वर्णितम् आहारविधिविधानम् उपयुक्तं भवेदेव इति न इति विपर्याय: ज्ञातव्य: ।

– काश्च काश्च व्यक्ती: एव एष आहारविधिविधानं हिततमं स्यात् ईदृशी युक्ति: तन्त्रयुक्त्याधारेण योजितव्या भवति । स्वस्थेषु वा आतुरेषु कांश्चन हितकरं अपि तु कांश्चन अहितकरं स्यात् एतद् ज्ञातव्यम् ।

– एतद् आहारविधिविधानं स्वभावत: हिततम् परं कदा कदा प्रकृत्या हिततमम् अपि सेवनम् अहितकरं स्यात् इति विपर्यय: अस्ति । कदा कदा प्रकृत्या हितकर: आहार: अपि केषुचित् व्यक्तिषु अहितं भवेत् । परंतु एवं कदाचित् संभवेत् अत: प्रायिकत्वात् आहारविधिविधानं हिततम् अस्ति ।

– सादगुण्यं प्रशस्तगुणयोगिताम् ।

गङ्गाधर: – आहारविधि: सूत्रस्थानस्य अन्नपानचतुष्के वर्णित: ।

– तस्यैव आहारविधे: अन्नपानादौ वर्णितं गुरुलाघवादिविधानं (करणप्रकार:) केषुचित् स्वस्थेषु केषुचिद् आतुरेषु च आहारकाले स्वभावत: अतिशयेन हितं भवति ।

– इष्टे इति स्वमनोऽनुकूले । तन्मना: भोजनमना: ।

– वीर्याविरुद्धम् संयोक्तुं यद् द्रव्यं यद् द्रव्यस्य वीर्येण स्ववीर्यत: विपरीतं न भवति तेन द्रव्येण तद् द्रव्यं संयुक्तम् ।

– साद्‌गुण्यं सद्‌गुणत्वम् व्यतिरेकेण असद्‌गुणत्वं च ।

योगीन्द्रनाथ सेन

– काले अश्नीयात् प्रकृत्या हिततमम् अश्नीयात् । एवं अनुक्तस्य आहारविधे: अपि बोध: भवति ।

– उपभोक्त्रा जीर्णे–पूर्वभुक्ते उष्णं स्निग्धं मात्रावत् अविरुद्धवीर्यम् इष्टसर्वोपकरणम् – इष्टम् तथा सर्वे: उपकरणै: युक्तम् इष्टे देशे अन्यै: सह जल्पनं हास्यं वा अकुर्वन् तन्मना: – तदेकचित्तम् नातिद्रुतं नातिविलम्बितम् आत्मानं सम्यक् अभिसमीक्ष्य–आत्मसात्म्यं सम्यक् विवेच्य भुञ्जीत ।

– इन्द्रियोपक्रमणीये अध्याये 'रत्नपाणि स्नात:' एषा उपयोगव्यवस्था अत्र उन्नेया अस्ति ।

– सुश्रुत सूत्रस्थानम् ४६ इत्यस्य संदर्भ: दत्त: । तस्मिन् सुश्रुतेन चरकोक्त आहारविधिविधानस्य वर्णनं कृतमस्ति ।

– साद्‌गुण्यं सद्‌गुणकारित्वम् ।

ज्योतिषचन्द्र सरस्वति –

– त्रिविधबुद्धीनां व्यक्तीनाम् आकलनार्थं केषांचित् आहारविधिविधानां वर्णनं कृतमस्ति ।

– अस्यां टीकायां पदद्वयं महत्वम् अर्हति । त्रिविधबुद्धिवेद्यतया सर्वप्रकाराणां पण्डितमुर्खाणां बुद्धि: आकलयति तदनुसारं वर्णनम् । (निदर्शनं तन्त्रयुक्ति:)

– कानिचित् – केषांचित् आहारविधिविधानानां वर्णनं कृतम् । एतस्मात् अनुक्तनाम् अन्येषां अवस्थानुरुपाणाम् आहारविधिविधानानां बोधम् वैद्य: स्वयं कुर्यात् । (वाक्यशेष तन्त्रयुक्ति:)

– आहारविधिविधानम् निरुक्ति: । आहारक्रमस्य विनियोगप्रणालि: । पथ्यस्य प्रणालि: । एषा प्रणालि: भोक्तृसदृशानां सर्वेषां स्वस्थानां तथा केषां आतुराणां कृते उपयुक्ता भवति ।

– हिततमं अतिशय्येन हितम् । विपर्ययेण केषांचित् आतुराणां कृते हितकरं नास्ति । उदाहरणार्थम्

– अतिसारादेव उष्णभोजनं निषेधम् ।

– साद्गुण्यं सद्गुणसमूहः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

१) **उष्णं अश्नीयात्** –

चरकः – उष्णं अश्नीयात् । उष्णं हि भुज्यमानं स्वदते । भुक्तं औदर्यं अग्निम् उदीरयति । क्षिप्रं जरां गच्छति । वातं अनुलोमयति । श्लेष्माणं परिह्रासयति ।

चक्रपाणिः – परिह्रासयति इति श्लेष्माणं भिन्नसङ्घातं करोति ।

गङ्गाधरः – भोजनस्य सद्गुणानां वर्णनं इतःपरं कृतम् ।

– उष्णं इत्यस्य अर्थः नाति उष्णम् । यतः शीतं अतिउष्णं च आहारः यदि सेविता तर्हि तस्य स्वादं न जानाति । अग्निः न उदीरीयते तथा उष्णसेवनस्य अन्यान् सद्गुणान् न प्राप्नुवन्ति । अतः अत्युष्णं सेवनं न कर्तव्यम् । सम्यक् मात्रायां उष्णं सेवनीयम् ।

– परिह्रासयति इति स्थानपरिशोषयति एषः पाठः अस्ति ।

योगीन्द्रनाथ सेन – स्वदते रुचिं जनयति ।

– औदर्यः अग्निः जाठराग्निः उदीरयति संधुक्षयति ।

– अनेन परिह्रासयति इति स्थाने परिशोषयति एषः पाठः स्वीकृतः ।

ज्योतिषचन्द्र सरस्वति – उष्णं इत्यर्थः ईषद् उष्णम् । यतः अत्युष्णं सर्वेभ्यः एव अहितकरं भवति

– औदर्याग्निः पाचकाग्निः । उदीरयति वर्धयति ।

निष्कर्षः – परिह्रासयति इति स्थाने पाठभेदः तथा वैधर्म्यं अस्ति ।

२) **स्निग्धं अश्नीयात्** –

चरकः – स्निग्धं हि भुज्यमानं स्वदते । भुक्तम् अनुदीर्णं अग्निं उदीरयति । क्षिप्रं जरां गच्छति । वातम् अनुलोमयति । शरीरम् उपचिनोति । इन्द्रियाणि दृढीकरोति । बलाभिवृद्धिम् उपजनयति । वर्णप्रसादम् अभिनिर्वर्तयति ।

चक्रपाणिः – टीका नास्ति ।

गङ्गाधर: – अतिस्निग्धं न सेवनीयम् । अतिस्निग्धं वा अस्निग्धं सेवनेन साद्गुण्यं न उत्पद्यते ।

योगीन्द्रनाथ सेन – शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति – स्निग्धं घृतादिस्नेहयुक्तम् ।

– दीपतैलन्यायेन स्निग्धस्य अग्निवर्धकत्वं स्वयंसिद्धं अस्ति ।

– स्नेह: वातप्रत्यनीक: सन् अपि तेन वातशमनं भवति ।

– शरीरोपचयं शरीरधातुवर्धनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

३) **मात्रावत् अश्नीयात्** –

चरक: – मात्रावत् हि भुक्तं वातपित्तकफान् अपीडयन् आयु: एव विवर्धयति । गुदं सुखं अनुपर्येति । उष्माणं न उपहन्ति । अव्यथं परिपाकम् एति ।

चक्रपाणि: – मात्रावत् इति 'प्रशंसायां मतुम्'। तेन 'प्रशस्तमात्रम्' इति अर्थेन मात्रावत् पदं योज्यति ।

– वातादिदोषा: अनतिमात्रायां स्वस्थाने तिष्ठन्ति ।

– मात्रायुक्त: आहार: वायो: स्वस्थानं (प्राकृतावस्थां) न परिवर्त्य न प्रकोपयति ।

– अन्नं परिणत्य स्वभावत: तस्य नि:स्सरणं 'गुदमनुपर्येति' इति पदेन सूचितं भवति ।

– उष्माणमिति वह्निम् ।

गङ्गाधर: – शब्दार्थ: अविशेषा टीका ।

योगीन्द्रनाथ सेन – त्रिविधकुक्षिये अध्याये अस्य विषयस्य विस्तृतं वर्णनं कृतमस्ति । शेषा: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति – भुक्तान्नस्य पचनाय तत्तद्स्थाने (अवस्थापाके) आमाशयादिषु कफादीनां चवनमावश्यकम् सर्वरसयुक्त: आहार: सन् अपि तं मधुरादिभाव (अवस्था) प्राप्ति: आवश्यकी ।

– अतिरिक्तमात्रायां कृत: आहार: अवकाशमप्राप्य स: उदीरणोन्मुख: (पचनाय प्राप्त:) सन् अपि स्थानाभावे त्रिदोष: न उदीर्य्य (अपच्य) विकृत: भूत्वा पीडां करोति ।

– अत: मात्रायां सेवित: आहार: प्रकृतिस्थान् दोषान् शरीरोपचयान् कृत्वा आयु: वर्धयति ।

– केवलं इति पूर्णतया ।

– मात्रावत् आहार: । यथायोग्य पद्धत्या आहार: अनुजीर्य तस्य मलांश: गुदात् निष्कसति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

४) **जीर्णे अश्नीयात्**

चरक: –अजीर्णे भुञ्जानस्य अभ्यवहृतं आहारजातं पूर्वआहारस्य अपरिणतं रसं उत्तरेण आहाररसेन उपसृज्य सर्वान् दोषान् आशु प्रकोपयति । जीर्णे भुञ्जानस्य आहारजातं सर्वशरीरधातून् अप्रदूषयत् आयु: एव विवर्धयति ।

जीर्ण लक्षणम् – स्वस्थानस्य दोष: । उदीर्ण: अग्नि: । बुभुक्ष्या उत्पत्ति: । स्त्रोतोमुखं विवृतत्वम्। उद्गारविशुद्धि: । हृदयविशुद्धि: । वातानुलोमनम्। विसृष्ट वातमूत्रपुरीषवेगम्।

चक्रपाणि: –

– पूर्वस्य इति दिनान्तरकृतस्य आहारजातम् ।

– अपरिणत: नाम सम्यक् पचनं न भूत: ।

गङ्गाधर: –

– जीर्णावस्थायां भोक्तव्यं इति कथयन् व्यतिरेकेण पूर्वं अजीर्णावस्थायां अन्नं यदि सेवितं तर्हि किं भवति इत्यस्य विस्तृतं वर्णनं स: करोति । अपरिणतमिति ईषद् परिणतं सशेषं परिणतम् ।

– जीर्णावस्थायां सेवित: आहार: सर्वान् शरीरधातून् अदूष्य पचयति ।

शरीरधातु: – गङ्गाधरेण अस्मिन् अग्रिमाणां भावपदार्थानां अन्तर्भाव: कृत: ।




योगीन्द्रनाथ सेन – जीर्णे भोजनस्य गुणं वक्ष्यन् आदौ अजीर्णे भोजनस्य दोषं दर्शयति । आहारस्य पच्यमानो हि उत्तरोत्तरधातुरुपतामेति । अजीर्णे भोजनं त्रिदोषप्रकोपणम् । शेषा टीका शब्दार्थ:

ज्योतिषचन्द्र सरस्वति – आदौ अजीर्णे भोजनदोषान् निर्वक्ति ।

– आहारजातम् इति आहारसमूह: ।

– सम्यक् जीर्णविकाशस्य अभावेन पूर्वाआहार: अपरिणत: तिष्ठति इत्यर्थ: अपक्व:/साम: वर्तते ।

– आमबाहुल्यात् दोषा अपि सामा: प्रकुप्यन्ति ।

– जीर्ण: इत्यर्थ: भवति पूर्वाहारस्य जीर्णत्वात् पूर्वम् ।

– तुकार: पक्षान्तरसूचक: ।

– 'स्त्रोतस्' पदेन अत्र आमाशयादिस्थानि कफादिवहानि स्त्रोतांसि अभिप्रेतानि सन्ति ।

– स्वस्थानस्थ: दोष: – आमाशयादिषु अवस्थापाकेषु उत्पन्न: दोष: ।

– एतेषां स्त्रोतसां मुखानि नाम आमाशयादितं द्वारमेव । 'एतानि द्वाराणि विवृतानि अनवरूद्धानि 'भूतेन' अस्य अर्थ: 'तन्मध्यत: अन्नात् स्त्रावसाततयेन तानि मुखानि अनवरुद्धानि भवन्ति' ।

– विशुद्धे उद्गारे इति भुक्तादिगन्धरहिते उद्गारे ।

– हृदयविशुद्धि: इति उरोलाघवम् ।

– शरीरधातून् इति दोषधातुमलान् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

५) **अविरुद्धवीर्यम् अश्नीयात्**

चरक: – अविरुद्धवीर्यम् अश्नन् विरुद्धवीर्याहारजै: विकारै: न उपसृज्यते ।

चक्रपाणि: –आत्रेयभद्रकाप्यीये अध्याये विरुद्धवीर्याहारजानां विकाराणां वर्णनमस्ति ।

गङ्गाधर: – अविशेष: केवलं शब्दार्थ: ।

योगीन्द्रनाथ सेन – अविशेष: केवलं शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति – अविशेष: केवलं शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

६) **इष्टे देशे इष्टसर्वोपकरणं अश्नीयात्**

चरक: – तेन मनोविघातं न प्राप्नोति ।

चक्रपाणि: – त्रिविधकुक्षीये अध्याये (च. वि. २) मनोविघातकरा: भावा: वर्णिता: सन्ति ।

– कामादिभि: चित्तउपतापकरभावै: मनोविकारा: उत्पद्यन्ते ।

– इष्टसर्वोपकरणै: सह भुक्तेन अपि मनोविघाता: न भवन्ति ।

गङ्गाधर: – बीभत्सादिभि: मनोविघातं भवति । अनिष्टदेशे अनिष्टउपकरणै: च मनोविघातं भवति ।

योगीन्द्रनाथ सेन – इष्ट इति अभिमतम् । मनोविघात: इति चित्तोपतापम् ।

– कामक्रोधादिभि: उपतप्तमनसा भुक्तम् अन्नपानं न पचति ।

– सुश्रुते –

'भोक्तारं विजनं रम्ये नि:संबाधे शुभे शुचौ । सुगन्धपुष्परचिते समे देशेऽथ भोजयेत् ।'(सु. सू. ४६)

ज्योतिषचन्द्र सरस्वति – शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

७) **अतिद्रुतम् न अश्नीयात्**

चरक: – अतिद्रुतं भुञ्जानस्य उत्स्नेहनम् अवसादनं भोजनस्य अप्रतिष्ठानं च ।

– भोज्यदोषसाद्गुण्यस्य उपलब्धि: न नियता ।

चक्रपाणि: – अतिद्रुतभोजनस्य दोषा: – उत्स्नेहनम् – अन्न उन्मार्गगमनम् ।

– अवसादनम् – अवसाद: । – अप्रतिष्ठानम् – हृदयस्थेन कोष्ठ अप्रवेश: ।

– भोज्यदोष: – केशादिभोज्यगत: दोष: । – साद्गुण्यम् – स्वादुत्वादिगुण: ।

एतेषां नियता उपलब्धि: नास्ति इत्यर्थ: भोज्यदोष: भोज्यसाद्गुण्यं च एते कदा ज्ञायेते कदा न ज्ञायेते । यदि भोज्यगता: दोषा: न ज्ञाता: तर्हि सदोषस्य अन्नस्य सेवनं भवति । दोषज्ञानेन घृणा उत्पद्य साद्गुण्यं न प्राप्यते ।

गङ्गाधर: – पाठभेद: अस्ति ।

– अतिद्रुतेन अन्नसेवनेन तस्य यथावत् स्नेहनं न भवति । तस्य स्वादं सम्यक् न उत्पद्यते तथा तस्य यथावत् प्रतिष्ठानं न भवति । शेष: शब्दार्थ:

योगीन्द्रनाथ सेन – चक्रपाणिसमान: पाठ: टीका च ।

– उत्स्नेहनम् उन्मार्गगमनम् । – अवसादनम् अवसादकरत्वम् ।

– अप्रतिष्ठानम् भुक्तस्य छर्दनं भवति । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति – उत्स्नेहनम् कफ: भुक्तान्नस्य स्नेहनं करोति । यदि अतिद्रुतं भुक्तं तर्हि लालादिरुपिण: कफस्त्रावस्य अल्पसात्म्येन कफेन सह अन्नसंसर्ग: अल्पकालं अल्पमात्रायां च भुत्वा तस्य अन्नस्य सम्यक् स्नेहनं न भवति ।

– अवसादनम् – मार्गस्य अतिक्रमणं कृत्वा गमनं नाम अन्नं प्राणवहे स्त्रोतसि प्रविशति । तेन अन्नस्य अप्रतिष्ठानं नाम यथास्थाने अन्नस्य अवस्थानं न भवति ।

निष्कर्ष: – उत्स्नेहनम् अवसदनम् अत्र द्वे वैधर्म्ये स्त: ।

८) **अतिविलम्बितम् न अश्नीयात्**

चरक: – तेन तृप्तिं न अधिगच्छति । बहु भुङ्क्ते । आहारजातं शीतीभवति । विषमं पच्यते ।

चक्रपाणि: – विलंबित कालभोजनेन अग्निवैषम्यं उत्पद्यते ।

गङ्गाधर: – कालप्रकर्षेण अन्नस्य केषांचन अंशभागस्य पचनं प्रारभते । अपि तु किंचित् भाग: आशये उपस्थित: भवति तेन पचनं विषमं विकृतं भवति ।

– विपर्यय तन्त्रयुक्त्या: आधारेण ' न अतिविलम्बित' भोजनस्य सद्गुणा: वर्णिता: ।

योगीन्द्रनाथ सेन – स्थायं स्थायं अन्नसेवनं क्रियेत तदा तस्य अन्नस्य अग्निसंबंध: समकाले न भवति । तेन समकाले पचनं न भवति ।

ज्योतिषचन्द्र सरस्वति – पूर्वं भुक्तान्नस्य पचनस्य अन्ते पुन: अन्नसेवनेन विषमपाक: भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

९) **अजल्पन् अहसन् तन्मना भुञ्जीत**

चरक: – अतिद्रुतं भुञ्जानस्य समं दोषा: ।

चक्रपाणि: – उत्स्नेहनम् अवसादनम् अप्रतिष्ठानम् भोज्यदोषसाद्गुण्यम् अनियत उपलब्धि: च एते दोषा: उत्पद्यन्ते ।

गङ्गाधर: – शब्दार्थ:

योगीन्द्रनाथ सेन – शब्दार्थ:

ज्योतिषचन्द्र सरस्वति – शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

१०) आत्मानम् अभिसमीक्ष्य सम्यक् भुञ्जीत

चरक: – इदं मम उपशेते इदं नोपशेत इत्येवं विदितं हि अस्यात्मन आत्मसात्म्यं भवति ।

चक्रपाणि: – इति पदेन सात्म्यासात्म्यविधानं दर्शकविचारेण परिणामस्वरुपस्य ओकसात्म्यसेवनस्य अभिप्राय: भवति । अत: हितकराणाम् एव अभ्यास: करणीय: । आत्मन् पदेन मह्यं किं सात्म्यम् अस्ति एष विचार: प्रत्येका व्यक्ति: जानाति । स: एतद् स्वयं जानाति । शास्त्रोपदेशेन साकल्येन अस्य विचारं कर्तुम् अशक्यम् ।

– ओकसात्म्यस्य सेवनमपि हिताहितं विचार्य एव करणीय: ।

– आत्मसात्म्यं नाम प्रतिपुरुषज्ञानम् । शास्त्रोपदेश: सर्वत्र न प्रभवति । प्रत्येकेन मनुजेन स्वस्य सात्म्यस्य विचार: करणीय: भवति ।

गङ्गाधर: – आत्मने किमस्ति हिताहितं तद् विदित्वा मनुजेन आहार: सेवनीय: । स्वस्य स्थुलदेहाय इत्यर्थ: आत्माशरीरसत्वेभ्य: किं योग्यं अस्ति इमं विचारं आत्मसात्म्यम् इति उच्यते ।

– स्वस्वसात्म्यं स्वेन स्वेन सहात्मतां सरुपताम् इतं भवति ।

– प्रकरणस्य उपसंहार: – एवम् आहारविधे: विधानस्य दोषभेषजादिमानज्ञाने यथासम्भवं हेतुत्वस्य विमानवर्णनं कृतम् ।

योगीन्द्रनाथ सेन – शब्दार्थ:

ज्योतिषचन्द्र सरस्वति – उपशेते आत्मधात्वानुकूलत्वात् सात्म्यीभवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

षष्ठम् अधिकरणम् ।

विषयानुसारेण भिषक् व्याख्या ।

चरक: – रसान् द्रव्याणि दोषांश्च विकारांश्च प्रभावत: । वेद यो देशकालौ च शरीरं स नो भिषक् ।।

– य: रसद्रव्यदोषविकाराणां प्रभावं जानाति तथा देशं कालं शरीरं च जानाति सैव भिषक् अस्ति ।

चक्रपाणि: – अध्यायोक्तस्य रसप्रभावादिज्ञानस्य प्रशंसा कृता अस्ति ।

– स नो भिषक् इति नो अस्माकं संमत: इत्यर्थ: । एतादृश: वैद्य: अस्माकं संमत: अस्ति ।

गङ्गाधर: – रसद्रव्यदोषविकाराणां प्रभावज्ञानस्य प्रशंसा कृता अस्ति ।

योगीन्द्रनाथ सेन – रसादिप्रभावज्ञानस्य स्तुतिः ।

ज्योतिषचन्द्र सरस्वति – रसद्रव्यादिप्रभावज्ञानस्य स्तुतिः । शेषा टीका शब्दार्थः । अतिरोहितार्थम् अन्यत् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## सप्तमम् अधिकरणम् ।

### अध्यायस्य उपसंहार सूत्रे २७, २८

चरकः – रससंख्याते विमाने एतत् प्रकाशितम् –

| | | |
|---|---|---|
| विमानार्थः | रसद्रव्यदोषरोगाः प्रभावतः | नातिसेव्यानि द्रव्याणि |
| त्रिविधं सात्म्यम् | अष्टौ आहारायतनानि | भोज्यसाद्गुण्यम् |

चक्रपाणिः – दोषविकाराणां प्रभावः संक्षेपतः वर्णितः । विस्तृतं वर्णनं त्रिविधकुक्षीये अध्याये कृतमस्ति । त्रयाणां तैलादिद्रव्याणां वर्णनं द्रव्यप्रभावे कृतं अतः तस्य पृथक् उल्लेखः न कृतः ।

गङ्गाधरः – अध्यायार्थम् उपसंहरति । रससंख्याते रसाख्ये ।

योगीन्द्रनाथ सेन – विमानर्थः विमानस्थानस्य प्रयोजनम् । रससंख्याते रससंज्ञके ।

ज्योतिषचन्द्र सरस्वति – अध्यायार्थं निवेद्य तं समापयति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## द्वितीयोध्याय:

## त्रिविधकुक्षीय: ।

अध्यायेऽस्मिन् त्रीणि अधिकरणे स्त:।

१) मात्रामात्रयो: विचार: २) आमप्रदोष: ३) उपसंहार:

एतेषु त्रिषु प्राधिकरणषु अधोनिर्दिष्टानि उपाधिकरणानि स्त: ।

१. मात्रामात्रयो: विचार:

अ) मात्रानिश्चयार्थं त्रिविधं कुक्षिप्रमाणम् ।

आ) मात्रावत् लक्षणानि ।

इ) अमात्रावत् लक्षणानि । – हीनमात्रा

– अतिमात्रा

२. आमप्रदोष: ।

अ)आमप्रदोषकर: हेतु: ।

आ)द्विविधौ आमप्रदोषौ ।

इ) विसूचिका

ई) अलसक – दण्डालसकौ आमविषौ ।

उ) आमप्रदोषचिकित्सा ।

ऊ)आमाशयप्रमाणम् ।

३. उपसंहार:

संपूर्णस्य अध्यायस्य विवेचनम् एतयो: अधिकरणयो: आधारेण कृतमस्ति ।

अध्याय अधिकरणम्

– त्रिविधकुक्षीयविमानम् एष: अध्याय: विमानस्थाने रसविमानम् इति अध्यायानन्तरं द्वितीये क्रमांके वर्णित: अस्ति ।

– अध्यायस्य प्रथमसूत्रस्य प्रथमं पदं त्रिविधं कुक्षौ स्थापयेत् इति अस्ति । अत: एतस्य अध्यायस्य नाम त्रिविधकुक्षीय: इति कृतम् अस्ति ।

–‘त्रिविधकुक्षी’ सामासिकं पदं ‘छ’ प्रत्यययुक्तम् । यतः अत्र विषयहेतोः वर्णनं नास्ति मात्राअमात्रावत् राशिः एतस्य विषयस्य वर्णनम् अस्ति । अतः अत्र ‘छ’ प्रत्ययः । तेन ईय् प्रत्यययुक्तं त्रिविधकुक्षीय पदं सिद्धम् ।

– गद्यपद्य संयुतं चम्पु पद्धत्या अध्यायस्य वर्णनम् ।

– चतुर्भिः टीकाकारैः अध्यायस्य अधिकरणं समानतया वर्णितम् अस्ति । तदेवम् –

– प्रथमाध्याये आहारविधिविशेषायतनेषु ‘राशि’ वर्णनम् अस्ति । तस्याः राश्याः मात्रावत् अमात्रावत् अनुसारं प्राप्तव्यं फलं तथा तदनुसारं शरीरस्थदोषविकारयोः विवेचनम् अस्मिन् अध्याये कृतमस्ति । केवलं मात्रावत् आहारसेवनेन आहारस्य संपूर्णतया उत्तमं फलं न लभते । यतः आहारविधिविशेषायतनस्थानाम् अष्ट घटकानां फलं भिन्नं भिन्नं नाम प्रविभक्तम् अस्ति । तेनैव अष्ट आहारविधिविशेषायतनानां सुचारुपालनेन एव आहारस्य संपूर्णम् उत्तमं फलं लभते । ततः ‘राशि’ इति घटकानुसारं मात्रा अमात्रावत् आहारसेवनेन प्राप्तव्ययोः फलदोषयोः वर्णनम् अस्मिन् अध्याये अस्ति । इदम् अस्य अध्यायस्य अधिकरणम् अस्ति ।

सेनकुलोत्पन्न योगीन्द्रनाथेन ‘सूत्र क्रमाङ्कः ३’ इत्यस्य टीकायाम् उक्तम् . . .

आहारमात्रा अभिबलापेक्षिणी आहारद्रव्यापेक्षिणी च भवति । इदं मात्राविषयकं वर्णनं मात्राशीतीय (सूत्रस्थान पञ्चमोध्यायः) इति अध्याये कृतम् । आहारद्रव्यापेक्षया मात्रायाः कुक्षि–अंश विभागानुसारं विवेचनम् अस्मिन् त्रिविधकुक्षीय विमानम् इति अध्याये कृतम् ।

## अधिकरणम् १

## मात्रा–अमात्रा विचारः

अधिकरणस्य अस्य त्रीणि उपाधिकरणानि सन्ति ।

### अ) मात्रानिश्चयार्थं त्रिविधं कुक्षिप्रमाणम् । – सूत्राणि ३ तः ५

चरकः – सूत्रम् ३

– आहारसेवने तन्निमित्तं कुक्षौ त्रिविधाः अवकाशाः (स्थानानि) आवश्यकाः ।

१. मूर्ताहाराविकारौ । २. द्रवाहाराविकारौ । ३. दोषः

– एवं अन्नं सेवमानः यदि अमात्रया अन्नं सेवते तर्हि तेन संभाव्याः विकृतयः न उत्पद्यन्ते । परं केवलं मात्रापूर्वकेन आहारसेवनेन अपि आहारस्य संपूर्णं फलं न लभते । प्रकृतिकरणादयः अन्याः घटकाः अपि सापेक्षया परिणमन्ति ।

टीकाकाराः– अस्मिन् अधिकरणे टीकां कुर्वत्सु टीकाकारेषु वैधर्म्यं नास्ति । तैः वर्णिताः विशेषाः अत्र स्थाप्यन्ते । ते अधोनिर्दिष्टाः सन्ति ।

चक्रपाणिः – दोषार्थं अवकाशः आहारम् उपकरोति यतः यदि दोषावकाशः न भवेत् तर्हि दोषदुष्टिः भवितुम् अर्हति ।

– चतुर्विधा आहाराः मूर्तः द्रवः च इति द्विधा विभज्यते ।

मूर्तः– आश्यः (कृन्त्वा खाद्यः आहारः) खाद्यः– (चर्वयित्वा खाद्यः आहारः)

द्रवः– (लिह्यः आहारः) पेयः– (पानयोग्यः आहारः)

अंशः– न समप्रविभागो वर्तते किंतु यथोचित विभागे । आहारदोषार्थं च कुक्षिः त्रिविधा विभज्या । ते भागाः न समानतया अपितु यादृशः आहारः तादृशः तस्याः अंशः (विभागः) करणीयः । तेनैव मूर्ताहारद्रव्यानाम् अंशः पृथुः भवेत् ।

गङ्गाधरः – विशेषा टीका नास्ति । केवलं शब्दार्थस्य वर्णनम् ।

योगीन्द्रनाथसेन

–आहारमात्रा अग्निबलापेक्षिणी, आहारद्रव्यापेक्षिणी च अस्ति । अस्मिन् अध्याये आहारद्रव्यापेक्षायाः कुक्षि अंश विभागानुसारं मात्रावर्णनं अस्ति ।

– वातादीनां संचरणार्थं विनावकाशं संपूर्णा कुक्षिः अन्नपानेन पूरिता चेत् युगपत् त्रयाणां दोषाणां प्रकोपः संभवति ।

– त्रिभाग सौहित्यानुसारं कुक्षेः विभागवर्णनम् अस्ति ।

ज्योतिषचन्द्र सरस्वतिः

– 'कुक्षिः' पदेन आमाशयः अभिप्रेतः अस्ति ।

– सेवितः आहारः पचनार्थं आमाशये एव तिष्ठति । अतः कुक्षि अंशस्य पूरणार्थं प्रमाणानुसारं आहारमात्रायाः निर्धारणं करणीयम् ।

– वातादयः दोषाः द्रवरुपेण आमाशये स्त्रवन्ति । आहारे मिश्रिताः ते त्रिविधान् अवस्थापाकान् कुर्वन्ति इति ग्रहणीचिकित्सा अध्याये वर्णितम् । अतः दोषसंचारणार्थं अवकाशः आवश्यकः ।

– एवं विविधानाम् आहारप्रकाराणां मात्रा व्यक्तिसापेक्षा भवति तेन प्रतिव्यक्तिं भिन्ना भवति ।

निष्कर्षः – अस्य अधिकरणस्य सूत्राणां टीकायां वैधर्म्यं नास्ति ।

उहापोहः परं द्वयोः विशेषयोः चर्चा भवितुम् अर्हति ।

१) चक्रपाणिना कुक्षि अंश विभज्य 'यथोचितं' इति पदं योजितम् । कुक्षेः अंशविभागाः समानतया न कृत्वा 'यथा उचिताः' नाम आहारप्रकारानुसारं (कुक्षिअंशविभागाः) करणीयाः । अत्र चक्रपाणिनां 'उचितम्' पदं सविचारं योजितम् । इति भाति ।

'उचितं' पदं अर्थद्वयं वहति । यतः चरकाचार्येणः ग्रंथे 'उचितम्' पदस्य अर्थद्वयं योजितम् अस्ति । उचितम् – अ) योग्यम्

ब) अभ्यासः

उचितात् अभ्यस्तात् । च. सू. ७।३६ चक्रपाणि

अ)'योग्यः' इति अर्थेन 'उचितं' पदं किं वदति? एवं वदति यत् चतुर्विधेषु आहारेषु यस्य आहारस्य यावती मात्रा योग्या तादृशाहारपदार्थानुसारं तद्संबंधिनः कुक्षेः अंशः करणीयः । तदंशानुसारं तानि तानि आहारद्रव्याणि सेवितव्यानि ।

उदाहरणार्थं मूर्ताहारद्रव्याणां अंशविभागः द्रवाहारद्रव्याणां अंशविभागापेक्षया पृथुः स्यात् ।

ब)अभ्यस्तः अथवा अभ्यासः अर्थेन 'उचितं' पदं यदि स्वीक्रियते तर्हि स अर्थः सयुक्तिकतरः भवेत् इति मन्ये। यतः एकस्य मनुजस्य येषाम् आहारपदार्थानां यावान् अभ्यासः भवेत्, तेषां पदार्थानां सेवनस्य यः अभ्यासः यस्यां मात्रायां भवेत् तदनुसारं कुक्षिअंश विभागाः करणीयाः । उदाहरणार्थं को कमपि पुरुषं गुरुगुणानां आहारद्रव्याणां अभ्यासः अधिकतरं भवेत् तदा तस्य कुक्षौ अंशविभागाः अधिकाः स्युः ।

– राशिः नामा मात्रायाः सर्वग्रहः परिग्रहः च इति द्विविधः विचारः शक्यः । सर्वग्रहः नाम मूर्त–द्रवयुत मात्रयोः मिलिता मात्रा परिग्रहः नाम प्रत्येकस्य पदार्थस्य विभिन्ना मात्रा । अत्र यस्य अभ्यासः अधिकः तस्य मात्रा अधिका भवेत् यस्य अभ्यासः न्यूनः तस्य मात्रा न्यूना स्यात् ।

तथैव मूर्तद्रवयो: आहारयो: अभ्यासानुसारं तयो: कुक्षिअंश विभागा: भिन्ना भिन्ना: स्यु: । तस्मात् कुक्षे: अंशविभागा: इति संकल्पना निश्चिता नास्ति अपि तु व्यक्तिसापेक्षा प्रतिपुरुष नियता वर्तते ।

२) ज्योतिषचन्द्रसरस्वति: अत्र वर्णित: यत् **'दोषा: द्रवरुपेण आमाशये स्त्रविता: आहारे मिश्रिता: अवस्थापाकं कुर्वन्ति ।'**

अत्र दोषा: द्रवरुपावस्थायां आमाशये स्त्रवन्ति इति उल्लिखितम् । अयं संदर्भ: अतिशय: विशेष: अस्ति ।

चरक: – सूत्रे ४, ५ च ।

– केवलं मात्रावत्वात् एव आहारस्य सेवनेन कृत्स्नं आहारफलसौष्ठवं अवाप्तुं न शक्यम् ।

– प्रकृत्यादय: अष्टिनाम् आहारविधिशेषायतनानां भिन्नफलत्वात् आहारफलसौष्ठवम् अनुमीयते ।

– अत्र आहारराशिम् अधिकृत्य मात्रामात्रयो: फलविनिश्चयार्थ: प्रकृत: ।

– मात्रावत्वम् अमात्रावत्वम् एतयो: उभयो: घटकान् लक्षीकृत्य निवेदनं कृतम् ।

चक्रपाणि: – सौष्ठवं सुष्ठुत्वं भाद्रक्यम् इत्यर्था: । सौष्ठवं नाम सुष्ठुत्वम् ।

सुष्ठु – Well, Excellent, Beautifully, Very much, exceedingly, truely, rightly.

एते सुष्ठु शब्दस्य अर्था: वामन शिवराम आपटेकृत शब्दकोशे ६०९ पृष्टाङ्के वर्तन्ते । तथैव 'सौष्ठव' शब्दस्य अर्था: – Excellence, Goodness, Beauty, Elegance, Superior, Beauty एते सन्ति । आहारस्य परिपूर्णं उत्कृटं फलं न केवलं मात्रायां अवलम्बितं अपि तु प्रकृत्यादिषु अन्येषु भावविशेषेषु अपि अवलम्बितम् वर्तते ।

गङ्गाधर: –

– विभक्तफलत्वात् इति विभिन्नफलत्वात् न तु एकैकश: सर्वफलत्वात् ।

– आहारविधिविशेषायतनेषु अष्टसु आहारस्य राशिमधिकृत्य मात्रामात्रयो: फलविनिश्चयार्थं अयं त्रिविधकुक्षीय अवकाशांशस्थापनोपदेश: कृत: ।

– प्रकृत: करणारम्भ: प्रशब्दस्य आरम्भार्थकत्वात् । शेष: अविशेष: ।

योगीन्द्रनाथसेन: – प्रकृत्यादीनां अष्ट आहारविधिविशेषायतनानाम् फलानि । परिणामा: विभिन्ना: सन्ति । तस्मात् आहारस्य संपूर्णं फलं / परिणाम: केवलं मात्रायां न अवलम्बित: । तथापि अध्यायेऽस्मिन् राशि: इति अधिकरणानुसारं मात्रामात्रयो: गुणदोषा: वर्णिता: सन्ति ।

प्रकृत: इह प्रस्तुत: आरब्ध: ।

– 'प्रकृत' इति पदं चरकाचार्येण: अत्र अन्यार्थेन योजितम् अस्ति । अधिकरणेऽस्मिन् प्रस्तुतं विषयम् अधिकृत्य वर्णनम् अस्ति । एष: अर्थ: अस्य पदस्य योगेन्द्रनाथ सेनस्यनेन कृत: अस्ति ।

ज्योतिषचन्द्रसरस्वति: – अविशेषा टीका ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## आ) मात्रावत् लक्षणानि – सूत्रम् ६

अस्मिन् उपाधिकरणे आहारस्य योग्यायां मात्रायां सेवनस्य लक्षणानि वर्णितानि सन्ति ।

चरक: – मात्रावत् आहारस्य लक्षणानि सूत्रेषु वर्णितानि ।

चक्रपाणि: – विवेचनम् अविशेष:

गङ्गाधर: – एभ्य: लक्षणेभ्य: अनुमानेन आहारस्य परिपाक: ज्ञातव्य: ।

योगीन्द्रनाथसेन: अस्य सूत्रस्य विवेचने योगेन्द्रनाथसेनेन तिसृणां परिभाषाणाम् वर्णनं कृतम् ।

– उद्देश: – संक्षेपेण कथनं उद्देश: । कस्यापि विषयस्य संक्षेपेण कथनं नाम उद्देश: । एषा एका तन्त्रयुक्ति: अस्ति ।

–स्थानम् – स्थानमवस्थानं दण्डायमानत्वेन । स्थानं नाम एकस्मिन् स्थाने दण्डवत् अवस्थिति: ।

– उपचय: – उपचय: पुष्टि: ।'उपचय:' पदं ग्रंथे नैकेषु स्थानेषु उपयुज्यते । तस्य अर्थ: पोषणम् ।

ज्योतिषचन्द्र सरस्वति: – आमाशयं अदृश्ये अन्त:कोष्ठे वर्तते । तस्य आमाशयस्य कति भाग: आहारेण पूरणीय: इति कथं निर्णीतव्यम् – तद् एवम्

कुक्षि अंश विभागानुसारं आहारसेवनानन्तरं यानि यानि शारीरमानसानि लक्षणानि दृश्येयु: । तेषां माध्यमेन आहारस्य मात्रावत् लक्षणानि ज्ञातव्यानि ।

कुक्षि: नाम बाह्यनाभे: ऊर्ध्व अंश: बाह्यशरीरे निर्णीतुं शक्यम् ।

निष्कर्ष: – अस्मिन् उपाधिकरणे वैधर्म्यानि न सन्ति ।

<u>उपाधिकरणम् इ) – अमात्रावत् लक्षणानि – सूत्रम् ७</u>

<u>चरक:</u> – १) आहारस्य अमात्रा द्विधा वर्तते – हीना मात्रा अति मात्रा च ।

२) हीनमात्रायां आहारसेवनेन दृश्यानि लक्षणानि ।

३) अतिमात्रायां आहारसेवनं नाम युगपत् सर्वदोषप्रकोप: इति महान् सिध्दान्त: अत्र वर्णित: अस्ति

४) य: आतृप्तिं मूर्तं–आहारम् सेवते तदनन्तरं महत्या मात्रया द्रवपानं करोति । तस्य आमाशयस्था: त्रय: दोषा: युगपद् एव प्रकुप्यन्ति ।

५) हीनमात्रया अथवा अतिमात्रया प्रकुपिता: दोषा: विष्टम्भिता: सन्त: दोषानुसारेण विविधानि लक्षणानि उत्पादयन्ति ।

अ)




आ)




<u>चक्रपाणि</u> – विशेषा टीका नास्ति ।

<u>गङ्गाधर</u> – १) विधमनं नाम ह्रासं कुर्वत् ।

२) सौहित्यं नाम उदरपूर्णतया तृप्त्या च अनशनेच्छा । (अशनस्य अनिच्छा)

शेषं वाक्यार्थ वर्णनम् ।

योगीन्द्रनाथसेन

१) विधमनं नाम नाशं कुर्वत् ।

२) हीनमात्रायां कृताहार: वातप्रकोपक: तथा अतिमात्रया कृताहार: तु सर्वदोषप्रकोपक: भवति ।

४) आहारजातानां तृप्त्यर्थयोगात् षष्ठि: ।

५) सौहित्यं नाम तृप्ति: ।

६) अलसके विष्टम्भ: भवति तथा विसूचिकायां ऊर्ध्व अधो मार्गेण दोषाणां प्रच्यवनं भवति ।

ज्योतिषचन्द्र सरस्वति: –

१) उपचय: – शारीरस्वाभाविकापचयपूरणम् ।

२) विधमनं – ऱ्हासकरम् ।

३) अलक्ष्म्यावहं शरीरकान्तिनाशनम् । शारीरप्रभानाश: नाम अलक्ष्मी: ।

४) सौहित्यं नाम तृप्ति: ।

५) अलसक: – विसूचिकाया: सामान्यतया सम्प्राप्ते: वर्णनम् ।

निष्कर्ष: – विधमनम् इति पदस्य विवरणे वैधर्म्यं दृश्यते ।

## अधिकरणम् – द्वितीयम्

## आमप्रदोज:

सूत्राणि अष्टत: नवदश: पर्यन्तम् । तन्मध्ये षड् उपाधिकरणानि सन्ति ।

अ) आमप्रदोषजकरस्य हेतु: । सूत्रे अष्टम् नवमे ।

सूत्र ८ –

चरक: – अतिमात्रेण आहारसेवनम् इति आमप्रदोषकर: हेतु: पूर्वाधिकरणे वर्णित: अस्ति । परं आमप्रदोषस्य एष: एक: एव हेतु: नास्ति । अन्ये हेतव: अधोल्लिखिता: ।

चरक: – गुरुरूक्षशीतगुणयुक्त अन्नपानम्

– शुष्कान्नपानसेवनम्

– इष्टान्नपानसेवनम्

– विष्टम्भिविदाही अन्नपानसेवनम्

– अशुभविरुद्धान्नपानसेवनम्

– अकाले अन्नपानसेवनम्

– कामक्रोधादि भावैः उपतप्त मनसा अन्नपानसेवनम्

चक्रपाणिः – कामादिभिः भवन् उपघातः प्रभावेण अन्नस्य दूषणं करोति ।

– अशुचि अन्नम् – अशौचेन (अशुद्धतया) मानसः उपघातः भूत्वा आमदोषः उद्भवति ।

– आमप्रदोष – परिभाषा

''आमस्य अपक्वस्य आहारस्य प्रदोषः ।''

– 'आमम्' इति अपक्वम् अन्नम् दुष्टदोषसंपर्केण शरीरं विकृतं करोति । एषः परतन्त्रः दोषप्रकोपः अस्ति ।

गङ्गाधर – आमप्रदोष परिभाषा

''आममभ्यवहृतमपक्वं तेन कृतः प्रदोषः ।''

योगीन्द्रनाथसेन – अस्मिन् सूत्रे 'कुशलाः' इति पदस्य वाक्यशेषः कार्यः । इदं विवेचनं कृत्वा व्यवहारं कुर्वन् कुशलः अस्ति ।

– द्विष्टम् इति मनसोऽननुकूलम् ।

– सवातं सतोदवत्शूलं च मलस्य अप्रवृत्तिः नाम अवष्टम्भः । सवाततोदशूलाः मलाप्रवृत्तिः ।

– विदाहः भुक्तस्य आम्लभावं गत्वा किंचिद् विपाकः ।

– विशेषं विवरणम् – हितकराहारस्य अपि अकालसेवनमपि आमप्रदोषकरः एव हेतुः । अत्र योगेन्द्रनाथसेनेन सुश्रुतस्य संदर्भः पुरस्कृतः अस्ति ।

ज्योतिषचन्द्र सरस्वतिः – आमप्रदोषकरम् अजीर्णतापादकम् ।

– विपर्ययतन्त्रयुक्तेः उपयोजना अस्ति ।

– अकाले – अनवाप्तकाले अतिक्रान्तकाले वा ।

– कामादिभिः प्रत्याकुलेन मनसा सेविते अन्ने अजीर्णात् दोषविकृतिः जायते ।

निष्कर्षः – वैधर्म्यं नास्ति ।

सूत्रे ९ –

चरकः – योग्यायां मात्रायां पथ्यकरः अपि आहारः चिन्ताशोकभयक्रोधैः ग्रस्तेन मनसा, जागरणं कुर्वतः व्यक्तेः दुःखदायां शय्यायां पूर्णरुपेण न पचति । तथा यदा व्यक्तेः मनः चिन्ताशोकभयक्रोधैः ग्रस्तम् अथवा व्यक्तिः अधिकतरम् जागरिता अस्ति अथवा दुःखदायां शय्यायां भवति तदा योग्यायां मात्रायां सेवितः पथ्यकरः आहारः अपि न पचति ।

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः –

– वाक्यशेष तन्त्रयुक्तेः उपयोगं कृत्वा विशेषं वर्णनम् कृतम् अस्ति । 'मात्रयाऽपि' इति पदे 'अपि' पदेन 'अमात्रयाऽपि' ग्राह्यम् । 'पथ्यं च इति' इत्यत्त चकारेण 'अपथ्यं च' इत्यपि ग्राह्यम् ।

अस्य अर्थः एवम् – मात्रायाम् अथवा अमात्रायां पथ्यकरः वा अपथ्यकरः आहारः चिन्तादिभिः भावैः परिणमितः न भवति ।

– अस्मिन् सूत्रे भिन्नरीत्या वर्गीकरणं कृत्वा एवं वर्णितम् अस्ति ।

अतिमात्राहारः + पथ्यम् ।

मात्राहारः + अपथ्यम् ।

चिन्ताशोकादयः + पथ्यम् ।

अतिमात्राहारः + चिन्तादयः ।

मात्राहारः + चिन्तादयः । एते आहारं न परिणमयन्ति ।

योगीन्द्रनाथसेन

– विशेषं वर्णनं नास्ति । शब्दार्थः एव ।

ज्योतिषचन्द्र सरस्वतिः

– शिष्यबुद्धिव्यवसायार्थं पद्ये वर्णनावृत्तिः । शेषं शब्दार्थः ।

सारांशः–अस्मिन् उपाधिकरणे वैधर्म्यं नास्ति । यद् जे विशेषं वर्णनम् अस्ति तद् उपरि विविक्तम् ।

द्वितीयम् उपाधिकरणम् । आ) द्विविध: आमप्रदोष:

चरक: – सूत्रं दशमम् ।

आमप्रदोष: द्विविध: १) विसूचिका २) अलसक:

चक्रपाणि: –

–'द्विविध' इति पदेन दण्डालसकामविषयो: समावेश: अलसके एव भवति तेन तयो: गणना अन्यत: अकरणीया इति स्पष्टम् ।

– दण्डालसामविषयो: दोषा: आलसीभूत्वा अप्रवर्तमाना: भवन्ति तेन ते अलसके समाविष्टा: ।

गङ्गाधर

– विशेषं वर्णनम् नास्ति । वाक्यार्थ: अस्ति ।

योगीन्द्रनाथसेन

– वाक्यार्थ: शेषं अविशेष: ।

ज्योतिषचन्द्र सरस्वति:

– वाक्यार्थ: शेषं अविशेष: ।

सारांश: – वैधर्म्यं नास्ति । उद्देश तन्त्रयुक्ते: उपयोगं कृत्वा द्विविधस्य आमप्रदोषस्य उल्लेख: अस्ति । अस्य निर्देश: अग्रिमे उपाधिकरणे कृत: अस्ति ।

उपाधिकरणम् – ३) विसूचिका

चरक: – यत्र आमदोषा: ऊर्ध्वं वा अधोमार्गेण प्रवर्तन्ते तत्र विसूचिका इति संज्ञा ।

चक्रपाणि: – अविशेष: केवलं वाक्यार्थ:

गङ्गाधर – अविशेष: केवलं वाक्यार्थ:

योगीन्द्रनाथ सेन: – अविशेष: केवलं वाक्यार्थ:

ज्योतिषचन्द्र सरस्वति: – अविशेष: केवलं वाक्यार्थ:

सारांश: – वैधर्म्यं नास्ति ।

## उपाधिकरणम् ई) अलसकम् – दण्डालसकम् – आमविषम्

चरकः – सूत्रम् द्वादश – अलसकसम्प्राप्तिः

दुर्बलं अल्पाग्निं बहुश्लेष्मणं वातमूत्रपुरीषवेगविधारिणं स्थिरगुरुबहुरुक्षशीतशुष्कान्नसेवनम् ।

↓

अनिलप्रपीडितं श्लेष्मणाविबद्धमार्गेण अन्नपानं अतिमात्रप्रलीनम्

↓

अलसत्वात् न बहिर्मुखी भवति ।

↓

छर्दिअतिसारवर्ज्यानि आमप्रदोषलिङ्गानि अभिदर्शयति ।

↓

अलसकः ।

दण्डालसकसम्प्राप्तिः

अतिमात्रप्रदुष्टाः दोषाः

↓

प्रदुष्टेन आमबद्धमार्गेण तिर्यग्गच्छन्तः ।

↓

केवलं शरीरं दण्डवत् स्तम्भयन्ति ।

↓

दण्डालसकः

↓

एतत् असाध्यम्

आमविषसम्प्रातिः

विरुद्धाशनम् /अध्यशनम् /अजीर्णाशशीलिनः

↓

आमदोष सम्प्राप्तिः

↓

विषसदृशलिङ्गत्वात् आमविषम्

↓

परम् असाध्यम्

↓

आशुकारि – विरुद्धोपक्रमत्वम्

चक्रपाणिः –

१) अलसके वातकफयोः उल्लेखः अस्ति । तयोः प्राधान्यं भवति । परं अस्य अर्थः पित्तम् अप्रधानं तेन तृष्णामदभ्रमादीनि लक्षणानि करोति इति सामान्यः अर्थः स्वीकरणीयः ।

एषा एव आशयापकर्षगति: इति उच्यते ।

२) आम परिभाषा – अपक्व: आहारोऽन्नरसो वा अपक्व आम उच्यते ।

३) अजीर्णाशन परिभाषा – अपक्वस्य अशनम् अजीर्णाशनम् । तेन अध्यशनम् इति संकल्पनया साधर्म्यं नास्ति ।

४) विरुद्धोपक्रमत्वम् – आमार्थं कृता उष्णा क्रिया विषविरुद्धा अपि च विषार्थं कृता शीता क्रिया आमविरुद्धा ।

गङ्गाधर –

१) अतिमात्रप्रलीनत्वात् अलसत्वम् ।

२) अन्येषां तन्त्राणां सन्दर्भ: ।

३) विसूचिका–प्रवृत्तं आममन्नं दोषो यत्र तां तथा । यत्र आममन्नं दोषप्रवृत्तं भवति सा विसूचिका । यथोक्तरुपं नाम वातादय: दोषा: स्वलक्षणानि प्रदर्शयन्ति । संज्ञा – वायुकारणात् सूचिभेदवत् (तोदवत्) वेदना भवति अत: विसूचिका सुश्रुताचार्यस्य संदर्भ: अस्ति ।

४) अलसक: – स्थिरगुर्वादीभि: गुणै: युक्त: आहार: । श्लेष्मबद्धमार्गे वायुना प्रपीडितं स्थिरगुर्वादीनां गुणानाम् अन्नं अतिमात्रप्रलीनत्वात् वहिर्मुखिनं न भवति ।

५) अन्यतन्त्राणां संदभार्णाणां उद्धरणम् ।

६) अलसके छर्द्यतिसारे लक्षणे विहाय विसूचिकस्थानि अन्यानि लक्षणानि अतिमात्रायां दृश्यन्ते । सुश्रुतवचनम् –''अत्र अलसके तीव्र शूलादीनि लक्षणानि भवन्ति । तत्र अलसकेन तुल्यलक्षणानि सन्ती परं तीव्रशूलादीनि न सन्ती एतादृशी विलम्बिका नाम्ना व्याधे: अपि उल्लेख: अस्ति ।''

परं चरकाचार्येण शूलादीनां तीव्रत्वातीव्रत्वयो: दोषबलापेक्षया विचारं कृत्वा विलम्बिका इति अपरा व्याधि न वर्णिता ।

७) अलसकस्य नामान्तरं विलम्बिका

८) अलसकस्य प्रभेद: अन्नविषमेव आमविषम् ।

९) दोष: प्रदुष्ट: भूत्वा प्रदुष्टेन आमेन विबद्धे स्रोतसि तिर्यक् गत्वा संपूर्णं शरीरं दण्डवत् स्तम्भयति । तादृश: अलसक: दण्डालसक: इति प्रकार: ।

गङ्गाधर –

१) सुश्रुताचार्येण विलम्बिका व्याधि: वर्णिता । परं चरकेन नहि । चरकाचार्येण अलसके एव विलम्बिका समाविष्टा अस्ति ।

२) शूलादीनां तीव्रत्वातीव्रत्वयो: विचार: दोषबलापेक्षया न कृत: ।

३) अवशिष्टा टीका – शब्दार्थ:

योगीन्द्रनाथसेन –

१) अलसीभूतम् – आमाशये अतिमात्रप्रलीनम्

२) अलसकस्य निरुक्ति: – ''अलसत्वादित्यनेन अलसकस्य निरुक्ति: ख्याप्यते ।''

३) अध्यशनम् – भुक्तस्योपरि भुक्तम् ।

अजीर्णाशनम् – अजीर्णे प्राग्भुक्ते अशनम् ।

– एकवारं भोजनानन्तरं त्वरितम् अशनम् नाम अध्यशनम् । अत: पूर्वं खादितमन्नं पचनात् पूर्वमेव अन्यत् किमपि अशनम् नाम अजीर्णाशनम् ।

ज्योतिषचन्द्र सरस्वति:

– आमप्रदोष:– आमान्नाय दुष्टिकर्तृत्वं भवति, हेतुत्वम् आगच्छति तमेव आमप्रदोष: वदन्ति ।

– विसूचिका – युगपद् एव ऊर्ध्वाधोमार्गेण आमप्रदोषा: प्रवर्तन्ते । तथैव दोषानुसारं यथोक्तानि लक्षणानि दृश्यन्ते । अतिप्रवृत्ता छर्दि: अतिसार: इति विशेष: ।

– अलसक:

अल्पाग्नि:

↓

सर्वधातुपोषकस्य अन्नरसस्य क्षयेन रुग्ण: दुर्बल: भवति ।

↓

अन्नरस: जाठराग्ने: अपि पोषक: । तेन जाठराग्नि: दुर्बलतर: भवति ।

– विचारणीया: घटका: – १) अल्पाग्नि:

२) कफवर्धकेन हेतुसेवनेन श्लेष्मावृद्धि:

३) वेगावरोधेन वातप्रकोप:

४) स्थिरगुर्वादीनां गुणानां अन्नसेवनेन अजीर्णम्

तस्मात् आमान्नं कफबद्धेषु सोतस्सु वायुप्रपीडित्वात् (अतिमात्रायां बद्ध्वा) गतिविरहितं भवति ।

– अलसकं नाम मन्दत्वं गतिविरहितत्वम् । आमविषं अलसकस्य अवस्था–संज्ञा–प्रभावविशेषम् ।

– प्रदुष्टाम: मार्गं निरुन्धति तेन अधोर्ध्वया गत्या गन्तुम् असमर्थ: भवति । तत: अपक्कान्नरसदोषै: सह शाखाद्यौ सर्वशरीरे तिर्यक् गत्वा (गतिं प्रवर्त्य) व्याप्नोति शरीरं दण्डवत् स्तम्भयति च ।

सारांश: – वैधर्म्यं नास्ति । केचन विशेषा: विचारघटका: सन्ति तेषाम् ऊहापोह: अत्र अस्ति ।

उपाधिकरणम् – उ) आमप्रदोषचिकित्सा सूत्रे १३, १४ च

चरक:–

१) आमप्रदोषचिकित्सा – दुष्टम् अलसीभूतं साध्यम् आम:

↓

उल्लेखनं – सलवणम् उष्णं वारि

↓

स्वेदनम्

↓

वर्तिप्रणिधानम्

↓

उपवास:

२) विसूचिका अग्र्या चिकित्सा – लंघनम् ⟶ पेयादिक्रम:

३) आमप्रदोष:–

अन्नकाले (जीर्णाहारे)

↓

दोषा: आलिप्ता: आमाशयं स्तिमितगुरुकोष्ठम् अन्नाभिलाषा नास्ति:

↓

शेषदोषपाचनार्थं तथा अग्निसन्धुक्षार्थं च ।

↓

पाययेत् औषधम् ।

परं अन्नकाल: न स्यात् ( पूर्वाहार: जीर्ण: न स्यात् ) तर्हि औषधं न दातव्यम् ।

४) यदि

अन्नकाल: न सत: अजीर्णावस्यायां पाचकं दीपकं च औषधं दद्यात् तर्हि

↓

दुर्बल: अग्नि: युगपद् आहारौषधदोषाणाम् पाचनं कर्तुं न शक्नोति ।

↓

आहारौषधयो: विभ्रमेण अग्नि: नश्यति रुग्णस्य मरणं सम्भवति ।

५) अत:

आमप्रदोषजविकाराणां नाश: अपतर्पण – उपक्रमेणैव भवति ।

↓

अपतर्पणानंतरमपि यदि व्याधे: अनुबंध: स्यात् तर्हि हेतुविपरीता चिकित्सा समावृत्य व्याधिविपरीता चिकित्सा प्रारभ्या ।

↓

**एष: नियम: एव अतिदेशतन्त्रयुक्त्या सर्वाभ्य: व्याधिभ्य: उपयोजितव्य: ।**

६) अत:

आमप्रदोषनाशानन्तरं, दोषपचनानन्तरं अग्निदीपनानन्तरम्

↓

दोषादी: व्याधी: च विचार्य

↓

अभ्यंगनिरुहानुवासनस्नेहपानादय: युक्त्या उपयोजनीया: ।

चक्रपाणि:

१) आनुपूर्वी नाम पेयादिक्रम: ।

२) अतर्पणेन दोषाणां सामता नश्यति । आमस्य अनुबन्ध: न अवशिष्यते ।

३) अजीर्णे प्रमादेन यदि औषधं वा आहारं दीयते चेत् महात्ययत्वं उत्पद्यते ।

४) यदा निरामावस्था भविष्यति तदा एव शूलज्वरादीनां व्याधिलक्षणानां चिकित्सा प्रारभ्या ।

५) शूलनाशिका ज्वरनाशिका औषधीचिकित्सा निरामावस्थायामेव कार्या । सामावस्थायां न करणीया लंघनापतर्पणयो: सातत्यं पालनीयम् ।

गङ्गाधर –

१) उल्लेखयेत् इति वामयेत् ।

२) गङ्गाधरेण सूत्रेऽस्मिन् स्थानद्वये पाठभेद: स्वीकृत: ।

अ) साध्यामस्य उपक्रमे उल्लेखानन्तरं छेदेनं प्रदेयम् । वमनोत्तरं श्लेष्मच्छेदनंदकुर्वताम् कटुरसानां उपयोग: कार्य: ।

ब)‘विमुक्तामप्रदोषस्य’ स्थाने ‘अनुद्रिक्तामप्रदोषस्य’ इति पाठभेद: स्वीकार्य: ।

एतयो: द्वयो: पाठभेदयो: ऊहापोह: विमर्शे कृत: ।

३) विसूचिका उपक्रमः

लंघनम् ⟶ विरेचनम् ⟶ पेयादिक्रमः । अस्मिन् विवेचने गंगाधारेण द्वादश अन्नकालान् उल्लिख्य रुग्णं प्राकृतावस्थां आनेतव्यम् इति वर्णितम् ।

लंघनम् ⟶ विरेचनम्

| | | |
|---|---|---|
| प्रथमः अन्नकालः | – | साहाह्ने–सुखोदकः परिषेकः<br>पुराणाः लोहितशालितण्डुलाः मण्डपूर्वा सुखोष्णा यवागु |
| द्वितीयः अन्नकालः | – | यवागुः |
| तृतीयः अन्नकालः | – | यवागुः |
| चतुर्थः अन्नकालः | – | विलेपी + उष्णोदकम् |
| पंचमः अन्नकालः | – | विलेपी |
| षष्ठः अन्नकालः | – | विलेपी |
| सप्तमः अन्नकालः | – | २ प्रसृतोदनम् + उष्णोदकम् + मुदगयुषम् । |
| अष्टमः अन्नकालः | – | २ प्रसृतोदनम् + उष्णोदकम् + मुदगयुषम् । |
| नवमः अन्नकालः | – | २ प्रसृतोदनम् + उष्णोदकम् + मुदगयुषम् । |
| दशमः अन्नकालः | – | मांसरसः + उष्णोदकम् । |
| एकादशः अन्नकालः | – | मांसरसः । |
| द्वादशः अन्नकालः | – | मांसरसः । |

एवं क्रमेण अन्नगुणं वर्धयित्वा सप्तरात्रिषु रुग्णः प्रकृतिभोजनम् आनेतव्यः ।

योगीन्द्रनाथसेन – योगेन्द्रनाथसेनेन टीकायां पंच भागेषु विवरणं कृतमस्ति ।

१) साध्यालसकस्य उपक्रमः उल्लेखनं नाम वमनम् ।

वाग्भटस्य उदाहरणम् – स्वेदनफलवर्तिद्वयं मलवातस्य अनुलोमनं करोति ।

२) विसूचिकोपक्रमः – आनुपूर्वी नाम संसर्जनक्रमः । तन्मध्ये अतीतावेक्षणं तन्त्रयुक्त्यनुसारं उपकल्पनीयम् चरकसूत्रस्थाने १५ अध्यायस्थं पेयादिक्रमः उल्लिखितः ।

३) आमदोषोपक्रमः

अ) स्तिमितकोष्ठम् = निश्चलकोष्ठम्

आ) दोषोपलिप्तामाशयलक्षणम् – स्तिमितगुरुकोष्ठम् अनन्नाभिलाषिणम् ।

इ) जीर्णाहारोत्तरमेव औषधं प्रदेयम् ।

ई) दुर्बलोऽग्निः = मन्दीभूतोऽग्निः

उ) दोषः – अधिकरणानुसारं आमदोषः इत्यर्थः स्वीकरणीयः ।

अत्र 'आम' इति पदं 'आदिलोपः' इतिनुसारं अर्थः ग्राह्यः ।

४) आमदोषजविकाराणाम् उपक्रमः

आद्योऽपक्रमः – अपतर्पणम्

अ) दोषबलापेक्षया इदम् अपतर्पणं त्रिविधं भवति ।

| | | |
|---|---|---|
| अल्पदोषे | – | लंघनम् । |
| मध्यदोषे | – | लंघनपाचने । |
| बहुदोषे | – | दोषावसेचने । |

एष संदर्भः अनागतावेक्षणतन्त्रयुक्त्यनुसारं चरकविमानस्थाने तृतीय अध्यायतः गृहीतमस्ति ।

ब) अपतर्पणोत्तरः अनुबंधः –निमित्तविपरीतं भेषजं अपास्य व्याधिविपरीतं औषधं प्रदेयम् । तदनंतरं हेतुव्याधिविपरीतं, विपरीतार्थकारि औषधं प्रदेयम् ।

अस्य उदाहरणानि

| | | | | |
|---|---|---|---|---|
| हेतुविपरीतम् | – | गुरुशीतस्निग्धादिहेतुः | – | लघुउष्णरुक्षादिचिकित्सा । |
| | | लघूष्णरुक्षादिहेतुः | – | गुरुशीतस्निग्धादिचिकित्सा । |
| व्याधिविपरीतम् | – | उर्ध्वगरक्तपित्ते | – | विरेचनम् |
| | | अधोगरक्तपित्ते | – | वमनम् |
| तदर्थकारि | – | छर्दिः | – | छर्दनम् |
| | | अतिसारः | – | अनुलोमनम् |
| | | मदात्ययः | – | मद्यपानम् |

विपरीतार्थकारिणी परिभाषा – अविपरीतमपि विपरीतमर्थं करोति ।

५) आमदोषात् विमुक्त्यानंतरं अभ्यंगादिविधानम् । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: –

१) विपर्ययतन्त्रयुक्ते: उपयोग: – यस्मिन् अलसके वमनेन अथवा वर्त्यादिप्रयोगेण अध:स्थमलस्य निष्कासनं शक्यं तत् अलसकसाध्यं अस्ति ।

२) उल्लेखनार्थ यानि द्रव्याणि चरकाचार्येण कथितानि तेषां प्रमाणं केवलं ज्योतिषचन्द्रसरस्वतीना वर्णितम् ।

२ पलं लवणम् + १ शरावं उष्णोदकम् ।

एतत् संमिश्य तेन उल्लेखनं करणीयम् ।

३) स्वेदनोपक्रम:– साध्यामावस्थायां उल्लेखनोत्तरं य: स्वेदनोपक्रम: करणीय: स: केवलं उदरे एव करणीय:

४) वर्तिप्रणिधानम् – चरकाचार्येण वर्तिप्रणिधानं कार्यम् एवमेव वर्णितम् । परं तस्य द्रव्याणां तेषां प्रमाणानां वर्णनं केवल ज्योतिषचन्द्रसरस्वतीना अवेन कृतम् इति विशेष: ।

एक: भाग: हिंगु: + चत्वार: भागा: सैंधवम् + १ कर्षं मधु

सर्व एकत्रं कृत्वा सिध्दा वर्ति: स्नेहोपलिप्य गुदे चत्वार: अंगुला: प्रवेशयितव्या ।

४) विसूचिकोपक्रम:–

– आमपचनार्थं लंघनमेव करणीयम् ।

– न अन्या कापि चिकित्सा करणीया ।

– वमनविरेचनोत्तरं सम्यक लंघनं जातम् इति दृष्ट्वा पेयादिक्रमेण संसर्जनक्रम कार्य: ।

यदुक्तं – वमितश्च विरिक्तश्च मन्दाग्निश्च विलंघित: ।

अग्निप्राणविवृद्ध्यर्थं क्रमं पेयादिमाचरेत् ।।

५) आमप्रदोषे विसूचिकालसके अजीर्णव्याध्याम् लंघनेन अन्नकालस्य उत्पत्योत्तरं औषधिचिकित्सा करणीया इति मुख्याधिकरणमस्ति ।

जीर्णाहार: नाम पूर्वसेवितं भोजनं पूर्णत: जीर्णम् /परिवमितम् । परं अस्मिन् स्थाने उपरोक्तम् विचारं न दृष्ट्वा वमनादिभि: निर्हरणानंतरमपि यद् किंचित् आमदोष: अन्नम् अवशिष्टं तस्य जीर्णता अपेक्षिता ।

एतादृश: जीर्णाहार: औषधपानस्य प्रयोजनम् । अत्र ऊहय– संभवप्रयोजनतन्त्रयुक्तीनां उपयोग: कृत: अस्ति ।

६) आमाशयस्य अंतर्भागे क्लिन्नतावर्धनेन स्तिमित – गुरुकोष्ठं नाम आमाशये आर्द्रं वस्त्रं परिवेष्टितम् इति भाति । एतद् लक्षणं महत्वपूर्णम् ।

अस्य लक्षणस्य नाश: चिकित्सया अभिप्रेत: ।

७) अजीर्णावस्थायां यद् अग्रिमं खाद्यं (अन्नम् औषधं वा) सेवेत तस्यापि अजीर्णमेव भवति । अत: अस्यामवस्थायां दीपकं पाचकमपि औषधं न देयम् ।

८) तीव्ररुजा स्यादपि अजीर्णावस्थायां शूलघ्नम् औषधं न देयम् । आमावृताग्नि: इति दोष: औषधाहारान् जीर्णयितुम् असमर्थ: भवति ।

९) विनौषधं कथं व्याधिनिवृत्ति: स्यात् ? अस्य प्रश्नस्य उत्तरम् –

'आमप्रदोषे अपतर्पणम् (लंघनम्) एष एव उपक्रम:'

१०)

| व्याधिकारणम् | चिकित्सा |
|---|---|
| दोष:–केवलं समवायिकारणम् उदा.(नानात्मजविकार:) | हेतुविपरीता |
| असमवायि / निमित्तकारणम् | व्याधिविपरीता |
| दोषसमवायि + निमित्तकारणम् | उभयविपरीता |

शेषम् – अवशिष्टा टीका शब्दार्थबोधका

निष्कर्ष: – अस्य सूत्रस्य/अधिकरणस्य विवेचने गङ्गाधरेण स्थानद्वये वैधर्म्यं वर्णितम् । तत्संबंधिनं विवेचनं अध्यायान्ते विमर्शं क्रियेत ।

– टीकाकारै: विविधां विशेषा: विचारा: वर्णिता: तस्य ऊहापोह: अत्र कृत: अस्ति ।

चरकः – सूत्रम् १४

– आहारविधिनां अष्टौ आयतनानां तथा अन्यग्रन्थोक्तानां हितोपयोगानां उपायानां सम्यक् परीक्ष्य आत्महितार्थं भजेत् ।

चक्रपाणिः –

१) अनुक्तविधेः वर्णनम् ।

२) ग्रहणी अतिसारादौ अध्याये आमदोषस्य यः क्षयकरः चिकित्सारुपी मार्गः कथितः अस्ति तदपि अस्मिन् अधिकरणे उपयुक्तम् ।

गङ्गाधर – अविशेषः ।

योगीन्द्रनाथसेनः – अविशेषः ।

ज्योतिषचन्द्रसरस्वतिः – १) व्याधेः अनुत्पात्यर्थं स्वस्थविध्यनुसारं सूत्रं वर्णितम्

२) हितोपयोगे यः अन्य कोऽपि विहारादिः मार्गः स्यात् तस्यापि योजना करणीया ।

निष्कर्षः – वैधर्म्यं नास्ति ।

उपाधिकरणम् ऊ) आमाशयवर्णनं प्रमाणं च सूत्राणि १५ तः १८

चरकः – शिष्यानां प्रश्नः – चतुर्विधाहारस्य पचनं कुत्र भवति ?

आत्रेयस्य उत्तरम् – नाभिस्तनयोर्मध्ये आमाशयमस्ति । तत्र आहारस्य पचनं भवति ।

आमाशये परिपक्वभूतः आहारः धमनीमार्गेण संपूर्णे शरीरे प्रसरति ।

चक्रपाणिः –

– चक्रपाणिना अस्मिन् सूत्रे भिन्नः पाठः स्वीकृतः । चरकेण सूत्रे 'सर्वाशयम्' इति पाठः कथितः । अपि तु चक्रपाणिना 'सर्वाश्रयम्' इति पाठः गृहीतः । सर्वाश्रयं इत्यस्य अर्थः सर्वशरीरम् इति भवति ।

– आमाशयस्य प्रमाणं नाम निश्चितम् अवस्थानम् वा स्थितिः वा एतत् कथितुं सूत्रमिदं वर्णितम् अस्ति ।

गङ्गाधर –

– गङ्गाधरेण ‘सर्वाशयम् ’ इत्येव पाठः गृहीतः ।

– आहारस्य पाकस्थानस्य च वर्णनम् ।

– धमनी पदं स्त्रोतसवाचकम् अस्ति ।

आमाशयगतः आहारः

↓ पचनस्य आरंभः

पच्यमानाशये पूर्णम् आहारपचनसमाप्तिः ।

↓

पक्काशये पक्काहारेण भागतः सारभागस्य पृथक् भावः ।

↓

यः सारभूतः रसाख्यः द्रवरूपः भागः अस्ति सः रसादिवह धमनीभिः । स्त्रोतोभिः सर्वाशये (रसरक्तादिषु धात्वाशयेषु) प्रापयन्ते ।

योगीन्द्रनाथ सेनः

– स्तनादधः नाभेरूपरि आमाशयः । नाभेरधस्तात् गुदस्य चोपरिष्टात् पक्काशयः ।

– आमाशये चतुर्विधस्य आहारस्य पचनं भवति

– धमनी इति स्त्रोतसम् । सर्वाशयम् सर्वशरीरम् ।

ज्योतिषचन्द्र सरस्वतिः –

– अशितं नाम चूषणेन गलाधः कृतमन्नम् । अशितं नाम उपयोगेन चूषणोत्तरं गलाधः कृतमन्नम् ।

– खादितं तु दन्तव्यापारनिष्पन्नम् ।खादितं नाम दन्तानाम् उपयोगेन चर्वणोत्तरं गलाधः कृतमन्नम् ।

–कोष्ठम् आमाशयपक्काशयरूपम् । तस्मिन् आमाशये एव आहारः पूर्णरूपेण परिपालितः अन्नरसरूपेण सर्वशरीरे धमन्या नीयते ।

– अत्र ‘पाक’ शब्दः पूर्णः परिणामः इत्यर्थेन अस्ति । केवलं अग्निसंयोगेन रुपान्तरं इति सीमितः अर्थः नास्ति । अतः आमाशय संज्ञा प्रकृतिगता अस्ति ।

– आकृतिगता संज्ञा – आमाशयतः प्रारभ्य आक्षुद्रान्त्रम् । अस्मिन् पक्काशयमपि भवति ।आमाशयः महास्त्रोतस्थः स्थूलतमः अंशः अतः महास्त्रोतसम् आमाशयम् इत्यपि नैकवारं सम्बोध्यते ।

महास्रोतसे आमाशय इति पर्यायवाचक शब्द: प्रयुज्यते । तथापि अस्मिन् सूत्रे आमाशयपदेन आमाशयत: आक्षुद्रान्त्रम् इति प्रकृतिगता संज्ञा अभिप्रेता अस्ति ।

– यत् संपूर्ण पचनं भूत्वा धमन्या आहाररस: शरीरे प्रापित: भवति इति स्पष्टं वचनम् । अत्र 'संपूर्णं पचनं' इति महत्वपूर्णं पदम् ।

– ज्योतिषचन्द्रसरस्वतीना स्वकृत: शारीरविनिश्चय: ग्रंथ: उल्लिखित: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरण ३

## उपसंहार:

चरक: – अस्मिन् अध्याये अधोल्लिखिता: घटकविषया: वर्णिता: सन्ति ।

अ)मात्रावत् आहारस्यलक्षणं फलं च ।

आ)अमात्रावत् आहारस्य लक्षणं फलं च ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अध्यायार्थम् संग्रहश्लोक: ।

योगीन्द्रनाथसेन: – अध्यायार्थम् संग्रहश्लोक: ।

ज्योतिषचन्द्र सरस्वति: – अध्यायार्थं निवेद्य समापयन् श्लोक: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## तृतीय: अध्याय:

## जनपदोद्ध्वंसनीयम् विमानम्

– त्रिविधकुक्षीयं विमानम् इति द्वितीय अध्यायानन्तरं तथा रोगानीकं विमानम् इति चतुर्थं अध्यायस्य पूर्वं वर्णितम् ।

– अस्मिन् अध्याये अधोक्तानां प्रकरणाधिकरणानाम् अनुषंगेण वर्णनम् अस्ति ।

१) जनपदोद्ध्वंस:

अ) उद्देश:

आ) पूर्वरुपम्

इ) हेतु: सलक्षणानि

ई ) भेषजानि

उ ) हेतूनां मूलम् ।

२) प्राग्विकारसमुत्पत्ति: आयुष: क्षयक्रम: ।

३) काल: – अकालमरणम्

अ) भूतानां मरणं प्रति कालाकालविनिश्चय: ।

आ) भूतानां कालाकालमरणम् ।

४) ज्वरागत: मिथ्योपचारस्य संशय: ।

५) चिकित्सा सिद्धान्त:

अ) शीतोष्णसमुत्थज्वरप्रतिकार: ।

आ) निदानविपरीत भेषजम् ।

इ) अपतर्पणम् ।

६) अचिकित्स्य: रुग्ण: ।

७) चिकित्सककर्तव्यम् ।

८) देशलक्षणम् ।

९) अध्यायोपसंहार: ।

# प्रथमम् अधिकरणम् ।

## जनपदोद्ध्वंस:

सूत्राणि १ त: २३ – अस्मिन् अधिकरणे अधोल्लिखितानां उपाधिकरणानां समावेश: अस्ति ।

अ) उद्देश: / भूमिका

आ) पूर्वरुपम्

इ) हेतूनां लक्षणम्

ई) भेषजम्

उ) हेतूनां मूलम् ।

### अ) उद्देश: / भूमिका

चरक: – जनपदोद्ध्वंसनीय अध्यायस्य व्याख्यानम् ।

– पञ्चालक्षेत्रस्य जनपद्मण्डले द्विजातिवर्गै: विशोभिते काम्पिल्य नाम्न: राजधान्यां ग्रीष्मऋतो: अन्तिमे मासे गंगातीरे वने विचरन् अन्तेवासिगणै: परिवृत: भगवान् आत्रेय: अग्निवेशम् उवाच ।

चक्रपाणि:

– व्याधिजनक हेतु: द्विविध: अस्ति । – साधारण:

– असाधारण:

– असाधारण: प्रतिपुरुषनियत: अस्ति । साधारण: बहुजननियत: अस्ति ।

– प्रतिपुरुषनियतानां वातादिजनकानाम् आहारादीनाम् असाधारणहेतुनां वर्णनानन्तरं वातजलदेश कालरुपिण: बहुजनसाधारणानां साधारणव्याधिजनकहेतूनां वर्णनं कर्तूं अस्य अध्यायस्य प्रपंच: अस्ति ।

– जनपदानां निवासस्थानम् उपलक्षितमण्डलं जनपदमंडलम् इति उच्यते । पञ्चालक्षेत्रमस्ति तस्य विशेषणम् । अस्यार्थ: एष: विमर्श: पञ्चालक्षेत्रं नाम्नि जनपदमंडले घटिता ।

– महाजना: (श्रेष्टा: पुरुषा:) अस्मिन् देशे वसन्ति तत्रापि अधर्मात् जनपदोद्ध्वंस: शक्य: एतद् दर्शयितुं ‘ द्विजातिवराध्युषते ’ इति विशेषणम् उपयोजितम् ।

– पश्चिमे घर्ममासे – ग्रीष्म ऋतो: अंतिम: मास: इति ‘ज्येष्ठ: मास:’

गङ्गाधर:

– विभिन्नप्रकृत्यादीनां विभिन्नरूपिणां व्याधिनां क्रियावर्धनार्थं रसविमानं त्रिविधकुक्षीयं च एतयो: अध्याययो: वर्णनं कृतम्

–तदनंतरं विभिन्नप्रकृत्यादिस्वरूपाणां जनपदानाम् उद्ध्वंसं कुर्वन् एकविधविकारस्य क्रियाविधानाय तथा तेषां दोषभेषजादिमानविज्ञानार्थंम् अस्य अध्यायस्य वर्णनम् अस्ति ।

– जनपदानां जनसमूहानाम् उद्ध्वंसनम् अधिकृत्य कृतं विमानं तं तथा ।

– विमीयते अनेन इति विमानम् ।

– अन्तेवासिगण: नाम शिष्यगण: ।

योगीन्द्रनाथ सेन: –

– अहिताहाररूपि प्रतिपुरुषनियतं व्याधीनां हेतुवर्णनानन्तरम् अधुना एतस्मिन् अध्याये वाय्वादीनां व्यापदानां लक्षणरुपिणांसर्वजनसाधारणानां रोगकारणानां उपदेश: कृत: ।

– जनपदस्य उद्ध्वंसनम् इति विनाश: ।

– अध्युषिते इति अधिष्ठते ।

– अन्तेवासिन: इति शिष्या: ।

– घर्म: नाम ग्रीष्म: । तस्य वैशाखज्येष्ठौ इति मासौ स्त: । तस्मिन् पश्चिममास नाम ज्येष्ठ: मास: अस्ति । ‘ विचार: ’ इति पदं ‘देश’ अर्थेन उपयोजितम् । वनविचारम् इति वनप्रदेशम् ।

ज्योतिषचन्द्र सरस्वति: –

–सर्वा: व्याधय: प्रतिपुरुषानुसारं तस्य आहारविहाराणां नियमानाम् उल्लंघनेन एव भवति इति न ।

– काश्चित व्याधय: युगपत् येषां प्रकृति: न समाना एतादृशा: सर्वे मानवा: यद्यपि नियमानाम् उल्लघनं न कुर्वन्ति तथापि बाधन्ते ।

– अस्मिन् कश्चित् असाधारण: हेतु: अस्ति अत: एष: अध्याय: वर्णित: ।

– जनपदोद्ध्वसं: नाम अगणितानां मानवानां मृत्यु: ।

– मरक: इति जनपदोद्ध्वंसस्य पर्याय: ।

– शिष्यप्रश्नक्रमस्य विर्मशनात् पूर्वं एतद्सम्बधी इतिहास: वर्णित: ।

– पञ्चालक्षेत्रं नाम यत्र पाञ्चालानां निवास: ईदृश: प्रदेश: ।

– जनपदमण्डलं पाञ्चालक्षेत्रे बहुसंख्यानां लोकानां निवास: अस्ति एतादृशा: प्रदेशस्य एक: अंश: ।

– धार्मिका: व्यक्तय: निवसन्त्य: अपि यत्र अधर्मप्राबल्याद् मरक: उत्पद्यते ।

– अन्तेवासिन: इति शिष्या: ।

– घर्मस्य पश्चिम: मास: इति ज्येष्ठ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

आ) पूर्वरुपम् – सूत्रम् ४

चरक: – आत्रेय उवाच – नक्षत्रादय: भावा: अप्रकृतिभूता: दृश्यन्ते ।

– ऋतुणाम् अपि भावा: वैकारिका: दृश्यन्ते । तस्मात् भूमि: अपि योग्यरसवीर्यादिभि: युक्ता: औषध्य: न उत्पत्स्यते । येन रोगाणां बाहुल्यं भविष्यति । अत: हे सौम्य । विनाशात् पूर्वं भूमे: विरसभावत्वात् पूर्वं भेषज्यानां रसवीर्यादीनां उपहननात् पूर्वं च औषध्य: उत्पाटितव्या: ।

– उत्तमै: रसवीर्यै: युक्तानाम् औषधीनाम् उपयोग: वयं तेभ्य: कुर्म: येभ्य: अस्मात् चिकित्सा अपेक्षिता अथवा येषां चिकित्सा अस्माभि: स्वयं करणीया इति अपेक्षितम् ।

– एवं उत्पाटिता औषधी जनपदोद्ध्वंसकराणां विकाराणां अल्पमात्रया किं न वा प्रतिकारगौरवं कर्तुं शक्नुयात् ।

चक्रपाणि: –

– ऋतुवैकारिका: भावा:

१) ऋतुविकाराय भूता ऋतुवैकारिका: भावा: ।

२) ऋतु अननुरुपा ऋतुवैकारिका: भावा: ।

एवं प्रकारद्वयेन अर्थं ज्ञातुं शक्यते ।

– ऋतुविकाराय भूता – ऋतुजन्यविकारान् उत्पद्यमान: भाव: असौ ऋतुवैकारिक: । अत्र ऋतुविकारा: उपलक्षणमात्रा: सन्ति । तद् समानमेव जलदेशवायुजन्या: विकारा: सन्ति ते अपि समावेशितव्य: ।

– ऋतु – अननुरुपा – ऋतुनां प्राकृतलक्षणापेक्षया भिन्ना विकृतनक्षत्रादीनां स्थिति: ।

उदाहरणार्थम् – ग्रीष्मे प्राकृततः नक्षत्राणि निर्मलानि सन्ति । तन्मध्ये एतानि नक्षत्राणि यदि तुषाराच्छन्नानि स्युः तर्हि विकृतभावाः (लक्षणानि) मन्तव्याः ।

– 'उद्धरध्वम्' इति बहुवचनं योजितं यतः बहुसंख्यान् शिष्यान् उद्दिश्य एष आदेशः अस्ति ।

– यद्यपि अग्निवेशं सम्बुध्य एतद् कार्यं कथितं तथापि सर्वेभ्यः अभिप्रेतम् अस्ति । तेषु शिष्यगणेषु अग्निवेशः प्रधानः अस्ति तस्मात् यद्यपि सः 'सौम्य' इति सम्बोधितः तथापि एतद् कार्यं सर्वेभ्यः अपि अभिप्रेतम् ।

नियमः – समुदायं सम्पादनयोग्ये कार्ये प्रचोदनाय तत्रस्थं प्रधानां व्यक्तिं सम्बुध्य बहुवचनस्श प्रयोगः भवति । उदा – सेनापते युध्यध्वम् । सेनापते युध्यध्वं नाम सेनापतेः प्राधान्येन सह सर्वेः सैन्यैः योद्धव्यम् ।

– वैद्यरुग्णयोः परस्परं अनुकाङ्क्षता आत्रेयस्य आप्तत्वं च ।

– ये वैद्यात् चिकित्साम् अभिलषन्ति ते वैद्यप्रियत्वात् साध्यरुग्णाः सन्ति । यतः वैद्यद्वेष्टा रुग्णः असाध्याः मन्यते ।

– तथैव वैद्यः यं रुग्णं चिकित्सां दातुम् इच्छति सः रुग्णः अपि साध्यः मन्तव्यः । यतः असाध्यरुग्णस्य चिकित्सां कृत्वा वैद्यः अपयशः प्राप्तुं नेच्छति ।

–तथैव येषां रोगाः भेषजसाध्यः अस्ति तेभ्यः रसावीर्यादिभिः युक्ताः औषध्यःयुक्तिपूर्वकम् उपयोजितव्याः । यदि उपरितनस्य वाक्यस्य अर्थः एवं गृहितः – ''ये जनाः वैद्यम् अनुसरन्ति तथा यदि आवश्यकता अस्ति चेत् येषां कृते वैद्यः चिकित्सायै अनुकूलः भवति तेभ्यः एव उत्तमभेषजस्य उपयोगः करणीयः'' ।

– यदि उपरितनस्य वाक्यस्य अर्थः एवं गृहितः तर्हि आत्रेयपुनर्वसोः आप्तत्वं न प्रकटीभविष्यति । यतः अनेन अर्थेन तेषां पक्षविशेषे अनुरागः प्रकटीभवति । अतः अपरः अर्थः अयोग्यः ।

– 'चिकित्सास्थाने पञ्चमअध्यायस्थेन सर्वप्रजानां पितृवत् शरण्यः' । अनेन वचनेन आत्रेयस्य नीरागत्वं (निःपक्षपातः) सिद्धः ।

गङ्गाधरः – ऋतुवैकारिकभावः = ग्रीष्मऋतुवैपरीत्यम् ।

– घर्मऋतौः (ग्रीष्मस्य) पश्चिमे मासे गङ्गानद्याः तटे एषा चर्चा घटिता अस्ति ।

– तेन ‘ऋतुर्वैकारिकभावा:’ दृष्यन्ते इत्यस्य आत्रेयवचनस्य अर्थ: तस्मिन् समये वर्तमानेषु ग्रीष्मऋतो: लक्षणेषु वैकृतत्वं दृश्यते इति श्रवति ।

– वैद्यानां प्रजाहिततत्वं ख्यापितम् ।

– प्रतीकारगौरव: – प्रतीकारभेषजबाहुल्योपयोगकर्तव्यता ।

– शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन:

– सुश्रुतेन अपि मरकप्रादुर्भावहेतुषु औषधीनां व्यापत्तौ ऋतुविकारा: कारणस्वरुपा: मानिता: ।

(सं.– सु. सू. ६)

– शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:

–गुरूवाक्यस्वरूपि सूत्रम् – यस्य ऋतो: ये प्राकृतभावा: सन्ति तेषां विरुध्दभावानाम् उत्पत्ति: तस्मिन् ऋतौ भवनम् इति ऋतुवैकारिका: भावा: सन्ति ।

–जनपदोद्ध्वंसात् प्राक् औषधीनाम् उत्पाटनं क्रियेत चेत् तर्हि ता: औषध्य: व्याधीनां प्रतिकारस्थं गौरवं न्यूनं कर्तुं शक्नुयु: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

इ) हेतु – लक्षणम् सूत्रम् – ५

चरक: – आत्रेयस्य एतद् वचनं श्रुत्वा अग्निवेश: अवदत् ‘‘भगवन् औषध्य: उद्धृता: सन्ति । सम्यक् विहिता: अवचारिता: च अपि सन्ति ।

परम् असमानप्रकृतिआहारदेहबलसात्म्यसत्ववयोभि: युक्तेषु मनुष्येषु युगपत् जनपदोद्ध्वंसरुपिणी एका एव व्याधि: कस्मात् सम्भवति ।

चक्रपाणि:

– नियम: – नैकवारं वर्तमानं वचनं अतीतकालसमानं प्रयोगेण उपयुज्यते । अभूते वचनं भूतवत् चेति प्रयोगात् बोद्धव्यम् । उदा – शीघ्रं कार्यं ‘कृतम्’ इति उच्यते ।

– इति नियमानुसारं ‘भेषजानि उद्धृतानि विहितानि’ इति वाक्यप्रयोग: कृत: ।

– एका व्याधि: इत्यर्थ: एकजाते: व्याधि: ।

– प्रकृत्यादिषु भावेषु समानकारणस्य अभावात् तुल्यरुपा व्याधि: उत्पद्यते ।

गङ्गाधर: –

– भेषजम् उद्धृतं इति वचनेन अग्निवेश: आत्मानं बोधयति ।

– अस्मिन् वाक्ये अस्माभि: इति शेष: अस्ति ।

योगीन्द्रनाथ सेन: – अविशेषा टीका

ज्योतिषचन्द्र सरस्वति:

– शिष्यै: गुरूणाम् अनुशासनं (आदेशं) सम्पाद्य वनस्पत्य: उद्धृता: तथा जनपदोद्ध्वंसकर व्याधीनां निदानादिषु स्वसंशय: पृष्ट: ।

– 'अपि' इति पदं प्रश्नार्थकं योजितम् ।

– विभिन्नं आचरत्सु मानवेषु प्रकृत्यादीनां पार्थक्यं सद् अपि समानस्वरुपाया: व्याधे: प्रादुर्भाव: दृश्यते । कथम् एतद्?

निष्कर्ष: – वैधर्म्यं नास्ति ।

सूत्रम् ६

चरक: – अग्निवेशस्य इमं प्रश्नं आत्रेय: प्रत्युवाच – एवं प्रकृत्यादिषु भावेषु भिन्नता सति अपि मनुष्येषु ये अन्या: समानभावा: सन्ति तत्रस्थवैगुण्यात् समानकाले समानलक्षणानां व्याधय: प्रादुर्भूय जनपदोद्ध्वसं कुर्वन्ति ।

– ते जनपदेषु सामान्या: सन्त: भावा: नाम – वायु:, उदकम्, देश: काल: च

चक्रपाणि: – समानलिङ्गं नाम तुल्यलिङ्गम् ।

गङ्गाधर: – वायु: नाम बहिश्चर: वायु: । अत्र दोषस्वरुपी शारीरवायु: न अभिप्रेत: ।

– शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन: – आत्रेय: प्रतिवचनं कृतवान् । शब्दार्थस्वरुपिणी टीका ।

ज्योतिषचन्द्र सरस्वति: – समानकाला: एकदा एव आगता: । शेषा टीका अविशेषा ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## उप–अधिकरणम् – हेतूनां वैगुण्यम्

चरक: सूत्रम् – ७– वायुजलदेशकालानां वैगुणस्य वर्णनम् ।

१) वायुवैगुण्यम् – अनारोग्यकर: वायु: –

| | | | |
|---|---|---|---|
| ऋतुविषमम् | अतिस्तिमितम् | अतिकुण्डलिनम् | असात्म्यगंधोपहतम् |
| अतिचलम् | अतिपरुषम् | बाष्पयुक्तम् | सिकतायुक्तम् |
| अतिशीतम् | अत्युष्णम् | पांशुयुक्तम् | धूमोपहतम् |
| अतिरुक्षम् | अत्यभिष्यन्दिनम् | अतिभैरवारावम् | अतिप्रतिहतपरस्परगतिम् |

चक्रपाणि: – यथर्तुविषम: नाम ऋतो: विपरीत लक्षणानाम् ।

गंगाधर: – अतिस्मिमितम् इत्यस्य अर्थ: अति आर्द्रता ।

– अतिशीतं वा अत्युष्णं इति विकल्प: गृहीत: स्यात् ।

– बहिर्द्रवाभिसरणेन वायो: अत्यभिष्यन्दि इति लक्षणं ज्ञातव्यम् ।

– अतिभैरवारावम् – झञ्झातरूपत्वम् ।

– शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन: – ऋतुविषम: नाम ऋतुविपरीत: इति ।

– स्तिमित: इत्यस्य अर्थ: अवेगवान् ।

– अत्यभिष्यन्दिनम् इति दोषधातुमलस्त्रोतसां अतिक्लेदजननम् ।

– अतिभैरवारावं अतिभीषणशब्दम् ।

– कुण्डलि: आवर्तवान् ।

– अष्टांगसंग्रहे नवम सूत्रस्थाने वर्णितस्य विगुणवायो: लक्षणम् उद्धृतम् ।

ज्योतिषचन्द्र सरस्वति: –

– ऋतुविषम – यस्मिन् ऋतौ यस्या: दिशाया: वायुप्रवाह: अस्ति तस्य विपरीतं भवनम् अथवा ऋतुनुसारं शीतोष्णत्वे वैपरित्यं भवनम् ।

– स्तिमितम् मन्दम् । अत्यभिष्यन्दिनम् अतिवर्धितवेगम् ।

– अतिभैरवारावम् – अतिभयंकरशब्दविशिष्टम् ।

– बाष्पोपहतम् – अकालिक कुञ्झटिकावृतम् ।

– पांशु उपहतम् – धूलिकणासमाच्छन्नम् ।

– सिकतोपहम् – वालुकापूर्णम् ।

निष्कर्ष: – 'अत्यतम्भिष्यन्दिनम् ' इति पदस्य व्याख्यायां वैधर्म्यम् अस्ति ।

२) उदकवैगुण्यम्

अत्यर्थविकृतगन्धम्     क्लेदबहुलम्     अत्यर्थविकृतरसम्

अत्यर्थविकृतवर्णम्     अपक्रान्तजलचरविहङ्गम्     उपक्षीणजलेशयम्

अत्यर्थविकृतस्पर्शम्     अप्रीतिकरम्

चक्रपाणि:

– ईदृशं जलम् अपगतगुणं भवति नाम जलस्य जीवनं पिपासाहरम् इत्यादय: गुणा: नश्यन्ति ।

गंगाधर: – उपक्षीणजलाशय: प्राय: शुष्काल्पजलाशय: ।

योगीन्द्रनाथ सेन: –

– उपक्षीणजलाशय: इति उपक्षीणा: जलचरा: प्राणिन: मत्स्यादय: यस्य तत् ।

– अस्य उपक्षीणजलाशय: इति अपि पाठ: अस्ति ।

– अष्टांगसंग्रहे नवम सूत्रस्थानस्थ: संदर्भ: उद्धृत: अस्ति ।

ज्योतिषचन्द्र सरस्वति: –

– क्लेदबहुलम् – वार्षिकनादेयसलिलवत् ।

– उपक्षयजलेशयम् – स्वल्पमत्स्यादिकम् ।

निष्कर्ष: – उपक्षीणजलेशय: उपक्षीणजलाशय: इति पाठभेद: तथा तस्मिन् वैधर्म्यम् अस्ति ।

३) देशवैगुण्यलक्षणम्

चरक:

प्रकृतिविकृतवर्णगन्धरसस्पर्श:     क्लेदबहुलम्

उपसृष्टसरीसृपादि     तृणोनूपोपवनवन्तम्

प्रतानादिबहुलम्     अपूर्वपद् अवपतितशुष्कनष्टशयम्

धूम्रपवनम्  प्रध्मातपतत्रिगणम्

उत्कृष्टाश्वगणम्  उद्भ्रान्तव्यथितविविधमृगपक्षिसङ्घम् ।

उत्सृष्टनष्टधर्मसत्यलज्ञाचारुशीलगुणजनपदम्  शश्वत्क्षुभितोदीर्णसलिलाशयम् ।

प्रततोल्कापातनिर्घातभूमिकम्पम्  अतिभयारावरूपम् ।

रुक्षताम्रारुणसिताभ्रजालसंवृतार्कचन्द्रतारकम् अभिक्ष्णम्

ससंभ्रमोद्वेगमिव सत्रासरुदितमिव सतमस्कमिव गुह्यकाचरितमिवाक्रान्दितशब्दबहुलम्

चक्रपाणि:

– श्माशानिकशकुनि इति गृध्र: ।

– अपूर्ववत् इत्यस्य अर्थ: ज्ञातम् अपि हेतुभि: उपहत: सन् पूर्वं न दृष्टम् इति भास: ।

– यत्र धर्मादिभावा: त्यक्ता: ईदृश: देश: अहितकर: । अस्मिन् ये जना: धर्मादिभि: पूर्वं युक्ता: ते तान् धर्मसत्यादिभावान् त्यक्तवन्त: । तथा ये जना: अज्ञानात् धर्मादीनाम् आचरणं न कुर्वन्ति स्म तेषां कृते धर्मसत्यादि भावा: नश्यन्ति ।

गङ्गाधर: –

– उपसृष्टम् इति पदस्य अत्रस्थ: अर्थ: 'उपसर्गं भवति' एवमस्ति ।

– तृण इति दूर्वादिकम् ।

– उलूपम् इति उलूकम् उलूय इति ख्यातम् । शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन: –

– उलूपम् उलू इति वङ्गेषु ख्यातम् ।  – प्रतान: शाखाप्रचय: ।

– पतत्रिगण: पक्षिगण: ।  – उत्कृष्ट: उच्चै: शब्दं कुर्वन् ।

ज्योतिषचन्द्र सरस्वति:

– आनूपादिभेदेन देशेवर्णादीनां या प्राकृतावस्था अस्ति सा विकृता भवति ।

– उपसृष्टम् इति अधिक्येन युक्तम् ।

– शलभा: पतंगा: सस्यभक्षका: 'पंगपाल' इति लोके । उलूपा दर्भजातय: । शेषा टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

४) कालस्य वैगुण्यलक्षणम् –

चरक: – यथर्तुलिङ्गात् विपरीतलिङ्गम्

यथर्तुलिङ्गात् अतिलिङ्गम्

यथर्तुलिङ्गात् हीनलिङ्गम्    एतत् अहितं विद्यात् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

चरक: – एवं दोषै: युक्ता: ईदृशा: चत्वार: जनपदोद्ध्वंसकरा: भावा: सन्ति । यदि ते स्वाभाविकायाम् अवस्थायां स्यु: तर्हि ते हितकरा: सन्ति ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अविशेष: ।

योगीन्द्रनाथ सेन: – शद्बार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति:ज्यो. स. – शद्बार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

ई) भेषजम्– सूत्रम् ८ – १८

एतस्मिन् अधोक्तेषु प्रकरणेषु वर्णितम् ।

१) जनपदोद्ध्वंससम्बन्धिन: भेषजसिध्दान्त: ।

२) चतुर्भावानां सोपपत्तिका प्रधानता तथा लाघवत्वम् ।

३) सामान्यं भेषजम् ।

४) भेषजविवेचनम् । एतेषां उप–प्रकरणानाम्आधारेण वर्णयाम ।

१) जनपदोद्ध्वंससम्बन्धिन: भेषजसिध्दान्त: ।

चरक: – विगुणभूतेषु एतेषु जनपदोद्ध्वंसकरेषु चतुर्भाविषु उचितभेषजस्य उपयोगेन रोगभयं नश्यति

– वायुजलदेशकालेषु एतेषु चतुर्भावेषु यः बलवान् सः हेतुस्वरुपः मन्यते ।

चक्रपाणिः – दृष्टेषु वातादिषु यस्य उत्कर्षः स्यात् सः तत्स्वरुपि हेतुत्वं प्राप्नोति ।

गङ्गाधरः – जनपदोद्ध्वंसात् प्राक् भूमेः विरसभावात् प्राक् च भेषज्यम् उद्धरणीयम् । अधुना उद्ध्वंसे जाते भूमिः वैरस्यायां जातायां वनस्पतयः कार्यं कर्तुं न शक्नुवन्ति । ईदृशायाम् अवस्थायां किं करणीयम् ? इदम् अत्र विवृतम् ।

योगीन्द्रनाथ सेनः –चतुर्भावेषु विगुणीभूते पूर्वं उद्धृतानां भेषजानां उपयोगः दोषदूष्यादीनां अपेक्षया करणीयः । एतेन व्याधयः न उत्पद्यन्ते । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – ‘अपि’ इति पदं अत्र समुच्चयः इति अर्थेन योजितः ।

– हेतुमत् – हेतुना सह ।

– गरीयस्त्वम् इति श्रेष्ठत्वम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

२) चतुर्भावानां सोपपत्तिका प्रधानता तथा लाघवत्वम् ।

चरकः – वातापेक्षया जलं, जलापेक्षया देशः देशपेक्षया कालः च एते स्वभावतः दुष्परिहार्यत्वात् उत्तरोत्तरं प्रधानाः सन्ति ।

– तेन चिकित्सायाः सौकर्यायै एतेषां भावानां लाघवलक्षणानां अभ्यासः आवश्यकः अस्ति ।

चक्रपाणिः –

– स्वभावतः वातापेक्षया जलं एतेन क्रमेण एते भावाः दुष्परिहार्याः सन्ति । यदा वायुः दुष्टः स्यात् तदा निवातप्रदेशे निवासेन तस्य चिकित्सा शक्या । परं जलस्य एवं नास्ति । देहवृत्यर्थं जलप्राशनं करणीयम् एव । किन्तु महाप्रयत्नेन एतस्य दूषितजलस्य त्यागं कर्तुं शक्यते ।

– दूषितदेशः दूषितजलापेक्षया दुष्परिहारः अस्ति । यतः देशं त्यक्तवा निवासः कठिनः । तदर्थं देशं त्यक्त्वा देशान्तरगमनं एव उपायः अस्ति ।

– दूषितकालः सर्वेषु दुष्परिहार तमः अस्ति । यतः कालः सर्वेषु श्रेष्ठः ।

– यथोक्तविधिना दूषितवातादीनां त्यागः शक्यः ।

– तस्मिन् पूर्वं पूर्वं क्रमेण वायुजलदेशकालादिषु चिकित्सायै लाघवत्वम् अस्ति ।

गङ्गाधर: –

– निवातगृहे स्थित्वा दूषितवायु: परिहार्यते ।

– दुग्धादीनां प्रपुषनारिकेलोदकानां सेवनेन जीवितं संरक्ष्य दूषितजलस्य परिणामा: परिहार्यन्ते ।

– विकृतलक्षणयुक्तं देशं त्यक्त्वा प्राकृतलक्षणदेशे उषित्वा दूषितदेशनिवासस्य परिणामा: परिहार्यन्ते

– प्रथमत: 'वाताज्जलम्' इति पदे नपुंसकलिंगिन: जलशब्दस्य अन्वयानुरोधेन 'गरीयम्' इति नपुंसकलिंगी निर्देश: कृत: ।

– एतेषां चतुर्णाम् भावानाम् उत्तरोत्तरं श्रेष्ठत्वस्य वर्णनस्य प्रयोजनम् एवम् अस्ति यत् चिकित्साया: सौकर्यार्थं गुरुलाघवलक्षणम् अभ्यसनीयम् ।

– एतेषां भावानां लाघवलक्षणानुसारं चिकित्सताया: सुकरता ज्ञायते ।

योगीन्द्रनाथ सेन: – अविशेषा टीका शब्दश: चक्रपाणे: समाना वर्णिता ।

ज्योतिषचन्द्र सरस्वति: –

एतेषां चतुर्णां दूषितभावानां प्रतिकारसौकर्यम् –

– विगुणीभूते वायौ क्वचित् अग्निप्रज्वलनेन धूपगन्धकादिभि: औषधिदहनादिना तेन वायुना संशोधनं शक्यं भवति ।

– क्वथनादिकर्मभि: जलस्य चिकित्सा भवितुं शक्यते ।

– यज्ञादिकर्मभि: अथवा परित्यागेन दूषितदेशस्य परिहार: शक्य: ।

– दृष्टकालस्य प्रतिकार: असम्भव: अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

३) सामान्यं भेषजम् । –

चरक:– चतुर्भावानां दूष्यत्वानंतरमपि यदा उचितै: औषधै: चिकित्सा क्रियते तदा आतुरावस्था न उत्पद्यते । यस्मिन् मृत्युसामान्यं कर्मसामान्यं च नास्ति एतादृशेभ्य: मनुष्येभ्य: पञ्चविधं कर्म सर्वश्रेष्ठम् औषधम् अस्ति ।

चक्रपाणि: – मृत्युसामान्यम् इत्यस्य अर्थ: मृत्युजनकं दैवसामान्यम् । कर्मसामान्यम् इत्यस्य अर्थ: मृत्युजनकं / मारकं कर्मण: सामान्यम् ।

– येषां मृत्युजनकं दैवं तथा कर्म न समाने तेषां कृते पञ्चविधं कर्म भेषजम् अस्ति ।

– केषांचन जनानां समूहेन पूर्वजन्मानि ग्रामदहनादीनि कर्माणि कृता: भवन्ति । तस्य परिणामस्वरुपत: तेन कर्मबलेन ते सामूहिकं मृत्युं प्राप्नुवन्ति ।

– क्वचित् भिन्ने भिन्ने समये पृथक् मृत्युजनकानि मारकाणि कर्माणि कृतानां मनुष्याणां परिणाम: युगपद् भूतेन ते समानप्रकारेण युगपद् सामूहिकं मृत्युं गच्छन्ति ।

– 'न मृत्युसामान्यम्' इत्यस्य अर्थ: येषां मृत्यवे समानं कारणं न लभते इत्यर्थ: अरिष्टे उत्पन्ने काश्चन व्याधय: असाध्या: भवन्ति । अस्य अपर: अर्थ: 'मारकव्याधय:' कदापि न साधारणा: ।

– 'न कर्मसामान्यम्' अस्य अर्थ: क्वचित् यद्यपि अरिष्टं न उत्पन्नं तथापि नियतस्य मृत्युदायिन: (मारकस्य) कर्मण: परिणामस्वरुप: निश्चितं मृत्यु: भवति । अस्य अपर: अर्थ: एवम् अस्ति यत् मारकं व्याधिजनकं कर्म अस्ति ।

<u>गङ्गाधर:</u>

– मृत्युसामान्यम् – मृत्युजनकदैवसामान्यम् । एतद् 'मृत्युसामान्यं' कर्मसामान्यात् ज्ञायते ।

– कर्मसामान्यम् – दैवजनकं सत् असत् च कर्माणि उदाहरणार्थं पानं, अशनं, आसनं, शयनं, जागरणं, विण्मूत्रोत्सर्जनम् इत्यादीनि कर्माणि तेषां प्राकृत–विकृत विधिना तथा तेषां सद्–असद् रुपत्वात् कर्मण: च बोधनीय: ।

– कर्म पञ्चविधम् – स्नेहस्वेदपूर्वकवमनविरेचनास्थापनानुवासनशिरोविरेचनानीति पञ्चविधम् ।

<u>योगीन्द्रनाथ सेन:</u> – शब्दार्थस्य विवेचनम् । अविशेषा टीका ।

<u>ज्योतिषचन्द्र सरस्वति:</u> – यथायोग्यं भेषजस्य उपक्रमेण अपि केचन् मनुष्या: व्याधिता: भवन्ति वा मृत्युं गच्छन्ति एवं दृष्यते अस्या: शङ्काया: निरसनाय एतद् विवेचनं कृतम् ।

– येषां आयु: क्षयेन अथवा कर्मविपाकेन तथा च येषां नियतमृत्यो: अथवा ऐहिक–अमुष्मिक कर्मवशत्वात्आतुरावस्था नियता अस्ति एतादृशेभ्य: मनुष्येभ्य: भेषजव्यवस्थानशास्त्रसम्मता ।

– ईदृशान्मनुष्यान् त्यक्तवा शारीरदोषसंशोधनाय युक्तिव्यापाश्रयं वमनविरेचनादिकं पञ्चविधं कर्म प्रयोजितव्यम् ।

– मृत्युसामान्यं इति नियतमृत्युसमानता ।

– कर्मसामान्यं इति ऐहिकामुष्मिक कर्मविपाकानां सामान्यम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

४) भेषजस्य विवेचनम् –

– जनपदोद्ध्वंसस्य समये यासां व्यक्तीनां मृत्युः अनियतः अस्ति तासाम् आयुषः रक्षणार्थं अधोनिर्दिष्टाः चिकित्साउपक्रमाः करणीयाः ।

– विधिवत् रसायनोपयोगः । – पूर्वमुद्धृतैः भेषजेः देहवृत्तिः ।

– सत्यम् । – भूते दया ।

– दानम् । – बलयोः ।

– देवतार्चनम् । – सद्वृत्तस्यानुवृत्तिः ।

– प्रशमः । – आत्मनः गुप्तिः ।

– हितं जनपदानां उपसेवनम् । – शिवानां उपसेवनम् ।

– ब्रह्मचर्यस्य सेवनम् । – ब्रह्मचारिणां सेवनम् ।

– धर्मशास्त्राणां संकथा सेवनम् । – जितात्मनां महर्षीणां संकथा सेवनम् ।

– धार्मिकैः सात्विकैः वृद्धसंमतैःनित्यं सहास्या ।

चक्रपाणिः – गुप्तिः इति मन्त्रादिना रक्षा ।

– अनियतः मृत्युः नाम दुर्बलेन कर्मेण उत्पन्ना मृत्याः स्थितिः उपरोक्तचिकित्सया स्वस्था भवितुं शक्नोति ।

गङ्गाधरः – देहवृत्तिः – भोजनादिना यापनम् ।

– बलयः पूजोपहाराः ।

– प्रशमः शान्तरसाश्रयणम् ।

– आत्मनो गुप्तिः – देशान्तरगमनम् ।

– संकथा – सम्यग् व्याख्यया परस्परमालापः ।

योगीन्द्रनाथ सेनः – बलयः देवेभ्यो देयाः उपहाराः ।

– अनुवृत्तिः अनुष्ठानम् ।

– सद्वृत्तं इन्द्रियोपक्रमणीयअध्याये वर्णितम् ।

– प्रशम: मनस: इन्द्रियाणां च विषयेभ्य: विनिवृत्ति: ।

– गुप्ति: रक्षणम् ।

– आस्या इति उपवेशनम् ।

– येषां मृत्यु आयुरारम्भकं दैवं पौरुषं च एतयो: बलत्वानुसारं नियत: नास्ति तेभ्य: उपरोक्तं दैवव्यपाश्रयं औषधं पञ्चविधं कर्म च एष उपक्रम: अस्ति ।

– येषां मृत्यु: नियत: अस्ति तेषां कृते एषा चिकित्सा काऽपि न उपयोगिनी ।

ज्योतिषचन्द्र सरस्वति:

– विधिवत् शोधनकर्मोत्तरं कुटीप्रावेशादिकं रसायनविधे: सेवनं करणीयम् ।

– दैवव्यपाश्रया सत्वावजया च चिकित्सयो: वर्णनम् ।

– दया इति उपकारप्रवृत्ति: ।

– गुप्ति: रक्षाकरम् ।

– ब्रम्हचर्यम् अष्टांगमैथुनम् ।

– आस्या – एकत्रवास: ।

निष्कर्ष: – 'आत्मनो गुप्ति' अस्यां व्याख्यायां वैधर्म्यं दृश्यते ।

### उ) हेतूनां मूलम्

चरक: – अग्निवेश: आत्रेयं उवाच 'आचार्य एतेषां वायुजलदेशकालभावानां वैगुण्यस्य के हेतव:?'

– आत्रेय उवाच ''एतेषां भावानां वैगुणस्य मूलं कारणम् अस्ति अधर्म: । अधर्मस्य मूलं पूर्वकृत् असत् कर्म । तस्य कारणं प्रज्ञापराध: ।

जनपदोद्ध्वंस:
↓
चतुर्भावानां वैगुण्यम्
↓
अधर्म:
↓
पूर्वकृत् असत् कर्म
↓
प्रज्ञापराध:

प्रथम:हेतु: – अधर्म: हेतुस्वरुप: –

देशनगरनिगमजनपदानां प्रधाना: अधर्मम् आचारन्ति ।

↓

तदाश्रितानि पौरजनपदानि व्यवहारोपजीवीनि एतं अधर्मं वर्धयन्ति ।

↓

अधर्मेण धर्मलोप: भवति ।

↓

देवता: अपि तान् लोकान् त्यजन्ति ।

↓

ऋतुषु विकृति: उत्पद्यते ।

↓

वर्षाया:प्रमाणस्वरुपयो: वैगुण्यम् इत्यादि पञ्चमहाभूतेषु वैगुण्यम् ।

↓

औषध्य: स्वभावं त्यजन्ति ।

↓

स्पृश्यअभ्यवहार्यदोषाभ्यां जनपदोद्ध्वंस: भवति ।

चक्रपाणि: – अत्र अधर्म पदेन ऐहिक: अधर्म: अभिप्रेत: । शेषा टीका अविशेषा ।

गङ्गाधर: – शब्दार्थस्य विवेचनम् ।

योगीन्द्रनाथ सेन: – सुश्रुतस्य सूत्रस्थानषष्ठमस्य शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – स्पर्शदोषस्य तथा अभ्यवहार्यदोषस्य वर्णनं सुश्रुतेन कृतम् ।

– औपसर्गिक रोगाणां वर्णने सुश्रुतेन प्रसंगात् गात्रसंसर्गात् इत्यादय: हेतव: कथिता: ।

– स्पर्शदोषेण मारका व्याधि: प्रत्युत अभ्यवहार्यदोषेण विसूचिकादय: व्याधय: भवन्ति ।

– शेषा टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

द्वितीय: हेतु: – शस्त्रप्रभवज: जनपदोद्ध्वंस –

– अस्य अपि मूलम् अधर्म: अस्ति ।

| |
|---|
| अतिप्रवृद्धा: लोभक्रोधमोहमाना: |
| ↓ |
| दुर्बलानाम् अवमत्य स्वजन तथा परोपघाताय शस्त्रेण परस्परम् अभिक्रामन्ति । |
| ↓ |
| परान् वा अभिक्रामन्ति । परै: वा अभिक्राम्यन्ते । |
| ↓ |
| जनपदोद्ध्वंस: |

चक्रपाणि: – शस्त्रप्रभावेण बहुसंख्यलोकानां मृत्यु: भवति । शेषा अविशेषा ।

गङ्गाधर: – अयथावत् शस्त्रस्य उपयोगेन भवन् जनपदोद्ध्वंस: अपि अधर्ममूलज: अस्ति ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – जनपदोद्ध्वंस: चतुर्भि: प्रकारै: घटन् दृश्यते ।

– व्याधिप्रभव:

– शस्त्रप्रभव:

– भूतप्रभव:

– अभिशापप्रभव:

– अत्रस्थं व्याधिप्रभवजंवर्णनं पूर्वविवरणे आगतम् ।

– शस्त्रप्रभवजस्य अपि मूलं लोभादिस्वरुपी अधर्म: एव ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

तृतीय: हेतु: – रक्षोगणादिभि: संभव: जनपदोद्ध्वंस:

चरक: –रक्षोगणै: विविधभूतसंघातै: तेषामधर्मेन च वा अन्यै: अपचारैरपि जनपदोद्ध्वंस: भवति ।

चक्रपाणि: – रक्षोगणै: राक्षसादिभि: भवन् मनुष्यनाश: अपि अधर्मकृत: एव । शेष: अविशेष: ।

गङ्गाधर: – अविशेषा टीका ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – भूतसंघातानाम् उत्पत्ति: अपि अधर्मं विना च भवति ।

– ते अधर्मरुपिणं छिद्रं प्राप्य जनपदे / जनपदम् आक्रमन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

चतुर्थ: हेतु: – अभिशापज: जनपदोध्वस: सूत्रम् २३

चरक:

– अभिशापप्रभवाणां जनपदोद्ध्वंसानाम् अपि हेतु: अधर्म: एव ।

– धर्मं त्यक्त्वा गुरुवृद्धसिद्धपूज्यान् अवमत्य अहितं आचरन्ति एतादृशी प्रजा तेषां गुरुवृद्धादीनाम् अभिशापेन दहति । एतेन नैकानां पुरुषाणां कुलविनाश: भवति ।

– केचन नियतं कारणं प्राप्य नश्यन्ति केचित् च अनियतं कारणम् ।

चक्रपाणि:

– प्राग् एव इति झटिति । ये शापिता: तेषामेव विनाश: न सर्वेषां जनानाम् ।

गङ्गाधर: – शब्दार्थस्य विवेचनम् ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् द्वितीयम्

## प्राग्विकार समुत्पत्ति: आयुष: क्षयक्रम: च ।

चरक:

– प्रागपि अधर्मात् ऋते न अशुभोत्पत्ति: अन्यत: अभूत् ।

–कृतयुगस्य आदिकाले सर्वे मनुष्या: देवतुल्यै: तथा देवतासमानै: गुणै: युक्ता: आसन् । अमितायुषा संपन्ना: आसन् ।

तथैव सर्वे शस्य – औषधि – पृथिव्यादय: घटका: अपि तद्तद्गुणै: परिपूर्णा: आसन् ।

भ्रश्यति तु कृतयुगे

↓

अत्यादानात्

↓

सांपन्निकानां सत्वानां शरीरगौरवम् आसीत् ।

↓

तेन श्रम:

↓

आलस्यम्

↓

संचय:

↓

परिग्रह:

↓

लोभ:

↓

त्रेतायुगे → अभिद्रोह:

↓

अनृतवचनम्

↓

कामक्रोधादय: प्रवृत्ता: ।

↓

त्रेतायां धर्मपाद: अन्तर्धानम् अगमत् ।

↓

तेन युगवर्षप्रमाणस्य पादऱ्हास:

↓

पृथिव्यादे: गुणपादप्रणाश: अभूत्

↓

शस्यानां गुण पादभ्रंश:

↓

अनेन गुणपादभ्रंशेन आहारविहारेण कुपोषितं मनुष्यशरीरं अग्नि: च वायु: च एतयो: महाभूतयो:

↓

आधिक्येन युक्तम् ।

↓

ज्वरादिभि: व्याधिभि: पीडितम् ।

↓

क्रमश: प्राणिनाम् आयुष: ऱ्हासम् अभवत् ।

चक्रपाणि: – आदौ अविर्भूतानां रोगाणां हेतु: अपि अधर्म: एव ।

– यज्ञविधिविधानम् – यज्ञ यज्ञदेवता विधि: यज्ञविधायको वेद: विधानम् यज्ञकर्म ।

– जव: इति वेग: ।

– परिग्रह: इति ममता ।

– सत्ययुगे चतुर्शतानां वर्षाणां आयु: आसीत् ।

– व्यासोक्ति: – '' पुरुषा: सर्वसिद्धार्थ श्चतुर्वर्षशतायुष: ।''

– हीयमानगुणपादै: – यथा यथा त्रेता युगस्य क्षयं अभवत् तथा तथा आहारादिस्थानां गुणानां पाद: नष्टप्राय: अभवत् ।

– अधर्मयुक्तानां मनुष्याणां विहार: अपि हीनगुणस्य भवति येन शरीरं यथायोग्यं न पुष्यति ।

– उपष्टम्भ: इत्यस्य अर्थ: धातुसाम्यं कृत्वा शरीरपालवं करणीयम् ।

गङ्गाधर:

– कृतयुगस्य काल: ४८०० दिव्यवर्षाणां अस्ति ।

– अस्मिन् काले अधर्मस्य अभावात् सर्वे मनुष्या: देवसमानै: ओजादिगुणै: युक्ता: सन्ति ।

– आनृशंस्यम् इति लोकानाम् अनिन्दा ।

– परिग्रह: इति प्रतिग्रह: ।

– अस्मिन् काले अधर्माशुभे अवर्तमाने आस्ताम् ।

– कृतयुगानंतरं व्यतीते किञ्चित काले केष्वेव पुरुषेषु अत्यादानादय: अग्रिमा: अवस्था: घटिता: । न सर्वस्मिन् समाजे ।

– अभिद्रोह: इति जिघांसा ।

– त्रेतायुगे धर्मपादस्थस्य धर्मस्य चतुर्थांश: नष्ट: । इत्यर्थ: अधर्मस्य एकस्मिन् पादे प्रवर्तनं जातम्।

(अर्थापत्ति: तन्त्रयुक्ति:)

– तेन आयुष्प्रमाणे अपि पादह्रासं भूत्वा त्रेतायुगस्य कालमर्यादा ३६०० दिव्यवर्षाणि जाता ।

योगीन्द्रनाथ सेन: –

– कृतयुगे धर्म: चतुष्पाद: भवति । त्रेतायुगे पादस्य एकस्य ऱ्हासं भूत्वा स त्रिपाद: भवति ।

– परिग्रह: ममता ।

ज्योतिषचन्द्र सरस्वति:

– मानवस्य उत्पत्त्यनंतरं सत्ययुगत: अधर्मस्य उत्पत्ते: विवृत्ति: वर्णिता ।

– आदिकाले मानवोत्पत्त्यनंतरं सत्ययुगं प्रारब्धम् ।

– कृतयुगं नाम सत्ययुगम् । सत्ययुगस्य प्रथमावस्थायां अधर्मस्य लवम् अपि नासीत् । तस्य अंतिमे अंशे अधर्मः प्रादुर्भूतः ।

– सत्वम् पदम् मानवः इत्यर्थेन उपयोजितम् ।

– श्रमः स्वल्पेऽपि व्यायामे परिश्रमबोधः । आलस्यम् – सत्यपि शक्तेः कर्मविमुखता ।

– सञ्चयः उपलब्धस्य रक्षाप्रवृत्तिः ।

– परिग्रहः – अन्योपार्जितस्य ग्रहणम् । लोभः – परद्रव्यग्रहणाकांक्षा ।

– अभिद्रोहः – परान् निर्जित्य तद्द्रव्यं जिघृक्षया तद् अनिष्टचिन्तनम् । शेषः शब्दार्थः ।

निष्कर्षः – 'परिग्रह' इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

सूत्राणि २५ तः २७

चरकः –

– अनेन क्रमेण प्रत्येकस्मिन् युगे क्रमशः धर्मस्य एकैकस्य पादस्य ऱ्हासः भूतः । तथैव भूतानां गुणेषु अपि पादांशेन ऱ्हासः अभवत् ।

– क्रमशः एकैकस्य पादस्य क्षयेन लोकस्य (संसारस्य) प्रलयः भवति ।

– युगस्य शतवर्षाणां पूर्णे भूते प्राणिनाम् आयुः एकेन वर्षेण क्षीयते ।

एवं विकाराणां प्राग् उत्पत्तेः हेतुः वर्णितः ।

चक्रपाणिः –

– युगस्य कालमाने एकस्मिन् शतांशे पूर्णे प्राणिनां आयुष्मानगतं एकं वर्षं क्षीयते ।

– तेन कलियुगे मनुष्याणां आयुः शत वर्षाणि अस्ति । तस्मिन् यदा युगस्य एकशतांशः कालः पूर्णतां याति तदा ९९ वर्षाणि आयुष्मानं स्यात् एवं ज्ञातव्यम् । कलियुगे मनुष्याणां परमायुः शत वर्षाणां अस्ति ।

गंगाधरः

– गद्यविवरणस्य पुनः पद्यस्वरुपे वर्णनम् ।

– 'युगे युगे' इत्यस्य अर्थः प्रत्येकस्मिन् युगे एकैकः धर्मपादः ऱ्हासं गच्छति ।

– सत्ययुगे धर्म चतुष्पादः त्रेतायां त्रिपादः द्वापरे द्विपादः तथा कलौ एकपादः भवति ।

– क्रमेण अनेन धर्मपादस्य ऱ्हासानुसारं भूतेषु भूम्यादिषु मनुष्येषु तथा शस्यादिषु गुणपादः ऱ्हासं गच्छति ।

– एवं कलियुगस्य अंते धर्मस्य चतुष्पादानां नाशात् भूतानां गुणपादचतुष्टयम् क्षीयते । तेन प्राणिनां आयुषः निःशेषः क्षयः भवति । तस्मात् संसारस्य प्रलयः भवति ।

– यस्मिन् काले यस्मिन् युगे च युगस्य दिव्यमानं तथा मनुष्याणां नरमानं एतयोः युगस्य तथा मनुष्याणां आयुषः यद् मानं भवति तस्य तस्य युगस्य तेन तेन परिमाणेन संवत्सरगतस्य एकशतांशस्य ऱ्हासानंतरं तस्मिन् युगे जातानां मनुष्याणां आयुष्मानगतं एकं वर्षं क्षीयते ।

– एवं कलियुगे समाप्ते प्राणिनां आयुषः निःशेष परिमाणक्षयात् सर्वसंसारस्य प्रलयः भवति ।

– एवं प्रकारेण पुनः पुनः चतुर्युगाणां अन्ते सम्पूर्णसंसारस्य सर्वेषां घटकानां प्रलयः भवति ।

– केवलं शक्तिः ब्रम्ह च तिष्ठतः ।

– एषः प्रलयः कथं भवति अस्य विवरणम् –

कृतयुगस्य स्वाभाविकं मानं ४८०० दिव्यवर्षाणि अस्ति । अस्मिन् युगे धर्मः चतुर्भिः पादैः युक्तः । अस्य कालानुसारं मनुष्यस्य स्वाभाविकं आयुष्मानं ४०० वर्षाणि अस्ति ।

कृतयुगस्य ४८०० दिव्यवर्षाणां एकशतांशः नाम ४८ दिव्यवर्षाणि । अतः कृतयुगे प्रति ४८ दिव्यवर्षानन्तरं मानवायुषः एकैकं वर्षं क्षीयते । एवं कृतयुगस्य शतांशे पूर्णे भूते मानवायुः शतवर्षैः न्युनीभवति । एषा स्थितिः कृतयुगान्ते भवति ।

त्रेतायुगे धर्मस्य एकः पादः नष्टः भवति अपि च कालस्वभावेन कृतयुगस्य मानस्य पादः नष्टः भवति । येन त्रेतायुगस्य मानं ३६०० दिव्यवर्षाणि अस्ति ।

त्रेतायुगेन भूमिः जलं सस्यं महाभूतानि इत्यादिषु घटकेषु अपि गुणानां पादः क्षीणः भवति । तथैव कालक्षयपरिमाणेन मनुष्यस्य आयुः शतवर्षाणि न्यूनं भूत्वा आयुर्मानं ३०० वर्षाणां भवति ।

त्रेतायुगस्य मानस्य एकशतांशः भागः ३६ दिव्यवर्षाणि अस्ति । त्रेतायुगे प्रति ३६ दिव्यवर्ष अनन्तरं मनुष्यस्य आयुः एकैकेन वर्षेण क्षीयते । त्रेतायुगे शतांशस्य पूर्णत्वात् मनुष्यस्य आयुः शतवर्षै न्यूनीभवति ।

द्वापरयुगे २४०० दिव्यवर्षाणि इति युगमानम् अस्ति । धर्मस्य अपर: एक: पाद: नष्ट्वा द्विपदयुक्त: धर्म: अवशिष्यते च कालस्वभावेन त्रेतायुगस्य युगमाने ऱ्हास: भवति ।

द्वापरयुगे युगमानस्य एकशतांश: भाग: २४ दिव्यवर्षाणि अस्ति । तेन द्वापरयुगे प्रति २४ दिव्यवर्षानन्तरं मानवानां आयु: एकैकं वर्षेण क्षीणं भवति । एवं प्रकारेण द्वापरयुगस्य अन्ते कालक्षयपरिमाणेन मनुजस्य आयु: २०० वर्षाणि भवति ।

एतद् अनन्तरं कलियुगे धर्मस्य एक: पाद: अवशिष्यते । भूमिमहाभूतानिसस्यइत्यादिषु गुणेषु एक: एव पाद: अवशिष्यते ।

तस्मात् कालस्वभावेन कलियुगस्य मानं १२०० दिव्यवर्षाणि भवति । कलियुगस्य मानस्य एकशतांश: १२ दिव्यवर्षाणि इति भवति । तस्मात् प्रति १२ दिव्यवर्षानन्तरं कलौ मनुष्यस्य आयुष्मानं एकेन वर्षेण क्षीयते ।

कालस्वभावेन कलियुगे मानवस्य आयुष्मानं १०० वर्षाणि अस्ति । कालक्षयपरिमाणेन प्रति १२ वर्षानन्तरं एकं एवं प्रमाणेन क्रमेण क्षीत्वा कलियुगान्ते मानवस्य आयु: पूर्णतया क्षीयते । भूम्यादिघटका: अपि पूर्णतया लयन्ति । धर्मस्य चत्वार: अपि पादा: नश्यन्ति । चतुर्युगानि नश्यन्ति । एवं लोकप्रलय: भवति । अपि अग्निपुराणे अग्निना वशिष्ठाय प्रलयस्य चत्वार: कथित: ।

– चतुर्विध: प्रलय: – नित्य:

नैमित्तिक:

प्राकृत:

आत्यन्तिक:

१. नित्य: प्रलय: – य: प्रणिनां लय: ।

२. नैमित्तिक: प्रलय: – सदा विनाशी जातानां ब्राह्मो ।

– कल्पान्तप्रलय: ।

– कल्पान्ते रूपं वक्ष्ये ।

३. प्राकृत: प्रलय: – त्रिविध – महाप्रलय: निर्वाण: महानिर्वाण: च

महाप्रलयाख्य प्राकृत: प्रलय: –

– भूम्यादीनां स्वस्वप्रकृतौ लयम् ।

– प्रकृति: महान्त: च ग्रसति द्विज: ।

– व्यक्ता व्यक्ता च प्रकृति: व्यक्तस्य अव्यक्तके लय: ।

निर्वाणख्य प्राकृत: प्रलय: –

– प्रकृतिपुरुषौ परमात्मा नि विलीनौ भवत:

– सर्वेषां नाम जात्यादिकल्पना तत्र न सन्ति ।

– प्रधानक्षेत्रज्ञादि वेद विद्यान्तानां परमात्मनि शिवे लय: ।

महानिर्वाणाख्य प्राकृत: प्रलय: ।

– सत्तामात्र आत्मके अज्ञेये ज्ञानात्मनि आत्मन: परे ।

– परव्योमरुपस्य चतुष्पादब्रह्मण: चतुर्थपादगायत्री सहित: त्रिपाद: पुरुष: ईदृशस्य शिवस्य च परमात्मा सत्तामात्रात्मक: चेतनास्वरुप: परब्रह्म शक्तिस्वरुप: ईदृशे ज्ञानात्मनि लय: भवति ।

– शक्तिमात्रब्रह्मण: अवशेष: ।

४. आत्यन्तिक प्रलय: – ज्ञानात् आत्मन: परमात्मनि लय: ।

अग्निपुराणोक्त: प्रलय: –

प्राणिनां लय: – नित्यप्रलय:

↓

जातानां सदा विनाश: – ब्राह्म: नैमित्तिक: प्रलय: ।

↓

कल्पान्त:

↓

पूर्व महाभूतादि महत् तत्वान्त तत्वानि प्रकृत्यां लयं गच्छति ।

↓ – महाप्रलयाख्य: प्राकृतप्रलय:

परमात्मन: परब्रह्मस्वरुपिणि चेतनास्वरुपिणि ज्ञानात्मनि लय: ।

↓ – महानिर्वाणाख्य: प्राकृतप्रलय:

आत्यन्तिक: प्रलय: ।

विष्णुसंहितोक्त: प्रलय: – उत्तरायणम् – देवानाम् अह: । दक्षिणायनम् – देवानां रात्रि: ।

मनुष्याणां संवत्सरम् – देवानाम् अहोरात्रम् । तत् त्रिशंत: मास:

द्वादश: मास: – वर्षम्

| | |
|---|---|
| दिव्यानि द्वादशवर्षशतानि | – कलियुगम् |
| चतु: शताधिकद्विसहस्त्राणि | – द्वापरयुगम् । |
| षट्त्रिंशच्छतानि | – त्रेतायुगम् । |
| अष्टशताधिकचतु:सहस्त्राणि | – कृतयुगम् । |

चतुर्युगम् – द्वादशवर्षसहस्त्राणि दिव्यानि ।

चतुर्णां युगानां एकसप्तति: – मन्वन्तरम् ।

चतुर्युगसहस्त्र: – कल्प: । – पितामहस्य एक: अह: ।

– तावती च अस्य रात्रि: । ते च द्वे अस्य अहोरात्रे । एवं ब्रह्मण: वर्षशतमेव खल्वायु: ।

– ब्रह्मायुषा इति पौरुषो दिवस: । तस्यान्ते महाकल्प: । तावत्येव च अस्य निशा ।

पौरुषाणाम् अहोरात्राणां अतीतानां सङ्ख्यैव नास्ति न च भविष्याणां अनाद्यन्तता कालस्य एवमस्मिन् निरालम्बे काले सततयायिनि ।

– एवमेव अक्षपादगौतमेन न्यायशासने वादप्रतिवादस्वरूपे प्रलय: इति विषयस्य स्थापना कृता

योगीन्द्रनाथ सेन: – अविशेषं शब्दार्थविवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – मनुस्मृतिना उक्तं सत्ययुगमानम् ।

'चत्वार्याहु: सहस्त्राणि वर्षाणां तत् कृतं युगम् ।'

– तथैव मनुस्मृतौ चतुर्युगगतस्य मानवस्य आयुष: वर्णनं कृतम् ।

''अरोगा: सर्वसिद्धार्थाश्चतुर्वर्षशतायुष: । कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादश: ।।''

– उदयनाचार्येण अधोक्तं सूत्रं वर्णितम् ।

''जन्मसंस्कारविद्यादे: शक्ते: स्वाध्यायकर्मणो: । ऱ्हासदर्शनतो ऱ्हासं सम्प्रदायस्य मीयताम् ।।''

– प्रागुत्पत्ति: नाम प्रथम: अविर्भाव: ।

निष्कर्ष: – वैधर्म्यं नास्ति । गंगाधरस्य प्रलये विवेचनं विशेषम् अस्ति ।

## अधिकरणम् तृतीयम्

## काल अकालयो: विनिश्चय: ।

अस्मिन् अधिकरणे द्वे – उप – अधिकरणे स्त: ।

अ) भूतानां मरणं प्रति कालाकालविनिश्चय: ।

आ) भूतानां कालाकालमरणम् ।

अनेन द्वारा विषयवर्णनं पश्याम: ।

अ) भूतानां मरणं प्रति कालाकालविनिश्चय:

१) नियतानितययो: संशय: उत्तरं च । सूत्राणि २८–३६

चरक: – सूत्रे २८ – २९

अग्निवेशस्य प्रश्न: – सर्वेषां प्राणिनाम् आयु: नियतं वा अनियतम् अस्ति ?

आत्रेयस्य उत्तरम् – अस्मिन् सृष्टौ सर्वेषां भूतमात्राणाम् आयु: युक्ते: अपेक्षा अस्ति । (युक्तिपूर्वकं आयुष: निर्धारणस्य विचारं कर्तुं आवश्यकम् ।) अस्य आयुष: बलाबलत्वं दैवपौरुषयो: अवलम्बते ।

चक्रपाणि: –

– आयुष: नियतानियतत्वयो: दैवपुरुषाकारयो: योगस्य आवश्यकता अस्ति ।

– बलं च अबलं च बलाबलम् । ( द्वन्द्वसमास:)

– आयुष: नियतत्वेन बलं ज्ञेयम् ।

– आयुष: अनियतत्वेन अबलं ज्ञेयम् ।

गङ्गाधर: –

– अग्निवेशस्य आयुष: नियतत्वविषये संशय: ।

– 'इह' इति पदेन कर्मक्षेत्रं इति भूलोकस्य अभिप्रेतार्थ: गृहीतव्य: । यौक्तिक कालप्रमाणम् आयु: ।

योगीन्द्रनाथ सेन:

– नियतं निश्चितम् ।

– भूत इति प्राणी । भूतानाम् आयु: दैवपुरुषकारयो: युक्तिं योगम् अपेक्षते ।

– भूतानाम् आयुष: बलाबलं दैवे पुरुषकारे च स्थितौ ।

दैवपुरुषकारयो: बलवत्वे – आयुष: बलवत्वम् ।

दैवपुरुषकारयो: अबलत्वे – आयुष: दुर्बलत्वम् ।

ज्योतिषचन्द्र सरस्वति: – इह संसार: ।

– युक्ति: – कर्मकौशलम् ।

– कर्म च द्विविधम् – दैवं पुरुषाकार: च ।

– आयुष: बलाबलत्वं – दीर्घादीर्घत्वादिकम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) दैवं पुरुषाकाररुपि च कर्म परिभाषा ।

चरक: – दैवम् – पौर्वदैहिकम् आत्मकृतं कर्म ।

पुरुषाकार: – इह आत्मकृतं कर्म ।

– अनयो: दैवपुरुषाकारयो: बलाबलविशेष: अस्ति । अनेन बलाबलविशेषेण त्रिविधं कर्म अस्ति ।

हीनम् – मध्यमम् – उत्तमम्

– नियतानियतत्वयो: हेतु:

१)

| हेतु: | लक्षणम् |
|---|---|
| दैवपुरुषकारयो: उत्तम: योग: | दीर्घायु:<br>सुखायु:<br>नियतायु: |
| दैवपुरुषकारयो: हीन: योग: | अल्पायु:<br>दु:खायु:<br>अनियतायु: |
| दैवपुरुषकारयो: मध्यम: योग: | मध्यमायु: |

२) दैवपुरुषाकारौ परस्पराणां बलम् उपघ्नत: ।

बलवत् दैव दुर्बलं पुरुषाकारं नाशयति । बलवान् पुरुषाकार: दुर्बलं दैवं नाशयति ।

तस्मात् केचन आचार्या: आयु: नियतम् अस्ति इति मन्यन्ते ।

चक्रपाणि:

– यद्यपि पौर्वदैहिकं कर्म अस्थिरत्वात् (वर्तमाने अनुपस्थाय) निर्गच्छति तथापि तस्मात् कर्मण: उत्पनम् अदृष्टं विद्यमानं भवति । तेन तद्वारा कृतं कर्म वर्तमानस्य जन्मन: कारणं भवति ।

– बलिमंगलहोमादीनि कर्माणि अदृष्टम् उत्पाद्य कार्यकारीणि भवन्ति प्रत्युत भेषजादीनि धातुषु कार्यकारीणि भवन्ति ।

– उदार: पदं अत्र 'प्रशस्तत्वेन उत्तमम्' इति अर्थेण योजितम् ।

– दीर्घम् आयु: रसायनादिभि: शताधिकस्य कालस्य आयु: । सुखायु: –नीरोगत्वम् । नियतायु: युगनियतम् । यथा कलौ युगे शत वर्षाणि आयु: नियतम् अस्ति । अस्मिन् शतात् न्यूनं अशीति: नवति: इत्यादि आयु: अपि नियतं शब्देन योजिता भवति ।

– नियते आयुषि दैवपुरुषकारजन्यत्वं नास्ति इति भाति परंतु शतात् न्यूने नियते आयुषि अप्रशस्तं दैवं पुरुषकारं च एव कारणं भवति । नियतायुषी पुरुष: रसायनस्य अधिकारी नास्ति । यत: नियतम् आयु: सत् रसायनं निष्फलं तिष्ठति । अनियतस्य आयुष: पुरुष: एव रसायनस्य अधिकारी अस्ति । रसायनकृतम् अनियतं आयु: प्रशस्तत्वात् प्रशस्तदैवं प्रशस्तपुरुषकारजन्यं च अस्ति

– शतवर्षाणाम् आयुष्प्रमाणं युगनियतम् अस्ति । तद्पेक्षया अधिकं आयु: अनियतं अस्ति । एतादृशं शताधिकं अनियतम् आयु: महता कर्मणा निर्मातुं शक्यम् ।

– महता पुरुषाकारेण रोगं नाशयित्वा सुखायु: प्राप्तुं शक्यम् ।

– रसायनेन जराव्याधिं प्रतिहत: । परं रसायनेन प्राप्तमायु: अपि बलवता कर्मणैव नियतं भवति ।

– एतद्विपरीतं कर्म कुर्वत: मनुजस्य दीर्घायु: अनियतं रोगयुक्तं च भवति तेन असुखकरम् अस्ति

– मध्यमकर्मण: प्रभाव: –

अनियतं दीर्घम् आयु: ।

अनियतम् अदीर्घम् आयु: ।

अनियतं सुखम् आयु: ।

अनियतम् असुखम् आयु: ।

– दैवपुरुषकारौ परस्परान् बाधन्तौ कारणस्वरुपिणौ स्तः ।

– दुर्बलायुर्जननं दैवं बलवत् मारकं च एतादृशेन दृष्ट (पुरुषार्थ) अपथ्यादिना सेवनेन मरणकार्यम् उत्पादयति । तत् पौरुषं नाशयति । बलवत् दैवं दुर्बल दृष्टस्य (पुरुषकारस्य) नाशं करोति इति उक्तं चेत् सर्वाणि आयूषि नियतानि स्युः इति केषांचित् आचार्याणां मतेन ।

अस्य विषये चक्रपाणिना विश्लेषणम् –

– यदि पुरुषकारं आयुषः कारणं मन्येत चेत् तर्हि भेषजेन यथायोग्यं चिकित्सितस्य मनुजस्य मृत्युं भवितुम् न अर्हति । यतः योग्यां चिकित्सां कृते अपि कर्मवशः मृत्युः भवति ।

– यत्र चिकित्सां कृते जीवनं लभते तत्र अपि कर्म एव जीवनकारणम् अस्ति । एतत् दृष्टस्य (पुरुषकारस्य) शक्त्या एव इति तात्पर्यं प्रकट्यते ।

<u>गंगाधरः</u> –

– दैवम् – पूर्वदैहिकं पूर्वजन्मनि देहवता खलु आत्मना यत् शुभमशुभं वा कर्म कृतं तत् फलं धर्माधर्मरुपं दैवम् ।

पूर्वदेहः – पूर्वजन्मगते देहः
↓
तत्र आत्मना शुभ – अशुभ कर्म
↓
तस्य धर्म – अधर्मरुपं फलम् दैवम्

पुरुषाकारः – इह तु जन्मनि यच्च शुभमशुभं वा कर्म क्रियते तत् कर्मफलं धर्माधर्मरुपं पुरुषाकारं स्मृतम् ।

इह जन्म
↓
शुभाशुभ कर्म
↓
धर्माधर्मरुपं फलम्
↓
पुरुषाकारम्

– दैवपुरुषकारस्वरुपिणि कर्माणि सर्वे जनाः कुर्वन्ति । तर्हि सर्वेषां आयुष्प्रमाणं कथं समानं नास्ति । अस्य विवरणम् अग्रिमे सूत्रे कृतम् ।

– एतयो: शुभाशुभरुपिणो: दैवपुरुषकारयो: बलाबलविशेषम् अपि अस्ति । एतद् बलाबलं त्रिविधस्वरुपि अस्ति ।

– दैवपुरुषकारयो: योग: क: अस्ति ? इति प्रश्नस्य उत्तरम् – धर्मरुपिणो: दैवपुरुषकारयो: योग: सुखायु दीर्घायु हितायुनियतायुषां हेतु: अस्ति ।

धर्मो हि सर्वत्र शुभस्य हेतु: स्यात् । अधर्म: हि सर्वत्र नाशस्य हेतु: च ।।

– धर्मस्य स्वरुपानुसारं सर्वत्र आयुष: र्‍हास: वृद्धि: च अस्ति ।

– अस्य विपरीतं हीनं पुरुषाकारं हीनं दैवं हीनं पुण्यम् उत्तमं पापं च एतेषां योग: अल्पायु: दु:खान्वितम् आयु: अनियतम् आयु: एतेषां हेतु: अस्ति ।

– मध्यम अमध्यमयो: दैवपुरुषाकारयो: योग: मध्यमं पुण्यं मध्यमं पापं एतयो: योग: मध्यमम् आयु: अदीर्घम् अह्रस्वं नियतानियतं सुखदु:खान्वितं च एतादृशस्य आयुष: हेतु: अस्ति ।

– दैवं पुरुषाकारं पापपुण्यं च इति त्रिविधमिश्रणेन कीदृशं आयु: अस्ति ? इति शंकाया: उत्तरम्

- – दुर्बलं दैवं दुर्बलं पापं दुर्बलं पुण्यं च एतानि प्रबलपुरुषकारेण नश्यति ।
- – दुर्बलं पुण्यरुपं दैवं बलवता पापरुपेण पुरुषाकारेण नश्यति ।
- – दुर्बल पापरुपं दैवं बलवता पुण्यकारेण पुरुषाकारेण नश्यति ।

एवं दैवपुरुषाकारयो: शुभाशुभे उभये परिणामे दृश्येते ।

| पुरुष: | लक्षणम् | हेतु: |
|---|---|---|
| पापकारी पुरुष: | स्वल्पायु: दु:खायु: अनियतायु: | दुर्बलपुण्यरुपस्य दैवस्य उपघात: प्रबलपापरुपेण पुरुषकारेण । |
| पापकारी पुरुष: | दीर्घायु: सुखान्वित: नियतायु: | प्रबलपुण्यरुपेण दैवेन दुर्बलस्य पापरुपपुरुषकारस्य उपघात: |
| पुण्यकारी पुरुष: | स्वल्पायु: दु:खान्वितानियतायु: | प्रबलपापरुपेण दैवेन दुर्बलस्य पुण्यरुप पुरुषकारस्य उपघात: । |

एवं विशिष्टं पापरुपं अथवा पुण्यरुपं दैवं विपरीतस्य पापरुपस्य अथवा पुण्यरुपस्य पुरुषकारस्य विरोधि अस्ति ।

योगीन्द्रनाथ सेन:

– आयुर्घटकानां त्रैविध्येन आयुष: अपि त्रिविधा: भेदा: भवन्ति ।

– उदार: नाम उत्तम: ।

– चकारेण सुखं नियतं दीर्घं एतै: सह हितमपि आयुष: अनुक्तं विशेषणं ज्ञानीयात् ।

(वाक्यशेषतन्त्रयुक्ति:)

– अर्थेदशमहामूलीये अध्याये हितमहितं सुखं दु:खं एतादृशानां चतुर्विधानाम् आयुषां वर्णनमस्ति ।

– दैवपुरुषकारयो: एक: घटक: बलवान् तथा एक: दुर्बल: इति अवस्थायां एतेषां विरोधिनां संकर: भवति तस्य अपि वर्णनम् अस्ति ।

– उपहन्यते पदं अभिभूतभवनं इति अर्थेन योजितम् ।

– अत्र '' विरोधिनो: सन्निपाते भूयसा हि अल्पमवजीयते ।'' एष: सिद्धान्त: उपयोजितव्य: ।

– एकीय मतविषये विश्लेषणम् –

आयुष: दैवपुरुषाकारेषु घटकेषु एकस्य हीनत्वात् अनियतम् आयु: भवति । अस्मिन् अन्यघटकस्य बलत्वात् तत्रैव आयु: नियतत्वं प्राप्नोति । अत: अनेन आयु: नियतम् अस्ति । इति तेषाम् आचार्याणाम् आशय: अस्ति । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

३) कर्मण: नियतानियतत्वम् –

चरक: – किञ्चित् महत् कर्म क्वचित् विपाके काले अनियतं भवेत् ।

– तथा किञ्चित् महत् कर्म क्वचित् विपाके काले अनियतं भवेत् । तत् प्रत्ययै: प्रतिबोध्यते ।

चक्रपाणि: – दैवपुरुषार्थयो: उभययो: परस्परबाधकत्वस्य विचारसमये 'एकान्तिकं नियतम् आयु:' अस्य पक्षस्य निराकरणम् अस्मिन् सूत्रे कृतम ।

– अस्मिन् जगति एवं किमपि नास्ति यस्य कारणं कर्म नास्ति ।

इत्यर्थ: प्रत्येकस्य घटकस्य घटनाया: च कारणं कर्म एव अस्ति । यद् उच्यते –

'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।।'

– केषांचित् मनुष्याणाम् आयु: अकालनियतम् अस्ति इत्यर्थ: तेषाम् आयुर्मर्यादा नियतत्वेन अकाले ( युगनियतकालापेक्षया अल्पा) अस्ति ।

– यदा पुरुषार्थं कर्म दृष्टकर्मस्य (दैवस्य) अनुगुणम् अस्ति तदा अस्य सहयोगिन: सान्निध्येन तेषां बलं वर्धते । तस्य मनुजस्य अकाले नियत: मृत्यु: भवति ।

– यदा प्रत्यक्षाणाम् अपथ्यादीनां कर्मणां सेवनं न भवति तदा तद् कर्म न मारकं तिष्ठति ।

– प्रत्ययै: प्रतिबोध्यते – इत्यस्य अर्थ: दैवबलं प्रत्यक्षकारणै: उद्रिक्तं ( बलवत् ) क्रियते ।

– कालनियतस्य कर्मण: विवेचनम् –

किञ्चित् नियतकालं कर्म यदा पक्वं भवति तदैव तस्मिन्नेव काले तस्य पचनं प्रारभते । (फलं दातुम् उद्युक्तं भवति) अयमेव कालनियम: ।

– विपाकनियतस्य कर्मण: विवेचनम् –

प्रत्येकं कर्म यथास्वबलं विपाकं प्राप्येत एव । तद् पक्वत्वं न गच्छेत् इति न । कालविपाकनियतम् एतद् कर्म अस्मिन् काले पक्वं भवेदेव इति नियतम् । एवं किमपि कर्म कालविपाकनियत्वात् बलवत् वर्तते । एतदेव दृष्टेन बाध्यमानं न भवति । इत्यर्थ: एतादृशं कर्म पुरुषाकारं कर्म नाशयितुं न शक्नोति । मतमिदम् अनृसृत्य किमपि दुर्बलं कर्म तस्य फलं न प्राप्य अपि क्षीयते ।

अस्य विपरीतं किमपि कर्म अविपाककालनियतं भवति नाम निश्चिते काले न पक्वं भवति । कानिचित् कर्माणि अकालनियतानि सन्ति इत्यर्थ: कानिचित् कर्माणि कालनियतानि सन्ति ।

( विपर्ययं वाक्यशेषं च तन्त्रयुक्ति: )

गंगाधर:

– दैवपुरुषाकारयो: त्रिविधानां बलाबलविशेषाणां योगानुसारं केचन आचार्या: आयुर्मानं नियतं मन्यन्ते । तत्र किमपि महत् (महाफलदायकं) कर्म कस्मिंश्चित् काले परिणामे पक्वं भूत्वा फलं दातुं नियतम् अस्ति । तस्मात् आयु: नियतं स्यात् ।

– किमपि महत् कर्म विपाके तथा परिणामकाले फलं दातुम् अकालनियतम् अस्ति अर्थत: अनियतम् अस्ति ।

तस्मात् आयु: अनियतकालप्रमाणं स्यात् ।

– एतादृशेषु प्रकारद्वयेषु प्रतीतिहेतुभिः (कारणैः) उपदेशः प्रत्यक्षम् अनुमानं युक्तिः च एतैः प्रमाणैः ज्ञानं प्रापणीयम् ।

योगीन्द्रनाथ सेनः –

– कर्मणः नियतानियतकालत्वम् अनुसृत्य आयुषः नियतानियतमानत्वं भवति ।

– कार्यस्य बोधः कारणानुसारं भवति ।

– किञ्चित् बलवत् कर्म कस्मिन्नपि काले विपाके नियतं भवति । इदं कर्म अस्मिन् काले पक्कं भविष्यति इदृशः केषांचित् कर्मणाम् विपाककालनियमः भवति ।

– किञ्चित् दुर्बलं कर्म पुनः अकालनियतम् अस्ति ।

– कानिचित् कर्माणि 'विपाककालनियमः' न भवति । परंतु कारणैः एतेषां बोधः आवश्यकः ।

– क्वचित् काले सहकारिकारणान्तरं प्राप्य विपाकः भवति । कर्म तु भोक्तव्यमेव अवश्यम् ।

'' नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।।

– एवं कर्मणः विपाककालस्य नियतानियतत्वेन आयुषः नियतानियतमानत्वं निश्चितं भवति ।

ज्योतिषचन्द्र सरस्वतिः

– नियतम् – निश्चितफलदायकम् ।

– कर्मणः नियतानियतत्वं फलदायकहेत्वन्तरानुसारं फलदानक्षमं भवति ।

– कृतकर्मानुसरमेव तस्य फलं भवति । शेषः शब्दार्थः

निष्कर्षः – वैधर्म्यं नास्ति ।

४) आयुषः नियतानियतत्वविषये निदर्शनम्

चरकः – आयुषः प्रमाणं नियतं वा अनियतम् अस्ति । अस्मिन् विषये एकान्तिकः विचारः असाधुः अस्ति । तदर्थं चरकेन निदर्शनं ( उदाहरणं) दत्तम् । यदि आयुः नियतकालप्रमाणस्य स्यात् तर्हि विविधाः उपहतकारकभावाः मृत्युदायकाः घटकाः एतैः जीवितभयं एव निःशेषं भवेत् । आयुषः नियतत्वात् कियत् अपि अपथ्यं साहसम् आघातं क्रियते चेत् न मृत्युः भविष्यति । एतद् अर्थं चरकेण विविधानि उदाहरणानि दत्तानि ।

जीवितस्य अभाव कुर्वाणाः भावाः व्यर्थाः भवेयुः । दैवतभयम् अवसीदेत् । इन्द्रादिकानां युद्धम् अश्विनीकुमारयोः चिकित्सा एते अपि निरर्थकं भवेताम् ।

ये विदितवेदितव्यः महर्षयः सन्ति तेषां इन्द्रात् आयुर्वेदस्य ज्ञानग्रहणं तथा तस्य ज्ञानस्य आचरणम् अपि निरर्थकं स्यात् ।

सर्वेषु ज्ञानसाधनेषु अस्माकं श्रेष्ठे दिव्यचक्षुषी स्तः तया साधनया अपि प्रत्यक्षम् एवं दृश्यते यद् युद्धं कृतम् वा न कृतम् तथापि आयुः अतुल्यम् अस्ति । रोगाणां प्रतिकारः अथवा अप्रतिकारः विषसेवनम् अथवा असेवनम् अनेन अपि आयुः अतुल्यम् अस्ति । यथा उदपानघटस्य वा चित्रघटस्य योगक्षेमः समानः न भवति ।

चक्रपाणिः –

निदर्शनम् – निदृश्यते ऽ भिमतः पक्ष साध्यते अनेन इति निदर्शनं युक्तिः ।

यस्मिन् अभिमतपक्षस्य (स्वीकृत) पक्षस्य सिद्धिः भवति तं निदर्शनम् अथवा युक्तिः इति वदन्ति ।

– आयुर्जनकः हेतुः आयुर्विघातकः हेतुः एतयोः सेवनं वा असेवनम् एवं सर्वं प्रामाणिकाभिः व्यक्तिभिः अविवादसिद्धम् अस्ति इति ज्ञायते ।

– आयुः नियतं स्यात् चेत् आयुषः रक्षाकरभावाः व्यर्थाः भवेयुः । आयुः अनियतं स्यात् तर्हि एते भावाः व्यर्थाः न भविष्यन्ति । तेन अनियतम् अपि आयुः भवति ।

दृष्टादृष्टकारणविचारः –

– सर्वत्र अदृष्टम् एतदेव आयुषः कारणं नास्ति । अपि तु दृष्टम् अपि कारणस्वरुपं भवति । त्रिवृतादीकानां विरेचकादि कार्यं दृष्टकारणानाम् एव अस्ति । अदृष्टानां कारणत्वं दृष्टकार्यस्य अनुपलब्धेः ज्ञातव्यं भवति । तेन अदृष्टस्य कारणत्वं दृष्टकारणमूलम् अस्ति ।

– तस्मात् दृष्टकारणं न भवति इति वचनम् अयोग्यम् । शेषः शब्दार्थः वाक्यार्थः च ।

गङ्गाधरः – आयुषः नियतत्वम् अनियतत्वं च एवं प्रामाण्यं दृश्यते । अस्मिन् एकस्मिन् एव पक्षे एकान्तग्रहणेन अवधारणं योग्यम् ।

– अस्य सूत्रस्य टीकाविवेचने गङ्गाधरेण अन्येषाम् आचार्याणां पक्षं स्थापयित्वा पश्चात् तस्य निराकरणं कृतम् ।

अन्य: पक्ष: – यथायुगं धर्मस्य एकैक: पाद: ऱ्हासं गच्छति । प्रतियुगं धर्मपादऱ्हासेन चतुर्शतवर्षाणाम् आयुषि अपि पादऱ्हास: भवति । प्रतियुगम् एवं प्रकारेण आयुष: प्रमाणं नियतं कथितम् । तर्हि अधुना पुन: नियतानियतम् आयु: इति वचनेन उपरोक्तं वर्णनं न विरुध्यते किम् ?

अस्मिन् उत्तरम् – एवं प्रतियुगं धर्मपादऱ्हासात् आयुषि क्षीणत्वम् आगच्छति अनेन वचनेन एव आयुष: अनियतत्वं सिद्धम् । प्रतियुगम् आयुष: प्रमाणं भिन्नम् अस्ति ।

तत्रापि प्रत्येकस्मिन् युगे यद् आयुषप्रमाणं अस्ति तद् धर्मपादनिबन्धितम् । धर्माधर्मयो: आचरणस्य भेदेन पुन: आयुषप्रमाणे भिन्नत्वम् आगच्छेत् ।

एवं प्रकारेण विरोध: नास्ति । आयु: नियतं च अनियतं च एवं स्वरुपद्वयस्य अस्ति ।

– दिव्यं चक्षु: – योगसिद्धौ आविर्भूतं दिव: परमव्योम्न: परमात्मत: तत् तु परं चक्षु: ।

योगीन्द्रनाथ सेन:– आयु: प्रमाणविषये एकपक्षाश्रयणम् अयोग्यम् ।

– सर्वेषु प्रमाणेषु श्रेष्ठं प्रमाणं दिव्यचक्षुषी अस्ति । शेष: अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति:– सिद्धान्तस्य वर्णनम्

– साहसम् – शक्त्यतिरिक्तं श्रमादिकम् ।

– अदेशचर्चा – श्मशानादिगमनम् । अथवा ग्रीष्मप्रधाने देशे शीतप्रधानदेशवत् आचरणम् ।

– अकालचर्या – महानिशादौ भ्रमणम् । अथवा ग्रीष्मे हैमन्तिक–विधिग्रहणम् ।

– आरम्भबुद्धि: – उपक्रमप्रवृत्ति: ।

कथाबुद्धि: – अभिधेयत्वेन स्वयं रचनाबुद्धि: ।

प्रयोगबुद्धि: – दीर्घायुष्काभिषु प्रयोग: ।

– शरीरनष्टत्वं चिरकालत्वं च एतदर्थं उदपानघट: चित्रघट: च एतयो: दृष्टान्त: दत्त: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

५) आरोग्यानुवृत्तौ हेतु: –

चरक: – तस्मात् हितोपचारमूलं जीवितम् । अतो अहितोपचारमूलं मृत्यु: ।

– देशकालात्मगुणविपरीतानां कर्मणां क्रमोपयोग: आहारविकाराणां क्रमोपयोग: ।

– सर्वस्य अतियोगायोगमिथ्यायोगानां त्याग:

– सर्वातियोगसंधारणम्

– उदीर्णानां गतिमतां च असंधारणम्

– साहसानां च वर्जनम्

एतैः आरोग्यानुवृत्तिकरैः हेतुभिः ज्ञानं अस्माभिः दृश्यते उपदिश्यते प्राप्यते च ।

चक्रपाणिः – सर्वातियोगसंधारणम् – सर्वातियोगानाम् वर्जनम् । शेषः अविशेषः ।

गङ्गाधरः – टीका नास्ति ।

योगीन्द्रनाथ सेनः – देशकालात्मगुणविपरीतं नाम देशकालात्मसात्म्यम् ।

– आत्मसात्म्यं नाम अभ्याससात्म्यम् एव । आत्मशब्देन प्रकृत्यादीनां अपि संग्रहः करणीयः ।

– आहारविकारौ नाम अभ्यवहार्ये द्रव्ये । साहसम् – अयथाबलमारम्भः ।

– चकारेन कामक्रोधादीनाम् अपि वर्जनं करणीयं इति ज्ञातव्यम् । (वाक्यशेषं तन्त्रयुक्तिः )

ज्योतिषचन्द्र सरस्वतिः –

– देशगुणविपरीतम् – शीतप्रधाने देशे उष्णवीर्यम् आहारविहारादिकम्

– आत्मगुणविपरीतम् – पित्तप्रकृतेः मधुराद्युपसेवा ।

– चक्रपाणिसंमतं ' सर्वातियोगसन्धारणम्' अस्मिन् पाठे आक्षेपः । अस्मिन् पाठे पुनरुक्तेः दोषः उत्पन्नः भवति । अतः 'सन्धारणमनुदीर्णानाम्' एषः पाठः योग्यः । शेषः अर्थशः विवेचनम् ।

निष्कर्षः – पाठभेदः अस्ति किन्तु वैधर्म्यं नास्ति ।

आ) भूतानां कालाकालमरणम् सूत्रे ३७ तः ३८

चरकः – आत्रेयस्य नियतानियतम् आयुषः विवेचनानन्तरम् अग्निवेशेन प्रश्नः पृष्टः – 'एवंप्रकारेण येषाम् आयुः अनियतकालप्रमाणस्वरुपम् अस्ति तेषां कालमृत्युः भवेत् वा अकालमृत्युः ?'

चक्रपाणिः – अग्निवेशस्य शङ्काप्रस्तुतिः – यदि कस्यापि मनुष्यस्य आयुः कालनियतम् अस्ति तर्हि मरणाभावात् तस्य अकालमृत्युः न भवेत् ? एवं यस्य आयुः अकालनियतम् अस्ति तर्हि अनियतत्वात् तस्य कालमृत्युः भवेत् वा अकालमृत्युः ?

– अनियतं आयुः कालनियमः नास्ति तथा नियतकालस्य पूर्वं आगतः मृत्युः अकाल स्यात् ?

इत्यादिप्रश्नाः अग्निवेशस्य सन्ति ।

गङ्गाधर:

– एवं गुरुणा आयुष: नियतकालप्रमाणत्वं अनियतकालप्रमाणत्वं एतौ द्वौ पक्षौ स्थापितौ एतद् श्रुत्वा अग्निवेशेन अग्रसंशय: पृष्ट: –

नियतकालप्रमाणआयुषि कालसम्पूरणानन्तरं मृत्यु: आगच्छति । एष: कालमृत्यु: । तर्हि अनियतकालप्रमाणआयुषि कालमृत्यु: आगच्छेत् वा अकालमृत्यु: ?

योगीन्द्रनाथ सेन:

– आयु: केवलं नियतकालप्रमाणस्य नास्ति एतद् भगवता आत्रेयेन सोदाहरणं स्पष्टीकृतम् । तर्हि नियतानियतप्रमाणस्वरुपि आयुषि मृत्यो: कालाकालत्वं कथं निश्चितव्यम् ? एष: प्रश्न: ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) आत्रेयस्य उत्तरम् –

आत्रेय उवाच – युक्तिपूर्वक: विचार: करणीय: ।

अस्मिन् सूत्रे कालमृत्यो: अकालमृत्यो: च एतयो: दृष्टान्तं उदाहरणहेतुभि: सह वर्णनं अस्ति कालमृत्यु: दृष्टान्त: – यथा यानस्थित: अक्ष: स्वभावानुसारं गुणयुक्त: सन् भारवहने सदैव समर्थ: अस्ति । यथाकालं स्वप्रमाणस्य क्षये जाते स: नश्यति ।

विवरणम् – तथा कालमृत्यु: भवति ।

हेतु: – शरीरोपगतं बलवन्तं स्वभावम् अनुसृत्य यथावती क्रिया चलति । यथाकालं निसर्गत: सप्रमाणक्षये शरीरं नश्यति । एष: कालमृत्यु: ।

अकालमृत्यु: दृष्टान्त: – स: एव यानसामास्थित: अक्ष: यदि अधोक्तै: कारणै: विकृत: भवति

– अतिभाराधिष्ठितत्वात् । – विषमपथात्

– अक्षचक्रभङ्गात् – अपथात्

– वाह्यवाहकदोषात् – अणिमोक्षात्

– अनुपाङ्गात् – पर्यसनात्

एवं विकृत: अक्ष: यथाकालं पूर्वमेव नश्यति ।

विवरणम् – तद्वत् आयु: अपि अधोक्तै: कारणै: प्राकृतकालात् पूर्वमेव नश्यति ।

– अयथाबलमारम्भ: – अयथाग्न्यभ्यवहरणम्

– विषमाभ्यवहरणम् – विषमशरीरन्यास:

– अतिमैथुनम् – असत्संश्रय:

– उदीर्णवेगविनिग्रह: – विधार्यवेगविधारणम्

– भूतविषवारवग्न्युपताप: – अभिघात:

– आहारप्रतिकारविवर्जनम्’

अनेन शरीरस्य आयुष: च शीघ्रं ऱ्हासं भूत्वा मृत्यु: भवति । एष: अकाले मृत्यु: ।

– ज्वरादीनां विकाराणां सम्यक् चिकित्साम् अकरणेन अपि अकालमृत्यु: भवति ।

चक्रपाणि:

– यथाकालम् अस्य अर्थ: कामपि दोषोत्पत्तिं विना अक्ष: क्षीयते इति ।

– स्वप्रमाणक्षय: अस्य अर्थ: आयुष: युगनियतं शतवर्षप्रमाणं इत्यादे: प्रमाणस्य क्षयात् इति ।

– अपथ नाम यत्र मार्ग: एव नास्ति तत्र यानचालनम् । ‘अणि:’ इत्यस्य अर्थ: ‘कीलम्’ इति ।

– अनुपाङ्गम् नाम स्नेहस्य अदानम् ।

– पर्यसनम् इति परिक्षेप: । यानस्य अधोर्ध्वदिशा – परिवर्तनम् ।

– मिथ्योपचार: नाम सम्यक् चिकित्सां अकरणम् ।

गंगाधर: – अक्ष: नाम व्यवहारे ‘धूरं’ इति उच्यते । अणि: – चक्रस्थापनकीलम् ।

– अत्र शरीरविचयशारीरगतस्य विषयस्य स्मरणं करणीयम् इति गंगाधरस्य भाव: ।

– य: मनुष्य: यस्मिन् काले म्रियते स तस्य नियत: मृत्युकाल: एतद् वचनम् एकान्तिकम् अस्ति । प्रत्यक्षं अकाले आहारवचनकर्माणि अनिष्ट फलदायकानि सन्ति तथा योग्ये काले गृहीता: आहारादिभावा: इष्टफलदायका: सन्ति ।

– अत: कालाकालयुक्ति: तासु तासु अवस्थासु तं तम् अर्थं समीक्ष्य पश्चात् एव निश्चितव्या । एतद् व्यवहारे अपि दृश्यते । यथा कालाकाले वर्षति । यथाकालं अथवा अयथाकालं शैत्यं भवति , औष्णं भवति पुष्पाणि विकसन्ति च ।

– अत: कालमृत्यु: अकालमृत्यु: च उभयो: अपि भवत: । न एकान्तिकग्रहणं योग्यम् ।

– यदि अकालमृत्यु: एव न स्यात् तर्हि नियतकालप्रमाणआयु: सत् हिताहितज्ञानम् अकारणं स्यात्

योगीन्द्रनाथ सेन: –

– अक्ष: चक्रधारणं काष्ठं यदुपरि यानं तिष्ठति । अणि: अक्षाग्रकीलकम् । शेषं शब्दार्थविवेचनम् ।

ज्योतिषचन्द्र सरस्वति: –

– दृष्टान्तोपन्यासेन संशयस्य निराकरणम् ।

– अक्ष: शकट: । अणि: चक्ररोधार्थकील: ।

– भूतशब्देन इह ग्रहादयो व्याला जन्तव: च गृह्यन्ते ।

– आहार: आऽहीयते उपचीयते शरीरमनसा इति । शेषं शब्दार्थविवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणं – चतुर्थम्

## ज्वरागत: मिथ्योपचारस्य संशय: ।

चरक:–अग्निवेश: पृष्टवान् यत् ज्वरे शीतजलं न यच्छन्ति उत भूयिष्ठं उष्णजलं किमर्थं यच्छन्ति ? वस्तुत: शीतसाध्य: पित्तधातु: उष्णगुणेन अधिकं ज्वरकर: स्यात् ।

– अस्मिन् आत्रेयस्य उत्तरम् –

– ज्वरितस्य रुग्णस्य शरीरहेतुदेशकालादीनि परीक्ष्य वैद्य: दोषपाचनार्थम् उष्णजलं यच्छन्ति ।

–ज्वर: आमाशयसमुत्थ: अस्ति । आमाशयसमुत्थानां व्याधीनां चिकित्सा पाचनं वमनं अपतर्पणं अनेन क्रमेण भवति ।

– अत: ज्वरिताय पाचनार्थम् उष्णजलं यच्छति ।

– उष्णजलपानेन – वातानुलोमनम्    उदरस्थस्य अग्ने: उदीरणम् ।

पाचनं शीघ्रं भवति ।    अतिरिक्तं श्लेष्मा शोषितं भवति ।

स्वल्पेनापि जलसेवनेन तृष्णा शाम्यति ।

– अपवाद: – एवं स्यादपि उत्पन्ने पित्तप्रधाने ज्वरे तथा दाहप्रलापभ्रमातिसारै: सह उत्पन्ने ज्वरे उष्णपानीयं न दद्यात् । अन्यथा व्याधि: वर्धते ।

– ज्वरे जलपानस्य अपवादा:

उत्पन्नपित्ते ज्वरे

सदाहे ज्वरे

सभ्रमे ज्वरे

सप्रलापे ज्वरे

सातिसारे ज्वरे

– चक्रपाणि: – आग्नेये ज्वरे उष्णतोयं इति मिथ्योपचारं न भवेत् वा ? इति आशंकां अग्निवेश: पृष्टवान् ।

– शीतसाध्य: धातु: – उष्णरुपं पित्तम् ।

– न केवलं जलस्य विचार: अपि 'पानीय' इति अन्येषां रसपानानाम् अपि विचार: ।

– उत्सन्नम् इति प्रवृद्धम् ।

गङ्गाधर: – ज्वरादिषु मिथ्योपचार: क्रियते चेत् अकाले मृत्यु: भवति अस्य विषयस्य प्रसङ्गेन ज्वरिताय उष्णपानीयं देयम् एष: मिथ्योपचार: नास्ति वा ? इति संशयस्य पृच्छा ।

(प्रसंग तन्त्रयुक्ति:/न्यासव्याख्या)

– ज्वरित: इति नवज्वरिण: । समुत्थानम् निदानम् ।

– पाचनार्थं पदेन रसदोषया: उभययो: पाचनार्थम् इति अर्थ: स्वीकार्य: ।

– पानीयम् उष्णमेव स्यात् एतेन श्रुतशीतस्य जलस्य निषेध: कृत: । (अपवर्ग:)

– अत्यर्थ उत्सन्नपित्तोत्पन्ने ज्वरे उष्णजलं न दद्यात् इत्यस्य अर्थ: अल्पउत्सन्नपित्तजेज्वरे उष्णजलं दातुं न कोऽपि प्रतिबन्ध: । तेन दांहादीनां अभिवृद्धि: न स्यात् । (अपवर्ग)

योगीन्द्रनाथ सेन:– वातकफजंज्वरे उष्णपानीयं समीचिनम् । परं उद्रिक्तपित्तज्वरे उष्णस्य प्रतिषेध: अस्ति ।

– अनुलोमनं नाम स्वमार्गेण प्रवर्तनम् ।

–उद्रिक्तपित्तोत्पन्ने ज्वरे तथा दाहादियुक्ते ज्वरे उष्णोदकं न दत्वा चन्दनादिसाधितं शीततोयं दद्यात्

ज्योतिषचन्द्र सरस्वति: – देशकालात्मगुणविपरीतान् आहारविकारान् क्रमेण उपयुज्य आरोग्यस्य अनुवृत्ति: करणीया इति हेतु: कथित: अस्ति । किन्तु अत्र एवं संशय: अस्ति यद् सर्वे अपि वैद्या: शीतसाध्ये आग्नेयज्वरे अपि उष्णमेव पानीयं यच्छन्ति इति व्यवहारे दृश्यते । किम् इदम् योग्यम् ?

– शीतसाध्यो धातु: इति आग्नेय: पित्तम् ।

– तन्त्रान्तरे – ''उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणां विना'' अस्मिन् आचार्य: उत्तरयति ।

– पाचनार्थं नाम आमदोषपाचनार्थम् ।

– दोष: आमाशयाश्रित: सन् पाचनमिति चिकित्सा एव प्रधाना अस्ति इत्येव फलम् उष्णोदकस्य अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् – पञ्चमम्

## चिकित्सासिद्धान्त:

अ) शीतोष्णसमुत्थज्वरप्रतिकार: ।

आ) निदानविपरीत भेषजम् ।

इ) अपतर्पणम् ।

अ) शीतोष्णसमुत्थज्वरप्रतिकार: ।

उष्णकृत: रोग: शीतगुणेन शाम्यति उत शीतकृत: रोग: उष्णगुणेन शाम्यति ।

चक्रपाणि: – केवलं ज्वरे एव शीतोष्णभेदेन तद् विपरीता: उष्णशीतोपचारा: इति न । अपि तु सर्वासु अपि व्याधिषु नियमनं आवश्यकम् ।

– भिषग्विद: – भिषज: च ते ज्ञानवन्त: चेति ।

गङ्गाधर: – भिषग्विद: इति वैद्या: ।

– 'उष्णकृत:' अस्य अर्थ: बाह्यउष्णहेतुना उत्पन्न: इति गृहीतव्य: ।

योगीन्द्रनाथ सेन: – भिषग्विद: – विदन्तीति विद: । विदे: क्विम् । ज्ञानिन: ।

– भिषजश्च ते विद: च इति भिषग्विद: ।

– निदानविपरीतं एव भेषजम् अस्ति । शेष: शब्दार्थ:

ज्योतिषचन्द्र सरस्वति: – प्रसंगेन सर्वव्याधिषु समुत्थानविपर्यस्ता:क्रिया:करणीया: एतद् एव अनेन सूत्रेण स्पष्टीक्रियते ।

– भिषग्विद: – विद्वांसो भिषज: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

आ)निदानविपरीतं भेषजम्

चरक: – एवम् अन्यासु व्याधिषु अपि निदानविपरीतं भेषजं योजनीयम् ।

अपतर्पणनिमित्ता व्याधि: – पूरणम्

पूरणनिमित्ता व्याधि: – अपतर्पणम्

चक्रपाणि: – केवलं शीतोष्णसमुत्थासु व्याधिषु एव हेतुविपरीता चिकित्सा करणीया इति न । अपि तु अपतर्पणादिभि: हेतुभि: उत्पन्नव्याधिषु अपि हेतुविपरीता चिकित्सा करणीया ।

– सर्वे उपक्रमा: संतर्पणापतर्पणयो: भेदा: सन्ति । तेन संतर्पणापतर्पणाभ्यां सर्वा: चिकित्सा: गृह्यन्ते ।

गङ्गाधर: – निदानविपरीता चिकित्सा सर्वासु व्याधिषु निदर्शिता अस्ति ।

– पूरणं संतर्पणम् ।

– व्याधीनां त्रिविधव्याधिहेतुभ्य: यद् निदानं स्यात् तस्य विपरीता चिकित्सा करणीया ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – सर्वासु व्याधिषु समुत्थानविपर्यस्ता क्रिया करणीया अस्य दृष्टान्तेन वर्णनं कृतम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

इ) अपतर्पणम् – सूत्रे ४३ , ४४

चरक: – अपतर्पणम् – त्रिविधम् – लङ्घनम् – अल्पबलदोषाणाम्

– लङ्घनपाचनम् – मध्यबलदोषाणाम्

– दोषावसेचनम् – बहुदोषाणाम्

– लङ्घनम् – यथा आतपवाताभ्याम् अल्पबलं शुष्यति तथा लङ्घनेन वृद्धौ अग्निवायौ वर्धित्वा अल्पबलवन्तः दोषाः प्रशुष्यन्ति ।

– लङ्घनपाचनम् – यथा सूर्यचण्डातपवायुभ्यां पांशुभस्मावकिरणैः च अल्पजलं जलाशयं शुष्यति तथा लङ्घनपाचनाभ्यां मध्यबलवन्तः दोषाः शुष्यन्ति ।

– दोषावसेचनम् – यथा क्षेत्रस्थः केदारसेतोः भञ्जनं विना अतिरिक्तं जलं न नश्यति तथा बहुदोषाणां नाशाः दोषावसेचनेन विना न भवन्ति ।

चक्रपाणिः – अपतर्पणस्य भेदाः विशेषज्ञानार्थं वर्णिताः सन्ति । लङ्घनपाचनम् – यत्र पाचनं क्रियते तत्र अल्पमात्रायां लङ्घनम् अवश्यं करणीयम् । यदि पाचनेन सह बृंहणं क्रियते चेत् बृंहणस्य अग्निप्रतिकूलत्वात् योग्यं पाचनं न भवेत् । अतः पाचनेन सह लंघनमेव आवश्यकम् ।

गङ्गाधरः – पल्वलः अल्पसरसः । शेषः शब्दार्थः ।

योगीन्द्रनाथ सेनः – दोषाणाम् अपेक्षया अपतर्पणस्य भेदाः कृताः ।

– लङ्घनपाचनम् – एषः समाहारद्वन्द्वः अस्ति ।

– दोषाणाम् अवसेचनम् – दोषाणां बहिःसारणं संशोधनम् इति ।

– यत् किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् । अनेन नियमानुसारेण पाचनादयः अपि 'लङ्घन' संज्ञायां समाविष्टाः भवन्ति ।

चरकेण अपि उक्तम् – चतुष्प्रकारा संशुद्धिः पिपासा मारुतातपौ ।

पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् । (च. सू. २२)

– लङ्घनसंज्ञायाम् एतावत् पाचनम् अपि अस्ति । परंतु लंघनपाचनयोः मध्ये पाचनस्य पृथक् उल्लेखेन अत्र लंघनपदेन उपवासः अपेक्षितः ।– च. सू. २२ गतं लङ्घनस्य सूत्रम् उद्धृतम् ।

– दृष्टान्तानाम् उपयोगः । लङ्घने अनुक्तः पिपासानिग्रहः अपि समावेष्टव्यः ।

– अवकिरणः पदेन 'अवक्षेपकरणम्' इति अर्थः अभिप्रेतः । शेषः शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – लङ्घनम् अत्र उपवासरुपम् । – अवकिरणम् इति प्रक्षेपम् ।

– केदारसेतुः – क्षेत्रस्य आलवालम् । पल्वलः – क्षेत्रगतः उदकसञ्चयः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## अधिकरणम् षष्ठम्

## अचिकित्स्य: रुग्ण:

चरक: – सूत्रम् ४५.

– दोषावसेचनम् अथवा अन्यं किमपि भेषजं प्राप्तकाल: सन् अपि अधोक्तेभ्य: रुग्णेभ्य: न दद्यात् ।

– अनपवाद प्रतिकार:

– अधन: – अपरिचारक: – वैद्यमानी

– चण्ड: – असूयक: – तीव्रधर्मारुचि:

– अतिक्षीणबलमांसशोणित: – असाध्यरोगोपहत:

– मुमुर्षुलिङ्गान्वित:

एतादृशाय रुग्णाय चिकित्सादानेन वैद्य: पापपूर्णम् अपयश: प्राप्नोति ।

चक्रपाणि: – अनपवादप्रतीकार: – वाच्यप्रतीकार: । य: कथितं हितकरं वचनं न श्रुणोति ।

– अधने मनुष्ये अनुकरणयुक्तत्वं भवति तेन चिकित्साकरणम् अशक्यं भवति ।

– वैद्यमानी – य: दुरभिमानात् वैद्योपदेशं न श्रुणोति ।

– तीव्रधर्मारुचि: – यस्य प्रत्येकं कर्म अधर्मयुक्तं भवति तेन एतादृशेषु रुग्णेषु अधर्मस्य प्रतिबंधात् चिकित्सा सफला न भवति ।

– मुमुर्षुलिङ्गं नाम रिष्टलक्षणानि ।

– पापीयसा इति पापहेतुना पापजनकेन अपयशसा ।

गंगाधर: – अनपवादप्रतिकार: इति स्थाने 'अल्पवादप्रतीकार:' इति पाठभेद: गंगाधरेण स्वीकृत: । यो जनो जनै: सहाल्पवादे प्रतिकारान् हि स्वभावात् तस्य प्रकारो यस्य स चेत् आतुर: स्यात् । स चिकित्सायां छलं गृहीत्वा वैद्यस्य अयश: कीर्तनं करोति ।

– चण्डस्वभाव: – क्रोधनस्वभाव: ।

–वैद्यमानी–य: आत्मानं वैद्यं मन्यते एवं दुरभिमानेन युक्त: मनुष्य: वैद्यं विरुणद्धि यत् 'इदं औषधम् अत्र न उपयुक्तम् इदं पथ्यम् अयोग्यम्' एतादृशै: वाक्यै: स वैद्यं दूषयति । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – अपवाद: वाच्यम् ।

– आत्मानं वैद्यं मन्यते इति वैद्यमानी । वैद्यमानीत्वात् वैद्योपदेशं न करोति ।

– चण्डः क्रोधनः । असूया नाम गुणेऽपि दोषाविष्कारः ।

– बलमांसादीनाम् अतिक्षयेन व्याधिः असाध्या भवति ।

– एतादृशाणाम् आतुराणां चिकित्सा क्रियते चेत् उभयलोकहानिः भवति । पापेन परलोकहानिः अयशसा इहलोकहानिः भवति ।

ज्योतिषचन्द्र सरस्वतिः

– अनपवादप्रतीकारः – नास्ति अपवादो यस्मात् इति अनपवादः बहुनिन्दाकरः प्रतीकारः ।

– वैद्यमानिनः रुग्णस्य न वैद्य न वा भेषजे श्रद्धा भवति ।

– चण्डः कोपनस्वभावः – एषः रुग्णः त्वरितफलस्य लोभेन वैद्यं सततं तिरस्करोति ।

– असूयकः – एषः स्वभावतः वैद्यस्य गुणान् निन्दति ।

– अधार्मिकाय कर्म प्रातिकूल्यत्वेन फलं न लभते ।

निष्कर्षः – 'वैद्यमानी' पदस्य टीकायां शब्दशः वैधर्म्यं दृश्यते ।

## अधिकरणम् सप्तमम्

## चिकित्सकस्य कर्तव्यम्

चरकः – सूत्रम् ४६ – चिकित्सा समये यस्य फलं तादात्विकेन अथवा अनुबन्धेन अशुभं स्यात् एतादृशं कर्म न करणीयं इति बुधैः मन्यते ।

चक्रपाणिः – अनुबन्धः नाम उत्तरकालः ।

गङ्गाधरः – तदात्वे तत् कर्मकरकाले । अनुबन्धम् उत्तरकालम् ।

योगीन्द्रनाथ सेनः – तदात्वम् तत्कालम् । अनुबन्धम् उत्तरकालम् मस्न वा ।

ज्योतिषचन्द्र सरस्वतिः– तदात्वं तस्मिन्कालः । अनुबन्धं परवर्तिकालः ।

निष्कर्षं – वैधर्म्यं नास्ति ।

## अधिकरणम् अष्टमम्

## देशलक्षणम्

चरक: – सूत्रे ४७ – ४८ – जाङ्गल: – अल्पोदकद्रुम: प्रवात: प्रचुरातप: स्वल्परोगतम:

अनूप: – प्रचुरोदकद्रुम: निवात: दुर्लभातप: बहुदोष:

साधारण: – सम: ।

चक्रपाणि: – केचन आचार्या: एतस्य सूत्रद्वयस्य पाठम् अत्र स्वीकुर्वन्ति प्रत्युत केचन आचार्या: न

गङ्गाधर: – अस्य सूत्रस्य पाठ: न स्वीकृत: तस्मात् टीका नास्ति ।

योगीन्द्रनाथ सेन: – अस्य सूत्रस्य पाठ: न स्वीकृत: तस्मात् टीका नास्ति ।

ज्योतिषचन्द्र सरस्वति: – संगते: अभावात् देशलक्षणानाम् अयं सूत्रपाठ: केचन आचार्या: अत्र न स्वीकुर्वन्ति । अतिरोहितार्थमन्यत् ।

निष्कर्ष: – प्रक्षिप्तपाठभेदेन टीका नास्ति ।

## अधिकरणम् – नवम्

## अध्याय: उपसंहार:

चरक: – देशोध्वंसविमानाध्यायगतानां वर्ण्यविषयाणां सूचि: ।

चक्रपाणि: – अविशेषा टीका ।

गङ्गाधर: – अध्यायार्थम् उपसंहरति । अधिकरणानां सूत्रानुसारं वर्ण्यक्रम: ।

योगीन्द्रनाथ सेन: – अध्यायार्थं संग्रहम् शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – अविशेष:

निष्कर्ष: – वैधर्म्यं नास्ति ।

## चतुर्थोध्याय:

## त्रिविधरोगविशेषविज्ञानीयम् ।

अस्मिन् अध्याये द्वे प्रकरणौ/ अधिकरणौ स्त: ।

अधिकरण १ – त्रिविधरोगविशेषविज्ञानम् ।

१) त्रिविधरोगविशेषविज्ञाननामानि व्याख्या: च

अ) आप्तोपदेश: सूत्रे ३, ४

आ) प्रत्यक्षम्

इ) अनुमानम्

२) परीक्षणस्य महत्वं, पद्धति: परीक्षा च । सूत्रम् ५

३) त्रिविधपरीक्षाभि: ज्ञेया: भावा: सूत्राणि ६ – ८.

४) परीक्षाणां फलम् सूत्राणि ९ – १२

अधिकरण २ – अध्यायस्य उपसंहार: सूत्रे १३ , १४

अध्यायाधिकरणम् अध्यायनाम च

गद्यसूत्रे १ , २

चक्रपाणि: – जनपदोद्ध्वंसनीये अध्याये सामान्यरुपेण सर्वेषां रोगाणां वर्णनं कृतम् । तेषां व्याधीनां विशेषाणां ज्ञानं यादृशं करणीयं एतस्य उपदेशार्थ त्रिविधरोगविशेषविज्ञानीयस्य अध्यायस्य वर्णनं कृतम् ।

गङ्गाधर: – व्याधिज्ञानहेतुप्रमाणरुपिण: त्रिविधानां रोगविशेषविज्ञानस्य वर्णनं कृतम् । अध्यायस्य प्रारम्भे निर्दिष्टेन'त्रिविधं खलु रोगविशेषविज्ञानं भवति' इति वाक्यार्थेन अध्यायस्य नाम निश्चितं कृतमस्ति । त्रिविधं रोगविशेषविज्ञानम् इत्यर्थम् अधिकृत्य कृत: विमानाध्याय: । अध्याये विषयस्य वर्णनमस्ति न विषयस्य हेतो: । अत: 'छ' प्रत्यय: (ईय प्रत्यय:) अध्यायनाम्ने युत: अस्ति ।

योगीन्द्रनाथसेन: – रोगाणां प्रकोपणादिविशेषान् ज्ञातुं अस्य विमानस्य वर्णनम् । रोगाणां विशेषा: प्रकोपणादय: विज्ञायन्ते अनेन इति रोगविशेषविज्ञानम् । तद् अधिकृत्य कृत: अध्याय: ।

ज्योतिषचन्द्र सरस्वति:– पूर्वाध्याये सामान्यसदृशानां जनपदोद्ध्वंसकराणां व्याधीनां मानं कथितम् । अधुना विकाराणां विशेषविज्ञानस्य वर्णनं कुर्वन्ति ।

प्रथमम् अधिकरणम्

त्रिविधरोगविशेषविज्ञानम्

– उप अधिकरणम् १ – त्रिविधानां रोगविज्ञानानां नामानि तथा तेषां व्याख्या: ।

सूत्र ३ – ४

चरक: – रोगविशेषविज्ञानानि त्रिविधानि सन्ति । आप्तोपदेश: प्रत्यक्षम् अनुमानम्

चक्रपाणि: – रोग: कथं ज्ञातव्य: बोधव्य: इति यत्र वर्णितमस्ति तं रोगविशेषविज्ञानमिति उच्यते ।

– उपदेशप्रत्यक्षानुमानरुपं प्रमाणत्रयम् ।

– एतानि त्रीणि रोगविशेषविज्ञानानि सन्ति । एतै: त्रिभि: प्रमाणै: रोगस्य विशेषज्ञानं कारयितव्यम् ।

– युक्ते: अन्तर्भाव: अनुमाने भवति तेन तस्य पृथक् वर्णनं न कृतम् ।

– एतस्मात् प्रमाणत्रयात् केषुचित् रोगेषु सर्वाणि त्रीणि मिलित्वा केषुचित् द्वे अपि केषुचित् एकमेव परीक्षणार्थमुपयुक्तं भवति । यथा आन्तराग्निमान्द्य प्रत्यक्षपरीक्षणीयं नास्ति ।

गङ्गाधर: – रोगस्य व्याख्या: – विषमधातवा: रोगा: तज्ञा: च ज्वरादयो देहादिकार्यद्रव्यवत् ।

– विशेषा: वातादिजत्वादिना जातानां रुपाणि

– विज्ञानम् – विशेषेण ज्ञायन्ते प्रमीयन्ते अनेन तद् विज्ञानं प्रमाणम् ।

– विषमधातुभि: उत्पन्नानां रोगाणां वातादिजत्वादिरुपाणां ज्ञानं प्रमाणै: कारणीयं इति रोगविशेष विज्ञानम् ।



योगीन्द्रनाथसेन: – एतेषां प्रमाणानां क्रम: अपि महत्वम् अर्हति । प्रत्यक्षानुमानात् पूर्वमुपदेशस्य उल्लेख: कृत: । यत: यदि उपदेश: न कृत: स्यात् तर्हि प्रत्यक्षानुमानाभ्यां ज्ञानमशक्यम् ।

– तदनन्तरं प्रत्यक्षस्य निर्देश: अस्ति । यत: अनुमानं प्रत्यक्षपूर्वकमेव भवति ।

ज्योतिषचन्द्र सरस्वति: – खलु इति पदं निर्धारणार्थ भवति । तेन विशेष विज्ञानानि त्रिविधानि एव सन्ति न अधिकानि न अल्पानि । यदि उपदिष्टं न स्यात् तर्हि प्रत्यक्षादिभि: उपलब्धि: न भवति । अत: आप्तागमस्य उल्लेख: प्रथमं कृत: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

१) आप्तोपदेश: / उपदेश: ।

चरक: – आप्तोपदेशो नाम आप्तवचनम् । – आप्तस्य लक्षणम् प्रमाणत्वं च –

लक्षणानि – अवितर्क:

– स्मृतिविभागविद्

– निष्प्रीत्युपतापदर्शिन:

प्रमाणत्वं – एवं गुणयोगात् तेषां यत् वचनं तत् प्रमाणम् ।

अप्रमाणम् – मत्तोन्मत्तमूर्खरक्ताणां दुष्टं वा अदुष्टं वचनम् ।

चक्रपाणि: – वस्तुत: अनुमानादीनां लक्षणानि सूत्रस्थानस्य एकादशे तिस्त्रैषणीये अध्याये वर्णितानि सन्ति । केवलं प्रकरणागतत्वेन अत्र पुन: लक्षणानि वर्णितानि सन्ति । एष: पुनरुक्तिदोष: नास्ति ।

– प्राकरणिको हि अर्थ: अनुच्यमानो न्यूनो भवति ।

– अवितर्कस्मृतिविभागविद् – वितर्क: – अनिश्चितज्ञानम्

स्मृति: – स्मरणज्ञानम्

विभाग: – एकदेश:

– तर्क: इति अनिश्चितं ज्ञानमपि च अवितर्क: इति निश्चितं ज्ञानम् ।य: विषयं निश्चितं जानाति स: अवितर्कलक्षणरुपी आप्त: । यम् एकदेशेन स्मरणज्ञानमस्ति स: स्मृतिविभागविद् आप्त: । ये निश्चयेन अनुभवेन सम्पूर्णत: कमपि भावपदार्थं जानन्ति ते अवितर्कस्मृतिविभागविद: इति उच्यते ।

– वितर्कादिविद् आप्त: नास्ति । यत: तं परिपाद्यवस्तुन: सम्पूर्णविशेषविज्ञानं न भवति ।

– स्मृतिज्ञानम् – यद्यपि स्मृतिज्ञानं प्रमाणमूलमस्ति तथापि सद्यकाले स्मृतिज्ञानस्य विषयार्थस्य अनिवार्या विद्यमानता नास्ति । तेन स्मृति: प्रमाणं नास्ति । तथैव स्मृतिज्ञानमिति स्मृतिशास्त्रजं ज्ञानम् । अथवा स्मृतिज्ञानमिति गणितज्ञानम् । एतौ द्वौ अपि ज्ञानविषयो साक्षातार्थ अदर्शकौ दुरवबोधकौ स्त: तेन मिथ्याज्ञानं सम्भवति । अत: स्मृति: अप्रमाणात् तेन उपादेया नास्ति ।

– निष्प्रीत्युपतापदर्शिन: – ये सम्यक् ज्ञानं भूत्वा अपि प्रीत्या वा उपतापेन वा ग्रस्ता: न व्यवहरन्ति । येषाम् आचरणं प्रीत्या वा उपतापेन वा ग्रस्तं न भवति ।

– यदि रागद्वेषयुक्त: स्यु: तदा सम्यक् ज्ञानं भूत्वा अपि अनुचित: व्यवहार: घटते । एतै: लक्षणै: युक्ता: यथार्थदर्शी निर्दोष: आप्त: भवति ।

– एतादृशं आप्तत्वं ब्रह्मादिदेवतासु अस्ति । ब्रह्मादय: आप्त: एव । परं लौकिके विषयवर्णने यस्य पुरूषस्य वितर्कादिभाव: न आगच्छति स: आप्तस्वरुपी भवति तथा तस्य उपदेश: प्रमाणमेव अस्ति

– अप्रमाणम् इत्यस्य अर्थ: यन्मध्ये अनिवार्यतया प्रमाणस्वरुपिणी ज्ञेयता नास्ति ।

– दुष्टादुष्ट: – दुष्ट: च असौ अदुष्ट: च इति । दुष्ट: पिता यदि पुत्राय अदुष्ट: तर्हि स: आप्त: इति न निश्चीयते ।

– दुष्ट: वञ्चक: – य: वञ्चक: स: दुष्ट: इति उच्यते ।

गङ्गाधर: –

– अवितर्कस्मृतिविभागविद् –

वितर्क: – ऊहापोह: । अवितर्क: – ऊहापोहं विना ।

– यस्य अखण्डितं (अविच्छेदं) ऊहापोह व्यतिरिक्तं (वितर्करहितम्) त्रैकालिकभावानां ज्ञानमस्ति स: अवितर्क: आप्त: ।

स्मृति: – तत्वस्मृति: । विभाग: – सत् असत् रुपत्वम् । ये तत्वस्मृतिमाध्यमेन सदसदो: लक्षणानि कथयन्ति ते स्मृतिविभागविद् ।

– गङ्गाधरेण अत्र 'इति चेत्' पदं उपयुक्तम् । तस्यार्थ: 'यदि ईदृश: अर्थ: कृत: तर्हि' एवं भवति । एषा दार्शनिकी भाषा अस्ति ।

– पूर्वपक्ष: – वितर्करहितेन अविच्छेदेन त्रैकालिकज्ञानेन तत्वस्मृतिमाध्यमेन सदसदो: यद् लक्षणं ये वर्णयन्ति ते यदि आप्ता: तर्हि देवादिग्रहजुष्टा: पुरूषा: व्यक्त्य: अपि अवितर्कस्मृतिविभागं जानन्ति । तर्हि तान् अपि आप्ता: इति ब्रुयात् किम्?

– उत्तरपक्ष: – देवग्रहजुष्टा: पुरूषा: उपतप्तेन देवग्रहेण युक्ता: सन्ति । स: देवग्रह: यद् त्रैकालिकं वदेत् तद् वचनं सा व्यक्ति: वदति । अत: ते न आप्ता: ।

– तदर्थम् अग्रे निष्प्रीत्युपतापदर्शिन: पदं वर्णितं यत् येभ्य: प्रीति: उपतापा: समूलं नष्टा: एतादृशान् प्रीति उपतापरहितम् आचरणं कुर्वत: आप्ता: इति उच्यते ।

– ये अवितर्कस्मृतियुक्ता: सन्त: अपि प्रीत्या एव वदन्ति ते अपि न आप्ता: ।

– अतीतावेक्षण तन्त्रयुक्ते: उपयोगं कृत्वा सूत्रस्थानस्य एकादशे तिस्त्रैषणीये अध्याये वर्णितस्य आप्तस्य व्याख्याया: विवरणम् अत्र गङ्गाधरेण कृतम ।

– ये तपोज्ञानबलेन रजतमोभ्यां मुक्ता: येषां ज्ञानं त्रैकालिकम् अव्याहतं निर्मलं च ते आप्ता: ।

– उपरोक्तायां व्याख्यायां वर्णितलक्षणानुसारं एतेन गुणयोगेन ते वाणीमनोभ्यां त्रैकालिकस्य अर्थस्य ग्रहणं प्राप्नुवन्ति । तद्द्वारा सा व्यक्ति: यद् किंचित् तद् प्रमाणम् इति निश्चितं भवति । रजतमोभ्यां निर्मुक्ता सा व्यक्ति: असत्यं नैव वदति अत: तत् प्रमाणं भवति ।

– अलौकिकार्थस्य अप्राप्तग्रहणात् अलौकिकार्थवचनमात्रस्य अर्थस्य अप्राप्तिवात् वाणीमनोभ्य: सत्यं भणितं चेदपि तत् न प्रमाणम् ।

– लौकिकार्थस्य उपदेश: एव प्रमाणं भवति । अत: ईश्वरादय: अप्रमेया: सन्ति । तेभ्य: न प्रमाणस्य आवश्यकता ।

विवेचनम् – गंगाधरेण तिस्त्रैषणीयस्य अध्यायस्य सूत्रस्य टीकायां अलौकिकस्य व्याख्या अधोनिर्दिष्टा कृता अस्ति ।

अपरीक्ष्यणमलौकिकं वसु शक्तिब्रह्म् सदेव ।

यदा ज्ञानसमये इन्द्रियविषययो: यदा प्रत्यक्षसम्बध: न भवति तदा तस्मै अलौकिकम् इति वदन्ति । एतादृशस्य अलौकिकज्ञानविषयस्य यदा ग्रहणं न भवति अलौकिकज्ञानविषयाणां वचनमात्रेण अर्थस्य निश्चिता प्राप्ती: न भवति तदा ते अप्रमाणं अस्ति ।

– अप्रमाणम् – कस्य वचनं न प्रमाणम् इति अत्र वर्णितम् अस्ति ।

– मत्ता: – आसवमद्यादिकृत मदाभिहता: ।

– उन्मत्ता: – उन्मादादिव्याधिभि: अभिहता: ।

– मूर्खा: – वेदादिशास्त्रादिभि: जनित अवितर्कस्मृतिविभागज्ञानात् हीना: ।

'मदोन्मत्तमूर्खवक्तृ' इति पदस्य अर्थ: 'एतादृशा: व्यक्तय: यद् वदन्ति' एवं भवति ।

– एतादृशानां मत्तोन्मत्तमूर्खव्यक्तीनां दृष्टादृष्टवस्तुविषयकं यद् वचनं तद् न प्रमाणम् । यत: यद् दृष्टमपि तस्य उपदेशतत्वं कथयितुं न शक्नोति । तद् अप्रमाणम् ।

– अलौकिके अलौकिकार्थस्य अप्राप्तग्रहणलक्षणम् आप्तवचनम् अप्रमाणम् अस्ति । अलौकिकेषु न प्रमाणम् ।

योगिवचनविषयकम् ऊहनम्

योगस्थप्रज्ञया य: अलौकिकार्थ: उपदेश: प्राप्यते स: वाणीद्वारा न प्राप्त: । अत: तेषाम् अलौकिकार्थवचनं सत्यं सदपि तद् प्रमाणम् नास्ति ।

– प्राप्तार्थग्रहणलक्षणं हि ज्ञानं प्रमाणम् । यदि योगस्य प्रज्ञया लौकिकार्थद्वारा ज्ञानं प्राप्तं तर्हि तद् वचनं प्रमाणम् । यदा योगप्रज्ञया इन्द्रियविषययो: सन्निकर्षं भूत्वा ज्ञानरुपिणं वचनं उत्पद्यते तदा एव तत् प्रमाणम् भवति ।

– लौकिकार्थानां योगप्रज्ञया वाणीमनोमाध्यमेन प्राप्यं योगिपुरुषस्य वचनं प्रमाणम् । योगजं अलौकिकार्थं प्रत्यक्षं यदि प्रज्ञया प्राप्तं तथापि तद् अलौकिकप्रमाणं अस्ति ।

– इति लौकिकप्रमाणं वर्णयतां गौतमादीनां महर्षीणां वचनमस्ति ।

– तै: प्रमाणेषु योगजप्रत्यक्षस्य समावेश: न कृत: ।

योगीन्द्रनाथसेन: – आप्तानां वचनम् आप्तवचनम् ।

– स्मृति: इति शास्त्रम् । विभागम् इति विध्यर्थवादानुवादवचनरुपम् ।

– स्मृतिविभागविद् इति शास्त्रतत्वे नि:संशयितज्ञानसंपन्ना: ।

– निष्प्रीत्युपतापा: इति भूतेषु रागद्वेषशून्या: ।

– तिस्त्रैषणीयस्थस्य अध्यायस्थस्य आप्तलक्षणस्य उल्लेख: कृत: अस्ति ।

एतादृशा: आप्ता: पुरुषा: अव्याहतज्ञानस्य साहाय्येन तत्वं प्राप्य प्राणिमात्रान् यथायथं उपदिशन्ति ।

– मत्ता: अनवहिता: । ऐहिकामुष्णिकवचनम् ।

– दृष्टादृष्टवचनम् – दृष्टार्थम् अदृष्टार्थम् च वचनम् ।

ज्योतिषचन्द्र सरस्वति: –

– अवितर्क: संशयरहित: । स्मृति: कर्तव्याकर्तव्यविनिर्देशकानि धर्मानुशासनानि ।

– विभाग: – सामान्यधर्मावच्छिन्नानाम् एव बहुनां परस्परविरुद्धं तद् व्याप्यधर्मप्रकारेण प्रतिपादनम्

– निष्प्रीत्युपतापदर्शिन: समदर्शिन: निस्वार्थत्वम् ।

– मत्ता: मादकसेवया उन्मत्ता: व्याधिता: ।

– मूर्खा: – शास्त्रज्ञानरहिता:

– दृष्टवचनम् यथावत् अनुभूते: अभावात् । अदृष्टवचनम् अप्रत्यक्षीकृतम् अनुमितिम् ।

– अनुभवानां यथायोग्यं अभावेन तथा अप्रत्यक्षं कृतया अनुमत्या मत्तोन्मत्तमूर्खाणां वचनानि अप्रमाणानि सन्ति ।

निष्कर्ष: – दृष्टादृष्ट: दुष्टादुष्ट: च इति पाठभेदौ वैधर्म्यं च अस्ति ।

– वितर्क्यस्य विवेचने वैधर्म्यम् अस्ति ।

२) प्रत्यक्षम –्

चरक:– यत् स्वयम् इन्द्रियै: मनसा च उपलभ्यते तत् प्रत्यक्षम् ।

चक्रपाणि: – विशेषां टीकां न कुर्वता चक्रपाणिना प्रत्यक्षं बाह्यप्रत्यक्षं मानसप्रत्यक्षं च एवं भित्वा तन्माध्यमेन वर्णनं कृतम् ।

बाह्य प्रत्यक्षम् – स्वस्य चक्षुरादिभि: इन्द्रियै: अव्यवधानेन रुपादिनां विषयाणां ज्ञानप्राप्ति: ।

मानसप्रत्यक्षम् – मनसा अव्यवधानेन सुखादीनां ज्ञानप्राप्ति: ।

गङ्गाधर: – अतीव विस्तृता मूलगामिनी च टीका कृता अस्ति ।

– गंगाधरेण अस्मिन् सूत्रे पाठभेद: स्वीकृत: अस्ति ।

–‘मनसा’ इति पदस्य स्थाने ‘आत्मना’ इति पदं गृहीत्वा तस्मिन् टीका कृता अस्ति ।

– प्रत्यक्षविषये तिस्त्रैषणीये अध्याये विस्तृता टीका कृता अस्ति । (अतीतावेक्षणतन्त्रयुक्ति:)

– प्रत्यक्षं व्याख्या

आत्मेन्द्रियमनो ऽ र्थानां सन्निकर्षात् प्रवर्तते ।

व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ।। (च. सू. ११)

– अस्यैव पुनर्वर्णनं व्याख्यानप्रसंगेन अत्र क्रियते । (व्याख्यानं प्रसंगः च तन्त्रयुक्तिः)

– प्रत्यक्षं इन्द्रियात्मभ्यां प्राप्यते । पृथक् इन्द्रियपदेन श्रवणादिनां पञ्चज्ञानेन्द्रियाणां प्रत्यक्षप्रमाणत्वं ख्यापितम् ।

– आत्मन् इति पदेन बुद्धिः तथा बुद्धेः आश्रयत्वात् मनः अनयोः उभययोः समावेशः भवति ।

– स्वयं पदेन आत्मनः त्रिविधः विचारः कृतः ।

– आत्मनः बुद्ध्या सह नित्य योगः अस्ति अतः बुद्धेः अपि त्रिविधं चिन्तनं कृतम् ।

– यत् इति पदेन शब्दद्वया पञ्चइन्द्रियार्था चिन्त्यविचार्यादयः मनसः अर्थः सुखादयः बुद्धेः अर्थाः एते विवक्षिताः ।

– <u>प्रत्यक्षस्य सर्वसमावेशिका व्याख्या</u> –

–'जागरितस्थानेन वैश्वानरात्मा स्वप्नस्थानेन तैजसात्मा सुषुप्तिस्थानेन प्राज्ञात्मा एतैः ( त्रिविधैः ) पञ्चेन्द्रियाणां सन्निकर्षेण यद् वस्तु (ब्रह्म) उपलभ्यते यद् मनसा बुद्ध्या च ज्ञायते तं उपलब्धिज्ञानं प्रत्यक्षं इति ब्रूयात् ।'




अत्र गङ्गाधरेण सांख्यविचाराणां आधारः गृहीतः

– तेन प्रत्यक्षस्य सप्तप्रकाराः भवन्ति । एष विषयः रोगभिषग्जितीये अध्याये अपि वर्णितः अस्ति ।

(अनागतावेक्षणतन्त्रयुक्तिः)

– आत्मेन्द्रियाभ्यां यद् आत्मानं प्राप्यते तत् प्रत्यक्षम् । अत्र सुखदुःखादयः आत्मप्रत्यक्षं तथा शब्दादयः इन्द्रियं प्रत्यक्षं सन्ति ।

– कणादवचनं उक्तम् – (अनुमानतन्त्रयुक्ति:)

''सुखादय: आत्मगुणा: न मन: प्रत्यक्षा: अपि तु आत्मप्रत्यक्षा: सन्ति ।''

– अत एव मनसा इति पदस्थाने आत्मना इति पदं योग्यमस्ति ।

एतद् कथं तर्हि तदर्थं द्वै वैशेषिकसूत्रे स्त: ।

१) परत्रसमवायात् तथा प्रत्यक्षत्वात् आत्मगुणा: न मनस: गुणा: । यत: ते अप्रत्यक्षा: सन्ति इति ।

२) बुद्धि–इच्छास्य एते प्रत्यग् आत्मगुणा: सन्ति । ते न मनसा: गुणा: यत: परत्रसमवायात् एव ।

प्रत्यगात्मन: परत्र समवायात् ।

– पराव्यक्तनामकस्य क्षेत्रज्ञस्य सुखादय: आत्मगुणा: (परमात्मन: आत्मगुण:) प्रत्येकस्मिन् आत्मनि अभिव्यक्ता: सन्ति । इन्द्रियाणां बुद्ध्या सह सम्बधेन एते आत्मगुणा: प्रत्येकस्मिन् जीवात्मानि भिन्ना: भासन्ते । (परमात्मन: गुणा: जीवात्मनि प्रतिबिंबिता सन्ति ।)

– मनस: आत्मना सह संयोगन एते गुणा: मनसा माध्यमेन व्यक्ता: भवन्ति । यदि एवं तर्हि तद्प्रत्यक्षत्वं न भवेत् ।

– सुखदु:खादय: एते प्रत्यगात्म प्रत्यक्षा: सन्ति ।

– अत: बुद्धिसुखादय: एते मन:प्रत्यक्षा: न सन्ति यत: ते प्रत्यक्षा: सन्ति ।

– मन: बुद्ध्यादि गुणान् न जानति । एवं मन:प्रत्यक्षस्य अभावात् आत्मगुणा: न मनस: गुणा: ।

गौतमेन उक्तम् – गौतमेन अपि सुखादय: आत्मप्रत्यक्षा: सन्ति इति फलपरीक्षया कथितम् ।

सूत्रम् – ''प्रीतेरात्माश्रयत्वादप्रतिषेध ।।'' (न्यायसूत्रम्)

अनेन सूत्राधारेण वात्स्यायने भाष्ये अधोक्तं वर्णनं कृतम् ।

''प्रीति: आत्मप्रत्यक्षत्वात् आत्मन: आश्रयेन अस्ति ।''

अत: प्रीति: इति आत्मगुण: अस्ति । तथैव

सुषुप्त्याम् आत्मा प्रज्ञाबुद्धियुत: वर्तते । तदा स: अव्यक्त: इति उच्यते । स: स्वयं सुषुप्त: समाधिस्थ: जीवनमुक्त: च भवति । एतादृश: अयम् अव्यक्तात्मा शुद्धसत्वात्मिकया प्रज्ञया तथा महत्तत्वाच्यया बुध्या तुरीयं शिवं रसं लब्धानन्दं परमात्मनं सम्मिलति ।

– एषा ज्ञानोपलब्धि: आत्मप्रत्यक्षा अस्ति ।

कपिलेन उक्तम् ( सांख्यमतम् )

– प्रज्ञा / बुद्धिः त्रिगुणात्मिका महती अस्ति । तन्मनः इति कपिलस्य सूत्रम् । अनेन उपलब्धिज्ञानेन तथा प्रत्यक्षेण एषा प्रज्ञा प्रत्यक्षा भवति । एवं सः अव्यक्तात्मा त्रिगुणात्मकेन महत्तत्वेन त्रिगुणात्मकेन मनसा अहं (अहमेव) अस्मि इति मन्यते । सः महात्मा 'अहमेव करोमि' (अहंकारः) इति अविद्या नाम बुद्धिं उत्पद्यते ।

अतः अहंकारात् उत्पन्नानि पञ्चमहाभूतानि पञ्चतैजसात्मांशेन निर्मीयन्ते ।

– अहंकारिदशेन्द्रियाणि मनः अर्थपञ्चकं तथा पञ्चप्राणयुक्तं स्वप्नस्थाने एते स्वप्ने सुखदुःखादिन् प्रत्यक्षं पश्यन्ति । तया अहंकारबुद्ध्या स्वप्ने तत् प्रत्यक्षं दृश्यते । जागृत्यां प्रत्यक्षं नास्ति ।

– सैव तैजसआत्मा देवनरादियोनिषु शुक्रशोणितादि–बीजसंयोगे प्राप्य पञ्चमहाभूतानि उत्पाद्य तैः सह युक्तः सन् जागरितस्थानस्य वैश्वानरः नामकः आत्मा भवति ।

तेषां भूतानां साहाय्येन स आत्मा अहंकारिकदशेन्द्रियेषु प्रविश्य एकैकतन्मात्रतया उत्पन्नानां भूतानां साहाय्यं गृहीत्वा तथैव त्रिन् गुणान् उत्पाद्य अहंकारिमनसि प्रविश्य तद् गतस्य त्रिगुणात्मकस्य सत्त्वगुणबहुलस्य स्थूलमनसः साहाय्यं गृहीत्वा तथैव पञ्चस्थूलशब्दादि अर्थानां पञ्चप्राणानां च साहाय्येन स आत्मा चतुर्विंशतिकः भवति ।

एष आत्मा जागरितावस्थायां सुखादयः स्थूलविषयं तथा स्थूल अहंकारि बुद्धिं च प्राप्यते । एवं बुद्धिः सुखः दुःखे इच्छा आद्यः आत्मप्रत्यक्षः वर्तन्ते ।

– 'आदि' पदे मनःप्रत्यक्षः चिन्त्याद्यः अर्थः अपि भवति ।

<u>मनःप्रत्यक्षम्</u> –

– सुषुप्तिस्वप्नयोः सन्धिकाले आत्मा महत्तत्वेन मनसा च यस्य चिन्तनं तर्कं विचारं च करोति तं मनःप्रत्यक्षम् इति ब्रूयात् । स्वप्नस्थानस्थः तैजसात्मा यदा अहंकारिमनसा युक्तः चिन्तनीयादीन् प्राप्नोति तमपि मनःप्रत्यक्षं ब्रूयात् ।

– जागरितस्थानस्थः वैश्वानरात्मा आत्मकृतेन सत्वादिगुणमयेन स्थूलमनसा यान् चिन्तनीयादीन् प्राप्नोति तं लोकेषु मनःप्रत्यक्षम् इति उच्यते ।

इन्द्रियप्रत्यक्षम् –

– स्वप्नं सुषुप्तिः च एतयोः सन्धिकाले अहंकारिपंचेन्द्रियाणां तथा अर्थानाम् अभावेन अत्र इन्द्रियप्रत्यक्षं न भवति ।

– स्वप्नस्थानस्थः तैजसात्मा अहंकारिश्रोत्रादिभिः यान् शब्दादीन् गृह्णाति तं स्वप्नगतम् इन्द्रियप्रत्यक्षं उच्यते । जागरितस्थानस्थः वैश्वानरात्मा स्वयं बाह्य लोकेषु सन्निकृष्टानां शब्दादिकानां भौतिकश्रोत्रादिभिः इन्द्रियैः ग्रहणं करोति । तं इन्द्रियप्रत्यक्षं उच्यते ।

एतन्मध्ये इन्द्रियाणि अर्थाः च एतयोः सन्निकर्षस्य वर्णनं तिस्त्रैषणीये अध्याये कृतम् अस्ति ।

– इन्द्रियप्रत्यक्षबाधकानां दशकारणानाम् उल्लेखः कृतः ।

– अनन्तरं पञ्च इन्द्रियाणां भावगुणानाम् अभावगुणानां वर्णनं कृतम् ।

– एवं आत्मप्रत्यक्षादिसप्तविधप्रत्यक्षं प्राप्यार्थग्रहणरुपिणौ द्विविधौ स्तः ।

अ) क्षणिकम् । ब) निश्चयात्मकम् ।

अत्र क्षणिकम् अप्रमाणम् अस्ति प्रत्युत निश्चयात्मकं प्रमाणम् अस्ति ।

– तन्मध्ये पञ्च इन्द्रियार्थाणां सन्निकर्षेण उत्पन्नम् आत्ममनसोः संयोगपूर्वकं अव्यपदेश्यं अव्यभिचारि व्यवसायात्मकं च ज्ञानं नाम प्रत्यक्षप्रमाणम् । एतदेव पञ्चविधम् इन्द्रिज्ञानम् ।

– आत्मप्रत्यक्षं अप्राप्तग्रहणात् आप्तोपदेशेन ज्ञातव्यम् ।

एतन्मध्ये लौकिकम् – प्रमाणम् ।

अलौकिकम् – अप्रमाणम् ।अप्राप्त्यर्थत्वात् अलौकिकं प्रमाणत्वं नास्ति ।

– सर्वं मानसप्रत्यक्षं प्रमाणं नास्ति । अतः मानसप्रत्यक्षप्रमाणस्था प्रत्यक्षं संज्ञां निष्कास्य अनुमानम् इति संज्ञा दत्ता अस्ति ।

योगीन्द्रनाथसेनः – गङ्गाधरवत् 'मनसा' स्थाने 'आत्मना' इति पदं गृहीत्वा पाठभेदः स्वीकृतः । परं टीकां कुर्वता 'मनसा' इत्येव वर्णनम् कृतम् ।

– इन्द्रियमनसोः साहाय्येन स्वयं उपलभ्य भवनम् अथवा साक्षात् कृतिकरणम् ।

– शब्दादिविषयाणां ज्ञानम् इन्द्रियप्रत्यक्षम् अस्ति प्रत्युत सुखदुःखादि मानसप्रत्यक्षम् अस्ति ।

– चक्रपाणिसमानम् वर्णनम् – तिस्त्रैषणीयस्थं अध्यायस्थं प्रत्यक्षलक्षणस्य सूत्रम् उद्धृतम् ।

ज्योतिषचन्द्र सरस्वति: – प्रत्यक्षप्रमाणे स्वानुभूतस्य ज्ञानस्य समावेश: भवति ।

– अपरप्रत्यक्षं नाम इतरेभ्य: प्रत्यक्षं भविष्यत: ज्ञानस्य समावेश: उपदेशे अन्तर्गत: अस्ति ।

– मृतशरीराय किमपि ज्ञानं न भवति इति 'स्वयं' पदेन वोध्यते ।

– आत्मेन्द्रियविषयाणां सन्निकर्षेण भविष्यत् ज्ञानं प्रत्यक्षम् ।

निष्कर्ष: – वैधर्म्यं नास्ति । पाठभेद: अस्ति । गङ्गाधरस्य टीका विशेषा ।

३) अनुमानम् –

चरक: – अनुमानम् तर्को युक्त्यपेक्ष: ।

चक्रपाणि: – तर्क: इति अप्रत्यक्षं ज्ञानम् । युक्ति: इति अविनाभावसम्बध: ।

– तेन अविनाभावजं परोक्षज्ञानम् इति अनुमानम् ।

– इत्यत: विना पृथक्त्वं सत् अप्रत्यक्षज्ञानम् अनुमानम् ।

गङ्गाधर: – प्रत्यक्षमध्ये अपवादविषये क्वचित् समावेश: अपि भवति । तेन प्रत्यक्षपूर्वं त्रिविधं त्रिकालस्थस्य अनुमानस्य ज्ञानं भवति । एवं प्रत्यक्षं पदेन सर्वेषां प्रमाणानां अन्तर्भाव: भवति ।

– तर्क: युक्तिम् अपेक्षते । एतादृश: युक्त्यपेक्षय: तर्क: नाम अनुमानम् ।

– तर्कापेक्ष: तर्क: । तिस्त्रैषणीये अध्याये युक्ति: एव तर्क: 'इति पद्धत्या कथित: अस्ति । 'बुद्धि: पश्यति अस्मिन् सूत्रे वर्णित: अस्ति ।

– गौतमेन अपि एवमेव कथितम् –

अविज्ञाततत्वेऽर्थे कारणोपपत्तित: तत्त्वज्ञानार्थम् ऊह: तर्क: । (न्यायसूत्रम्)

– अविज्ञाततत्त्वार्थे कारणस्य उपपत्तित: (ज्ञानत:) तत्त्वज्ञानार्थस्य ऊहनं नाम तर्क: ।

– तर्कापेक्ष: तर्क: अनुमाने समावेशयन्ति ।

– सम्पूर्णस्य तर्कस्य आप्तोपदेशेन आप्तस्य द्वितीयेन अनुमानेन प्रामाण्यं सिध्यति ।

– तद् द्वितीयं प्रमाणं नास्ति वा अप्रामाण्यं नास्ति ।

– उपमानसम्भवअर्थापत्तिनाम् अनुमाने समावेश: भवति । ऐतिह्यस्य अन्तर्भाव: आप्तोपदेशे भवति

योगीन्द्रनाथसेन: – युक्ति: – विज्ञाते अर्थे कारणोपपत्तिदर्शनात् अविज्ञातस्य अपि अवधारणं नाम युक्ति: । (संदर्भ: च. सू. ११)

– युक्ति: व्याप्तिरुपा अस्ति ।

– तर्क: –

अविज्ञाततत्वेऽर्थे कारणोपपत्तित: तत्त्वज्ञानार्थम् ऊहस्तर्क: । (न्यायदर्शनम् – १।१।४०)

– एष: तर्कविषये अक्षपादस्य (गौतमस्य) संदर्भ: उद्धृत: अस्ति ।

– युक्त्यपेक्ष: तर्क: – युक्तिपूर्वं कार्यकारणभावस्य उपपत्तिना (ज्ञानेन) अविज्ञात अर्थस्य विज्ञानं नाम अनुमानम् । उदाहरणार्थम् – महानसादिषु अग्निधूमो एकत्र दृष्ट्वा तयो: कार्यकारणभावं गृहीत्वा पश्चात् पर्वते धूमं अवलोक्यतेनैव कार्यकारणज्ञानेन अदृष्टाग्ने: ज्ञानं कारयते ।

– एतत् ज्ञानमनुमानम् अस्ति अपि च एतत् प्रत्यक्षपूर्वमस्ति ।

– एतत् ज्ञानं त्रिविधमस्ति । पूर्ववत्, शेषवत्, सामान्यतोदृष्टं च ।

– अस्य संदर्भ: – अक्षपाद – अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ।

(न्यायदर्शनम् – १।१।५)

– प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते । (च. सू. ११)

ज्योतिषचन्द्र सरस्वति: – व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्य ज्ञानम् अनुमानम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## उपअधिकरणम् २– परीक्षणस्य महत्त्वं पद्धति: परीक्षा च । सूत्रे ५

चरक: – त्रिविधेन ज्ञानसमुदायेन पूर्वं रोगस्य सम्पूर्णं परीक्षणं कृत्वा पश्चात् तस्य निश्चय: क्रियते चेत् दोषा: न प्रादुर्भवन्ति ।

– न हि ज्ञानावयवेन कृत्स्ने ज्ञेये ज्ञानमुत्पद्यते ।

– प्रथमं उपदेशेन तदनन्तरं प्रत्यक्षानुमानेन ज्ञानं गृहीतव्यम् । प्रथमं उपदेशं न स्यात् तर्हि प्रत्यक्षानुमानेन परीक्षणं न शक्यम् ।

– परीक्षा ज्ञानवतां – द्विविधा – प्रत्यक्षं अनुमानम् च ।

परीक्षा इतराणाम् – त्रिविधा – प्रत्यक्षं अनुमानं उपदेश: च ।

चक्रपाणि: – प्रमाणम् – ज्ञायते ऽ नेनेति ज्ञानं प्रमाणम् ।येन ज्ञानं प्राप्यते तं प्रमाणमिति उच्यते ।

– ज्ञानसमुदाय: इति प्रमाणसङ्घात: ।

– सर्वेषां प्रमाणानां एकत्र उपयोगेन एष: एव अमुक: रोग: अस्ति इति निश्चयं कर्तुं शक्यम् ।

– पूर्वमाप्तोपदेशेन व्याधि: बोधव्य: पश्चात् प्रत्यक्षानुमानेन यथोक्तोनि लक्षणानि परीक्ष्य तस्य निर्णय: करणीय: ।

– आगमेन यस्या: व्याधे: उपदेश: न कृत: तन्मध्ये अज्ञानी वैद्य: केवलं प्रत्यक्षेण वा अनुमानेन निश्चितं ज्ञानं प्राप्तुं न शक्नोति ।

– व्याधिविशेषा: दुर्बोधा: सन्ति । तेन विनाउपदेशं व्याधिविशेषाणां ज्ञानमशक्यम् ।

– वैद्यकशास्त्रं अधिगता: एव व्याधिविशेषान् प्रतिपादयितुं समर्था: । अत: आगमप्रमाणेन येषां व्याधीनां हेत्वादिविशेषस्य वर्णनं कृतं स्यात् ता: एव प्रत्यक्षानुमानप्रमाणाभ्यां निश्चितव्या: ।

– यथा रत्नपरीक्षायां अशिक्षित: मनुष्य: रत्नं दृष्ट्वा अपि तस्य विशेषं यथायथं ज्ञानं कर्तुं न शक्नोति तथा अनुपदिष्टाया: व्याधे: केवलं प्रत्यक्षानुमानाभ्यां विशेषज्ञानं भवितुं न अर्हति ।

– ज्ञानवताम् इति आप्तोपदेशवताम् ।

– यै: आप्तोपदेशं प्राप्ता: एतादृशेभ्य: ज्ञानवद्भ्य: प्रत्यक्षं अनुमानं च परीक्षा द्वयं अस्ति ।

– प्रत्युत इतरेभ्य: आप्तोपदेश: प्रत्यक्षं अनुमानं च इति तिस्त्र: परीक्षा: सन्ति ।

– व्याधिपरीक्षासमये आप्तोपदेश: अपि महत्त्वं भजते । यथा –

ग्रहण्या: मार्दवत्वं, स्वप्नदर्शनादिज्ञानं, दुर्बोधं स्थानसंश्रयादि ज्ञानं, कोष्ठस्य मृदुदारुणत्वं,

अस्यां अवस्थायां आतुरवचनरुपी आप्तोपदेश: अपि महत्त्वं भजते ।

गङ्गाधर: – गुरुमुखात् सम्पूर्णत: सर्वरोगाणां ज्ञानं अधिगत्य चिकित्सासमये प्रत्यक्षानुमानद्वारा सर्वेषां रोगाणां आमूलं निदानादि परीक्षणं कृत्वा तस्य निर्दोषं निश्चियं करणीयम् ।

आप्तोपदेश: – गुरुमुखम् ⟶ सर्वरोगज्ञानम्
↓
प्रत्यक्षम् अनुमानम् – चिकित्साकाले ⟶ व्याधिविशेषं परीक्षणम्
↓
व्याधि: अध्यवसाय:

– केवलं प्रत्यक्षेण वा केवलं अनुमानेन कृतं ज्ञानं परिपूर्णं ज्ञानं न भवति ।

– त्रिविधेन ज्ञानसमुदायेन व्याधे: साध्यत्वादि वातजत्वादि बलवदादिरुपेण ज्ञानं परिपूर्णं भवति ।

– प्रथमं आप्तोपदेशेन ज्ञानं गृहीत्वा तदनन्तरं प्रत्यक्षानुमानाभ्यां परीक्षणीयम् ।

– आतुरस्य क्रियाकाले उपदेशयुतेभ्य: ज्ञानवद्भ्य: द्विविधे परीक्षे स्त: ।

– क्रियाकालस्य पूर्वम् आप्तोपदेशस्य ज्ञानं आवश्यकम् अस्ति ।

– अत: तेन सह त्रिविधा: परीक्षा: सन्ति ।

योगीन्द्रनाथसेन:– ज्ञायते अनेन इति ज्ञानं प्रमाणम् । ज्ञानसमुदाय: प्रमाणसङ्घात: ।

– रोगस्य सम्यक् ज्ञानादेव क्रिया यशस्विनी भवति । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: –

– त्रिविधाभि: परीक्षाभि: उत्पन्ना निश्चयात्मिका बुद्धि: दोषशून्या अस्ति ।

– अध्यवसानं निश्चयात्मकं ज्ञानम् ।

– कस्यापि वृक्षस्य पूर्वं परिचय: न स्यात् तदा तं वृक्षं दृष्ट्वा अपि तद्विषयकं सम्पूर्णं ज्ञानं भवितुं न अर्हति ।

– धूमाग्नयो: सम्बध: पूर्वंम् उपदिष्ट: न स्यात् तर्हि धूमं दृष्ट्वा अपि अग्ने: अनुमानमशक्यम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## उप–अधिकरणम् ३) त्रिविधपरीक्षाभि: ज्ञेया: भावा: ।

(सूत्राणि ६ त: ८)

– अस्मिन् आप्तोपदेश: प्रत्यक्षं अनुमानं च एतेषां वर्णनं त्रिषु उपप्रकरणेषु कृतम् ।

अ) आप्तोपदेशेन ज्ञेया: भावा: – सूत्रम् – ६

– उपदेशेन रोगविषयक: ज्ञेयभाव: तथा तद्द्वारा चिकित्साया: प्रवृत्ति: वा निवृत्ति: करणीया इति ज्ञानं भवति ।

ज्ञेयभाव: – प्रकोपणम् योनिम् उत्थानम् आत्मानम् अधिष्ठानम् वेदनम् संस्थानम् शब्दादिविषय: उपद्रवम् वृद्धिस्थानक्षयरुपिणी दोषगति: उदर्क: नाम योग: ।

चक्रपाणि: – प्रकोपणं हेतु: । योनि: वातादय: । आत्मा स्वभाव: । यथा – रोहिणी – दारुणत्वं , संन्यास – शीघ्रोपक्रमणीयम्

अधिष्ठानम् शरीरम् अथवा मन: च ।

प्रतीकारार्था प्रवृत्ति: – उदा. ज्वरे लङ्घनपाचनादिस्वरूपिणी प्रवृत्ति: करणीया ।

प्रतीकारार्था निवृत्ति: – उदा. नवज्वरे दिवास्वप्नस्नानादीनां निषेध: करणीय: ।

गङ्गाधर: – प्रतिरोगस्य आप्तोपदेशद्वारा विशेषज्ञानं कर्तव्यम् ।

– योनिं वातादेयकाद्वित्यादि प्रकृतिम् ।

– आत्मानं शीतात्मकं वा उष्णात्मकं वा । शेष: शब्दार्थ: – उत्थानस्य उल्लेख: नास्ति ।

योगीन्द्रनाथसेन: – आप्तोपदेशेन प्रतिरोगस्य प्रकोपणादि ज्ञानप्राप्ति: करणीया ।

– प्रकोपणं निदानम् । आत्मा स्वरूपम् ।

– सर्वेषु सूत्रेषु बहुव्रीहीसमास: उपयोजित: ।

– योनि: प्रकृति वातादिवैषम्यम् आगन्तुर्वा । अधिष्ठानम् आश्रय: मन: शरीरे ।

– उत्थानस्य पाठ: नास्ति । उपद्रव: नाम व्याधे: पश्चात् उत्पन्न: तद् व्याधाश्रयी अन्य: रोग: ।

ज्योतिषचन्द्र सरस्वति: – एकैकं रोगं प्रतिरोगम् । योनि: वातादिकम् । आत्मा स्वभावम् ।

– उत्थानम् सम्प्राप्तिकम् ।

– योगं दोषदूष्यसम्मिश्रणम् । 'योग' पदस्य विशेषअर्थ: ज्योतिषचन्द्रसरस्वतीना दत्त: । प्रत्येकेषु व्याधिषु दोष:दूष्ययो: सम्मिश्रणं कथंमस्ति अस्य आप्तोपदेशेन ज्ञानं नाम योग: इति ज्ञेयभाव: ।

निष्कर्ष: – 'आत्मा' पदस्य अर्थे वैधर्म्यं अस्ति ।

२) प्रत्यक्षेण ज्ञेयाभावा: सूत्रम् – ७

चरक: – प्रत्यक्षत: रोगतत्वं जिज्ञासुना सर्वै: इन्द्रियै: आतुरशरीरगता: इन्द्रियार्था: परीक्षितव्या: । अपवाद: – रसज्ञानम् । पञ्चइन्द्रियार्थाणां परीक्षणं वर्णनम् । आतुरगतं रसज्ञानं किल अनुमानेन अथवा प्रश्नपरीक्षया ज्ञातव्यम् ।

चक्रपाणि: – यूका अपसर्पणम् – शरीरवैरस्यात् यूका: निर्गच्छन्ति ।

– यूका अनपसर्पणम् – अतिरसयुक्ते शरीरे । यूका: तिष्ठन्ति ।

– धारिलोहितम् इति जीवशोणितम् ।

– शब्दस्पर्शरुपरसगन्धा: इति उद्देश: वर्णित: । परं तस्य निर्देशे शब्दवर्णनानन्तरं चक्षुग्राह्यं रुपं वर्णितं तेन शब्दादीनां परीक्षासु क्रमनियमस्य अभाव: सूचित: ।

गङ्गाधर:

– यद्यपि रुपम् एव चक्षुरिन्द्रियस्य विषय: सन्नपि रुपे वर्णाश्रितत्वं संस्थानादीनि लक्षणानि च आश्रितानि सन्ति । तस्मात् तानि अपि चक्षुविषया: इति अत्र वर्णिता: ।

– एष एव नियम: रसगन्धस्पर्शानाम् आश्रयविषये ज्ञातव्य: । चक्षुसंबंधिन: विषया: अनेका: सन्ति तस्मात् क्रमनियमं अधिक्षिप्य स्पर्शात् पूर्वं तस्य उपदेश: कृत: । रसविषयकं ज्ञानं प्रत्यक्षेण न शक्यम् । अत्र 'अनौचित्यात्' इत्यस्य शेष: कृत: ।

– यूका इति बाह्यमलकृमि: ।

– धारिलोहितम् जीवितरक्तम् । येन रक्तेन लोकै: जीव्येत ।

– आतुरशरीरगतं रसपरीक्षणं अनुमानद्वारा एकदेशेन कर्तव्यम् ।

योगीन्द्रनाथसेन: –आतुरशरीरगतं रसज्ञानं प्रत्यक्षेण ग्रहणं अशक्यम् । तस्मात् इतरेषां परीक्षणं विना रसज्ञानं प्रत्यक्षेण कर्तव्यम् ।

– संस्थानम् अङ्गानां संहननम् । छाया – कान्ति: । शेषा टीका शब्दार्थ:

ज्योतिषचन्द्र सरस्वति:

– रक्तपित्ते रक्तस्य तिक्तत्वात् श्वादय: प्राणिन: तद् न भक्षयन्ति । यद् धारिलोहितम् उर:क्षतादिषु व्याधिषु प्रवर्तते तस्य तिक्तत्वाभावात् काकश्वादय: तद् भक्षयन्ति ।

– इन्द्रियविषयाणां परीक्षणं त्रिविधै: प्रमाणै: करणीयम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

३) अनुमानेन ज्ञेया: भावा: – सूत्रम् ८

अस्मिन् मिलित्वा ३६ भावानां वर्णनम् अस्ति । तेषाम् ऊहनं क्रमेण कुर्म: ।

अग्निं जरणशक्त्या परीक्षेत् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – जरणशक्ति: – भुक्तजीर्णकरी शक्ति: ।

योगीन्द्रनाथसेन: – जरणशक्ति: परिपाकशक्ति: ।

ज्योतिषचन्द्र सरस्वति: – 'अग्नि' पदेन अत्र पाचकाग्नि: अभिप्रेत: । जरणशक्ति: – परिपाकशक्ति:

बलं व्यायामशक्त्या परीक्षेत् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – आतुरे व्यायामशक्त्या बलं परीक्षणीयम् ।

ज्योतिषचन्द्र सरस्वति: – व्यायामशक्ति: इति परिश्रमशक्ति: ।

श्रोत्रादीनि शब्दादि अर्थग्रहणेन

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – शब्दादीनां पञ्च विषयाणां ग्रहणेन श्रोत्रादीनां पञ्च इन्द्रियाणां परीक्षणं कुर्यात् ।

ज्योतिषचन्द्र सरस्वति: – अविकृतानाम् इन्द्रियाणां परीक्षणं शब्दादिविषयाणाम् अव्यभिचारेण परीक्ष्यम् ।

मनोऽर्थ: अव्यभिचारणेन ।

चक्रपाणि: – इन्द्रियविषययो: संबंधात् क्वचित् शब्दज्ञानं क्वचित् रसज्ञानं भवति । सर्वार्थानां ज्ञानं युगपद् न भवति । अस्मात् मन: एव इन्द्रियार्थग्राहकम् इति अनुमानं लभते ।

गङ्गाधर: – अव्यभिचारितै: स्मृत्यादिभि: मनस: विषया: ज्ञायन्ते ।

योगीन्द्रनाथसेन: – अर्था: मनस: इन्द्रियाणां च सन्ति । अव्यभिचार: यथायथग्रहणम् ।

यथा विषय: अस्ति तस्य तत्स्वरुपगतं ग्रहणकार्यात् सत्त्वसंज्ञकस्य मनस: परीक्षणं करणीयम् ।

ज्योतिषचन्द्र सरस्वति: – शब्दादय: यथावत् परिग्रहणीया: एतादृशेन अव्यभिचारेण अनुमानं करणीयम् ।

विज्ञानं व्यवयायेन

चक्रपाणि: – व्यवसाय: इति प्रवृत्ति: । उदाहरणार्थं – पेयजले पानार्था प्रवृत्ति: अस्ति । तेन जलज्ञानस्य अनुमानं भवति । विना विज्ञानं तद्संबंधिनिषु क्रियासु तद्व्यक्ते: प्रवृत्ति: अशक्या ।

गङ्गाधर: – व्यवसाय: इति शास्त्रादिषु विकल्पबुद्धि: ।

योगीन्द्रनाथसेन: – व्यवसाय: अध्यवसाय: अवधारणम् ।

ज्योतिषचन्द्र सरस्वतिः – विज्ञानं शास्त्रादिज्ञानम् । व्यवसायः अनुष्ठानेन क्रिययेत् ।

वैधर्म्यम् – व्यवसायस्य व्याख्यायां वैधर्म्यम् अस्ति ।

रजः सङ्गेन

चक्रपाणिः – नारीदीनां संगेन तस्य कारणस्य रजसः अनुमानं कुर्यात् ।

गङ्गाधरः – सङ्गेन नाम प्राप्ते अर्थे ये प्रीतिः आसक्तिः च स्तः तयोः उभयरूपेण रजसः अनुमानं कुर्यात् ।

योगीन्द्रनाथसेनः – सङ्ग आसक्तिः । आसक्तितः तत्कारणरुपिणः रजसः अनुमानं करणीयम् ।

ज्योतिषचन्द्र सरस्वतिः – सङ्गः आसक्तिः ।

मोहम् अविज्ञानेन

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः – मोहः तमसः उत्पद्यते ।

योगीन्द्रनाथसेनः – शब्दार्थाः टीका ।

ज्योतिषचन्द्र सरस्वतिः – टीका नास्ति ।

क्रोधम् अभिद्रोहेण ।

चक्रपाणिः – अभिद्रोहः परपीडादायिनी प्रवृत्तिः ।

गङ्गाधरः – टीका नास्ति ।

योगीन्द्रनाथसेनः – अभिद्रोहः नाम हिंसाप्रवृत्तिः ।

ज्योतिषचन्द्र सरस्वतिः – अभिद्रोहः इति आजिघांसा ।

शोकं दैन्येन

चक्रपाणिः – दैन्यं नाम रोदनादिप्रवृत्तिः ।

गङ्गाधरः – टीका नास्ति ।

योगीन्द्रनाथसेनः – दैन्यं नाम रोदनादिप्रवृत्तिः ।

ज्योतिषचन्द्र सरस्वतिः – टीका नास्ति ।

हर्षम् आमोदेन

चक्रपाणि: – आमोद: नृत्यगीतवादित्रादिउत्सवकरणम् ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – आमोद: गीतवादित्रादि उत्सव: । हर्षम् आनन्दम् ।

ज्योतिषचन्द्र सरस्वति: – आमोद: संतोषजन्या नृत्यगीतादि: क्रियाकरणप्रवृत्ति: ।

प्रीतिं तोषेण

चक्रपाणि: – तोषस्य अर्थ: मुखनयनयो: प्रसन्नता लक्षणरुप: तत्त: प्रीती: केवलं तोषमात्र लक्षणरुपिणी अस्ति । अपि तु हर्ष: प्रीते: विशेष: यत्र मनोद्रेक: भवति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – मुखप्रसादादिभि: लक्षणै: मनस: प्रीते: अनुमानं कुर्यात् ।

ज्योतिषचन्द्र सरस्वति: – प्रीति: संतोषमात्रा अस्ति ।

भयं विषादेन

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – विषाद: नाम मुखमालिन्यलक्षणरुपिण: मनस: दैन्यम् ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

धैर्यम् अविषादेन

चक्रपाणि: – संकटेषु अपि मनोदैन्यं न उत्पद्यते इति धैर्यम् ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – संकटेषु मनस: स्थैर्यं नाम धैर्यम् ।

ज्योतिषचन्द्र सरस्वति: – स्थिरचित्तता इति धैर्यम् ।

वीर्यम् उत्थानेन /वीर्यम् उत्साहेन

चक्रपाणि: – आरब्धे दुष्करे कार्ये अपि मनस: दाढर्यम् इति वीर्यम् ।

– उत्थानम् इति क्रियारम्भ: ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – टीका नास्ति ।

ज्योतिषचन्द्र सरस्वति: – दुष्करात् कार्यात् अपि न निवर्तनम् इति वीर्यम् ।

अवस्थानं अविभ्रमणेन

चक्रपाणि: – अवस्थानं स्थिरमतित्वम् । अविभ्रमम् इति अभ्रान्ति: ।

– भ्रान्ते: अभावात् स्थिरमतित्वस्य अनुमानं भवन्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानं वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – अवस्थानं धारणम् । अविभ्रमं स्मृति अविभ्रंश: ।

वैधर्म्यम् – अत्र चक्रपाणे: ज्यो सरस्वते: च विवेचने वैधर्म्यम् अस्ति ।

श्रद्धाम् अभिप्रायेण

चक्रपाणि: – श्रद्धा नाम इच्छा । अभिप्राय: नाम अभ्यर्थ: । कस्यापि विषयस्य वा वस्तुन: लुलुभया श्रद्धाया: अनुमानं भवति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – अभिप्राय: नाम प्रार्थना । श्रद्धा इति रुचि: । कस्यापि वस्तुन: प्रार्थनया तस्या: व्यक्ते: रुचिअनुमानं भवति ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

मेधां ग्रहणेन

चक्रपाणि:– ग्रहण पदेन ग्रंथादीनां धारणम् इति अर्थ: अभिप्रेत: अस्ति । उत्तमया ग्रंथधारणशक्त्या मेधाया: अनुमानं भवति ।

गङ्गाधर: – मनस: धारणशक्त्या मेधाया: परीक्षणं भवति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमाना टीका

ज्योतिषचन्द्र सरस्वति:– चक्रपाणिसमाना टीका

संज्ञां नामग्रहणेन

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – नामग्रहणेन संज्ञाया: नाम चेतनाया: अनुमानं भवति ।

ज्योतिषचन्द्र सरस्वति: – नामग्रहणम् इति एषा व्यक्ति: अमुका अमुका अस्ति एतादृशया परिचयशक्त्या संज्ञारुपि अविसंवादिज्ञानं भवति ।

स्मृतिं स्मरणेन

चक्रपाणि: – स्मृति: इति स्मृतिजनक: संस्कार: ।

– स्मरणेन तस्य कारणस्य संस्कारस्य ज्ञानं भवति ।

गङ्गाधर: – स्मरणम् इत्यस्य अर्थ: स्मृतार्थानां प्रकाशनम् । अनेन स्मृते: अनुमानं भवति ।

योगीन्द्रनाथसेन: – शब्दार्थ:

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

ह्रियम् अपत्रपणेन

चक्रपाणि:– ह्रियम् इति लज्जा । लज्जाकरीभि: गोष्टीभि: लज्जापरीक्षणं करणीयम् ।

गङ्गाधर: – अपत्रपणम् इति लज्जाजनक: परकीय: व्यापार: । लज्जाकरेण अन्येषाम् आचरणेन रुग्णे य: परिणाम: भवति तद् दृष्ट्वा तस्य लज्जा परीक्षणीया ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानं वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

शीलम् अनुशीलनेन

चक्रपाणि: – शीलं नाम सहजवस्तुगतं प्रेम । अनुशीलनम् इति सततशीलनम् । अत: य: अर्थ: सततं सेवित: तस्मात् शीलस्य अनुमानं भवति ।

गङ्गाधर: – सतताभ्यासेन शीलनव्यापारेण च शीलता परीक्ष्यते ।

योगीन्द्रनाथसेन: – सततं अनुशीलनेन स्वभावस्य अनुमानं भवति ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

द्वेषं प्रतिषेधेन

चक्रपाणि: – प्रतिषेध: इति व्यावृत्ति: । व्यावृत्ति: नाम त्याग: ।

गङ्गाधर: – प्रतिषेध: इति निषेध: ।

योगीन्द्रनाथसेन: – तस्य तस्य वस्तुन: प्रतिषेधेन तद् तद् वस्तुविषयक: द्वेष: ज्ञायते ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

उपधिम् /उपाधिम् अनुबन्धेन

चक्रपाणि: – उपेत्य धीयते इति उपधि: छद्म् इत्यर्थ: । कस्मिन् अपि विषयविशेषे युक्त: भूत्वा अनुरक्तता नाम उपधि: अथवा छद्म । अस्या: उपधे: (छलस्य) अनुबन्धेन अनुमानं भवति । अनुबन्ध: नाम उत्तरकालीनं फलम् । उत्तरकालगतात् परिणामस्वरुपात् उपधे: ज्ञानं करणीयम् । उदाहरणार्थम् – उन्मत्त: छद्मचारी चन्द्रगुप्त: स्वभ्रातरं रामगुप्तं हतवान् ।

गङ्गाधर: – उपाधि: – संकेतकर्तृभि: कृत: आधुनिकसङ्केत: । अनुबन्ध: उत्तरकालम् अनुवर्तनम्

– उत्तरकाले कृतात् आचरणात् संकेतकर्त्रा कृतस्य संकेतस्य परीक्षणम् ।

योगीन्द्रनाथसेन: – उपाधि: – सात्विकत्वादिकम् । अनुबन्ध: सत्वादीनाम् अनुवृत्ति: ।

– सत्वादे: अनुवृत्ते: सात्विकत्वादय: परीक्षणीया: ।

ज्योतिषचन्द्र सरस्वति: – उपाधि: धर्मचिन्ता । अनुबन्ध: यज्ञादि अनुष्ठानम् ।

– यज्ञादे: अनुष्ठानात् धर्मचिन्ताया: अनुमानं करणीयम् ।

धृतिम् अलौल्येन

चक्रपाणि: – नास्ति टीका ।

गङ्गाधर: – धृति: – नियमात्मिका बुद्धि: । अलौल्यम् – अञ्चलत्वम् ।

– अञ्चलत्वात् निश्चयात्मिकाया: बुद्धे: अनुमानं कर्तुं शक्यते ।

योगीन्द्रनाथसेन: – धृति: संतोष: । अलौल्यम् – मनस: अचापल्यम् ।

ज्योतिषचन्द्र सरस्वति: – धृति: इन्द्रियनियमनम् । अलौल्यम् – अलोभ: ।

वैधर्म्यम् – अस्मिन् विवरणे वैधर्म्यम् अस्ति ।

वश्यतां विधेयतया

चक्रपाणि: – आज्ञापालनात् वश्यताया: अनुमानं कर्तुं शक्यते ।

गङ्गाधर: – यथा यथा आज्ञा क्रियते तथा तथा तस्य कर्तव्येन वश्यताया: अनुमानं कर्तुं शक्यते ।

योगीन्द्रनाथसेन: – वैद्यस्य विधेयतयया रुग्णस्य वश्यत्वं ज्ञायते ।

ज्योतिषचन्द्र सरस्वति: – आज्ञाया: अनुकारित्वात् वश्यताया: अनुमानं भवति ।

वय: कालविशेषेण

चक्रपाणि: – कालद्वारा वयस: अनुमानं भवति ।

उदाहरणार्थम् षोडश वर्षस्य कालमानात् बालवयस: अनुमानं भवति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमाना टीका ।

ज्योतिषचन्द्र सरस्वति: – चक्रपाणिसमाना टीका ।

भक्ति: देशविशेषेण

चक्रपाणि: – देशविशेषात् भक्ति: नाम इच्छा ज्ञातव्या । उदाहरणार्थम्–एषा व्यक्ति: मध्यदेशीया अस्ति । तेन गोधूममाषादिषु अस्या: भक्ति: स्यात् इति ज्ञायते ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानं वर्णनम् उदाहरणं च ।

ज्योतिषचन्द्र सरस्वति: – भक्ति: नाम तस्य तस्य विषयस्य इच्छा । विभिन्नानां देशीयानां विभिन्ना रुचि: भवति ।

सात्म्यं उपशयविशेषेण

चक्रपाणि: – येन कापि गोष्टि: कामपि व्यक्तिं हितकरी सिध्यति तस्मात् सा गोष्टि: ताम् व्यक्तिं सात्म्या अस्ति इति अनुमानं कर्तुं शक्यम् ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानं वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – चक्रपाणिसमानं वर्णनम् ।

व्याधिसमुत्थानं वेदनाविशेषेण

चक्रपाणि: – अविशेष: ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – अविशेष: ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

दोषप्रमाणविशेषम् अपचारविशेषेण

चक्रपाणि: – महत्ता हेतुसेवनेन बलवत्याम् अधिकमात्रायां दोषा: उत्पद्यन्ते तथा स्वल्पेन अपचारे अल्पदोषा: उत्पद्यन्ते ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानम् विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

गूढलिङ्गव्याधिम् उपशयानुपशायाभ्याम्

चक्रपाणि: – शब्दार्थ: ।

गङ्गाधर: – नास्ति टीका ।

योगीन्द्रनाथसेन: – शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

आयुष: क्षयम् अरिष्टै:

चतुर्णामपि टीकाकाराणां टीका नास्ति ।

उपस्थितश्रेयस्त्वं कल्याणाभिनिवेशेन

चक्रपाणि: –श्रेयस्करमार्गस्य अनुष्ठानं नाम कल्याणाभिनिवेश: । अनेन चिरकालीनं श्रेयस्त्वं प्राप्यते

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – कल्याणं नाम हितोपसेवनम् । तस्य अभिनिवेशेन आरोग्यलक्षणरुपि श्रेयस्त्वं प्राप्यते ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

अमलं सत्त्वम् अविकारेण

चक्रपाणि: – रागद्वेषभावानाम् अभावेन सत्त्वगुणभावत्वस्य अनुमानं करणीयम् ।

गङ्गाधर: – मनस: निर्मलत्वस्य परीक्षणं मनोविकाराणाम् अभावेन । अद्वैधेन करणीयम् ।

योगीन्द्रनाथसेन: – मनोविकारा: नाम कामक्रोधादय: । तेषाम् अभाव: नाम अविकार: । तस्मात् निर्विकारस्य अमलस्य शुद्धस्य रजतमदोषेभ्य: विनिवृत्तस्य सत्वस्य परीक्षणं करणीयम् ।

ज्योतिषचन्द्र सरस्वति: – अमलत्वं नाम रजतमोरहितम्

ग्रहण्या: तु मृदुदारुणत्वम्

चक्रपाणि: – ग्रहण्या: मार्दवत्वं दारुणत्वं च यद्यपि अनुमानेन परीक्षितुं शक्यम् तथापि अनुमाने अधिका: बुद्धिप्रयासा: आवश्यका: तस्मात् सुखोपचारिण्या प्रश्नपरीक्षया अपि परीक्षा करणीया ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – ग्रहणी अग्न्यधिष्ठानभूता नाडी ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

स्वप्नदर्शनम्

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – आतुरस्य हिताहितस्वप्नदर्शनम् अनुमानेन प्रश्नपरीक्षाद्वारा परीक्षणीयम् ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

अभिप्राय:

चक्रपाणि: – भोजने इच्छा इति अभिप्राय: ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – चक्रपाणिसमानं वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

द्विष्ट – इष्ट सुखदु:खानि

चक्रपाणि: – द्विष्टम् – द्वेषयुक्तम् । इष्टम् – अभीप्सितम् ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – द्विष्टम् – अप्रियम् ।

ज्योतिषचन्द्र सरस्वति: – टीका नास्ति ।

चरक: – ग्रहण्या: मृदुदारुणत्वं स्वप्नदर्शनम् अभिप्राय: द्विष्टेष्टसुखदु:खानि च इत्यादीनां परीक्षणम् अनुमानेन सह प्रश्नपरीक्षया अपि कर्तव्यम् ।

चक्रपाणि: – शब्दार्थ:

गङ्गाधर: – अस्य वर्णनं कुर्वता गंगाधरेण सुश्रुतस्य विशिखानुप्रवेशनीय अध्यायगतं संदर्भं दत्वा प्रश्नपरीक्षा अनुमानपरीक्षा च एकत्र कृत्वा तयो: निश्चय: करणीय: इति वर्णितम् ।

योगीन्द्रनाथसेन: – आतुरं प्रश्नान् पृष्ट्वा परीक्षणीयम् ।

ज्योतिषचन्द्र सरस्वति: – प्रश्नपरीक्षां कृत्वा आतुरस्य उत्तरेभ्य: अनुमानप्रमाणं योजयित्वा निश्चय: करणीय: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

उपाधिकरणम् ४ – परीक्षाणां फलं / परिणाम: ।

सूत्राणि ९ त: १२

चरक: – विचक्षणेन वैद्येन आप्तोपदेशप्रत्यक्षकरण अनुमानद्वार्भिं व्याधिविषयकं यथायोग्यं ज्ञानं प्राप्तव्यम् । सर्वत: सर्वघटकान् परीक्ष्य यथासंभवं तद् तद् तत्वविषयक: निश्चय: करणीय: । तदनन्तरमेव चिकित्सा प्रारभ्या । एवं चिकित्सा तत्त्वस्य वैशिष्ट्यं ज्ञायमान: वैद्य: कदापि योग्ये ज्ञाने न मुह्यति । न संभ्राम्यति । प्रत्युत मूढ: वैद्य: ज्ञाने मोहग्रस्त: सन् तन्निमित्तं फलं प्राप्नोति । यथायोग्यं चिकित्सातत्त्वं ज्ञायमान: वैद्य: मोहनिमित्तं फलं कदापि न प्राप्नोति ।

– य: तत्त्वविद् ज्ञानबुद्धिरुपिण: दीपस्य साहाय्येन आतुरस्य अन्तरात्मनि न प्रविशति स तस्य रोगस्य चिकित्सां कर्तुं न शक्नोति ।

चक्रपाणि: – यथासंभवं यत्र येन प्रमाणेन परीक्षणं योग्यं तदनुसारं परीक्षणीयम् ।

– प्रत्येकया परीक्षया परीक्ष्य पश्चात् व्याधितत्त्वे चिकित्सायां च निश्चयं कृत्वा साध्या: व्याधय: चिकित्सितव्या: । व्याधितत्त्वं यादृशं स्यात् तादृशं कार्यम् ।

– सर्वेषां परीक्षणीयभावानां परीक्षां कृत्वा पश्चादेव चिकित्साकार्यं प्रारभणीयम् ।

– कार्यतत्त्वविशेषस्य निश्चयस्य फलम्  – स वैद्य: प्रतिपत्त्यां न मुह्यति ।

– प्रतिपत्ति: नाम चिकित्सायां यथायोग्यम् अनुष्ठानम् ।

– अमूढ: इति प्रतिपत्तौ अमूढ: । यथोचितं चिकित्साकार्ये य: प्रमादं न करोति स अमूढ: ।

– ज्ञानबुद्धि: ज्ञानं शास्त्रम् । तत्कृता बुद्धि: ज्ञानबुद्धि: । शास्त्रस्य परिपूर्णेन अभ्यासेन या निर्मला बुद्धि: प्राप्यते सा ज्ञानबुद्धि: इति उच्यते । शेषा टीका शब्दार्थ: ।

<u>गङ्गाधर:</u>

– परीक्षाणां चिकित्साफलम् अस्मिन् अधिकरणे वर्णितम् ।

– अस्मिन् गंगाधरेण एते सूत्रसमूहा: चतुर्षु भागेषु विभाजिता: ।

– आप्तत: .... यथासंभवमर्थवित् – प्रथम: छेद: ।

– अथाध्यवसेत् त: ... न मुह्यति – द्वितीय: भेद: ।

– अमूढत: ... अमोहनिमित्तजम् – तृतीय: छेद: ।

– ज्ञानबुद्धित: ... न स रोगांश्चिकित्सति । चतुर्थ: छेद: ।

<u>योगीन्द्रनाथसेन:</u> –

– य: कार्यतत्त्वविशेषज्ञ: अस्ति सैव भिषक् ।

– मोह: प्रमादम् ।

– योगविद् प्रयोगविद् च अपि य: वैद्य: ज्ञानसहितेन बुद्धिरुपिणा दीपेन (पदार्थदर्शनहेतुत्वेन ) आतुरस्य अन्तरात्मनि (आतुरगता: सर्वे ज्ञेय भावा:) न प्रविशन्ति ।

– चिकित्साबुद्ध्या आतुरगतानां सर्वाणि ज्ञेयानि परीक्ष्यभावान् परीक्ष्य च चिकित्सां क्रियते तदा सा यशस्विनी भवति ।

<u>ज्योतिषचन्द्र सरस्वति:</u>

– यथासम्भवम् इत्यस्य अर्थ: यत्र यद् प्रमाणं योग्यं तत्र तस्य उपयोग: करणीय: ।

उदाहरणार्थम् रसज्ञानम् अनुमानप्रमाणेन कर्तव्यम् अपि च इतराणाम् इन्द्रियार्थाणाम् ज्ञानं प्रत्यक्षप्रमाणेन प्राप्तव्यम्

– अत्र तत्वम् इति व्याधिनिर्णय: । व्याधिनिर्णये निश्चयात्मिकया बुद्ध्या अध्यवसाय: करणीय: तथैव चिकित्सातत्त्वे अपि अध्यवसाय: करणीय: ।

– वैद्य: व्याधे: तत्वपरिज्ञानं तथा चिकित्सातत्वपरिज्ञानं उभयं जानीयात् ।

– ज्ञानबुद्धि: – शास्त्रज्ञानजन्या बुद्धि: ।

– आतुरस्य अन्तरात्मनं प्रविश्य इत्यस्य अर्थ: आतुरस्य अन्त:शरीरं अप्रत्यक्षम् अस्ति अत: तद् तमोगृहवत् भवति । शास्त्रजन्यबुद्धिसाहाय्येन शरीरगतां विकृतिं ज्ञात्वा एव पश्चात् चिकित्सा करणीया ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् २

## अध्याय उपसंहार: ।

### सूत्रे १३, १४

चरक: – सर्वेषां रोगाणां विशेष: त्रिविधज्ञानसंग्रह: । यथा आप्तोपदेश: प्राप्त: तथा प्रत्यक्षाधारेण गृहीतम् अनुमानेन ज्ञातम् तथा तेषां भावानां महर्षिणां आत्रेयेन अस्मिन् त्रिविधरोगविज्ञानविमाने वर्णितम् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अध्यायार्थस्य उपसंहार: । अधिकरणानां वर्णनम् ।

योगीन्द्रनाथसेन: – अध्यायार्थस्य संग्रह: ।

– त्रिविधज्ञानसंग्रह: त्रिविधप्रमाणसंग्रह: ।

ज्योतिषचन्द्र सरस्वति: – अध्यायार्थं निवेद्य अध्यायं समापयति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

# अध्याय ५

# स्त्रोतोविमानम्

– त्रिविधरोगविशेषविज्ञानीयम् इति अध्यायानन्तरं तथा रोगानीकं विमानम् अध्यायात् प्राक् ‘स्त्रोतसां विमानम्’ अध्याय: वर्णित: अस्ति ।

– चम्पूग्रन्थप्रकारवत् वर्णनं नाम गद्यपद्यात्मकं वर्णनम् ।

– पद्यम् – अनुष्टुपछन्दस: उपयोग: ।

– गद्यम् – चूर्णकं मुक्तकं च एतयो: शैल्यां रचना ।

– रीति: – पदानां संघटनम् – पद्ये – लाटिका । गद्ये– वैदर्भी लाटिका च ।

इति शैल्यां कृतम् अस्ति ।

– तन्त्रयुक्ते: उपयोग: – अधिकरण: पदार्थ: हेत्वर्थ: अतीतावेक्षणम् , अनुमतम् ।

– चतस्त्र: अपि टीका उपलब्धा: । सूत्राणां क्रम: समान: । पाठभेदानि अस्ति ।

अस्य अध्यायस्य अधिकरणानुसारेण मिलित्वा नवम: विभागा: कर्तुं शक्या: । तदनुषंगेण चर्चा: क्रियते ।

१) स्त्रोतस: संकल्पना ।

२) त्रयोदश स्त्रोतसां मूलस्थानानि । दुष्टिलक्षणानि ।

३) स्त्रोतसां पर्याया: दुष्टि: च ।

४) त्रयोदश स्त्रोतसां दुष्टिहेतु: ।

५) स्त्रोतसां सामान्यदुष्टिहेतु: लक्षणं च ।

६) स्त्रोतसां स्वरुपवर्णनम् ।

७) स्त्रोतोदुष्टिचिकित्सा ।

८) उपसंहार: ।

९) स्त्रोतोमहत्वम्।

## अधिकरणम् प्रथमम्

## स्त्रोतस: संकल्पना

अस्मिन् अधिकरणे अग्रीमा: ६ उपाधिकरणानि समाविष्टा: ।

अ) स्त्रोतस: संकल्पना – मूर्तद्रव्याणां स्त्रोतसामेव वर्णनम् ।

ब) परिणमनं प्राप्यानां धातूनाम् अभिवहनम् ।

क) स्त्रोतसां संख्येयत्वम् ।

ड) स्त्रोतमयपुरुषस्य विचार: तस्य खण्डनं च ।

इ) यथास्थूलं स्त्रोतोप्रकारा: – बुद्धिमताम् अज्ञानां च कृते ।

ई) स्त्रोतसां प्राकृत – वैकृतत्वम् ।

अध्यायस्य प्रथमे १ त: ७ सूत्रेषु एतेषां विषयाणां वर्णनमस्ति । तेषां तथा तद्‌गते अस्माकम् अध्ययने समाविष्टानां चतुर्णां टीकानाम् ऊहापोहं कुर्म: ।

गद्यसूत्रम् : अथातो स्त्रोतसां विमानम् अध्यायं व्याख्यास्याम: । इति ह स्माह भगवानात्रेय: ।

– अस्य व्याकरणीयं विवेचनं पूर्वं वर्णनं कृतं तद्नुसारं 'स्त्रोतसां विमानम्' इति विशेषाध्यायस्य नाम अस्ति । यदा अध्यायस्य अथवा अनुवाच: (प्रतिदिनं वेदपठणस्य भाग:) विषय: स्यात् तर्हि तं विषयं 'छ' प्रत्यय: नाम 'ईय' प्रत्यय: लगति । उदाहरणार्थं 'दीर्घञ्जीवितीय'. स: विषय: ज्ञानीय: इति यदि हेतु: स्यात् तर्हि 'छ' प्रत्ययस्य लोप: भवति एव ।

– एषा एव अवस्था 'स्त्रोतसां विमानम्' अत्र घटिता अस्ति ।' स्त्रोतसां विमानीयम्' एवं न भूत्वा विमानम् इति भूतम् । यत: रोगपरीक्षार्थं शारीरभावानां ज्ञानं प्राप्तव्यम् इति अस्य अध्यायस्य हेतु: अस्ति ।

– रोगपरीक्षण विषयार्थं शारीरभावानां ज्ञानं प्राप्तव्य इति हेतु: अत: 'छ' प्रत्ययस्य लोप: जात: । अत: ' स्त्रोतसां विमानम् अध्यायम् ' इति अध्यायस्य अभिधानम् अभवत् ।

–'स्त्रोतसां' रुपं स्त्रोतस् इति नपुंसकलिंगस्थस्य सकारान्तपदस्य षष्ठ्या: विभक्ते: बहुवचनमस्ति । वाक्ये यदा यद् पदं कर्ता, कर्म, क्रियापदम् अपादानम् अधिकरणं संप्रदानं न भवति तदा तस्य षष्ठी विभक्ति: भवति ।

– पाणिनिः – षष्ठी शेषे । (कारकप्रकरणम्) स्त्रोतसां विमानम् एष अध्यायस्य विषयहेतुः ।

– अस्य अध्यायस्य नाम अतीव वैशिष्ट्यपूर्णमस्ति । ग्रन्थकारैः उपयोजितात् व्याकरणात् वयं शब्दार्थम् अभिप्रेतार्थं च उत्तमतया ज्ञातुं शक्यम् । विषयं तस्य हेतुं च एतयोः ज्ञानं उत्तमतया भवितुं शक्यम् । अस्मिन् सूत्रे अध्यायस्य नामतः अस्माभिः विषयहेतुः ज्ञातः । तत्र टीकाकारैः अधोक्तं विवेचनं कृतमस्ति ।

चक्रपाणिः – रोगपरीक्षा पूर्वे अध्याये वर्णिता । एषा परीक्षा यस्मिन् करणीया तेषां शरीरस्थानां प्राकृतविकृतयोः स्त्रोतसोः विभागशः वर्णनार्थम् अस्य अध्यायस्य वर्णनम् ।

गङ्गाधरः – शारीरभावानां मानविज्ञानार्थम् अध्यायविवेचनम् ।

योगीन्द्रनाथ सेनः – जीवितायनस्वरुपस्य प्राणादिवहानां स्त्रोतसां मूलादीनां विशेषज्ञानार्थं एषः अध्यायः वर्णितः ।

ज्योतिषचन्द्र सरस्वतिः – पूर्वाध्याये वैद्यः बुद्धिपूर्वकम् आतुरस्य अन्तःशरीरस्य परीक्षणं कुर्यात् इति उक्तम् । परंतु अन्तः शरीरस्य ज्ञानं विना परीक्षणम् अशक्यम् । अतः ज्ञानार्थं शरीरस्य अन्तःस्थानां असंख्यानां स्त्रोतसां ज्ञानापेक्षया अस्य अध्यायस्य विवेचनं कृतमस्ति ।

– चतस्त्रु टीकासु विशेषं वैधर्म्यं नास्ति केवलं कालतः यद् वैचारिकम् अन्तरम् जातं तद् दृश्यते ।

– गङ्गाधरेण अधिकं विवेचनं न कृतम् । परं ज्योतिषचन्द्रसरस्वतेः टीका अत्र विशेषा अस्ति । शरीरस्थानां केवल अन्तःस्थानां स्त्रोतसां वर्णनम् इति उद्देशेन बहिर्मुखिषाः नव स्त्रोतसां व्यवच्छेदः अत्र कृतः । तथा तस्य ज्ञानस्य उपयोगः रोगपरीक्षणाथम् एवं पूर्णतः (चिकित्साधिकृतविषयः) अस्ति । अस्य गद्यसूत्रस्य टीकायां ज्योतिषचन्द्रसरस्वतिना स्त्रोतसः परिभाषा वर्णिता अस्ति या अतीव सुबोधा स्पष्टा च ।

'' स्त्रोतः शब्दोऽत्र यत्किञ्चिदभिवाहिप्रणालिसामान्यवाची ।''

– यद् किञ्चिद् वाहिप्रणालिः (सिस्टम्) तद्वाचकः 'स्त्रोतः' शब्दः अत्र प्रतिपादितः अस्ति ।

– अतः अस्य अध्यायस्य प्रथमे अधिकरणे स्त्रोतसां संकल्पनानां विचारः अस्ति स वयं क्रमशः पश्यामः ।

सूत्रम् – यावन्त: पुरुषे मूर्तिमन्तो भावविशेषा: । तावन्त एवास्मिन् स्त्रोतसां प्रकारविशेषा: ।।

विमर्श: – 'स्त्रोतसां विमानम्' इति अध्याये प्रथमे अधिकरणे एतत् महत्वपूर्णं सूत्रं वर्तते । अध्यायस्य प्रारम्भे अध्यायस्य उद्देशं स्पष्टं कुर्वद्भि: चतुर्भि: टीकाकारै: कथितं यत् अयम् अध्याय: रोगपरीक्षाया: अनुषङ्गेण शारीरभावानां परीक्षणार्थं तथैव मानज्ञानार्थं वर्णित: ।

– सूत्रमिदम् सैद्धान्तिकतया महत्वपूर्णम् अस्ति एव अपि तु चिकित्सकीयया दृष्ट्या अपि महत्वं भजते ।

– ज्योतिषचन्द्रसरस्वतिना गद्यसूत्रस्य टीकायां यथा उक्तं यत् स्त्रोतस् इति पदं वाहिप्रणालिवाचक: नाम (चॅनल्स ) इति अस्ति ।अयमेव अर्थ: शब्दकोशेभ्य: मान्य: अस्ति इति वयं दृष्टवन्त: ।

– अध्यायस्य प्रथमे एव अधिकरणे प्रथमं सूत्रं शरीरगतानां स्त्रोतसां संकल्पना स्पष्टयति । अस्मिन् सूत्रे चतुर्भि: अपि टीकाकारै: समाना एव टीका कृता । केवलं वर्णनपद्धति: शब्दप्रयोगा: च एतेषु किञ्चित् भिन्नता वर्तते ।

– विशेषत: 'मूर्तिमन्त भावविशेषा: ' इत्यस्य टीकायाम् एतयो: पदयो: विभिन्ना: अर्थांशा: दृश्यन्ते परन्तु यदि ते एकत्रिता: तर्हि एकस्य एव गोष्टे: एकसंन्धं स्वरुपं तथा तेषां विभिन्ना: अर्थच्छटा: दृश्यन्ते । गङ्गाधरेण अस्मिन् अधिकं वर्णनं अकृत्वा वात: आकाशम् इत्यादीनि द्रव्याणि सर्वेषु स्त्रोतस्तु व्याप्ता: सन्ति ।

तेन केवलं मूर्तिमतां भावानामेव वर्णनं कृतम् ।

– चक्रपाणिना 'मूर्तिमन्त' पदस्य व्याख्या अतीव रमणीया कृता ।

स वदति 'असर्वगतद्रव्यपरिमाणं हि मूर्तिरुच्यते ।'

असर्वगतानां (अव्यापकानां) द्रव्याणां परिमाणं नाम मूर्ति: । तथा यत्र एतत् वर्तते तद् मूर्तिवत् । असर्वगतं नाम यानि द्रव्याणि न सर्वव्यापीनि अथवा सर्वगतानि अव्यापकानि सन्ति ।

– योगीन्द्रनाथसेनेन 'मूर्तिमन्तम्' इत्यस्य वर्णनं मूर्तं परिमाणं सत् इत्येव कृतम् ।

– ज्योतिषचन्द्रसरस्वतीना आकाशादिभ्य: व्यवच्छेद: अस्ति तद् द्रव्यम् इति वर्णितम् ।

– अपि तु 'भावविशेष:' इति पदस्य व्याख्या चक्रपाणिना 'उत्पत्तिमन्तविशेषा:',योगीन्द्रनाथसेनेन पदार्थविशेषा: तथा ज्योतिषचन्द्रसरस्वतीना 'उत्पत्तिशीलद्रव्यम्' इति व्याख्या वर्णिता अस्ति ।

– गङ्गाधरेण अस्य पदस्य व्याख्या न कृता

– स्थूलदृष्ट्या एता: व्याख्या: भिन्ना: भासन्ते । परं सूक्ष्मचिकित्सया दृष्ट्या यदि दृश्येत् तर्हि ता: एकस्य एव विचारस्य विभिन्ना: छटा: दृश्येत् ।

सारांश: – शरीरे यावतां भावपदार्थानां (उत्पन्तुं शक्यानां पदार्थविशेषाणां) मूर्ति: अस्ति ।अस्यार्थ: ये पदार्था: अव्यापका: सन्त: मूर्तं परिमाणं भजन्ते तेषां सर्वेषां स्त्रोतसां प्रकारविशेषा: सन्ति ।

– ज्योतिषचन्द्रसरस्वतीना अस्मिन् सूत्रे विशेषं भाष्यं कुर्वता इति उक्तं यत् मूर्तिमन्तं पदेन येषां मूर्ति: नास्ति एतादृशेभ्य: आकाशादिभ्य: सर्वव्यापकेभ्य: भावविशेषेभ्य: व्यवच्छेद: कृत: । तथैव मन: सदृशान् इन्द्रियान् अप्रत्यक्षं विभु: इति भावविशेषेभ्य: अपि व्यवच्छेद: अभवत् । अस्य अध्यायस्य अधिकरणं रोगपरीक्षाया: साध्यभूतानां शारीरभावानां मानं ज्ञातव्यम् इति अस्ति । अत्र केवलं मूर्तिरुपाणां देहधातूनां स्त्रोतसां वर्णनं कृतम् ।

चतसृणां टीकानां परिशीलनोत्तर: निष्कर्ष: –

१) शरीरस्था: यावतिया: भावविशेषा: एकस्या: प्रणाले: सर्वस्मिन् शरीरे परिभ्रमणं कुर्वन्ति ।

२) मन: सदृशानि इन्द्रियाणि अप्रत्यक्षवत् भावपदार्थानां स्त्रोतांसि सन्ति । ( ज्यो. स. )

३) केवलम् अध्यायस्य उद्देशानुसारम् अधिकरणतन्त्रयुक्त्यनुसारं केवलं मूर्तानां असर्वगतानां अव्यापकानां उत्पत्तिशीलानां देहधातूनां स्त्रोतांसि अस्मिन् अध्याये वर्णितानि ।

– अभ्यासकदृष्ट्या अस्य सूत्रस्य चतसृषु अपि टीकासु अहं कानिचन् न्यूनानि मन्ये ।चतुसृणां अपि टीकानां संपूर्णश: सर्वस्थानानां परिशीलनं कृत्वा अपि गङ्गाधरं योगीन्द्रनाथसेनं च वर्जयित्वा अन्यै: टीकाकारै: अस्मिन् विषये गभीरं वर्णनं न कृतम् । तद् आवश्यकमस्ति इति अहं मन्ये ।

मह्यं भासमानानि न्यूनानि –

१) मूर्तिमत् पदस्य व्याख्या विस्तृता नास्ति: । विस्तार: आवश्यक: ।

२) अनेन अनुषङ्गेण देहधातूनां परमाणुस्वरुपत्वं वर्णनीयम् ।

३) यद् सृष्ट्याम् अस्ति तद् शरीरे भवति अनेन न्यायेन देहधातूनां वर्णनम् ।

एतद् वर्णनं किमर्थं न कृतं स्यात् इत्यस्य मम मतेन कारणानि –

१) विषयस्य अधिकरणं स्त्रोतसविमानम् अस्ति । तेन तस्य विषयस्य अनुषङ्गेण एव वर्णनम् ।

२) तस्मिन् काले दर्शनशास्त्रादीनां पूर्वाभ्यासानन्तरं छात्रा:/विद्यार्थिन: आयुर्वेदस्य अध्ययनं कुर्वन्ति स्म । तेन अस्मिन् विषये ते छात्रा: पूर्वमेव ज्ञानसम्पन्न: सन्ति स्म ।

– अत्र मह्यं भासमानां न्यूनानाम् ऊहापोहम् अहं करोमि । अस्मिन् मूर्तिमान् नाम परमाणुस्वरुपाणां भावविशेषाणां वर्णनम् आवश्यकम् आसीत् ।

– चक्रपाणिना 'असर्वगतद्रव्यपरिमाणवन्त:' योगीन्द्रनाथसेनेन 'मूर्त:' अपि तु ज्योतिषचन्द्र सरस्वतीना गङ्गाधरेण च वाय्वाकाशमनांसि एतादृशं सर्वव्यापिभि: इन्द्रियाणां अप्रत्यक्षं एतादृशेभ्य: भावविशेषेभ्य: भिन्नम् इति 'मूर्तिमन्त:' पदस्य वर्णनं कृतम् । तर्हि निश्चितरुपेण किम्? अस्य अधिक: आवश्यक: आसीत् इति अहं मन्ये ।

– चरकाचार्येण शारीरस्थानस्य सप्तमे अध्याये सर्वेषां शारीरभावानां परमाणुस्वरुपत्वं स्पष्टं वर्णितम्

'' शरीरावयवास्तु परमाणुभेदेनापरिसंख्येया भवन्ति अतिबहुत्वादतिसौक्ष्मादतिन्द्रियत्वाच्च ।''

च. शा. ७ । १७

शरीरस्य सर्वे अवयवा: नाम भावविशेषा: परमाणुभेदेन अपरिसंख्येया: सन्ति । इत्यर्थ: शरीरगता: सर्वे भावपदार्था: परमाणुस्वरुपा: सन्ति । ते अतिसूक्ष्मअतीन्द्रियअतिबहुलत्वात् गणयितुं अशक्या:

– चक्रपाणिना अस्य सूत्रस्य टीकायां यथा गङ्गायां वालुकाकणा: संख्याबहुला: तथा शरीरस्य देहधातव: परमाणुस्वरुपेण अतिबहुला: सन्ति । तथैव मूर्तिमान् नाम यद् असर्वगतम् इति व्यापकम् इति कथयता ते परमाणुस्वरुपा: सन्ति इति कथनम् अतीव`आवश्यकम् आसीत् ।

– शरीरगता: यावतिया: भावविशेषा: परमाणुस्वरुपिण: सन्ति । एतेषां परमाणूनां सङ्घटनं संयोगं विभागं च एष: वायु: करोति तथैव एतेषां परमाणूनां संयोगविभागौ कर्तुं कर्मस्वभाव: वायुं प्रेरयति । कर्मस्वभावेन एव वायु: परमाणूनां संयोगाय प्रेरित: भवति तदा शरीरनिर्मिति: भवति । तथा च कर्मप्रेरणया वियोगस्य कारणं यदा भवति तदा अपवर्ग: नाम मोक्ष: भवति इति अत्र चरकाचार्य: स्पष्टयति । चतुर्भि: अपि टीकाकारै: अस्मिन् समाना एव टीका कृता अस्ति ।

– अधुना एते परमाणव: संयुज्य यावत् तेषां देहधातुनां अवयवानां च स्वरुपं भविता तदन्तरे भूतनिर्मिति: भूतान्तरप्रवेश: इत्यादय: प्रक्रिया: घटन्ते इति अध्याहृतम् ।

– शारीरस्थाने लोकपुरुषसाम्यसिद्धान्तः वर्णितः । अतः सृष्टिनिर्मितिसमये यः प्रकृतिपुरुषसिद्धान्तः वर्णितः स एव सिद्धान्तः शरीरनिर्मितिसमये अपि प्रवर्तते ।

– शुक्रशोणितयोः प्राकृता अथवा विकृता स्थितिः नाम प्रकृतिः । तया सह जीवात्मनः नाम पुरुषेण सह संयोगेन अव्यक्तम्–महत्–अहङ्कारः अनेन क्रमेण एकादशइन्द्रियाणां पञ्चमहाभूतानां च निर्मितिः भवति । ततः सर्वाणि शरीराणि निर्मीयन्ते ।

– तथैव एते परमाणुस्वरुपाः शरीरधातवः घटकाः सर्वस्मिन् शरीरे अखण्डसञ्चारिणः सन्ति । दोषादयः सर्वे घटकाः न कदापि एकस्मिन् स्थाने स्थिरायते सूक्ष्मे परमाणुस्वरुपे ते सर्वशरीरसञ्चारिणः सन्ति । अस्यापि वायुः एव प्रेरकः ।

– अतीतावेक्षण अनागतावेक्षणम् एतयोः तन्त्रयुक्त्योः परिशीलनम् अत्र दृश्यते ।

''सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरीरे कुपिताकुपिताः शुभाशुभानि कुर्वन्ति ।''

च. सू. २० । ९

''व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा । युगपत् सर्वतोऽ जस्त्रं देहे विक्षिप्यते सदा ।।

क्षिप्यमाणः खवैगुण्याद्रसः सज्रति यत्र सः । करोति विकृतिं तत्र खे वर्षमिव तोयदः ।।

दोषाणामपि चैवं स्यादेकदेशप्रकोपणम् ।'' च. चि. १५ । ३६ – ३७

''वातपित्तकफादेहे सर्वस्त्रोतो ऽनुसारिणः ।।' च. चि. २८ । ५६

–सूत्रस्थाने विंशेअध्याये त्रिदोषाः सर्वशरीरचराः सन्ति । तथा चिकित्सास्थाने वातव्याधिचिकित्सा अध्याये त्रिदोषाः सर्वेषु स्त्रोतस्सु अनुचराः नाम सततं भ्रमन्तः सन्ति इति स्पष्टं वर्णनं कृतम् ।

– ग्रहणीचिकित्सायां व्यानात् रसधातोः सर्वशरीरे भ्रमणं भवति इति वर्णनानन्तरं 'दोषाणाम् अपि चैव ' इति उक्त्वा दोषाः अपि सर्व शरीरे युगपत् सर्वतः अजस्त्रं परिभ्रमणं कुर्वन्ति ।

– '' सर्वशरीरचरास्तु वातपित्तश्लेष्माणः'' अस्मिन् सूत्रे अतिदेशतन्त्रयुक्तेः उपयोगं कृत्वा यथा दोषाः सर्वशरीरचराः सन्ति तथा यावतियाः भावपदार्थाः सर्वशरीरचराः सन्ति इति प्रतिपादितुं शक्यम् ।

– अतः शरीरस्थाः सर्वे भावपदार्थाः परमाणुस्वरुपाः सन्ति अपि च सर्वशरीरे सततं परिभ्रमन्ति ।

– इदं ‘मूर्तिमन्त: भावविशेषा:’ अधिकं गहने विवेचनं जातम् । येभ्य: परमाणुस्वरुपिणी मूर्तता अस्ति ये परिभ्रमन्ति च तेषां सर्वेषां स्त्रोतांसि सन्ति ।

– अध्यायस्य अधिकरणं रोगपरीक्षा यस्मिन् शरीरे करणीया तस्य शरीरस्य भावानां विशेषमानार्थम् इति अस्ति । तस्मात् शरीरगता: ये भावपदार्था: अमूर्ता: तेषां स्त्रोतांसि सन्ति तथापि तेषां वर्णनम् अस्मिन् अध्याये न कृतम् ।

– बुधा: तं विनिश्चिन्वन्तु । एष: तु भिन्न: अभ्यासविषय: । अस्मिन् विचारे अधिक: अभ्यास: आवश्यक: । संशोधनगतमेतत् एकम् अस्पृष्टं क्षेत्रमस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

सूत्रम् – सर्वे हि भावा: पुरुषे नान्तरेण स्त्रोतांस्यभिनिर्वर्तन्ते , क्षयं वा ऽ प्यधिगच्छति । स्त्रोतांसि खलु परिणाममापद्यमानानां धातुनामभिवाहीनि भवन्त्ययनार्थेन ।।३।।

अस्मिन् सूत्रे योगीन्द्रनाथसेनेन भिन्न: पाठ: स्वीकृत: स यथा

‘‘ सर्वे: भावा: पुरुषे नान्तरेण स्त्रोतांस्यभिवर्तन्ते ।

– परं केवलं भिन्नं क्रियापदं यद्यपि योजितं तथापि विषयार्थे अधिक: भेद: न दृश्यते । चतुर्भि: टीकाकारै: अस्मिन् सूत्रे कृता टीका समाना एव ।

– शरीरगता: यावतिया: भावपदार्था: परमाणुस्वरुपिण: सर्वशरीरसञ्चारिण: सन्ति तथा ते स्त्रोतस्तु अभिवहन्ति अत: पुरुषगतांना सर्वेषां भावपदार्थानां वर्धनक्षयौ उभौ अपि विना स्त्रोतोभि: न भवत: । सर्वेषां भावपदार्थानां क्षयवृद्धिभ्यां स्त्रोतांसि आवश्यकानि ।

– अत्र योगीन्द्रनाथ सेनेन विशेषा टीका कृता अस्ति ।

– ‘‘ तेषां वृद्धिक्षयौ यथा स्वं स्त्रोतोभि: पूरणापूरणाभ्यां ’’ ।

– धातूनां पूरणापूर्णेन तेषां क्रमेण वृद्धिक्षयौ भवत: ।

– अनया विशेषया टीकया पुन: अस्माकं विचार: पुष्यति यत् धातव: पूरिता: भवन्ति तथा तेषां पूरणं न भवति । अस्यार्था: ते परमाणुस्वरुपिण: तथा सञ्चारिण: सन्ति ।

– अत्र वस्तुत: टीकाकारै: अधिकं वर्णनीयं इति अपेक्षा आसीत् । तद् वर्णयितुम् अहं प्रयते ।

– तदर्थं वातव्याधेः सामान्यसम्प्राप्तेः विचारं वयं करवाम ।

देहे स्त्रोतांसि रिक्तानि पूरयित्वा ऽ निलो बलि ।

करोति विविधान् व्याधीन् सर्वाङ्गैकाङ्गसंश्रितान् ।। ( च. चि. २८ । १८ )

रिक्तानि इति तुच्छानि , स्नेहादिगुणशून्यानि ।(चक्रपाणि टीकाः)

– यदा शरीरगतेषु स्त्रोतस्सु स्नेहोष्णगुरुमृदुपिच्छिलादयः गुणाः ह्रसन्ति । ते स्नेहादिगुणशून्याः भवन्ति इत्यर्थः रुक्षादिगुणैः युक्ताः । तदा एतादृशेषु स्त्रोतस्सु बलवान् वायुः (स्वगुणैः बलिनः भूतः वायुः) अन्यदोषधातुघटकान् पूरयति नाम तान् तेषु रुक्षदिगुणयुतेषु स्त्रोतस्सु स्थापयति । तदा येः घटकाः पूरिताः स्युः तेषां स्वरुपानुसारं सर्वांगा अथवा एकांगसंश्रिता वातव्याधिः भविष्यति ।

उदाहरणार्थम् – एकस्मिन् पक्षे स्त्रोतांसि रुक्षादिगुणयुताः अभविष्यन् तर्हि बलवान् वायुः तत्र पूरणं कृत्वा 'पक्षवधा' व्याधिः निर्मास्यति । परन्तु वायुः यान् घटकान् तत्र पूरयिष्यति तस्य स्वरुपानुसारं पक्षवधः भवेत् । इत्यर्थः व्याधिः पक्षवधा परं पित्तस्य पूरणं स्यात् चेत् लक्षणानि भिन्नानि । रसस्य आमस्य रक्तस्य मांसस्य मेदसः शुक्रस्य परमाणूनां पूरणं स्यात् तर्हि भिन्नानि भिन्नानि लक्षणानि भविष्यन्ति ।

– संभवतः योगीन्द्रनाथसेनाय एवमेव विवेचनं अपेक्षितं स्यात् परन्तु तेन तत् अधिकविस्तारेण करणं अभिप्रेतम् आसीत् ।

– अनया एव पद्धत्या अन्येषामपि सम्प्राप्तीनां विचारः क्रियते ।

– अन्यैः अपि टीकाकारैः एवमेव विवेचितम् । इतः पश्चात् स्त्रोतसां सङ्कल्पनायाः अन्या एका छटा वर्णिता । स्त्रोतः इति कं वदाम? कानि तस्य वैशिष्ट्यानि लक्षणानि च ? अस्मिन् विषये अस्मा त् सूत्रात् ज्ञानं भवति ।

– 'परिणाममापद्यमानानां धातूनां' अस्मिन् संज्ञायां विस्तृतं विवेचनं अत्यावश्यकमस्ति । यद् टीकाकारैः सम्यग् कृतम् । परं कश्चन अंशस्य विमर्शनम् अधिकम् आवश्यकम् आसीत् । तद् अत्र भवतु इति प्रयतामहै ।

– पूर्वं टीकाकाराणां वचनं आलोक्यः पश्चात् पश्याम ।

– गंगाधरेण अतीव सुबोधा स्पष्टा च व्याख्या कृता यत् आहाररस: स्त्रोतसरुपं मार्गं विना परिभ्रमितुं न शक्नोति तथैव विना परिभ्रमणं तस्य उत्तरोत्तरं धातौ परिणमनम् अशक्यम् । उत्तरोत्तरं, धातौ परिणमने स: विभिन्नानि रुपाणि प्राप्नोति ।

– इत्यर्थ: धातूनां उत्पत्तिवहनपरिवहनार्थं स्त्रोतांसि आवश्यकानि ।

– योगीन्द्रनाथसेनेन अत्यन्तं मूलगामिनं महत्त्वपूर्णं च विवेचनं कृतम् अत्र ।

– धातूनां परिपाकं भूत्वा प्रसादमलरुपिणां धातूनां अभिवहनं कुर्वताम् अयनानां संज्ञा अस्ति ' स्त्रोतस् ' स्त्रोतस्सु धातूनां परिणमनं वहनं च उभये अपि भवत: ।

– एक: धातु: स्वीयम् आद्यं रुप परित्यज्य उत्तरोत्तरं धातुरुपं धारयति । एष: परिणामं आपद्यमान: धातु: इति उच्यते ।

– स्त्रोतस्सु स्वस्व धात्वाग्निना पूर्वे पूर्वे धातौ परिणमनं भूत्वा उत्तरोत्तरं धातुमध्ये रुपान्तरं भवति । एव धातु: एव धातो: आहार: भवति । तथा एषा प्रक्रिया स्त्रोतस्सु एव घटते स्त्रोतस्सु परिणमनं भावं भावं यथा कालम् आहारस्य सम्यक् पचनं भूत्वा धातूनाम् अपचय: न भवति ।

तथा धातूनां परिणमनोत्तरं प्रसादं रुपं मलरुपं च एतयो: प्रमाणं वयस: शरीरस्य च ।

– ज्योतिषचन्द्रसरस्वत्ये: टीका अपि एतादृशं विवेचनं करोति । तेन परिणाममापद्यमानस्य वर्णनं कुर्वता एवम् उक्तं सततं चयापचयेन अन्यथाभावं (अन्यस्वरुपं) प्राप्नुवतां देहधातूनां गमनागमनस्य अभिवहनं स्त्रोतोभ्य: एव भवति तत् त: एव तेषां स्थानान्तरं भवति ।

तेन अत्र चयापचयेन अन्यथाभावप्राप्ति: गमनपरिवहनं स्थानान्तरं च एतानि कर्माणि स्त्रोतोभ्य: भवन्ति इति विशेषवर्णनं कृतम् ।

– चक्रपाणे: टीका – उपरोक्तं विवेचनं अधिकतया भिन्नतया च प्रकाशयन्ति अस्ति । तेन धातूनां पोष्यपोषकत्वयो: विवेचनं कृतम् ।

– स्त्रोतोभि: एव धातुषु उत्तरधातो: पोषकांश: परिणमित: भवति ।

– धातो: स्त्रोतसि धात्वग्ने: प्रक्रियां भूत्वा स्वधातो: पोषणं तथा अग्रिमधातो: निर्मिती: पोषकभावेन उत्पद्यते । परन्तु विभिन्नानां धातूनां स्त्रोतसाम् आशय: (देश:) भिन्नत्वात् एकस्मिन् स्त्रोतसि स

एव धातु: पुष्यति न अन्य: धातु: । तस्मिन् तस्मिन् स्रोतसि तद् तद् धातु: पुष्यति । एतद् वर्णयता चरकेण अतीव सुन्दरा उपमा वर्णिता ।

‘ न ह्यभिन्नेन स्रोतसा भिन्नदेशवृक्षयो: सेचनमस्ति । ’

– एकस्या: कुल्याया: विभिन्नानां स्थानानां वृक्षाणां सिञ्चनं न भवति; तथैव एकस्मात् स्रोतस: अन्यधातो: वहनं परिणमनं च न भवति । तत्तद्धातो: स्वस्य विभिन्नानि स्रोतांसि सन्ति ।

अत्रैव चक्रपाणि: अपरस्य विशेष घटकद्वयस्य विवेचनं करोति ।

अ) सर्वेषु स्रोतस्सु दोषाणां गमनात् तेषां स्रोतसां पृथक् वर्णनं न कृतम् । अस्मिन् विषये पूर्वसूत्रस्य विवरणे कृते ऊहापोहे चरकाचार्येण स्वयमेव एकस्मिन् स्थाने अस्य स्पष्टं वर्णनं कृतम् ।

वातपित्तकफा देहे सर्वस्रोतोऽनुसारिण: ।। च. चि. २८/५६

आ) मनस: नित्यत्वात् तत्पोष्यं नास्ति । परं तत् इन्द्रियपर्यन्तं गन्तुं स्रोत: अस्ति । मनस्तु सर्वशरीरव्यापि तेन तस्य भिन्नं स्रोत: न वर्णितम् ।

– अधुना टीकाकाराणाम् अस्मिन् विवेचने ये महाविचारा: ते एवं सन्ति ––

(१) स्रोतस्सु एव धातूनाम् उत्पत्ति: वहनं परिणमनं स्थानान्तरं च प्रचलति ।

(२) एकस्मिन् धातौ: स्वधात्वग्निना परिणमनं भूत्वा उत्तरोत्तरं धातुरुपान्तरं भवन्ति ।

(३) धातवो हि धातवाहार: ।

(४) धातूनां परिणमनोत्तरस्य प्रसादरुपस्य मलरुपस्य च प्रमाणाय वयशरीरावस्थे कारणीभवत: ।

(५) ज्योतिषचन्द्रसरस्वतीना अन्यं धातुं प्रापणं इति ‘ अन्यथाभाव: ’ इति पदं योजितम् ।

(६) स्रोतस्सु धातुनां पोष्यपोषकांशयो: निर्माणं भवति ।

(७) सुश्रुतस्य स्रोतशिराधमनीनां विभिन्नत्वं चरकाय अमान्यम् । कारणं तेन चिकित्सादृष्ट्या धातूनाम् अभिवहनं कुर्वन्ती प्रणाली: इत्यर्थेन एता: तिस्र: संज्ञा विमर्शित: ।

अस्मिन् विवेचने अधिकानां घटकानां विवेचनम् आवश्यकम् आसीत् तेषां घटकानां विचारं करवाम् ।

– प्रसादमलभूतानाम् भावघटकानां वर्णनं केवलं यो सेनेन कृतम् । वस्तुत: यस्य वर्णनम् अस्मिन् स्थाने अत्यतम् आवश्यकम् आसीत् ।

– शरीरगुणा: पुनर्द्विविधा: संग्रहेण – मलभूता: प्रसादभूताश्च ।

तत्र मलभूतास्ते ये शरीरस्याबाधकरा: स्यु: । तद्यथा–शरीरच्छिद्रेषूपदेहा: पृथग्जन्मानो बहिर्मुखा: परिपक्वाश्च धातव:, प्रकुपिताश्च वातपित्तश्लेष्माण: ये चान्येऽपि केचिच्छरीरे तिष्ठन्तो भाव: शरीरस्योपघातायोपपद्यन्ते सर्वास्तान्मले संचक्ष्महे , इतरांस्तु प्रसादे गुर्वादींश्च द्रवान्तान् गुणभेदेन , रसादींश्च शुक्रान्तान् द्रव्यभेदेन ।। (च. शा. ६ / १७)

– इदं सूत्रम् अतीव सुस्पष्टम् । परिणमनोत्तरं शरीरस्य भावविशेषाणां प्रसादभूतं मलभूतं च रुपान्तरणं प्रचलति ।परिणमनं यदि योग्यरित्या भविष्यति तदा योग्यप्रमाणे प्रसादभूतं मलभूतं च स्वरुपम् उत्पद्यते । यदि तद् विकृतं भविष्यति तर्हि तस्य प्रमाणं विकृतं भवति ।

– यै: घटकै: शरीरे आबाध: उत्पद्यते उपघात: उत्पद्यते तान् मल: इति वक्तव्यम् । उदाहरणार्थं – बहिर्मुखे स्त्रोतसि उत्पद्यमाना: शरीरस्य छिद्रे उत्पद्यमाना: घटका: परिपक्वा: धातव: प्रकुपिता: त्रिदोषा: एते सन्ति । यस्मात् घटकात् शरीरस्य पोषणं भूत्वा वृद्धि: भविष्यति सर्वे क्रियाव्यापारा: प्रसन्नतया चलिष्यति ते प्रसादभूता: इति वक्तव्यम् ।

– एतेषां विवेचनं टीकाकारै: स्त्रोतसाम् अनुषंगेन करणीयम् आवश्यकम् आसीत् । एतद् भावविशेषाणां विशेषत: मूर्तिमताम् देहधातूनां परिणमनं भूत्वा पश्चात् तेभ्य: यथापरिणमनं योग्यायां मात्रायां प्रसादस्वरुपं मलस्वरुपं च प्रापणं तथा अग्रिमा क्रिया च इत्यपि विना स्त्रोतस: अशक्यम् । स्त्रोतस्सु एव एता: सर्वा: घटना: घटन्ते । अत: परिणमनापद्यमानानां धातूंना वर्णने तेषां प्रसादभूतस्वरुपस्य मलभूतस्वरुपस्य वर्णनम् आवश्यकम् अस्ति ।

''तत्राहारप्रसादाख्यो रस:.........।।'' (च. सू. २८/४)

एतद् सूत्रम् अतीव महत्त्वपूर्णमस्ति । अमुष्मिन् आहारस्य योग्यपरिणमनानन्तरं मलस्वरुपं किट्टं प्रसादस्वरुपा: रसा: च उत्पद्यन्ते । एतस्य घटकद्वयस्य योग्यायां मात्रायां उत्पत्ति: शरीरस्य उपष्टम्भाय आवश्यकी । प्रसादरुपै: रसै: रसत: शुक्र, ओज, पञ्चेन्द्रियद्रव्य, धातुप्रसादसंज्ञकस्य शरीरस्य सन्धिबन्धपिच्छादीनाम् अवयवानां पोषणं भवति । प्रत्युत किट्टांशेन स्वेदमूत्रपुरीषदोषस्वमलकेशलोमनखादीनां अवयवानां पोषणं भवति । एवम् एते सर्वे प्रसादाख्या: मलाख्या: च धातव: (शरीरस्य भावविशेषा:) यावत्तिया वय: शरीरावस्था च अस्ति तावत्

परिणमितं भूत्वा स्वस्य पोषणं कुर्वन्तः शरीरे स्वप्रमाणं निर्मीयन्ते । एवं रसमलयोः स्वस्वमानं स्थिरीकृत्य कार्यं सम्यक्रित्या घटित्वा 'धातुसाम्यं नाम शरीरस्थानां यावतियानां भावविशेषाणां समत्वं स्थिरी भवति एतद् एव आयुर्वेदस्य प्रयोजनम् । तथा च एतेभ्यः सर्वेभ्यः विमर्शविषयेभ्यः अनुपहतस्त्रोतसाम् आवश्यकता विद्यते । एतद् वर्णनं विमानस्थानस्य स्त्रोतोविमानस्य अस्य सूत्रस्य व्याख्यायां टीकाकारैः करणम् अभिप्रेतम् आसीत् ।

''परिणमतस्त्वाहारस्य गुणाः शरीरगुणभावमापद्यन्ते यथास्वमविरुद्धाः, विरुद्धाश्च विहन्युर्विहताश्च विरोधिभिः शरीरम् ।।'' च. शा. ६ / १६

परिणमनं भवतः आहारस्य गुणान् शरीरगुणानां स्वरुपं प्राप्नोति । आहारः पाञ्चभौतिकः वर्तते । बाह्यसृष्टिगतः पाञ्चभौतिकम् आहारं शरीरधातुघटकेषु निर्मितेः कृते तन्मध्ये योग्यं परिणमनं रुपान्तरणं च आवश्यकं भवति । स्थूलं वा द्रवम् आहारसेवनेन शरीरे तदुपरि अग्निप्रक्रियां भूत्वा सूक्ष्मातिसूक्ष्मेषु परमाणुषु तेषां विघटनं भवति । विघटनानन्तरं सूक्ष्मआहाररसस्य एते परमाणवः सर्वस्मिन् शरीरे सञ्चरन्ति तथा च सर्वेषु स्त्रोतस्सु गत्वा तस्मिन् तस्मिन् स्त्रोतसि तद् तद् अग्निप्रक्रियया तन्मध्ये अधिकं परिणमनं भूत्वा तस्य आहाररसस्य तद् तद् धातोः परमाणुषु रुपान्तरणं भवति । एतद् एव स्थूलं सूक्ष्मं च पचनम् इति उच्येत ।

– अमुष्मै सर्वस्मै परिणमनार्थम् अनुपहतप्राकृतअनुपरुद्धं च एतेषां स्त्रोतसाम् आवश्यकता अस्ति ।

''विविधमशितं पीतं लीढं खादितं जन्तोर्हितमन्तरग्निसन्धुक्षितबलेन यथास्वेनोष्मणा सम्यग्विपच्यमानं कालवदनवस्थितसर्वधातुपाकमुपहतसर्वधातूष्ममारुतस्त्रोतः केवलं शरीरमुपचयबलवर्णसुखायुषा योजयति शरीरधातूनूर्जयति च ।।'' (च.सू. २८/३)

अस्मिन् अनुपहतसर्वधातूष्ममारुतस्त्रोतः इति पदम् अस्ति यद् अस्माकं विषयविवेचनार्थम् अतीव महदस्ति । अस्मिन् अनुपहतधातुष्मा अनुपहतमारुतः अनुपहतस्त्रोतः च एते त्रयः घटकाः वर्णिताः । उपरोक्ते सूत्रे प्राकृतस्य परिणमनस्य वर्णनम् अस्ति । यदर्थं अनुपहतं प्राकृतम् अवरोधरहितं च एतेषां स्त्रोतसाम् आवश्यकता वर्तते । तदा एव धातूनाम् अपचयं भूत्वा शरीरं ऊर्जां प्राप्नोति ।

पश्यत– ''तथा स्त्रोतो वा धातुपोषकरसवहमुपहतं स्यात् तदा अशितादिकं धातूनामवर्धकत्वान्नो पचयादिकारकमिति भाव: ।'' (चक्रपाणि टीका)

– यथास्वं स्वं च पुष्यन्ति देहे द्रव्यगुणा: पृथक् । पार्थिवा: पार्थिवानेव शेषा: शेषांश्च कृत्स्नश: ।

(च.चि. १५ /१४)

स्वस्व स्वरुपस्य आहारगता: घटका: (परमाणुस्वरुपा:) स्वस्वरुपस्य देहघटकान् (परमाणुस्वरुपान्) पुष्यन्ति । आहारगता: पार्थिवघटका: शरीरे पार्थिवघटकान् पुष्यन्ति । तथैव अन्येषां सर्वेषां भावपदार्थानां विषये ज्ञातव्यम् ।

''सप्तभिर्देहधातारो धातवो द्विविधं पुन: ।

यथास्वमग्निभि: पाकं यान्ति किट्टप्रसादवत् ।।'' (च. चि.१५/१५)

– उपरोक्तया: परिणमनोत्तरं स्वस्वधात्वाग्ने: प्रक्रियानन्तरं शरीरधातौ यथायोग्यायां मात्रायां किट्टरुपं (मलस्वरुपं) प्रसादरुपं च उत्पद्यते । तदा शारीरस्थाने ६/१७ अस्मिन् सूत्रे वर्णितं विषयं पुष्यत् एतद् चिकित्सास्थानस्थं सूत्रम् अस्ति ।

– एवं एकस्मात् धातो: अन्यस्मिन् धातौ अपि पोष्यपोषकभावेन रुपान्तरं भवं भवं उत्तरोत्तरं धातुनिर्मिति: भवति । एतदर्थं क्षीरदधिन्याय: खलेकपोतन्याय: केदारीकुल्यान्याय: च इति त्रिविधानां धातुपोषकक्रमानुसारं प्रक्रिया: घटन्ते ।

– तथैव अस्मिन् अधिकरणे यद् महत्तमं विवेचनीयं तद् एवं एषा सर्वा प्रक्रिया शुद्धानि अनुपहतानि स्त्रोतांसि अपेक्षते । विना स्त्रोतोभि: एषा प्रक्रिया अशक्या । अत: स्त्रोतसां वर्णने एतासां सर्वासां घटकानाम् ऊहापोह: आवश्यक: आसीत् । परं टीकाकारै: अतीव संक्षेपेण वर्णितमस्ति ।

<u>सूत्र ४ – अपि चैके.....</u>।

– अस्मिन् सूत्रे पूर्वपक्ष: प्रत्युत्सार: उद्धार: च एतयो: तन्त्रयुक्त्यो: उपयोग: चरकाचार्येण कृत: ।

– वस्तुत: अस्मिन् सूत्रे तथा च सूत्रोपरिटीकायां कापि मतभिन्नता वा कानि अपि वैशिष्ट्यानि न सन्ति । परं सर्वै: टीकाकारै: टीकां कुर्वद्भि: अस्मिन् सूत्रे भिन्ना: पाठभेदा: स्वीकृता: सन्ति ।

– अत: एतत् <u>व्हेरीएशन् इन् टेक्शुअल व्हर्जन</u> इत्यस्य एकं प्रातिनिधिकम् उदाहरणमस्ति ।

– सर्वप्रथमं सूत्रस्य अर्थः संक्षेपेण पश्यामः । यतः अत्र स्त्रोतसां संकल्पनायाः एकः विचारः स्पष्टं वर्णितः अस्ति ।

– आदौ एकीयं मतं वर्णयित्वा पूर्वपक्षः स्थापितः अनन्तरं तस्य खण्डनं कृतम् । अतः अत्र चतुर्विधसूत्रप्रकारेभ्यः एकीयं सूत्रं वर्णितम् । प्रथमं पूर्वपक्षतन्त्रयुक्तिं उपयुज्य अनन्तरम् उद्धार तत्रयुक्तेः आधारेण तस्य खण्डनं कृत्वा एकस्य विषयस्य विवेचनं कृतम् ।

– पूर्वपक्षः – स्त्रोतांसि सर्वशरीरव्यापि सन्ति । दोषाणां प्रकोपणम् प्रशमनं च कुर्वाणानां पथ्यापथ्यात्मकानां द्रव्याणां सरणं (सर्वशरीरसञ्चारः) स्त्रोतोभिः भवति । अतः स्त्रोतसां समुदायानां 'पुरुषः' इति केषांचन मुनीनां परिभाषा अथवा विचाराः आत्रेयेण स्थापिताः । तस्य खण्डनं स्वयमेव अधोवत् कृतम् ।

– खण्डनम् – खण्डनकरणे सूत्रे चतुर्भिः टीकाकारैः चत्वारः विभिन्नाः पाठभेदाः स्वीकृताः । यद्यपि पाठभेदाः भिन्नाः सन्ति तथापि विषयविवेचनं कुत्रापि न बाधते । केवलं ऐतैः पाठभेदैः एकस्य एव विषयस्य विभिन्नं मतान्तरम् अनुभूयते ।

चक्रपाणिः–यस्य हि स्त्रोतांसि यच्च वहन्ति यच्चावहन्ति यत्र चावस्थितानि सर्वं तदन्यतेभ्यः ।

गङ्गाधरः–यस्य च हि स्त्रोतांसि यच्च वहन्ति यथा वहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्यः ।।

योगीन्द्रनाथसेनः–यस्य हि स्त्रोतांसि यद्वहन्ति यथा वहन्ति यत्र चावस्थितानि सर्वं तदन्यतेभ्यः ।।

ज्योतिषचन्द्रसरस्वतिः–यस्य हि स्त्रोतांसि यच्च वहन्ति यच्च अवहन्ति यत्र चावस्थितानि सर्वं तदन्यतेभ्यः ।

उपरोक्तवत् चत्वारः विभिन्नाः पाठभेदाः प्राप्यन्ते । तथापि मूलतः विषयवस्तुनः हानिः न भवति एष विशेषः ।

– चक्रपाणेः मतेन स्त्रोतांसि यस्मात् उत्पद्यन्ते, यस्य वहनं कुर्वन्ति (यच्चवहन्ति) तथा यं पुष्यन्ति (यच्चावहन्ति) तथा यत्रावस्थिताः तत्र ते स्त्रोतसां भिन्नत्वात् स्त्रोतसां समुदायः नाम पुरुषः एतद् एकीयं मतं मिथ्या विधीयते ।

– चक्रपाणेः उपरि विवेचनवत् अन्येषां त्रयाणामपि विवेचनमस्ति । केवलं पाठभेदात् तत्र काचित् भिन्नता वर्तते ।

– सर्वेषां पाठभेदानाम् एकत्रितं विचारं भूत्वा स्त्रोतसां समुदायः नाम पुरुषः अस्याः परिभाषायाः खण्डनमेव भवति ।

१) यस्य हि स्त्रोतांसि – स्त्रोतांसि यस्मात् उत्पद्यन्ते ते घटकाः ।

२) यत्र च अवस्थितानि – स्त्रोतांसि यत्र अवस्थितानि सन्ति ।

३) यच्चवहन्ति – यस्य वहनं कुर्वन्ति ।

४) यथावहन्ति – येन प्रकारेण वहन्ति ।

५) यच्चावहन्ति – यस्य पोषणं कुर्वन्ति ते देहद्यातवः ।

६) यच्च–अवहन्ति – यस्मात् यस्य वहनं न भवन्ति ।

एते सर्वे घटकाः स्त्रोतोभ्यः भिन्नाः सन्ति ।

– अतः एव केवलं स्त्रोतसां समुदायः नाम पुरुषः इति परिभाषा अयोग्या भासते ।

– पाठभेदविज्ञानम् इति अवस्थायाः अभ्यासाय इदं सूत्रं तथा तस्य टीका एकम् उत्तमम् उदाहरणम् अस्ति । टीकाकारेषु विषयविवेचने अन्यथा कापि मतभिन्नता न दृश्यते ।

स्त्रोतसां संख्येयत्वम् अपरिसंख्येयत्वम् च।

– स्त्रोतसां संकल्पना इति प्रथमे अधिकरणे स्त्रोतसां संख्या इति विचारः तृतीये स्थाने वर्तते । अत्र चरकाचार्येण अनुमततन्त्रयुक्त्याः उपयोगः कृतः ।

सूत्रे ५ ६ च –

– एतयोः स्त्रोतसाः टीकायां चतृणां टीकाकाराणां न मतभेदाः अथवा न विशेषं वर्णनम् ।

– विषयवर्णनम् – चरकाचार्येण स्त्रोतसां संख्याविषये एकीयमतद्वयम् वर्णितम् । परं न तस्य खण्डनं कृतम् । अतः मतद्वयमपि मान्यताप्राप्तं । एषा अस्ति अनुमता तन्त्रयुक्तिः ।

– एकेन मतेन स्त्रोतांसि अपरिसंख्येयानि प्रत्युत अन्यैः मतैः तानि परिसंख्येयानि सन्ति ।

स्त्रोतोप्रकारा:

अस्मिन् विषये अधोक्ता: उपविषया: आगच्छन्ति ।

अ) यथास्थूलं वर्णनम् ।

ब) बुद्धिमताम् अज्ञानां च ज्ञानाय हेतुस्वरुपं वर्णनम् ।

क) त्रयोदश स्त्रोतसां नामोल्लेख: ।

ड) वातादिनां स्त्रोतोवर्णनं नास्ति । तस्य कारणम् ।

इ) मनस: आदीनां अतीन्द्रियाणां भावविशेषाणां स्त्रोतोवर्णनं नास्ति । तस्य कारणम् ।

एतेषां विषयानुषङ्गेण टीकाकाराणां विवेचनं पश्याम: ।

'तेषां तु खलु स्त्रोतसां यथास्थूलं कतिचित्प्रकारान्मूलतश्च प्रकोपविज्ञानतश्चानुव्याख्यास्याम: ।'

अस्मिन् सूत्रे चतृणाम् अपि टीकाकाराणां समानमेव विवेचनं दृश्यते । विषयविवेचनस्य घटक: अस्ति – ''अपरिसंख्येयानि सत: स्त्रोतांसि यथास्थूलं वर्णनीयानि''

–पूर्वे सूत्रे वर्णितवत् चरकाचार्येण द्वौ विचारोघौ स्थापितौ । एक: अस्ति स्त्रोतांसि अपरिसंख्येयानि तथा द्वितीय: स्त्रोतांसि परिसंख्येयानि ।

– अस्मिन् ज्योतिषचन्द्रसरस्वतिना उक्तम् यत् सूक्ष्मगामिनां स्त्रोतसां गणना यदि एकैकश: क्रियते तर्हि तानि अपरिसंख्येयानि भवेयु: । परं क्रियासामान्येन यदि गणना क्रियते तर्हि तानि परिसंख्येयानि भविष्यन्ति । एव प्रकारद्वयस्य सामंज्यस्यं प्रस्थापितम् ।

– एतादृशानि अपरिसंख्येयानि स्त्रोतांसि पृथक् पृथक् वर्णितुम् असम्भव्यानि । अत: तेषां यथास्थूलं प्राणादिवहानां वर्णनम् अस्मिन् अध्याये कृतम् । यानि स्त्रोतांसि परिसंख्येयानि सन्ति तेषु केषांचित् प्रकाराणां वर्णनं मूलस्थानं प्रकोपविज्ञानं च एताभ्याम् आधाराभ्यां कृतम् 'च' इति पदेन तेषां चिकित्सोपक्रमाणामपि संक्षेपेण वर्णनं कृतम् इति उक्तम् । अत्र टीकाकारै: समुच्चय तथा वा वाक्यशेष तन्त्रयुक्ति: उपयोजिता अस्ति ।

– अस्मिन् विवेचने चत्वार: अपि टीकाकारा: ऐकमत्येन तिष्ठन्ति ।

‘ ये भविष्यन्त्यलमनुक्तार्थज्ञानाय ज्ञानवतां विज्ञानाय चाज्ञानवताम् ।’’

– अस्मिन् अध्याये स्त्रोतसां यावद् विवेचनमस्ति तद् बुद्धिमद्भ्य: अनुक्तविषयज्ञानार्थं तथा अज्ञ अथवा अल्पबुद्धिमतां विशेषज्ञानाय पर्याप्तम् अस्ति ।

– अस्य सूत्रस्य व्याख्यायां चतुर्भि: अपि टीकाकारै: समानमेव विवेचनं कृतम् । तथापि ज्ञानवान् तथा अज्ञ: एतयो: व्याख्यायां चक्रपाणि यो सेनयो: स अधोक्त: कश्चित् भिन्न: दृष्टिक्षेप: दृश्यते ।

ज्ञानवन्त: – चक्रपाणि: – अनुक्तार्थज्ञानसमर्था:

योगीन्द्रनाथसेन: – प्रमाणकुशला: , अनुमानकुशला:

अज्ञानवन्त: – चक्रपाणि: – मन्दबुद्धय: ।

योगीन्द्रनाथसेन: – अनुमानयुक्तिहीना: ।

–सर्वेषां विचारा: यदा एकत्रीयते तदा एवं भाति यद् ये अनुक्तज्ञानाय समर्था: अनुमानादिप्रमाणज्ञाने कुशला: एतादृशाभि: व्यक्तिभि: अस्मिन् अध्याये स्त्रोतसां विशेषवर्णनात् अनुक्तानां स्त्रोतसां यथावत् ज्ञानं स्वबुद्ध्या ऊहापोहेन प्राप्तव्यम् । तथा ये अनुमानयुक्त्यादिप्रमाणज्ञानरहिता: बुद्ध्या अल्पा: वा मन्दा: तेभ्य: स्त्रोतसां पर्याप्तं ज्ञानम् अध्यायगत विवेचनेन स्यात् ।

– ज्योतिषचन्द्रसरस्वतीना अस्य सूत्रस्य व्याख्यायाम् अनुक्तं स्त्रोत: नाम अश्रुवहं स्तन्यवहं च आदीनां स्त्रोतसां उल्लेख: कृत: । परन्तु नामोल्लेख: एव न विस्तारेण वर्णनमस्ति ।

‘’ तद्यथा – प्राणोदकान्नरसरुधिरमांसमेदोस्थिमज्ज्शुक्रमूत्रपुरीषस्वेदवहानीति ।’’

मूर्तिमद्भ्य: स्त्रोतोभ्य: येषां केषांचित् स्त्रोतसां विवेचनं यथास्थूलम् इति कृतं तेषां नामोल्लेख: अस्मिन् सूत्रे कृत: । एषा ‘उद्देशतन्त्रयुक्ति:’ इति उच्यते ।

– अस्मिन् सूत्रे केवलं ज्योतिषचन्द्रसरस्वतिना विशेषा व्याख्या कृता । सा इत्थं विवेचिता –

– ज्योतिषचन्द्रसरस्वतिना यनास्थूलेभ्य: स्त्रोतोभ्य: एतेषामेव त्रयोदश भावविशेषाणां वर्णनं चरकाचार्येण किमर्थं कृतम् इति विषये विचारयता कोऽपि भिन्न: विचार: स्थापित: । स वदति यत् अस्मिन् जीवति शरीरे यौ प्राकृतविकृतौ पदार्थविशेषौ स्त: तौ स्थूलमानेन त्रिषु विभागेषु भेतुं शक्यम् ।

अ) शरीरे बहिस्त: अन्त:प्रवेशन्त: आहार्या पदार्था:

आ) शरीरे स्थायिरुपेण अखण्डतया सन्त पदार्थ: ।

इ) शरीरात् बहि: उत्सर्जन्त: पदार्था: ।

– एषां त्रिप्रकारकाणां पदार्थविशेषाणां प्रवेशमार्ग: चलाचलमार्ग: बहिर्गमनमार्ग: च एतान् त्रिप्रकारान् ज्ञातुम् अस्मिन् अध्याये मितानां प्रमुखपदार्थविशेषाणां स्त्रोतोमार्गाणां विवेचनं कृतम् । तस्मिन् प्राणान्नोदका: आहार्या: पदार्था: रसादय: च स्थायिरुपा: पदार्था: तथा मूत्रपुरीषस्वेदा: उत्सर्जन्त: पदार्थविशेषा: एतेषां प्रातिनिधिके स्वरुपे वर्णनं कृतम् । एवं त्रिविधानां प्रकाराणां पदार्थानां वर्णनात् अत्र अवर्णितानाम् अनुक्तस्त्रोतसां ज्ञानं बुद्धिमन्त: प्राप्तुं शक्यन्ते ।

– एवं ज्योतिषचन्द्रसरस्वतीना विशेषेण विवेचनेन अनुक्तस्त्रोतसां अध्ययनार्थं एक: विचार: उपस्थित: ।

''वातपित्तश्लेष्मणां पुन: सर्वशरीरचराणां सर्वाणि स्त्रोतांस्ययनभूतानि तद्वदतीन्द्रियाणां पुन: सत्वादीनां केवलं चेतनावच्छरीरमयनभूतमधिष्ठानभूतं च ।''

– वातादय: त्रिदोषा: मन च इत्यादीनाम् अतीन्द्रियाणां भावविशेषाणां भिन्नानि स्त्रोतांसि कथं न वर्णितानि अस्मिन् भाष्यं कुर्वाणाम् एतद् सूत्रमस्ति ।

– अस्मिन् सूत्रे गंगाधर रॉयमहोदयेन ज्योतिषचन्द्रसरस्वतीना च एताभ्यां अतीव विशेषा मूलगामिनी च व्याख्या कृता ।

– गंगाधर रॉयेन अस्य सूत्रस्य व्याख्यायां स्त्रोतसां द्वौ प्रमुखौ प्रकारौ कृत्वा विवेचनं कृतम् ।



– स्त्रोतस: प्रकारद्वयम् । एकं केवलम् अयनभूतं नाम मार्गस्वरुपि तथा द्वितीयम् अयनम् अधिष्ठानभूतं च नाम मार्ग–स्थान–आशय स्वरुपि ।

– यानि स्त्रोतांसि केवलं मार्गस्वरुपिण: सन्ति तेभ्य: त्रिदोषवत् भावविशेषा: सर्वशरीरचरा: सन्ति प्रत्युत प्राणोदकादय: ये मूर्तिमन्त: यथास्थूलं भावविशेषा: सन्ति ते असर्वशरीरचरा: नाम अव्यापका: किमपि क्षेत्रमात्रं मर्यादया सञ्चिलिता: भवन्ति ।

– प्रत्युत ये भावविशेषा: अयनभूता: अधिष्ठानभूता: च एवं द्वाभ्यां प्रकाराभ्यां सन्ति । तन्मध्ये अतीन्द्रिये इन्द्रियगोचरे केवलं चेतानायुते शरीरे स्त्रोतरुपेण सन्त: मन: – आत्मा – श्रोत्रे – स्पर्शनं – रसनं – प्राणं – नयने – बुद्धि: – अहङ्कारा: च इत्यादीनां समावेश: भवति ।

– सारांश: – तत: गङ्गाधरेण तस्य विभागश: वर्णनस्य नित्यपद्धत्या स्त्रोतसां वर्णनं संक्षेपेण द्वाभ्यां प्रकाराभ्यां कृतम् ।

अ) अयनभूतम् –

१) असर्वशरीरस्य अयनभूतानि , पथिरुपाणि एतादृशानि प्राणोदकादीनां स्त्रोतांसि ।

२) सर्वशरीरचराणि अयनभूतानि सच्छिद्राणि वर्त्मरुपाणि एतादृशानि त्रिदोषादीनां स्त्रोतांसि

आ) अयन – अधिष्ठानभूतम् –

अतीन्द्रियाणि इन्द्रियगोचराणि चेतानामयशरीरसञ्चारीणि सत्वादीनि स्त्रोतांसि चक्रपाणिना एतावन्मात्रमेव वर्णितं यत् केशनखम् इत्यादिषु अचेतन द्रव्येषु सत्वादीनां भावविशेषाणां सञ्चार: नास्ति । परम् एतेषु द्रव्येषु त्रिदोषाणां सञ्चार: अस्ति । सत्वादीनां स्त्रोतसां तथा तेषां भावविशेषाणां सञ्चार: केवलं चेतन्ययुतेषुसेन्द्रियद्रव्येषु भवति ।

– योगीन्द्रनाथसेनेन अधिकं / विशेषं वर्णनं न कृत्वा एवमेव विवेचनं कृतम् ।

– किन्तु ज्योतिषचन्द्रसरस्वतीना अस्मिन् सूत्रे या व्याख्या कृता अस्ति सा अतीवमहत्त्वपूर्णा अभ्यासनीया अस्ति ।

– तस्य विचारेण वातादित्रिदोषाणां पृथक् पृथक् स्त्रोतांसि सन्ति । परं तानि सर्व शरीरे यावतियेषु सर्वस्त्रोतस्सु अयनभूतत्वात् तेषां पृथक् वर्णनं न कृतम् ।

– तथैव सत्वेन्द्रियाणाम् अपि सर्वशरीरचरत्वात् तेषामपि पृथक स्त्रोतो वर्णनं कृतं नास्ति ।

– अस्मिन् सूत्रे समाविष्टे 'केवलं चेतनावान्' पदेषु ज्योतिषचन्द्रसरस्वतीना विशेषा व्याख्या कथिता ।

– मृतशरीरस्य विच्छेदने सत्वेन्द्रियाणां स्त्रोतांसि तथा तेषां मार्गा: न दृश्यन्ते । यत: सत्त्वइन्द्रिये सदृशा: भावविशेषा: इन्द्रियाधिष्ठाने वर्तमाना: बुद्ध्यात्माहृदयसदृशा: भावविशेषा: तथा अधिष्ठानात् प्रसरन्त: अतीन्द्रिया: इन्द्रियै: अग्राह्य: भावविशेषा: सन्ति । तेषां ज्ञेयत्वं केवलं चैतन्ययुते शरीरे अस्ति न मृतशरीरे । अस्य पुष्ट्यार्थं तेन सुश्रुताचार्यस्य अधोक्त: श्लोक: आधारभूत: कल्पित: ।

''पञ्चाभिभूतास्त्वथ पञ्चकृत्य पञ्चेन्द्रियं पञ्चसु भावयन्ति ।

पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले ।।''

– जीवितावस्थायां पञ्चमहाभूतेभ्य: उत्पद्यमाना: धमन्य: (स्त्रोतांसि) पञ्चविधै: पञ्चेन्द्रियेभ्य: पञ्चेन्द्रियाणां वहनं कुर्वन्ति । अनया एव पद्धत्या मरणसमये पञ्चेन्द्रियाणि पञ्चउपादानभूतेषु महाभूतेषु विलीय स्वकार्यं महाभूतेषु समावेशयन्ति ।

– तस्मात् इन्द्रियाणां मनस: च अतीन्द्रियाणि स्त्रोतांसि मृत्युपश्चात् शवविच्छेदन दृश्यन्ते । तथैव जीवितशरीरस्य विषकलनं (विच्छेदनं) अशक्यत्वात् एतेषाम् अतीन्द्रियभावपदार्थानां स्त्रोतसां वर्णनं अस्मिन् अध्याये न कृतम् ।

– तथैव वातादिदोषाणाम् अपि सचेतनशरीरमेव अयनभूतम् अधिष्ठानभूतं च अस्ति । अस्मिन् तेन एकं स्वपक्षं स्थापयित्वा भेलसंहिताया: सूत्रसन्दर्भेण तस्य निरास: कृत: ।

– पूर्वपक्ष: – एवमस्ति मृतशरीरे अपि आध्मानदर्शनात् वायुकार्यं तथा कोथनकर्मण: पित्तकार्यं दृश्यते इति एकं मतमस्ति । अस्यार्थ: वातादिदोषा: मृतावस्थायामपि कार्यरता: परं तेन स्वयमेव उत्तरपक्षं स्थापयित्वा तं संदर्भं दत्वा एतद् मतं खण्डितम् ।

– उत्तरपक्ष: – मृतशरीरगतम् आध्मानकोथनकार्यं वातपित्तदोषाभ्यां न भूत्वा पञ्चमहाभूतगतयो: वायुअग्निमहाभूतयो: अस्ति । अस्य पुष्ट्यर्थं तेन भेलसंहिताया: अधोलिखित: संदर्भ: आधारत्वेन उद्धृत: ।

'' तावेव यदा शरीरादपक्रामतस्तदा तद् भवति निर्वातो निरुष्मा प्रेतो मृत इति । नेत्याह भरद्वाज: मृतोऽपि जन्तुर्वायुना ध्मायते अग्निना शोष्यते । नेत्याह भगवानात्रेय: न वा तस्याग्निमारुतौ जीवयत: तयोरुत्क्रान्तयोर्बाह्याग्निमारुतावाविशत: ।'' (भेलसंहिता शारीर/६)

– जीवे शरीरात् निर्गते प्रेतं निर्वातं निरुष्माणं भवति इति मतं प्रकटीकृत्य भरद्वाज: उक्तवान् एतद् अयोग्यमस्ति । मृतव्यक्त्यामपि वायो: ध्मापनं अग्निना शोषणं च भवति । अस्मिन् भरद्वाजमते आत्रेय: उक्तवान् एतद् एवं न भवति । वायु: अग्नि: च तं मृतं जीवतौ न कुरुत: । पञ्चमहाभूतानां उत्क्रमणानन्तरं बाह्यसृष्टिगतेन वायुना अग्निना च एतानि कार्याणि भवन्ति । तद् शरीरस्थेन अमूर्तेन वायु: अग्नि: इति तत्वाभ्यां न भवन्ति । तानि तु जीवात्मनासह निर्गच्छन्ति ।

– तत: वातादिदोषा: तु जीवितशरीरे एव कार्यकारिण: सन्ति । तेषां सर्वशरीरगामित्वात् तेषां स्त्रोतांसि पृथक् न वर्णितानि । सर्वस्त्रोतरसु परिमाणस्वरुपे परिभ्रमन्त: त्रिदोषा: तेषां प्राकृतविकृतकार्ये सातत्येन अविरतं कुर्वन्ति ।

'' तदेतत् स्त्रोतसां प्रकृतिभूतत्वान्न विकारैरुपसृज्यते शरीरम् ।।

– एवं स्त्रोतांसि प्रकृतिस्वरुपे स्थितानि चेत् शरीरे विकारोत्पत्ति: न भवति ।

– स्त्रोतसां संकल्पना स्पष्टीकुर्वता तेषां प्राकृतत्त्वं शरीरस्वास्थ्याय इति अत्र प्रतिपादितम् ।

– इत:पर्यन्तं स्त्रोतांसि नाम किम्? तेषां स्वरुपं तस्मिन् वाह्यमाना: पदार्था: तेषां प्रकारा: इत्यादीनां वर्णनं कृत्वा तत्पश्चात् अस्मिन् अधिकरणे एष: अन्तिम: विचार: अस्ति । सूत्रस्य अस्मिन् भागे न विशेषा टीका । चक्रपाणिना तु व्याख्या अपि न कृता । शेषै: त्रिभि: टीकाकारै: अपि शब्दार्थ: वर्णित: न तेषु विवेचनं यद् आवश्यकम् आसीत् ।

– यद्यपि स्त्रोतसां समुदाय: 'एषा परिभाषा अव्याप्ता इति निश्चित्य निषिद्धा तथापि इत:पर्यन्तं कृतात् स्त्रोतसां विवेचनात् एतत् प्रतिपत्तुं शक्यं यद् स्त्रोतस्सु यदि विकृति: जायते तर्हि शरीरस्वास्थ्यं बाधते ।

– शरीरगतानां सर्वधातुघटकानां वहनं परिणमनं रुपान्तरणं च स्त्रोतस्सु एव प्रचलति । शरीरस्य सर्वेषु भावपदार्थेषु स्त्रोतांसि सन्ति । तथा शरीरस्य सर्वेषां क्रियाव्यापाराणां साधनमिति स्त्रोतसां

उपयोग: अस्ति । अत: यदि स्त्रोतांसि विकृतानि, तेषु अवरोध: उत्पन्न: तेषां प्राकृतकार्ये प्रतिबन्ध: जात: तर्हि तस्य परिणाम: शरीरस्य अखिले स्वास्थे भवति ।

– अस्मिन् विषयविवेचने अस्मिन् एव अध्याये एकं सूत्रमग्रे आगतं तत्र --

‘‘ स्त्रोतांसि स्त्रोतांस्येव धातवश्च धातूनेव प्रदूषयन्ति प्रदुष्टा: ।’’(च.वि.५/९)

– एकं स्त्रोत: विकृतीभूत: तर्हि तस्य परिणाम: अन्ये स्त्रोतसि भवति इत्यस्य विवेचनं अस्य सूत्रस्य विवेचनसमये परिपूर्णतया कुर्म: ।

– एवं ‘स्त्रोतसां संकल्पना’ इति अध्यायस्य प्रथमम् अधिकरणं (प्रकरणं) अत्र समाप्तम् । अस्य अधिकरणस्य उपरि प्रस्तुतानां चतृणां टीकाकाराणां टीकायां ये महत्वपूर्णा: विचारा: आगता: तेषां संग्रह: अग्रे क्रियेत । तथैव ‘स्त्रोत’ इति शारीरभावस्य निश्चितं लक्षणकारणानि च के सन्ति इत्यापि संगृहणाम: ।

– ‘ स्त्रोत ’ इति शारीरभावस्य टीकाकाराणां मतेन लक्षणानि –

१) ‘ परिणामम् आपद्यमान् ’ धातूनाम् अभिवहनं कुर्वन्ती प्रणाली ।

२) धातूनां पोष्यपोषकांशानाम् उत्पत्ति:, वहनं परिणमनं भवद् अधिष्ठानम् ।

३) धातुषु परिणमनोत्तरम् उत्तरोत्तरं धातुनिर्मिते: अधिष्ठानम् ।

४) अविरतचयापचयेन अन्यथाभावं प्रापणस्य अधिष्ठानम् ।

५) अयनप्रणाली ।

६) गमनागमनविषयक: अभिवाहक: ।

७) स्थानान्तरं भवनस्य प्रणाली ।

८) शरीरगतानां समस्तभाव विशेषाणां कार्यायप्रणाल्य: ।

९) विशेषत: परमाणुस्वरुपिणां परिभ्रमणशीलानां मूर्तिमतां भावविशेषाणां कार्यप्रणाल्य: ।

१०) सत्वादीनां अतीन्द्रियभावविशेषाणां ज्ञानवहनस्य प्रणाल्य: ।

११) परमाणुस्वरुपिणां भावविशेषाणां सर्वस्मिन् शरीरे सञ्चरन्त्य: प्रणाल्य: ।

१२) वायुप्रेरणया परमाणुस्वरुपिभि: भावविशेषै: स्वस्थानं नयन्त्य: प्रणाल्य: ।

१३) सर्वेषां भावपदार्थानां वृद्धिक्षयार्थम् आवश्यका: अयनभूता: शारीरभावा: ।

१४) धातुनां परमाणूनां पूरणापूरणभवनस्य अधिष्ठानभूता: शारीरभावा: ।

१५) आहाररसं परिभ्रमयन्ति मार्गप्रणाली ।

१६) धात्वग्नीनां कार्याय अयनभूता: अधिष्ठानभूता: च शारीरभावा: ।

१७) उत्तरधातुनिर्मित्यै पोषकअंशस्य परिणमनस्य अयनभूता: अधिष्ठानभूता: च ।

१८) धातूनां परिणमनोत्तरं परिणतप्रसादभूतानां मलभूतानां च शारीरघटकानां उत्पत्तिवहनकार्येभ्य: प्रणाल्य: ।

१९) स्थूलसूक्ष्मपचनप्रक्रियायै आवश्यका: अयनभूता: अधिष्ठानभूता: च शारीरभावा: ।

२०) शरीरस्य उपष्टम्भार्थं अत्यावश्यका: शारीरभावा: ।

२१) रसकिट्टयो: स्वस्वमानं स्थिरीकृत्य तथा तेषां योग्याय कार्याय आवश्यका: प्रणाल्य: ।

२२) आहार्यपदार्थ: स्थायुरुपपदार्था: बर्हिगामीपदार्था: एतेषां प्रवेशचलचलत्वबर्हिगमनार्थं आवश्यका: प्रणाल्य: । (ज्योतिषचन्द्रसरस्वति:)

२३) शरीरस्था अयनभूतस्य अधिष्ठानभूतस्य च अभिवहनप्रणाली ।

२४) दोषप्रकोपकअपथ्यं दोषप्रशामकपथ्यं च एते अभिसारयन्त्य: प्रणाल्य: । (चरक: )

२५) देहधातून् पुष्यन्त्य: प्रणाल्य: ।

२६) धातुपोषणार्थं त्रिविधन्यायानां प्रक्रियायै अधिष्ठानभूता: प्रणाल्य: ।

२७) पञ्चेन्द्रियाणां विषयाभिवहनं कुर्वत्य: प्रणाल्य: ।

निष्कर्ष: – वैधर्म्य नास्ति । किन्तु कस्मश्चित् विषये टीकाकाराणां विशेषत: अस्ति । तत् सर्वं एतत् अधिकरणविवरणे विस्तारेण उद्धृत: ।

## द्वितीयमधिकरणम्

### त्रयोदय स्त्रोतसां मूलत: तथा प्रकोपविज्ञानत: वर्णनम् ।

स्त्रोतसां संकल्पना इति पूर्वस्मिन् अधिकरणे स्त्रोतसां सामान्यं विवेचनं कृतम् । तत्र निर्देशतन्त्रयुक्त्यनुसारं यथास्थूलं मूर्तिमतां त्रयोदय स्त्रोतसांनामसंग्रहणं वर्णितम् । तथा एतदपि उल्लिखितं यत् एतेषां त्रयोदशस्त्रोतसां ज्ञानं मूलत: तथा प्रकोपविज्ञानत: अवगन्तव्यम् । अधुना विधान तन्त्रयुक्त्यनुसारं एतेषां त्रयोदश स्त्रोतसां यथाक्रमं वर्णनं ग्रन्थकारै: कृतम् ।

मूलतः

– चतुर्भि: टीकाकारै: ‘मूलम्’ इति पदस्य व्याख्या ‘मूलं प्रभवस्थानम्’ इति कृता: अस्ति । प्रथमं वयं ‘मूलं’ तथा ‘प्रभव:’ अनयो: पदयो: पदश: विवरणं पश्याम ।

मूलम् – नपुं – मू + मूङ्शक्यविभ्य: क्व: ।

– शिफा । वृध्न: । अङ्घ्रिनामक: । कन्द: । वृक्ष: । जटा । आद्यम् । नक्षत्रविशेष: । निकुञ्ज: । विश्व: । मूलवित्तम् । निजम् । चरणम् । पादम् । टीकार्हग्रन्थ: । श्रूरणम् । कारणम् ।

(शब्दकल्पद्रुम: पंचम: खण्ड:)

प्रभव: – अ) पुं. (प्रभवत्यस्मादिति । 'प्र+भू+अकर्त्तरि च कारके’ इत्यधिकारात् अपादानार्थे)

जन्महेतु: । आद्योपलब्धिसाधनम् – आद्योपलब्धये प्रथमज्ञानार्थं यत् स्थानं देश: स: । यथा वाल्मिकी श्लोकप्रभव: । हिमवान् गङ्गाप्रभव: ।

त्रि – प्रभूत: । सायण: (शब्दकल्पद्रुम: चतुर्थ: खण्ड: )

ब) पुं – प्रभवत्यस्मात् ‘‘भुव: प्रभव:’’ पा भूकर्तुरपादाने वाच्ये अप् ।

– प्रथमप्रकाशस्थाने । अन्यत: सिध्दस्य प्रथमोपलम्भस्थाने । मूले । मुनिभेदे जन्महेतौ । जन्मनि । पराक्रमे । विष्णु: । (वाचस्पत्यम् /षष्ठ: खण्ड:)

उपरितनां पदानां व्युत्पत्तिं निरुक्तिं च दृष्ट्वा अस्माकम् अस्य विषयस्य अधिकरणानुसारं तथा पदार्थतन्त्रयुक्त्यनुसारं अधोल्लिखिता: अर्था: ग्राह्या: सन्ति ।

मूलम् – आद्यम् कारणम् ।

प्रभव: – जन्महेतु: आद्योपलब्धिसाधनं, प्रथमोपलब्धस्थाने, प्रथमप्रकाशस्थाने ।

– एवं रीत्या ‘मूलम्’ इति ‘स्त्रोतस्’ अधिकरणसंबद्धाया: स्वसंज्ञाया: पदार्थ: तथा स्वसंज्ञा तन्त्रयुक्त्याधारेण अधोल्लिखितान् अर्थान् ग्रहीतुं शक्यम् ।

१) आद्यम् – स्त्रोतसाम् आरंभ: शारीरदृष्ट्या वा कार्यदृष्ट्या यत्र भवति तद् मूलस्थानम् ।

२) जन्महेतु: कारणम् – स्त्रोतसां कारणम् अथवा जन्महेतु: नाम उत्पत्तिस्थानम् , स्त्रोतसां कार्योत्पत्ति: अस्मिन् स्थाने भवति ।

३) आद्य उपलब्धिस्थानम् – यस्मिन् स्थाने तस्य प्रथमं ज्ञानं भवति तत् तस्य आद्यं उपलब्धि

साधनम् इति अर्थेन 'मूलम्' इति । उदाहरणार्थम् वाल्मीकि: पद्यसाहित्यस्य मूलम्, हिमालय: गंगाया: मूलम्, तद्वत् हृदयं महास्त्रोत: च प्राणवहस्य मूले, यकृतं प्लीहा च रक्तवहस्त्रोतस: मूले इत्यादि: । तस्मिन् तस्मिन् स्थाने एतेषां स्त्रोतसां प्रथमंज्ञानं भवति ।

४) प्रथमप्रकाशस्थानम् – यस्मिन् स्थाने स्त्रोतसां सर्वप्रथमं प्रकाशनं, कार्यस्य अभिव्यक्ति: च ते स्त्रोतसां मूलस्थाने ।

५) अन्यत: सिद्धस्य प्रथमोपलम्भस्थानम् – स्त्रोतसां प्रारंभ: अन्यत्र भवति परं तेषां कार्यस्य प्रकटनम् अन्यत्र भवति तद् स्त्रोतसां मूलस्थानम् ।

उदाहरणार्थम् पुरीषवहाणां स्त्रोतसां पक्वाशयो मूलं स्थूलगुदं च ।अत्र पुरीषस्य सारकिट्ट विभजनोत्तरं तथा किट्टस्य द्रवस्थूलभागयो: विभजनोत्तरं प्रत्यक्षा पुरीषनिर्मिति: उत्पत्ति: च पक्वाशये भवत: अत: पक्वाशयम् एकं मूलस्थानम् । तथैव पुरीषस्य अभिव्यक्ति अवष्टम्भादीनि कार्याणि यत्र प्रकटयन्ति । प्रकर्षेण दृश्यन्ते तद् स्थूलगुदम् । अत: तमपि मूलस्थानम् इति उच्यते ।

एवं अन्येषां स्त्रोतसां ऊहापोह: करणीय:

– न एष: सर्वमान्य: नियम: यत् एकं मूलस्थानम् उत्पत्तिस्वरुपं अपरं च अभिव्यक्तिस्वरुपं स्यात् ।

रक्तवहस्त्रोतस: मूलस्थाने यकृतं प्लीहा च उभे अपि उत्पत्तिस्वरुपे । रसवहस्त्रोतसां हृदयं दशधमन्य: च एतानि मूलस्थानानि अभिव्यक्तिस्वरुपाणि सन्ति यत: रसनिर्मिति: ग्रहण्यां भवति उत तस्य वहनादीनि कर्माणि हृदयात् प्रारभन्ते । शुक्रवहस्त्रोतसां मूलस्थानानि वृषणौ शेफ: च सन्ति । तन्मध्ये वृषणयो: उत्पत्ति: शेफे च अभिव्यक्ति: प्रवर्तनम् च । अत: तानि मूलस्थानानि इति मन्यते

– एवं रीत्या व्याकरणशास्त्रस्य साहाय्येन मूलस्थानं प्रभवस्थानम् इत्यस्य विवेचनं शक्यम् ।

## प्रकोपविज्ञानत:

– यथास्थूलं मूर्तिमत्सु स्त्रोतस्सु त्रयोदश स्त्रोतसां वर्णनं मूलत: प्रकोपविज्ञानत: च अस्मिन् अधिकरणे कृतम् । तत्र मूलत: नाम निश्चयेन किम्? अस्य विवेचनं प्रागेव कृतम् । इदानीं प्रकोपविज्ञानत: नाम किम् इति विषये विमर्शं कुर्म: ।

प्रकोप: – 'कुपिताश्चेति पदेन वातादय: सामान्येन क्षीणा वृद्धा वा गृह्यन्ते । विकृतिमात्रं हि वातादीनां कोप: । (चक्रपाणि:, च शा ६/१७)

''प्रकुपिता: वातादय: विकृता: ।'' (योगीन्द्रनाथसेन:, च.शा.६/१७)

– प्रकोप: अपि एका विशेषा स्वसंज्ञा । आयुर्वेदशास्त्रे इमं पदं विशेष: अर्थ: अस्ति । चक्रपाणिना शारीरस्थाने 'कोप' इति पदस्य अतीव सुस्पष्टा सुबोधा च व्याख्या कृता अस्ति । कोप: नाम वातादीनां सामान्यत: क्षीणत्वं वा वृद्धत्वम् । केवला वृद्धि: नाम न प्रकोप: उत क्षीणता अपि प्रकोप: एव । तदनन्तरं चक्रपाणि: कोपस्य सर्वसमावेशिकां व्याख्यां करोति । विकृतिमात्रं हि वातादीनां कोप: वातादीनां किदृशी अपि विकृति: नाम कोप:।

– प्रकोप: इति पदे 'कोप' इति पदं 'प्र' उपसर्ग । यस्य अर्थ: अस्ति प्रकर्षेण । इत्यर्थ: प्रकर्षेण वातादीनां विकृति: नाम प्रकोप: ।

– तत: प्रकोप: नाम वातादीनां शरीरस्थानां सर्वेषां भावपदार्थानां स्वप्रमाणात् क्षीणत्वं अथवा वृद्धत्वम् । संक्षेपेण वातादीनां विकृति: इति प्रकोप: ।

स्त्रोतसां प्रकोपविज्ञानम् –

स्त्रोतसां विशेषप्रमाणस्य ज्ञानार्थं तेषां प्रकोपाणां अपि ज्ञानम् अत्यावश्यकं भवति । स्त्रोतसां दुष्टि: तेषां कार्ये कापि विकृति: नाम स्त्रोतसां प्रकोप: । अस्य विशेषज्ञानम् अस्मिन् अधिकरणे वर्णितम् । तेषां तेषां स्त्रोतसां दुष्टिलक्षणानि नाम प्रकोपलक्षणानि । तेभ्य: तत् स्त्रोत: विकृतं तस्य कार्ये क्षीणत्वं वा वृद्धत्वम् आगतम् इत्यस्य अनुमानं करणीयम् ।

अस्मिन् अधिकरणे उद्देशक्रमेण यथाक्रमं त्रयोदशस्त्रोतसां निर्देश: कृत: । तत्र प्रथमं प्राणवहस्त्रोतसां वर्णनम् अस्ति ।

**प्राणवहानि स्त्रोतांसि –**

'' तत्र प्राणवहानां स्त्रोतसां हृदयं मूलं महास्त्रोतश्च प्रदूष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति तद्यथा अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसन्तं दृष्ट्वा प्राणवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात् ।'' ५ / ७

अस्मिन् सूत्रे गंगाधर: रॉयमहोदयेन भिन्न: पाठ: स्वीकृत: ।

'' तद्यथा – अतिसृष्टं प्रतिबद्धं प्रकुपितमल्पाल्पमभीक्ष्णं ––––।।''

अस्य विवेचनं यथाक्रमं करवाम ।

– किं नाम प्राण: ?

– प्रथमं प्राण: नाम किम् ? प्राण: इति संकल्पना, तस्या: विविधा: अर्था: तथा अधिकरणानुसारम् अत्र स्वीकरणीयान् अर्थान् पश्याम ।

– ज्योतिषचन्द्रसरस्वतीना कृतेन विवेचनानुसारं ये भावपदार्था: आहार्यस्वरुपेण बाह्यसृष्टित: शरीरे प्रविशन्ति तेषां प्रवेशमार्गस्य तथा वहनमार्गस्य स्त्रोतस्स्वरुपि विवेचनं प्रथमं कृतम् । तस्मिन् प्राण: उदकम्, अन्नम् एतेषां समावेश: भवति । अत: ज्योतिषचन्द्रसरस्वते: विचारानुसारं प्राण: नाम आहार्यस्वरुपेण बहित: शरीरे ग्रहणीय: भावपदार्थ: अस्ति इति निश्चितम् । 'प्राण:' इति पदस्य 'स्त्रोतस विमानम्' अस्मिन् अधिकरणे सन् अर्थ: स्वसंज्ञार्थ: अस्ति ।

' प्राण: ' इति संकल्पनां विचारयता अग्रिमानां घटकानाम् आधारेण विवेचनं करवाम ।

(१) प्राण: पदस्य व्युत्पत्ति: निरुक्ति: च ।

(२) प्राण: पदस्य आयुर्वेदगता: संदर्भा: ।

(३) प्राण: पदस्य स्त्रोतसविमानगता: संदर्भा: ।

<u>प्राण: – व्युत्पत्ति: निरुक्ति: च</u>

पुं. – प्राणिति जीवति बहुकालमिति । प्र + अन् + अच् । प्राणित्यनेनेति करणे घञ् वा ।

१) ब्रह्मा २) हृन्मारुत: ३) बोल: ४) काव्यजीव: ५) अनिल: ६) बलम् ७) पूरिते

(शब्दकल्पद्रुम: / खण्ड: तृतीय:)

पुं – प्र + अण् – करणे घञ् ।

१) ब्रह्माणि २) देहस्थवायौ ३) बोले काव्यजीवने ४) रस: ५) अनिले ६) बले ७) पूरिते ८) सूक्ष्मदेहसमष्ट्युपहित चैतन्ये ९) प्राणोपाधिके जीवे १०) जीवने ११) वायौ १२) इन्द्रिये १३) घ्राणे १४) देहस्थछिद्रे १५) देहस्थे दशवृत्तिके वायुभेदे १६) धातुपुत्रभेदे १७) सप्तर्षिभेदे १८) पुत्रभेदे १९) विष्णो: २०) जले २१) मूलाधारस्थे वायो:

(वाचस्पत्यम् / षष्ठ: खण्ड: )

– इत: अनन्तरं आयुर्वेदे प्राण: पदं कति अर्थै: योजितं तद् पश्याम ।

अ) जीवितम् – प्राणो जीवितं तत् साध्यते दीर्घत्वेन । रोगानुपहतत्वेन चानयेति प्राणैषणा ।।

(चक्र,च.सू.११/३)

– प्राणशब्दो जीवितिवचन एकवचनान्तोऽप्यस्ति, यदुक्तं – 'दशैवायतनान्याहु: प्राणो येषु प्रतिष्ठित: (सू ३०) इति, तेन प्राणप्रत्यवमर्शकम् । (चक्र, च.सू. ११/४)

– अन्यच्च प्राणवधार्थमारभते किञ्चित् । (च.नि. ७/१५)

– प्राणान् पाति रक्षति इति प्राणपति: । चक्रपाणि,च.वि. २/१९

ब) वायु: – – प्राणोदानसमानव्यानापानात्मा । च. सू १२ / ८

– वायु: प्राणसञ्ज्ञाप्रदानहेतूनाम् । च . सू २५ / ४०

– सर्वा हि चेष्टा वातेन स प्राण: प्राणिनां स्मृत: । च. सू. १७ / ११८

– वायु: प्राण: । च शा ५ / ५

– अनुबन्धस्तु खल्वायु:, तस्य लक्षणं प्राणै: सह संयोग: । च. वि. ८ / ९१

प्राणै: सह संयोग इति प्राणलक्षणेन वायुना योग इत्यर्थ: । चक्रपाणि

– प्राणो वायु: । चक्रपाणि, च. चि. १७ / २२

– प्राणेश्वर प्राणभृतां । च. चि. २८ / २४९

क) रक्तम् – तद् विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।

युनक्ति प्राणिनं प्राण: शोणितं ह्यनुवर्तते ।। च. सू. २४ / ४

ड) आहार: – विधिविहितमन्नपानं प्राणिनां प्राणिसंज्ञकानां प्राणमाचक्षते । च. सू. २७/३

– प्राणा: प्राणभृतामन्नम् । च. सू. २७ /३४९, च. चि. २४

इ) मानसबलम् – अल्पप्राणता । च. नि. १ / ३३

अल्पप्राणता मानसबलहानि: । चक्रपाणि

फ) बलम् – सप्राणमातुरम् । च. क. १० / ६

सप्राणमिति बलवन्तम् । चक्रपाणि

– प्राणानुबन्ध: इति बलानुबन्ध: । चक्र. च शा. ३ /१२

– अग्निप्राणविवृद्ध्यर्थं क्रमं पेयादिकं भजेत् । च. सि. ६/५७

ग) इन्द्रः   – इन्द्रशब्देन प्राणः उच्यते । चक्र. च. इं. १/१

ह) जीवः   – सजीवापगम इति प्राणनिरोधः । च. शा. ५/८

– यावत् प्राणानां प्रत्यागमनम् ।। च शा. ८/४२

ल) उच्छ्वासः – प्राणापानौ.........।। च. शा. १/७० प्राणापानौ उच्छ्वासनिःश्वासौ । चक्रपाणि

– तत्र हृदये दशधमन्यः प्राणापानौ........। च. सि. ९/४

– प्राणापानौ उच्छ्वासनिःश्वासौ । चक्रपाणि

ततः एतैः विविधैः अथैः प्राणः पदम् आयुर्वेदशास्त्रे योजितम् अस्ति ।

– इदानीं स्त्रोतोविमाने अधिकरणे प्राणः पदं केनार्थेण योजितं पश्याम ।

संदर्भः – च वि ५/७

चक्रपाणिः – प्राणवहानामिति प्राणसंज्ञकवातवहानाम् ।

ज्योतिषचन्द्रसरस्वतिः– श्वासप्रश्वासवाहिनी ।

गंगाधररॉयः तथा योगेंद्रनाथसेनेन च यद्यपि स्पष्टा व्याख्या न कृता तथापि प्राणवहस्य दुष्टीलक्षणानि उच्छ्वासेन सह संबद्धानि इति वर्णितम् ।

– अतः स्त्रोतस् विमाने अधिकरणे 'प्राणः' इति पदस्य अर्थः 'वायुः' इति एव गृहीतः । तथा 'प्राणवहस्त्रोतः' अनेन श्वासोच्छ्वासप्रणालि' इति अर्थः गृहीतव्यः इति वर्णनम् अस्ति ।

– अस्य पुष्ट्यर्थं 'प्राणवह स्त्रोत' इत्यस्य चरकेण कथितान् सर्वान् संदर्भान् वयं पश्याम तथैव तत्र टीकाकारैः किं वर्णितं तदपि पश्याम ।

१) यः प्राणवहानि स्त्रोतांस्यन्वेति तेन श्वासः प्रतिश्यायश्च जायते ------।। च. नि. ६/४

शोषव्याधेः सम्प्राप्तौ दुष्टः वायुः यदा प्राणवहेषु स्त्रोतस्सु गच्छति तदा श्वासः प्रतिश्यायः च एतौ लक्षणौ भवतः ।

२) मारुतः प्राणवाहीनि स्त्रोतांस्याविश्य कुप्यति । उरःस्थः कफमुद्धय हिक्काश्वासान् करोति सः ।।

च. चि. १७/१७

३) प्राणोदकान्नवाहिनि स्त्रोतांसि सकफोऽनिलः । हिक्का करोति संरुद्ध ---।

च.चि.१७/२१

अत्र प्राण: वायु: । चक्रपाणि:

४) एते हि कफसंरुद्धगतिप्राणप्रकोपजा: । तस्मात्तन्मार्गशुद्ध्यर्थं देया लेहा न निष्कफे ।।

च. चि. १७/१२०

तन्मार्गशुद्ध्यर्थमिति प्राणमार्गशुद्ध्यर्थम् ।। चक्रपाणि:

५) शिरसि इन्द्रियाणि इन्द्रियप्राणवहानि च स्त्रोतांसि सूर्यमिव गभस्तय: संश्रितानि ----।।

च.चि.९/४

इन्द्रियप्राणवहानि यद्यपि प्रदेशान्तरेऽपि भवन्ति तथाऽपि शिरसि विशेषेणैवैतानि प्रबद्धानीति सूर्यमिव गभस्तय इति दृष्टान्तेन दर्शयति । चक्रपाणि:

प्राणवहस्य विकृति: श्वास: हिक्का कास: एतासु व्याधिषु स्पष्टतया वर्णिता अस्ति । अपि च आवरणानां सम्प्राप्तौ प्राणवायो: आवृतत्व वर्णितम् ।

- सर्वे: उपरितनै: उदाहरणै: 'स्त्रोतसां विमानम्' अधिकरणे 'प्राण:' इति पदेन वायु: इत्येव अर्थ: अभिप्रेत: । चरकाचार्येण टीकाकारै: अपि एष: अर्थ: प्राणवहानां स्त्रोतसां सम्बधेन एव गृहीत: । 'प्राण:' पदस्य अन्ये अर्था: तद् तद् अधिकरणानुसारं ग्रहीतव्या:। अत्र अधिकरणम् पदार्थ: च एतयो: तन्त्रयुक्ति: उपयोजिता अस्ति ।
- प्राणवहेषु स्त्रोतस्सु टीकाकारै: कृतं विवेचनं संलक्ष्य पश्चात् प्राणप्राणवहयो: स्त्रोतसो: संकल्पनां विचारयाम: ।
- विवेचनं कुर्वन्त: टीकाकारा: मूलत: प्रकोपविज्ञानत: च एवं विभागद्वये वर्णयन्ति ।
- मूलस्थानयो: हृदयं महास्त्रोत: च एतयो: टीकाकारै: कृता: अर्था: अधोक्तवत् सन्ति ।

| टीकाकार: | हृदयम् | महास्त्रोत: |
|---|---|---|
| चक्रपाणि: | - | - |
| गंगाधर: | वक्षम् | महासरणम् महाच्छिद्रम् |
| योगीन्द्रनाथसेन: | हृदयम् | कोष्ठम् |
| ज्योतिषचन्द्रसरस्वति: | हृदयम् | उर: कोष्ठस्थ फुप्फुस: |

– यद्यपि पदानि भिन्नानि सन्ति तथापि सर्वेषाम् टीकाकाराणाम् अभिप्रेत: अर्थ: समान: एव । उर: प्रदेश: कोष्ठम् च एते प्राणवहस्य  मूलस्थाने स्त: इति सर्वेषां टीकाकाराणां वचनम् ।

अस्मिन् विषये ज्योतिषचन्द्रसरस्वतिना कृतं विवेचनं अतीव महत्वम् अर्हति । तस्य ऊहापोहं अग्रे सविस्तरं करवाम ।

– चक्रपाणिना उक्तम् प्राणवहं स्त्रोत: नाम प्राणसंज्ञक: वायु: । स: अग्रे वदति यद्यपि वायु: सर्वशरीरचर: तथा सर्वस्त्रोतोगामी सन् अपि तस्य एतद् विशिष्टं स्त्रोत: अस्ति ।

– गंगाधरेण महास्त्रोतस: व्याख्या कृता ‘‘ महास्त्रोत महासरणं महाच्छिद्रम् ’’ इति । तेन ‘कोष्ठम्’ इत्येव अर्थ: अभिप्रेत: तस्य ।

– ज्योतिषचन्द्रसरस्वते: विवेचनं अतीव विशेषं महत्वपूर्णं च अस्ति।तस्य विवेचनात् शरीररचनाया: तस्य गभीर: अभ्यास: संदृश्यते । ज्योतिषचन्द्रसरस्वति: विंशति: शताब्दे: टीकाकार: सता तेन प्राचीनार्वाचीनानां विचाराणां समन्वय: आधुनिक यंत्र निमित्तेन शास्त्रं प्रति परिवर्तित: दृष्टिकोन: एतयो: द्वयो: समावेश: स्वविवेचने कृत: इति दृश्यते । चरकस्य तथैव प्राचीनानां टीकाकाराणां उर:प्रदेश:, वक्ष: हृदयम् आदिभि: पदै: यद् अभिप्रेतम् तद् अतीव मनोहार्यतया तेन स्वव्याख्यायां प्रतिपादितम् तदपि अर्वाचिनं शास्त्रं प्रत्यक्षप्रमाणं च अविरुध्य ।

प्राणवहस्य स्त्रोतस: व्याप्ति: तेन वर्णिता । नासापुटात् प्रारभ्य प्राणवहं स्त्रोत: उर:कोष्ठौ व्याप्नोति । एषा प्रणालि: श्वासप्रश्वासौ वहति । गतप्रदेशे तरुणास्थिमया शाखाप्रशाखाभि: युक्ता एषा फुप्फुसयंत्रस्य अन्तपर्यंतं व्याप्य तिष्ठति ।

– अस्या: प्रणाल्या: मूलस्थानम् – हृदयम् । स्तनयोर्मध्ये उर:कोष्ठयोर्मध्ये अधोमुखं पद्मकलिकाकारं यन्त्रं हृदयम् ।

अपि च कोष्ठस्य पर्याय: महास्त्रोत: । तदर्थं चरकसूत्रस्थानस्य संदर्भ: दत्त: ।

‘‘ कोष्ठं पुनरुच्यते शरीरमध्यं महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे ।’’

तस्य कोष्ठार्थ: इति अर्थेन प्राणवहस्य एकदेशस्य उर: कोष्ठाभ्यां परिग्रह: भवति । ‘कोष्ठ’ इति पदेन अत्र ‘उर:स्थ: कोष्ठ:’ इति अधिकरणानुसारं अर्थ: ग्रहीतव्य: ज्योतिषचन्द्रस्य मतम् । तथा

तेन पदेन उर:कोष्ठगतं फुप्फुसयंत्रं ग्राह्यम् तदेव प्राणवहस्य द्वितीयं प्रभवस्थानम् । 'महास्त्रोत:' इति पदेन ' फुप्फुसयन्त्रं ' इति अर्थ: ग्राह्य: इति ज्योतिषचन्द्रसरस्वते: मतम् ।

प्राणवहस्य मूलस्थानविषयकस्य विवेचनानन्तर तस्य प्रकोपलक्षणानां विवरणं कृतम् । एतानि लक्षणानि दुष्टिलक्षणानि इत्यपि उच्यन्ते ।

– लक्षणानाम् उपरितनानां सर्वासां टीकानां सारांश: –

१) अति सृष्टं अतिबद्धं च एतयो: व्युत्पत्ति: वैकल्पिका । इत्यर्थ: एते लक्षणे युगपद् उत्पन्ने इति असंभवनीयम् । चक्रपाणि:

२) तथैव अल्पाल्पं अभीक्ष्णं च एते अपि लक्षणे युगपद् असंभाव्ये । चक्रपाणि:

३) अतिसृष्टम् – आयत्या दीर्घमुच्छ्वसिति: । गंगाधर:

– विसर्गे दीर्घम् । योगीन्द्रनाथसेन:

– अतिबहुलम् । ज्योतिषचन्द्रसरस्वति:

बृहद् मात्रायां दीर्घ: उच्छ्वास: करणं नाम अतिसृष्टम् उच्छ्वसिति: एतद् लक्षणम् ।

४) प्रकुपितम् – वृद्धम् । गंगाधर: ।

– प्रवृद्धम् । योगीन्द्रनाथसेन:

– दुष्टम् । ज्योतिषचन्द्रसरस्वति:

श्वसनस्य वेगवृद्धि: नाम प्रकुपितम् एतद् लक्षणम् ।

५) अल्पाल्पम् – स्तोकम् । योगीन्द्रनाथसेन:

अल्पायां मात्रायां श्वासप्रश्वासकरणं , दीर्घं श्वसनम् अशक्यम् नाम अल्पाल्पम् ।

६) अभीक्ष्णम् – पुन: पुन: । योगीन्द्रनाथसेन:

– पुन: पुन: अतिद्रुतम् । ज्योतिषचन्द्रसरस्वति:

वेगेन वारंवारं श्वासोच्छवासचलनं नाम अभीक्ष्णम् ।

७) सशब्दशूलम् – शब्देन घडाघडायनेन शूलेन उर:शूलेन च सहितं उच्छ्वसन्तं श्वासं गृह्णन्तम्

ज्योतिषचन्द्रसरस्वति:

'घडघड' इति शब्दै: सह उर:प्रदेशगतेन शूलेन सह उच्छ्वासं त्यक्त्वा श्वासग्रहणम् ।

८) एतानि सर्वाणि लक्षणानि एकस्मिन् रुग्णे एकमेव लक्षणम् इति रुपेण उत्पद्यन्ते एकापेक्षया अधिकानि लक्षणानि युगपद् असंभवानि ।

– उपरीतनेषु सर्वेषु लक्षणेषु प्राणवहस्य प्राकृतरचनायां कार्ये च विकृति: आगच्छति ।

– एवं प्राणवहानां स्त्रोतसां टीकाकाराणां साहाय्येन विवेचनं भूतम् ।

निष्कर्ष: – १) ' महास्त्रोतस: ' इत्यस्य टीकायां वैधर्म्यम् ।

२) ' प्रकुपितम् ' पदस्य टीकायां वैधर्म्यम् ।

## उदकवहं स्त्रोत:

– प्राणवहस्त्रोतसानन्तरं उद्देशक्रमानुसारं उदकवहानां स्त्रोतसां वर्णनं कृतम् ।

– अस्मिन् सूत्रे चक्रपाणि:,गंगाधर:, योगीन्द्रनाथसेन: च एतै: न अधिकं विवेचनं कृतम् । ज्योतिषचन्द्रसरस्वति: तु सविस्तरं व्याख्यां करोति ।

– 'क्लोमम् ' इति मूलस्थानस्य व्याख्या सर्वै: एव कृता ।

क्लोमस्य व्याख्या –

चक्रपाणि: – हृदयस्यपिपासास्थानम् ।

गंगाधर: – कण्ठोरसो: सन्धि: ।

योगीन्द्रनाथसेन: – क्लोमं कालखण्डादधस्तात् स्थितं दक्षिणपार्श्वस्थं तिलकं प्रसिद्धम् । तच्च पिपासास्थानम् ।

ज्योतिषचन्द्रसरस्वति: – क्लोमम् चामाशयस्य पृष्ठत: पृष्ठाभ्यन्तरभागे संसक्त: तिलसंज्ञ: । उदकवहस्त्रोतस: परमसञ्चयस्थानम् ।

एतेभ्य: यो से. तथा ज्यो. स. एतयो: मतं प्राय: समानम् अस्ति । गंगाधर रॉयस्य विवरणं भिन्नम् अस्ति । चक्रपाणिना यथावत् गुढान् शब्दान् उपयुज्य संदिग्धता पूर्ववत् परिपलिता ।

ज्योतिषचन्द्र सरस्वति उदकवहस्य सविस्तरं विवेचनं करोति । तद् पश्याम ।

शरीरयात्रां चालयितुं यावत् उदकम् आवश्यकं तावत् प्राशनानंतरम् उदकवहं स्त्रोत: तद् आकर्षति । स्त्रोतस: मूलस्थाने तस्य वहनं भवति । पश्चात् तत: प्रच्यवितं शरीरे वहितं भवति ।

शरीरस्थं उदकम् तथा तस्य भावपदार्थानां पोषणं तद्द्वारा भवति । तदर्थं ज्यो सरस्वतिना शरीरस्थानस्थः संदर्भः दत्तः ।

तालुप्रदेशात् प्रारभ्य आक्लोमम् असंख्यानि उदकवहानि स्त्रोतांसि भवति । तेषां मूलं नाम प्रभवस्थानं तालोः ऊर्ध्वतः तथा ऊर्ध्वदन्तवेष्टस्य पृष्ठतः च प्रारभ्य मुखस्य अभ्यन्तरकुहरस्य आनासागतछिद्रं देहभागः समाविष्टः अस्ति । एतद् तालुमूलस्थानम् अस्ति ।

'तालुः' पदेन जिह्वा गलः च एतयोः परिग्रहः कृतः । इत्यर्थः जिह्वागले विहाय ऊर्ध्वदन्तवेष्टस्य पृष्ठे मुखे आनासाच्छिद्रं भागः तालुः अस्ति । तदेव उदकवहस्य स्त्रोतसः मूलस्थानम् ।

क्लोमम् – ज्योतिषचन्द्रसरस्वतिना क्लोमस्य अतीव विस्तृतं विवेचिनं कृतम् । तेन क्लोमस्य व्याख्या अधिष्ठानः परिमाणं कार्यं च एतेषां वर्णनं कृतम् ।

क्लोमम् नाम आमाशयस्य पृष्ठतः अन्तर्भागे संसक्तः ' तिलः ' नाम्ना अवयवः । अस्य स्थूलः शिरोभागः दक्षिणपार्श्वे नाभिप्रदेशे वेष्टितः भवति । एष अवयवः दक्षिणपार्श्वप्रदेशात् वामपार्श्वस्य प्लीहा पर्यंतं प्रसारितः सन् तिर्यक् दिशया अवस्थितः भवति । अस्य आयामः दश अंगुलानि तथा विस्तारः चतुस्त्रिंशत् अंगुलानि अस्ति ।

अस्य विस्तृतं विवेचनं स्वरचिते 'शारीरविनिश्चयः' इति ग्रन्थे कोष्ठांगविनिश्चये अध्याये कृतम् ज्योतिषचन्द्रसरस्वतिना उक्तम् ।

– दुष्टिलक्षणेषु जिह्वादिषु अवयवेषु उदकस्य अभावात् शोषलक्षणं दृश्यते । जिह्वा, तालुः, ओष्ठौ, कण्ठः एतेषु अवयवेषु सततोदकसिंचनेन तानि सततं आर्द्रानि स्थापितानि सन्ति । तेषां शोषं (शुष्कतां) दृष्ट्वा उदकवहस्य स्त्रोतसः परमसंचयस्थाने क्लोमे अपि शोषस्य अनुमानं करणीयम् ।

– सर्वासां टीकानां विवेचनं दृष्ट्वा विशेषाः घटकाः अधोल्लिखिताः –

१) सर्वे टीकाकाराः क्लोमस्य व्याख्यां कृतवन्तः ।

२) परं ज्योतिषचन्द्रसरस्वतिना क्लोमस्य व्याख्या अधिष्ठानं परिमाणं कार्यं च एते विवेचिताः ।

३) तालुः इति मूलस्थानस्य प्राप्तिः ।

४) क्लोमम् इति उदकवहस्य परमसंचयस्थानम् ।

५) जिह्वादीनां शुष्कतायाः क्लोमस्थस्य शोषस्य अनुमानं करणीयम् ।

६) ज्योतिषचन्द्रसरस्वतेः विवेचनात् क्लोमम् नाम 'पॉन्क्रियाझ' इत्यस्य वर्णनम् अस्ति ।

७) ज्योतिषचन्द्रसरस्वतिना उदकवहस्य व्याप्तिः तालुतः आक्लोमं एतावती कथिता अस्ति ।

८) उदकवहानि स्त्रोतांसि असंख्यानि सन्ति इति वर्णनं ज्योतिषचन्द्रसरस्वतिना कृतम् ।

निष्कर्षः – क्लोमम् पदस्य व्याख्यायां वैधर्म्यम् अस्ति ।

## अन्नवहं स्त्रोतः

– ज्योतिषचन्द्रसरस्वतेः विचारानुसारं आहार्यभावविशेषेभ्यः अन्नम् इति तृतीयः भावविशेषः तथा तस्य स्त्रोतः एतयोः वर्णनम् कृतम् ।

अस्मिन् सूत्रे चक्रपाणेः व्याख्या एव नास्ति । प्रत्युत गंगाधरः तथा योगीन्द्रनाथसेनः एताभ्यां केवलम् अन्वयः वर्णितः । परं ज्योतिषचन्द्रसरस्वतिना अस्मिन् सूत्रे अपि विस्तृतं विवेचनं कृतम् । ज्योतिषचन्द्रसरस्वतिना अन्नवहस्य स्त्रोतसः स्थूलं सूक्ष्मं च इति विभज्य वर्णनं कृतम् ।

– अन्नवहस्य स्थूलस्त्रोतः गलकुहरात् आमाशयपर्यंत व्याप्नोति । प्रत्युत सूक्ष्मस्त्रोतः आमाशयं वामपार्श्वं च व्याप्य तिष्ठति । एताभ्यां स्थूलस्य अन्नवहस्य स्त्रोतसः मूलं प्रभवस्थानम् आमाशयम् अस्ति ।

– आमाशयं चतुर्विधस्य आहारस्य प्रथमः आधारः (अधिष्ठानम्) अस्ति ।

– आमाशयं महास्त्रोतसः आद्यः स्थूलतमः भागः । सः अग्रे क्रमशः स्थूलतरः मध्यम भागः तथा सूक्ष्मः अंतिमः भागः अनेन क्रमेण अन्तर्नाभिं सम्बध्नानि । अत्र आमाशयस्य व्याप्तिः वर्णिता ।

– आमाशयस्य परिमाणं आयामतः षोडश अंगुलानि तथा विस्तारतः द्वादश अंगुलानि इति वर्णितम् । स्थूलस्य अन्नवहस्त्रोतसः मूलस्थानस्य आमाशयस्य एतद् मानम् ।

– सूक्ष्मस्य अन्नवहस्य मूलस्थानम् आमाशयस्य पृष्ठगतं अनुमितं वामपार्श्वम् अस्ति ।

– अत्र वामपार्श्वम् इति पदेन तस्य बाह्यांगत्वात् 'तत्रस्थः कोष्ठावयवः' इति प्लीहायाः बोधः भवति । ज्योतिषचन्द्रसरस्वतिना 'वामपार्श्वम् ' अस्य अर्थः प्लीहा इति गृहीतः ।

– वामपार्श्वम् (प्लीहा) आमाशयस्य पार्श्वभागं संसक्तं सुसूक्ष्मेण स्त्रोतसा आमाशयगतात् अन्नात् सूक्ष्मातिसूक्ष्मम् अंशं गृहीत्वा पुष्यति।

– तेनैव वाग्भटेन प्लीहावृद्धिनिदाने ‘ अत्याशितस्य संक्षोभात् ’ इति हेतु: वर्णित: ।

– दुष्टिलक्षणानां अधिकं विवेचनं न कुर्वता अनन्नाभिलषणं नाम अक्षुधा इति व्याख्या कृता ।

– अन्नवहानां स्त्रोतसां व्याख्यानां सारांश: –

१) केवलं ज्योतिषचन्द्रसरस्वते: विस्तृता टीका ।

२) अन्नवहस्य स्त्रोतस: स्थूलं सूक्ष्मं च इति द्वौ भेदौ वर्णितौ ।

३) स्थूलम् अन्नवहम् – मूलस्थानम् – आमाशयम्

सूक्ष्मम् अन्नवहम् – मूलस्थानम् – वामपार्श्वम्

४) वामपार्श्वम् इत्यस्य अर्थ: प्लीहा इति स्वीकृत: ।

५) महास्त्रोतसि आमाशयस्य स्थूलतमं स्थूलतरं सूक्ष्मं च एवं क्रमेण आद्य: मध्यम: अन्त: च इति भागा: सन्ति । पश्चात् ते सर्वे अन्तर्नाभिं संबध्नन्ति । एषा आमाशयस्य व्याप्ति: वर्णिता ।

६) आमाशयम् – स्थूलस्य अन्नवहस्य मूलस्थानम् । चतुर्विधस्य आहारस्य प्रथम: आधार: ।

– आयामत: षोडश अंगुलानि । विस्तारत: द्वादश अंगुलानि ।

७) वामपार्श्वम् – सूक्ष्मस्य अन्नवहस्य मूलस्थानम् । आमाशयस्य पृष्ठगतं वामपार्श्वं संसक्त: अवयव:

– आमाशयगतेन पचनोत्तरेण सुसूक्ष्मेण अन्नेन वामपार्श्वं सूक्ष्मस्त्रोतसै: पोषणं प्राप्नोति ।

८) स्थूलान्नवहस्य स्त्रोतस: व्याप्ति: – आगलकुहरं आमाशयपर्यंतम् ।

सूक्ष्मान्नवहस्य स्त्रोतस: व्याप्ति: – आमाशयात् वामपार्श्वम् ।

९) प्लीहा आमाशये सुपाचितेन सूक्ष्मान्नेन स्वस्य पोषणं कारयति । अत: वाग्भटेन प्लीहावृद्धौ अत्याशितरुपी संक्षोभ: इति हेतु: वर्णित: ।

१०) संक्षेपेण स्थूलं सूक्ष्मं च आहारपचनं संबद्धम् इदम् अन्नवहं स्त्रोत: अस्ति । तस्य व्याप्ति: गलकुहरं, आमाशयं वामपार्श्वं च एतावती अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## रसवहं स्त्रोत:

रसवहानां स्त्रोतसां हृदयं मूलं दश धमन्य: च ।

– आहार्यभावपदार्थानां स्त्रोतसां वर्णनानन्तरं अधुना स्थायिभावविशेषाणां स्त्रोतसां वर्णनं कृतम् । तन्त्रकर्ता प्रथमं रसादीनां स्थायिभावपदार्थानां स्त्रोतसां मूलस्थानानि वर्णयित्वा पश्चात् तेषां प्रकोपलक्षणानि वर्णयति ।

– तस्मिन् आद्य: धातु: 'रस:' इत्यस्य स्त्रोतस: मूलस्थानस्य सूत्रम् अस्ति । धातूनां रसादि: इति क्रम: आहारानंतरं उत्पत्तिपोषणक्रमानुसारं अस्ति । रसोत्पत्ति: प्रथमं आहारात् भवति । अत: रसवर्णनं प्रथमं कृतम् ।

– अस्मिन् सूत्रे चक्रपाणि: टीकां न करोति । गंगाधर: मन्यते दश धमन्य: हृदयमूला: सन्ति । प्रत्युत योगेन्द्रनाथसेन: वदति यत् अर्थेदशमूलीये अध्याये वर्णिता: दशधमन्य: हृदयप्रतिबद्धा: सन्ति

– योगीन्द्रनाथसेनेन अत्र अतीतावेक्षणतन्त्रयुक्त्या: उपयोग: कृत: ।

– संक्षेपेण हृदयं तथा तं प्रतिबद्धा: तदुद्भवा: दश धमन्य: च रसवहस्य मूलस्थानम् अस्ति ।

– चक्रपाणि: टीकां न करोति तथा गंगाधर: योगीन्द्रनाथसेन: च उभौ विशेषं वक्तव्यं न कुरुत: । इत्यस्य अर्थ: सूत्रं स्पष्टम् अस्ति, तस्मिन् विषये विशेषविवेचनस्य आवश्यकता नास्ति इति तेषां मतम् । केवलं ज्योतिषचन्द्रसरस्वतिना सविस्तरं विवेचनं कृतम् । ज्योतिषचन्द्रसरस्वतिना सर्वत्र स्त्रोतसां स्थूलं सूक्ष्मं च इति द्वौ भेदौ कृत्वा तदनुसारं तेषां मूलस्थानानि वर्णितानि ।

– रसवहस्य अपि स्थूलरसवहं सूक्ष्मरसवहं च इति भेदौ कृतौ । तस्मिन् हृदयं स्थूलरसवहस्य उत दशधमन्य: सूक्ष्मरसवहस्य मूलस्थानम् सन्ति ।

– स्थूलरसवहस्त्रोत: – पक्वाशयात् शोषित: आहारपरिणमनोत्तर: सिद्ध: आहाररस: धमन्या हृदये आनीत: भवति । एतादृशं शुद्धप्राकृतेन आहाररसेन परिपूर्णं रसस्थानं नाम हृदयं । तस्मात् स्थूलस्य रसवहस्य स्त्रोतस: कार्यं प्रारभते ।

– रसस्य संचयस्थानं वहनस्य आद्यस्थानं तथा कार्यकरणस्यापि आद्यं स्थानं च अस्ति । तेनैव हृदयं रसवहस्य मूलस्थानं मन्यते ।

सूक्ष्मरसवहस्त्रोत: – सूक्ष्मे रसवहे स्त्रोतसि तेषां तेषां धातूनां स्थानं गत्वा तेषां पोषणं कुर्वाणा: दशधमन्य: समाविष्टा: ।

पक्वाशयात् हृदयम् आनीत: तथा संचित: रस: दशधमनीभि: सर्वस्मिन् शरीरे प्रक्षिप्य सर्वान् भावघटकान् गत्वा तान् पुष्यति । अत: दशधमन्य: रसवहस्य मूलस्थानं मन्यते ।

– एताभि: धमनीभि: रसधातु: सरक्तं सर्वं शरीरं गत्वा धातुपोषणस्य कार्यं भवति । एष: रस: शिराभ्य: गच्छत् गच्छत् सुसूक्ष्मेषु रसवहेषु स्त्रोतस्सु प्रविशति । पश्चात् तत्त: च्युत: पर्याप्तेन सामर्थ्येन पोषणं करोति ।

– एवं हृदयं तथा तत्प्रतिबद्धाभि: शाखाप्रशाखाभि: युक्ता: दशशिरा: रसवहस्य मूलस्थानं सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## रक्तवहं स्त्रोत:

रक्तवहानां स्त्रोतसां यकृन्मूलं प्लीहा च ।

– अस्मिन् सूत्रे अपि चक्रपाणि: टीकां न करोति । तथैव योगीन्द्रनाथ सेन: गंगाधर रॉय: च केवलं सूत्रस्य अन्वयं लिखत: । प्रत्युत ज्योतिषचंद्र सरस्वति: उत्तमं विवेचनं करोति । रक्तवहस्य स्थूलं सूक्ष्मं च इति भेदौ कृत्वा तयो: मूलस्थानं वर्णितम् ।

– सूक्ष्मं रक्तवहं स्त्रोत: यकृतप्लीहयो: अन्त:स्थं अस्ति । तत्र रक्तस्य निर्मितिकाले तस्य परमाणूनां स्थानान्तरं कुर्वन्त: सन्ति ।

– स्थूलानि रक्तवहानि स्त्रोतांसि यकृतप्लीहात: आहृदयं रक्तस्य अभिवहनं कुर्वन्ति । अत: यकृतप्लीहे रक्तवहस्य मूलस्थानम् स्त: ।

– यकृतम् हृदयस्य अधोभागे दक्षिणपार्श्वे भवति । 'कालखण्ड:' इति तस्य पर्याय: । लोकेषु (व्यवहारेषु) स: कलेजा इति उच्यते । प्लीहा आमाशयं संसक्ता वामपार्श्वे अवतिष्ठति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## मांसवहं स्त्रोत:

मांसवहानां स्त्रोतसां स्नायुर्मूलं त्वक् च ।

– अस्मिन् सूत्रे चक्रपाणि: गंगाधर: योगीन्द्रनाथसेन: च एते टीकां न कुर्वन्ति । ज्योतिषचन्द्रसरस्वते: विवेचनं अधोनिर्दिष्टम् । स्नायु: त्वक् च मांसवहस्य मूलस्थानं तन्मध्ये स्नायु: नाम मांसाग्रसक्ता कण्डरा । मांसस्य अग्रभागे संसक्ता कण्डरा नाम स्नायु: । प्रत्युत 'त्वक्' इति पदेन मांसधरा त्वक् इत्येव अर्थ: ग्राह्य: । त्वच: सर्वेषु प्रकारेषु केवलं मांसधरा त्वक् एव मांसवहस्य स्त्रोतस: मूलम् अस्ति ।

– सुसूक्ष्मदृशत: मांसवहात् स्त्रोतस: सूक्ष्मं द्रवरुपं मांसं औढं भवति । अत्र सूक्ष्मं द्रवरुपं च इति विशेषणे मांसं समायोजिते स्त: । परं टीकाकारै: तस्य अर्थविवेचनं न कृतम् ।

– प्रथमे अधिकरणे विवेचितं वर्णनम् अनुसृत्य शरीरस्था: सर्वे भावपदार्था: परमाणुस्वरुपिण: सन्त: सततं गतिमन्त: भवन्ति । प्राकृतायां वा विकृतायाम् वा अवस्थायां तेषां परमाणव: शरीरे सर्वत्र संचारिण: भवन्ति ।

– द्रवरुपं इत्यस्य अर्थ: अपि एष: एव । द्रवरुपं इति पदस्य अर्थ: 'जलसदृशं प्रवाहपिदार्भां' इति न कार्य: अपि तु ये गतिमन्त: तादृशा: तेषां तेषां भावपदार्थानां परमाणव: तस्मात् तस्मात् स्त्रोतस: वहन्त: सन्ति अथवा औढा: भवति ।

– एवं रीत्या मांसम् इत्यस्य अर्थ: शब्दश: 'पेशी' इति न कार्य: प्रत्युत लेपनकर्म कुर्वाण: द्रवरुप: नाम सूक्ष्म: गतिशील: सर्वशरीरसंचारी परमाणुस्वरुपी मांसधातु: इति ग्राह्य: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## मेदोवहं स्त्रोत:

मेदोवहानां स्त्रोतसां वृक्कौ मूलं वपावहनं च ।

– इमं पाठं चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एतौ स्वीकुरुत: ।

– गंगाधर: मेदावहानां स्त्रोतसां बुक्कौमूलं वपावहनं च ।

– योगीन्द्रनाथसेन: मेदावहानां स्त्रोतसां वुक्कौमूलं वपावहं च । एवं पाठभेदौ स्त: ।

– योगीन्द्रनाथ सेन: गंगाधरस्य शिष्यपरंपरायां सन् एकसमान: पाठ: महोदयेन स्वीकृत: ।

– अस्मिन् सूत्रे वृक्कद्वयं वपावहनं च एते मेदोवहस्य मूलस्थानं इति स्वीकृते ।

वृक्कं । बुक्कं । वुक्कं – बुक्कौ अग्रमांसद्वयम् । गंगाधर:

– बुक्कौ मांसपिण्डद्वयम् एको दक्षिण: पार्श्वे स्थित: अपरश्च वामपार्श्वे । योगीन्द्रनाथसेन:

– वृक्कौ तौ च बस्तिशिरसोपरि संसक्तौ ग्रन्थिविशेषौ भवत: । ज्योतिषचन्द्रसरस्वति:

– वृक्कौ अथवा बुक्कौ एतौ द्वे संख्यया स नौ मांसपिण्डस्वरुपौ स्त: । तौ बस्तिशिरस: ऊर्ध्वप्रदेशे संसक्तौ ग्रन्थिविशेषौ स्त: । (ज्योतिषचन्द्रसरस्वति:)

अस्मिन् चक्रपाणि: कामपि टीकां न करोति ।

वपावहनम्

– वपावहनम् – वपा उदरस्था स्निग्धवर्तिका यामाहुर्जनास्तैलवर्तिकेति । चक्रपाणि:

– वपाहनम् वसावहनम् । गङ्गाधर:

– वपावहं वपावहनं कोष्ठाङ्गविशेष: । योगीन्द्रनाथसेन:

– स च अन्त: कुक्षौ सर्वयन्त्राच्छको जरायुविशेष: । ज्योतिषचन्द्रसरस्वति:

'वपावहनं' इति पदं चत्वार: अपि टीकाकारा: व्याख्या: विवेचनं च एताभ्यां स्वरुपाभ्यां वर्णयन्ति ।

– चक्रपाणि: वपा नाम उदरस्था स्निग्धवर्तिका यस्यै जना: तैलवर्तिकां वदन्ति । इति व्याख्यां करोति । वपावहनसदृशा: भावविशेषा: अतीन्द्रियदर्शिभ्य: (इन्द्रियातीतं ज्ञानं पश्यद्भ्य:) ऋषिभ्य: बोधगम्या: सन्ति । अस्मद्सदृशेभ्य: सामान्यबुद्धिमद्भ्य: जनेभ्य: इदं ज्ञानं न संभवति । इति वदति चक्रपाणि: ।

– गंगाधररॉय: वसावहनं नाम वपावहनं इति अर्थं स्वीकरोति प्रत्युत योगीन्द्रनाथसेनेन वपावहनं नाम एवं कोष्ठांगविशेष: इति कथयित्वा अष्टांगसंग्रहस्य शारीरस्थानस्य संदर्भं दत्वा वपावहं नाम मांसम् इति अनुमत तन्त्रयुक्तिम् अनुसृत्य वर्णनं कृतम् ।

– ज्योतिषचन्द्रसरस्वतिना स्ववैशिष्ट्यानि अनुसृत्य मेदोवहस्य स्थूलं सूक्ष्मं च इति भेदानुसारं वर्गौ कृतौ । सूक्ष्ममेदोवहस्त्रोतसां मूलं वृक्कद्वयं अस्ति । अपि च ते बस्तिशिरस: ऊर्ध्वप्रदेशस्थे ग्रन्थिविशेषे स्त: इति वर्णनं कृतम् । पुन: वृक्कस्य अधिकज्ञानार्थं स्वरचित: ' शारीरविनिश्चय: ' इति ग्रन्थ: द्रष्टव्य: इति विज्ञापना कृता अस्ति । अधुना तु एष: ग्रन्थ: अनुपलब्ध: अस्ति ।

– स्थूलस्य मेदोवहस्य स्त्रोतस: मूलस्थानं वपावहनम् अस्ति । अन्त: कुक्षीगतानां सर्वेषां यन्त्राणाम् आच्छादक: जरायुविशेष: नाम ।

– 'वपावहनं' इति व्याख्यां ज्योतिषचन्द्रसरस्वति: करोति । अस्मिन् वपावहने अतिरिक्तस्य मेदस्य संचय: भवति । संचितस्वरुपस्य मेदस्य वहनं करोति अत: तस्य संज्ञा वपावहनं इति अस्ति तं मूलस्थानम् मन्यते च ।

– वपावहनस्य व्याख्यायां ज्योतिषचन्द्रसरस्वति: उदरकुक्षीगतानां सर्वेषां यन्त्राणां आच्छादक स्वरुपी जरायु: इति वर्णयति । अस्मिन् उदरस्थानि सर्वाणि अवयवानि ' यन्त्रम् ' इति उक्तम् ।

– यन्त्रम् – समरांगणसूत्रधार: इति ग्रन्थे यन्त्रस्य व्याख्या उत्तमतया कृता अस्ति ।

''सृष्टौ सत्सु: पांचभौतिकेषु घटकेषु स्वकार्यार्थ परिवर्तनं घटयत् साधनं नाम यन्त्रम् ''

– सृष्टिगतं तेज: महाभूतं विद्युति रूपांतरितं कृत्वा मनुजेन विद्युता चालयत: सर्वाणि उपकरणानि निर्मितानि । बाष्पयन्त्रं विविधानि वाहनानि जलात् विद्युतनिर्मिति: पवनचक्रिका: घर्षणपेषण: इत्यादीनि सर्वाणि यन्त्राणि सन्ति ।

– तथैव पांचभौतिके आहारे शरीरे गते तस्य आहारस्य पचनं विघटनं च कृत्वा तेषां शरीरस्येषु भावपदार्थेषु रूपांतरं करणम् इति कार्यं दन्ता: जिव्हा आमाशयं यकृतं प्लीहा पक्वाशय: च एतानि अवयवानि कुर्वन्ति । एतद् एकत: यन्त्रस्वरुपं कार्यं अस्ति । अत एव ज्योतिषचन्द्रसरस्वतिना उदरस्थान् सर्वान् अवयवान् यन्त्राणि इति उक्तम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अस्थिवहं स्त्रोत:

अस्थिवहानां स्त्रोतसां मेदोमूलं जघनं च ।

– अस्मिन् सूत्रे गंगाधरेण योगीन्द्रनाथसेनेन च केवलं अन्वयस्वरुपिणम् अविशेषं वर्णनं कृतम् ।

– ज्योतिषचन्द्रसरस्वति: अस्थिवहस्य अपि सूक्ष्मं स्थूलं च इति भेदेन वर्णनं करोति ।

– सर्वदेहव्यापी अन्नरस: मेदानन्तरं अस्थीनां पोषणं करोति । ईदृशस्य द्रवरुपिण: अस्थ्न: सूक्ष्मस्त्रोतस: मूलं मेद: अस्ति । तथा स्थूलस्त्रोतस: मूलं जघनं नाम कटिकपालम् अस्ति ।

– चक्रपाणिना अपि अस्थि: द्रवरुपं सत् स्त्रोतोवाह्यम् अस्ति इति स्त्रोतस: औढं भावविशेष स्वरुपिणम् भवति इति वर्णिताम् ।

– चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एतौ अस्थ्ने द्रवरुपं वदन्ति । मांसवहस्त्रोतसां विवरणे वर्णितवत् द्रवरुपं नाम सूक्ष्म: सततगतिमान् सर्वशरीरचर: परमाणुस्वरुप: भावपदार्थ: । अस्थि अपि एक: भावपदार्थ: अपि च स: परमाणुस्वरुपे स्वस्त्रोतसत: सर्वस्मिन् शरीरे सततं परिभ्रमणशील: अस्ति । यदा एते अस्थिपरमाणव: अस्थिधात्वग्न्या पालिता: तदा तेषु सुषिरता रुक्षता खरता काठिण्यादय: गुणा: उत्पद्य शरीरस्य धारणकरे घटके पूरणं रुपांतरं च भवति । पुन: तदा ते स्थूलानाम् अस्थ्नाम् स्वरुपं प्राप्नुवन्ति । अत: एव सूक्ष्मास्थ्नां मूलं मेद: तथा स्थूलास्थिवहस्य मूलं जघनं (कटिकपालं) इति विचार: योग्य: अस्ति ।

<u>निष्कर्ष:</u> – वैधर्म्यं नास्ति ।

## <u>मज्जावहं स्त्रोत:</u>

मज्जावहानां स्त्रोतसां अस्थिनी मूलं सन्धयश्च ।

– अस्मिन् सूत्रे योगीन्द्रनाथसेन: गंगाधर: चक्रपाणि: च एते व्याख्यां न कुर्वन्ति ।

– ज्योतिषचन्द्रसरस्वतिना अपि सविस्तृतं विवेचनं विहाय एतावत् एव वर्णितम् यत् स्थूलस्य मज्जावह स्त्रोतस: मूलस्थानं अस्थिसन्धि: अपि च सूक्ष्मस्य मज्जावहस्त्रोतस: मूलस्थानं अस्थि अस्ति ।

– सूक्ष्मे पचने अस्थ्न: पोषकांशा: मज्जां निर्मान्ति । तथा स्थूलरुपे अस्थ्नां सन्धिषु मज्जाया: लाक्षणिकं स्वरुपं दृश्यते अत: ते मूलस्थानं इति मतं स्यात् ।

<u>निष्कर्ष:</u> – वैधर्म्यं नास्ति ।

## <u>शुक्रवहं स्त्रोत:</u>

शुक्रवहानां स्त्रोतसां वृषणौ मूलं शेफश्च ।

– अस्मिन् सूत्रे चक्रपाणि: योगीन्द्रनाथसेनस्य च विशेषे टीके न स्त: ।

वृषणम् – वृषणौ अण्डकोषौ । गंगाधर:

शेफ – शेफ: शिश्न: । गंगाधर: एवं पदद्वयस्य व्याख्ये केवलं गंगाधर: वर्णयति ।

– ज्योतिषचन्द्रसरस्वतिना पुनरेकवारं विस्तृतं विवेचनं कृतम् । सुसूक्ष्मानां सर्वशरीरचराणां शुक्रस्य सर्वशरीरे गतिमन्ती नैकानि यानि स्त्रोतांसि सन्ति तेषां मूलस्थानं वृषणद्वयम् अस्ति । वृषणे शुक्रस्य एकत्रीकरणं भूत्वा तद् संपूर्णं शरीरं गच्छति । तस्मात् किंचित् स्थूलरूपेण संचितं भवति तदनंतरं द्वाभ्यां स्त्रोतोभ्यां (मार्गेभ्य:) शुक्रं मूत्राधारस्य अध:प्रदेशे संचितं भवति । बस्तिद्वारस्य अंगुलद्वयं अध: शिश्ने य: मूत्रप्रसेक: (मूत्रमार्ग:) अस्ति तत्र आगत्य पश्चात् तस्मात् निर्गच्छति । अत: स्थूलस्य शुक्रवहस्य मूलस्थानं शेफ इति अस्ति ।

– एष: विचार: अनुमततन्त्रयुक्त्याधारेण आधारभूतं वचनम् इति कृत्वा सुश्रुतस्य अधोक्त: संदर्भ: दत्त: – द्वयंगुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यध: ।

मूत्रस्त्रोत: पथाच्छुक्रं पुरुषस्य प्रवर्तते ।।

– बस्तिद्वारस्य अध:प्रदेशे अंगुलद्वयं दक्षिणपार्श्वे प्रदेशे मूत्रस्त्रोतरुपेण मार्गेण शुक्रं प्रवर्तते ।

– स्त्रीषु स्थूलशुक्रस्य अभावात् तथा तस्य कार्याभावात् स्त्रीणां शुक्रवहानां स्त्रोतसां वर्णनं न कृतम्

– एतन्मतं गंगाधरस्य अनुमतं अपि च उक्तम् पुरुषस्य शुक्रप्राधान्यम् पुरुषाणाम् अभिप्रायेण शुकवहस्य वर्णनं कृतमस्ति ।

विमर्श: – १) ज्योतिषचन्द्रसरस्वति: वदति यत् शुक्रं सूक्ष्मं तथा सर्वशरीरचरं भवति ।

२) शुक्रवहस्य सर्वशरीरे गतिमत: नैकानि स्त्रोतांसि सन्ति ।

''सुसूक्ष्माणां सर्वशरीरचराणां शुक्राणां सर्वशरीरगतानि यानि स्त्रोतांसि --- ।।''

अस्मिन् सर्वेषां पदानां बहुवचनम् अस्ति ।

३) सार्वदेहिकस्य स्थानिकस्य च शुक्रयो: वर्णनम् ।

४) स्त्रीषु शुक्रवहं स्त्रोत: भवति । परं स्थूलशुक्रस्य अस्तित्वं कार्यं च न दृष्येते । अत: केवलं पुरुषाणाम् अभिप्रायेण शुक्रवहस्य वर्णनं कृतम् अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## सप्तधातूनां स्त्रोतसां प्रकोपलक्षणानि

प्रदुष्टानां तु खल्वेषां ------- ।

- ग्रंथकारैः स्थायिपदार्थस्वरुपाणां धातूनां स्त्रोतसां प्रकोपलक्षणानि न वर्णितानि । अतीतावेक्षणं अतिदेशं च एतयोः तन्त्रयुक्त्याधारेण विवेचनं कृतम् । योगेन्द्रनाथसेनेन अपि अतिदेशस्य उल्लेखः कृतः । सूत्रस्थाने विविधाशितपीतिये नामके २८ अध्याये धातुप्रदोषजानि लक्षणानि वर्णितानि । तानि लक्षणानि अतिदेशेन तत्तत् धातूनां स्त्रोतसां प्रकोपः दुष्टिलक्षणानि सन्ति इति उल्लेखः अस्ति

उदा - रसप्रदोषजे लक्षणे ''अश्रद्धा ------ । '' इत्यादीनि एव रसवहस्य स्त्रोतसः दुष्टिलक्षणानि सन्ति । तथैव अन्येषां स्त्रोतोविषये ज्ञातव्यम् ।

- चक्रपाणिना अत्र एकः घटकः विशेषेण ऊहितः अस्ति । -

अत्र एवम् उक्तम् यत् धातुप्रदोषजानि लक्षणानि एव धातोः स्त्रोतसां दुष्टिलक्षणानि । परं अग्रिमे नवमे सूत्रे 'तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्च शरीरधातवः प्रकोपमापद्यन्ते ।' इति सूत्रम् अस्ति । तदनुसारं स्त्रोतसां दुष्ट्या तत्तः वाह्यमानानां धातूनां दुष्टिः भवति ।

- तर्हि किम् एते सूत्रे न परस्परविरोधिनी? धातुदुष्टेः स्त्रोतोदुष्टिः भवति वा स्त्रोतोदुष्टेः धातुदुष्टिः भवति ? इति प्रश्नः उपस्थापितः अस्ति ।

अस्मिन् उत्तरम् अधोल्लिखितम् ।

१) धातुस्त्रोतसोः दुष्टिः दोषैः भवति ।

२) धातोः प्रदोषजलक्षणैः तस्य तस्य धातोः स्त्रोतसि दुष्टिः भूता इति अनुमन्तव्यम् ।

३) धातवः स्वस्त्रोतः वा अन्यस्त्रोतः न दूष्यन्ति ।

४) परं च एकः धातुः अपरं धातुं निश्चयेन दूष्यन्ति ।

५) स्त्रोतसां दुष्टिः दोषैः भवति । परिणामतः तस्मात् वाह्यमानस्य धातोः दुष्टिः भवति । एकं स्त्रोतः स्वधातोः प्रकोपं करोति न तद् अपरं धातुं दूषयितुं शक्नोति ।

६) स्त्रोतसां दुष्टेः अनुमानं तस्मात् वाह्यमानात् धातोः प्रदोषलक्षणैः ज्ञातव्यम् । इत्यर्थः कोऽपि धातुः तथा तस्य स्त्रोतांसि स्त्रोतसां प्रकोपलक्षणानि समानानि भवन्ति ।

७) अतिप्रवृत्ति सङ्गो.......। एतस्मात् अपि सूत्रात् इत्येव अर्थः ध्वनितः ।

## मूत्रवहं स्त्रोत:

– अस्मिन् सूत्रे मूत्रवहस्य स्त्रोतस: मूलस्थानम् तथा प्रकोपलक्षणानि वर्णितानि ।

– प्रकोपलक्षणानां सूत्रे पाठभेदा: सन्ति ।

चक्रपाणि: – तद्यथा अतिसृष्टं अतिबद्धं प्रकुपितं....... ।।

गंगाधर: – तद्यथा अतिसृष्टं प्रतिबद्धं वा कुपितं..........।।

योगीन्द्रनाथसेन: – तद्यथा अतिसृष्टं प्रतिबद्धं वा प्रकुपितं........।।

– योगीन्द्रनाथसेनेन गंगाधरचक्रपाण्यो: पाठौ एकीकृतौ ।

– मूलत: पदानि समानानि सन्ति परं उपसर्गभेदात् अर्थेषु किंचित् भेद: दृश्यते ।

अतिबद्धम् / प्रतिबद्धम् –

– अतिप्रमाणे बद्धा मूत्रप्रवृत्ति: प्रत्युत संपूर्णतया बद्धा मूत्रप्रवृत्ति: एवं बद्धाया: मूत्रप्रवृत्ते: भिन्ना अर्थांशा: दृश्यन्ते ।

कुपितम् / प्रकुपितम् –

– दोषयुक्ता मूत्रप्रवृत्ति: प्रकर्षेण दुष्टा मूत्रप्रवृत्ति: च । दोषयुक्ता नाम शरीरस्य विविधा: धातुघटका: मूत्रात् बहिर्विसृजन्ति तेन मूत्रवर्ण: धातुघटकस्य वर्णं स्वीकरोति । एषा एव दुष्टा मूत्रप्रवृत्ति: ।

अत: पाठभेद: सन् अपि अर्थे विशेष: भेद: न अनुभूयते ।

– अस्मिन् सूत्रे चक्रपाणिना टीका न कृता । अन्यत: योगेन्द्रनाथसेनेन गंगाधरेण च केवलं सूत्रान्वय: वर्णित: । प्रकोपलक्षणविषये एवम् उक्तम् यत् अतिसृष्टादिनि लक्षणानि मूत्रणक्रियासंदर्भेण गृहीतव्यानि । एतै: लक्षणै: मूत्रवहं स्त्रोत: विकृतं भवति इति ज्ञेयम् ।

– ज्योतिषचन्द्रसरस्वति स्थूलं सूक्ष्मं च एतयो: मूत्रवहयो: वर्णनं द्विधा करोति । तत्पूर्व अस्य सूत्रस्य अधिकरणं वर्णयन् स वदति यत् आहार्यधातूनां तथा स्थायिधातूनां स्त्रोतसां वर्णनानंतरं बहिर्मुखिनां मलधातूनां स्त्रोतसां वर्णनं कुर्म: ।

सूक्ष्मं मूत्रवहं स्त्रोत: – परिपक्वात् आहारात् उत्पन्नकिट्टगतानां सूक्ष्माणां मूत्रपरमाणूनां सिराभि: बस्तिशिरोगतं सूक्ष्मं स्त्रोत: भवति । अत: सूक्ष्मस्य मूत्रवहस्य स्त्रोतस: मूलस्थानं बस्ति: अस्ति । अत्र: 'बस्ति' पदेन अन्तर्बस्तिशीर्षात् मूत्राधारपर्यंतं यद् स्थानं तद् मूत्राशयम् अस्ति । तद् एव

ग्रहणीयम् । अस्मिन् विषये अधिकं विवरणं न कृत्वा तत्र भवती स्वरचित: 'शारीरविनिश्चय:' इति ग्रंथ: द्रष्टव्य: इति सूचितम् ।

स्थूलं मूत्रवहं स्त्रोत: – स्थूले द्वे मूत्रवहे स्त्रोतसी (नाम शवविच्छेदने दृश्यगम्यौ मूत्रवहनस्य द्वौ मार्गौ द्वे अयने) एते उभये पार्श्वे वंक्षणगते स्त: । अत: वंक्षणं स्थूलमूत्रवहस्य मूलस्थानम् ।

– प्रकोपलक्षणेषु ज्योतिषचन्द्रसरस्वतिना केवलं पदद्वयस्य अर्थ: वर्णित: ।

अतिसृष्टम् – प्राकृतमानापेक्षया अतिरिक्तं मूत्रनिर्गमनम् ।

बहलम् – सान्द्रम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## पुरीषवहाणि स्त्रोतांसि

– अस्मिन् सूत्रे चक्रपाणिना किमपि भाष्यं न कृतम् । किन्तु इतरै: यथायोग्यं विवेचनं कृतमस्ति ।

– पक्वाशय – पक्वाशयो नाभेरध: । गङ्गाधर:

पक्वाशयो नाभेरधस्तात् उपरिष्टाच्च बस्ते: । ज्योतिषचन्द्रसरस्वति: ।

– आन्त्रस्य नाभे: अधोप्रदेशे बस्त्या: उपरिप्रदेशस्थं भागं पक्वाशय: इति आख्या ।

– स्थूलगुदम् – त्रिवलीरुपम् । गङ्गाधर:

– मूलस्थानस्य सूत्रे टीकाकारै: द्वौ भिन्नौ पाठभेदौ स्वीकृतौ ।

१) चक्रपाणिगङ्गाधरयो: सम्मत: पाठ: ।

पुरीषवहाणां स्त्रोतसां पक्वाशयो मूलं स्थूलगुदं च ।

२) योगीन्द्रनाथसेनज्योतिषचन्द्रसरस्वतिसम्मत: पाठ: ।

पुरीषवहाणां स्त्रोतसां पक्वाशयो मूलं स्थूलान्त्रं स्थूलगुदं च ।

– स्थूलगुदस्य व्याख्या गङ्गाधरेण एवं कृता यत् स्थूलगुदं त्रिवलीयुक्तं भवति । प्रत्युत ज्योतिषचन्द्रसरस्वतिना स्थूलान्त्रगुदयो: विवेचनं विस्तारेण कृतम् । ज्योतिषचन्द्रसरस्वतिना तस्य वर्णनपद्धत्या पुरीषवहानां अपि स्थूलं सूक्ष्मं च इति पद्धत्या वर्णनं कृतम् ।

– सूक्ष्माणि पुरीषवहाणि स्त्रोतांसि – परिपक्वात् आहारात् उत्पन्नकिट्टगतानि सुसूक्ष्मस्य पुरीषस्य स्त्रोतांसि पक्वाशयगतानि सन्ति । अत: सूक्ष्मपुरीषवहानां मूलं पक्वाशयम् अस्ति ।

– स्थूलानि पुरीषवहानि स्रोतांसि – आहारपचनोत्तरं संघातरुपिण: सूक्ष्मपुरीषस्य सञ्चयस्थानं दृश्यगम्यस्थानं च स्थूलान्त्रगुदौ एवं गुदमार्गेण एवं स्थूलपुरीषम् उत्सर्जति ।

अत: स्थूलान्त्रं गुदं च मूलस्थानम् इति मतमस्ति ।

प्रकोपविज्ञानम् – सशब्दशूलादीनि यानि लक्षणानि उद्धृतानि सन्ति तानि उपवेशक्रियायै नाम पुरीषोत्सर्जनक्रियायै सम्बन्धितानि ।

– कृच्छ्रेण कष्टेन । योगीन्द्रनाथसेन:

– कष्टपूर्वकं मलप्रवृत्ति: । सशब्दशूलं सशब्दं सशूलं च । योगीन्द्रनाथसेन:

– इति एतद् सामासिकं पदम् । शब्देन सह शूलेन सह च मलप्रवृत्ति: भवनम् ।

अतिग्रथितम् – अतिग्रन्थिलम् । योगीन्द्रनाथसेन:

अतिकठिनम् । ज्योतिषचन्द्रसरस्वति:

– अतीव कठिना ग्रन्थियुक्ता कठोरा च मलप्रवृत्ति: भवनम् ।

## स्वेदवहानि स्रोतांसि

– अस्य सूत्रस्य टीकायां गङ्गाधरेण योगीन्द्रनाथसेनेन च केवलं सूत्रस्य अन्वय: वर्णित: । चक्रपाणिना मूलस्थानविषये व्याख्याम् अकृत्वा केवलं 'अस्वेदनम्' इति लक्षणे विवेचनं कृतम् । परं ज्योतिषचन्द्रसरस्वतिना विस्तरेण सर्वस्मिन् सूत्रे भाष्यं कृतम् । तत्रभवता स्वेदस्य उत्पत्ति: वर्णिता: ।

१) अन्नकिट्टात् उत्पन्न: स्वेद: ।

२) मेदस्य मलरुप: स्वेद: ।

– एतौ द्वौ घटकौ मिलित्वा स्वेद: इति संज्ञां वहत: । अन्नपचनोत्तरं सारकिट्टविभजनोत्तरं शोषितं किट्टसारं धातुपोषणाय साहाय्यं करोति । किट्टस्य द्वौ भागौ द्रवं स्थूलं च । द्रवकिट्टमपि पक्वाशयात् परिशुष्य अनन्तरं सर्वस्मिन् शरीरे भ्रमति । तद् स्वेदवहे स्रोतसि यदा गतं तस्य स्वेदे रुपान्तरं भवति । तथा यदा मूत्रवहे गतं तदा मूत्रे रुपान्तरं भवति ।

– तथैव धातुपरिणमने मेदोवहे स्रोतसि मेदाग्ने: प्रक्रियायां मलस्वरुपिण: स्वेदस्य निर्मिति: भवति ।

– एवं द्वाभ्याम् अपि किंट्टांशाभ्यां निर्मित: स्वेद: मेदात् पृथक् भूत्वा तस्य समीपस्थ सूक्ष्मस्वेदोवहस्रोतोऽन्तरं गच्छति । अनन्तरं तिर्यग्धमन्यन्तरं वाहयित्वा नीयते । तत: धमनीत: स्रावित: रोमकूपान् युते स्रोतसि प्रविशति । अनन्तरं रोमकूपस्य मुखात् निर्गच्छति । एवं मेदं रोमकूपं च मूलस्थानं स्त: । अत्र सूक्ष्मस्वेदोवहस्रोतस: मूलस्थानं मेद: अस्ति अपि तु स्थूलस्वेदोवहस्रोतस: मूलस्थानं रोमकूपम् अस्ति ।

– अन्नकिट्टात् उत्पन्नस्य स्वेदस्य यद् स्रोत: अस्ति तस्य प्रभवस्थानं यद्यपि पक्वाशयम् अस्ति तथापि सूक्ष्मस्वेदवहस्रोत: पक्वाशयम् आवश्यकं वपावहनं भिनत्ति । वपावहनं मेदोवहस्य मूलस्थानम् अत: मेद: एव सूक्ष्मस्वेदवहस्य स्रोतस: मूलस्थानम् अस्ति ।




– अतीव महत्त्वपूर्णा एषा स्वेदनिर्मिते: प्रक्रिया ज्योतिषचन्द्रसरस्वतिना वर्णिता ।

– चक्रपाणिना अस्वेदनादि सर्वप्रकोपलक्षणविषये अधोलिखितवत् विवेचनं कृतम् ।

– अस्वेदनातिस्वेदने लक्षणे कुष्ठस्य पूर्वावस्थायाम् अपि दृश्येते । स्वेदवहस्य स्रोतस: सर्वाणि दुष्टिलक्षणानि कुष्ठस्य अपि पूर्वरुपाणि सन्ति ।

– तेषामिमानि पूर्वरुपाणि भवन्ति तद्यथा अस्वेदनमतिस्वेदनं पारुष्यमतिश्लक्ष्णता वैवर्ण्यं कण्डूर्निस्तोद: सुप्तता परिदाह: परिहर्षो लोमहर्ष:.........।। (च.नि. ५.७)

– तर्हि अनयो: द्वयो: निदानदृष्ट्या विभेदं कथं करणीय:? स एवं यदा सुप्तता कण्डु आदीनि कुष्ठादीनि अन्यानि पूर्वरुपाणि उत्पन्नानि स्यु: तदा अस्वेदनातिस्वेदने इति कुष्ठस्य पूर्वरुपे ज्ञातव्ये अन्यथा ते स्वेदवहस्रोतसदुष्टिलक्षणे स्त: इति ज्ञातव्यम् ।

– परिहर्ष: परिहर्ष: झिनझिनिका । चक्रपाणि च. नि.५.७

– झिणझिण्या नाम परिहर्ष: ।

– अङ्गस्य परिदाह: अत्र 'अङ्ग' इति पदेन तस्मिन् अवयवे स्थिता त्वक् इति ग्रहीतव्य: तथा त्वचिदाह: इति लक्षणं ज्ञातव्यम् ।

– अस्मिन् अधिकरणे त्रयोदशस्रोतसां मूलत: तथा प्रकोपविज्ञानत: वर्णनानन्तरं चक्रपाणि: गङ्गाधर: ज्योतिषचन्द्रसरस्वति: एतै: केषुचित् विचारेषु विशेषं विवेचनं कृतम् ।

चक्रपाणे: मूलस्थानविषयकं विवेचनम् –

– अस्मिन् अधिकरणे मूलस्थानानां वर्णनमस्ति । परं ज्ञानस्य अस्य यद्यपि साक्षात् प्रयोजनं न कथितं तथापि तेषां उपघातेन शरीरे महत्य: विकृत्य: उत्पत्तुं शक्यम् ।

– तदर्थं चक्रपाणिना वर्णिता उपमा अस्ति यत् यदा वृक्षस्य मूले नष्टे तदा सम्पूर्ण: वृक्ष: नश्यति । तथा स्रोतस: मूले नष्टे तदा महान् उपघात: भवति ।

– अत: एवं सुश्रुताचार्येण स्रोतोमूलानां विद्धानि लक्षणानि कथितानि । अत्र महान् उपघात: इत्यस्य अर्थ: तद् स्रोत: सम्पूर्णत: नश्यति । क्रियादृष्ट्या शरीरं विकलाङ्गं भवति अथवा मरणमपि संभवति ।

ज्योतिषचन्द्रसरस्वते: विशेषा टीका –

– अस्य अधिकरणस्य अन्ते ज्योतिषचन्द्रसरस्वतिन सिरा धमनी स्रोत: च एतेषां पदानां विषये विशेषं विवेचनं कृतम् ।

– सुश्रुताचार्येण सिरा धमनी स्रोत: च एते त्रय: घटका: परस्परविभिन्ना: कथिता: सन्ति ।

– अस्य सन्दर्भश्लोक: ज्योतिषचन्द्रसरस्वतिना उद्धृत:

मूलात् खादन्तरं देहे प्रसृतं त्वाभिवाहि यत् ।
स्रोतस: तद् इति विज्ञेयं सिराधमनीवर्जितम् ।। (सु.शा.)

– सुश्रुतेन एते त्रय: भावविशेषा: भिन्ना: मानिता: प्रत्युत चरकेण एकस्य एवं घटकस्य पर्यायि पदानि मानितानि । तर्हि एष: परस्परविरोध: नास्ति किम् ? एवं पूर्वपक्षं स्थापयित्वा तस्य विवेचनमपि अग्रे कृतम् ।

– शल्यतन्त्रे सर्वेषां भावपदार्थानां वर्णनं शल्यतन्त्रदृष्ट्या तथा शारीररचनात्मक छेदनभेदनादि अष्टविधशस्त्रकर्मदृष्ट्या कृतम् । तथैव स्त्रोतसां मूलस्थानानां विद्धलक्षणानाम् अनुषंगेण सुश्रुतेन स्त्रोतसां वर्णनं कृतम् । इत्यर्थ: सुश्रुतसंहितायां स्त्रोतोवर्णनस्य अधिकारा: ''मूलविद्धलक्षणानि तथा तेषां शल्यशास्त्रे महत्त्वं चिकित्सा च'' इति अस्ति । अत: सुश्रुतेन अपि अत्र वर्णनं कुर्वता 'येष्वाधिकारा:' नाम येषां अत्र अधिकारा: तेषां एवं वर्णनं कृतम् । यानि स्त्रोतांसि शल्यतन्त्र तथा शल्यकर्मदृष्ट्या महत्त्वपूर्णानि तेषां एवं मूलस्थानै: सह वर्णनं कृतम् ।

– अधुना चरकसंहितायां कायचिकित्सादृष्ट्या स्त्रोतसां वर्णनमस्ति । दोषा: सर्वान् एवं अवकाशान् दूषयित्वा विकारान् उत्पादयन्ति । अत: अनेन अधिकारानुसारं केषांचित् स्त्रोतसां उपलक्षणमिति भावेन वर्णनं कृतम् ।

– अत: सुश्रुतचरकयो: स्त्रोतो: वर्णने कुत्रापि मतभेदा: न सन्ति । अधिकरणस्य भिन्नत्वात् मूलस्थानं तथा विद्धप्रकोपलक्षणानि एतेषु वैभिन्नं दृश्यते ।

<u>गङ्गाधरस्य दोषवहस्त्रोतो विषये विवेचनम्</u>

१) वातादय: त्रिदोषा: सर्वशरीरचरा: सन्ति । अत: तेषां स्त्रोतसां वर्णनं न कृतम् । यत: अस्य अध्यायस्य अधिकरणं 'शारीरभावानां ज्ञानप्राप्तये मूर्तिमतां भावविशेषाणां स्त्रोतसां वर्णनम्' इति अस्ति

२) अध्यायस्य द्वितीये प्रकरणे यत्र उपलक्षणस्वरुपिणां त्रयोदशस्त्रोतसां मूलत: तथा प्रकोपत: वर्णनं कृतम् । तेषु दोषवहस्त्रोतसां ईदृशं वर्णनं न कृतम् । गङ्गाधरेण अस्य कारणं कथितं यत् दोषादय: सर्वशरीरचरा: सन्ति ।

३) गङ्गाधरेण वातवहस्त्रोत: – पक्वाशय:

पित्तवहस्त्रोत: – आमाशय:

कफवहस्त्रोत: – हृदयम् एतानि मूलस्थानानि सन्ति इति कथितम् ।

४) तथैव पक्वाशयः आमाशयः हृदयं च एतेषां प्रदोषलक्षणानि विकृतलक्षणानि एवं अनुक्रमेण वातपित्तकफवहानां स्त्रोतसां प्रकोपलक्षणानि सन्ति ।

गङ्गाधरेण अत्र अतीव महत्त्वपूर्णं तथा भिन्नं विवेचनं कृतम् ।

## अधिकरणम् तृतीयम्

## स्त्रोतसां पर्यायाः दुष्टयः च ।

सूत्रम् – ९– अस्मिन् अधिकरणे त्रयाणां (३) उपअधिकरणानां वर्णनमस्ति ।

१) स्त्रोतसां नामपर्यायाणि

२) स्त्रोतसः धातोः च दुष्टिविवेचनम् ।

३) दोषाणां दुष्टिकर्तृत्वम् ।

१) स्त्रोतसां पर्यायाः

चरकः – दृश्याणाम् अदृश्याणां च शरीरधात्वाकाशानां नामानि अधोलिखितानि ।

| | | | | | |
|---|---|---|---|---|---|
| स्त्रोतः | रसवाहिनी | शरीरच्छिद्रम् | शिरा | नाडी | संवृतासंवृतम् |
| धमनी | पन्थाः | स्थानम् | रसायनी | मार्गः | आशयः |
| निकेतम् | | | | | |

चक्रपाणिः – स्त्रोतसां व्यवहाराय पर्यायाः वर्णिताः सन्ति । एतैः पर्यायैः व्यवहारेषु स्त्रोतांसि बोधितानि भवन्ति ।

– ' संवृतासंवृतम् ' एका संज्ञा अस्ति । स्त्रोतः अग्रभागे संवृतं मूलभागे असंवृतं च भवति ।

– स्थानादिपर्यायेषु केचिद् पर्यायाः धमनीमूलस्य सन्ति । अन्ये पर्यायाः धमन्यः सन्ति । धमन्याम् अपि रसादीनां स्थानानि भवन्ति ।

गङ्गाधरः – अस्य सूत्रस्य पाठे गङ्गाधरेण 'क्षयः' इति अधिकः पर्यायः उक्तः । एषः पाठभेदः अस्ति ।

– ' शरीरधात्वाकाशः ' नाम प्राणादीनां शरीरधातूनां चलनार्थं सन् अवकाशः आकाशच्छिद्रः वा ।

– ' लक्ष्यालक्ष्याणां ' नाम केचिद् धात्वाकाशाः दृश्याः भवन्ति केचिच्च अदृश्याः भवन्ति ।

योगीन्द्रनाथसेनः – शरीरधात्वाकाशाः – शरीरधातूनाम् अवकाशाः अयनार्थं छिद्राणि ।

– केषांचित् लक्ष्याणाम् इन्द्रियगोचराणां केषांचित् अलक्ष्याणाम् अनुमानगम्यानाम् इति लक्ष्यालक्ष्याणाम् । इति वाक्यशेषा तन्त्रयुक्ति: ।

ज्योतिषचन्द्रसरस्वति:

– शरीरस्थानां सर्वअवकाशानां परिग्रहार्थं स्त्रोतसां पर्यायशब्दा: वर्णिता: सन्ति ।

– शिरा धमनी स्त्रोत: च एतेषु क्रियापार्थक्यं सदपि एतेभ्य: सर्वेभ्य: यस्य कस्यापि शरीरधातो: अभिवहनं प्रवर्तते । अत: तान् 'स्त्रोत:' इति संज्ञादानम् अविरुद्धमस्ति ।

– अत्र ' शिरा ' पदेन चतुर्धा रक्तवहप्रणाल्य: अभिप्रेता: सन्ति ।

– धमनी रसायनी इति पृथक् उल्लेख: अस्ति । तस्मात् धमनी पदेन असुषिरा: सम्पूर्णवातवाहिन्य: गृहीतव्या: । तथा रसायनी पदेन स्थायिरसस्य अयनभूता: मार्गा: गृहीतव्या: ।

– रसवाहिनी इति पदेन शरीरपोषणार्थं अन्नरसानां वहनं कुर्वाणा: सुषिरधमन्य: अभिप्रेता: सन्ति ।

– संवृतासंवृतानि इति पदेन अग्रे संवृतानि कानिचन शरीरच्छिद्राणि अपि च कानिचन असंवृतानि शरीरच्छिद्राणि एवम् उभयत: मुखयुक्तानि शरीरच्छिद्राणि अपेक्षितानि ।

– 'क्षयम्' इति पदं निलयपर्यायपदमस्ति ।

– 'लक्ष्यालक्ष्याणाम्' इति केचित् अतीन्द्रिया अवकाशा: केचित् वा इन्द्रियग्राह्या इति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) स्त्रोतस: धातो: च दुष्टिविवेचनम् / स्त्रोतस: प्रकोपफलम् ।

चरक: – एषां स्त्रोतसां प्रकोपेण स्थानस्था: मार्गगा: च शरीरधातव: प्रकुप्यन्ति ।

– एकेन स्त्रोतस: तथा धातो: दुष्ट्या अन्यत् स्त्रोत: धातु: च दुष्टौ भवत: ।

– प्रदुष्टा: स्त्रोतस: स्त्रोतांसि एव प्रदूषयन्ति ।

– प्रदुष्टा: धातव: धातुनेव प्रदूषयन्ति ।

चक्रपाणि: – स्थानस्था: इति आशयस्था: । मार्गगा: इति धमनिभि: गतिमन्त: ।

– स्त्रोतांसि धातव: च दुष्टा: भवन्ति इत्यस्य अर्थ: विकृतानि / दुष्टानि स्त्रोतांसि, धातव: वा अन्येषु स्त्रोतस्सु धातुषु वा सदोषान् सङ्क्राम्यन्ति ।

– इत्यर्थः स्त्रोतांसि धातवः वा दोषैः एव दुष्टाः भवन्ति । तेषां दुष्टिकर्तृत्वं दोषेभ्यः एव भवति । अतः एकेन दुष्टस्त्रोतसा यदा अन्यस्त्रोतः दुष्टं भवति तदा दूषितस्त्रोतसः विकृतदोषाणां सङ्क्रमणं प्राकृतस्त्रोतसि भूत्वा तत् दुष्टं भवति ।

गङ्गाधरः – स्थानस्थाः स्वमानस्थाः । मार्गगाः स्वस्त्रोतोगाः ।

– एकस्य स्त्रोतसः विकृत्या अन्यानि स्त्रोतांसि विकृतानि भवन्ति ।

– एकं प्रकुपितं स्त्रोतः द्वितीयं घटकं वहत् अन्यं स्त्रोतः दुष्यति । न तु तस्मात् वहत् धातुघटकम्

– एकः विकृतः धातुः अन्यान् धातून् विकृतयति । न तु तं धातुं वहत् स्त्रोतः विकृतं करोति ।

योगीन्द्रनाथसेनः – स्थानस्थाः आशयस्थाः । मार्गगाः नाम स्त्रोतसां मार्गतः गच्छन्तः ।

– स्त्रोतः धातुः च परस्परप्रकोपकौ भवतः । शेषं शब्दार्थशः विवेचनम् ।

ज्योतिषचन्द्रसरस्वतिः – स्त्रोतसां प्रकोपफलम् ।

– स्थानस्थाः क्षयं वृद्धिं वा नाप्नुव नाम स्वमानस्थाः ।

– मार्गगाः स्वस्वमार्गचारिणः न तु उन्मार्गगामिनः ।

– शरीरधातुः इति पदेन अत्र धातुः मलं च ग्रहीतव्ये । शेषाः शब्दार्थाः ।

निष्कर्षः – ‘ स्थानस्थाः ’ पदस्य टीकायां वैधर्म्यं अस्ति ।

३) दोषाणां दुष्टिकर्तृत्वम् –

चरकः –

सर्वेषु स्त्रोतस्सु धातुषु च तान् दुष्यन्तः त्रिदोषाः एव भवति । यत् दूषितकरणं इत्येव तेषां प्रकृतिः ।

चक्रपाणिः

– ’दोषस्वभावात्‘ इत्यर्थः अन्यान् दूषितकरणम् । एषः दूषकत्वस्वभावः केवलं दोषाणाम् एव अस्ति । धातवः अपरे घटकाः वा अन्यान् न दूषयन्ति । परन्तु ते दोषैः दुष्टाः भवन्ति ।

– दोषैः भवन्ती धातूनां दुष्टिः ‘ धातुदुष्टिः ’ पदेन अपेक्षिता ।

– धातुगतैः दोषैः एव ते अथवा अन्ये धातवः दुष्यन्ति ।

गङ्गाधरः –

– प्रदुष्टाः त्रिदोषाः एव स्त्रोतांसि धातून् च दूषयन्ति ।

– स्रोतांसि धातून् धातव: वा स्रोतांसि नैव दूषयन्ति ।

योगीन्द्रनाथसेन: – अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: –

– वातादय: दूषणानाम् उपादानकारणं सन्ति । यथा गृहोपादाने दुष्टे जाते गृहम् अपि दुष्टं भवति । तथैव वातादिभि: स्रोतांसि धातव: च दुष्टा: भवन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् चतुर्थम्

## त्रयोदश स्रोतसां दुष्टिहेतव:

सूत्राणि १० त: २२

स्रोत: संकल्पना तत्रस्थानां उपलक्षणस्वरुपाणां मूलप्रकोपविज्ञानत: वर्णनानन्तरं यानि त्रयोदश स्रोतांसि उपलक्षणस्वरुपेण वर्णितानि तेषां पृथक् पृथक् दुष्टिहेतव: अस्मिन् अधिकरणे वर्णितानि सन्ति । षष्ठे सूत्रे उद्देशतंत्रयुक्त्यनुसारं येन क्रमेण स्रोतांसि उल्लिखितानि तेनैव क्रमेण अत्र तेषां निर्देश: कृत: ।

### १) प्राणवहं स्रोत: – सूत्रम् १०

अ) क्षयात् – धातुक्षयात् । योगीन्द्रनाथसेन:

– अनुलोमविलोमक्षयात् । ज्योतिषचन्द्रसरस्वति:

अर्थ: – अनुलोमगत्या अथवा प्रतिलोमगत्या भवन् धातुक्षय: ।

ब) सन्धारणात् – वेगानां धारणात् । योगीन्द्रनाथसेन:

– मलमूत्रादि वेगधारणात् । ज्योतिषचन्द्रसरस्वति:

प्रवर्तमानानां मलमूत्रादिवेगानां धारणम् ।

क) क्षुधितस्य व्यायामात् – क्षुधा शरीरक्षयं सूचयति । अत: ईदृश्याम् अवस्थायां क्षयकारके: व्यायामे: कृते अधिकं क्षयं भवति । स स्रोतो दुष्टे: हेतु: भवति । (ज्योतिषचन्द्रसरस्वति:)

ड) अन्यैः दारुणैः च – अत्र सर्वैः टीकाकारैः कर्म इति पदस्य अनुवृत्तिं कृत्वा 'अन्यानि दारुणानि कर्माणि' इति हेतुः कथितः ।

चक्रपाणिना 'दारुणम् ' इत्यस्य अर्थः कठिनानि कर्माणि गंगाधरेण वातवर्द्धकाणि कर्माणि प्रत्युत ज्योतिषचन्द्रसरस्वतिना उरःक्षतनिदानोक्तानि महानदीतरणादिस्वरुपाणि अधिकं श्रमं उत्पद्यमानानि कर्माणि इति अर्थः गृहीतः ।

सारांशः – १) अनुलोमप्रतिलोमाभ्यां मार्गाभ्यां भवन् धातुक्षयः ।

२) प्रवर्तमानानां मलमूत्रादिवेगानां धारणम् ।

३) रुक्षौ आहारविहारौ ।

४) शरीरक्षयकारिण्यां क्षुधायां सत्यां क्षयकारकं व्यायामकरणम् ।

५) वातवर्द्धकम् उरःक्षतनिदानोक्तं अधिकश्रमदायकं कठिणं दारुणं कर्म ।

एतानि प्राणवहानां स्त्रोतसां दुष्टिहेतवः सन्ति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

२) **उदकवहं स्त्रोतः** – सूत्रम् ११

– अस्मिन् सूत्रे चक्रपाणिः टीकां न करोति । योगीन्द्रनाथसेनेन गंगाधरेण च केवलम् अन्वयः वर्णितः । उत ज्योतिषचन्द्रसरस्वतिना पदानां अर्थाः दत्ताः ।

– औष्ण्यात् – अग्न्यातपादिना । ज्योतिषचन्द्रसरस्वतिः

अग्निः आतपम् इत्यादि उष्णकारकं विहारसेवनम् ।

– आमात् – अपक्वं भुक्तम् । गंगाधरः

– आमाजीर्णात् । ज्योतिषचन्द्रसरस्वतिः

न पक्वा अन्नभक्षणम् , अपक्वावस्थायां भक्षणम् अथवा आमाजीर्णम् भवनम् ।

– पानात् – अतिमद्यपानात् । पानम् इत्यस्य पदस्य विशेषः अर्थः अतिमद्यपानम् इति गृहीतः ।

– तृष्णातिपीडनम् – तृष्णावेगनिग्रहः । विशेषतः तृष्णावेगस्य अवरोधकरणम् ।

– सारांशः – १) अग्निसेवनम् , आतपसेवनं इत्यादि उष्णकारकः विहारः ।

२) आमाजीर्णम् ।

३) अपक्वम् अन्नसेवनम् ।

४) भयम्

५) अतिमद्यपानम्

६) अतिशुष्कान्नसेवनम् ।

७) तृष्णाया: वेगस्य अवरोध: ।

एते उपलक्षणस्वरुपाणां उदकवहानां स्त्रोतसां दुष्टिहेतव: सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### ३) अन्नवहं स्त्रोत:

अतिमात्रस्य चाकाले ------- ।। सूत्रम् १२

– अस्मिन् सूत्रे चक्रपाणिना टीका न कृता ।

– अतिमात्रस्य भोजनात् मात्रामतिक्रान्तभोजनात् । योगीन्द्रनाथसेन:

मात्राधिकस्य न्यूनमात्रस्य च भोजनात् । ज्योतिषचन्द्रसरस्वति:

– मात्राम्अतिक्रम्य भोजनं अत्र मात्राया: अतिक्रमणं नाम योग्याया: मात्रापेक्षया अधिकम् अथवा हीनमात्रायां भोजनम् इति अर्थ: अभिप्रेत: अस्ति ।

– अत्र मात्रा द्रव्यापेक्षया त्रिभागसौहित्यादे: न्यूनाधिकां गृह्णीयात् ।

– अकाले भोजनात् – अकाले मात्रावदपि भोजनात् । गंगाधर:

– अप्राप्ते अतीते वा काले भोजनात् । योगीन्द्रनाथसेन:

– अकाले कालातीते पूर्वकाले वा । ज्योतिषचन्द्रसरस्वति:

– भोजनस्य योग्यात् कालात् पूर्वं वा उत्तरं भोजनम् ।

प्रसृष्टे विण्मूत्रे..........।। अ. हृ. सू. ८

– एतानि लक्षणानि यदा उत्पद्यन्ते स: एव भोजनाय योग्य: काल: अस्ति । एवं भोजनवेलाया: आगमनात् पूर्वं अथवा भोजनवेलाम् अतीते भोजनम् ।

– अहितस्य भोजनात् – यज्ञ: पुरुषोक्तं भोजनम् । गंगाधर:

– अन्ये आहारविधिविशेषायतने अपथ्य: । योगीन्द्रनाथसेन:

– गंगाधरेण अहितभोजनस्य व्याख्यायां अतीतावेक्षणतन्त्रयुक्तेः उपयोगेन सूत्रस्थानगते यज्ञःपुरुषीये पञ्चविंशतितमे अध्याये वर्णितस्य अहिताहारस्य सेवनम् इति कथितम् ।

– यज्ञःपुरुषीये अध्याये हिताहिताहारस्य विवेचनं कुर्वन् चरकः विपर्ययतन्त्रयुक्तिं प्रयुनक्ति । उत तस्मिन् गंगाधरः विवेचनं करोति ।

''तमुवाच भगवानात्रेयः – यदाहारजातमग्निवेश समाश्चैव शरीरधातून् प्रकृतौ स्थापयति विषमांश्च समीकरोत्येतद्धितं विद्धि । विपरीतमहितमेतत् हिताहितलक्षणमनपवादं भवति । (च.सू.२५/१६)

– यद् आहारजातं सम्यगसम्यग् च युक्तमपि समान् शरीरधातून् विषमीकरोति विषमांश्च शरीरधातून् न समीकरोति तदहितं विद्धि । (गंगाधर टीका)

तथैव

एक एवाहिताहारोपयोगः पुनर्व्याधीनामुत्पत्यभिवृद्धिनिमित्तं भवति । (च.सू.२५/१४ गंगाधर)

– एते द्वे व्याख्ये गंगाधर टीकायां 'अहिताहारः' इति पदस्य स्तः ।

अतः १) समधातून् विषमीकुर्वाणः ।

२) विषमधातून् न समीकुर्वाणः ।

३) व्याधिः उत्पद्वमानः ।

४) व्याधिः अभिवर्धमानः ।

ईदृशः आहारः 'अहिताहारः' इति ।

– विषमधातूनां संतानपरंपरायाः सातत्यं स्थापयित्वा व्याधेः उत्पत्तिं वृद्धिं च कुर्वाणः आहारः अहितकरः भवति ।

– वैगुण्यात् पावकस्य – जठराग्नौ वैगुण्यं इति मन्दविषमतीक्ष्णत्वस्य उत्पादनम् अथवा जाठराग्निबलम् अनपेक्ष्य खादनम् इति अर्थः भवति।

– सारांशः – १) मात्रापेक्षया अधिकं भोजनम् ।

२) मात्रापेक्षया न्यूनं भोजनम् ।

३) भोजनस्य योग्यकालात् पूर्वं भोजनम् ।

४) भोजनस्य योग्यकालस्य पश्चात् भोजनम् ।

५) अहित: आहार: – विषमधातो: संतानपरंपराया: सातत्यं स्थापयित्वा व्याधे: उत्पत्तिं निर्मितिं च कुर्वत: आहारस्य सेवनम् ।

६) जठराग्ने: वैगुण्यम् (मन्द: विषम: तीक्ष्णत्वं वा)

७) अग्निबलम् अविचार्य भोजनम् ।

एते अन्नवहस्य स्त्रोतस: दुष्टिहेतव: सन्ति ।

निष्कर्ष: – ' अतिमात्रस्य ' इति पदस्य टीकायां वैधर्म्यम् अस्ति ।

## ४) रसवहं स्त्रोत:

गुरुशीतमतिस्निग्धमतिमात्रं समश्नताम् । रसवाहीनि दुष्यन्ति चिन्त्यानां चातिचिन्तनात् ।

अस्मिन् सूत्रे चक्रपाणिगंगाधरौ टीकां न कुरुत: । प्रत्युत योगीन्द्रनाथसेनेन केवलम् अन्वय: दत्त: । ज्योतिषचन्द्रसरस्वति: गुरु: इति हेतुं वर्णयन् वदति गुरु: नाम द्रव्यगुरु: । गुरुगुणानां द्रव्याणाम् अतिमात्रसेवनम् ।

– सूत्रस्य शेषार्थ: स्पष्ट: ।

सारांश: – १) गुरुगुणानां द्रव्याणाम् ( आहार विहारस्य ) अतिसेवनम् ।

२) स्निग्धगुणानां द्रव्याणाम् अतिसेवनम् ।

३) शीतगुणानां द्रव्याणाम् अतिसेवनम् ।

४) अतिचिन्तनम् ।

एते रसवहस्त्रोतस: दुष्टिहेतव: सन्ति ।

## ५) रक्तवहं स्त्रोत:

विदाहीन्यन्नपानानि..........।।

– अस्मिन् सूत्रे चक्रपाणिगङ्गाधरौ टीकां न कुरुत: । अपि च योगीन्द्रनाथसेनेन अन्वय: वर्णित: । ज्योतिषचन्द्रसरस्वति: 'विदाही' पदस्य व्याख्यां करोति ।

द्रव्यस्वभावात् च गौरवाद्वा चिरेण पाकं जठराग्नियोगात्

पित्तप्रकोपं विदहत् करोति तदन्नपानं कथितं विदाही ।।

– यद् अन्नपानं तस्य द्रव्यस्वभावेन गुरुगुणत्वात् अग्निसंयोगानंतरमपि विलम्बेन पचनात् पित्तं प्रकोपयित्वा दाहम् उत्पादयति तद् ' विदाही ' इति वदन्ति ।

सारांश: – १) द्रव्यस्वभावात् गौरवात् चिरपाकित्वात् च पित्तं प्रकुप्य दाहम् उत्पद्यमान: आहार: ।

२) स्निग्धम् अन्नपानम्

३) उष्णम् अन्नपानम्

४) द्रवम् अन्नपानम्

५) आतपसेवनम्

६) अनलसेवनम्

एते रक्तवहस्य दुष्टिहेतव: सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ६) मांसवहं स्त्रोत:

अभिष्यन्दीनि ------- ।।

– चक्रपाणि: कथयति यत् अस्मिन् सूत्रे उपरितनात् सूत्रात् 'भजताम् ' पदस्य अनुवृत्ति: करणीया

– अभिष्यन्दिनि भोज्यानि

दोषधातुमलस्त्रोतसि अभिष्यन्दत्वम् उत्पद्यमानं भोजनम् इति अर्थ: योगीन्द्रनाथसेनेन स्वीकृत: । प्रत्युत ज्योतिषचन्द्रसरस्वतिना 'अभिष्यन्दीनि' इत्यस्य व्याख्या अधोक्ता कृता ।

हृदयस्थान्नानिर्यासबहि: स्त्रोतोमुखानि यत् ।

भुक्तं लिम्पति पैच्छिल्यात् अभिष्यन्दि तदुच्यते ।।

– स्थूलानि भोज्यानि – स्थूलानि संहतानि लड्डुकानि । (गंगाधर:)

– लड्डुकसदृशा: संहतिभाविन: स्थूला: पदार्था: ।

– सारांश: – १) अभिष्यन्दि २) स्थूल: ३) गुरु:

एवं भुक्ता अपराह्णे वामकुक्षि: मांसवहानां स्त्रोतसां दुष्टिहेतु: अस्ति

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ७) मेदोवहं स्त्रोत:

अव्यायामादिदिवास्वप्नात्...............।।

– अस्य सूत्रस्य केवलं पदद्वये चतुर्णां टीकाकाराणां टीका अस्ति ।

– मेद्यानाम् – मेद्यानाम् मेदुराणाम् । चक्र.

– मेद्यानाम् मेदोबहुलाम् । ज्योतिषचन्द्रसरस्वति:

– मेध्यानां मेदुराणां मांसानां अतिसेवनात् । योगीन्द्रनाथसेन:

– मेध्यानां स्निग्धत्वात् । गंगाधर:

– अस्य पदस्य पाठभेद: चक्रपाणिज्योतिषचन्द्रसरस्वत्यो: 'मेद्यानाम्' इति अपि च गंगाधरयोगीन्द्रनाथसेनयो: 'मेध्यानाम्' इति अस्ति । परं तद् व्याख्याद्भि: सर्वै: तस्य अर्थ: मेदुरम् वा मेदस्वी द्रव्यं (आहारविहार:) इति गृहीत: ।

– योगीन्द्रनाथसेनेन विशेषत: मेदस्विन: मांसस्य अतिसेवनं कथितम् । उत अस्य मेदुरद्रव्यगतात् स्निग्धत्वात् मेदोवहस्य दुष्टि: भवति इति वर्णयति गङ्गाधर: ।

– वारुणी: – वारुणी: मद्यविशेष: । ज्योतिषचन्द्रसरस्वति:

– वारुण्या: मदिराया: । योगीन्द्रनाथसेन:

वारुणी: नाम ताडखर्जूरयो: वृक्षयो: उत्पद्यमान: मद्यप्रकार: । वारुणी: सुरासदृशा बृंहणदीपनी , वातनाशकरी तथा लघु: शूलनाशकरी भवति । अस्या अतिसेवनेन मेदोवहं स्त्रोत: दुष्टं भवति ।

– सारांश: – १) अव्यायाम: २) दिवास्वप्नम्

३) गुणप्रधानानां मेदुरद्रव्यानाम् अतिसेवनम् विशेषत: मेदुरमांसस्य अतिसेवनम् ।

४) वारुणी: इति मद्यप्रकारस्य अतिसेवनम्

एतद् मेदोवहस्य स्त्रोत: उपलक्षणमात्रा: दुष्टिहेतव: सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ८) अस्थिवहं स्त्रोत:

व्यायामादतिसंक्षोभाद............।। १७

– अस्मिन् सूत्रे चक्रपाणिगङ्गाधरौ टीकां न कुरुत: । योगीन्द्रनाथसेनेन केवलं अन्वयार्थ: वर्णित: । तथा ज्योतिषचन्द्रसरस्वति: योगीन्द्रनाथसेन: च केषांचित् पदानां अर्थान् कथयत: ।

– व्यायामात् – अतिश्रमात् । ज्योतिषचन्द्रसरस्वति:

– अतिसंक्षोभात् – अतिसंचालनात् । ज्योतिषचन्द्रसरस्वति:

– अतिविघट्टनात् – परस्परगतिसंघर्षात् । ज्योतिषचन्द्रसरस्वति:

– अतिचालनात् । यो. से. योगीन्द्रनाथसेन:

एभ्य: हेतुभ्य: अस्थिवहं स्त्रोत: दुष्टं भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ९) मज्जावहं स्त्रोत:

उत्पेषात्यभि......................।।

– अस्मिन् सूत्रे चक्रपाणि: गङ्गाधर: च टीकां न कुरुत: । योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च अन्वयं पदार्थान् च संक्षेपेण वर्णयत: ।

– उत्पेषात् – अस्थिपेषणात् । ज्योतिषचन्द्रसरस्वति:

– उत्पेषणात् । योगीन्द्रनाथसेन:

– पेषणम् इत्यस्य अर्थ: आपटेमहोदयस्य शब्दकोशे pounding, pulverizing , any grinding or pounding apparatus इति दत्त: । इत्यर्थ: घर्षणं मन्थनम् इत्यर्थेन इदं पदं प्रयुज्यते । अस्याम् घर्षणेन अथवा मन्थनसदृशया चेष्टया मज्जावहं स्त्रोतसम् दुष्टं भवति ।

– अत्यभिष्यंदात् – अतिक्षरणात् । ज्योतिषचन्द्रसरस्वति:

– अतिक्षरणेन मज्जावहं दुष्यति ।

– अभिघातात् – आगन्तुज: अभिघात: ।

– प्रपीडनात् – दण्डादिना ताडनात् । योगीन्द्रनाथसेन:

– मुष्टि: दण्ड: हस्त: च एतै: ताडनेन पीडनात् मज्जावहं दुष्यति ।

– विरुद्धानां सेवनात् – विरुद्धं अन्नपानसेवनम् अथवा संयोगादीनां विरुद्धसेवनम् एतेन मज्जावहं दुष्टं भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## १०) शुक्रवहं स्त्रोत:

अकालयोनिगमनात्...............।। १९ ।।

– अस्मिन् सूत्रे चतुर्णाम् अपि टीकाकाराणां व्याख्या: उपलब्धा: ।

– अकालयोनिगमनम् – अहर्षकालगमनात् तथाऽनुचितयोनौ गमनात् । चक्रपाणि

अकाले निषिद्धदिनेपर्वादौ । अयोनौ निषिद्धयोनौ रजस्वलादिषु । योगीन्द्रनाथसेन:

अकाले बाल्ये जरायां वा अथवा पर्वादिवर्जनीये काले ग्रीष्मादावृतौ वा गमनात् स्त्रीसंसर्गात् ।

अयोनिगमनात् कृत्रिमोपायेन पश्वादिगमनाद्वा । (ज्योतिषचन्द्रसरस्वति:)

अकालयोनिगमनात् रजस्वलागमनात् । ( गङ्गाधर: )

– अस्मिन् पदे चतुर्णाम् अपि टीकाकाराणां टीका: स्थूलदृष्ट्या (स्थूलत:) भिन्ना: भासन्ते तथापि मूलत: विचारधारा समाना एव ।

– योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: चक्रपाणि: च एते 'अकाल''अयोनि:' च इति पदद्वयस्य सामासिके पदस्वरुपे 'अकालयोनिगमनम् ' इति अर्थं स्वीकुर्वन्ति ।

अ) अकाल: – हर्षं मेढ्रोत्थानं संकल्पं च एते न सता: मैथुनप्रवर्तनम् ।

– पर्वाणि अमावस्यायां इत्यादौ मैथुनाय निषिद्धे दिने मैथुनकरणम् ।

– बाल्यावस्थायाम् मैथुनकरणम् ।

– वार्धक्ये मैथुनकरणम् ।

– ग्रीष्मादिषु ऋतुषु हितकराणां नियमानां विपरीतं सेवनम् ।

एवं टीकाकाराणां टीकानां परिशीलनोत्तरं विविधान् अर्थान् शक्नोति ।

आ)अयोनिगमनम् – अनुचिता योनि: मैथुनाय कुयोग्यया स्त्रिया सह मैथुनम् गुदमैथुनम् च ।

– व्याधिग्रस्ता योनि:

– निषिद्धा योनि: – रजस्वला व्याधिता अपवित्रा गुरुपत्नी बन्धुपत्नी भगिनी

योगिनी च एताभि: सह मैथुनं निषिद्धम् ।

– कृत्रिमोपाय: – हस्तमैथुनं मुखमैथुनम् कृत्रिमयोनिगतं मैथुनम् ।

– पश्वादिगमनम् – पशुभि: सह मैथुनम् ।

– शिशुभि: बालकै: सह गुदमैथुनम् ।

एवं अयोनिगमनम् इति पदस्य विविधा: अर्था: प्राप्यन्ते ।

– गङ्गाधरेण तु अयोनिगमनम् इत्यस्य एक: एव अर्थ: वर्णित: यत् रजस्वलया सह मैथुनम् ।

– निग्रहात् – शुक्रवेगनिग्रहात् । चक्रपाणि:

– प्राप्तशुक्रस्य वेगरोध: । ज्योतिषचन्द्रसरस्वति:

– शुक्रवेगस्य निग्रहात् । योगीन्द्रनाथसेन:

– शुक्रवेगे उपस्थिते तस्य अवरोधेन शुक्रवेगरोधजन्यानि लक्षणानि उत्पद्यन्ते । तत: शुक्रवहं स्त्रोत: दुष्यति ।

– मेढ्रे वृषणयो: शूलमङ्गमर्दो हृदि व्यथा । भवेत् प्रतिहते शुक्रे विबद्धं मूत्रमेव च । (च. सू. ७)

एतानि शुक्रवेगरोधस्य लक्षणानि । एतानि अपि शुक्रवहस्य स्त्रोतोदुष्टौ दृश्यन्ते ।

– शुक्रप्रदोषजानि लक्षणानि ( च. सू. २८ ) एव शुक्रवहस्य स्त्रोतस: दुष्टिलक्षणानि सन्ति । तथैव शुक्रवेगावरोधजन्यानि लक्षणानि अपि शुक्रवहस्य स्त्रोतस: दुष्टिलक्षणानि इति शक्यम् अध्याहृत ।

– अतिमैथुनम् – विधिविहितया मात्रापेक्षया अधिकायां मात्रायां केनापि प्रकारेण कृतं मैथुनं शुक्रस्य अतिमात्रायां क्षयाय कारणं भवति । तेन च शुक्रवहं स्त्रोत: दुषितुम् शक्यम् । तथैव अतिमैथुनक्रियया शुक्रवहे स्त्रोतसि रुक्षता खरता परुषता च इत्यादय: गुणा: उत्पद्य (नाम शुक्रवहे स्त्रोतसि वातप्रकोपं भूत्वा) शुक्रवहे स्त्रोतसि दौर्बल्यां उत्पादनेन तत् दूष्यति ।

शस्त्रक्षाराग्नि – शस्त्रं क्षार: अग्नि: च एतेषां चिकित्साया: उपक्रमाणां यदि विधिविपरीतं उपयोगं क्रियेत तर्हि शुक्रवहं स्त्रोत: तस्य मूलस्थानं च उपहन्ति ।

सारांश: – १) हर्ष: मैथुनसंकल्प: न सता मैथुने प्रवृत्ति: ।

२) पर्वादीनि निषिद्धे दिने मैथुनकरणम् ।

३) बाल्ये , वार्धक्ये च एतास्मिन् निषिद्धे वयसि मैथुनकरणम् ।

४) ऋतुविपरीते मैथुनकरणम्

५) रजस्वलायां आतुरायां इत्यादिषु निषिद्धं योनिगमनम् ।

६) हस्तमैथुनम् इत्यादयः कृत्रिमोपायाः ।

७) गुदमैथुनं पशुमैथुनम् इत्यादिना विकृतप्रकारेण मैथुनम् ।

८) प्रवर्तमानस्य शुक्रवेगस्य अवरोधः ।

९) अतिप्रमाणं विधिविरहितं मैथुनम् ।

१०) शस्त्रक्षाराग्नीनां विधिविपरीतः उपयोगः । एतैः शुक्रवहं स्त्रोतः दूष्यति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

### ११) मूत्रवहं स्त्रोतः

अस्मिन् सूत्रे टीकायां पाठभेदाः स्वीकृताः ।

– चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः च एताभ्यां अधोक्तः सूत्रपाठः स्वीकृतः ।

मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात् ।

मूत्रवाहीनि दूष्यन्ति क्षीणस्याभिक्षतस्य च ।।

– उत गङ्गाधरः योगीन्द्रनाथसेनः च एताभ्यां अधोक्तः सूत्रपाठः स्वीकृतः ।

मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात् ।

मूत्रवाहीनि दूष्यन्ति क्षीणस्यातिकृशस्य च ।।

– अस्मिन् सूत्रे न केनापि विशेषा टीका न कृता । केवलं अन्वयः अन्वयार्थः च वर्णितः अस्ति ।

– मूत्रितम् इति पदस्य व्याख्या सर्वेषां टीकाकाराणाम् एकसमाना अस्ति । सा एवम् – यस्मिन् मनुजे मूत्रवेगः उत्पन्नः सः मनुजः मूत्रितः । एतादृशया व्यक्त्या जलपानं भक्ष्यसेवनं मैथुनं च क्रियते चेत् मूत्रवहं स्त्रोतः दूष्यति ।

– मूत्रनिग्रहः – मूत्रवेगे उत्पन्ने सति तस्य अवरोधनम् । सूत्रस्थानस्य सप्तमे अध्याये एतस्य लक्षणानि वर्णितानि ।

'बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा ।विनामो वङ्क्षणानाहः स्वाल्लिङ्गं मूत्रनिग्रहे ।। (च.सू.७)

– एतानि मूत्रवेगनिग्रहस्य लक्षणानि सन्ति । मूत्रवहस्य स्त्रोतसः दुष्टौ एतानि दृश्यन्ते ।

क्षीणस्याभिक्षतस्य च –

– चक्रपाणिज्योतिषचन्द्रसरस्वत्योः इमं सूत्रपाठानुसारं क्षीणस्य अभिक्षतस्य च इति द्वे पदे भिन्ने गृहीत्वा

क्षीणस्य मूत्रनिग्रहात् – शरीरे अथवा स्त्रोतसि क्षीणे मूत्रवेगनिग्रह कृतः चेत् मूत्रवहं स्त्रोतः दूष्यति ।

अभिक्षतस्य मूत्रनिग्रहात् – मूत्रवहे स्त्रोतसि क्षतं आघातं भूत्वा तस्याम् अवस्थायां मूत्रनिग्रहः कृतः चेत् मूत्रवहं स्त्रोतः दूष्यति ।

क्षीणस्यातिकृशस्य च –

– एवं गङ्गाधरयोगीन्द्रनाथसेनयोः सूत्रपाठः गृहीतः चेत् क्षीणस्य मूत्रनिग्रहात् तथा अभिकृशस्य मूत्रनिग्रहात् च इति हेतु द्वयं गृहीत्वा शरीरे क्षीणे सति मूत्रवेगस्य अवरोधनं तथा अतिकार्श्ये सति मूत्रवेगस्य अवरोधनम् इति अर्थः प्राप्यते ।

सारांशः – १) मूत्रवेगे उत्पन्ने सति जलपानम् ।

२) मूत्रवेगे उत्पन्ने सति भक्ष्यसेवनम् ।

३) मूत्रवेगे उत्पन्ने सति मैथुनकरणम् ।

४) मूत्रवेगस्य अवरोधनम् ।

५) शरीरे क्षीणे सति मूत्रवेगरोधः ।

६) मूत्रवहे स्त्रोतसि क्षतं सति मूत्रवेगरोधः ।

७) अतिकार्श्ये सति मूत्रवेगरोधः । एते मूत्रवहस्य स्त्रोतसः दुष्टिहेतवः सन्ति ।

निष्कर्षः – पाठभेदः अस्ति । वैधर्म्यं नास्ति ।

### १२) पुरीषवहं स्त्रोतः

– अस्मिन् अपि सूत्रे पाठभेदः अस्ति ।

– चक्रपाणियोगीन्द्रनाथसेनयोः संमतः पाठः –

संधारणादत्यशनादजीर्णाध्यशनात्तथा । वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च ।

– गङ्गाधरज्योतिषचन्द्रसरस्वत्योः संमतः पाठः

विधारणादत्यशनादजीर्णाध्यशनात् तथा । वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च ।।

– केवलम् उपसर्गमात्र: पाठभेद: अस्ति ।

| सन्धारणम् | विधारणम् |
| --- | --- |
| संपूर्णं वेगधारणम् । | विशेषत: वेगधारणम् । |

– पुरीषवेगस्य अवरोधेन पुरीषवहे स्त्रोतसि वैगुण्यम् आयाति । वातस्य गति: विलोमा भूत्वा पुरीषवहे अधिका: रुक्षखरपरुषादय: गुणा: उत्पद्यन्ते ।

– पुरीषवेगस्य अवरोधस्य लक्षणानि –

पक्वाशयशिर: शूलं वातवर्चोनिरोधनम् ।

पिण्डिकोद्वेष्टनाध्मानं पुरुषे स्याद् विधारिते ।। (च. सू. ७) लक्षणानि एतानि उत्पद्यन्ते ।

अत्याशनात् अतिभोजनात् । योगीन्द्रनाथसेन:

– अतिमात्रायां भोजने कृते अतिरिक्त : ग्लान: अग्ने: कार्यं विकृतयति । सारकिट्टविभजनस्य विकृतत्वात् पर्यायेण पक्वाशयं स्थूलान्त्रगुदं च एतयो: पुरीषवहस्य स्त्रोतयो: कार्ये विकृति: भवति ।

तथैव योग्याया: मात्राया: लक्षणानि 'सुखं गुदम् अनुपर्येति......। इत्यादीनि सन्ति । तेषु विकृति: आयाति । 'अतिमात्राशनं' युगपद् त्रिदोषप्रकोपकम् अस्ति ।

– तथैव अतिमात्राशनस्य लक्षणानि जायन्ते । (च. वि. २ / च. सू. ५)

कायाग्नि: दीप्यते न अतिभोजनात् । च चि १५ /२११

– अतिभोजनात् जठराग्निमाद्यं भवति । तदा एतेषां सर्वेषां परिणामस्वरुपिणां पुरीषवहानां स्त्रोतसां दुष्टि: भवति ।

अजीर्णाशनम्

अजीर्णे हि भुञ्जानस्याभ्यवहृतमाहारजातं पूर्वस्याहारस्य रसमपरिणतमुत्तरेणाहारसेनोपसृजत् सर्वान् दोषान् प्रकोपयत्याशु.........।। च.वि.२/२५(४)

– अजीर्णभोजनेन दोषप्रकोप: अग्निमाद्यं च भवति । तस्य परिणामत: पुरीषवहे स्त्रोतसि मूलस्थानेषु च विकृति: उत्पद्यते ।

अध्यशनम् – भुक्तस्योपरि भोजनम् । ( यो. से. ) योगीन्द्रनाथसेन:

– चरकेण ग्रहणीचिकित्सायां अध्यशनस्य व्याख्या दत्ता । अनागतावेक्षणतन्त्रयुक्तिम् अवलम्ब्य तां अत्र पश्याम: ।

भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम् ।। च.चि.१५/२३६

– प्रागाहारस्य अवशेषे एव तस्योपरि त्वरितं आहारं नाम अध्यशनम् । एतेनापि अन्नविषस्य अवस्थां उत्पद्य परिणामत: पुरीषवहं स्त्रोत: दुष्यति ।

सारांश: – १) मलवेगस्य अवरोध: । २) अतिमात्रायां भोजनम् । ३) अजीर्णाशनम् ।

४) अध्यशनम् । ५) अग्निमान्द्यम् । ६) कृशता ।

एते पुरीषवहस्य स्त्रोतस: दुष्टिहेतव: सन्ति ।

निष्कर्ष: – पाठभेद: अस्ति परं वैधर्म्यं नास्ति ।

१३) **स्वेदवहं स्त्रोत:** – सूत्रम् २२

– अस्मिन् अपि सूत्रे पाठभेदा: सन्ति ।

– चक्रपाणिज्योतिषचन्द्रसरस्वत्यो: संमत: पाठ: –

व्यायामादतिसंतापाच्छीतोष्णाक्रमसेवनात् ।
स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा ।।

– गङ्गाधरयोगीन्द्रनाथसेनयो: संमत: पाठ: –

व्यायामादतिसंक्षोभाच्छीतोष्णाक्रमसेवनात् ।
स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा ।।

– अतिसंताप: अतिसंक्षोभ: च इत्थं पाठद्वयं लभेते । अस्मिन् सूत्रे चक्रपाणे: टीका नास्ति । इतरै: त्रीभि: केवलं शीतोष्णाक्रमसेवनात् इति पदस्य व्याख्या कृता ।

– अक्रमेण शीतोष्णयो: सेवनं स्वेदवहस्य स्त्रोतस: दुष्टिहेतु: । अयमेव हेतु: कुष्ठस्य अपि वर्णित: ।

शीतोष्ण व्यत्यासात् .................... । (च.नि. ५)

– शीतोष्णौ आहारविहारौ अक्रमेण विधिवैपरीत्या सेवेत चेत् स्वेदवहं स्त्रोत: विकरोति । परिणामत: कुष्ठरोग: प्रादुर्भवति । उदाहरणार्थं – चायपानात् प्राक् शीतजलसेवनम् ।

आतपात् आगत्य तत्काले शीतजलसेवनम् अथवा वातनियंत्रितकक्षे उपवेशनम् ततः झटिति आतपे भ्रमणम् च । इत्यादीनां हेतूनां वारंवारं सेवनम् ।

सारांशः – १) अधिकमात्रायाम् व्यायामकरणम् ।

२) अतिसंतापः । अतिसंक्षोभः – मानसिकः तापः ।

३) अक्रमेण शीतोष्णयोः सेवनम्

४) क्रोधः (५) शोकः (६) भयम् ।

एते स्वेदवहस्य स्त्रोतः दुष्टिहेतवः ।

निष्कर्षः – पाठभेदः अस्ति परं वैधर्म्यं नास्ति ।

## अधिकरणम् पञ्चमम्

## स्त्रोतसां सामान्यदुष्टिहेतवः दुष्टिलक्षणानि च

सूत्रे– २३,२४– स्त्रोतसां पृथक्दुष्टिहेतून् लक्षणानि च वर्णयित्वा इदानीं स्त्रोतसां सामान्यदुष्टिहेतवः सामान्यदुष्टिलक्षणानि च वर्ण्येते ।

– गङ्गाधरः रॉयमहोदयस्य पृथक् दृष्टिकोणः –

एतयोः सूत्रयोः अर्थः गङ्गाधरेण ''सर्वस्त्रोतसां सामान्यदृष्टिहेतुः सामान्यदुष्टिलक्षणं च'' इति अस्वीकृत्य ''वातादिदोषवहस्त्रोतसां सामान्यदुष्टिहेतवः दुष्टिलक्षणानि च'' इति अर्थः गृहीतः ।

सामान्यदुष्टिहेतुः –

आहारश्च विहारश्च...........।।

अन्वयार्थः – यौ आहारविहारौ दोषगुणानां समानगुणानां धातूनां विगुणौ च स्तः तौ स्त्रोतांसि दूषयतः ।

अस्मिन् सूत्रे द्वौ घटकौ स्तः । तदनुषङ्गेन टीकाकाराणां विवेचनं पश्याम ।

दोषगुणैः समः –

– वातादिदोषाणां ये रूक्षादयः गुणाः सन्ति तेषां पृथक् पृथक् गुणानां सर्वगुणानां वा समगुणानां आहारविहारौ स्त्रोतांसि विकारयतः ।

– ''सामान्यं वृद्धिकारणम् ।'' एतेन सामान्येन सिद्धांतानुसारेण येषां गुणानाम् आहार: स्यात् स: तं गुणं शरीरे वर्धयति, तं विपरीतं गुणं क्षाययति ।

– क्षीणदोषा: अन्यभावपदार्थान् न दुष्यन्ति । ते निजलक्षणै: कर्मभि: च क्षीयन्ते ।''दोषगुणै: सम:'' एतेन चक्रपाणिना दोषाणाम् अतिवृद्धि: एव दर्शिता । समगुणत्वेन दोषाणां तत्तद् गुणानां वृद्धि: भवति इति योगीन्द्रनाथसेनेन उक्तम् ।

धातुभि: विगुण: –

पदश: अर्थ: – 'धातूनां गुणानां विपरीतगुणानाम् इति अर्थ: भवति य: योगीन्द्रनाथसेनस्य अभिप्रेत: अस्ति । योगीन्द्रनाथसेनेन धातूनां गुणानां विपरीत गुणानां आहारविहारै: इत्येव अर्थ: स्वीकृत: ।

– परन्तु चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एतौ एवम् अर्थं न गृहीत: । ताभ्याम् अत्र ' विरुद्ध:' इति संकल्पना विचारिता अस्ति ।

– चक्रपाणिना एवं विवेचनं कृतं यत् धातुर्भिर्विगुण: नाम धातुविरोधकस्वभाव: इति अर्थ: योग्य: न तु धातुविपरीतस्वभाव: । उदाहरणार्थम् दिवास्वप्नं, मेद्य आहारसेवनं एतौ हेतु मेदस्य समानगुणानां स्त: तथापि ते मेदोदुष्टिं कुर्वत: ।

– ज्योतिषचन्द्रसरस्वतिना एवमेव चक्रपाणिमतम् अनुसरन् विवेचनं कृतम् । धातूनां वैगुण्यकारक: इति अर्थ: स्वीकर्तव्य: इति तस्य मतम् । तेन अपि उपरोक्तं मेदोदुष्टे: एव उदाहरणं दत्तम् ।

– विरुद्ध सङ्कल्पना नाम एषा एका विशेषसङ्कल्पना अस्ति । विरुद्ध: इत्यस्य अर्थ: केवलं कस्यापि भावपदार्थस्य साक्षात् विपरीतगुण: इति न ।अस्मिन् विषये अतीतावेक्षणम् अनागतावेक्षणम् अनुमतम् अतिदेश: एतेषां तन्त्रयुक्तीनां सहाय्येन विवेचनं करवाम ।

'' तरतमयोगयुक्ताश्च..........................।।'' सु सू २० / १३

– भावपदार्थानां गुणा: तरतमत्वेन त्रिधा भवन्ति । उदाहरणार्थं स्निग्ध: स्निग्धतर: स्निग्धतम: , लघु: लघुतर: लघुतम: । एवं सर्वेषां गुणविषये ज्ञातव्यम् । तरत्वान् – तमत्वान् गुणान् च बलवन्त: गुणा: इति वदन्ति ।

बलीनां मिथोगुणानां..................।। अ. सं. सू. ९/१८

– बलीनां नाम पदार्थेषु ये गुणाः तरः तमः वा सन्ति । एवं ययोः द्रव्ययोः बलवन्तः गुणाः परस्परसमाना वा विपरीता सन्ति ते द्रव्ये परस्पर विरुद्धे स्तः । एते बलवन्तः गुणाः निसर्गतः सन्ति । संयोगेन वा संस्कारेण वा उत्पद्यन्ते । उदाहरणार्थम् –

१) दुग्धं मत्स्यः च एते द्वे अपि द्रव्ये मधुरतरे मधुरविपाकिनी अभिष्यन्दिनी इति बलवन्तः समानगुणानां भवतः । प्रत्युत दुग्धं शीतगुणस्य मत्स्यः उष्णवीर्यस्य एवं बलवतः विपरीतगुणस्य स्तः अतः ते परस्परविरुद्धे स्तः ।

२) शीतार्तौ हिमस्य अतिशीतजलसेवनं विरुद्धं भवति ।

– इत्थं 'विरुद्धम्' इत्यस्य अर्थः न केवलं विपरीतम् । अपि तु बलवन्तः समानगुणानां वा विपरीतगुणानाम् इति विरुद्धम् ।

– इयं सङ्कल्पना चरकाचार्येण च. सू. २६ मध्ये सविस्तरं वर्णिता अस्ति ।

– अस्मिन् सूत्रे 'वाक्यशेषं तन्त्रयुक्त्या' कानिचित् विपरीतगुणानि कानिचित् समानगुणानि' इत्यर्थः अभिप्रेतः । सममेव अर्थः 'धातुभिः विगुणः' इत्यत्र गृहीतः । धातुनां विपरीतगुणानाम् आहारविहारौ एतावदेव मर्यादितः अर्थः अधृत्वा, धातूनां समानगुणैः विपरीतगुणैः वा धातुषु वैगुण्यान् उत्पादयन् आहारः इति चक्रपाणेः ज्योतिषचन्द्रसरस्वतेः च अभिप्रेतम् अस्ति ।

सारांशः – यौ आहारविहारौ दोषगुणानां समानगुणत्वात् तेषां विकृतवृद्धिं कुर्वाणौ स्तः तथैव यौ धातूनां विरुद्धः नाम धातूनां गुणानां समानगुणैः विपरीतगुणैः वा धातुषु वैगुण्यान् उत्पादयतः तौ आहारविहारौ स्त्रोतस्सु दुष्टिं उत्पादयतः ।

– अस्मिन् सूत्रे एकं महापाठभेदः गृहीत्वा गङ्गाधरेण पृथक् अंशः विवेचितः ।

''आहारश्च विहारश्च यः स्यात् दोषगुणैः समः ।<br>
ऋतुभिर्विगुण श्चापि स्त्रोतसां स प्रदूषकः ।।''

– ऋतौ यौ आहारविहारौ कथितौ तेभ्यः विपरीताहारविहारकरणं स्त्रोतसां दुष्टिं कुर्वन् हेतुः अस्ति । महत्तमं विवेचनं यत् एतत् सूत्रं केवलं दोषवहस्त्रोतसां सामान्यहेतूनाम् अस्ति । 'धातुभिर्विगुणः' इति अगृहित्वा ''ऋतुभिर्विगुणः'' इति पाठभेदः स्वीकृतः अस्ति ।

स्त्रोतस: सामान्यदुष्टिलक्षणानि

अतिप्रवृत्ति: सङ्गो वा...........।।

चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: एतानि सर्वस्त्रोतसां सामान्यदुष्टिलक्षणानि इति कथितानि । प्रत्युत गङ्गाधरेण तु वातादिदोषवह स्त्रोतसां दुष्टिलक्षणानि इति वर्णितानि ।

– योगीन्द्रनाथसेनेन केवलं सूत्रस्य अन्वयं वर्णितम् अस्ति । प्रत्युत चक्रपाणि: , ज्योतिषचन्द्रसरस्वति: च एताभ्याम् अन्वयं पदार्थान् च वर्णितौ स्त: ।

अतिप्रवृत्ति: – स्त्रोतो वाह्यानां रसादिधातूनां अतिप्रवृत्ति: इति अर्थ: अपेक्षित: । यस्य भावपदार्थस्य स्त्रोत: भवति तथैव तस्मात् य: भावविशेष: वाहित: भवति, तस्य प्रमाणत: गुणत: अतिप्रवृत्ति: इति एकं दुष्टिलक्षणं भवति ।

सङ्ग: – स्रोतोभ्य: वाह्यमानेषु भावविशेषेषु अवरोधस्य उत्पत्ति: ।

ग्रन्थि: – ग्रन्थय: कुण्डलीभाव: विबद्धता वा । ज्योतिषचन्द्रसरस्वति:

– स्त्रोतसां वाह्यमानेषु धातुषु कुण्डलीभावत्वं । वायो: गुणवृद्धया तस्मिन् धातौ रुक्षखरपरुषत्वं उत्पादनेन तस्मिन् रुक्षादिगुणयुक्ते: ग्रन्थे: निर्माणं भवति। अथवा वायो: रुक्षादिगुणै: तेषां स्त्रोतसां धातुवहने विबद्धता नाम ग्रन्थि: ।

विमार्गगमनम् – मलस्य मूत्रमार्गगमनम् । चक्रपाणि

विमार्गत: गमनम् । योगीन्द्रनाथसेन:

प्रतिलोमगमनम् अन्यस्त्रोतसि गमनं वा । ज्योतिषचन्द्रसरस्वति:

– विमार्गगमनस्य एवं विधा तिस्त्र: व्याख्या: प्राप्यन्ते । अत्र 'विमार्गगमनं' विषये गङ्गाधरेण विवेचनं न कृतम् । 'विमार्गगमन' स्य त्रय: अर्थभेदा: प्राप्यन्ते ।

१) विमार्गत: गमनम् ।

२) प्रतिलोम गमनम् ।

३) अन्यस्मिन् स्त्रोतसि गमनम् ।

विमार्गत: गमनम् – स्वस्य प्राकृतं विहितं स्त्रोतस् गतिविशेषां वा अवस्थां त्यक्ता अन्यं स्त्रोत: गतिं वा अवस्थां गमनं नाम विमार्गगमनम् इति ।

प्रतिलोमगमनम् – भावपदार्थानां तत् स्त्रोतसः या गतिः भवति तस्याः साक्षात् विपरीतया दिशा तस्य वहनम् आरभते । विमार्गगमनस्य एवमपि एकः अर्थः भवति ।

अन्यस्मिन् स्त्रोतसि वा गमनम् – एकस्त्रोतस्थः वाह्यमानः धातुः क्षतदौर्बल्यादिभिः हेतुभिः अपरस्मिन् स्त्रोतसि गच्छति तत्र च विकृति  उत्पादयति ।

उदाहरणार्थम् –रक्तं मांसवहं शुक्रवहं च एतेभ्यां स्त्रोतोभ्यां गच्छति ।

– '' मलं मूत्रमार्गात् वहति '' इति चक्रपाणिना अत्र उदाहरणं दत्तम् । अत्र गङ्गाधरेण यद्यपि केवलं सूत्रस्य अन्वयः वर्णितः तथापि तद् अन्यटीकाकाराणाम् अपेक्षया भिन्नस्वरुपस्य अस्ति ।

– गङ्गाधरस्य टीकानुसारेण – सिराणाम् अतिप्रवृत्तिः

– सिराणां सङ्गः

– सिराणां ग्रन्थयः

– सिराणां विमार्गगमनम्

इति 'सिराणां' पदं एतेभ्यः चतुर्भ्यः पदेभ्यः विशेषणम् इति योजितम् ' सिरा ' पदेन स्त्रोतः इति अर्थः गृहीतः । इत्थं स्त्रोतः विषये चत्वारि लक्षणानि स्त्रोतसां दुष्टिलक्षणानि इति वर्णितानि ।

निष्कर्षः – अस्मिन् अधिकरणे अधोक्तानि वैधर्म्याणि सन्ति ।

१) 'धातुभिः' 'ऋतुभिः' च इति पाठभेदः वैधर्म्यं च

२) योगीन्द्रनाथसेनेन 'धातुभिः' इत्यस्य अर्थः 'धातुविपरीतः' इति गृहीतः । प्रत्युत चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः च एतौ 'धातुविरोधकः' इति अर्थं गृहृणीतः ।

३) 'विमार्गगमनम्' अस्मिन् वैधर्म्यम् ।

४) सर्वस्त्रोतोदुष्टिः वातादिवहस्त्रोतोदुष्टिः च ।

५) 'सिराणां' पदस्य अन्वयः गङ्गाधरेण सर्वपदेभ्यः योजितः ।

## अधिकरणम् षष्ठम्

## स्त्रोतसां वर्णा: आकारादिनि प्राकृतलक्षणानि

स्वधातुसमवर्णानि ------------- ।। सूत्रम् २५

अन्वयार्थ: – स्वधातो: समानस्य वर्णस्य वृत्ताकाराणि स्थूलानि वा सूक्ष्माणि लताया: प्रतानवत् दीर्घाकाराणि (स्त्रोतांसि भवन्ति ) ।

– अस्मिन् सूत्रे स्त्रोतसां विकृतलक्षणानां कथनानन्तरं तेषां प्राकृतवर्णाकाराणां विवेचनं कृतमस्ति ।

– स्वधातुसमवर्णानि – स्वधातुसमवर्णानि इति वाह्यधातुतुल्यवर्णानि । चक्रपाणि

–स्त्रोतोभ्य: य: वाह्यमान: धातु: स्यात् तस्य वर्णानुसारं स्त्रोत: वर्णं प्राप्नोति । नाम रक्तवहस्त्रोतस: रक्तवर्ण: मांसवहस्त्रोतस: मांसवर्ण: एवं प्रकारेण सर्वेषां स्त्रोतसां वर्णविषये ज्ञातव्यम् ।

– ज्योतिषचन्द्रसरस्वतिना अत्र 'धातु:' इति पदे प्राणान्नोदकानि अपि समावेश्यानि इति कथितम् अस्ति । यत: ते अपि शरीरधारका: सन्ति । अस्मै हेत्वर्थतन्त्रयुक्ति: इति भणन्ति । तेषां वर्णानुसारं तेषां स्त्रोतसां वर्ण: अस्ति । ज्योतिषचन्द्रसरस्वतिना एतद् स्वतन्त्रानुकूलानां स्त्रोतसां लक्षणानां वर्णनमस्ति इति उक्तम् ।

– वृत्तस्थूलान्यणूनि – वृत्तानि च तानि स्थूलानि चेति वृत्तस्थूलानि ।

अणूनि च वृत्तसूक्ष्माणि च । गङ्गाधर:

– वृत्तानि वर्तुलानि स्थूलानि च । अणूनि सूक्ष्माणि च ।

कानिचित् स्थूलानि कानिचित् सूक्ष्माणि च । योगीन्द्रनाथसेन:

– गङ्गाधरेण योगीन्द्रनाथसेनेन च एतस्य सामासिकपदस्य विग्रह: उपरोक्तवत् ।

– स्त्रोतसां आकारस्वरुपयो: वर्णनं कुर्वता तानि एकत: तु वर्तुलाकाराणि स्थूलानि च वा वतुर्लाकाराणि सूक्ष्माणि च इति स्वरुपाणां सन्ति । अत्र योगीन्द्रनाथसेन: वाक्यशेषतन्त्रयुक्तिं अवलम्बते । वर्तुलाकारस्त्रोतांसि क्वचित् स्थूलानि सन्ति क्वचित् सूक्ष्माणि ।

– आकृति: – आकृते: वर्णनं कुर्वता द्वे विशेषणे उपयोजिते दीर्घाणि प्रतानसदृशानि च ।

दीर्घाण्याकृत्या – दीर्घाणि लम्बानि । गङ्गाधर:

– आकृत्या दीर्घाणि दीर्घाकृतीनि । योगीन्द्रनाथसेन:

दीर्घा channels वत् रचना स्रोतसांवर्तते ।

– प्रतानसदृशानि – प्रतान: लताप्रपञ्च: । चक्रपाणि

– लतानां प्रतानम् अग्रलता तत् सदृशानि । गङ्गाधर:

– प्रतान: लताप्रपञ्च: तत्सदृशानि । वल्लीवदनेकभङ्गीप्रवाहयुक्तानि च भवन्ति ।

योगीन्द्रनाथसेन:

– प्रतानसदृशानि लताप्रतानसदृशानि शाखाप्रशाखाभि: सर्वतो विसृप्तानीत्यर्थ: ।

ज्योतिषचन्द्रसरस्वति:

– स्रोतसां आकृतये एतद् एकं विशेषणम् उपयोजितमस्ति । यथा लतानां शाखा उपशाखा भवं भवं जालं प्रसृतमस्ति । तथा स्रोतांसि शाखोपशाखाभि: विभक्तानि भवं भवं तानि सर्वे शरीरे जालवत् प्रसृतानि सन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् सप्तमम्

## स्त्रोतोदुष्टेः सामान्या चिकित्सा

सूत्राणि २६ – २८

सूत्र – प्राणोदकान्नवहानां.....................।।

उद्देशतन्त्रयुक्त्यनुसारं स्त्रोतसां सामान्यचिकित्सा अस्मिन् सूत्रे वर्णिता । एतेषु त्रिषु चतुर्भिः टीकाकारैः अन्वयान्वयार्थैः पदार्थः च अस्मिन् एव स्वरुपे ' अविशेषा ' टीका कृता ।

– अस्य सूत्रस्य टीकायां चक्रपाणिना 'निर्देशः' इति तन्त्रयुक्तेः प्रत्युत ज्योतिषचन्द्रसरस्वतिना 'प्रदेशः' इति तन्त्रयुक्तेः उपयोगः कृतः ।

सूत्रस्य अन्वयार्थम् एवम् ––

| स्त्रोतम् | दुष्टेः सामान्या चिकित्सा | वर्णनाधिकारः |
|---|---|---|
| प्राणवहम् | श्वासिकी | हिक्काश्वासः |
| उदकवहम् | तृष्णाप्रशमनी | तृष्णाचिकित्सा |
| अन्नवहम् | आमप्रदोषिकी | विसूचिकालसकचिकित्सा |
| मूत्रवहम् | मौत्रकृच्छिकी | त्रिमर्मीयाध्याय मूत्रकृच्छ्राधिकारः |
| पुरीषवहम् | अतिसारिकी | अतिसारचिकित्सा |
| स्वेदवहम् | ज्वरचिकित्सकी | ज्वरचिकित्सा |
| रसादि | तद्धातुप्रदोषचिकित्सा | विविधाशीतपीतीय |

– एवं प्रकारेण सामान्यचिकित्सायाः वर्णनं कृतमस्ति । हेतुदोषदूष्यावस्थाकालऋतुबलाग्निवयादीन् विचार्या विशेषचिकित्सा अवलम्बितव्या ।

– गङ्गाधरेण एकं महत्वपूर्णं वाक्यं उक्तं यत् वातादिवहानां स्त्रोतसां चिकित्सा सम्पूर्णतन्त्रे वर्णिता अस्ति । अतः अत्र तस्याः पृथक् वर्णनं न कृतम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## अधिकरणम् अष्टमम्

## अध्यायार्थम् उपसंहार:

– प्रदेशतन्त्रयुक्ते: अनुसारं संक्षेपत: अध्ययस्य उपसंहार: वर्णित: अस्ति ।

सूत्रम् – त्रयोदशानां मूलानि...................।। २९ – ३०

– 'स्त्रोतोविमानम्' इति अध्याये अग्रीमविषयाणां विवेचनं कृतमस्ति । तस्य संग्रह: अस्मिन् सूत्रे अस्ति । – त्रयोदशस्त्रोतसां मूलस्थानम्

- दुष्टिलक्षणम्
- सामान्यं दुष्टिलक्षणम्
- नामपर्याय:
- परस्परकोपनत्वं – स्त्रोत: तथा वाह्यमान: धातु: अनयो: परस्परकोपनत्वम्
- प्रत्येकस्त्रोतस: पृथक् पृथक् दोषहेतु:
- सामान्य: दोषहेतु:
- उद्देशत: (संक्षेपत:) चिकित्सा

स्त्रोतोविमाने निर्दिष्टस्तथा चादौ विनिश्चय: –

अस्मिन् सूत्रस्थे आदौ विनिश्चय: अस्मिन् पदे व्याख्या कुर्वद्भ्यां चक्रपाणियोगेन्द्रनाथसेनाभ्यां उक्तं यत् अध्यायस्य प्रारम्भे वर्णितं 'पुरुषस्य स्त्रोतोमयत्वम्' इत्यस्य विनिश्चय: कृत: । गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एताभ्यां अस्मिन् व्याख्या न कृता ।

– वस्तुत: तु ग्रन्थकार: पुरुषस्य स्त्रोतोमयत्वम् इति पूर्वपक्षं स्थापयित्वा स्वयमेव खण्डयति । अत: एषा टीका अयोग्या भाति।

– 'आदौ विनिश्चय:' इति पदेन स्त्रोतोविमानम् इति अध्यायस्य प्रारम्भे स्त्रोतसां संकल्पना मूर्तिमतां भावविशेषाणां स्त्रोतोमयत्वं तथा स्त्रोतस्सम्बन्धिन: सिद्धान्त: एतेषां यद्विवेचनं कृतं तदपेक्षितम् स्यात् ।

– चक्रपाणि: स्वव्याख्यायाम् एवं वदति यत् सामान्यत: स्त्रोतसां दुष्टिलक्षणानि वर्णितानि । एतद् वदता तेन वातादिदोषाणां स्त्रोतोदुष्टिलक्षणानि न वर्णितानि । यत: वातादिदोषाणां स्त्रोतसां वर्णनं

अतीवविस्तृतं भवेत् अनेन विस्तारभयेन तेषां मूलप्रकोपविज्ञानतः विवेचनं न कृतम् । अस्मिन् अध्याये येषां स्त्रोतसां वर्णनं कृतं तदनुसारं वातादीनि स्त्रोतांसि ज्ञातव्यानि ।

– योगीन्द्रनाथसेनः स्वटीकायाम् एवं वदति यद् एतद् वर्णनम् आचार्यपुनर्वसुना आत्रेयेण कृतम् । अत्र वाक्यशेषतन्त्रयुक्तिम् उपयुज्य सूत्रस्थः अनुक्तः कर्ता योगीन्द्रनाथसेनेन उल्लिखातः अस्ति ।

## अधिकरणं नवमम्

## स्त्रोतः प्रभृति शारीरज्ञानमहत्वम्

सूत्रम् ३० – केवलं विदितं यस्य शरीरं सर्वभावतः । शारीराः सर्वरोगश्च स कर्मसु न मुह्यति ।

– यः वैद्यः सर्वेषां प्रकाराणां सम्पूर्णं शरीरं जानाति सः शरीरस्य सर्वरोगचिकित्सायां न कदापि मोहग्रस्तः भवति ।

– चक्रपाणिना स्वव्याख्यायां अस्य विमानस्थानस्य पञ्चमे अध्याये अनेन सूत्रेण वर्णितः धमन्याः (स्त्रोतसः) भेदाः इत्यादिना शरीरज्ञानस्य महत्त्वं वर्णितम् ।

– 'केवलम्' इति पदस्य अर्थः योगीन्द्रनाथसेनः गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च एतैः कृत्स्नम् नाम सम्पूर्णम् इति गृहीतः ।

– योगीन्द्रनाथसेनेन एवम् उक्तं सः (वैद्यः) चिकित्सालक्षणेषु (कर्मणि) प्रमादं न करोति यः सम्पूर्णं शरीरं सर्वभावतः नाम स्त्रोतः प्रभृतीन् सर्वभावपदार्थान् तथैव शारीरमानससदृशान् सर्वरोगान् जानाति ।

– ज्योतिषचन्द्रसरस्वतिना 'सर्वभावतः' अस्मिन् पदे व्याख्या कृता । सर्वभावतः नाम सर्वेषां स्त्रोतसां विशेषज्ञानं अंगप्रत्यंगकोष्ठांगादीनां ज्ञानं देहधातुज्ञानं च एतानि अस्मिन् समाविशितव्यानि ।

– इत्यर्थः यः सर्वाणि स्त्रोतांसि अंगप्रत्यंगकोष्ठांगानि देहधातून् च विशेषेण जानाति सः वैद्यः चिकित्सासमये प्रमादं न करोति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## षष्ठ: अध्याय:

## रोगानीकं विमानम्

अस्य अध्यायस्य शीर्षकसंज्ञायां 'छ' प्रत्यय: नाम 'ईय' प्रत्यय: योजित: नास्ति । अत: रोगानीकीयम् इति न कृत्वा रोगानीकम् इति रुपं कृतमस्ति । यत: अत्र रोगाणां प्रभावादि भेदेन वर्गीकरणं कृत्वा रोगस्य विशेषज्ञानं लब्धव्यम् इति विषय: अस्ति ।अत: 'छ' प्रत्यय: अत्र नास्ति । एतद् अध्यायनाम विशेषम् अस्ति ।

अस्मिन् अध्याये षड् अधिकरणानि सन्ति ।

१. रोगानीकम् ।

२. दोषविवेचनम् ।

अ) रोगदोषयो: सामान्यम् ।

आ) विकाराणाम् एकदेशं प्रकोपणम् ।

इ) शारीरदोषानुबन्ध: तथा अनुबन्धानुबन्धविचार: ।

३. अग्नि: ।

४. प्रकृति: ।

५. राज्ञ: प्राणपति: ।

६. उपसंहार: ।

एतेषां क्रमेण विवेचनम् अधोनिर्दिष्टम् अस्ति ।

### अधिकरणम् प्रथमम्

### रोगानीकम्

चरक: –

– दशरोगानीकानि

प्रभावभेदेन – साध्यम् असाध्यम् च

बलभेदेन – मृदु: दारुणम् च

अधिष्ठानभेदेन – मनोऽधिष्ठानं शरीराधिष्ठानम् च

निमित्तभेदेन – स्वधातुवैषम्यनिमित्तम् आगन्तुनिमित्तम् च

आशयभेदेन – आमाशयसमुत्थम् पक्वाशयसमुत्थम् च

– भेदकरकारणानुसारं व्याधिनामेकत्वं वा बहुत्वं भवति ।

– तन्मध्ये एकं रोगानीकम् अस्ति दु:खसामान्यात् ।

– बहुत्वं संख्येयं असंख्येयं च इति द्विविधम् अस्ति ।

संख्येयम् – १९ सूत्रे अष्टोदरीये वर्णनम् ।

असंख्येम् – २० सूत्रे महारोगाध्याये वर्णनम् ।

– संख्येयाणां रोगाणाम् अपरिसंख्येयत्वं वर्णितव्यं एतद् विरुद्धवचनं नास्ति ।

– भेत्ता हि भेद्यं अन्यथा भिनत्ति ।

– प्रथमम् एकेन प्रकारेण भेद: कृत: । अनन्तरम् अन्यप्रकारेण तस्या: एव व्याध्या: भेद: कृत: तर्हि तद् विरुद्धं नास्ति । पूर्वं कृत: भेद: तस्य कारणं च स्वीकृतम् एव अस्ति ।

– भेदस्य कारणेषु समानता सत्यपि कारणानां प्रयोगे भिन्नतया रोगस्य वर्गीकरणे भिन्नता अस्ति ।

– समानपदानामपि भिन्ना: भिन्ना: अर्था: सन्ति ।

– पर्यायवाचिपदानाम् एकमेव अर्थवाचि पदमभिप्रेतमस्ति ।

– रोग: इति पदं दोष: व्याधि: च एताभ्यां द्वाभ्यां योजितं भवति । दोष: इति पदं रोग: आतङ्क: यक्ष्मा दोषप्रकृति: विकारा: च एतै: पदै: योजितं भवति । तथैव व्याधि: अपि रोग: आतङ्क: यक्ष्मा दोषप्रकृति: विकारा: आदिभि: पदै: वर्णिता भवति ।

– अस्मिन् प्रकरणे दोष व्याधि: च एतस्मिन् रोग: इति शब्द: समानरुपेण व्यवहृत: अस्ति अपि च अन्येषु अर्थेषु भिन्न: अपि भवति ।

<u>चक्रपाणि:</u>–

– मृदु – अल्पबलम् ।

– दारुणम् – महाबलम् । दारुणम् – किञ्चितकालातिपातादेव बलत्वात् मारयति ।

– आमाशयसमुत्थम् – आमाश्रयाश्रिता सर्वा कफपित्तजा व्याधि: ।

– पक्वाशयसमुत्थम् – सर्वा वातजा ।

– प्रकृति: इति पदं कारणवाचकमस्ति ।

– सन्धियमानमिति एकीक्रियमाणमेक बुद्धिकारकानुगतम् ।

– दु:खकर्तृत्वमिति सर्वरोगानुगतं साधारणरुपमस्ति । तेन सर्वेरोगा: एकरुपा: सन्ति ।

– अग्रशब्द: परिणामवाचक: ।

– विरुद्धागीति: विगीति: कथनम् ।

– यस्य धर्मस्य योगविवक्षया एकत्वं कथितमस्ति तस्य एव धर्मस्य योगविवक्षया बहुत्वं वर्णितमस्ति

– शेषाटीका शब्दार्थ :

गङ्गाधर:

– प्रभावस्य व्याख्या अधोनिर्दिष्टा अस्ति ।

''प्रभाव: प्रभवनं भवनमुत्पत्ति: यत् रूपं यस्य तत्र येन भवनेन यत् द्रव्यं स्वकर्मणि प्रभुर्भवति तत् प्रभवनं प्रभाव: ।''

– 'पुरस्तात् भिन्नं' एष: भिन्न: पाठ: स्वीकृत: तथापि वैधर्म्यं नास्ति । अस्य अर्थ: पूर्ववर्णित: भेदधर्म:

– 'समानायामपि' – अत्र अपि पदेन वाक्यशेष: तन्त्रयुक्त्याधारेण असमानायाम् इति पदमपि गृहितव्यम् ।

– समाना वा असमाना भेदप्रकृति: सत्सु रोगेषुभेदकारणानुरूपं भेदा: क्रियन्ते ।

– एकशब्दाभिहिता अनेकार्था: सन्ति । सन्ति च एकविधार्था अनेक शब्द वाच्या: । शेष: शब्दार्थ:

योगीन्द्रनाथसेन:

– अनीकम् इति समूह: ।

– निजम् इति धातूनां वैषम्यं तदेव निमित्तं यस्य तद् शारीरदोषोत्थम् ।

– आगन्तु: अभिघातादि बाह्यहेतु: निमित्तं यस्य तत् ।

– विविधकारणानुसारं विविधतया भेदान् कृत्वा रोगाणां बहुत्व वर्णितुं शक्यं तथैव तेषु सर्वेषु रोगेषु कयापि एकया सामान्यक्रियाया: अनुषंगेण तत्रस्थं एकत्वं वर्णितुं शक्यम् ।

व्याधिः

अन्य प्रकृतिभेदेन भेदं कृत्वा बहुत्वम् — दशरोगानीकम् — संख्येयत्व, असंख्येयत्व

एकीक्रियमाणम् एकत्वम् — रुक्सामान्यत्व

– दुःखकर्तृत्वेन सर्वे रोगाः एकरूपाः भवन्ति ।

– बहुत्वम् अपि संख्येयं असंख्येयं च अस्ति ।

– संख्येयम् अष्टोदरीये अध्याये उक्तम् । अपरिसंख्येयं महारोगाध्याये उक्तम् ।

– अग्र्यपदं विशेष वाचकमस्ति ।

– विगीतिः विरुद्धागीतिः अन्यथा संख्यानम् ।

– समानशब्दैः अभिहितानि अर्थान्तराणि भिन्नार्थानि सन्ति ।

– पर्यायशब्दैः अभिहितानि अनर्थान्तराणि एकरूपाः अर्थाः सन्ति । शेषाटीका शब्दार्थः ।

समानशब्दः → अर्थान्तरम् → भिन्नार्थः → उदा.रोगशब्दः व्याधिषु च दोषेषु च

पर्यायशब्दः → अनर्थान्तरम् → एकरूपार्थः → उदा. दोषस्य पर्यायः रोगः आतङ्कः यक्ष्मा दोषप्रकृतिः विकार

<u>ज्योतिषचन्द्र सरस्वतिः</u>

– दोषविकारयोः मानज्ञानार्थम् एषः अध्यायः वर्णितः ।

– रोगानीकम् – यथा शत्रोः सैन्यसमूहेनसह युद्धं क्रियते तथा वैद्यः रोगसमूहेन सह युध्यते । एवमेषः अनीकं शब्दः समष्टिवाचकः अस्ति ।

– व्याधिनां भेदकभेदेन प्रभावादि भेदेन च द्वैधं वर्णनं कृतम् । तस्य बहुत्वं वर्णितं तद्नन्तरं सामान्यधर्मानुसारेण सर्वासां व्याधीनामेकत्वं वर्णितम् ।

– रुक्सामान्यात् व्यथाजनकत्वसामान्यात् ।

– बहुत्वस्य अपि संख्याकरणयोग्यायोग्ये एवं वर्णनं कर्तुं शक्यम् ।

– अर्थान्तराणि पृथक् पदार्था: । अर्थान्तराणि एक एव पदार्थ: ।

– पर्यायशब्द: एकार्थबोधकशब्दगम्य: । शेषाटीका शब्दार्थ: ।

निष्कर्ष : – वैधर्म्यं नास्ति । पाठभेदा: सन्ति परं अर्थभिन्नता नास्ति ।

## अधिकरणं – द्वितीयम्

## दोष:

सूत्राणि ५ त: ११ पर्यन्तम्। अस्मिन् अधिकरणे त्रीणि उपाधिकरणानि सन्ति ।

१. रोगदोषयो: सामान्यम् ।

२. विकाराणां एकदेशप्रकोपणम् ।

३. शारीरदोषानुबन्ध: तथा अनुबन्ध्यानुबन्धविचार: एतेषामुपाधिकरणानुसारं विवेचनम् अधोनिर्दिष्टम् ।

१. **रोगदोषयो: सामान्यम्** । सूत्रं ५

चरक: – अतिबहुत्वात् व्याधय: अपरिसंख्येया: सन्ति । अपि तु दोषा: परिसंख्येया: सन्ति ।

– अत: यथा पूर्वाचार्यै: कथितं तथा विकाराणाम् उदाहरणार्थं सम्पूर्णरूपेण दोषवर्णनं कुर्म: ।

मानसिक: दोष: – रज: तम: च ।

–तेषां विकारा: काम: क्रोध: लोभ: मोह: ईर्षा, मान: मद: शोक: चित्तोद्वेग: भयं हर्ष: आदय:

शारीरदोष: – वात:, पित्तं, श्लेष्मा ।

तेषां विकारा: ज्वरातिसारादय: । अत्र दोषाणां सम्पूर्णतया विकाराणां च एकदेशेन वर्णनं कृतमस्ति।

चक्रपाणि: – एकैकदोषेभ्य: नैके विकारा: भवन्ति । अनेन अभिप्रायेण विकाराणाम् अपेक्षया (तुलनायां) दोषाणां संख्या अधिका न भवति । इत्यर्थ: दोषा: अनतिबहव: प्रत्युत विकारा: बहव: सन्ति ।'यथाचित्रम्' इति विशेषं पदं चरकाचार्येण योजितम् । अस्यार्थं: 'यथा वर्णितमस्ति तथा' । अस्य अभिप्राय : एवं भवति यत् पूर्वाचार्य: या: व्याधय: अधिकत्वेन वर्णिता: तावतानाम् एव वर्णनम् अस्मिन् तन्त्रे अस्ति । यत: सर्वासां व्याधीनां वर्णनम् अशक्यम् ।

अथवा अस्य अपर: अर्थ: अस्ति स: 'यथोचित' नाम यावतां व्याधीनां वर्णनम् उचितं तावताम् एव वर्णनं कृतमस्ति ।

– दोषा: अनतिबहव: तेन तेषां वर्णनं संपूर्णश: शक्यम् ।

गङ्गाधर: – रोगशब्देन या: व्याधय: अभिधेया: भवन्ति ता: अपरिसंख्येया: अपि तु रोगशब्देन ये दोषा: अभिधेया: भवन्ति ते संख्येया: सन्ति ।

– 'यथोचितम्' इति पाठ: । तस्य अर्थ: प्रायोभाविक: व्याधय: । या: व्याधय: प्राय: उत्पन्ना: भवन्ति तेषामेव वर्णनं कृतमस्ति । विकाराणाम् अपरिसंख्येयत्वात् प्रायोभाविकविकाराणामेव अंशत: वर्णनं कुर्म: तथैव दोषगणनाया: शक्यत्वात् तेषां नि:शेषं पूर्णतया वर्णनं कृतमस्ति ।

– प्रतिलोमतन्त्रयुक्त्याधारेण पूर्वदोषाणां निरवशेषं वर्णनं कृतमस्ति ।

योगीन्द्रनाथसेन – प्रकृतिसामान्यं (कारणसामान्यं) सतपि दोषाणां संख्येयत्वं व्याधीनां अपरिसंख्येयत्वं इति विरुद्धं वचनं नास्ति ।

– रोग: इति पदं व्याधिदोषाभ्यां पर्यायवाचकरूपेण योजितम् । अत: एक: एव रोग: दोषापेक्षया संख्येय: व्याध्यापेक्षया अपरिसंख्येय: इति वचनं विरुद्धं नास्ति किम् ? तत: पूर्वाधिकरणस्य वर्णनात् एतद् वचनं विरुद्धं नास्ति ।

– अत: व्याधीनां एकदेशेन प्रत्युत दोषानां संपूर्णं वर्णनं कृतमस्ति ।

ज्योतिषचन्द्र सरस्वति:– 'यथोचितम्' इति पाठ: अस्ति । परं टीका चक्रपाणिसमाना कृता अस्ति

यथोचितम् इति यथाविन्यस्तम् । यथा वर्णित: तथा इत्यर्थ: ।

– चिन्ताहर्षादय: भावा: वस्तुत: प्राकृता: सन्ति । परं यदि तेषां अतियोग: भवति तर्हि ते व्याधिकरा: विकारस्वरुपा भवन्ति ।

– दोषाणां संख्येयत्वात् ते शारीरमानसभेदेन व्याकृता: सन्ति ।

निष्कर्ष: – यथोचितम् – यथाचित्रम् इति पाठभेद: अस्ति । तस्य ऊहापोह: पाठभेदप्रकरणे कृत:।

**२) विकाराणां एकदेशप्रकोपम्** सूत्राणि ६ त: ९

चरक: – १) शारीरमानसदोषाणां त्रीणि प्रकोपणानि (हेतव:) सन्ति ।

असात्मेन्द्रियार्थसंयोग: प्रज्ञापराध: परिणाम:च

२) प्रकुपितेषु दोषेषु हेतुविशेषात् दूष्यविशेषात् च भिन्नानां प्रकाराणां विकारा: उत्पन्ना: भवन्ति । अत: एते विकारा: अपरिसंख्येया: ।

३) एता: शारीरमानसव्याधय: परस्परान् अनुवर्तमाना: परस्परान् अनुबन्धयेत् ।

४) रजतमसो: परस्परानुबन्ध: नियत: अस्ति । यत: विना रजसा तमस: क्रिया कर्तृत्वं न भवति ।

चक्रपाणि: – परिमित (संख्येय) दोषेभ्य: अपरिमिता: विकारा: कथं प्रादुर्भवन्ति इत्यस्य विवरणम् अधिकरण: अस्मिन् अस्ति ।

– हेतुवैशेष्यात् सैव दोष: विभिन्नेषु धातुषु प्रविश्य विभिन्नशक्तिसंयोगेन विविधा: व्याधी: उत्पादयति एतं (च. सू.) अष्टादशस्य संदर्भ: अतीतावेक्षण तन्त्रयुक्त्यनुसारं दत्त: ।

– यदा शारीरमानसज्वरा: चिरं तिष्ठन्ति तदैव ते परस्परान् अनुबध्नन्ति तथा यदा अचिरं एव उपतिष्ठन्ति तदा न अनुबध्नन्ति एतदेव 'अनुवर्तमाना:' इति पदेन स्पष्टीकरणीयम् अस्ति ।

– अनुवर्तमाना: इत्यस्य अपर: एक: अर्थ: अस्ति यत् शारीरमानसा: व्याधय: परस्पराणां बलं वर्धयन्ति । एष अनुबन्ध: बलाभिवर्धनं च अधोनिर्दिष्टम् अस्ति ।

अ) शारीरा व्याधि: ⟶ शारीरा व्याधि: ।

ब) शारीरा व्याधि: ⟶ मानसी व्याधि: ।

क) मानसी व्याधि: ⟶ शारीरा व्याधि: ।

ड) मानसी व्याधि: ⟶ मानसी व्याधि: ।

– शारीरा व्याधि: शारीरमानसव्याधीनां बलं वर्धयित्वा तान् अनुबध्नन्ति । तथैव मानसी व्याधि: शारीरमानसव्याधीनां बलं वर्धयित्वा तान् अनुबध्नन्ति ।

गङ्गाधर: – 'प्रकोपणम्' पदस्य अर्थ: वैषम्यस्य कारणम् ।

– विकारा: अपरिसंख्येया: सन्त: अपि तेषां प्रकोपका: हेतव: त्रय: एव । ज्वरादय: शारीरविकारा: कामादय: मानसविकारा: च उत्पन्ना: उत्तरकाले परस्परान् अनुबध्नन्ति । परम् एष नियम: न एकान्तिक: । कदाचित् ते अनुबन्धं न अपि कुर्यु: अनियत: अनुबन्ध: अस्ति ।

– नियत: तु एकान्तिक अनुबन्ध: । एकान्तिक अनुबन्ध: नित्यं नियत: अस्ति: प्रत्युत य: एकान्तिक: नास्ति स: अनुबन्ध: अनियत: अस्ति ।

उदाहरणार्थं – रजतमसो: परस्परानुबन्ध: नियत: अस्ति ।

– रज: विना तम: कार्यं कर्तुं न शक्नोति । विपर्ययतन्त्रयुक्त्यनुसारम् अस्य अर्थ: भवति यत् विना तम: रज: अपि कार्यं कर्तुं न शक्नोति ।

उदाहरणार्थं – रजसा प्राप्ताप्राप्त: मोह: उत्पद्यते प्रत्युत तमसा रागवृद्धि: भवति ।

योगीन्द्रनाथसेन – प्रकोपणं नाम हेतु: निदानम् इति । शेषा टीका शब्दार्थ:

ज्योतिषचन्द्र सरस्वति: – प्रकोपणं नाम प्रकोपकरणम् । अनुबन्धस्य अर्थ: संसृष्टभवनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

क) **शारीरदोषानुबन्ध:** सूत्राणि १० त: ११ पर्यंतम् ।

चरक: – एकस्मिन् अधिष्ठाने वसताम् शारीरदोषाणां समानगुणत्वात् सन्निपातसंसर्गौ भवत: । यत: दोषा: दूषयतां हेतूनां समानगुणानां भवन्ति ।

– अनुबन्ध: – स्वतन्त्र व्यक्तलिङ्ग यथोक्तसमुत्थानप्रशम भवति अनुबन्ध: ।

– अनुबन्ध: – परतन्त्र: अव्यक्तलिङ्ग: परसमुत्थानप्रशम भवति अनुबन्ध: ।

– यदा स्वतन्त्रलक्षणौ द्वौ दोषौ स्याताम् तदा तं संसर्ग: इति भणितव्यं यदा च त्रयोऽपि दोषा: परतन्त्रा स्यु: तदा तं परतन्त्र इति भणितव्यम् ।

– अनुबन्धानुबन्धानां विशेषभेदाभ्यां दोषाणां बहुविधा: भेदा: उद्भवन्ति । एवं दोषेषु व्याधिषु च नैकया कारणभिन्नतया उत्पन्नानां दोषाणां व्याधीनां च संज्ञा: प्रचलिता: सन्ति ।

चक्रपाणि: – अस्मिन् अधिकरणे शारीरदोषाणाम् अनुबन्ध: वर्णित: अस्ति ।

– एकाधिष्ठानीयानाम् – एकस्मिन् शरीरे वसतां दोषाणां सामीप्यात् दोषसंयोग: भवति । चक्रपाणिना अत्र 'प्रत्यासत्ति' इति पदं योजितम् । 'प्रत्यासत्ति' इत्यस्य अर्थ: सामीप्यम् । त्रयोऽपि दोषा: भिन्नगुणस्वरुपाणां सन्त: अपि एकशरीरे स्थित्वा कार्यं कुर्वन्ति । शरीरस्थे यच्चयावत्सु सर्वेषु अधिष्ठानेषु एते त्रयोऽपि दोषा: एकत्रतया वसन्ति कार्यं कुर्वन्ति च । एतदेव दोषाणां सामीप्यम् । अस्मिन् काले तेषां दोषाणां संयोग: भवति ।

– प्राय: शरीरदोषाणां विकृति: तद्समानगुणानां हेतुना एव प्रचलति । अस्य उदाहरणार्थं चक्रपाणिना आंशिक सन्निपातसंसर्गाणां उदाहरणानि दत्तानि सन्ति –

१) अम्ल: लवणम्, कटु एते पित्तकर: सन्ति । परं

अम्ल: – सकफ: पित्तकर: ।

लवणम् – सपित्तम् कफकरम् ।

कटु – सवात: पित्तकर: ।

एतादृश: तेषां संसर्ग: भवति ।

२) यद्यपि वसन्तऋतु: श्लेष्मकारक: तथापि आदानकालात् वातपित्तयो: विकृति: भवति ।

३) वर्षाऋतौ चयितस्य पित्तस्य शरदऋतौ सश्लेष्म: प्रकोप: भवति ।

४) ग्रीष्मे रुक्षत्वात् वातस्य चयनं भवति उष्णत्वात् स्वल्पतया पित्तस्य अपि चयनं भवति च ।

अनुबन्ध्य – अनुबन्ध विचार:

– 'स्वतन्त्र' इति पदेन स्वविकारोत्पत्त्याम् प्राधान्यं दर्शयितव्यम् अस्ति । अत: दोषा: स्वगुणसमानस्य विकारस्य उत्पत्तिं कुर्वन्ति ।

– स्वतन्त्र: दोष: प्रकोपसमये विकारम् उत्पादयति । प्रत्युत अस्वतन्त्र: वा परतन्त्र: दोष: स्वतन्त्रदोषस्य प्रकोपसमये तस्य बलेन प्रेरित: सन् विकृतिं करोति । अत: अनुबन्धदोष: प्रधानस्य अथवा अनुबन्ध्यस्य दोषस्य प्रकोपसमये विकृतिं करोति ।

– परतन्त्र: दोष: बलवान् न भवति अत: स्वलक्षणानि न प्रकटीकरोति । अपरस्य दोषस्य हेतो: केनचित् अनुगुणेन उत्पन्न: भवति तथा अपरस्य दोषस्य यदि चिकित्सां क्रियते तर्हि एष परतन्त्र दोष: स्वयमेव शाम्यति । उदाहरणार्थ –

शरदऋतौ श्लेष्मा पित्तप्रकोपककारणै: तथैव जलादीनां द्रव्याणाम् अम्लविपाकेन विकृत: भवति तत: स श्लेष्मा तिक्तघृतादि पित्तशामकचिकित्सया शाम्यति ।

– दोषानाम् अनुबन्ध्यानुबन्ध संज्ञानाम् अनुभारेण एव विविधानां व्याधीनां संसर्गसन्निपातादय: नामकरणं कृतमस्ति ।

गङ्गाधर: – शारीरदोषाणां ये गुणा: समाना: स्यु: तेषां गुणानां सन्निपात: (त्रयाणां दोषाणां विकृति:) संसर्ग: (दोषद्वयस्य विकृति:) च भवत: । प्राय: पदेन क्वचित् पृथक्दोषाणाम् अपि अभिपाता: सन्ति इति सूचयितव्यम् । तेन कोऽपि रोग: एकदोषज: नास्ति इति मतं प्रकटीभवति ।

– अग्रे गङ्गाधरेण त्रयाणाम् अपि दोषाणां गुणसाम्यविरुद्धते वर्णिते स्त: ।

साम्यता

| वात: | | पित्तम् |
|---|---|---|
| रौक्ष्यम् | – | ईषद् स्निग्धं अल्पं रौक्ष्यम् च |
| अतिलघुत्वम् | – | मध्यलघुत्वम् |
| सूक्ष्मत्वम् | – | सूक्ष्मत्वम् |
| चलत्वम् | – | सरत्वम् |
| संयोनिकं रौक्ष्यम् | – | कटुत्वम् |
| दारुणत्वम् | – | तीक्ष्णत्वम् |

| वात: | | श्लेष्मा |
|---|---|---|
| शीतत्वम् | – | शीतत्वम् |

| पित्तम् | कफ: |
|---|---|
| ईषत् स्निग्धम् | स्निग्ध: |
| मध्यगुरुत्वम् | गुरुत्वम् |
| द्रवत्वम् | द्रवत्वम् |
| अल्प पैच्छिल्यम् | पैच्छिल्यम् |
| अम्लत्वे मध्यस्निग्धत्वम् | मधुरत्वे स्निग्धत्वम् |

दोषगुणवैपरित्यम्

| वात: | पित्तम् |
|---|---|
| शीतत्वम् | उष्णत्वम् |
| रुक्षत्वम् | ईषत् स्निग्धत्वम् |
| लघुत्वम् | अम्लत्वे अवरलघुत्वम् कटुत्वे मध्यलघुत्वम् |
| अमूर्तत्वम् | द्रवमूर्तत्वम् |

| पित्तम् | कफः |
| --- | --- |
| ईषत् स्निग्धम् ईषद्रुक्षम् | स्निग्धत्वम् |
| उष्णत्वम् | शीतत्वम् |
| तीक्ष्णत्वम् | मृदुत्वम् |
| अम्लत्वे हीनगुरुत्वम् हीनलघुत्वम् | गुरुत्वम् |
| कटुत्वे मध्यलघुत्वम् | |
| अम्लत्वं कटुत्वं वा | लवणत्वं मधुरत्वं वा |
| सरत्वम् | स्थिरत्वम् |
| ईषत् पिच्छिलत्वम् ईषत् वैशद्यम् | पैच्छिल्यम् |

| वातः | कफः |
| --- | --- |
| रुक्षत्वम् | स्निग्धत्वम् |
| लघुत्वम् | गुरुत्वम् |
| सूक्ष्मत्वम् | स्थूलत्वम् , सान्द्रत्वम् |
| चलत्वम् | स्थिरत्वम् |
| वैशद्यम् | पैच्छिल्यम् |
| खरत्वम् | मसृणत्वम् |
| दारुणत्वम् | मृदुत्वम् |
| अमूर्तत्वम् | द्रवमूर्तत्वम् |
| नीरसत्वम् | मधुरत्वम् |

– एवं द्वयोः दोषयोः गुणवैपरित्यं सत् अपि ते परस्पराणां उपघातं कथं न कुर्वन्ति इति पूर्वपक्षः पुरतः स्थापितः अस्ति ।

– अस्याः आशङ्कायाः निरसनं दृढबलेन कृतम् । दोषाणां गुणाः परस्परविपरीताः अपि ते परस्पराणां नाशं न कुर्वन्ति ।

– दोषाः सहजसात्म्यवात् विषमहीनिवेति सर्वथोच्छेदकत्वा अभावार्थ केन ।

– त्रयः दोषाः दूषणद्रव्यविशेषेण स्वप्रभावात् प्रकुपिताः भवन्ति तथा च सन्निपातः भवति च । द्वौ दोषौ दूषणद्रव्यविशेषेण प्रभावात् प्रकुपितौ भवतः संसर्गः च भवति ।

– अनुबन्धअनुबन्ध्यस्य निरुक्तिः –

– अनु अल्पबलेन येन यो बलवान् बध्यते सो ऽ ल्पबलो ऽ नुबन्धः प्रबलः तु अनुबन्ध्यः ।

– व्यक्तलिङ्गात् स्वतन्त्र्यस्य तथा व्यक्तलक्षणानि गुह्यानि स्युः तर्हि तद् दोषात् समानहेतुना तद् विपरीत चिकित्सया च तस्य उपशमः अस्मात् स्वतन्त्र्यस्य ज्ञानं करणीयम् ।

– अनुबन्ध्यानुबन्धानां समन्वितेन दोषाणां बहुभेदाः भवन्ति ।

अ) एकदोषअनुबन्ध्याः एकदोषअनुबन्धाः च अथवा सन्निपातसंसर्गतः केचन दोषाः अनुबन्ध्याः केचन अनुबन्धाः एवं स्युः ।

ब) तथैव तदनंतरं बहुभेदाः नाम पुनः तेषां दोषाणां क्षयवृद्धित्वम् एकोलबकः द्वयोलबकः त्रयोलबकः इत्याद्यनुसारम् अधिकाः भेदाः भवेयुः ।

– एवं ६२ दोषभेदेषु मिलित्वा ४२ भेदाः अनुबन्ध्यानुबन्धविशेष्य कृतः सन्ति ।

– अष्टभेदाः अनुबन्ध्यकृतः अपि च द्वादशभेदाः मिश्ररुपाः सन्ति ।

| | |
|---|---|
| दोषभेदाः ६२ | अनुबन्ध्यानुबन्धविशेषकृताः ४२ |
| | अनुबन्ध्यकृताः ८ |
| | मिश्ररुपाः १२ |

शेषाटीका शब्दार्थः

योगीन्द्रनाथसेनः – अधिष्ठानसामान्यं सदपि निदानवैशेष्यात् दोषाणां विशेषाः अन्योन्यसंसर्गाः कथं भवन्ति! अस्य पूर्वपक्षस्य उत्तरम् – समानगुणत्वात् ।

दोषाः प्रकोपणं कुर्वतां हेतूनां समानस्वरुपस्य भवन्ति । अधिष्ठाननिदानयोः समानत्वात् दोषाणामपि सामान्यं भवति ।

सामान्यत्वात् ते परस्परेभ्यः संयुक्ताः भूत्वा समानस्य रोगस्य आरम्भकाः भवन्ति । अनुबन्ध्यः अनुबन्धः च अस्याः घटनायाः वैशेष्यम् ।

इत्यर्थः अधिष्ठाननिदानयोः सामान्यत्वं सदपि अनुबन्ध्यानुबन्धविशेषात् दोषाणां अन्योन्यसंसर्गे विशेषाः उत्पद्यन्ते ।

''स्वतन्त्रः स्वप्रधानः । न तु अन्यपरिवारः । अनुबन्धः अस्वतन्त्रः । अन्यपरिवारभूतः ।।''

– अनुबन्धस्य भिन्नाः हेतवः वा उपक्रमाः वा न सन्ति । प्रधानस्य हेतुना ते उत्पद्यन्ते तथा प्रधानस्य चिकित्सया अनुबन्धः अपि प्रशाम्यति । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः –

– एकाधिष्ठानीयानाम् एकत्र सञ्चितानाम् । एकहेतुसमुद्भूतानां वा हेतुगर्भविशेषणम् एतत् ।

– प्रायः पदेन नैकवारं एकोऽपि दोषः दुष्टः अस्ति । प्रतिवारं संसर्गः सन्निपातः च न भवतः इति स्पष्टीकृतम् ।

– दोषाणां परस्पराणाम् ये गुणाः समानाः सन्ति ते तद्समानां गुणानां हेतुत्वात् प्रकुपिताः भवन्ति ।

– स्वतन्त्रः स्वाधीनः न क्रियायां कमपि अपेक्षते । अनुबन्धस्तु स्वकार्यसाधने अनुबन्ध्यम् अपेक्षते

– शेषा टीका शब्दार्थः

निष्कर्षः – अस्य अधिकरणस्य सूत्रे एकं पाठभेदवैधर्म्यम् अस्ति । तस्य ऊहापोहः अग्रे कृतः अस्ति । शेषम् अन्यत् वैधर्म्यं नास्ति ।

## अधिकरणम् तृतीयम्

### अग्निः

सूत्रं द्वादशम् चरकः –

१) शरीरे बलभेदेन अग्निः चतुर्थः अस्ति – तीक्ष्णः, मन्दः, समः, विषमः ।

२) तीक्ष्णाग्निः – सर्वापचारसहः ।

मन्दाग्निः – तीक्ष्णाग्नेः विपरीतः ।

समाग्निः – यदि अपचारः कृतः तदा विकृतः भवति ।
अपचारः यदि न कृतः तर्हि प्रकृतिस्थः तिष्ठति ।

विषमाग्निः – समाप्तिः लक्षणविपरीतलक्षण युक्तः ।

३) एते चतुर्विधा: चतुर्विधय: अग्नि इति अदिष्टम् । एते चतुर्विधेषु पुरुषेषु सन्ति ।

४) समवायपित्तश्लेष्म्या: प्रकृतिस्थायां व्यक्त्यां अग्नि: राम: अस्ति ।

– यदा गर्भावस्थायाम् अग्नि अधिष्ठानं वातेन अभिभूतं तदा अग्नि: विषम: भवति ।

– यदा गर्भावस्थायाम् अग्नि अधिष्ठानं पित्तेन अभिभूतं तदा अग्नि: तीक्ष्ण: भवति ।

– यदा गर्भावस्थायाम् अग्नि अधिष्ठानं कफेन अभिभूतं तदा अग्नि: मन्द: भवति ।

चक्रपाणि:

– दोषभेदान् विकारभेदान् च कथयित्वा शरीर स्थित्यै कारणं भवत: अग्ने: भेदा: अस्मिन् अधिकरणे वर्णिता: ।

– 'शारीरेषु' इति पदेन सर्वशरीरगतस्य अग्ने: बोध: स्वीकरणीय: ।

– यदि प्रकारा: केवलं जठराग्ने: एव वर्णिता: तथापि तस्य स्वरूपानुसारस्य अन्येषाम् एव अग्नीनां स्वरुपं निश्चितं भवति । तदर्थं ग्रहणचिकित्सायाम् अग्निमवत् वर्णनं कृतम्

'तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मका: ।'

– वस्तुत: समाग्ने: वर्णनं प्रथमं कर्तव्यम् । परं तथा न कृत्वा तीक्ष्णाग्ने: वर्णनं प्रथमं कृतम् ।

– यत: समाग्नि: निर्विकारत्वे (विकाररहितत्वे) प्रधान: अस्ति । प्रत्युत तीक्ष्णाग्नि: ससर्वोपचारं सन् तस्मै अधिकं महत्वं न ददाति ।

– य: किञ्चिदपि अपचारं न सहते स: मन्दाग्नि:

– 'प्रकृतिस्यानां' नाम प्रकृतभावे स्थितानां दोषाणाम् अभिप्राय: अत्र अस्ति ।

गङ्गाधर: –

– कायाग्निजीवितत्वात् दोषप्रभवत्वम् अस्ति । अत: वैद्यानां कृते (भिषजां) कायाग्ने: भेदा: संज्ञा: च वर्णिता: ।

– सर्वापचारसह: सदसदत् भोजनमात्रामात्रातिशयसह: । योग्यायोग्यस्य भोजनस्य मात्रा वा अमात्रा अपि सहजतया सह्या नाम सर्वापचारसह: ।

– प्रभूतमात्रायां स्वीकृत: आहार: अपि शीघ्रं पाचयति इति तीक्ष्णाग्ने: लक्षणम् ।

– तीक्ष्णाग्नि: यदा अतिवर्धमान: भवति तदा तम् अत्याग्नि: वा भस्मक: इति संज्ञा दीयते ।

– अस्य विपरीतलक्षणस्य नाम 'अल्पापचारस्य अपि असह:' एतद् मन्दाग्ने: लक्षणम् ।

– यथाकालं मात्रावत् गृहीत: आहार: सम्यक् रीत्या पचति तं समाग्नि: इति वदन्ति ।

– 'समलक्षणविपरीतलक्षणं' स्वरुप: विषमाग्नि: अस्ति अस्य अर्थ: –

'अपचारानपचाराभ्यां न वा प्रकृतिं न वा विकृतिं भजते, कदाचित् सम्यक् पचति कदाचित् आध्मानादिकं कृत्वा पचति ।'

– अन्यत्र इति अन्यतन्त्रे अति तीक्ष्णाग्ने: वर्णनम् आगतम् –

अतिमात्रमजीर्णेऽपि गुरु चान्नमथाश्नत: । दिवापि स्वपतो यस्य पच्यते सोऽग्निरुत्तम: ।।

– भस्मकस्य अन्यतन्त्रीय सूत्रस्य वर्णनं कृतमस्ति ।

– विषमादिचतुराग्निवत् अत्यग्निभस्मकौ न प्राकृतौ । तेषाम् उत्पत्तिं जन्मानन्तरं भवति इति अत्यग्निभस्मकयो: व्याधिविशेष: अस्ति ।

– चतुर्विधाग्निवर्णनम्

– प्रकृतिस्थानां वातादीनां साम्यात् अग्नि: सम: भवति एवम् अविचारणीयम् । समदोषेभ्य: प्रकृतिस्थे गर्भे यदि वातपित्तश्लेष्मा: समा: स्यु: तर्हि स पुरुष: समप्रकृते: भवति तत: तस्य अग्नि: सम भवेत् ।–

– गर्भारम्भकाले येषु दोषा: यदि वृद्धा: वा क्षीणा: वा स्यु: तर्हि विकृतित: तेषाम् अग्नि सम: न भवति ।

– गर्भे वातादीनां समत्वं येन रूपेण स्यात् तदनुसारम् अग्रे दोषाणां लक्षणविस्तार: दृश्येत

– यदा गर्भे वातबाहुल्यं स्यात् तदा तस्य गर्भस्य अग्निआधिष्ठानं नाम ग्रहणीनाडी वाताभिभूता भवति । परिणामत: अग्नि: विषम: भवति । तथैव गर्भनिर्मितिसमये यदि ग्रहणीनाडी पित्तभिभूता जाता तर्हि अग्नि: तीक्ष्ण: यदि च श्लेष्माभिभूता तर्हि अग्नि: मन्द: भवति ।

<u>योगीन्द्रनाथसेन:</u>

– दोषव्याधीनां विविधानि प्रकृतिवैशिष्ट्यानि कथितानि । इदानीम् अग्नि:, शरीरस्थिते: प्रधानं कारणम्, तस्य वर्णनम् अधिकरणे अस्मिन् कृतम् ।

– सर्वापचारसह: असम्यक् अपि उपयुक्तम् आशु पचति ।

– तीक्ष्ण: अग्नि: अधिक: वृद्ध: तदा तम् अत्याग्नि: इति भणन्ति । मन्दाग्नौ सम्यक् आहारसेवनं यद्यपि कृतं तथापि आध्मानादीनि आमलक्षणानि दर्शयित्वा चिरात् पचयति ।

– य: यथाकालं सम्यक् अन्नस्य योग्यं पचनं करोति स सम: अग्नि: ।

– यदि अपचार: भूत: तदा विकरोति तथा अकृतअपचार: प्राकृत: भवति ।

– समाग्नये एव सममात्रस्थानां सर्वरसाणां सात्म्यं हितकरम् अस्ति ।

– समाग्ने: विपरीतलक्षण: विषमाग्नि: ।

– चतुर्विधा: अग्नय: – प्रकृतिस्थे पुरुषे समदोषत्वात् अग्नि: सम: अस्ति ।

– प्रकृति: नाम वातादीनां समत्वम् ।

– अग्न्याधिष्ठानं नाम आश्रय: इति ग्रहणी अस्ति ।

– अभिभूतभवनं नाम अपहतत्वम् ।

ज्योतिषचन्द्र सरस्वति:

– व्याधिमानं वर्णयता अग्निवर्णनं कृतमस्ति यत: कायचिकित्सातन्त्रे सर्वा: व्याधय: अभिदोषै: भवन्ति ।

– भेलसंहिताया: संदर्भ: – य: वैद्य: अग्निचिकित्सां करोति सैव कायचिकित्सक: ।

– कायाग्निव्याख्या भेलसंहितायाम् उक्ता –

''अथास्योष्मा तेजश्च शरीरस्थमाहारं पचत: ते कायाग्निरिति विद्यात् ।''

– 'शारीराग्नि' पदेन १३ अग्नीनां निर्देश: कृत: ।

– भूताग्निधात्वग्नीनां तद् तद् द्रव्यगतम् उष्मारूपत्वम् अस्ति । तद् पाचकाग्ने: एव तेजोरूपत्वम् ।
एष: पाचकाग्नि: सर्वेषां कायाग्नीनां मूलम् ।

– जाठराग्नि: शरीरावयवविशेष: अस्ति । तेन तस्यापि पोषणं शरीरस्य त्रिधातूनां माध्यमेन एव भवति ।

– शरीरस्य मूलं त्रिधातूनां (त्रिदोषाणां) एकैकवृद्धिसाम्यावस्थानुसारं शरीरस्य चातुर्विध्यं भवति । तेनैव कारणेन जठराग्ने: अपि चातुर्विध्यं सम्भवति ।

– बलभेदेन अग्निप्रकारा: भवन्ति । तन्मध्ये बलभेद: तद्तद् दोषाणाम् आधिक्यानुसारं भवति ।

– आहाररसेनैव सर्वेषाम् अवयवानां पोषणं भवति, इति न्यायेन जठराग्निः अपि शरीरावयवत्वात् तस्यापि पोषणं त्रिधातुसमवायरूपेण अन्नरसेन भवति ।

– आहाररसः विकृतः । तत्रस्थं त्रिधातूनां समवायरूपं विकृतम् । तदा परिणामस्वरूपतः अग्निदोषः उत्पद्यते ।

– चतुर्विधाग्निलक्षणानि अनुमानगम्यानि सन्ति ।

– सर्वापचारसहः मात्रातिमात्रिकमप्याहारं सुखेन जरयति ।

– अपचारः आहारस्य मिथ्यायोगः । आहारविधिविधानस्य त्यागः नाम अपचारः ।

– शरीरे त्रिधातूनां यथायोग्यं मानं तथा गुणतः प्राकृत्वं नाम समपरिणामः । एतमेव दोषसाम्यं वदन्ति । शरीरे पांचभौतिकसंघटनानुसारं पृथ्वीजलयोः महाभूतयोः भागाः सर्वाधिकाः सन्ति । तेन कफस्य मानम् अधिकम् अस्ति । तदपेक्षया वातपित्तौ न्यूनौ स्तः ।

– कफापेक्षया पित्तस्य अञ्जलिपरिणाममपि न्यूनमस्ति ।

षट् श्लेष्माणः पञ्च पित्तस्य । (च. शा. ७)

– एतद् मानम् शरीरोपादानभूतयोः कफपित्तयोः नास्ति । परं मूत्रपुरुषादीनां मलानां मानान्तर्गते एतयोः पित्तकफयोः वर्णनं कृतम् ।

– अग्न्यधिष्ठाने इति अग्न्यधिकरणके द्रव्ये ।

– अग्न्यधिष्ठानं स्वभावतः मानवशरीरस्य अन्तर्नाभ्यां भवति । तस्मै भेलसंहिताशारीर स्थानस्य सन्दर्भः दत्तः ।

नाभ्यां सोममण्डलं भवति
↓
सोममण्डलस्य मध्ये सूर्यमण्डलं भवति ।
↓
तस्मिन् सूर्यमण्डले प्रदीपवत् अग्निः भवति ।

–यथा आकाशस्थः सूर्यः स्वतेजसा सर्वायाः सृष्ट्याः विशोषणं करोति तथा नाभिसंस्थितः जाठराग्निः अन्नविशोषणं करोति ।

–यद्वत् गोमयं काष्ठं सूर्यकान्तमणिः शीघ्रं दहति तथा तद्वत् जाठराग्निः भुक्तस्य अन्नस्य पचनं करोति ।

– अग्नि प्रमाणम् – स्थूलकाय: प्राणी – यवमात्रम्

ऱ्हस्वकाय: प्राणी – तिलमात्रम्

कृमिकीटपतङ्गेषु – वायुमात्रम् (सन्दर्भ: भेल शारीरस्थानम्)

एवम् अग्न्यधिष्ठानमपि मूर्त: शरीरावयव: सन् तस्यापि पोषणं त्रिधातुसमवायरूपेण आहाररसेन भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति । अपि तु टीकाकारै: अग्निसन्दर्भे विशेषवर्णनं कृतमस्ति ।

## अधिकरणम् – चतुर्थम्

## प्रकृति:

चरक: – सूत्राणि १३ त: १८ पर्यन्तम् ।

– समप्रकृति: एवारोग्यम् । अत: समवातपित्तश्लेष्मा: प्रकृते: पुरुषा: भवन्ति । वातप्रकृति: पित्तप्रकृति: श्लेष्माप्रकृति: एतादृश्य: प्रकृतय: न सन्ति । तेन तेन दोषाधिक्येन सा सा दोषप्रकृति: अस्ति । विकृतदोष: कदापि प्रकृतिस्थ: न भवति । अत: एतादृश्य: प्रकृतय: न सन्ति । परं वातल: पित्तल: श्लेष्मल: च एते अप्रकृतिस्था: पुरुषा: सन्ति । एषा तु विकृतावस्था अस्ति चतुर्विधानां पुरुषाणां अनुप्रणिधाना: (पालनयोग्या:) निर्देशा: । समसर्वधातूनां सर्वाकारसमम् । दोषाधिक्यानुसारं वातलपित्तलश्लेष्मलेषु तस्य तस्य दोषस्य प्रतिकूलं कर्तव्यमेव श्रेयस्करं भवति एतस्य दोषप्रतिकुलहेतूस्वरुपस्य कर्तव्यस्य उपयोग: तावदेव करणीय: यावद् अग्नि: सम: भवति

– त्रयस्तु पुरुषा: भवन्ति आतुरा: – वातल: पित्तल: श्लेष्मल: ।

– तद् दोषाधिकस्य पुरुषे तद्दोषजा: व्याधय: अधिक्येन भवन्ति ।

– वातलपित्तलश्लेष्मलपुरुषेषु उद्भवन्ति लक्षणानि तेषां चिकित्सा च एतयो: वर्णनं कृतमस्ति ।

चक्रपाणि:

– विषमाहारोपयोगित्वात् – कोऽपि मनुष्य: तुलां गृहित्वा दोषा: समा: भवन्तु इति विचार्य आहारं न भक्षयति । तेन तुलाधारधृतमेव मनुष्येषु अस्य कस्य वा दोषस्य क्षय– च वृद्धि: च चलति एव ।

– दोषप्रकृति: नाम दृष्टदोषभावितप्रकृति: ।

– दोषप्रतिकुलयोगी–अस्य अर्थः दोषे प्रवृद्धे सति तेषां वृद्धगुणानां विपरितानां गुणानाम् आहारविहारस्य सेवनम् ।

– अग्निं समं स्थापयितुं दोषाधिक्यानुसारं यथोचितं कर्तव्यपालनं करणीयम् ।

– समप्रकृतेः व्यक्तिना समव्यायामादयः चेष्टाः समभेषजानि तथा ऋतुकालेन शोधनमित्यादिनि कर्तव्यानि करणीयानि ।

– बस्तिनियमाः – अस्य पदस्य द्वौ अर्थौ वर्णितौ स्तः ।

अ) बस्तिप्रयोगे कथिताः नियमाः पालनीयाः ।

ब) सिद्धिस्थाने कथितानां कर्मकालयोगररूपाणां बस्तिसंख्यानियमानां पालनं करणीयम् ।

– सुखशीलता – सततसुखसेवित्वम् ।

– श्लेष्मलेषु व्यक्तिषु चिकित्सार्थं 'रुक्षप्रायः' इति पदं योजितम् ।

– श्लेष्मनाशार्थं रुक्षगुणाः श्लेष्मस्य स्निग्धगुणस्य विपरितत्वात् हितकरमस्ति । प्रत्युत अतिमात्रास्थः रुक्षगुणः वातप्रकोपः धातूनाम् अपोषणकरः अस्ति । अतः तस्य सेवनमतिमात्रायां न करणीयम् । एष एव 'रुक्षप्रायः' इति पदस्य अभिप्रेतः अस्ति ।

– सर्वशश्चौपवासः – अस्य अर्थः सर्वप्रकारकम् उपवाससेवनम् । अत्र उपवासः इति पदं लङ्घनवाचकमस्ति ।

– चरकसूत्रस्थानस्य द्वाविंशेअध्याये लङ्घनस्य दशप्रकाराः कथिताः सन्ति । तस्य पालनं श्लेष्मलेन व्यक्त्या यथायोग्यं करणीयमिति आदेशः अस्ति ।

– सुखप्रतिषेधश्च सुखार्थम् – सुखार्थमिति आयातिसुखार्थम् । अस्य अर्थः भाविसुखार्थम् । सुखकरयोः आहारविहारयोः त्यागेन कफक्षयं भूत्वा भाविनिकाले आरोग्यरूपिणः सुखस्य प्राप्तिः भवति ।

<u>गङ्गाधरः</u> – पूर्वपक्षः –

– प्रथमं पूर्वपक्षः स्थापितः अस्ति यद् केचन ऋषयः वदन्ति विषमाहारस्य सेवनेन गर्भात् समप्रकृतेः प्रणिनः न उत्पद्यन्ते । तेन समः अग्निः अपि न भवति ।

– तथैव वातादिप्रकृतेः अनुबन्धेन द्वन्द्वजाप्रकृतिः तस्याः तत्स्वरुपी अग्निः च उत्पन्नः भवति ।

– खण्डनम् – परं सर्वतन्त्रेषु चतुर्विधाग्निं विहाय अन्येषां वर्णनाभावात् तेषाम् अग्निनां स्वीकार: मूलत: प्रमाद: गण्यते । तेन वातादिप्रकृतिवादं दूषयति ।

– अत: तस्य तस्य दोषस्य वातप्रकृत्यां वातस्य, पित्तप्रकृत्यां पित्तस्य, उत श्लेष्मप्रकृत्यां श्लेष्मस्य अन्यदोषापेक्षया मानाधिक्यात् तस्य दोषस्य अधिक्यं वर्तते ।

– एतेन दोषाधिक्येन भवन्ती विकृतिरूपा प्रकृति: इति वदन्ति । चरकेण पूर्वाध्याये उक्तम्

''दोषानुशयिता ह्येषां देहप्रकृति: उच्यते ।''

– यदि गर्भत: एषा दोषानुशायिनी विकृतरूपिणी प्रकृति: भूता तर्हि स: पुरुष: प्रकृतिस्थ: न भवति समप्रकृति: – येन येन मात्रेण वातपित्तश्लेष्मा: सन्ति तेन तेन मात्रेण बृहत्–मध्य–ह्रस्व आदिना स्वरूपेण पुरुष उत्पन्न: भवति । तथैव तेषां बलवान् समाग्नि: उत्पद्यते । मानाधिक्यस्य अल्पत्वात् सममानत्वं उत्पद्यते । अत: वातादिना क्षति: न भवति ।

– अत: विकृतित्वात् प्रकृतिस्थत्वं ज्ञातुमशक्यम् । तेन वातादिनाम् आधिक्यरूपिण: प्रकृतय: न सम्भवन्ति । अपि तु वातलादय: अप्रकृतिस्था: पुरूषा: उत्पद्यन्ते । ते न स्वस्था: भवन्ति ।

पूर्वपक्ष: –

१) एतेषु वातलादिषु अप्रकृतिस्थातुरपुरूषेषु तेन दोषस्वरुपेण विषम: वा तीक्ष्ण: मन्द: वा अग्नय: कथं भवन्ति ? समाग्नि: भवति वा न वा ?

२) समप्रकृत्यां विषम: वा तीक्ष्ण: वा मन्द: वा अग्नय: भवन्ति वा न वा ?

उत्तरपक्ष: –

अ) अनुप्रणिधानानि अनु: नाम उत्तरकाल: । प्र नाम प्रकाशार्थ: । अत: उत्तरकालं प्रकर्षेण प्रकृतिरूरपेण निधीयन्ते । वातादयाधिक्यसाम्यानि यै: तानि अनुप्रणिधानानि ।

ब) सर्वाकारसम: इति समसर्वधातुभ्य: कर्तव्यमस्ति ? सर्वाकारसम: नाम रसत: गुणत: वीर्यत: विपाकत: प्रभावत: मात्रात: कालत: देशत: सल्वत: सात्म्यत: दोषेभ्य: समप्रतिकर्म करणीयम् ।

क) दोषाप्रतिकूलयोगीनि नाम तस्य दोषस्य प्रतिकूलरसानां सेवनम् ।

ड) एतद् यद् अनुप्रणिधानं (कर्तव्यपालनम्) अस्ति तद् यावद् अग्नि: सम: भवन्ति तावद् करणीयम् ।

इ) अनन्तरम् अग्नौ समे भूते तत्समत्वं स्थिरीकर्तुं समकार्यं करणीयम् ।

– सुश्रुतस्य वचनमस्ति यत् ––

''प्रकोप: वा अन्यथाभाव: वा क्षय: उत्पन्न: न भवति तं प्रकृतिभावा: इति वदन्ति''

अनेन वचनेन वातलादिनां विषमाग्न्यादिनां साम्यकराय वचनाय विरोध: उत्पन्न: भवति ।

– यथा अप्रकृतिभूतानां कालप्रकर्षेण वृद्धि: वा क्षय: वा अन्यथाभाव: उत्पद्यते तथा गर्भत: ये प्रकृतिभूता: तेषां कालेन अपि वृद्धि: क्षय: वा अन्यथाभाव: उत्पद्यते । वातलादिनां धातुसाम्यम् उत्पाद्य विषमादिनाम् अग्नीनां समत्वकरणार्थम् अग्निरक्षणार्थं च सूत्ररुपेण वर्णितमस्ति ।

– वातलादिनां विषमाक्ष्याग्नीनां साम्यकरणार्थं दोषप्रतिकूल योगिअनुप्रणिधानस्य श्रेयस्करं सेवनं कृत्वा समाग्निं निर्माय सर्वरसाणां सात्म्यं सेवनीयम् । तथैव तेषां विषमाग्न्यादीनां साम्यकरणानन्तरं समाग्निपालनाय रसायनविशेषाणां भेषजानां प्रयोग: करणीय: । रसायनविशेषाणि भेषजानि प्रयोजितव्यानि ।

– अत: अग्रे वातलपित्तलश्लेष्मलेषु आतुरव्यक्तिषु अग्निसाम्यकरणार्थम् उपाया: वर्णिता: ।

– वातलादीनां विशेषविज्ञानं नाम विशेषानि लक्षणानि वर्णितानि सन्ति ।

– प्रथमं लिङ्गम् – १) वातलपित्तलश्लेष्मलेषु तस्य तस्य दोषस्य बलाधिक्यमस्ति ।

– द्वितीयं लिङ्गम् – २) वातलादिषु तद् दोषप्रकोपणसेवनेन क्षिप्तंतद्दोषस्य प्रकोप: भवति । यथा विषे विषजकृमीणां उत्पत्ति: भवति तद्वत् एतद् लक्षणम् उत्पद्यते । एतां प्रकृतिमपथ्यसेवनेन अधिका बाधा न भवति इति वचनमयुक्तमस्ति ।

अस्य अभिप्राय: एवम् –कुपथ्यसेवनेन अतिबाधा उत्पद्येत परं अप्रकृतिभूतदोषाधिक्यं प्रकृतिभूतदोषाधिक्यापेक्षया अधिकं बलवत् लक्षणकरं च भवति ।

– तृतीयं लिङ्गम् – ३) एकस्मिन दोषलेमध्येव्यक्ति: तद्दोषप्रकोपहेतुसेवनेन स दोष: क्षिप्त: प्रकुपित: भवति । परं अन्यौ द्वौ दोषौ एतावता शीघ्रतया प्रकृपितौ न भवत: ।

– चतुर्थंलिङ्गम् – ४) एतै: सर्वलक्षणै: शरीरउपतपति । नानात्मका: विकारा: उत्पद्यन्ते ।

– पञ्चमं लिङ्गम् –५) तेन तदनन्तरं बलादय: शारीरभावा: उपघ्नन्ति ।

| |
|---|
| प्रथमं लिङ्गम् – दोषाणां बलाधिक्येन वातलादयवस्था: । |
| ↓ |
| द्वितीयं लिङ्गम् – दोषप्रकोपकेण आहारेण तद् दोषप्रकोपा: । |
| ↓ |
| तृतीयं लिङ्गम् – अन्यस्य दोषद्वयस्य चिरात् विकृति: । |
| ↓ |
| चतुर्थं लिङ्गम् – नानात्मकै: विकारै: शरीरोपतापा: । |
| ↓ |
| पञ्चमं लिङ्गम् – बलादिशारीरभावानां उपघाता: । |

– एतद् गङ्गाधरस्य विशेष: वर्णनमस्ति । वातलादिनामवजयनं विस्तृतं वर्णितमस्ति ।

– बस्तिनियम: नाम दिनद्वयादीनां प्रतिनियमेन बस्तिप्रयोग: ।

– शेषाटीका शब्दार्थ:

<u>योगीन्द्रनाथसेन:</u>

– समवातपित्तश्लेष्मायुक्तव्यक्ति: प्रकृतिस्था भवति । इमं वचनम् आक्षिप्य पूर्वपक्ष: प्रस्थापित:–

मातु: आहारविहारमनुसृत्य गर्भस्य प्रकृति: निर्मीयते । मनुज: न कदापि तुलया मित्वा आहारसेवनं करोति । येन गर्भस्यप्रकृति: समदोष: भवेत् । मातु: विषमाहारविहारेण वातादीनां वैषम्यं भूत्वा तस्य दोषस्य उल्बणावस्थानुसारं प्रकृति: भवति ।

अत: विषमाहारोपयोगित्वात् केचन वातप्रकृतय: केचन पित्तप्रकृतय: केचन श्लेष्मप्रकृतय: च उद्भवन्ति ।

– अस्य पूर्वपक्षस्य खण्डनं चरकेण एवं कृतम् – यत् एष उपरिनिर्दिष्ट: विचार: पूर्णत: योग्य: नास्ति ।

– वैद्या: समवातपित्तश्लेष्मावस्थाम् 'अरोग:' इति वदन्ति । अत: एषा समप्रकृति: एवारोग्यम् । एतदर्थम् एव भेजषप्रवृत्ति: अस्ति । एषा भेजषप्रवृत्ति: इष्टरूपा अस्ति ।

– 'इष्टरूपा' – इदं मह्यमिष्टम् इदं न इति मत्वा  प्रवृत्ति: भवति । तै: इष्टरूपहेतुभि: चिकित्सा क्रियते ।

– आरोग्यम् इष्टं सुखरूपत्वात् । रोगा न इष्टं दु:खरूपत्वात् । वातादीनां वैषम्यं विकृति: । विकृति: रोग: । तद्विपर्ययात् प्रकृति: आरोग्यम् । आरोग्यार्थं भिषज: प्रवर्तन्ते ।

– आरोग्यं प्रकृति: । सा च वातादीनां साम्यलक्षणा ।

– अत: वातादीनां साम्यलक्षणस्य समप्रकृति: अस्ति । अत: वातप्रकृति: पित्तप्रकृति: श्लेष्मप्रकृति: वा एवं न सन्ति । यत: ता: दोषवैषम्यजनिता: सन्ति ।

– तस्य तस्य दोषस्य आधिक्यभावेन सा सा दोषप्रकृति: उत्पद्यते । विकृतविषमदोषेषु प्रकृतिस्या इति साम्यलक्षणप्रकृति: उत्पदितुमशक्यम् ।

– अत: वातलादय: प्रकृतय: न सन्ति । ते अप्रकृतिस्था: ।

– अनुप्रणिधानानि इति अनुष्ठानानि । अन्नपानाद्युपयोगा: ।

– वातलपित्तलश्लेष्मला: एते त्रिविधा: पुरुषा: आतुरा: भवन्ति । यत: ते अप्रकृतिस्था: ।

– एनं तन्त्रमनुसृत्य वातादीनां साम्यलक्षणा इति प्रकृति: भवति । तेन समवातादय: प्रकृतिस्था: स्वस्था: सन्ति । एकौ एव वातलादया: आतुरा: अप्रकृतिस्था: सन्ति च ।

– परमन्येषु तन्त्रेषु ते प्रकृतिस्था: इति उच्यते । उदाहरणार्थं (सु. शा. ४)

– पञ्चदशेश्लोके विज्ञानमिति पदं लक्षणवाचकम् अस्ति ।

– बस्तिनियम: इति बस्तिविधौ कथित: आचार: एव । शेषाटीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:

– परं तस्य खण्डनं कृत्वा स्वमतस्थापना कृता अस्ति ।

– अनुप्रणिधानानि भागश: प्रयत्ना: श्रेयस्कराणि आरोग्यादानि ।

– तन्त्रान्तरीयाणां भिषजानित्यमादरे षष्ठी । शेषाटीका अविशेष: ।

निष्कर्ष: – प्रकृति: इति अधिकरणे वैधर्म्यं नास्ति ।

## पञ्चमम् अधिकरणम्

## राज्ञः प्राणपतिः

चरकः – राज्ञः प्राणपतेः गुणाः । – सर्वरोगविशेषज्ञः ।

– सर्वकार्यविशेषविद्

– सर्वभेषजतत्वज्ञः ।

चक्रपाणिः – विमानस्य षष्ठे अध्याये वर्णितेन ज्ञानेन एव वैद्यः सर्वरोगाणां ज्ञाता भवति ।

– प्राणान् पाति रक्षतीति प्राणपतिः । प्राणरक्षणं करोति इति प्राणपतिः ।

गङ्गाधरः – विमानस्य षष्ठे अध्याये वर्णितानां विषयानां ज्ञानस्य फलम् इति वैद्यः प्राणपतिः भवति

योगीन्द्रनाथसेनः – शब्दार्थवर्णनम् ।

ज्योतिषचन्द्र सरस्वतिः – प्राणपतिः नाम प्राणरक्षकः राजवैद्यः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## षष्ठम् अधिकरणम्

## अध्यायस्य उपसंहारः

चरकः – अध्यायस्थानां विषयाणां संग्रहः सूत्ररूपेण वर्णितः अस्ति ।

चक्रपाणिः – जरण इति शब्दस्य अर्थः अग्निः अस्ति ।

गङ्गाधरः –

– मानसदोषसंख्या, मानसविकारसंख्या, शारीरदोषसंख्या, शारीरविकारसंख्या च एतेषां वर्णनं दोषाधिकरणे कृतमस्ति ।

– वातलादीनां प्रकृतिस्थापनं नाम विकृतदोषाणां आत्मकप्रकृतिप्रशमनेन समवातपित्तश्लेष्मरूपेण प्रकृतिस्थं करणीयम् । शेषाः शब्दार्थाः ।

योगीन्द्रनाथसेनः – शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – अध्यायार्थं निवेद्य तं समापयति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## सप्तमोऽध्याय: ।

## व्याधितरुपीयं विमानम् ।

अध्यायेऽस्मिन् चत्वारि प्रकरणानि अधिकरणानि सन्ति ।

१) व्याधितरुपाधिकरणम् ।

२) कृमि – अधिकरणम् ।

३) क्रिमिकोष्ठचिकित्सा ।

४) उपसंहार: ।

### अधिकरणम् प्रथमम्

### व्याधितरुपम्

चरक: –

– ज्ञानावयवेन पूर्णं ज्ञानं न भवति । एतादृशेन ज्ञानावयवेन रोगज्ञानम् उपक्रमयुक्तिज्ञानं च एतयो: विप्रतिपत्ति: (मिथ्याज्ञानं) भवति ।

– एतदर्थम् 'व्याधितरुपम्' इति वर्णितस्य विषयस्य उदाहरणमस्ति ।

व्याधितरुपे द्विविधे ।

अ) गुरुव्याधितम्  ब) लघुव्याधितम्

अ) गुरुव्याधितम् –

व्याधि: गुरु: अस्ति । परं सत्वबलस्य संपन्नतया गुर्विणी सा लघुव्याधियुक्ता भाति ।

ब) लघुव्याधितम् –

सत्वादिनाम् अधमत्वतया रुग्ण: गुरुव्याधित: भाति ।

– य: अकुशल: वैद्य: संपूर्णतया सर्वथा परीक्षणं न कृत्वा केवलं एकया एव परीक्षया निदानं (परीक्षां) करोति स: वैद्य: रोगज्ञानम् उपक्रमयुक्तिज्ञानं च एतयो: अध्यवसायं कर्तुं न शक्नोति ।

– न हि ज्ञानावयवेन कृत्स्ने ज्ञेये विज्ञानं उत्पद्यते ।

– विप्रतिपन्नास्तु खलु रोगज्ञाने उपक्रमयुक्तिज्ञाने चापि विप्रतिपद्यन्ते ।

चक्रपाणि: –

– व्याधित: नाम य: व्याधिग्रस्त रुग्ण: स: ।

तस्य यद्रुपं / लक्षणं तं व्याधितरुपम् इति संज्ञा योज्यन्ते ।

– उपक्रमयुक्ति: नाम भेषजप्रयोगस्य विकारेण समाना योजना ।

– य: अल्पज्ञ: वैद्य: सर्वप्रकारे: परीक्षणं न कृत्वा केवलं एकेन ज्ञानसाधनेन, एकदेशज्ञानेन च परीक्षणं करोति स रुग्णस्वरुपविषये निश्चितमेव ज्ञानं प्राप्तुं न शक्नोति ।

– चक्रपाण्यानुसारं चरकेण अधोलिखिलानि पदानि विशेषार्थेन उपयोजितानि सन्ति ।

अ) उदीरणम् – प्रकोपवाचकम् ।

ब) अग्रम् – परिणामवाचकम् ।

क) बाल: – अल्पज्ञ: ।

ड) रुपम् – सादृश्यत्वम् ।

–'चक्षुषैव परीक्ष्य' इदं वर्णनं ज्ञानसाधनस्य उपलक्षणम् स्वरुपेण अस्ति । अस्य अर्थ: एकदेशज्ञानम् एकया एव परीक्षया परीक्षणम् ।

– अध्यवस्यन्ता: इति निश्चयं कुर्वन्त: ।

– गुरुव्याधित: – गुरुव्याधियुक्तसदृश: ।

– व्याधित: – व्याधि: जाता यस्य स व्याधित:

– व्याधितरुपम् – व्याधितस्य रुपं यथौ व्याधितरुप व्याधितसदृश: ।

– 'अयोग:' इति पदे अतियोगमिथ्यायोगयो: अपि अन्तर्भाव: कार्य: । – स्वसंज्ञा तंत्रयुक्ति: ।

गङ्गाधर: –

– द्वौ व्याधितरुपौ इति विषयस्य वर्णनस्य प्रयोजनम् ।अकुशल: वैद्य: अध्यवसायं कर्तुं न शक्नोति

– विदितवेदितव्या: – विदिता सर्वथा विज्ञाता । वेदितव्या ज्ञेया । शेषा टीका अविशेषा ।

योगीन्द्रनाथसेन –

– सर्वं विवेचनं चक्रपाणिवत् । केषांचन पदानां व्याख्या: भिन्नया पद्धत्या लिखिता: सन्ति ।

– विदितवेदितव्य: – सर्वप्रमाणकुशल: । य: वैद्य: त्रिविधप्रमाणानां साहाय्येन ज्ञानम् अधिगत्य तदनुसारम् आचरति ।

– अकुशल: – प्रत्यक्षप्रमाणेन केवलं परीक्षमाण: ।

– चक्षुषैव दृष्ट्वा – केवलं प्रत्यक्षप्रमाणेन परीक्षणम् ।

– अत्र चक्षु: इति उपलक्षणं प्रमाणवाचकं पदम् अस्ति ।

– अग्रम् – पदमेतत् विशेषार्थम् । अस्य अभिप्रेतार्थ: तु चक्रपाणिसमान: ।

– विप्रतिपत्ति: – व्याधे: बलाबलत्वज्ञाने प्रमाद: संभवति ।

– सम्प्रतिपत्ति: – सम्यक् ज्ञानसंभव: ।

– योगीन्द्रनाथसेनेन स्पष्टम् उक्तम् यत् एकेन प्रमाणेन सर्वं ज्ञानं भवतुं नार्हति ।

– 'अवयव:' इति पदं एकदेशवाचकम् ।

– विप्रतिपत्ति: संप्रतिपत्ति: च एतयो: द्वयो: उदाहरणं दत्तम् ।

– उदीरणम् नाम शोधनस्य अयोगेन प्रकोप: ।

ज्योतिषचन्द्र सरस्वति: –

– चिकित्साया: प्रारम्भे एव व्याधे: लघुतागुरुतयो: निर्णय: आवश्यक: अत: इदम् अधिकरणं वर्णितम् ।

– अकुशल: इति असर्वज्ञा: ।

– ज्ञानावयवेन – एकेन इन्द्रियज्ञानेन एकेन वा प्रत्यक्षादिप्रमाणान्तरेण ।

– ज्ञेयं इति पदं पदार्थवाचकमस्ति ।

– उपक्रमयुक्ति: नाम चिकित्साप्रयोग: ।

– विप्रतिपत्ति: नाम ज्ञानस्थ: प्रमाद: । एष: प्रमाद: दृष्टान्तेन कथित: ।

– 'तु' अव्ययं पक्षान्तरम् इत्यर्थेन उपयोजितम् ।

निष्कर्ष: – अभिप्रेतार्थे किमपि वैधर्म्यं नास्ति । शब्दार्थे वर्णनपद्धत्यां च अल्पा भिन्नता ।

स्वमतम् –१) चतुर्षु टीकाकारेषु साधर्म्यम् ।

२) 'चक्षु:' पदं चरकेन साधनवाचकम् उपयोजितम् इति अस्मिन् अधिकरणे स्पष्टं भवति ।

सूत्रस्थानप्रथमाध्याये आयुर्वेदावतरणम् इति अधिकरणे चरकेन स्थानद्वये चक्षु: पदं उपयोजिताम् । – सृष्ट्यवस्थितानां रोगाणां उच्चाटनं कुर्वत् शास्त्रम् । उपाय: वा इन्द्रसमीपे अस्ति इति सर्वै: ऋषिभि: ध्यानचक्षुषा नाम ध्यानरुपेण साधनेन ज्ञातम् । अपि त इन्द्रात् सामान्यादीनां षट् कारणानां ज्ञानं प्राप्य तस्याधारेण ज्ञानचक्षुषां साहाय्येन अस्य शास्त्रस्य रचना कृता अस्ति । एतद् स्पष्टीकरणम् विमानस्थाने सप्तमे अध्याये चक्षु: इति पदस्य टीकाकारै: कृतं स्पष्टीकरणं सिद्धं करोति ।

३) अत्र चरकेण उपक्रमयुक्ति: इति एकं विशेषं पदं योजितम् । विकारानुसारं नाम रोगस्वभाव: रोगबलं दोषबलं हेतु: हेतुबलम् अधिष्ठानम् एतान् घटकान् विचार्य एव पश्चात् चिकित्सा प्रयोग: करणीय: इत्येव उपक्रमयुक्ति: इत्येव मतं टीकाकारै: प्रकटितम् ।

४) 'अयोग' पदं अत्र विशेषार्थेण उपयोजितम् । चक्रपाणिना अयोग इत्यस्य असम्यक् योग: इति व्याख्यां कृत्वा तस्मिन् अतियोग मिथ्यायोगयो: समावेश: करणीय: इति वर्णनं कृतम् । अपि तु योगेन्द्रनाथसेनेन अयोग: शब्देन दोष: दूष्यं च एते अविचार्य अयोग्यपद्धत्या योजित: भेषजप्रयोग: इति वर्णितम् । तत्वत्त: अस्मिन् वर्णने वैधर्म्यं नास्ति ।

ज्योतिषचन्द्रसरस्वतीना अयोगे योगविरुद्धम् व्याख्यया अयोगातियोगयो: समावेश: अत्र कृत: अस्ति । अतियोगेन रुग्णस्य विनाश: अयोगेन महान् क्लेश: च उत्पद्यते इति ज्ञातव्यम् ।

## अधिकरणम् – द्वितीयम्

## कृमि अधिकार:

अस्य अधिकरणस्य आगामिनि अष्ट उपाधिकरणानि सन्ति ।

अ) सामान्य वर्णनम्

आ) समुत्थानम्

इ) स्थानम्

ई) संस्थान – वर्ण:

उ) नाम

ऊ) प्रभाव:

ए) चिकित्सा सूत्रम्

एतै: अधिकरणै: ऊहापोह: क्रियते ।

## उपाधिकरणम् अ) सामान्यं वर्णनम्

चरक: – गुरुलघुव्याधितवत् केषांचन विकाराणां निर्णया अकुशलाय वैद्याय कठिनम् भवति । तत्र 'कृमि' इति विशेष: ।

– कृमय: शरीरे बाह्याभ्यन्तरगतय: तथा अतिसूक्ष्मा: सन्ति तेन एकनैव परीक्षणेन (ज्ञानावयवेन / एकदेशेन) तस्य निश्चयपूर्वक: निर्णय: अशक्य: । अत: कृमिस्पष्टीकरणं कृतम् ।

–सहजकृमय: विहाय व्याधिकरा: विशंति कृमय: सन्ति । एतेषां नामोल्लेख: सूत्रस्थाने १९ अष्टोदरीये अध्याये आगच्छति ।

– ते कारणभेदेन चतुर्विद्या: । पुरीषज: श्लेष्मज: शोणितज: मलज: च ।

– अत्र मल: बाह्य: आभ्यन्तर: च इति द्विविध: । तत्र बाह्यमले उत्पद्यमाना: कृमय: मलजा: इति संज्ञां आवहन्ति।

चक्रपाणि: – चक्रपाणिना कृमीनां वर्णनं वैकारिकावैकारिकौ इति प्रकारद्वयेन कृतम् ।

– शरीरे अवैकारिका: सहजस्वरुपिण: शरीरोपकारका: कृमय: भवन्ति तेषां संख्या अपरिसंख्येया ।

– वैकारिकाणां कृमीणां प्रकृति नाम कारणानुसारं चत्वार: प्रकारा: विशंति संख्या च अस्ति ।

– कृमिसंज्ञा: स्वशास्त्रव्यवहारसिद्धा: देशान्तरप्रसिद्धा: च सन्ति ।

गङ्गाधर: – गुरुलघुव्याधितवत् या व्यक्ति: कृमिव्याधिता अस्ति तं अकृमिव्याधितं मत्वा तस्मै कृमिचिकित्सा न क्रियते चेत् स: प्रमाद: भवति रोगोच्छेद: न भवति च ।

– अत: कृमिव्याधितस्य हेतु: चिकित्सादीनां वर्णनं अस्मिन् अधिकरणे वर्तते ।

– अवैकारिकत्वात् सहजकृमीणां वर्णनं नास्ति ।

योगीन्द्रनाथसेन: – सशरीरं उत्पद्यन्ते ते सहजकृमय: ।

– शरीरसहजाता: अन्येऽपि कृमय: सन्ति सहजतया अवैकारिका: ते न उच्यन्ते ।

ज्योतिषचन्द्र सरस्वति: – अनेन सहजकृमिविषये अतीव मूलगामि वैशिष्ट्यपूर्णं च विवेचनम् अस्ति

– शरीरं जगत्वत् नानाविधानां सूक्ष्मातिसूक्ष्माणां कृमीणां आश्रयस्थानम् । एते कृमय: प्राकृते शरीरे कदाचित् विकारोत्पत्ति: कर्तुं न शक्नुवन्ति । यथा उषरभूम्यां उपतप्तानि बीजानि अङ्कुरितानि न भवन्ति । अत: ते सहजकृमय: न व्याधिकरा: ।

एते सहजकृमयः शरीरसहजाताः देहं व्याप्नुवन्ति । व्याधिं उत्पादवितुम् असमर्थाः अतः अस्मिन् तन्त्रे तेषां विवेचनं न कृतम् ।

– सद्यःकाले प्रतीच्यविज्ञानवादिनः यन्त्रसाहाय्येन व्याधिगताः केचन कृमयः चर्मचक्षुवत् द्रष्टुं समर्थाः।

– प्रतीच्यविज्ञानवादीनां मतेन दंशकृम्यादयः मानवशरीरं संक्रम्य तत्स्वरुपान् व्याधीन् उत्पादयन्ति । एतेषां कृमीणां नाशेन व्याधिनाशः भवति ।

– एतादृशं वर्णनं आयुर्वेदे स्पष्टतया नास्ति । किम् एषः आयुर्वेदस्य न्यूनतः दोषः ?

अस्य उत्तरम् – सहजकृमीणां उल्लेखः अस्ति । परं तेषाम् असाधारणेन कारणेन व्याधिनिदानदृष्ट्या ते महत्तरः न सन्ति । अतः तेषां विस्तृतिः नास्ति ।

– तेषां कृमीणां सद्भावः सदपि एतैः व्याध्यनुत्पत्तिदर्शनात् तेषां निदानत्वं न स्वीकार्यम् ।

– अस्माकं देशः अत्युष्णप्रधानः । तेन कृमीणामुत्पत्ति बाहुल्यम् अस्ति । तेन देहेषु तेषां संक्रमणं संपूर्णतया न शक्यं भवति ।

– अतः तेषां संपूर्णोच्छेदः स्वास्थ्यरक्षणसंकल्पनायाम् अयोग्यः अस्ति ।

– यथा अयोग्यायां भूम्याम् उत्तमं बीजवपनं सफलं न भवति । भूमिः एव उत्तमं धान्यं उत्पद्यते । तदनुसारं समधातुयुते शरीरे व्याध्योत्पादकानां कृमीणां संक्रमणं भूत्वा अपि व्याधयः न उत्पद्यन्ते इति दृश्यते ।

तत् तत् प्रकाराणां व्याध्यनुकूलशरीरेषु तत् तत् कृमीणाम् आधिक्यं लभते ।

– तथैव प्रतीच्यशास्त्रे एषः प्रश्नः अनुत्तरितः यद् किम् व्याधिनिर्मितौ पूर्वं धातुवैषम्यम् अनन्तरं कृमिबहुलत्वं अथवा पूर्वं कृमिबाहुलत्वम् पश्चात् व्याधोत्पतिः ।

– एवं आयुर्वेदशास्त्रे न वर्णितः 'सहजकृमिनिदानं च' इति विषयदोषः दुर्लक्षणीयः न तावत् महत्वम् अर्हति । सूचीकटाहन्यायेन प्रथमं मलजकृमीणां वर्णनम् अस्ति ।

निष्कर्षः – प्रथमं सामान्यं वर्णनम् उपाधिकरणे वैधर्म्यं नास्ति ।

– ज्योतिषचन्द्रसरस्वतेः सहजकृमिविषये विशेषा टीका ।

## उपाधिकरणम् आ) समुत्थानम्

चरक: – मलजम् – मृजावर्जनम्

रक्तजम् – कुष्ठसमानम्

श्लेष्मजम् – क्षीरं गुड: तिल: मत्स्य: आनूपमांसम् पिष्टान्नं कुसुम्भस्नेह: अजीर्ण पूति क्लिन्नसंकीर्णविरुद्धम् असात्म्यभोजनम् ।

पुरीषजम् – श्लेष्मजं कृमिसमानम् ।

चक्रपाणि: – परमान्नं पायसम् ।

– संकीर्णभोजनं घृणाविषयमलादिमिश्रितव्यञ्जनादिभोजनम् ।

गङ्‌गाधर: – मृजावर्जनम् गात्रमार्जनविधानम् ।

– रक्तजकृमीणां निदानं कुष्ठसमानं अस्ति नाम एते कृमय: कुष्ठस्य हेतुस्वरुपा: इति स्पष्टम् ।

योगीन्द्रनाथसेन: – समुत्थानं निदानम् ।

– मृजा इति शरीरशुद्धि: ।

– कुसुम्भस्नेह: कुसुम्भतैलम् ।

– क्लिन्नभोजनं क्लेदकृत् द्रव्याणाम् अभ्यवहार: ।

– संकीर्णभोजनं हिताहितयो: ऐकध्यं भोजनम् ।

ज्योतिषचन्द्र सरस्वति: – पिष्टान्नम् पिष्टतण्डुलनिर्मितम् अपूपादिकम् ।

– परमान्नं क्षीर तण्डुलशर्करापक्वम् ।

– कुसुम्भस्नेह: कुसुम्भबीजतैलम् ।

– पूतिभोजनं पर्युषितत्वात् विरसं विगन्धश्च भोज्यम् ।

– क्लिन्नभोजनं तु अतिपूतित्वात् गलितम् ।

निष्कर्ष: –

१) चक्रपाणे: गङ्‌गाधरस्य च विशेषा टीका नास्ति ।

२) संकीर्णभोजनस्य व्याख्या चक्रपाणिना योगीन्द्रनाथ सेनेन च कृता । स्थूलत: तस्मिन् वैधर्म्यं दृश्यते । तस्य ऊहापोह: निर्णय: च अग्रे कृत: अस्ति ।

## उपाधिकरणम् इ) स्थानम्

चरक: – मलज:– केशश्मश्रुलोमपक्ष्मवासांसि ।

शोणितज: – रक्तवाहिनी धमनी

श्लेष्मज: – आमाशयम्

पुरीषज: – पक्वाशयम्

– पुरीषजा: कृमय: यदा मात्रायां गुणिता: तदा ते आमाशयं गच्छन्ति ।

उद्गारनि:श्वासौ पुरीषगन्धबाधितौ इति लक्षणं उत्पादयन्ति ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – पक्वाशयो नाभेरध: ।

योगीन्द्रनाथसेन: – केश: शिरोरुह: । श्मश्रु मुखजातं लोम । लोम अन्यत्रजातम् । पक्ष्म अक्षिलोम – वास: वस्त्रम् । पक्वाशय: नाभेरधस्तात् गुदस्योपरि ।

ज्योतिषचन्द्र सरस्वति: –'वासांसि' इति वस्त्रम् पदेन अनुक्तानां शय्यादीनां घटकानामपि मलजानां कृमीणां स्थाने समावेश: भवेत् धमनी शब्द: शिरार्थक: । अत्र ज्योतिषचन्द्रसरस्वतिना शिरा पदं लौकिक भाषाया: veins नलिका इत्यर्थेन योजितम् ।

– आमाशय: भुक्तद्रव्यस्य प्रथमपरिणतिस्थानं महास्त्रोतस: स्थूलतमो भाग: ।

– श्लेष्मजा: कृमय: संख्यागुणितज्ञ: चेत् अन्नवहस्त्रोतसां मुखनासाभ्य: ऊर्ध्वभागे बहिरागच्छन्ति । तथैव अधोभागे गुदात् निर्यान्ति ।

– पुरीषजानां कृमीणां स्थानं पक्वाशय: इति कथितम् । पक्वाशय: इति पदेन केवलं मलस्थानं स्थूलान्त्रम् इत्येव अभिप्रेतम् ।

– पुरीषजानां कृमीणां गुणनं भवेत् चेत् ते गुदमार्गेण विसर्जिता: भवन्ति । यदा ते उर्ध्वगा: भवन्ति तदा आमाशयाभिमुखा: उद्गारादीन् मलगन्धेन बाधयन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

– ज्योतिषचन्द्रसरस्वते: टीका विशेषा अस्ति ।

– योगीन्द्रनाथसेनस्य कृता केशादीनां परिभाषा विशेषा ।

## उप अधिकरण ई) संस्थानवर्णानि – कृमि संस्थानम् वर्ण:

चरक: –

मलज: – अणु: तिलाकृति: बहुपाद: कृष्ण: शुक्ल:

शोणितज:– अ) अणु: वृत्त: अपाद: ताम्र: आ) सूक्ष्मत्वात् अदृश्य:

श्लेष्मज: – अ) पृथु: ब्रध्न: श्वेत: आ) वृत्तपरिणाह: गण्डुपदाकृति: श्वेतताम्रावभास: च

इ) अणु: दीर्घा: तन्त्वाकृति: श्वेत:

पुरीषज: – अ) सूक्ष्मवृत्तपरिणाह: दीर्घ: ऊर्णांशुसंकाश: श्वेत:

आ) स्थूलवृत्तपरिणाह: श्यावनीलहरीतपीत

चक्रपाणि: – अविशेषा टीका ।

गङ्गाधर:

– संस्थानम् इति आकार: ।

– रक्तजकृमिणि: केचित् कृमय: सूक्ष्मत्वेन अदृश्य: अस्ति । अस्मिन् विपर्यय: एत् एव यत् केचित् कृमय: दृश्य: अपि सन्ति ।

– अस्मिन् सन्दर्भे गङ्गाधरेण वाक्यशेषविपर्ययौ तन्त्रयुक्त्यो: उपयोग: कृत: ।

– संस्थानं तथा वर्ण: एतयो: अनुसारेण श्लेष्मज: कृमय: त्रीणि प्रकाराणि सन्ति । तेषां सप्तनामानि सन्ति । उतं पुरीषजकृमिणां संस्थानवर्णानुसारेण द्विप्रकारौ स्त: ।

योगीन्द्रनाथसेन:

– परिभाषाणाम् सविस्तरं वर्णनं कृतम् ।

ज्योतिषचन्द्रसरस्वति:

– श्लेष्मजकृमय: दीर्घाणि सन्ति । क्वचित् स्थाने द्वित्रियामानि अपि सन्ति

श्लेष्मजकृमिणां प्रकारा:

– ब्रध्नसदृशा: किंचिलुकसदृशा: तन्तुसदृशा: ।

निष्कर्ष: – दीर्घ: ऊर्णांशुसंकाशा: अस्मिन् पदे पाठभेद: तज्ञन्य: वैधर्म्यम् अस्ति ।

## उपाधिकरणम् उ) नाम

चरकः

| मलज | शोणितज | श्लेष्मज | पुरीषज |
|---|---|---|---|
| यूका | केशाद | अन्त्राद | ककेरुक |
| पिपीलका | लोमाद | उदराद | मकेरुक |
| | लोमद्वीप | हृदयचर | लेलिह |
| | सौरस | चुरव | सशूलक |
| | औडुम्बर | दर्भपुष्प | सौसुराद |
| | जन्तुमातर | सौगन्धिक | |
| | | महागुद | |

चक्रपाणिः – पिपीलिका इति लिक्षा

– कृमीणां नामसंज्ञाः स्वशास्त्रव्यवहारसिद्धाः देशान्तरप्रसिद्धा च सन्ति ।

गङ्गाधरः – संज्ञा – उदरम् अदन्ति इति उदराद् । एवं कर्मानुसारिण्यः संज्ञाः सन्ति ।

– काश्चन संज्ञाः सान्वयाः तु काश्चन निरन्वयाः ।

– चरकसुश्रुतयोः अविरोधः अस्ति । गङ्गाधरेण तस्य समन्वयः साधितः । केवलं श्लेष्मजानां रक्तजानां च कृमीणां नामसंख्ययोः भेदः अस्ति ।

योगीन्द्रनाथसेनः – अविशेषः

ज्योतिषचन्द्रसरस्वतिः – बाह्यमलजेषु कृमिषु याः खर्वतराकाराः तासां संज्ञा युका अपि च याः दीर्घाकाराः तान् पिपीलिका इति वदन्ति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## उपाधिकरणम् ऊ) प्रभावः ।

चक्रपाणिः – प्रभावः – स्वशक्तिसंपाद्यम् ।

स्वशक्त्या उत्पादितः परिणामः इति प्रभावः ।

गङ्गाधर: – प्रभाव: इति प्रभावजन्यं कार्यम्। कारणे कार्यस्य अंश: भवति तस्मात् 'पूर्वे परे च बोध्यम्' इति न्यायेन प्रभावजं कार्यं अत्र 'प्रभाव' पदेन वर्णितम् ।

योगीन्द्रनाथसेन: – अविशेष: ।

ज्योतिषचन्द्रसरस्वति: – प्रभाव: नाम कार्यं कर्म च।

– रक्तजा: कृमय: व्रणगता: सन्ति । तेन तेषामेव व्रणकर्तृत्वम् भवति । इदं संभवतन्त्रयुक्त्या सिद्ध्यति ।

निष्कर्ष: – प्रभावस्य व्याख्या शब्दश: यदि भिन्ना भासते तथापि अभिप्रेतार्थ: न भिन्न: । वैधर्म्यं नास्ति ।

## उपाधिकरणम् – ए) चिकित्सा सूत्रम्

चरक: – मलजम् – अपकर्षणम् ⟶ मलोपघात: ⟶ मलकरभावानां अनुपसेवनम् ।

– रक्तजम् – कुष्ठै: समानम् ।

– श्लेष्मजम् – सूत्रश: वर्णनं नास्ति ।

– पुरीषजम् – अग्रिमे अधिकरणे विस्तार: अस्ति ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अविशेष: ।

योगीन्द्रनाथसेन: – अविशेष: ।

ज्योतिषचन्द्रसरस्वति: – अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् तृतीयम्

## क्रिमिकोष्ठचिकित्सा

चरक: – पूर्वतने अधिकरणे कृमीणां सामान्यवर्णने प्रकारानुसारं तेषां चिकित्सा संक्षेपेण वर्णिता । इदानीम् अधिकरणेऽस्मिन् कृमिकोष्ठस्य विशेषत: श्लेष्मजपुरीषजयो: कृमीणां चिकित्सा वर्णिता अस्ति ।

– इयं चिकित्सा समासेन विस्तारेण च वर्णिता अस्ति

– विस्तारश: सूत्राणि षोडशत: त्रिंशत्पर्यंतम् ।

– समासत: संक्षेपत: लक्षणत: कृमिकोष्ठचिकित्सा । सूत्रे १४, १५

सर्वेषां कृमीणां चिकित्सा त्रीषु अवस्थासु करणीया ।

अपकर्षणम् – प्रकृतिविघात: – निदानपरिवर्जनम् ।

अपकर्षणम् – हस्तेन अभिगृह्य उपकरणवता । विमृश्य उपकरणेन अपनयनम् ।

– स्थानगत: कृमि: – भेषजेन अपकर्षणम् ।

– चतुर्विधा: प्रकारा: – शिरोविरेचनम् । विरेचनम् । वमनम् ।आस्थापनम् ।

प्रकृतिविघात: – कटुतिक्तकषायरसात्मकानां द्रव्याणां उपयोग: ।

– श्लेष्मपुरीषप्रत्यनीकद्रव्याणां उपयोग: ।

निदानपरिवर्जनम् – हेतुत्याग: ।

चक्रपाणि: – अविशेष: ।

– संक्षेपो हि विस्तरस्य ग्राहकं लक्षणं भवति ।

गङ्‌गाधर: – उपकरणं – हस्तलग्नवस्तुविशेष: आहरणार्थं ग्रहणयोग्य: । शेष: अविशेष: ।

योगीन्द्रनाथसेन: –

– अपकर्षणम् – शोधनम् । प्रकृतिविघात: – उपशम:

– निदानम् – अनुपसेवनम्

– अपकर्षणोत्तरमपि प्रकृति: नाम कारणं यदि न नाशितं तर्हि कृमीणाम् अनुबंध: अस्ति एव । कारणस्य अस्तिवात् कार्यं अवश्यंभावि इति सत्यम् । अत: अपकर्षणोत्तरं निदानपरिवर्जनं करणीयम् ।

– कृमीणां प्रकृति: श्लेष्मा पुरीषा च अस्ति ।

ज्योतिषचन्द्रसरस्वति: –

– अपकर्षणम् नाम निर्हरणम् ।

– प्रकृतिविघात: – तत्प्रत्यनीकानां द्रव्याणां सेवनम् । शेष: अविशेष: ।

चरक: – विस्तारश: कृमिकोष्ठचिकित्सा सूत्राणि षोडशत: त्रिंशत् पर्यंतम् ।

अत्र त्रिषु उपाधिकरणेषु वर्णनमस्ति ।

अ) अपकर्षणविधि:

– षड् सप्त रात्री: स्नेहनं स्वेदनं च करणीयम् ।

– अष्टम: दिवस: क्षीरगुडाद्याहार: – सायं प्रात:च (कृमीणां कोष्ठाभिसरणार्थम्)

– नवम: दिवस: – आहार: पूर्णतया जीर्ण: वा इति निरीक्षणीयम् ।

– रुग्ण बलस्य चिकित्सा करणीया ।

– एतादृशे समये एकस्मिन् एव दिने आस्थापनम् – वमनं विरेचनं च करणीयम् ।

– यदि रुग्णबलं नास्ति तर्हि न करणीया: एते उपक्रमा: ।

– आस्थापनबस्ति: – मूलकादि कषायम् ।

– अर्कादि कषायम् ।

– शिग्रवादि कषायम् ।

– आमलकादि कषायम् ।

– एतस्मात् एकं क्वाथं गृहीत्वा तन्मध्ये मदनफलादि संयोगं समिल्य त्रिवारं आस्थापनं दद्यात् ।

– एवं त्रित: सप्तदिनपर्यंतम् उपक्रम: योजनीय: ।

– अन्तिमे दिने आस्थापन बस्ति प्रत्यागमोत्तरं रुग्णम् आश्वासयतु वैद्य: ।

– तस्मिन् एव दिने उभयभागहरं संशोधनं कुर्यात् । तस्य कल्प: –

मदनफलपिप्पलीक्वाथ: – १/२ अञ्जलि:

श्वेतत्रिवृतकल्क: – १ अक्षम्

– सम्यक् शोधनं जातमिति परीक्ष्य अपराह्णसमये शैखरिकेण कषायेन सुखोष्ण: परिषेक: कुर्यात् ।

– तेनैव कषायेन बाह्याभ्यन्तरम् उदककार्यं करणीयम् अथवा

– कटुतिक्तकषायौषधानां क्वाथ: वा मूत्रक्षार: वा उपयोजितव्य: । निवातगार: प्रवेश:

– पञ्चकोलयवाग्वादि क्रमाचरणम् । विलेपीक्रमापर्यंतं आगत्य एक अथवा द्विदिनान्तरेण विडंगतैलेन अनुवासनबस्तिम् यच्छेत् ।

– शिरोगताः कृमयः सन्ति चेत् स्नेहस्वेदे कृत्वा अपामार्गतण्डुलादि शिरोविरेचनं दद्यात् ।

इति अपकर्षण् विधिः ।

चक्रपाणिः –

– व्याधिप्रभावात् एकस्मिन् एव दिने एतावत् भूरिकर्म करणीयम् ।

– शरीरबलादिसंपत् अस्ति चेत् तर्हि एव एकस्मिन् एव दिने एतद् कर्म करणीयम् न अन्यथा ।

– यावता जलपाकेन औषधं गतरसं भवेत् नाम औषधं जले संक्रमिश्यति तावत् एव जलं ग्राह्यम् । तावानेव पाकः करणीयः ।

– प्रतिस्थानं जलस्य वा पाकस्य प्रमाणादिपरिभाषा न आवश्यकी ।

– वैद्यकव्यवहारे विडङ्गकषायः शैखरि कषायः इति नाम्ना उच्यते ।

गङ्गाधरः –

– पिप्पलीशब्दः बीजवाची योजितः । ऊषणा पिप्पली इति न द्रव्यवाचकः । इति स्वसंज्ञा तन्त्रयुक्तिः ।

– शैखरिकः – अपामार्गः ।

– एकस्मिन् एव दिने सर्वे उपक्रमाः यदा करणीयाः तदा आस्थापनबस्तिः त्रितः सप्तदिनपर्यंतं कथं करणीयः कः तस्य अभिप्रेतार्थः ?

– उत्तरम् – अन्तिमस्य दिनस्य बस्तिप्रत्यागमानन्तरं तस्मिन् दिने रुग्णम् आश्वास्य तदोत्तरं उभयमार्गशोधनार्थं भेषजं दातव्यम् ।

योगीन्द्रनाथसेनः –

– चक्रपाणिसमानः पाठः । त्रिवारं आस्थापयेत् इति दोषापेक्षया आस्थापयेत् । एतदर्थं चरकसंहितायां सिद्धिस्थाने तृतीयस्य अध्यायस्य संदर्भः दत्तः ।

– उभयं शरीरमलरेचनात् विरेचनशब्दं लभते ।

– यवाग्वादिक्रमः करणीयः । पेयादिक्रमः न करणीयः । यतः पेया अभिष्यंदकरा तेन कृमिषु प्रतिषिद्धा ।

– शैखरिक – अपामार्गः

ज्योतिषचन्द्रसरस्वति:

– त्रीणि दिनानि स्नेहविधि: त्रीणि दिवसानि स्वेदविधि: मध्यकाले एकस्य दिनस्य विश्राम: । तदर्थं षड्सप्त दिवसानां स्नेहस्वेदविधि: कथित: अस्ति ।

– उत्क्लेश्येन आहारेण जातहर्षा: कृमय: स्वनिवासं त्यक्त्वा स्रोतस्सु भ्रमन्त: कोष्ठे आगच्छन्ति । तस्मात् शोधनेन निर्हरणं सुकरं भवति ।

– रुग्णबलं विचार्य त्रिवारम् आस्थापनं सप्तदिना नियावत् करणीयम् । चक्रपाणिसमानं वर्णनम् ।

– शैखरिक: = अपामार्ग:

निष्कर्ष: – अस्मिन् उपाधिकरणे त्रिषु स्थानेषु वैधर्म्यं दृश्यते । तस्य ऊहापोहं निर्णयं च अग्रे कृत: अस्ति ।

## उपाधिकरणम् – आ) प्रकृतिविघात: ।

चरक: –

– कृमिणां प्रकृतिविघातं कुर्वाण: अभ्यवहार्थ: विधि: अत्र वर्णित: अस्ति ।

१) मूलकपर्णि पूपलिका + विडङ्गतैललवणनुपानम् + अम्लकाञ्जिकम् वा उदश्वित् + पिप्पल्यादि पञ्चवर्ग: एवं मार्कवादीनाम् इतरद्रव्याणां पूपलिका कृत्वा सेवितव्या ।

काल: – प्रात: अनन्नम् ।

२) अश्वशकृत् योग: – पाणितला मात्रा ।

अनुपानम् – क्षौद्रम् ।

३) भल्लातकस्नेहम् + १/२ भाग: विडङ्गतण्डुलचूर्णम्

विरेचनार्थं मात्रावत् पानम्

संसर्जनक्रम:

अनुवासनम्

४) द्विविध: विडङ्गतैलयोग:

तिलोद्भवतैलनिष्कासनविधि:

विरेचनार्थं विडंगादिसिद्धनिर्माणस्य सेवनस्य च विधि: एवं श्लेष्मजपुरीषजानां कृमीणां अधिकरवर्णनं समाप्तम् ।

श्लेष्मज: कृमि: – स्वल्पमात्रा – आस्थापनम् अनुवासनं – लोमहरणं च ।

पुरीषज: कृमि: – अधिकमात्रा – शिरोविरेचनं मलोपशमनं च ।

चक्रपाणि: – अविशेषा टीका । शब्दार्थत: वर्णनम् ।

गङ्गाधर: – शब्दार्थ: ।

योगीन्द्रनाथसेन: – पूपलिकानां संदर्भे सुश्रुतस्य उल्लेख: ।

– तिलकल्कं क्वाथस्य एकविंशति: भावना दातव्या ।

– शेष: शब्दार्थ: ।

ज्योतिषचन्द्रसरस्वति:

– पूपलिका इति पाकशास्त्रीया संज्ञा ।

– ''कुर्यात् समितयातीव तन्वी पर्पटिका तत: ।

स्वेदयेत् तप्तके तान्तु पोलिकां तां जगुर्बुधा: ।।''

एष: पाकशास्त्रीय: संदर्भ: दत्त: अस्ति ।

– भल्लातकास्थि: इति भल्लातकबीजस्य संग्रहविधि: तस्य परीक्षणं च इत्यस्य भेलसंहितागत: संदर्भ: दत्त: अस्ति । शेषा टीका शब्दार्थ: च ।

निष्कर्ष: –अस्मिन् अधिकरणे एकम् वैधर्म्यं पाठभेद: वा अस्ति । तस्य ऊहापोहं अग्रे कृत: अस्ति

## उपाधिकरणम् – इ) निदानपरिवर्जनम्

– उपरिनिर्दिष्टा चिकित्सा वर्तमाने समये यै: हेतुभि: व्याधे: उत्पत्ति: जाता ते त्याज्या: ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – शब्दार्थ:

ज्योतिषचन्द्रसरस्वति: – शब्दार्थ:

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् चतुर्थम्

### उपसंहार:

चरक: – सर्वेषां कृमीणां चिकित्सा संक्षेपेन पद्येन वर्णिता अस्ति ।

– अतिदेशेन एषैव विधि: सर्वेषु विकारेषु करणीय: ।

– अध्यायस्थानां विषयांशानां उल्लेख: ।

चक्रपाणि: – संशोधनेन अपकर्षणम् संशमनेन च प्रकृतिविघात: इति अर्थ: लक्षणीय:।

गङ्गाधर: –

– अपकर्षणं नाम शोधनम् ।

– प्रकृतिविघात: नाम शमनम् । शमनस्य वाग्भटस्य शारंगधरस्य च व्याख्या उद्घृता ।

– शोधनशमनेन व्याधिजय: भवेत् परंतु व्याधये अपुनर्भवता निदानपरिवर्जनेन भवति ।

– निदानपरिवर्जनम् – प्रयोजनद्वयम् – १) क्रियालाघवम् ।

२) अपुनर्भवता ।

योगीन्द्रनाथसेन: – अविशेष: ।

ज्योतिषचन्द्रसरस्वति: – अविशेष: ।

निष्कर्ष: – अत्र वैधर्म्यं नास्ति ।

# अध्याय ८

# रोगभिषग्जितीयं विमानम् ।

## अधिकरणम् प्रथमम्

## लक्षणाचार्यशिष्याणां परीक्षाकारणम्

अस्मिन् अधिकरणे त्रीणि उपाधिकरणानि सन्ति।

१) तन्त्रपरीक्षाकारणम् – सूत्रम् ३

२) आचार्यपरीक्षाकारणम् – सूत्रम् ४

३) शिष्यपरीक्षाकारणम् – सूत्रम् ८

लक्षणपरीक्षाकारणम् –

चरकः – बुद्धिमता पुरुषेण कार्यस्य गुरुलाघवत्वं कर्मफलं अनुबन्धः देशः कालः च एते ज्ञात्वा युक्तिपूर्वकं वैद्यस्य विवाञ्छया प्रथमं शास्त्रं परीक्षणीयम् ।

–अस्मिन् लोके विविधानि शास्त्राणि प्रचलितानि ।तेषु अग्रिमं गुणयुक्तशास्त्रं अभ्यासार्थम् विचेतव्यम्

| | | |
|---|---|---|
| सुमहत् | यशस्वीपुरुषासेवितम् | धीरपुरुषासेवितम् |
| अर्थबहुलम् | आप्तजनपूजितम् | त्रिविधशिष्यबुद्धिहितम् |
| अपगतपुनरुक्तदोषम् | आर्षम् | सुप्रणीतसूत्रभाष्यसंग्रहक्रमम् |
| स्वाधारम् | अनवपतितशब्दम् | अकष्टकशब्दम् |
| पुष्कलाभिधानम् | क्रमागतार्थम् | अर्थतत्वविनिश्चयप्रधानम् |
| संगतार्थम् | असंकुलप्रकरणम् | आशुप्रबोधकम् |
| लक्षणवत् | उदाहरणवत् | |

– यथा सूर्यः तमः नाशयित्वा सर्वं प्रकाशयति तथा दोषरहितं शास्त्रं अज्ञानरुपिणंः तमः प्रणश्य शास्त्रतत्वं प्रकाशयति ।

चक्रपाणिः – अध्ययनविध्यादिषु कर्तव्येषु यादृश्यप्रकारस्य शास्त्रं अध्ययनार्थं योग्यं स्यात् तस्य आयुर्वेदाध्ययनं कर्तुकामाय पुरुषाय आवश्यकम् इति । आचार्यैः वर्णितम् ।

कार्यम् (कर्तव्यम्)

- गौरवम् → बहुप्रयाससाध्यत्वम्
- लाघवम् → स्वल्पप्रयाससाध्यत्वम्

कर्मफलम्

- तादात्विकम् → ईप्सितं फलम्
- अनुबन्धम् → भविष्यकालिनफलम्

आयुर्वेदस्य उपदेश: अग्रे उक्तान् पुरुषान् न कुर्यात् ।

– य: आयुर्वेदलक्षणं चिकित्सां च स्वशक्त्यापेक्षया कठिनं मन्यते।

– यम् आयुर्वेदद्वारा आरोग्यादिफलस्य आकांक्षा न भवति ।

– य: आयुर्वेदस्य ज्ञानम् अनुपादेयं (अनुपयोगि) मन्यते।

– यःपुरूषः वार्धक्यलक्षणै: युक्त: सन् आयुर्वेदस्य साकल्येन समग्रम् अध्ययनं कर्तुं न शक्नोति ।

एतेषां कृते आयुर्वेदशास्त्रस्य परीक्षा न वर्णिता ।

– एतेषां लक्षणानां विपरीतलक्षणै: युक्तः पुरूषः शास्त्रपरीक्षां कृत्वा आयुर्वेदाध्ययनं कुर्यात् ।

– आप्तजनपूजितम् – यद् शास्त्रं बहुविधै: आप्तै: स्वीकृतम् ।

– अपगतपुनरुक्तदोषम् इति लक्षणं वर्णितम् । क्वचित् केचन विषया: अधिकरणानुसारं पुन: वर्णिता: । तत्र अधिकरणवशात् पुनरुक्तिदोष: न उत्पद्यते।

– ''अधिकरणवशाद् दुर्गाद् गुणदोषप्राप्तितोऽर्थसम्बन्धात् । स्तुत्यर्थं संशयत: शिष्यधियां चाभिवृद्ध्यर्थम् ।। अल्पन्तोऽन्तरितत्वाद्विशेषेणेष्वपि च तन्त्रकृद्भिस्तु । यत्तन्त्रे स्यात् पुनरुक्तं नेष्यतेतद्विभाव्य विवरणम् ।।''

| | |
|---|---|
| अधिकरणवशात् | कठिणगुणदोषप्राप्तात् |
| अर्थसम्बधात् | स्तुत्यर्थम् |
| संशयत: | शिष्याणां बुद्ध्यभिवर्धनार्थम् |
| विशेषणेषु | |

शास्त्रे यस्य वाक्यस्य वर्णनं पुनरुक्तं तस्मिन् तन्त्रदोष: न वर्तते।

– स्वाधारम् इति शोभनं विवरणम् ।

– अनवपतितशब्दम् इति अग्राम्यशब्दम् ।

– अकष्टशब्दम् इति उच्चारणाय न कठिनं वा न अप्रसिद्ध: शब्द: ।

– पुष्कलाभिधानम् – सम्यगर्थसमर्पकवाक्यम् । सम्यक् अर्थं बोधमानं वाक्यं शास्त्रे स्यात् ।

– क्रमागतार्थम् – परिपाटी नाम परंपरयाप्राप्तानां विषयाणां तेन क्रमेण वर्णनम् ।

– असंकुलप्रकरणम् – प्रकरणानां वर्णनसुगमं स्यात् । तथापरस्परमिश्रं न स्यात् ।

– लक्षणवत् – आयुर्वेदस्य त्रिस्कंधात्मकं वर्णनं कुर्वत् अथवा प्रशस्तशास्त्रलक्षणै: युक्तम् ।

– उदाहरणवत् – यथायथं दृष्टान्तै: युक्तं स्यात् ।

गंगाधर:

– लोकव्यवहारे यानि यानि राजसेवादीनि कार्याणि स्यु: तेषाम् बहु वा अल्पसायाससिद्धत्वं दृष्ट्वा तेषां धर्मयुक्तां फलनिष्पत्तिं तथा कर्मफलस्य अनुबन्धं विचार्य कस्मिन् देशे वा काले वृत्तिकरं स्यात् इति निश्चित्य अध्ययनार्थं योग्यं शास्त्रं विचिन्वीत।

– आयुर्वेदबोधकानि नैकानि तन्त्राणि समाजे प्रचलिता: सन्ति । तान् परीक्ष्य योग्यं शास्त्रं विचिन्वीत । आर्षं इत्यस्य अर्थः अध्ययनेन यद् धर्मादिफलं प्राप्यते तत् ।

– सुप्रणीतसूत्रभाष्यसंग्रहक्रमम् – सुप्रणीतं इति सुष्ठु रचितं सूत्रस्य भाष्यसंग्रहस्य च क्रम: ।

सूत्रम् – सूत्रं सङ्क्षेपेणतत्तदर्थानां ग्रन्थनं येन तत् ।

भाष्यम् – तेन सूत्रेण यत् अभिधेयं मुक्तकण्ठेन विस्तरेण पुन: तद्वचनं भाष्यम् ।

– पुष्कलाभिधानम् – पुष्कलेन प्रायेण वर्णावृत्त्याभिधानम् । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: –

– अनुबन्धं कर्मजन्यशुभाशुभभावम् ।

– अर्थबहुलम् इत्यस्य अर्थ: स्वल्पै: पदै: महत् अर्थं कथयन्त: ।

– आर्षम् ऋषिप्रणीतम् । तेन अध्ययनेनापि धर्मादिफलं ख्याप्यते।

– सूत्रम् – सूत्रणं संक्षेपेण अर्थानां ग्रहणम् ।

– भाष्यम् – विस्तरेण सूत्रस्य विवृत्तिः ।

– पुष्कलाभिधानम् – पुष्कलं प्रशस्यतरं अभिधानम् । सुष्ठु उक्तम् इति अर्थः । शेषः शब्दार्थः ।

<u>ज्योतिषचन्द्र सरस्वतिः</u>

– सम्यक् ज्ञानार्थम् अध्ययनम् अध्यापनं तथा तद्विद्य संभाषारुपत्रिविधाम् उपायानां वर्णनं कृतम् । तस्मिन् तन्त्रं आचार्यः शिष्यं च एतेषां परीक्षाप्रकारस्य निवेदनं अस्मिन् सूत्रे कृतम् ।

– कार्यगुरुलाघवम् नाम चिकित्सायाः बहुअल्पं च प्रयाससाध्यत्वम् इति । तथा कार्यफलं नाम आरोग्यम् । एतेषां सर्वेषां युक्तिप्रमाणानुसारं सर्वं ज्ञात्वा वैद्यं बुभूषुः श्रेष्ठः चिकित्सकः भवतु इति हेतुना शास्त्रपरीक्षाकर्तुं कथितम् ।

– केवलं पुस्तकभाण्डादिसंग्रहेण छद्मचरः अथवा सिद्धसाधितः वैद्यः न निर्मिमीतः इत्यर्थं शास्त्रपरीक्षां कुर्यात् ।

– आर्षम् इति ऋषिप्रोक्तम् ।

– सुप्रणीतसूत्रभाष्यसंग्रहकम्

तत्र सूत्रलक्षणम् यथा – स्वल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभवमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।।

तत्र सूत्रं षड्विधम् यथा – संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।।

ननु भाष्यलक्षणम् – सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।

– स्वाधारम् – सुसुन्दरः आधारः उपजीव्यत्वेन वेदादिः यस्य तत् ।

– तमः आदित्यपक्षे अन्धकारः अपि च शास्त्रपक्षे अज्ञानस्वरुपम् अस्ति।

<u>निष्कर्षः</u> – वैधर्म्यं नास्ति।

आचार्यपरीक्षाकारणम्  सूत्रम् ४

| | | | | |
|---|---|---|---|---|
| चरक: – | पर्यवदातश्रुतम् | परिदृष्टकर्माणम् | दक्षम् | दक्षिणम् |
| | शुचिम् | जितहस्तम् | उपकरणवन्तम् | सर्वेन्द्रियोपपन्नम् |
| | प्रकृतिज्ञम् | प्रतिपत्तिज्ञम् | अनुपस्कृतविद्यम् | अनहङ्कृतम् |
| | अनसूयकम् | अकोपनम् | क्लेशक्षमम् | शिष्यवत्सलम् |
| | अध्यापकम् | ज्ञापनसमर्थम् | | |

– यथा उत्तमे क्षेत्रे वर्षाऋतो: मेघ: शस्यगुणै: युनक्ति तथा एतै गुणै: युक्त: आचार्या: उत्तमाय शिष्याय त्वरितं वैद्यगुणै: युनक्ति: ।

चक्रपाणि:

– दक्ष इत्यस्य अर्थ: वाममार्गिणी बुद्धि: यस्य नास्ति स: ।

– य: गुरु: उपकरणान्वित: न स्यात् स: चिकित्सावृत्ते: अभावात् शिष्याय कर्मदर्शनं कारयितुं न शक्नुयात् ।

– अन्यानि शास्त्राणि अधीत्य अपि यस्य विद्या (स्वशास्त्रज्ञानं) उपस्कृता न स्यात् स एव योग्य: आचार्य: । उदाहरणार्थम् – य: आयुर्वेदज्ञ: अस्ति तथा य: अन्यानि शास्त्राणि अपि जानाति । परं तेषाम् इतरेषां शास्त्रज्ञानेन आयुर्वेदज्ञानम् न उपस्कृतं सः पुरूषः योग्यः।

– आर्तव: इत्यस्य अर्थ: उचिते काले उत्पन्न: ।

गंगाधर:

– तन्त्राध्ययनस्य निमित्तं सताम् आचार्याणां परीक्षणं अत्र वर्णितम् ।

– अत्र वर्णिता: गुणा: आयुर्वेदानां आचार्याणाम् अभिप्रायेण कथिता: सन्ति । एते गुणा: सर्ववेदाचार्याणां अभिप्रायेण न वर्णिता: ।

– पर्यवदातश्रुत: – येन अध्यापनात् प्राक् गुरो: मार्गदर्शनेन आयुर्वेदस्य तन्त्रगतानां शास्त्रार्थतत्वानां निश्चये संदेहशून्यत्वं प्रापितम् ।

– परिदृष्टकर्मा सर्वविधानां चिकित्साकर्मणां गुरुद्वारा तथा स्वयं फलाफलत्वं दृष्टम् ।

– दक्ष: नाम वमनादिषु सर्वकर्मसु कुशल: सन् । दक्षिण: अनुकूलं स्वभावं सन् ।

– जितहस्तः यद् कार्यं स्वीकरिष्यति तस्मिन् त्वरितं सिद्धिं प्राप्नोति ।

– सर्वेन्द्रियोपपन्नः – हीनेन्द्रियः मनुष्यः रुग्णपरीक्षणार्थं अथवा अध्यापनार्थं सक्षमः न भवति । अतः आचार्याः सर्वेन्द्रियोपपन्नाः स्युः ।

– प्रकृतिज्ञः – पुरूषस्य प्रकृतिज्ञानं विना व्याधितस्य व्याधिप्रतिकारे अथवा स्वास्थ्यस्य स्वास्थ्यरक्षणे क्रियोपयोगः भवितुं न शक्नोति ।

– प्रकृतिः इति पुंसां स्वास्थ्यावस्थायां सात्विकादिरुपः समवातपित्तकफात्मकस्वरुपः स्वभावः ।

– प्रतिपत्तिः इति क्रियादिषु आहारविहारयोः प्रवृत्तिः ।

– उपस्कृतविद्यः – यैः आचार्यैः स्वगुरोः आयुर्वेदीयतन्त्रविद्या अधिगता तथा अर्थतत्वनिश्चये संदेहशून्यत्वं प्रापितं तदनन्तरं सा विद्या पुनः पुनः अधोक्तैः उपायैः उपस्कृता ।

– शास्त्रान्तरसमूहाध्ययनेन संहतीकृता

– भूषणीकृता वा

– दृढतायां वा पुनः पुनः प्रतियतिता

– तर्कान्वितीकृता

एतादृशान् आचार्यान् उपस्कृतविद्यः उच्येत। यदि ‘अनुपस्कृतविद्यम्’ इति पाठः गृहीतः तर्हि ‘यस्य विद्या अविकृतभूता अस्ति’ एवं अयोग्यः अर्थः भवति । शेषः शब्दार्थः ।

<u>योगीन्द्रनाथ सेनः</u>

– पर्यवदाश्रुतः यस्य शास्त्रज्ञानम् अमलं अस्ति।

– दक्षः – कर्मसुकुशलः । जितहस्तः – शस्त्रोपचारादिषु क्षिप्रहस्तः

– उपस्कृतविद्यम् – उपस्कृता शास्त्रान्तरज्ञानेन संस्कृता विद्या येन तम् । अनुपस्कृतविद्यमिति पाठे तु अविकृतविद्यम् । विकारे सुट् । शेषः शब्दार्थः ।

<u>ज्योतिषचन्द्र सरस्वतिः</u>

– दक्षम् स्वभ्यस्तकर्माणं कर्मकुशलम् ।

– जितहस्तम् शस्त्राद्यवचरणाय मनोऽनुगतहस्तपरिचालनसमर्थम् ।

– प्रकृतिज्ञः – शिष्यस्य प्रकृतिंदृष्ट्वा तदनुसारं कौशल्येन अध्यापयम् ।

– प्रतिपत्तिज्ञम् – कर्तव्याकर्तव्यकुशलम् । अनुपस्कृतविद्यम् – अविकृतज्ञानम् । शेष: शब्दार्थ: ।

निष्कर्ष: – दक्षम् । अनुपस्कृतविद्यम् । प्रकृतिज्ञम् । जितहस्तम् ।

इति पदानां व्याख्यायां वैधर्म्यं अस्ति ।

शिष्यपरीक्षाकारणम् – सूत्रम् ८

चरक: – अध्यापनविधौ आचार्येण सर्वप्रथमं शिष्यः परीक्षणीय: इति वर्णितम् ।

| शिष्य गुण | शिष्य गुण | शिष्य गुण | शिष्य गुण |
|---|---|---|---|
| प्रशान्तम् | अव्यंगम् | रक्तजिव्हम् | शीलोपपन्नम् |
| आर्यप्रकृतिकम् | अव्यापन्नेन्द्रियम् | विशदजिव्हम् | शौचोपपन्नम् |
| अक्षुद्रकर्माणम् | निभृतम् | अविकृतदन्ता: | आचारोपपन्नम् |
| ऋजुचक्षु: | अनुद्धतम् | अविकृतौष्ठौ | अनुरागोपपन्नम् |
| ऋजुमुखम् | अर्थतत्त्वभावकम् | अमिन्मिनम् | दाक्ष्योपपन्नम् |
| ऋजुनासावंशम् | अकोपनम् | धृतिमन्तम् | प्रादक्षिण्योपपन्नम् |
| तनुजिव्हम् | अव्यसनिनम् | अनहङ्कृतम् | अध्ययनाभिकामम् |
| तद्विद्यकुलजम् | सर्वभूतहितैषिणम् | मेधाविनम् | अर्थविज्ञाने अनन्यकार्यम् |
| तद्विद्यवृत्तम् | आचार्यसर्वानुशिष्टिप्रतिकरम् | वितर्कसम्पन्नम् | कर्मदर्शने अनन्यकार्यम् |
| तत्त्वाभिनिवेशिनम् | अनुरक्तम् | स्मृतिसम्पन्नम् | अलुब्धम् |
| | | उदारसत्त्वम् | अनलसम् |

एवं विधं गुणान्वितं शिष्यं पाठनीयम् ।

चक्रपाणि: – एतेषु कानिचित् लक्षणानि सहजतया (निसर्गत: उत्पन्नानि) उपयोगिनी सन्ति । उदाहरणार्थं – ऋजुचक्षुर्मुखनासावंशम् । अत: एतेभ्य: विपरीतलक्षणयुक्त: जड: इति ।

– अनुराग: शब्देन अध्ययने अनुरागी शिष्य: अभिप्रेत: ।

– अनुरक्त: इति पदेन गुरौ अनुरक्त: स्यात् इति अभिप्रेतम् ।

– दाक्ष्यम् इति गुणेन सह अनलसम् इति गुणवर्णनस्य कारणमस्ति यत् दाक्ष्यगुणेन कस्यचित्

कार्यस्य आरम्भे कृते तत्कार्यं बहुप्रयाससाध्यम् यदि स्यात् तर्हि तत्र आलस्यम् अयोग्यं भवेत् । न स्थानं अलसस्य । अत: अनलसत्वं इति गुण: अपि कथित: ।

– अनुशिष्टिप्रतिकरम् – आज्ञाकरम्

गंगाधर: – आर्यप्रकृतिक: – ब्राह्मणक्षत्रियवैश्ययोनिं षड्जातिम् ।

– तद्विद्यकुलज: – आयुर्वेदीय तन्त्रव्यवसायिनां कुले जात: । शेष: शब्दार्थ: ।

– एतेभ्य: विपरीतगुणयुक्तां व्यक्तिं न पाठितव्यम् यत: तेन सर्वथा तन्त्रविद्याया: लाभ: न भवति ।

– यथा यथा गुण: स्यात् तथा तथा विद्यालाभ: स्यात् इति तु हृदयम् ।

योगीन्द्रनाथ सेन: – शब्दार्थ: अविशेष: विवेचनम् ।

– सुश्रुतसंहिता सूत्रस्थानम् अध्याय: द्वितीय: अस्य संदर्भ: उद्धृत: ।

ज्योतिषचन्द्र सरस्वति: – केकराक्ष्यादिभि: विकृतै: अवयवै: युक्ता व्यक्ति: यदि चिकित्सका भवति तेन लोकेषु अश्रद्धा उत्पत्तुं शक्यते । अत: विकृतांगयुक्तां व्यक्तिं शिष्यभावेन न स्वीकुर्वीत ।

निष्कर्ष: – वैधर्म्यं नास्ति।

चरक: – सूत्रम् ५ – उपरोक्तै: गुणै: युक्तम् आचार्यं गत्वा शिष्य: प्रमादरहितं भूत्वा अग्निवत् देववत् राजवत् पितृवत् भर्तृवत् च सेवां कुर्यात् ।

– पश्चात् आचार्यप्रसादात् संपूर्णं शास्त्रज्ञानं सम्प्राप्य शास्त्रस्य दृढतायां शास्त्राभिधानस्य सौष्ठवे, शास्त्रार्थविज्ञाने वचनशक्तौ च पुन: पुन: सम्यक् प्रकारेण प्रयतेत।

चक्रपाणि: – अग्न्यादिभावानां यथा सेवा क्रियते तथा गुरुसेवा करणीया।

– 'दृढता' इति पदेन शास्त्रग्रहणस्य स्थैर्यम् अपेक्षितम् ।

– वचनशक्ति: नाम अर्थकीर्तनसामर्थ्यम् ।

गंगाधर: – अग्निवत् – नित्य अपेक्षित्वम् ।

देववत् – पूज्यतमत्वम् ।

राजवत् – शासितृत्वम् ।

पितृवत् – वात्सल्यात् पितृवत् अपरिहार्यत्वम् ।

भर्तुवत् – यथाप्रतिपालकस्य अधीनत्वं तद्वत् अधीतत्वम् उरीकुर्यात् ।

– दृढतायाम् – इति अच्युतधारणे विषये। शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – शब्दार्था टीका

ज्योतिषचन्द्र सरस्वति: – शब्दार्था टीका

निष्कर्ष: – वैधर्म्यं नास्ति।

## द्वितीयम् अधिकरणम्

### शास्त्रदृढतायै त्रिविधा: उपाया:

चरक: – शास्त्रग्रहणस्य स्थैर्ये उपायान् – अध्ययनम् अध्यापनम् तद्विद्यसंभाषा च इति ।

चक्रपाणि: – तद्विद्यसंभाषा इति तत् शास्त्राध्यायिना सह संभाषणम् ।

गङ्गाधर: – भूय: भूयो अधीतशास्त्रप्रयत्ने उपायान् विवृणोति ।

योगीन्द्रनाथ सेन:– तद्विद्या: – सा विद्या येषां ते तद्विद्या: तच्छास्त्राध्यायिन: ।

ज्योतिषचन्द्र सरस्वति: – तथाविधप्रयत्ने उपायान् आह ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### अ) अध्ययनविधि: – सूत्रे ६ ७ च ।

चरक: – सविस्तरम् अध्ययनविधे: वर्णनम् ।

– काल: पद्धति: नियम:, कर्म, वर्ज्यम् आवर्तनक्रम: च इत्यादीनां वर्णनम् ।

चक्रपाणि: – कल्य: इति नीरोग: ।

– कृतक्षण: नाम अन्यद् किमपि कार्यं न कृत्वा अध्ययनार्थमेव सर्वस्य कालस्य उपयोजनम् ।

– प्रात:काले अथवा निशाया: किञ्चित् अंशे शेषे उत्थानीयम् । उपव्यूषमिति किञ्चिच्छेषायां रात्रौ ।

– 'मन:पुर:सराभि:' इत्यस्य अर्थ: 'मनस: एकाग्रतां कृत्वा' इति भवति ।

– स्वदोषाणां परिहाराय तथा परदोषज्ञानाय पुन: पुन: अध्ययनीयाम् ।

– प्रमाणम् – प्रमीयते अनेन इति प्रमाणम् । ज्ञानमात्राम् ईप्सितम् ।

– ज्ञानं सम्यक् ज्ञात्वा अध्ययने कृते अध्ययनं दोषरहितं भवति ।

– दृष्टादृष्टयो: विकृतियुक्त: काल: वेदानाम् अध्ययनाय अयोग्य: भवति । अयमेव काल: आयुर्वेदस्य अध्ययनाय अपि अयोग्य: । तस्य विशेष: उल्लेखः सूत्रे नास्ति ।

गङ्गाधरः – आचमनविधिः सद्वृत्ते कथितः अस्ति ।

– आवर्तनं नाम अभ्यासः शीलनं सततक्रिया च इति आत्रेयभद्रकाप्यीये अध्याये वर्णितम् ।

– प्रातः कालीनः अभ्यासः सर्वदा आवश्यकः स्यात् । एषः नियमः न उल्लङ्घ्यः । मध्याह्ने अपराह्ने निशायां च क्वचित् अभ्यासः न भवति । चेत् तथापि महाहानिः न ।

– गङ्गाधरेण 'कल्यः कृतक्षणः' इति पाठः अस्वीकृत्य 'कल्यकृतक्षणः' इति पाठः गृहीतः ।

– कल्यः प्रातकालः तत्र कृतः नियतरुपः क्षणो येन सः कल्यकृतक्षणः । इति टीका कृता अस्ति ।

– अन्येभ्यः टीकाकारेभ्यः एषः भिन्नः विचारः अस्ति ।

– मनःपुरःसरम् – मनोयोगं विना आवर्तनेन स्थिरतया धारणम् ।

योगीन्द्रनाथ सेनः – कल्यः नीरोगः । कृतक्षणः कृतकालनियमः । मनःपुरः सरः – मनोयोगपूर्वः ।

– इन्द्रियोपक्रमणीयस्य अध्यायस्य तथा सुश्रुतसूत्रस्थाने तृतीयस्य अध्यायस्य च संदर्भौ – अध्ययनविध्यर्थः।

– सुश्रुतेन सूत्रस्थाने द्वितीये अध्याये वर्णितस्य अनध्ययनकालस्य सूत्रवर्णनम् ।

ज्योतिषचन्द्र सरस्वतिः – कल्यकृतक्षणः एषः पाठः ।

– टीका – कल्ये प्रातरेव कृतावसरः अन्यकार्यव्यापारो अध्ययनप्रत्यूहो भवति ।

– उपव्यूषस् उषसि इत्यर्थः सप्तम्यर्थेऽव्ययीभावः । शेषम् अर्थशः विवेचनम् ।

निष्कर्षः – 'कल्यकृतक्षणम् ' अस्मिन् विषये पाठभेदः वैधर्म्यं च स्तः ।

## आ) अध्यापनविधिः

– अस्मिन् प्रकरणे सविस्तरम् अध्यापनविधिः वर्णितः ।

– अध्यापनविधौ अधोक्तानां विषयघटकानाम् आधारेण वर्णनं कृतम् ।

– शिष्यगुणः – सूत्रम् ८

– अध्ययनारम्भः – सूत्रम् ९

– अध्ययनपूर्वकर्म – हवनम् – सूत्रम् ११

स्वस्तिवाचनम् प्रणिपातः च – सूत्रम् १२

– अध्ययनकाले अनुशासनम् – सूत्रे १३–१४

१) शिष्यगुण: – सूत्रम् – ८

– अस्य वर्णनम् ऊहापोह: च पूर्वस्मिन् अधिकरणे शिष्यगुणपरीक्षायां कृत: अस्ति ।

२) अध्ययनारम्भ: – सूत्रम् – ९

चरक: – उत्तमगुणयुक्त: शिष्य: अध्ययनार्थी तथा गुरो: आराधनार्थी आचार्याणां समीपे आगते आचार्यै: स: बोधयितव्य:।

– अध्ययनारम्भाय योग्य: काल: । उत्तरायणं शुक्लपक्ष: प्रशस्तदिन: पुष्यहस्तश्रवणअश्विन्यादिषु एकं नक्षत्रं चन्द्रयोग: कल्याणकारकं करणं मुहूर्त: च ।

– आवश्यकं कर्म – मुण्ड: कृतोपवास: स्नान: काषायवस्त्रसंवीत: सगन्धहस्त:

– यै: सार्धं समिध: आज्यम् इत्यादीनि सम्भारद्रव्याणि गृहीत्वा शिष्येण उपस्थातव्यम् ।

चक्रपाणि: – चन्द्रस्य उदयानन्तरम् एव तथा कल्याणकारके नक्षत्रे योगे स्थिते अध्ययनं प्रारभेत । इत्यस्य अर्थ: अमावस्यां शुक्लपक्षस्य प्रतिपद्तिथिं वर्जयित्वा अन्यस्मिन् शुभकाले प्रारभेत ।

– 'मैत्रे मुहूर्ते ' अस्य अर्थ: शिवभुजगादौ शुभेमुहूर्ते इति भवति ।

– 'हिरण्य' शब्देन अघटितं सुवर्णं प्रत्युत 'हेम' शब्देन घटितं सुवर्णम् इति बोद्धव्यम् ।

– ऋषिवचनमेव अस्ति यद् स्वयं उपार्जितानि वस्तूनि एवं फलप्रदायिनि सन्ति ।

गङ्गाधर: – शिष्यस्य अन्वेषणानन्तरम् अध्ययनप्रारम्भात् (पूर्वं) करणीयस्य कर्मण: वर्णनम् ।

– ज्योति: शास्त्रोक्तेन विधिना प्रारम्भ: करणीय: ।

योगीन्द्रनाथ सेन: –

– ज्योति: शास्त्रोक्तेन प्रशस्त: काल: द्रष्टव्य: । मैत्रमुहूर्त: अस्य अर्थ: अनुकूल: मुहूर्त: ।

– काषायवस्त्रेण रक्तवाससा संवीत: । व्येञ् आच्छादने । शेषम् अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – 'मैत्रे' इति शुभे ।

– माल्यं नाम शिरोवेष्टनं वस्त्रं प्रत्युत दामं नाम कण्ठे धारणीय: वस्त्रविशेष: ।

– ज्योतिषचन्द्रसरस्वति: महोदयेन क्षौमपरिधि: इति पाठं गृहीत्वा 'अतसीततन्तुनिर्मितं परिधेयवस्त्रम्' इति टीका कृता अस्ति ।

निष्कर्ष: – क्षौमपरिधि: एतस्य पदस्य अर्थे वैधर्म्यम् ।

३) अध्ययनपूर्वकर्म – सूत्रे ११ – १२

– अध्ययनस्य साक्षात् प्रारम्भात् प्राक् करणीयस्य कर्मणः वर्णनमस्ति । तस्मिन् हवनम् अग्निप्रदक्षिणा, स्वस्तिवाचनं, भिषग् पूजनं च एतानि कर्माणि समाविष्टानि ।

– हवने हवनसामग्र्याः तथा हवनकर्मणः वर्णनमस्ति । हवने ब्रह्मा अग्निः धन्वन्तरिः प्रजापतिः अश्विनौ इन्द्रः सूत्रकारऋषिः च एतान् अभिमन्त्र्य 'स्वाहा' मन्त्रम् उच्चार्य मधुना घृतेन च त्रिवारम् आहुत्याः दातव्याः ।

चक्रपाणिः – किष्कुः नाम अर्थः हस्तप्रमाणम् ।

– इदम् हवनम् अध्यापकेन करणीयम् । 'स्वाहा' आदि मन्त्रान् उच्चार्य प्रथमम् आचार्येण हवनीयम्

– आचार्यकृत हवनानन्तरं शिष्येण मन्त्रपूर्वम् आहुतिं दत्वा अग्नौ हवनीयम् ।

गङ्गाधरः – चतुरस्त्रं चतुष्कोणम् । यज्ञविधेः वर्णनम् ।

– शिष्येण हवनानन्तरं तम् अग्निं दक्षिणपार्श्वेन तिस्त्रः प्रदक्षिणाः करणीयाः ।

– शेषम् अर्थशः विवेचनम् ।

योगीन्द्रनाथ सेनः –

– यज्ञविधेः संक्षेपेण वर्णनम् । वेदारम्भविधिसमानः विधिः करणीयः ।

– सुश्रुतस्य संदर्भः – सु. सू. २ । शेषम् अर्थशः विवेचनम् ।

ज्योतिषचन्द्र सरस्वतिः – वेदारम्भहोमविधिः । शेषम् अर्थशः वर्णनम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

४) अध्ययनकाले अनुशासनम् सूत्रे १३ – १४

चरकः – अध्ययनारम्भात् अध्ययनपूर्तिपर्यन्तं शिष्येण कथम् आचरणीयं, किं करणीयम् तथा किं न करणीयम् अस्य विवेचनम् अस्मिन् सूत्रे अस्ति ।

– शिष्यस्य गुरुः आश्रमः व्यक्तिः समाजः सम्पूर्णप्राणीसृष्टिः विश्वं च एतेषां विषये आचारविचाराः कथं स्युः अस्य वर्णनम् । एनमेव अनुशासनस्य वर्णनमिति वक्तुं शक्यते ।

– एषः उपदेशः आचार्येण शिष्यं अग्निः ब्राह्मणः भिषक् च एतेषां उपस्थितौ दातव्यः ।

चक्रपाणिः – शुण्डा मद्यशाला, तत्प्रचारी शौण्डः । 'अशौण्डः' तु तद् अप्रचारी ।

–‘शुक्लवचनम्’ इत्यस्य अर्थः शुक्लं भाषणम् । द्व्यर्थि, वक्रोक्तिपूर्णं अनुक्तं भाषणं न स्यात् ।

– राज्ञो द्विष्टः राजद्विष्टः । यः तु राजानं द्वेष्टि स राजद्वेषी ।

– ‘आचारोपचारः’ इत्यस्य अर्थः आचारः पालनीयः ।

– ‘प्रवृत्तिः’ इति पदं ‘वार्ता’ इति अर्थेन योजितम् ।

– ‘आत्मश्लाघा’ न करणीया इति न विकथितव्यम्’ इति पदेन ज्ञायते ।

– सत्यवादी एव आप्तः अस्ति ।

गङ्गाधरः – शिष्यानुशासनम् ।

– व्याकरणम् – कृद्योगेऽनभिहिते कर्त्तरि षष्ठी । तृतीयान्तविशेषणानुपपत्तेः ।

– छन्दसि बहुलत्वात् तु त्वया इति ।

– गुरोः आज्ञा स्यात् वा न स्यात् परिभ्रमता शिष्येण प्रथमं गुरोः अभिप्रेतान् विषयान् प्राप्य अनन्तरं निजार्थः प्राप्तव्यः ।

– मनसा अपि ‘परस्त्रीसहवासपरधने’ न इच्छेत् । स्पष्टं शरीरेण अपि ते न भोक्तव्ये । (वाक्यशेष तन्त्रयुक्तिः)

– आत्मश्लाघां न कुर्यात् ।

योगीन्द्रनाथ सेनः –

– सर्वासु अवस्थासु सर्वात्मना सर्वथा आतुराणाम् आरोग्ये प्रयतितव्यम् ।

– आतुरान् पीडयित्वा जीविकापि न अर्जनीया ।

– न केवलं मनसा अपि तु वाण्या कायया अपि परस्त्रीपरधने न अभिलषितव्ये ।

– अशौण्डः इति अमत्तः ।

– शुक्लं नाम निर्दोषवचनं स्यात् । शेषम् अर्थशः विवेचनम् ।

ज्योतिषचन्द्र सरस्वतिः

– शिष्येण शस्त्रं न धारणीयम् इत्यस्य अर्थः जीवितहत्यायै शस्त्रधारणं निषिद्धम् । चिकित्सायै तथा योग्याकरणार्थं शस्त्रं धारणीयम् ।

– कर्मसिद्धिः चिकित्सासाफल्यम् । अर्थसिद्धिः धनोपार्जनसाफल्यम् ।

– अशौण्ड: – सुरावेश्यादिषु अनासक्त: ।

– 'महाजनद्वेषीणाम्' अस्मिन् अनादरार्थेण षष्ठी विभक्ति: योजिता अस्ति । शेषम् अर्थश: विवेचनम्

निष्कर्ष: – वैधर्म्यं नास्ति ।

चरक: – आयुर्वेदस्य सुतरं पारं न च एव अस्ति ।

– तस्मात् अप्रमत्त: शश्वद् अभियोगम् अस्मिन् गच्छेत् एतच्च कार्यम् ।

– कृत्स्नो हि लोको आचार्य: बुद्धिमताम् । कृत्स्नो हि लोको शत्रु: अबुद्धिमताम् ।

– अत: अभिसमीक्ष्य बुद्धिमता अमित्रस्यापि धन्यं यशस्यं आयुष्यं पौष्टिकं लौक्यं अभ्युपदिशत: वच: श्रोतव्यं अनुविधातव्यं च ।

चक्रपाणि: – आयुर्वेदस्य अशेषं ज्ञानम् अशक्यम् । अत: प्राय: आयुर्वेदज्ञानार्थं प्रयतनीयम् ।

– 'अस्मिन् पदेन दुस्तर: आयुर्वेद: बोधनीय: ।

– अत्र अनुक्तसद्वृत्तस्य आचरणं चरकस्य अभिप्रेतम् अस्ति । लौक्य नाम लोकाभिमतम् ।

– 'इति' पदम् अवधारणा इत्यर्थेन अस्ति ।

गङ्गाधर: –

– आप्तेन अपि आत्मश्लाघा किमर्थं न करणीया? अस्य प्रश्नस्य उत्तरम् अस्मिन् सूत्रे दत्तम् ।

– तस्मात् आयुर्वेदपाराभावात् ज्ञानवत्तया श्लाघां न कृत्वा प्रमत्तो न भूत्वा नित्यम् अप्रमादेन अभियोगम् असर्ववित्तया अस्मिन् आयुर्वेदे योगं गच्छेत् । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – आयुर्वेदगम्यज्ञानस्य न कदापि अन्त: ।

– बुद्धिमत: शत्रो: अपि योग्यं वचनं श्रोतव्यम् इत्यस्य अर्थ: मित्रस्य अपि योग्यवचनं श्रवणीयम् ।

ज्योतिषचन्द्र सरस्वति: – केवलं शास्त्रलोचनेन सम्पूर्णआयुर्वेदज्ञानं न भवति । अत: पुन: पुन: ज्ञानप्राप्त्यर्थं प्रयतनीयम् ।

– कृत्स्नो लोक: इति भूतग्राम: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

चरक: – देवताअग्निद्विजगुरुवृद्धसिद्धआचार्यादिभ्य: एतेभ्य: नित्यं सम्यक् व्यवहार्यम् । तेन तेभ्य: कल्याणं भवति । अस्य विपरीतआचरणेन देवतादय: अकल्याणप्रदा: भवन्ति ।

– शिष्येण आचार्यस्य उपदेशानुसारं चेष्टितव्यम् । ईदृश: शिष्य: एव अध्याप्य: भवति ।

–अध्याप्यशिष्याय अध्यापनं कुर्वन् आचार्य: यथोक्तेन अध्यापनफलेन शिष्यस्य स्वस्य च योगं करोति ।

चक्रपाणि: –

– 'यथोक्तं अध्यापनस्य फलं' इत्यस्य अर्थ: शास्त्रान्तरे वर्णितम् अध्ययनेन फलं प्राप्नुयात् ।

– अस्मिन् शास्त्रे (अग्निवेशतन्त्रे) अध्ययनस्य फलं स्पष्टरुपेण क्वचित् वर्णितमस्ति ।

गङ्गाधर: – सुश्रुतसंहितायां वर्णितस्य अध्यापनविधे: सविस्तरं सूत्रवर्णनम् ।

योगीन्द्रनाथ सेन: – उपदेशस्य अनुपालनम् इति अध्याप्यस्य लक्षणमस्ति ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

निष्कर्षः – वैधर्म्यं नास्ति ।

५) संभाषा विधि: – सूत्रम् १५ त: २६

चरक: – ज्ञानोपायगत: तृतीय: उपाय: सम्भाषाविधि: । तस्य विवेचनं अग्रिमम् उप अधिकरणानुसारम् अस्ति ।

१) सम्भाषाया: स्वरुपं गुण: च – सूत्रम् १५

२) सम्भाषाप्रकार: – सूत्रम् १६

३) संधायसम्भाषा – सूत्रम् १७

– संधायसम्भाषाया: अधिकारी

– विधि:

४) विगृह्यसम्भाषा विधि: – सूत्रम् १८

५) जल्पकस्य गुणदोष: – सूत्रम् १८

६) परलक्षणम् – सूत्रम् १९

७) परिषद्परीक्षा – सूत्रम् २०

८) परिषदप्रकारानुसारेण सम्भाषा – सूत्रे २० , २१

९) निग्रहोपाय: – सूत्र २१

१०) वादप्रवृतौ कार्यम् – सूत्रे २४ , २५

११) वादमर्यादालक्षणम् – सूत्रे २६

एतैः विमर्शविषयाधारैः वर्णनं करवामहै ।

१) **सम्भाषायाः स्वरूपं गुणः च** –

चरकः – भिषक् भिषजा सह सम्भाषेत ।

– गुणाः – ज्ञानाभियोगसंहर्षकरी – वैशारद्यम् अभिनिर्वर्तयति

– वचनशक्तिम् आधत्ते – यशः अभिदीपयति

– पूर्वश्रुते संदेहम् अपकर्षति – श्रुते असंदेहवतः अध्यवसायं करोति ।

– अश्रुतम् अर्थं श्रोत्रविषयं आपादयति – गृह्यम् अर्थजातं प्राप्नोति ।

तस्मात् कुशलाः तद्विद्यसम्भाषाम् अभिप्रशंसन्ति ।

चक्रपाणिः – संहर्षः इति स्पर्धा । ज्ञानार्थम् अभियोगं तथा संहर्षं करोति ।

– 'वैशारद्यम्' इत्यस्य अर्थः स्वपाण्डित्येन अन्यस्य वचनम् अभिभावनम् । एतद् वैशारद्यं वारंवारं सभायाम् उपस्थित्या वादेन च लभते ।

– अध्यवसायः नाम दृढनिश्चयः ।

– पिण्डरुपेण इत्यस्य अर्थः सारोद्धारेण नाम सम्भाषया तत्त्वस्य सारवर्णनं क्रियते । स्पर्धायाः गुह्यसारभागः अन्यं पराजेतुं संभाषायां कथ्यते ।

– स्पर्धायाः विजिगीषुः व्यक्तिः गोपनीयं विषयम् अपि सहजा भणति ।

गङ्गाधरः – सम्भाषेत इति परस्परं शास्त्रं भाषेत । समानविद्यान्वितैः एव परस्परैः चर्चा करणीया ।

– एकशास्त्रविद् तथा एकतन्त्रविद् ईदृशेण पुरूषेण सहैव सम्भाषा करणीया ।

– एवं तद्विद्पुरूषेण सार्धं तद् शास्त्रविषयकः वा तन्त्रविषयकः वादः करणीयः ।

– ज्ञानाभियोगः – सर्वतोभावेन ज्ञानयोगः ।

– वैशारद्यं – पाण्डित्यं तत्त्वाभिनिवेशः ।

– वचनशक्तिः – शब्दतः च अर्थतः च उक्तौ सामर्थ्यम् ।

– पण्डः – स्वपाण्डित्यप्रकाशनम् ।

– विजयः संहर्षं कुर्वाणः अस्ति, तेन ज्ञानाभियोगादिनि फलानि मिलन्ति । अतः सम्भाषायां विजिगीषुवृत्तिः स्यात् ।

योगीन्द्रनाथ सेनः – समानविद्याध्ययनार्थिभिः तस्य शास्त्रस्य अधिकरणेन आलापनीयम् ।

– अभियोगः नाम 'पृच्छा' इति ।

– वैशारद्यं – पाण्डित्यम् । – पण्डः – स्वपाण्डित्यप्रकाशनम् ।

ज्योतिषचन्द्र सरस्वतिः – सम्भाषा – शास्त्राण्यनुसृत्य विचारविनिमयः ।

– तद्विद्यसम्भाषा – तन्त्रकुशलेन सह शास्त्रानुयायिनौ वादप्रतिवादौ ।

– वैशारद्यम् – पाण्डित्यम् । वचनशक्तिः – वादप्रतिवादपटुत्वम् ।

– अध्यवसायम् – स्थिरनिश्चयम् । पण्डः – निर्बोधः ।

निष्कर्षः – पण्डः पिण्डः च ईदृशौ पाठभेदौ तथा तत् सम्बन्धिनं वैधर्म्यं च अस्ति ।

२) **सम्भाषायाः प्रकारः** – सूत्रम् १६

चरकः – तद्विद्यसम्भाषा – द्विविधे – सन्धायसम्भाषा , विगृह्या सम्भाषा

चक्रपाणिः – सन्धायसम्भाषां एव न्यायदर्शनशास्त्रे 'संवाद' इति वदति ।

– विगृह्यसंभाषा जल्पं वितण्डारुपं च भवति ।

गङ्गाधरः – सन्धिं कृत्वा सम्भाषा इति सन्धायसम्भाषा ।

– विग्रहं कृत्वा सम्भाषा इति विगृह्यसम्भाषा ।

योगीन्द्रनाथ सेनः – कथं सम्भाषणीयम् इत्यस्य वर्णनम् । सन्धिं कृत्वा सम्भाषा सन्धायसम्भाषा ।

– विग्रहं कृत्वा सम्भाषा विगृह्यसम्भाषा ।

– एतम् एव अनुलोमतः प्रतिलोमतः च इति अन्ये नामानि वर्तेते ।

ज्योतिषचन्द्र सरस्वतिः

– सन्धायसम्भाषा प्रतिपक्षेण सन्धिं कृत्वा विचारः । एषा तु शास्त्रतत्त्वनिर्णयाय आश्रियते ।

– विगृह्यसम्भाषा तु प्रतिपक्षेण विग्रहं कृत्वा तं निर्जेतुम् इति ज्ञेयम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

३) **सन्धायसम्भाषा** – सूत्रम् १७

चरक: – अस्य सम्भाषाप्रकारस्य वर्णनान्तर्गतम् एतां सम्भाषां योग्या व्यक्ति: तथा सम्भाषाया: विधि: एतयो: द्वयो: घटकयो: वर्णनम् अस्ति ।

सन्धायसम्भाषायै योग्या व्यक्ति: --

चरक: – ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्ना अकोपना अनुपस्कृतविद्

अनुसूयका अनुनेया अनुनयकोविद्

क्लेशक्षमा प्रियसम्भाषणा

एतै: गुणै: युक्तै: व्यक्त्या सह सन्धायसम्भाषा करणीया ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – द्वयो: सम्भाषयो: मध्ये ज्ञानविज्ञानादिमता या सम्भाषा विधीयते परेण सह सा सम्भाषा सन्धायसम्भाषा ।

– ज्ञानं नाम शास्त्रार्थज्ञानं विज्ञानं नाम शास्त्रार्थस्य निश्चय: च ।

– वचनं नाम पूर्वपक्षस्य उक्ति: प्रतिवचनं नाम तस्मिन् उत्तरम् ।

– एतै: गुणै: युक्ता अपि यदि पुरुषः क्रोधी स्यात् तर्हि विगृह्यं शक्यं: अत: 'अकोपन:' इति गुण: वर्णित: ।

– अनेन सह यदि कोऽपि पण्डित: विकृतविद्यया तथा विस्मृतिसंशयादिभि: युक्तः स्यात् तर्हि सः वादं कर्तुं असमर्थ: भवेत् वा कोपं उत्पादयेत् अत: 'अनुपस्कृतविद्य:' एष: गुण: आवश्यक: । एतै: गुणै: सह असूया गुण: भवेत् तर्हि सा सम्भाषा अयोग्या अत: 'अनसूयक:' इति गुण: अपि आवश्यक: ।

–अनुनय: इत्यस्य अर्थ: येन सह विगृह्यसम्भाषां अकृत्वा सन्धायसम्भाषा करणीया इति उपदेश: ।

– सम्भाषणे कटुवचनादीन् सोढुं शक्नुयात् ईदृश: क्लेशक्षम: पुरुष: स्यात् ।

– एतै: गुणै: युक्तेन मनुष्येण सह सन्धायसम्भाषा करणीया ।

योगीन्द्रनाथ सेन: – सन्धायसम्भाषां कर्तुं योग्यस्य पुरुषस्य गुणा: वर्णिता: ।

– विज्ञानं नाम शास्त्रान्तरज्ञानम् ।

– वचनं नाम पूर्वपक्षस्य उक्ति: । प्रतिवचनं नाम उत्तरस्वरुपि वचनम् ।

– अनुपस्कृतविद्य: नाम अविकृतविद्ययायुक्त: ।

– 'अनुनेय' नाम अनुनयाय अर्ह: ।

ज्योतिषचन्द्र सरस्वति:– मोक्षे धी: ज्ञानम् । अन्यत्र विज्ञानं शिल्पशास्त्रयो: धी: ।

– वचनप्रतिवचनम् – वादप्रतिवादक्षमता ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## सन्धायसम्भाषा विधि: –

चरक: – योग्यपुरुषेण सह विस्त्रब्धं भूत्वा चर्चा करणीया । शङ्का: अपि तं विस्त्रब्ध: सन् प्रष्टव्या:

– यदि स: कमपि प्रश्नं पृच्छेत् तर्हि स्पष्टम् उत्तरणीयम् । निग्रहभयात् उद्विग्नता न करणीया ।

– प्रतिपक्षिणं पराजित्य न आनन्देत् । स्वविजयं अन्यस्मै न कथयेत् । मोहात् एकान्तग्राही न भवेत् । आत्मानम् अज्ञातविषयस्य चर्चा न करणीया । प्रतिपक्ष: स्वपक्षं स्वीकुर्यात् इति विनम्रतया साधयेत् । सर्वत्र विनम्रतया व्यवहर्तव्यम् । एषा एव सम्भाषा अनुलोमसम्भाषा इति अपि उच्यते ।

चक्रपाणि: –

– विस्त्रब्धं भवनं नाम पराजयात् भयमुक्तं भाषणम् । आत्मश्लाघां मा कुर्यात् ।

– जल्पोक्तं निग्रहस्थानं सन्धायसम्भाषायां अग्राह्यम् ।

– अविदित: विषय: सम्यक् विनम्रतया प्रयत्नतेन ज्ञातव्य: । छलजातिप्रयोग: न कुर्यात् ।

गङ्गाधर: –

– विस्त्रब्ध: इत्यस्य अर्थ: विश्वस्त: ।

– एकान्तग्राही –एकान्तं निरन्तरं तदुत्तराशक्यविषये पुन: पुन: ग्रहणम् । शेषम् अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन: – विस्त्रब्ध: नाम विश्वस्त: । मोह: इति अज्ञानम् । अज्ञानेन एकान्तग्राही न भूयात् । इत्यर्थ: अज्ञात: विषय: एकान्तिकेन न ग्रहणीय: ।

ज्योतिषचन्द्र सरस्वति: – विस्त्रब्ध: इति सरलतया सह । विश्वस्त: च । मोह नाम अज्ञानम् ।

– एकान्तग्राही इति सिद्धान्तं विहाय एकस्य एव पक्षस्य आश्रय: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ४) विगृह्यसम्भाषा विधि:

चरक: – आत्मन: योग्यतां ज्ञात्वा अन्यै: सह विगृह्यसम्भाषा करणीया ।

– जल्पात् पूर्वम् एव प्रतिपक्षी स्वयं च एतयो: मध्ये क: श्रेष्ठ: ? कीदृशी परिषद् ? इत्यादय: विषया: सम्यक् परीक्षणीया: ।

– सम्यक् परीक्षा हि बुद्धिमतां कार्यप्रवृत्तिनिवृत्तिकालौ शंसति । तस्मात् कुशला: परीक्षाम् अभिप्रशंसन्ति ।

चक्रपाणि: – अन्य: इत्यस्य अर्थ: अवशिष्ट: नाम य: विशेषज्ञानरहिता तेन सह विगृह्यसम्भाषा करणीया ।

– वादे गुरु: (श्रेष्ठ:) ब्रह्मचारी मनुष्य: अधिकृतौ भवत: ।

– न्यायशास्त्रे उक्तं यत्

''तं शिष्यगुरुसब्रह्मचारिविशिष्ट श्रेयोर्थिभिरनसुसुभिरभ्युपेयात् ।'' न्यायदर्शन ४ । २ । ४०

– श्रेष्ठ: , ब्रह्मचारी , विशिष्टकल्याणाकांक्षी , ईर्षारहित: ईदृश: पुरुष: शिष्य: करणीय: ।

– विगृह्ये सम्भाषणं जल्प: अथवा वितण्डा स्वरुपेण करणीयम् ।

– जल्प: – यथानियमं विनयार्था वादप्रवृत्ति: ।

– वितण्डा – केवलं प्रतिपक्षस्य दोषदर्शनम् ।

गङ्गाधर: – अन्य: इत्यस्य अर्थ: ज्ञानविज्ञानवचनप्रतिवचनै: सह असम्पन्ना कोपिष्टा उपस्कृतविद्या असूयका अननुनेया अनुनयमूर्खा क्लेशअसहिष्णु: अप्रियसम्भाषका ईदृश्या व्यक्त्या सह विगृह्यसम्भाषा करणीया ।

– कुशल: – आत्मन: श्रेयसा परस्मात् उत्कृष्टविद्याबुद्ध्वायादिना योगं पश्यन् कुशल: ।

– शेष: अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन:– जल्पात् पूर्वमेव जल्पलक्षणे द्रष्टव्यम् ।

– जल्पान्तरं नाम जल्पकस्य विशिष्टान् गुणदोषान् पश्यत् ।

– परावरन्तरम् नाम प्रतिवादी स्वयं च एतयो: वैशिष्ट्ये पश्येत् ।

– बुद्धिमती व्यक्ति: सम्यक् परीक्ष्य कार्यस्य हिताहितं विचार्य एव कार्याय प्रवर्तते ।

ज्योतिषचन्द्र सरस्वति: – जल्पान्तरं नाम जल्प: अथवा वितण्डा

– विगृह्यसम्भाषा प्रसंगे अनुकूलत्वे सति वादप्रवृत्ति: प्रतिकूलत्वे सति च वादनिवृत्ति: करणीया एतद् सम्यक् परीक्षाया: फलम् । अत: वादात् प्राक् एव जल्प: जल्पक: परिषद् इत्यादय: परीक्षणीया: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

सूत्रे – २२ – २३.

– विगृह्ये युक्त्या स्वविचारान् स्थापयेत् । तथैव प्रतिपक्षस्य विचाराणां खण्डनम् अपि युक्त्या कुर्यात् । कासुचित् व्यक्तिषु विगृह्यभाषणं तीव्र द्रोहम् उत्पादयते ।

– कृद्धां व्यक्तिं न किमपि अकार्यम् अत: सा: किमपि जल्पेत् ।

– अत: कुशला व्यक्ति: सज्जनसभायां कलहं न प्रशंसति ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन: – विगृह्यजल्पं कथं कुर्यात् अस्य उपदेश: अस्मिन् सूत्रे अस्ति ।

– युक्तिपूर्वं नाम प्रमाणै: उपपादितम् ।

ज्योतिषचन्द्र सरस्वति: – अनेन श्लोकद्वयेन विगृह्यसम्भाषा निन्दिता अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### ५) जल्पकस्य गुणदोषा: –

चरक: – परीक्षणसमये जल्पकस्य गुणदोषान् परीक्षेत ।

| – | जल्पकस्य गुणा: | जल्पकस्य दोषा: |
|---|---|---|
| | श्रृतम् | कोपनत्वम् |
| | विज्ञानम् | अवैशारद्यम् |
| | धारणम् | भीरुत्वम् |
| | प्रतिभानम् | अधारणम् |
| | वचनशक्ति: | अनवहितत्वम् |

– प्रतिपक्षी स्वयं च एतयोः मध्ये एतेषां गुणानां गुरुलाघवत्वं तोलनीयम् ।

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः – श्रुतम् अध्ययनम् । विज्ञानम् विज्ञत्वम् । धारणम् शब्दतः शास्त्राभ्यासः ।

– प्रतिभानम् बुद्धिप्रकाशः परोक्तौ द्रुतावबोधशक्तिः ।

– वचनशक्तिः वाचनाशक्तिः ।

– अधारणत्वम् शब्दतः अभ्यासविरहः ।

– अनवहितत्वम् अवधानविरहः ।

– प्रतिनीपक्षेण सह स्वयं तोलनियः ।

योगीन्द्रनाथ सेनः

– श्रुतम् – गुरुमुखात् शास्त्रस्य श्रवणम् ।

– विज्ञानम् – अवबोधः ।

– धारणम् – मनसा धारणम् ।

– प्रतिभा – प्रत्युत्पन्नमतित्वम् ।

– वचनशक्तिः – वचनसामर्थ्यम् ।

– अवैशारद्यम् – अपाण्डित्यम् ।

– अधारणत्वम् – अनभ्यासः ।

– अनवहितत्वम् – अनवधानम् ।

ज्योतिषचन्द्र सरस्वतिः

– श्रुतम् – गुरुमुखात् शब्दतः अधिगतम् ।

– विज्ञानम् – अर्थतत्त्वं तदधिगमः ।

– धारणम् – अभ्यासात् कण्ठकरणम् ।

– प्रतिभानम् – प्रत्युत्पन्नमतित्वम् ।

– वचनशक्तिः – वक्तृत्वशक्तिः ।

– कोपनत्वम् – क्षणक्रोधत्वम् ।

– अवैशारद्यम्  –  अपाण्डित्यम् ।

– अधारणत्वम्  –  विस्मृति: ।

– अनवहितत्वम् –  असावधानता ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ६) परलक्षणम्

चरक: – पर: त्रिविध: सम्पद्यते – प्रवर:  प्रत्यवर: सम:

– इदं त्रैविध्यं गुणविनिक्षेपत: भवति ।

– कात्स्न्र्येन अस्य भेद: मा कुर्यात् ।

चक्रपाणि: – 'गुणविनिक्षेपत:' नाम गुणानां परिमाणेन उत्कृष्टा मध्या वा हीना अवस्था ।

– प्रत्यवर: नाम हीन: ।

– वादापेक्षया समानगुणानां सम: ।

– कुलक्षयादीनाम् अपेक्षया भेद: न अभिप्रेत: ।

गङ्गाधर: – अविशेषा टीका ।

योगीन्द्रनाथ सेन: – इदं त्रैविध्यं श्रुतविज्ञानादीनां गुणानां परिणामात् भवति ।

– स्वापेक्षया उत्कृष्टगुणस्य प्रवरपर: भवति ।

– स्वापेक्षया हीनगुणस्य प्रत्यवरपर: भवति ।

– स्वसमानगुणानां समपर: भवति ।

ज्योतिषचन्द्र सरस्वति: – पर: इति विपक्ष: ।

– स्वगुणा: परपक्षस्य गुणै: सह तोलनीया: । शेषम् अर्थश: विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ७) परिषद परीक्षा – सूत्रम् २०

चरक: –

परिषद्

ज्ञानवती ← परिषद् → मूढपरिषद्

एतद् द्विप्रकारका परिषद् पुन: त्रिप्रकारका अस्ति ।




चक्रपाणि: –

– मूढपरिषद् इत्यस्य अर्थ: मूढवत् किमपि कार्यम् ।

– य: सम्पूर्णतया मूढ: स: किमपि न भाषते नाम वादे स: सहभागी भवितुं न शक्नोति ।

गङ्गाधर: –




– परिषद: मुख्ये द्वे प्रकारे स्त: ।

– ज्ञानवती ।

– मूढा ।

– पुन: तयो: प्रत्येकश: त्रय: भेदा: भवन्ति ।

– ज्ञानवती – ज्ञानवती सुहृद्

ज्ञानवती उदासीना

ज्ञानवती प्रतिनिविष्टा ।

– मूढा – मूढा सुहृद्

– मूढा उदासीना

– मूढा प्रतिनिविष्टा

– एवं षड्प्रकाराणां परिषद: सन्ति ।

– उदासीना – इत्यस्य अर्थ: यस्यां परिषदि न सुहृद् न वा शत्रु: एतादृश: सभासदा: सन्ति ।

– निविष्ट इत्यस्य अर्थ: उपवेशनम् । प्रति नाम सौहार्दस्य अभावेन युक्तम् ।

प्रतिनिविष्टा – यस्यां परिषदि आत्मभि: सह सौहार्दस्य अभावयुक्ता: सभ्या: उपविष्टा: सन्ति सा ।

योगीन्द्रनाथ सेन: – प्रतिकूलत्वेन निविष्टा: सभ्या: यत्र सा प्रतिनिविष्टपरिषद् । शत्रुपरिषद् इत्यर्थ:।

– उदासीना: न मित्राणि नच अमित्रा: ।

ज्योतिषचन्द्र सरस्वति:

– वितर्कसभाया: भेद: ।

– परिषद् नाम वितर्कसभा ।

– ज्ञानवती शास्त्रज्ञानसम्पनै: तद्विद्यैरन्विता ।

– सुहृत्परिषत् आत्मनोऽनुकूलै: सदस्यैरन्विता ।

– उदासीनपरिषत् स्वपक्षे विपक्षे च पक्षपातरहितै: सदस्यै: अन्विता ।

– प्रतिनिविष्टपरिषत् प्रतिवादिनि निविष्टै: पक्षपातिभि: सभासद्‌भि: युक्ता ।

निष्कर्ष – वैधर्म्यं नास्ति ।

८) **परिषद्प्रकारानुसारेण संभाषा** – सूत्रे २० – २१

चरक: – ज्ञानविज्ञानादिसंपन्नप्रतिनिविष्टपरिषद् तथा प्रतिनिविष्टमूढपरिषद् एतयो: मध्ये केनापि सार्धं कोऽपि जल्प: न कुर्यात् ।

– मूढउदासिना मूढसुहृदा एतादृशयो: परिषदो: य: न यशस्वी तथा यं विद्वांस: द्विषन्ति एतादृश्या व्यक्त्या सह जल्पं कुर्यात् ।

– प्रतिपक्षेण सह कया पद्धत्या जल्पं भवेत् इत्यस्य वर्णनम् अस्ति ।

– स्वापेक्षया श्रेष्ठव्यक्त्या गृहयविस्वरुपस्य जल्पं न कुर्यात् । मूढसुहृदपरिषदि स्वापेक्षया प्रत्यवर: अथवा स्वसमानगुणयुक्त: एतादृशाभ्याम् व्यक्तिभ्यां संभाषा कुर्यात् ।

– उदासीनापरिषद् यदि गुणसम्पन्ना स्यात् तर्हि स्वापेक्षया गुणवत्या व्यक्त्या सह सम्भाषां न कुर्यात् । प्रत्युत स्वापेक्षया प्रत्यवरव्यक्त्या सह तां कुर्यात् ।

चक्रपाणि: – 'प्रतिक्षेपिकम् ' नाम प्रतिपक्षस्य वचनं खण्डयेत् ईदृश: प्रतिक्षेपिक: शब्द: ।

गङ्गाधर: – कीदृश्यां परिषदि कथं सम्भाषणीयम् इत्यस्य वर्णनम् । शेषम् अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन: – मूढसुहृद् मूढउदासीना च परिषदो: जल्पनियमा: जल्पविधि: च एतेषां वर्णनम्

– प्रतिनिविष्टपरिषदि विगृह्यसम्भाषा निषिद्धा ।

ज्योतिषचन्द्र सरस्वति:– अर्थश: विवेचनम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## ९) निग्रहोपायः – सूत्रम् – २१

| चरकः – | प्रतिवादिनः दोषः | उपायः |
|---|---|---|
| | श्रुतहीनम् | महता सूत्रपाठः |
| | विज्ञानहीनम् | कष्टशब्दयुक्तं वाक्यानि |
| | वाक्यधारणाहीनम् | आविद्धदीर्घसूत्रसंकुलैः वाक्यदण्डकाः । |
| | प्रतिभाहीनम् | अनेकाविधेन अनेकार्थवाचि वचनानि । |
| | वचनशक्तिहीनम् | अर्धोक्तस्य वाक्यस्य आक्षेपः |
| | अविशारदम् | अपत्रपणम् |
| | कोपनम् | आयासनम् |
| | भीरुम् | वित्रासनम् |
| | अनवहितम् | नियमनम् |

एवम् एतैः उपायैः अवरम् परम् शीघ्रम् अभिभवेत् ।

चक्रपाणिः – प्रतिभाहीनः नाम यः मनुष्यः पदानां अनेकार्थान् न जानाति । केन अभिप्रायेण शब्दः योजितः एतद् अजानानः मनुष्यः ।

– अविशारदः नाम येन सभा पूर्वं न दृष्टा ईदृशः मनुष्यः । एषः पुरुषः लज्जितः सन् वादाय असमर्थः भवति ।

गङ्गाधरः –

– कोपिष्टां व्यक्तिं क्लेशदैः वचनैः पराभावयेत् । भीरुं व्यक्तिं त्रासजैः वचनै पराभावयेत् ।

– अनवहितं नाम अवधानरहितं व्यक्तिं नियतवचनैः पराभावयेत् । परम् इति प्रतिपक्षम् ।

– प्रतिभा – श्रुतमात्रं अवबोधः । वाक्यधारणाहीनम्  – अल्पमेधसम् ।

– श्रुतहीनम् – तत् शास्त्रे अनधीतम् । विज्ञानहीनम् – तत् शास्त्रार्थ तत्वज्ञानहीनम् ।

– अविशारदम् – पाण्डित्यहीनम् ।

योगीन्द्रनाथ सेनः – अर्थशः विवेचनम् । गंगाधरेण समं वर्णनम् ।

ज्योतिषचन्द्र सरस्वतिः– श्रुतहीनम् – अकण्ठस्थशास्त्रम् ।

– विज्ञानहीनम् – शास्त्रार्थज्ञानहीनम् । प्रतिभा – प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा ।

– वचनशक्तिहीनम् – हृदगतं वाचा प्रकाशयितुम् असमर्थम् । अविशारदम् – भाषाज्ञानहीनम् ।

– 'आयस्तो कुपित: क्षिप्त:' अनेन कोषप्रामाण्यानुसारं आयासेन क्रोध: वर्धते । शेष: अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

१०) वादप्रवृत्तौ कार्यम् – सूत्रे २४ – २५

चरक: – वाद: कथं करणीय: अस्य वर्णनं पूर्वसूत्रे अभवत् । तदनुसारं वादे प्रवृत्ति: स्यात् ।

– वादप्रवृत्ते: प्राक् अधोलिखितं कार्यं करणीयम् –

– परिषद: सदस्यान् आत्मानुकूलान् कारयेत् ।

– अभ्यस्तविषयान् एव वादार्थं चिनुयात् ।

– य: विषय: प्रतिपक्षं दुर्बोध: तं विषयं सदस्या: प्रस्तुयु: ।

– येन सम्पूर्णा सभा प्रतिपक्षप्रतिकूला भवेत् तादृशं उपायं योजयेत् ।

– सदस्येभ्य: प्रार्थनीयं यद् कं विषयं अनुलक्ष्य वाद: करणीय: एतद् भवद्भि: निश्चितव्यम् । तथैव तै: यथेष्टं यथायोग्यं यथाभिप्रायं वादवादमर्यादे निश्चितव्ये । एवम् उक्त्वा तूष्णीं आसीत् ।

चक्रपाणि: –

– वादारम्भात् पूर्वमेव किं करणीयम् अस्य वर्णनम् अस्ति ।

– 'अयनभूतम्' इत्यस्य अर्थ: अभ्यासेन सुगमित: अथवा अभ्यस्त: ।

– 'परस्य भृशदुर्गम्' – इत्यस्य अर्थ: प्रतिपक्षं अविदित: विषय: । दुर्गवत् दुर्गम: विषय: ।

– सभा प्रतिपक्षम् यथा पराङ्मुखा भवेत् तादृश: उपायं वादप्रारम्भे एव करणीय: ।

– उदाहरणार्थम् – प्रतिवादिन: पक्ष: एवं स्यात् यद् 'नास्ति परलोके नास्ति कर्मफलम् । अस्मिन् प्रसंगे तादृशा: उपाया: करणीया: ये तं पक्षं स्वाभाविक विरोधं कुर्वाणा: स्वपक्षं सिद्धिदायका: तथा परिषदा अपि स्वीकार्या: स्यु: ।

– यदा परिषद् स्वानुकूला भवेत् तदा तूष्णीं स्यात् । अतिभाषणात् वक्तु: महानता खण्डयति ।

गङ्गाधर: – अर्थश: अविशेषम् विवेचनम् ।

योगीन्द्रनाथ सेन: – अयनभूतम् – अभ्यासात् मार्गीभूतम् । अभ्यस्तम् इत्यर्थ: ।

ज्योतिषचन्द्र सरस्वति: – परिषदा परिषत् सदस्यैः । शेषः अविशेष ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

११) **वादमर्यादालक्षणम्** – सूत्रम् – २६

चरक: – वादमर्यादालक्षणम् – इदं वाच्यम्  इदं अवाच्यम् एवं विपक्षी पराजयते ।

चक्रपाणि: – वादशब्देन विगृह्यसम्भाषायां पक्षप्रतिपक्षयो: वचनम् अभिप्रेतम् ।

– सन्धायसम्भाषायां वादशब्देन तत्वबुभूषूणां पुरूषाणां चर्चा अपेक्षिता ।

गंगाधर: – वादमर्यादा नाम वादस्य सीमा ।

योगीन्द्रनाथ सेन: – मर्यादा नाम सीमा । कथं कुत: पर्यन्तं च वाद: करणीय: अस्य सीमा ।

ज्योतिषचन्द्र सरस्वति: – पराजयते नाम अत्रैव निग्रहस्थानम् अस्ति इति निर्णयदानम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## तृतीय अधिकरणम्।

## भिषग्वादमार्गज्ञानार्थम् अधिगम्यानि पदानि ।

सूत्राणि २७ त: ६७

अस्मिन् अधिकरणे ३ उपाधिकरणानि सन्ति ।

(अ) उद्देश: – सूत्रम् २७

(ब) ४४ वादमार्ग पदानि – सूत्राणि २८ त: ६६

(क) वाद: आयुर्वेदे कर्तव्यम् । – सूत्रम् ६७

(अ) उद्देश: – सूत्रम् २७

चरक: – भिषग्वादमार्गज्ञानार्थम् इमानि पदानि वहन्ति ।

वादमार्गपदानि

| क्र. | वादमार्गपद | क्र. | वादमार्गपद |
|---|---|---|---|
| १ | वाद: | २३ | प्रयोजनम् |
| २ | द्रव्यम् | २४ | सव्यभिचारम् |

| | | | |
|---|---|---|---|
| ३ | गुणा: | २५ | जिज्ञासा |
| ४ | कर्म | २६ | व्यवसाय: |
| ५ | सामान्यम् | २७ | अर्थप्राप्ति: |
| ६ | विशेष: | २८ | संभव: |
| ७ | समवाय: | २९ | अनुयोज्यम् |
| ८ | प्रतिज्ञा | ३० | अननुयोज्यम् |
| ९ | स्थापना | ३१ | अनुयोग: |
| १० | प्रतिष्ठापना | ३२ | प्रत्यनुयोग: |
| ११ | हेतु: | ३३ | वाक्यदोष: |
| १२ | दृष्टान्त: | ३४ | वाक्यप्रशंसा |
| १३ | उपनय: | ३५ | छलम् |
| १४ | निगमनम् | ३६ | अहेतु: |
| १५ | उत्तरम् | ३७ | अतीतकालम् |
| १६ | सिद्धान्त: | ३८ | उपालम्भ: |
| १७ | शब्द: | ३९ | परिहार: |
| १८ | प्रत्यक्षम् | ४० | प्रतिज्ञाहानि: |
| १९ | अनुमानम् | ४१ | अभ्यनुज्ञा |
| २० | ऐतिह्यम् | ४२ | हेत्वन्तरम् |
| २१ | औपम्यम् | ४३ | अर्थान्तरम् |
| २२ | संशय: | ४४ | निग्रहस्थानम् |

चक्रपाणि: – भिषजां वादमार्ग: भिषग्वादमार्ग: ।

– अत्र केवलं निर्देश: अस्ति । वादादिनां विस्तृतं वर्णनम् अग्रिमे सूत्रे अस्ति ।

– अत्र केवलं संज्ञा कथनम् अस्ति ।

गङ्गाधर:

– अस्मिन् सूत्रे अधिगम्यानि इति पदस्य स्थाने अधिगन्तव्यानि इति पाठ: स्वीकृत: ।

– पदम् – पदानि अर्थवन्ति वर्णात्मका: शब्दा: ।

– अधिगन्तव्यानि इति अर्थत: विधित: च ज्ञातव्यानि ।

– वादत: निग्रहस्थानपर्यन्तं चतुश्चत्वारिंशत् पदानि सन्ति ।

गौतमेन षोडशपदानि वर्णितानि । तेषां नामानि वर्णनं च एतेषां संक्षेपेण गङ्गाधर: वर्णयति ।

गौतमोक्तानि षोडश पदानि चरकोक्तानि चतुश्चत्वारिंशात् पदानि एतयो: समन्वय: अधोलिखितवत्

| गौतम: | चरक: |
|---|---|
| प्रत्यक्ष: | प्रत्यक्ष: अनुमानम् उपमानम् ऐतिह्य:<br>आप्तोपदेश: अर्थापत्ति: सम्भव: शब्द: |
| प्रमेय: | द्रव्य: गुण: कर्मन्<br>सामान्य: विशेष: समवाय: |
| अवयव: | प्रतिज्ञा – स्थापना प्रतिष्ठापना च<br>हेतु उदाहरणम् उपनय:<br>अहेतु निगमन |
| दृष्टान्त: | दृष्टान्त: |
| निर्णय: | व्यवसाय: |
| निग्रहस्थानम् | निग्रहस्थानम् अनुयोज्य प्रतिज्ञाहानि<br>अननुयोज्य अर्थान्तर: अनुयोग:<br>अभ्यनुज्ञा प्रत्यनुयोग: |
| हेत्वाभास: | वाक्यप्रशंसा वाक्यदोष: अतीतकाल:<br>अहेतु: सव्यभिचार: |
| वाद: | वाद: जिज्ञासा |
| जाति: | उपालम्भ: परिहार: |

| | |
|---|---|
| संशय: | संशय: |
| प्रयोजनम् | प्रयोजनम् |
| सिद्धान्त: | सिद्धान्त: |
| तर्क: | – |
| निर्णय: | – |
| जल्प: | – |
| वितण्डा | – |
| छल: | छल: |

– प्रमेय व्याख्या –

आत्मशरीरेन्द्रियार्थ बुद्धिमन: प्रवृत्तिदोषप्रेत्यभावफलदु:खापवर्गस्तु प्रमेयम् । ( गौतम: )

योगीन्द्रनाथ सेन: – शब्दार्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – वादमार्गज्ञानार्थं पदानां लक्षणमत: । उदाहरणत: च क्रमश: वर्णनात् पूर्व तेषां संज्ञावर्णनम् कृतम् अस्ति ।

निष्कर्षं – वैधर्म्यं नास्ति ।

चतुश्चत्वारिंशत् वादमार्गज्ञानार्थपदानि ।

अस्मिन् अधिकरणे आहत्य ४४ पदानां वर्णनं कृतम् । तेषां क्रमश: विवेचनम् अग्रिमवत् --

(१) वाद: – सूत्रम् २८

चरक: – वाद: नाम यत् परेण सह शास्त्रपूर्वकं विगृह्य कथयति ।

– स द्विविध – जल्प: वितण्डा

– पक्षाश्रितयो: वचनं जल्प: । जल्पविपर्यय: वितण्डा ।

– उदा. प्रथम: पक्ष: – पुनर्भव: अस्ति । द्वितीय: पक्ष: – पुनर्भव: नास्ति ।

अत्र स्वस्वपक्षस्य हेतुभि: स्वस्वपक्षस्य स्थापना परपक्षं च दोषयुक्तं दर्शयितव्यम् इति जल्प: ।

वितण्डा नाम परपक्षे दोषवचनमात्रम् एव ।

चक्रपाणि: – वादलक्षणस्य वर्णनम् । अत्र इति पदेन विगृह्यवाद: अभिप्रेत: ।

– तत्वबुभुत्सुवाद: सन्धायसम्भाषायां भवति । शास्त्रपूर्वकं वाद: करणीय: इति वचनेन अर्थादि: कलहयुक्त: वाद: निषिद्ध: । अस्मिन् विगृह्यसम्भाषारुपिणि वादे छल: जाति: निग्रहस्थानं च एतै: विजिगिषया प्रवृत्तव्यक्तीनां प्रयोग: प्राप्यते।

जल्पे स्वपक्षस्य स्थापना क्रियते प्रत्युत वितण्डायां य: उत्तरवादी अस्ति तस्य पक्ष: दूषणीय: इत्येव कार्यम् । वितण्डायां स्वपक्षस्थापनाया: प्रयत्न: न भवति उत परपक्षदूषणां भवति । एष: जल्पवितण्डयो: भेद: ।

गङ्गाधर: – उद्दिष्टे वर्णितेषु वादादि वादमार्गपदेषु यदि वादस्वरुपज्ञानं न भवेत् तर्हि वादमार्गज्ञानं न संभवेत् । अत: सर्वप्रथमं वाद: वर्णित: । अस्मिन् सूत्रे वादस्य विशेषलक्षणं वर्णितम् ।

– सामान्यलक्षणम् सम्भाषाविवेचने आगतम् ।

– न्यायोक्तं सूक्तं तथा तस्मिन् वात्स्यायनभाषास्य उद्धरणं दत्तम् ।

– जल्पे छल: जाति: निग्रहस्थानं, साधनं उपालम्भ: च एते न सन्ति । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन:

– वादी प्रतिवादी च परस्परेण सह शास्त्रपूर्वकं प्रमाणतर्कद्वारेण स्वपक्षस्य स्थापना परपक्षस्य खण्डनं च कुरुत: । तस्मिन् सिद्धान्तस्य विरुद्धं पञ्चावयविना वाक्येन युक्तं वचनं नाम वाद: ।

– वाद: एव विगृह्यसम्भाषा । शेषं शब्दार्थविवेचनम् ।

ज्योतिषचन्द्र सरस्वति:

– शास्त्रज्ञै: अन्यै: शास्त्रज्ञै: सह विजिगिषुवृत्या शास्त्रानुसारं पक्षाश्रितं वितर्ककरणं नाम वाद: ।

– न्यायोक्त सूत्रस्य उद्धरणम् । शेषा टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**द्रव्य – गुण – कर्म – सामान्य – विशेष समवाय:** सूत्रम् २९

चरक: – सूत्रस्थाने एतेषां स्वलक्षणानि प्राक्कथितानि ।

चक्रपाणि: – दीर्घञ्जीवितीये अध्याये एतेषां लक्षणानि वर्णितानि ।

गङ्गाधर: – वादवर्णनोत्तरं वाद्य घटकानां वर्णनम् इत: प्रारभ्यते ।

– गङ्गाधरेण शिष्याणां व्यवसायार्थं स्मरणार्थं च पुनः द्रव्यादिघटकानां विस्तृतं वर्णनं कृतम् । द्रव्यगुणकर्मसामान्यविशेषसमवायः एतान् सर्वान् गङ्गाधरः 'वाद्य' इति संज्ञां योजयति ।

– लक्षणानां वर्णनं दीर्घञ्जीवितीय अध्यायवत् । अविशेषः

योगीन्द्रनाथ सेनः – प्राक् वर्णितं सत् तस्य न पुनः अभिधानं कृतम् ।

ज्योतिषचन्द्र सरस्वतिः – अविशेषः

निष्कर्षः – वैधर्म्यं नास्ति ।

**प्रतिज्ञा** – सूत्रम् – ३०

चरकः – प्रतिज्ञा नाम साध्यवचनम् । यथा नित्यः पुरुषः इति ।

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः – वादं कुर्वता प्रथमं प्रतिज्ञा करणीया ।

– वादं कुर्वन्त्या व्यक्त्या प्रज्ञापनीयधर्मेण विशिष्टस्य धर्मस्य साध्यस्य परिग्रहवचनरुपी साध्यनिर्देशः इत्येव प्रतिज्ञा इति उच्यते ।

– गौतमेन अपि एवं वर्णितम् । ''साध्यनिर्देशः प्रतिज्ञा इति ।''

– वात्स्यायन –

प्रज्ञापनीयेन धर्मेण धर्मिणः विशिष्टस्य परिग्रहवचनं प्रतिज्ञा साध्यनिर्देशः । अनित्यः शब्दः इति ।

–नित्यः पुरुषः इति । अस्मिन् उदाहरणे नित्यत्वेन प्रज्ञापनीयधर्मेण विशिष्टधर्मिणः आत्मनः परिग्रहं कृत्वा व्यवस्था करणीया नाम प्रतिज्ञा ।

– निगमनं साध्यवचनं नास्ति । हेत्वापदेशात् प्रतिज्ञायाः पुनर्वचनं नाम निगमनम् ।

– आदौ साध्यवचनस्य प्रतिज्ञा करणीया ।

– वादाय प्रवृत्ते सति प्रतिज्ञा करणीया । अप्रवृत्तवादे प्रतिज्ञा न भवति ।

– प्रतिज्ञा अन्वर्थसंज्ञा अस्ति । प्रति इत्थम्भावेन जानीते यत् सा प्रतिज्ञा ।

– पक्षविषये वात्स्यायनः वर्णयति यत्

– समानाधिकरणविरुद्धधर्मयोः पक्षप्रतिपक्षरुपिणि वादिषु यः वस्तुनिष्ठः प्रज्ञापनीयः धर्म एव अस्ति तद् धर्मविशिष्टः धर्मी नास्ति । स पक्षः ।

– एकस्य पक्षः अस्तिः – अनित्यः पुरुषः । अपरः पक्षः अस्ति – नित्यः पुरुषः ।

पुरुषः किम् इति उभयोः पक्षः अस्ति । न एवम् । तयोः पक्षः अस्ति – प्रज्ञापनीयधर्मविशिष्ठः पुरुषः इति । शेषः अविशेषः

योगीन्द्रनाथ सेनः

– साध्यस्य वचनं प्रतिज्ञा ।

– तदुक्तम् – साध्यनिर्देशः प्रतिज्ञा – न्यायदर्शनम् १।१।३३

ज्योतिषचन्द्र सरस्वतिः

– गौतमोक्तम् – साध्यनिर्देशः प्रतिज्ञा । उदाहरणे पुरुष इति पक्षे नित्यत्वं इति साध्यं अस्ति ।

– अन्यत् उदाहरणम् – पर्वतो वह्निमान् । अस्यां प्रतिज्ञायां पर्वतः अस्मिन् पक्षे वह्निः इति साध्यस्य निर्देशः अस्ति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

स्थापना – सूत्रम् ३१

चरकः – हेतुः दृष्टान्तः उपनयः निगमनं च एतैः प्रतिज्ञायाः सिद्धिः करणीया नाम स्थापना ।

पूर्वं प्रतिज्ञा क्रियते पश्चात् स्थापना ।

उदा. : प्रतिज्ञा – नित्यः पुरुषः ।

हेतुः – अकृतकत्वात् ।

दृष्टान्तः – यथाऽऽकाशम् ।

उपनयः – यथा आकाशम् अकृतकम् तच्च नित्यम् तथा पुरुषः ।

निगमनम् – तस्मात् पुरुषः नित्यः ।

चक्रपाणिः – स्थापयति सिद्धं अर्थं परं प्रति साधयति इति स्थापना ।

– अत्र हेत्वादिभिः चत्वारैः घटकैः सिद्ध्यते । शेषः अविशेषः ।

गङ्गाधरः – वादिना प्रतिज्ञाप्य स्थापना कार्या ।

– पूर्वा कृता प्रतिज्ञा हेत्वादिभिः स्थिरीकरणीया इति प्रार्थना ।

– स्थिरीकरणं स्थापना नाम इह उच्यते ।

– एषा स्थापना द्विविधा भवति । – अ. दृष्टान्तसाधर्म्येण हेतुना ।

आ. दृष्टान्तवैधर्म्येण हेतुना ।

अ) दृष्टान्तसाधर्म्येण हेतुना –

पूर्वकृतायां प्रतिज्ञायां प्रज्ञापनेन प्रत्यक्षादिभि: उपलब्धिकारणै: दृष्टान्तसामान्यद्वारेण सिद्ध्वा तेन प्रतिज्ञार्थसामान्यद्वारेण दृष्टान्त: वर्णनीय: । तस्य दृष्टान्तस्य अपेक्षया 'तथा' इति उपसंहारं कृत्वा हेतो: उपदेशेन तस्या: प्रतिज्ञाया: पुनरुक्ति: करणीया ।

आ) दृष्टान्तवैधर्म्येण हेतुना –

तामेव पूर्वकृतां प्रतिज्ञां प्रज्ञापनेन प्रत्यक्षादिभि: उपलब्धिकारणै: विधर्मदृष्टान्तेन सिद्ध्वा साध्यवैधर्म्येण दृष्टान्त: वर्णनीय: । तस्य दृष्टान्तस्य अपेक्षया साध्यस्य नकारार्थिनम् उपसंहारं कृत्वा हेत्वोपदेशेन तस्या: प्रतिज्ञाया: पुनरुक्ति: करणीया ।

पूर्वं प्रतिज्ञां कृत्वा पश्चात् स्थापना भवति । अन्यथा प्रतिज्ञाभ्रंशेण निग्रहस्थानं प्राप्यते । अत: प्रतिज्ञां कृत्वा स्थापना करणीया । शेष: अविशेष: ।

<u>योगीन्द्रनाथ सेन:</u>

– हेतु: नाम उदाहरणस्य साधर्म्यवैधर्म्यरुपिण: साध्यस्य साधनम् ।

– दृष्टान्त: नाम उदाहरणम् ।

– उपनय: उदाहरणापेक्ष: साध्यस्य तथेति न तथेति वा उपसंहार: ।

– निगमनं हेत्वपदेशात् प्रतिज्ञाया: पुनर्वचनम् ।

– एते प्रतिज्ञादय: पञ्चावयवा: सन्ति ।

यथा प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा: । न्यायदर्शनम् १।१।३२

– साध्यवचनं नाम प्रतिज्ञा । तस्याः एव प्रतिज्ञाया: प्रतिज्ञातस्य साध्यस्य हेत्वादिभि: स्थापनं साधनं स्थापना । पूर्वं प्रतिज्ञा । पश्चात् स्थापना ।

– अकृतकत्वात् इति अनुत्पत्तिधर्मत्वात् । शेषा टीका शब्दश: विवेचनम् ।

<u>ज्योतिषचन्द्र सरस्वति:</u>

– दृष्टानुभूतै: हेतुभि: अनुमानप्रमाणेन तस्यार्थस्य पक्षे समन्वय: ।

– पक्षे सत्तानुमानमेव स्थापना ।

– साध्यनिर्देशात् परस्तात् तस्य स्थापना भवेत् ।

– अकृतकत्वात् इति उत्पत्ते: अभावात् ।

– ऐन्द्रियकत्वं नाम इन्द्रियग्राह्यत्वम् । शेष: अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति । गङ्गाधरस्य विशिष्टं वर्णनम् ।

**प्रतिष्ठापना** – सूत्रम् – ३२

चरक: – प्रतिज्ञाया: विपरीतपक्षेण स्वप्रतिज्ञास्थापनं नाम प्रतिष्ठापना ।

उदा: – प्रतिज्ञा – अनित्य: पुरुष: ।

हेतु: – ऐन्द्रियकत्वात् ।

दृष्टान्त: – यथा घट: इति ।

उपनय: – यथा घट: ऐन्द्रियक: सा च अनित्य: तथा च अयम् ।

निगमनम् – तस्मात् अनित्य: पुरुष: ।

चक्रपाणि: – प्रतिशब्द: विपरीत इति अर्थेन युज्यते । एषा प्रतिष्ठापना न्यायदर्शने प्रकरणसम हेत्वाभास: नाम्ना वर्णिता: ।

गङ्गाधर: – प्रतिज्ञा स्थापिते सति प्रतिवादिना प्रतिष्ठापना करणीया । वादिना कृताया: प्रतिज्ञाया: विपरीतस्य अर्थस्य स्थापना प्रतिवादिना करणीया एषा प्रतिष्ठापना इति उच्यते ।

प्रतिष्ठापना द्विविधा – अ) साध्यसाधर्म्योपदर्शनम्

आ) साध्यवैधर्म्योपदर्शनम्

– ऐन्द्रियकम् इत्यर्थ: इन्द्रियग्राहकत्त्वम् ।

– दृष्टान्तेन हेतुसाध्ययो: साधर्म्यं साधयित्वा पश्चात् उपनय: क्रियते ।

उदा. यथा इन्द्रियग्राह्य: घट: अनित्य: तथा इन्द्रियग्राह्य: पुरुष: अनित्य: ।

– दृष्टान्तस्य अपेक्षया उपसंहार: नाम उपनय: ।

– दृष्टान्ते साध्यसाधर्म्योपदर्शनप्रतिष्ठापना ।

– तथैव साध्यवैधर्म्योपदर्शनप्रतिष्ठापना अपि भवति ।

– एवमेव दृष्टात: अपि द्विविध:  – साध्यसाधर्म्यधर्मवान्

साध्य वैधर्म्य धर्मवान्

योगीन्द्रनाथ सेन: – विपरीतार्थस्य स्थापना प्रतिष्ठापना । वादिन: हेत्वादिभि: स्थापिताया: प्रतिज्ञाया: विपरीतार्थस्य हेत्वादिभि: स्थापिता प्रतिज्ञा नाम प्रतिष्ठापना ।

– ऐन्द्रियकत्वम् इति इन्द्रियग्राह्यत्वम् । शेषम् अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – जल्पे विरुद्धपक्षावतारणा कर्तव्येति तद् विरुद्धार्थस्थापनाद्वारेण प्रतिष्ठापना । शेषम् अर्थश: विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

हेतु: – सूत्रम् – ३३

चरक: – हेतु: नाम उपलब्धिकारणम् । तत् प्रत्यक्षम् अनुमानम् ऐतिह्यम् औपम्यम् ।

हेतुभि: यत् उपलभ्यते तद् तत्वम् ।

चक्रपाणि: – यद्यपि अविनाभावलिङ्गम् वचनम् नाम हेतु: तथापि अत्र लिङ्गग्राहक: इति प्रत्यक्षादय: प्रमाणान् एक हेतु: इति संबोधित: ।

– इमानि प्रत्यक्षादिनि प्रमाणानि हेतुमूलकानि सन् तान् हेतु: इति पदम् योजितम् । अन्यथा पुनश्च प्रत्यक्षादीनां अभिधानं इति पुनरुक्तिदोषम् भवेत् ।

– ‘ उपलब्धिकारणम् ’  नाम व्यापकसाध्यस्य उपलब्धे: कारणम् ।

– एतै: हेतुभि: यस्य ज्ञानस्य उपलब्धि: भवति तदेव तत्वम् ।

गङ्गाधर: – प्रतिज्ञाया: स्थापना कुर्वता  ‘हेतु’ आवश्यक: । स्थापने हेतु: भवति ।

– प्रतिज्ञाया: उपलब्धिकारणं नाम हेतु: । अत्र हेतु: पदेन उत्पत्तिकारणम् इति अर्थ: न ग्राह्य: ।

– उपलब्धिकारणानि कानि कानि ⟶ एतानि ⟶ अनुमानं प्रत्यक्षम् ऐतिह्यम् औपम्यम् च ।

– अनुमाने तर्क: अर्थापत्ति: संभव: अभाव: च एतेषाम् अन्तर्भाव: भवति ।

– ऐतिह्यं लोके भेदे च पारम्पर्योपदेश: ।

– औपम्यं उपमा । एताभि: हेतुभि: यद् उपलभ्यते तद् तत्त्वं इति कथ्यते ।

– ‘यद्’ पदेन उपलब्धिक्रियाविशेषणस्य बोध: भवति ।

– उपलभ: अर्थ: तु प्रमाबुद्ध्यनुकूल गुणदोषविचारादि व्यापार: ।

– यथार्थज्ञानस्य बुदध्यानुकूल: व्यापार: नाम उपलब्धार्थ: ।

– प्रमा – हानोपादान उपेक्षा बुद्धि इति प्रमा ।

– एतस्या: प्रमाया: फलं नाम प्रत्यक्षादि: व्यवसायात्मिका निश्चयबुध्दि: । एतस्या: निश्चयात्मिकाया: बुद्धे: व्यापार: नाम व्यवसायं कुर्वाणानां घटकानां गुणता: दोषत: विचारा: ।

– एतस्माद् व्यापारवत्वात् प्रत्यक्षादि व्यवसायात्मिकाया: बुद्धे: करणत्व तथैव तेषामेव प्रत्यक्षादिनां व्यापारवत्व नाम उपलब्धिकारणम् ।

– एते विचारादिजनकव्यापारत्वं सन् आत्मैव कर्ता ।

– प्रत्यक्षादिभ्य: अन्यउपलब्धिकारणत्वं सत: घटकान् प्रमाणत्वं न भवति ।

उदा: – १) यथा वह्निमान् पर्वतो धूमादिति प्रत्यक्षो हेतु: धूम: ।

२) अयम् आतुरो मन्दाग्नित्वात् इति जरणराशक्त्या अनुमितो मन्दाग्नि: हेतु: ।

३) नित्य: पुरुष: अकृतकत्वात् इति ऐतिह्यो हेतु: अकृतकत्वम् ।

४) अस्य मुखं कान्ततमं चन्द्रोपमत्वादि औपम्येन हेतु: ।

एतानि चत्वारि उपलब्धिकारणानि साधर्म्यवैधर्म्यरुपी दृष्टान्तानां साध्यसाधने स्त: ।

– गौतमस्य चिन्तनम्  – उदाहरणसाधर्म्यात् साध्यसाधनं हेतु: तथा वैधर्म्यात् ।

– वात्स्यायनेन अपि एतद् व्याख्यातम् ।

योगीन्द्रनाथ सेन:

– उपलब्धि नाम साध्यज्ञानम् । कारणं नाम साधनम् ।

– अस्य साध्यज्ञानस्य साधनं नाम उपलब्धिकारणं नाम हेतु: ।

– साधर्म्यवैधर्म्यरुपिण: उदाहरणस्य साध्यस्य प्रज्ञापनं कुर्वाणा: ते हेतव: ।

– अक्षपादेन (गौतमेन) एतदेव कथितम् । (सन्दर्भ: – न्यायदर्शन: १/१/३४–३५)

– तत्वव्यवस्था प्रमाणाश्रिता भवति ।

ज्योतिषचन्द्र सरस्वति:

– पक्षे साध्यस्य ज्ञानकारणं नाम हेतु: ।

– एतद् ज्ञानकारणं प्रत्यक्षादि भेदेन चतुर्विधम् भवति । ऐतिह्य: नाम शाब्धप्रामाण्यम् ।

– अत्र औपम्यस्य यद्यपि पृथक् प्रमाणत्वं न वर्णितं तथापि साङ्ख्यादिमतानुसारेण तद् अनुमाने समाविष्टम् ।

– एतदेव गौतमेन वर्णितम् – साध्यसिद्धानुकूलज्ञापकत्वबोधक: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**दृष्टान्त:** – सूत्रम् – ३४

चरक: – यत्र मूर्खविदूषां बुद्धिसाम्यं स दृष्टान्त: उच्यते । य: वर्णनीय विषयं वर्णयति – यथा अग्नि: उष्ण:, द्रवम् उदकम्, पृथिवी स्थिरा आदित्य: प्रकाशक: इति ।

यथा आदित्य: प्रकाशक: तथा साङ्ख्यज्ञानं प्रकाशकम् इति ।

चक्रपाणि: –

– लौकिकेभ्य: (सामान्यजनेभ्य:) पाण्डितेभ्य: च उभ्याभ्यां य: अर्थ: निर्विवादस्वरुपेण ज्ञानं भवति स: दृष्टान्त: इति कथ्यते ।

– केवलं पण्डितानां बुद्धि: जानीयात स: दृष्टान्त: इति न कथ्यते ।

– य: विषय: सामान्यव्यक्ते: बुद्ध्यै न अवगम्यते स: दृष्टान्तभावं न प्राप्तुं शक्नोति ।

– बुद्धिसाम्यात् साध्यसाधर्म्यात् च दृष्टान्त: निश्चित: भवति ।

– य: साध्यं सिध्यति तद् 'वर्ण्यं वर्णयति ' इति पदेन सम्बोधितम् ।

गङ्गाधर: –

– मूर्ख: नाम लोकसाम्यमनोतीत: नैसर्गिकवैनयिक उत्तमबुद्धि अप्राप्ता: व्यक्तय: । ते 'लौकिका:' इत्यपि कथ्यते । तेषां विपरीता: परीक्षका: भवन्ति ।

– परीक्षका: प्रमाणै: विषयान् परीक्ष्य व्यवहरन्ति ।

– साध्यसाधर्म्यवैधर्म्यरुपी तद्धर्मभावी दृष्टान्त: स्थापनाप्रतिष्ठापनयो: ग्राह्य: । अस्मिन् –

साध्यसाधर्म्यधर्मभावी ⟶ दृष्टान्त:

साध्यवैधर्म्य धर्मभावी ⟶ व्यतिरेकीदृष्टान्त:

इत्थं दृष्टान्ता: द्विविधा ।

– गौतमस्य सन्दर्भः –''लौकिकपरीक्षकणां यस्मिन्नर्थे बुदिधसाम्यं स दृष्टान्तः ।''

– अस्मिन् विषये वात्स्यायनस्य व्याख्यानम् अपि एवमेव वर्णयति । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेनः – लोकशास्त्रयोः प्रसिद्धधर्मः दृष्टान्तः । शेषम् अर्थशः विवेचनम् ।

ज्योतिषचन्द्र सरस्वतिः –

– मूर्खः ⟶ अनवाप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः ।

– विद्वान् ⟶ शास्त्रचर्चाबुद्धतिशयः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**उपनयः – निगमनम्** – सूत्रम् – ३५

चरकः – एतेन व्याख्या स्थापना प्रतिष्ठापना च एतयोः वर्णने एव कृता अस्ति ।

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः –

उपनयः – साध्यसाधर्म्यात् तद् धर्मभाविदृष्टान्तापेक्षः तथा इति उपसंहारः साध्यस्य उपनयः ।

साध्यवैधर्म्यात् तद् धर्मभाविदृष्टान्तापेक्षःन तथा इति उपसंहारः च साध्यस्य उपनयः ।

– न्यायदर्शनगतं वर्णनं शब्दशः उद्धृतम् ।

'उदाहरणापेक्षः तथा इत्युपसंहारो न तथेति वा साध्यस्योपनयः' (गौतमः)

– उदाहरणापेक्षः उदाहरणतन्त्र उदाहरणवशः । (वात्स्यायनः)

वशः इति सामर्थ्यम् । उपसंहयितेऽनेनेत्युपसंहारो वेदितव्य इति ।

निगमनम् – यद् हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं तद् निगमनम् ।

– गौतमोक्ता व्याख्या – हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं तद् निगमनम् ।

– निगम्यतेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनमिति ।

– निगम्यन्ते समर्थ्यन्ते संबध्यन्ते । शेषं वात्सायनभाष्यस्य वर्णनम् ।

योगीन्द्रनाथ सेनः – न्यायदर्शनोक्तस्य उपनयनिगमनयोः व्याख्याः वर्णिताः ।

ज्योतिषचन्द्र सरस्वतिः – न्यायदर्शनोक्तानां व्याख्यानाम् उल्लेखः ।

निष्कर्षः – वैधर्म्यं नास्ति । गङ्गाधरः वात्स्यायनभाष्यस्य ससूत्रं विवेचनं करोति ।

## उत्तरम् – सूत्रम् ३६

चरक: – साधर्म्ये उपदिष्टहेतौ वैधर्म्यवचनं तथैव वैधर्म्ये उपदिष्टहेतौ साधर्म्यवचनं नाम उत्तरम् ।

यथा – एक: (पूर्वपक्ष:) वदति–''हेतो: समानधर्मस्य विकार: भवति । यथा शीतकव्याधीनां तत्समानधर्माणां हिमशिशिरवातसंस्पर्शा: हेतव: भवन्ति । अस्मिन् विषये प्रतिपक्ष: वदति – ''हेतौ विपरीतधर्मस्य विकार: भवति । यथा शरीरावयेषु कोथदादृष्ण्यपाकादिनां हेतव: विपरीतधर्माणां हिमशिशिरवातसंस्पर्शा: भवति ।

– इत्थं विपर्यय सहितं उत्तरं वर्णितम् ।

चक्रपाणि:

– उत्तरपदेन अत्र जाति उत्तर इति उत्तराभास: अभिप्रेत: । उत्तराभास: नाम उत्तरस्य समाना प्रतीति ।

– यत: साधर्म्यं सिद्धं अकुर्वाणा स्थिति: एव उत्तरे वर्णिता ।

– न्याये उक्तम् – साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जाति: । (न्या. द. १।२।१८)

– नाम साधर्म्यवैधर्म्ययो: यथास्थिति रक्षणीया नाम जाति ।

– साधर्म्यवैधर्म्ययो: उदाहरणार्थं उत्तरं वर्णितम् अस्ति । एतै: न्यायदर्शने वर्णिता: जात्युत्तरउत्कर्ष अपकर्षसम इत्यादीनां अनुक्तानाम् अपि समावेशा: करणीया: ।

– इत्थं वैधर्म्ये वर्णितेषु हेतुषु विपर्ययात् यदा हेतुसमानं उत्तरं प्रस्तुतं तदा विपर्यय: भवति ।

गङ्गाधर:

– वादिप्रतिवादिभि: हेत्वादिभि: स्वस्व प्रतिज्ञास्थापनापश्चात् किं कर्तव्यं ' एतद् उत्तरे' वर्णितम् ।

– शेषम् अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन:

– साधर्म्योपदिष्टे वैधर्म्यवचनम् एवं वैधर्म्योपदिष्टे साधर्म्यवचनम् उत्तरम् । शेषम् अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – कोथ: पूतिभाव: ।

अविशेषा टीका ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## सिद्धान्तः – सूत्रम् ३७

चरकः – यः बहुविधैः परीक्षकैः बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः सः सिद्धान्तः उच्यते । सिद्धान्तः चतुर्विधः भवन्ति ।

– सर्वतन्त्रसिद्धान्तः । – प्रतितन्त्रसिद्धान्तः ।

– अधिकरणसिद्धान्तः । – अभ्युपगमसिद्धान्तः ।

सर्वतन्त्रसिद्धान्तः

– तस्मिन् तस्मिन् सर्वस्मिन् तन्त्रे तत्तत् प्रसिद्धम् । यथा = हेतुना व्याधयः भवन्ति ।

– साध्यानां व्याधीनां चिकित्सा उपायाः सन्ति ।

प्रतितन्त्रसिद्धान्तः

– तस्मिन् तस्मिन् एकैकस्मिन् तन्त्रे तत्तत् प्रसिद्धम् ।

यथा – अन्यशास्त्रे अष्ट रसाः । चरकतन्त्रे षड् रसाः ।

– अन्यतन्त्रे षडिन्द्रियाणि । चरकतन्त्रे पञ्चेन्द्रियाणि ।

– अन्यतन्त्रे वातादिकृताः सर्वे विकाराः । चरकतन्त्रे वातादिकृताः भूतकृताः च ।

अधिकरणसिद्धान्तः

– यस्मिन् अधिकरणे प्रस्तूयमाने सिद्धानि अन्यानि अपि अधिकरणानि भवन्ति । यथा 'न मुक्तः पुरुषः कर्मानुबन्धिकं कुरुते कुतः निःस्पृहत्वात्?' अनेन वचनेन कर्मफलमोक्षपुरुषप्रेत्यभावादयः विषयाः भवन्ति इति सिध्यते ।

अभ्युपगमसिद्धान्तः

–यः असिद्धः अपरीक्षितः अनुपदिष्टः अहेतुकः विषयः वादकाले चिकित्सकतः प्रस्तूयते तं अभ्युपगमसिद्धान्तं वदन्ति। यथा द्रव्यं कदा कदा द्रव्यप्राधान्यं मत्वा वर्णयेत् कदा कदा गुणप्रधानं उत कदा कदा वीर्यप्राधान्यं मत्वा वर्णयेत् ।

चक्रपाणिः – सिद्धान्तस्य लक्षणं अभ्युपगमसिद्धान्ते न युज्यते । अतः अभ्युपगमसिद्धान्ते स्थिरबुद्धित्वेन कथितं सिद्धान्तत्वं ज्ञेयम् ।

– प्रतितन्त्रसिद्धान्ते परस्परं वचनं सदपि वादे तेषां स्वयुक्तिस्थापनाबलेन सिद्धान्तत्वं ज्ञेयम् ।

गङ्गाधरः

–'अथ सिद्धान्तः' इत्यस्य अर्थः 'उत्तरम्' इति वादमार्गस्य वर्णनानन्तरं सिद्धान्तः वर्णितः ।

– परीक्षकैः हेतुद्वारेण अनेकविधानां वाद्यानाम् अर्थाणां परीक्षणं कृत्वा यः निर्णयः स्थाप्यते सः सिद्धान्तः ।

– 'निर्णयः' पदस्य गौतमस्य व्याख्या दत्ता ।

''विमृश्य पक्षप्रतिपक्षाभ्याम् अर्थावधारणं निर्णयः ।''

– पक्षस्य प्रतिपक्षस्य च विमर्शानन्तरं यः विषयः निश्चितः भवति सः निर्णयः इति उच्यते ।

– पक्षप्रतिपक्षयोः एकस्य विषयं निवृत्य अन्यस्य विषयस्य अवश्यम् अवस्थानं नाम निर्णयः ।

– वादे कोऽपि पक्षः स्वप्रतिज्ञायै हेत्वादीन् स्थापयति पश्चात् प्रतिपक्षः स्वप्रतिज्ञायै हेत्वादीन् स्थापयति पक्षस्य प्रतिविद्धं उद्धरणं करोति च ।

– विमर्श्य उभयोः पक्षयोः एकस्य निवृत्तिः अन्यस्य निश्चितिः अथवा उभययोः निवृत्तिः अथवा अवस्थानं नाम निर्णयः।

– एकस्य वादेः वाग्भवपक्षः उत प्रतिवादेः असम्भवपक्षः स्यात् चेत् प्रमाणैः यद् उपपद्येत तदनुसारं सम्भवासम्भवानां विमर्शं क्रियेत । सर्वपरीक्षणानन्तरं सम्भवपक्षः अवतिष्ठेत् उत असम्भवपक्षः निवर्तेत, एवं यत्र भवति तं 'सिद्धान्तः' इति वदन्ति ।

– यत्र उभौ सम्भवासम्भवौ तत्र विमर्शः अशक्यः ।

– गौतमोक्त निर्णयः पक्षप्रतिपक्षौ सिद्धान्तः च एते सविस्तरं विवृताः ।

न्यायदर्शनोक्तानां चतुर्विधसिद्धान्तानां व्याख्याः तथा तद्गतं वात्स्यायनभाष्यं च एते उल्लिखिताः । तस्मिन् तादृशं वैधर्म्यं नास्ति ।

सर्वतन्त्रसिद्धान्तः – सर्वतन्त्राविरुद्धः तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ।

वात्स्यायनोक्तम् उदाहरणम् – घ्राणादीनि इन्द्रियाणि, गन्धादयः इन्द्रियार्थाः पृथिव्यादीनि भूतानि,

प्रतितन्त्रसिद्धान्तः – समानतन्त्रसिद्ध परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः ।

वात्स्यायनोक्तम् उदाहरणम् – नासत् आत्मलाभः । न सत् आत्महानम् । निरातिशयाश्चेतना ।

अधिकरणसिद्धान्तः – यत् सिद्धावन्यप्रकरणसिद्धिः सो ऽ धिकरणसिद्धान्तः ।

वात्स्यायन: – यस्य अर्थसिद्धे: अनन्तरं अन्येषाम् अर्थानां विवरणं शक्यम्, येन विना स: अर्थ: सिद्ध्यति ते विषया: यस्मिन् अधिष्ठिता: तम् 'अधिकरणसिद्धान्त:' इति वदन्ति ।

अभ्युपगमसिद्धान्त: – अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणम् अभ्युपगमसिद्धान्त: ।

वात्स्यायन: – अस्तु द्रव्यं शब्द: । तस्य नित्यत्वानित्यत्वे परीक्षामहे । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन:

– परीक्षकै: तर्केण प्रमाणै: च विषयस्य परीक्षणं अभिप्रेतम् ।

– सिद्धान्त: इति सिद्धस्य संस्थिति: ।

– न्या. द. १।१।२७, २८, २९, ३०, ३१ एतेषां सूत्राणाम् उल्लेख: ।

– अधिकरणसिद्धान्तं वर्णयन् तद्गतान् उदाहरणानि विवृण्वन् अनुबन्धस्य व्याख्या कृता ।

– अनुबन्ध: कर्मणि कृते तज्जन्यमुत्तरकालभावि शुभाशुभफलं प्रेत्यभावस्वर्गनरकादि ।

– शेषा टीका अविशेषा ।

ज्योतिषचन्द्र सरस्वति:

– स्थाप्यते इति स्वीक्रियते । अधिकरणसिद्धान्तस्य उदाहरणम्

– आयुर्वेदे प्रस्तुयमाने विकारदोषनिदानादीनि स्वयमेव सिध्यन्ति ।

– अभ्युपगम....इति व्याख्यायाम् 'असिद्धम्' पदे प्रमाणै: इति शेष: अस्ति । प्रत्युत 'अपरीक्षितम्' पदे परीक्षकै: इति शेष: अस्ति । शेष अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**शब्द:** – सूत्रम् ३८

चरक: – शब्दो नाम वर्णसमाम्नाय: ।

– स: चतुर्विध: – दृष्टार्थ: । अदृष्टार्थ: । सत्यम् । अनृतम् ।

दृष्टार्थ: – त्रीभि: हेतुभि: दोषा: प्रकुप्यन्ति ।

– प्रकुपिता: दोषा: षड्भि: उपक्रमै: प्रशाम्यन्ति ।

– श्रोत्रेन्द्रियाणां प्रकृतिस्थत्वात् शब्दविषयस्य ग्रहणं भवति ।

अदृष्टार्थ: – अस्ति प्रेत्यभाव: अस्ति मोक्ष: इति ।

सत्यम्  – यथार्थभूत: (नाम यद् कथितं स्यात् तादृशं भवनम् ।) यथा – आयुर्वेदस्य उपदेश: अस्ति । साध्या: व्याधीनां सिद्धे: उपाया: सन्ति । यद् कार्यं भवति तस्य फलम् आरभते ।

अनृतम् – सत्यस्य विपरीतम् ।

चक्रपाणि: – शब्द: इति पदेन अत्र संकेतबलात् अर्थं प्रकाशयन्ती वर्णमाला अभिप्रेता ।

आप्तोपदेश: शब्द: द्विविध: – परमाप्तब्रह्मादिप्रणीत: ।

– लौकिकाप्तप्रणीत: ।

– ऐतिह्य शब्देन परमात्मप्रणीतस्य शब्दस्य समावेश: भवति । प्रत्युत लौकिकाप्तप्रणीतेन शब्देन एकदेशरुपस्य सत्यप्रकारविहितस्य शब्दस्य समावेश: भवति ।

– वर्णसमाम्नाय: नाम वर्णमेलक: ।

– यद्यपि अत्र सहस्थानीयां वर्णानां मेलकं नास्ति तथापि पूर्वपूर्वेण अनुभवेन उत्पन्नै: संस्कारै: युक्तस्य अन्त्यवर्ण्यस्य अनुभवेन वर्णानां मेलनं ज्ञायते ।

– दृष्टार्थ: नाम भिन्नै: भिन्नै: प्रमाणै: ज्ञानप्राप्ते: योग्यभवनम् ।

– येषां वाक्यानां अत्रैव अर्थ: प्रत्यक्षं भवति तस्मै दृष्टार्थ: इति वदन्ति ।

गङ्गाधर: – अतीव विस्तृता व्याख्या कृता ।

– सिद्धान्ते वादी किं कुर्यात् इति कथयित्वा वाद: शब्दात्मकेन वाक्येन एव क्रियते । अत: शब्दज्ञानस्य प्राप्ति: योग्या अस्ति।

– शब्दज्ञानार्थं शब्दस्य ज्ञानं कारणीयम् । अस्मिन् शब्द: वर्णात्मक: स्यात् अथवा ध्वन्यात्मक: इति वर्णयितुं कथितं यत् शब्दो नाम वर्णसमाम्नाय: ।

– कणाद: शब्दं वर्णयाति । अस्यां टीकायां तस्य विवरणं कृतम् ।

– श्रोत्रग्रहणो योऽर्थ: स शब्द: ।

– अनित्यश्चायं कारणत:। अभिव्यक्तौ दोषादिति। नित्य शब्दोऽनादित्वामत् भावस्वभावनित्यत्वात् स्वभावसंसिद्धलक्षणत्वात् ।

– कणाद: वेदान्तम् तथा दर्शनशास्त्रं एतानि अनुसृत्य शब्दोपत्तिप्रक्रिया सविस्तरं वर्णिता ।

– गौतमोक्ते न्यायदर्शने वर्णित: शब्द: तथा तस्मिन् वात्स्यायनभाष्यं संपूर्णतया उद्धृतम् ।

– शब्दस्य नित्यत्वम् अनित्यत्वं च विस्तरेण वर्णिते ।

– वर्णस्य ध्वन्यात्मकवर्णात्मकौ प्रकारौ वर्णितौ ।

– वर्णसमानाम्नाय: – यद् न क्षरति तद् अक्षरं वर्णमित्यनर्थान्तरम् । म्ना इति अभ्यासे । वर्णानां समानासमानानाम् आ सम्यङ् म्नाय इति वर्णसमाम्नाय: ।

– दृष्टार्थ: – यस्यार्थ: इह दृश्यते स दृष्टार्थो दृष्टफल: शब्द: ।

– अदृष्टार्थ: – यस्यार्थ: इह न दृश्यते स: अदृष्टार्थ: शब्द: ।

– सत्यम् – यद्यपि दृष्टार्थ: अदृष्टार्थ: च एतौ सत्यार्थौ शब्दौ तथापि तयो: व्यतिरिक्त: अपि सत्य: शब्द: भवति । अत: ईदृशस्य यथार्थभूतस्य सत्यशब्दस्य वर्णनं कृतम् ।

एष: यथार्थ: सत्यशब्द: द्विविध: ।

अ) परमार्थे अनृतत्वात् लोके सत्य: ।

ब) परमार्थे सत्य: लोके अनृत: ।

– अनृत: – सत्यविपर्यय: शब्द: । उदा. नास्ति ईश्वर:, नास्ति आत्मा, नास्ति कर्मफलम्, नास्ति पुनर्भव:, एतादृशा: मिथ्याशब्दा: अपि वादे प्रयोगार्थम् उपयुज्यन्ते ।

– अग्निपुराणगतम् अलङ्कारप्रकरणगतं शब्दविवेचनं शब्दश: उद्धृतम् ।

– पातञ्जलभाष्यगतं न्यायशास्त्रगतं च शब्दविवेचनं सविस्तरं वर्णितम् ।

योगीन्द्रनाथ सेन:

– समाम्नाय: इति उपदेश: ।

– अत्र शब्द: पदेन लौकिकवैदिकसाधारणवाक्यरुपी वर्णात्मक: शब्द: अभिप्रेत: । तस्य चतुर्विधा: भेदा: अपि वर्णिता: ।

– दृष्टार्थ: – यस्य अर्थ: इह दृष्ट: स दृष्टार्थ: । एष: प्रत्यक्षफलम् अस्ति ।

एतै: शब्दै: अर्थ: प्रत्यक्षीक्रियते ।

– अदृष्टार्थ: – यस्य च अमुत्र प्रतीयते स अदृष्टार्थ: ।

– सत्यम् – सत्य: इति ऋत: । यथार्थभूत: शब्द: ।

– अनृत: – मिथ्या शब्द: ।

ज्योतिषचन्द्र सरस्वतिः

– वर्णसमाम्नायः क्रमानुगता वर्णसमष्टि अर्थयुक्तः इति शेषः ।

– यतः निरर्थकस्य शब्दत्वस्य अभावात् वर्णनम् अशक्यम् ।

– दृष्टार्थः – प्रत्यक्षतः अनुभूय यं शब्दं वक्ति सः ।

– अदृष्टार्थः – अनुमानेन आप्तोपदेन वा अनुभूतः ।

– सत्यः – अर्थानुरुपः एव प्रमाणादिभिरुपलभ्यते ।

– अनृतः – अर्थानुरुपः यथा शुक्तौ इदं रजतम् इति ।

निष्कर्षः – वैधर्म्यं नास्ति । गङ्गाधरस्य विशेषं ससंदर्भम् अतीव विस्तृतं वर्णनम् ।

## प्रत्यक्षम् – सूत्रम् ३९

चरकः – प्रत्यक्षं नाम यद् आत्मना इन्द्रियैश्च स्वयं उपलभ्यते ।

आत्मप्रत्यक्षाः – सुखदुःखेच्छाद्वेषादयः ।

इन्द्रियप्रत्यक्षाः – शब्दादयः ।

चक्रपाणिः

– 'आत्मना' इत्यस्य अर्थः मनसा । तेन सुखादयः मानसप्रत्यक्षाः समाविशन्ति ।

– 'इन्द्रियैश्च' अनेन बाह्यप्रत्यक्षाणां ग्रहणं भवति ।

– इन्द्रियाणां कार्ये समाप्ते अपि यद् अनुमानेन ज्ञायते तद् असाक्षात्कारित्वात् प्रत्यक्षं न भवति ।

गङ्गाधरः – अत्र मानसप्रत्यक्षं इति न उक्त्वा आत्मप्रत्यक्षम् इति उक्तम् । यतः सुखादयः बुद्धिमत्ता अग्राह्याः।

– 'इन्द्रिय' पदेन बुद्धिन्द्रियं ग्राह्यम् । कर्मेन्द्रियाणाम् अभिप्रेतार्थः अत्र नास्ति ।

– मनः इन्द्रियं च जागरितस्थानस्य अंशे स्तः । उत आत्मा स्वप्नस्थानस्य अंशः ।

– मानसप्रत्यक्षं पञ्चविधानि इन्द्रियाणि च इति षड्विधं प्रत्यक्षम् अस्ति ।

– प्रमाणभूतप्रत्यक्षस्य अभिप्रायेण अस्मिन् तन्त्रे पञ्चपञ्चकरुपिणाम् पञ्चेन्द्रियाणां बोधः ग्राह्यः ।

– आत्मप्रत्यक्षं नाम प्रत्यग् आत्मप्रत्यक्षस्य ज्ञानविषयस्वरुपिणः सुखादयः ।

– वैशेषिकदर्शनस्य संदर्भः उद्धृतः ।

आत्मप्रत्यक्षम् – स्वयम् आत्माबुद्धियुक्तिभि: यद् प्राप्यते तद् स्वप्रत्यक्षम् आत्मप्रत्यक्षम् इति ।

इन्द्रियप्रत्यक्षम् – मनोयुक्तै: इन्द्रियै: यद् प्राप्यते तद् इन्द्रियप्रत्यक्षम् ।

मानसप्रत्यक्षम् – केवलं मनसा आत्मा यद् किञ्चित् प्राप्नोति तद् मानसप्रत्यक्षम् ।

योगीन्द्रनाथ सेन:

– 'आत्मना' इत्यस्य अर्थ: 'मनसा' इति । आत्मन: प्राप्यते नाम मनसा एव प्राप्यते । यत: आत्ममन: संयोगस्य ज्ञानसामान्ये कारणत्वात् । अस्य संदर्भ:

आत्मा ज्ञ: करणैर्योगात् ज्ञानं तस्य प्रवर्तते ।(च.शा. १)

– न इन्द्रियै: प्रत्युत यद् स्वयं प्राप्यते तं प्रत्यक्षं वदन्ति ।

– इन्द्रियार्थसन्निकर्षेण यद् ज्ञानं प्राप्यते तद् इन्द्रियप्रत्यक्षम् ।

– गौतमसूत्रम् १।१।४ इत्यस्य सन्दर्भ: दत्त: ।

ज्योतिषचन्द्र सरस्वति:

– आत्मेन्द्रियमन: सन्निकर्षजं ज्ञानं प्रत्यक्षम् इत्याहु: आयुर्वेदिका: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अनुमानम् – सूत्रम् ४०

चरक: – अनुमानं नाम युक्त्यपेक्ष: तर्क: । यथा – अग्निं जरणशक्त्या

बलम् व्यायामशक्त्या इत्यादि ।

चक्रपाणि: – अस्य लक्षणं त्रिविधविशेषविज्ञानीये अध्याये वर्णितम् ।

गङ्गाधर: – आत्मप्रत्यक्षस्य मानसज्ञाने अपि प्रामाण्यं स्यात् तथापि किं प्रत्यक्षप्रमाणम् एतदेव एकं प्रमाणम् अस्ति वा ? एतं विना अन्येन केनापि प्रकारेण मनसे ज्ञानं न भवति किम् ? अस्य निर्देशार्थम् अनुमानस्य वर्णनमस्ति ।

– मानसज्ञानमध्ये येषां येषां प्रामाण्यम् अस्ति तेषाम् उपदेशार्थं मानससप्रत्यक्षं पञ्चेन्द्रियं ज्ञानं वर्णयित्वा पश्चात् यद् शेषं मानसज्ञानं प्रमाणम् अस्ति तद् अनुमाने वर्णितम् ।

– प्रत्यक्षानन्तरम् अनुमानं शक्यम् ।

– युक्त्यपेक्ष: तर्क: इति नाम्ना युक्ति: एव अनुमाननाम्ना वर्णिता ।

– युक्ते: वर्णनं पूर्वमेव आगतम् । गौतमेन उक्तं यद् –

बुद्धि: पश्यति या भावात् बहुकारणयोगजान् ।

युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गं साध्यते यया । सा एव युक्ति: तर्क: ।

– अविज्ञाततत्त्वस्य अर्थे तत्वज्ञानार्थं कारणोपपत्तित: ऊहनं नाम तर्क: ।

– तर्कापेक्ष: तर्क: इति अनुमानम् । अस्य तिस्त्रैषणीये अध्याये सविस्तरं वर्णनमस्ति ।

– एवं अनुमानं मानसप्रत्यक्षज्ञानस्य एकं प्रमाणम् ।

योगीन्द्रनाथ सेन:

– चरकसंहितायां सूत्रस्थानगतं ११ न्यायदर्शनगतं (१।१।४०) च अनुमानं युक्ति: एतयो: सूत्रानाम् उद्धरणम् ।

– अनुमानस्य त्रिविधा: प्रकारा: तथा तेषां न्यायदर्शनगतस्य १।१।५ सन्दर्भसूत्रस्य वर्णनम् ।

– अनुमानं प्रत्यक्षपूर्वकमेव अस्ति ।

प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते । (च. सू. ११)

– उदाहरणार्थं च. वि. ४ गतं सूत्रवर्णनम् ।

ज्योतिषचन्द्र सरस्वति:

– युक्तपेक्ष: व्याप्त्यनुगत: तर्क: । तच्च हेतुसाध्यसामान्याधिकरण्यात् अप्रत्यक्षस्य साध्यस्य ज्ञानम्

निष्कर्ष: – वैधर्म्यं नास्ति ।

**ऐतिह्यम्** – सूत्रम् – ४१

चरक: – ऐतिह्यं नाम वेदादि: आप्तोपदेशा: ।

चक्रपाणि: – अलौकिकानाम् आप्तानाम् उपदेश: ऐतिह्यम् पदेन वर्ण्यते ।

गङ्गाधर:

–अग्नि क:? तथा च जरणशक्ति: का? एतादृशानां प्रश्नानां आप्तोपदेशेन विना उत्तरम् अशक्यम् ।

– ऐतिह्यानन्तरम् एव वादे प्रवर्तनीयम् । ऐतिह्यम् नाम वेदादय: आप्तोपदेश: ।

– अत्र ' आदि ' पदेन – वेदार्थ अविपरीत: परीक्षकै: प्रणीत: कश्चिद् शास्त्रवाद: ।

– वेदार्थ अविपरीत: परीक्षकै: परीक्षित: कश्चिद शास्त्रवाद: ।

एतानाम् अपि ऐतिह्ये समावेश: भवति ।

– अपरं च लोके यदपि पारम्परीय: उपदेश: भवति तदपि आप्तोपदेश: एव भवति ।

– शिशूना यथा ‘एष: जनक एषा जननी एतद् तव गोत्रम् एतद् प्रवरम् एते वंशजा: इत्थं आप्तोपदेशेन बोध: भवति ।

– एवम् अवान्तरीयकत्वेन आप्त: अपि प्रमाणम् एव । एवम् अपरं मानसज्ञानम् आप्तोपदेशप्रमाणम् ।

– आप्त: यदा वाक्यद्वारा कश्चिद् उपदेश: यच्छति, तदा तद्वाक्यं श्रवणप्रत्यक्षम् अस्ति । तद् वाक्यार्थम् अवगन्तुं मानसज्ञानम् आवश्यकम् । श्रवणज्ञानेन तद् वाक्यार्थं अवगन्तुं न शक्यते । अत: आप्तोपदेश: प्रत्यक्षात् भिन्न: अस्ति ।

योगीन्द्रनाथ सेन: – इति ह ऊचु: वृद्धा: इति ऐतिह्यम् ।

– आप्त: – साक्षात्करणम् अर्थस्य आप्ति: । तथा प्रवर्तते इति आप्त: ।

(वात्स्यायनभाष्यम् १/१/७)

रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये ।

येषां त्रिकालममलं ज्ञानमव्याहतं सदा ।। आप्ता: शिष्टा: विबुधास्ते । (च.सू.११)

शब्द – लौकिकवैदिकसाधारणवाक्यरुप: । तद्विशेष: ऐतिह्यम् प्रमाणवाक्यम् ।

ज्योतिषचन्द्र सरस्वति: – आप्तोपदेश: आप्तवचनम् ।

– वेदादि पदेन वेदानुगतस्मृतितन्त्रादिनामपि ग्रहणं कुर्यात् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## औपम्यम् – सूत्रम् ४२

चरक: – अन्येन अन्यस्य सादृश्यत्वम् अधिकृत्य प्रकाशनकरणं नाम औपम्यम् ।

उदा. दण्डेन दण्डकस्य । धनुषा धनु: स्तम्भस्य । इष्वासेन आरोग्यदस्य ।

चक्रपाणि:

– अन्येन अन्यस्य सादृश्यत्वं दर्शनीयं नाम प्रसिद्धेन अप्रसिद्धस्य सादृश्यत्वं प्रकाशनीयम् ।

– सादृश्यत्वं दर्शनीयं नाम सादृश्यत्वेन संज्ञासंज्ञिसंबंधविषये कारणरुपाय लक्ष्यकरणम् ।

– भट्टनये उपमानपदेन एतद् सादृश्यत्वं वर्ण्यते ।

– न्याये संज्ञासंज्ञिसम्बन्धप्रतीतिः एवम् उपमानफलं भवति इति वर्णितम् ।

अस्य सन्दर्भः न्या. द. १।१।६ इति दत्तः ।

– प्रसिद्धस्य साध्यर्म्येण साध्यस्य यत् साधनं तस्मै उपमानम् इति वदन्ति ।

– यदा कुम्भकारस्य दृष्टपूर्वं दण्डं दृष्ट्वा अनन्तरं दण्डकवत् रोगं दृष्ट्वा तस्य साधर्म्यं दर्शयते ।

– भट्टनयेन प्रसिद्धं दण्डवत् साधर्म्यं अप्रसिद्धाय दण्डकनामकविकाराय सम्बधितं भवति ।

गङ्गाधरः

– अनुमानान्तर्गतं सदपि कस्मादपि विशेषत्वात् वादमार्गपदज्ञाने अस्य वर्णनं कृतम् ।

– अन्येन अन्यस्मै वस्तुने सादृश्यत्वं । साधर्म्यत्वं प्रत्यक्षानुमानाप्तोपदेशप्रमाणैः प्रथमं ज्ञानं कारयित्वा यद् प्रकाशनं क्रियते तस्मै औपम्यम् इति उच्यते ।

– दण्डमिव गात्रं स्तम्भयतीत्ययं दण्डकः । धनुर्वन्नमयेद् यद् गात्रं स धनुः स्तम्भसंज्ञितः ।

– गौतमोक्तं औपम्यस्य लक्षणं ससूत्रं वर्णितम् । अग्निपुराणगतं औपम्यस्य सूत्रं वर्णितम् ।

– उपमायां व्याख्या तथा अष्टादशविधाः उपमाः अग्निपुराणानुसारं वर्णिताः ।

योगीन्द्रनाथ सेनः

– न्या. द. १।१।६ तथा च सूत्रं १० इत्यस्य सन्दर्भाणां वर्णनम् अस्ति । शेष शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – अविशेषा टीका ।

निष्कर्षः – वैधर्म्यं नास्ति ।

संशयः – सूत्रम् ४३

चरकः – सन्देहलक्षणैः युक्तेषु संदिग्धेषु विषयेषु अनिश्चयं ज्ञानं नाम संशयः ।

उदा. कालमृत्युः वा अकालमृत्युः अस्मिन्विषये संशय अस्ति ।

चक्रपाणिः – समानानेकधर्मोपपत्तेः । न्या. द. १।१।२३

इमं सूत्रम् अनुसृत्य समानलक्षणैः युक्ताः सन्तः नैकैः धर्मैः युक्तानां विषयाणां ज्ञानं भवति । तेन संदिग्धानां विषयाणां प्रदर्शनम् अस्ति ।

– 'अनिश्चयः' इति संशयलक्षणम् । अनिश्चयः नाम पाक्षिकस्य (विषयविशेषस्य) विरुद्धधर्माय अवमशकरं ज्ञानम् । उदाः इदं स्थाणुः वा पुरुषं वा इति ।

गङ्गाधरः– प्रवर्तिते वादे संशयाणां विषयाणां ज्ञानार्थं संशयस्य वर्णनं कृतम् ।

– अत्र गङ्गाधरः पाठभेदं स्वीकरोति । 'सन्देहलक्षणानुसारसन्दिग्धेषु अर्थेषु अनिश्चयः' इति पाठापेक्षया 'सन्दिग्धेषु अर्थेषु अनिश्चयः' इति पाठः स्वीकृतः ।

– सन्दिग्धेषु समानेकधर्मोपपत्तेः उपलब्धनुपलब्धव्यवस्थातः च विमृष्टेषु अर्थेषु अनिश्चयो विशेषापेक्षो विमर्शः संशय नामाभिधीयते ।

– गौतमेन वर्णितस्य 'संशयस्य' ससूत्रं विवरणस्य तथा तस्योपरितनस्य वात्स्यायनभाष्यस्य अपि सन्दर्भाः दत्ताः ।

योगीन्द्रनाथ सेनः– सन्दिग्धेषु अर्थेषु अनिश्चयः तत्वानवधारणं संशयः ।

– न्यायदर्शनं १।१।४१ इत्यस्य सन्दर्भः वर्णितः । उभयकोटिकज्ञानं संशयहेतुः ।

ज्योतिषचन्द्र सरस्वतिः – अनिश्चयः नाम निर्णयाभावः । शेषः शब्दार्थः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**प्रयोजनम्** – सूत्रम् ४४

चरकः – येन अर्थेन कार्यारम्भः क्रियते तं प्रयोजनं इति वदेत् । यथा – यदि अकालमृत्युः अस्ति तर्हि अहं आयुर्वृद्धेः उपायान् सेवेय तथा आयुषे हितकरान् उपायान् त्यजेयम् तदा माम् अकालमृत्युः कथं हन्यात् ।

चक्रपाणिः – अत्र 'अर्थः' इति पदं निमित्तवाचकम् अस्ति । प्रसहेत इति मारयेत् ।

गङ्गाधरः

– वादे प्रवृत्ते सति संशयवत् अपरम् इत्यपि प्रयोजनमस्ति ।

– यस्मै फलाय क्रियारम्भः भवति तं फलं 'प्रयोजनम्' इति उच्यते ।

– गौतमस्य वचनम् – यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ।

– वात्स्यायनेन अपि एतादृशम् एव व्याख्यातम् ।

योगीन्द्रनाथ सेनः – यद् उपादानं हेयं च अस्ति अथवा यस्मै अध्यवसायाय अथवा उपायाय आप्ताः अनुष्ठानं कुर्वन्ति तद् प्रयोजनमस्ति ।

– गौतमेन अपि न्यायदर्शने १।१।२४ मध्ये अस्य एवं प्रकारेण एव वर्णनं कृतम् ।

ज्योतिषचन्द्र सरस्वति: – आरम्भा: क्रिया: । प्रसहेत इति मारयेत् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**सव्यभिचारम्** – सूत्रम् ४५

चरक: – यद् व्यभिचरणं तद् सव्यभिचारम् ।

– यथा – एतद् औषधं अस्यां व्याधौ यौगिकं स्यात् वा न वा ।

चक्रपाणि: – सव्यभिचारं नाम अनैकान्तिकम् इति अर्थ: । अथवा नेति न भवेत् इति ।

– एष: अनैकान्तिक: विचार: संशयं जनयति । निश्चित: अर्थस्य अकथनम् ।

गङ्गाधर: – वादे वाक्यगतान् दोषविशेषान् कथयितुं सव्यभिचार: उपयुक्त: अस्ति ।

– व्यभिचरणं नाम अनेकान्तवचनम् । क्वचित्

सव्यभिचारविषयस्य सूत्रस्य गौतमस्य न्यायदर्शनगतं उद्धरणम् ।

–अनैकान्तिक: सव्यभिचार: । व्यभिचार: एकत्राव्यवस्था । सह व्यभिचारेण वर्तते इति सव्यभिचार:

– एकस्मिन् अन्ते विद्यते इति एकान्तिक: । विपर्ययात् अनैकान्तिक: ।

– हेतुगतेभ्य: दोषेभ्य: गौतम: इमम् हेत्वाभासे वर्णयति । केवलं तन्त्रे हेतुदोषत्वं सदपि हेतुमात्रदोषत्वस्य अभावात् अन्यघटकानां दोषान् दर्शयितुं अस्य पृथक् वर्णनं कृतम् ।

योगीन्द्रनाथ सेन:

– व्यभिचार: एकत्र अव्यवस्था । तेन सह वर्तमानं सव्यभिचारम् ।

– न्यायशास्त्रे एतं हेत्वाभासम् इति वदन्ति । ( न्या. द. १।२।४६ तथा न्या. द. १।२।४५)

– हेत्वाभास: नाम यथाहेतुम् आभासमान: । वस्तुत: एष: हेतु: न भवति ।

– आयुर्वेदे हेत्वाभास: अहेतु: इति शब्देन दर्शित: ।

ज्योतिषचन्द्र सरस्वति: – अनैकान्तिकहेतुत्वं हेतुसाध्ययो: असामान्यम् अधिकरणम् इत्यर्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**जिज्ञासा** – सूत्रम् ४६

चरक: – जिज्ञासा नाम परीक्षा । यथा – भेषजपरीक्षा या उत्तरकाले वर्णिता ।

चक्रपाणि:– उत्तरकाले नाम अग्रे अस्मिन् एव अध्याये अथवा रसायनाध्याये भेषजपरीक्षा वर्णिता

गङ्गाधर: – सव्यभिचारज्ञानस्य वर्णनानन्तरं वादसमये प्रथमं जिज्ञासा करणीया अनेन उद्देशेन जिज्ञासा करणीया । परीक्षा नाम जिज्ञासा ।

– जिज्ञासा न केवलं प्रश्नमात्रा । प्रश्न: कृत: वन वा प्रमाणै: तस्य उत्त्तरं सद्–असद् रुपेण ज्ञातुमिच्छा नाम परीक्षा इति जिज्ञासा पदस्य अर्थ: ।

योगीन्द्रनाथ सेन: – अस्मिन् शास्त्रे जिज्ञासा नाम प्रमाणै: अर्थपरीक्षणम् । शेषम् अर्थश: वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – प्रत्यक्षादिभि: प्रमाणै: यथार्थत: परीक्षणम् ।

– अस्मिनेव अध्याये अग्रे एतद् वर्णितम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## व्यवसाय: – सूत्रम् – ४७

चरक: – व्यवसाय: नाम निश्चय: । यथा – एषा व्याधि: वातजा एव अस्ति ।

– अस्या: एतद् एव औषधम् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – परीक्षोत्तरं एव व्यवसाय: करणीय: । तस्मात् जिज्ञासोत्तरं व्यवसाय: वर्णित: ।

– गुणत: दोषत: च ज्ञात्वा व्यवसाय: करणीय: । व्यवसाय: नाम निश्चय: ।

– गुणदोषत: येन ज्ञानेन विषयस्य निश्चयं क्रियते तं निश्चयज्ञानम् इति उच्यते । मनुष्य: येन ज्ञानेन सबोधं आचारभाषणयो: व्यवसायं कुर्यात् सा व्यवसायात्मिका बुद्धि: इति उच्यते ।

योगीन्द्रनाथ सेन: – अविशेषा टीका ।

ज्योतिषचन्द्र सरस्वति: – निश्चय: निश्चयात्मिका बुद्धि: ।

– प्रत्यक्षादिभि: परीक्षाविशेषै: सम्यक् परीक्षां कृत्वा य: अध्यवसाय: क्रियते तं व्यवसायम् इति कथ्यते ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अर्थप्राप्ति: – सूत्रम् ४८

चरक: – अर्थप्राप्ति: नाम यत्र एक: विषय: वर्णित: तत्र अनुक्तस्य अन्यविषयस्य ज्ञानं स्वयं भवति उदाहरणम् (१) इयम् व्याधि: संतर्पणसाध्या नास्ति इत्यर्थ: सा अपतर्पणसाध्या: स्यात् ।

(२) एष: मनुज: दिने न भुञ्ज्यात् । अस्य अर्थप्राप्ति: एवं यत् स मनुज़: रात्रौ भोक्तुं न कोऽपि प्रतिबंध: ।

चक्रपाणि: – अर्थप्राप्त्या अर्थापत्ते: ग्रहणं करणीयम् ।

– अनेन वचनेन श्रुतार्थापत्या सह दृष्टार्थापत्ति: अपि बुध्यते ।

– अर्थापत्ति: अन्यस्मात् उपपत्ते: ज्ञानसाधनत्वात् न प्रमाणम् इति मतम् ।

– या अर्थापत्ति: दोषरहिता स्यात् सा अनुमाने समाविश्यते ।

– यत्र उभौ पक्षौ अयोग्यौ स्त: तत्र अर्थापत्ति: न भवति । उदाहरणम् – कापि व्याधि: संतर्पणसाध्या नास्ति न वा अपतर्पणसाध्या अपि । अत्र अर्थापत्ति: अशक्या ।

गङ्गाधर: – व्यवसाय: (निश्चय:) केवलं प्रत्यक्षम् अनुमानम् उपमानम् ऐतिह्यम् एभ्य: एव भवति इति न उत अर्थापत्या अपि भवति ।

– अर्थप्राप्ति: नाम भिन्नस्य अर्थस्य प्राप्ति: ।

– तिस्रैषणीये अध्याये एषा अर्थप्राप्ति: विस्तृतं वर्णिता ।

– अन्ये आचार्या: इमम् 'अर्थापत्ति:' इत्यपि सम्बोधन्ते ।

योगीन्द्रनाथ सेन: – गौतम: इमम् अर्थापत्ति: इति सम्बोधते । अनुक्तस्य अर्थस्य प्राप्ति: ।

ज्योतिषचन्द्र सरस्वति: – अविशेष:

निष्कर्ष: – वैधर्म्यं नास्ति ।

**सम्भव:** – सूत्र ४९

चरक: – यो यत: सम्भवति स तस्य सम्भव: । उदा.– षड् धातव: गर्भस्य सम्भवा: ।

– अहितसेवनं व्याधे: सम्भव: । हितसेवनम् आरोग्यस्य सम्भवम् ।

चक्रपाणि: – सम्भवति विद्यते अस्मात् इति सम्भव: ।

– कारणम् अव्यक्तं स्वजन्मकार्यमेव उक्तम् । अत: सत्कार्यवादस्य मतेन कार्यं कारणे एव अव्यक्तरुपेण वसति । कारणे कार्ययुक्तमेव इति सत्कार्यवादी ।

– एतद् उत्तरकाले व्यनक्ति इति सांख्यमतम् ।

– अन्यत्र अधिकम् उदाहरणम् अस्ति यत् खारी इति परिमाणे द्रोण: इति परिमाणं सम्भवति ।

गङ्गाधर: – सम्भवेन अपि निश्चय: भवति । उत्पत्त्यादिषु सम्भावनातहेतु: अस्ति ।

– समुदाय: समुदायी च एतयो: अविनाभावेन वृत्तिना सति सति सम्बन्धे इतरेषां समुदायेन ग्रहणम् नाम सम्भव: । एष: अनुमाने समाविष्ट: ।

– प्रस्थादिमानं विना द्रोण: इति मानस्य सम्भावना अशक्या । तस्मात् प्रस्थादिमानं द्रोणस्य सम्भव: । अस्य प्रामाण्यं तिस्रैषणीये अध्याये विस्तृतं वर्णितम् ।

योगीन्द्रनाथ सेन: – सम्भव: नाम कारणम् यस्मात् उत्पद्यते ।

– यस्य अविनाभाविन: सत्ताग्रहणेन अन्यस्य सत्ताग्रहणं भवति स अपि तस्य सम्भव: ।

– यथा द्रोण: आढकस्य । आढकं प्रस्थस्य सम्भव: ।

ज्योतिषचन्द्र सरस्वति: – यस्मात् पदार्थात् किमपि उत्पद्यते ईदृशं कारणं सम्भव: इति उच्यते ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अनुयोज्यम्** – सूत्रम् ५०

चरक: – यद् वाक्यं वाक्यदोषयुक्तम् अस्ति तदं अनुयोज्यम् इति कथ्यते । अथवा सामान्यत: व्याहृतविषयमध्ये विशेषग्रहणार्थं यद् वाक्यं युज्यते तद् अपि अनुयोज्यम् अस्ति ।

उदाहरणार्थम् – 'संशोधनसाध्य: अयं व्याधि:' अस्य अग्रे वाक्यं संयुज्यते 'किं वमनसाध्योऽयं किं वा विरेचनसाध्य: ।'

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – वादमध्ये यद् वाक्यं दुष्टमस्ति, तं वर्णितम् । अनुयोग: नाम दूषणवचनम् ।

– न्यूनादिवाक्यदोषाणां वर्णनमपि अस्मिन्नेव 'वादमार्गपदे' इति अधिकरणे कृतमस्ति ।

– सामान्यत: वर्णितविषयमध्ये विशेषग्रहणार्थम् अपि अनुयोज्यम् अनुयोगार्हम् अस्ति ।

– 'संशोधनसाध्या व्याधि: अस्ति' एतद् वाक्यं सामान्यवचनमस्ति । सा वमनसाध्या अथवा विरेचनसाध्या एतद् वाक्यं विशेषमस्ति ।

योगीन्द्रनाथ सेन: – अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – दुष्टे वाक्ये अनुयोग: संभवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अननुयोज्यम् – सूत्रम् ५१

चरकः– अनुयोज्यस्य विपरीतं वाक्यं अननुयोज्यम् इति ।

उदाहरणार्थम् –एषः व्याधिः असाध्या ।

चक्रपाणिः – अनुयोज्ये वर्णिते द्वयोः प्रकारयोः अर्थयोः विपरीतअर्थस्य अननुयोज्यम् इति ।

गङ्गाधरः – यस्मिन् वाक्ये न्यूनादिवाक्यदोषाणाम् अभावः अस्ति तथा यद् विशेषवचनेन युक्तं भवति तद् अननुयोज्यम् इति कथ्यते ।

– एतद् वाक्यम् अनुयोगार्हं न भवति । उदा. – वमनसाध्यः अयं व्याधिः ।

– वाक्यप्रशंसायाम् अननुयोज्यं दर्शितम् ।

योगीन्द्रनाथ सेनः – वाक्यदोषहीनं विशेषयुक्तं वचनं नाम अननुयोज्यम् ।

ज्योतिषचन्द्र सरस्वतिः – यस्मिन् वाक्ये परव्यक्तेः प्रश्नावकाशः न अवशिष्यते ।

परपक्षं प्रश्नं प्रष्टुम् अवकाशः न विद्यते एतावत् स्पष्टं परिपूर्णं च वाक्यं नाम अननुयोज्यम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## अनुयोगः – सूत्रम् ५२

चरकः – एकः तद्विद्यः अन्यं तद्विद्यं ज्ञानं , विज्ञानं , वचनं , प्रतिवचनं तथा परीक्षा एतेभ्यः तन्त्रमध्ये वा तन्त्रगते एकदेशमध्ये प्रश्नम् अथवा प्रश्नैकदेशं पृच्छति तं अनुयोगः इति भाषेत् ।

उदा. – ‘ नित्यः पुरुषः ’ इति एकेन पक्षेण प्रतिज्ञा कृता तद् पश्चात् अन्यः पक्षः पृच्छति यत् ‘ किम् अस्य हेतुः अयम् अनुयोगः अस्ति ।

चक्रपाणिः – अविशेषा टीका ।

गङ्गाधरः

– एकेन विदुषा अन्यं विद्वांसं सम्पूर्णे तन्त्रे अथवा तन्त्रगते एकस्मिन् विभागे प्रश्नः प्रष्टव्यः । एषः प्रश्नः ज्ञानार्थं, विज्ञानार्थं वचनप्रतिवचनार्थं अथवा परीक्षार्थं पृष्टः स्यात् ।

– यद् वाक्यं दोषयुक्तमस्ति वा सामान्यवाक्यम् उच्चारितमस्ति तर्हि तन्मध्ये प्रश्नपृच्छा इति अपि अनुयोगः अस्ति। अथवा एकेन वाक्यम् उच्चारितं तत् पश्चात् तस्मिन् अपरेण तस्य हेतुपृच्छा एषः अपि अनुयोगः ।

योगीन्द्रनाथ सेन: – अनुयोग: नाम प्रश्न: । शेषम् अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – अनुयोगो नाम परस्य प्रश्न: प्रश्नेकदेशो वा ।

– प्रतिपक्षस्य ज्ञानादिपरीक्षार्थं पृष्ट: प्रश्न: अनुयोग: अस्ति ।

– उक्तायां प्रतिज्ञायाम् अन्यस्य वादे: तत्साधनोपायजिज्ञासायै अपि अनुयोग: इति कथ्यते ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**प्रत्यनुयोग:** – सूत्रम् ५३

चरक: – अनुयोगस्य पश्चात् पुन: अनुयोगकरण नाम प्रत्यनुयोग: ।

उदा ' अस्य अनुयोगस्य पुन: को हेतु: ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – येन अनुयोग: कृत: तेन अपि यदि दुष्टवाक्यम् अथवा सामान्यार्थं वाक्यं उच्चारितं तर्हि पूर्वपक्षवादी प्रत्यनुयोग: करोति । अनुयोगस्य अनुयोग: प्रत्यनुयोग: ।

उदा – पूर्वपक्ष: – नित्य: पुरुष:

उत्तरपक्ष: अनुयोग: – क: हेतु: ?

पूर्वपक्ष: – प्रत्यनुयोग: – पुरुषनित्यत्वप्रतिज्ञायां यो भवान् पृच्छति को हेतु: तत् प्रश्ने किं कारणं भवत ?

योगीन्द्रनाथ सेन: – वाक्यार्था टीका ।

ज्योतिषचन्द्र सरस्वति: – विवादिनाम् अनुयोगे वादिनां साधनोपायजिज्ञासा भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**वाक्यदोष:** – सूत्रम् ५४

चरक: – यस्मिन् वाक्ये वर्णितविषये न्यूनम् अधिकम् अनर्थकम् विरुद्धम् च एते दोषा: सन्ति तान् विहाय वाक्यस्य स्वाभाविक: अर्थ: न नश्यति । यदि एते दोषा: स्यु: तर्हि अर्थ: नश्यति ।

न्यूनम् – प्रतिज्ञा, हेतु, उदाहरणम्, उपनय: निगमनम् एतेभ्य: कस्यापि एकस्य अभाव: ।

– यद् नैकै: हेतुभि: साधनीयं तत् एकेन एव हेतुना साद्धव्यम् ।

अधिकम् – न्यूनस्य विपरिता: सन्त: ।

– आयुर्वेदशास्त्रस्य वर्तते बार्हस्पत्य: तथा औशनस च एतयो: अप्राङ्गिकं वर्णनम् ।

– सम्बद्धार्थस्य पुनरूक्तं वर्णनम् ।

– पुनरुक्त: दोष: द्विविध: भवति । १) अर्थपुनरुक्तम् २) शब्दपुनरुक्तम् ।

अर्थपुनरुक्तम् – 'भेषजमौषधं साधनम्' इति ।

शब्दपुनरुक्तम् – 'भेषजं भेषजम्' इति ।

अनर्थकम् – यस्मिन् वाक्ये केवलम् अक्षरसमूहा: स्यु: तस्मात् प कोऽपि अर्थ: प्रतीयते ।

उदा. – क वर्ग: च वर्ग: आदे: पञ्चवर्गसमूहात् कापि अर्थनिष्पत्ति: भवति ।

अपार्थकम् – अस्मिन् शब्दान् अर्थ: भवति । परं तेषां शब्दानां परस्परसम्बन्ध: न भवति । तथा तस्मात् न कोऽपि अर्थ: प्राप्यते । उदा. चक्र वक्र वंश वज्र निशाकरा: च ।

विरुद्धम् – यद् वाक्यं दृष्टान्तस्य सिद्धान्तस्य तथा समयस्य विरुद्ध: भवति । इदं गतस्य दृष्टान्तस्य सिद्धान्तस्य च वर्णने प्रागुक्ते सूत्रे कृतम् ।

समय: – त्रिधा भवति – आयुर्वेदिक समय: ।

याज्ञिक समय: ।

मोक्षशास्त्रिक समय: ।

| | | |
|---|---|---|
| आयुर्वेदिक: समय: | – | चतुष्पादं भेषजम् । |
| याज्ञिक: समय: | – | आलभ्या यजमानै: पशव: । |
| मोक्षशास्त्रिक: समय: | – | सर्वभूतेषु अहिंसा । |

अस्मिन् स्वसमयविपरीतं भाषणं विरुद्धम् इति वदन्ति । एवं पञ्च वाक्यदोषा: सन्ति ।

चक्रपाणि: – छलहेत्वाभासादय: अपि वाक्यदोषा: सन्ति । परं तेषां वर्णनं पृथक् कृतम् ।

– तथैव अन्यशास्त्रे वर्णिता: असिद्धादय: वाक्यदोषा: अपि ग्रहीतव्या: ।

– यदा कस्यापि विषयस्य नैकेभ्य: हेतुभ्य: एकस्य एव वर्णनं क्रियते तदा स: न्यूनदोष: गण्यते ।

– यत्र एकेन हेतूना साध्य सिध्यति तत्र अन्येषां हेतुनां वर्णनं अधिकम् वाक्यदोष: अस्ति ।

– बार्हस्पत्यं औशनसं च एते नीतिशास्त्रे स्त: ।

– यत्र अन्यशास्त्रस्य संदर्भस्य विवरणं अभिप्रेतम् अस्ति तत्र आयुर्वेदाय उपकारकं भवेत् इत्येव वर्णनम् अपेक्षितम् अस्ति एषः अधिकम् दोषः न भवति । परं प्रसङ्गानुसारं वर्णयता अन्यशास्त्राणां वर्णनं आयुर्वेदाय उपकारकं स्यात् तदा सः 'अधिकम्' इति वाक्यदोषः भवति ।

– अक्षरसमुदायेन अभिधेयस्य तात्पर्यं न ज्ञायते ।

विरुद्धम् – उदाहरणानि ।

दृष्टान्तविरुद्धम् – यथा शीतं जलं तापकं तथा ज्वरः अपि इति ।

सिद्धान्तविरुद्धम् – न भेषजं रोगहरम् इति ।

गङ्गाधरः – यस्मिन् वाक्ये न्यूनत्वादयः दोषाः सन्ति तं वाक्यदोषं वदन्ति ।

– गोतमोक्ताः वाक्यदोषाः वर्णिताः । पश्चापि वाक्यदोषाणां न्यायदर्शनगतानि सूत्राणि उदाहरणानि च उद्धृतानि ।

– दृष्टान्तविरुद्धस्य सिद्धान्तविरुद्धस्य च उदाहरणानि वर्णितानि ।

दृष्टान्तविरुद्धम् – वह्निः उष्णः सलिलवत् ।

सिद्धान्तविरुद्धम् –

सर्वतन्त्रसिद्धान्तविरुद्धम् – नास्ति निदानं व्याधीनाम् ।

प्रतितन्त्रसिद्धान्तविरुद्धम् – सप्त इन्द्रियाणि इति ।

अधिकरणसिद्धान्तविरुद्धम् – आनुबन्धिकं कर्म मुक्तं कुरुते ।

अभ्युपगमसिद्धान्तविरुद्धम् – कार्यद्रव्यं प्रधानम् ।

समयविरुद्धम् – समयः इति नियमकरणम् । स शास्त्रार्थवादे त्रिधा भवति ।

– गौतमोक्तं वाक्यदोषस्य वर्णनम् ।

योगीन्द्रनाथ सेनः– चकारेण अविज्ञातार्थः अपि ग्राह्यः ।

– वाक्यप्रशंसागताः अधिगतपदार्थाः अपि ग्राह्याः ।

– न्यायदर्शनस्थानां ५।१।१२ तः १६ पर्यन्तानां सूत्राणाम् उल्लेखः । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः– 'अस्मिन् अर्थे' इति पदयोः अर्थः 'अत्र प्रकरणे' इति भवति ।

– हेत्वाभासादयः अपि वाक्यदोषाः एव परं तेषां उल्लेखः पृथक् कृतः ।

– बार्हस्पत्यम् – नीतिशास्त्रम् । औशनसम् शुक्रकथिता राजनीतिः ।

– शारीरव्याख्यानप्रसङ्गे सांख्यादिशास्त्राणाम् उपदेशकरणं इति 'अधिकम्' वाक्यदोषः नास्ति ।

– समयः नियमः स्वतन्त्रसिद्धान्तः । शेषः अविशेषः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**वाक्यप्रशंसा** – सूत्रम् ५५

चरकः – न्यूनम् अधिकम् , अनर्थकम् , अपार्थकम् , विरुद्धम् एतैः दोषैः वर्ज्यं वाक्यं तथा अधिगतपदार्थं वाक्यं यद् अननुयोज्यम् अस्ति तद् वाक्यप्रशंसा इति ।

चक्रपाणिः – अननुयोज्यम् इति न अनुयोगार्हम् ।

– नाम अस्मिन् वाक्ये पुनः प्रश्नः प्रष्टव्यः इति संभावना नास्ति ।

गङ्गाधरः – अदुष्ट वाक्यस्य वर्णनम् ।

– अधिगताः सम्यग् ज्ञातुमर्हाः पदार्था यत्र वाक्ये तत् अधिगतपदार्थः । शेषः वाक्यार्थः ।

योगीन्द्रनाथ सेनः – प्रशंसा इति गुणः ।

ज्योतिषचन्द्र सरस्वतिः – अविशेषः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**छलम्** – सूत्रम् ५६

चरकः यद् वाक्यं परिशठम् अर्थाभासयुक्तं अनर्थकम् च अस्ति तथा वाग्वस्तुमात्रं भवति तस्मै छलम् इति वदन्ति ।

छलं द्विविधम् – वाक्छलम् सामान्यछलम् च ।

– वाक्छलम्

पक्षः – नवतन्त्रोऽयं भिषक् ।

प्रतिपक्षः – नाहं नवतन्त्रः एकतन्त्रोऽहम् ।

पक्षः – नाहं ब्रवीमि नव तन्त्राणि नवेति अपि तु नवाभ्यस्तं ते तन्त्रम् इति ।

प्रतिपक्षः – न मया नवभ्यस्तं तन्त्रम् अनेकधाऽभ्यस्तं मया तन्त्रमिति ।

– सामान्यछलम्

पक्ष: – व्याधिप्रशमनाय औषधम् ।

प्रतिपक्ष: – सत् सत् प्रशमनाय इति किं नु भवानाह सत् हि रोग: सत् औषधम् । यदि सत् सत्प्रशमनाय भवति तत्र सत् कास: सत् क्षय: सत्सामान्यात् कास: ते क्षयप्रशमनाय भविष्यति ।

चक्रपाणि: – परिशठम् – वञ्चनाप्रवृत्तम् ।

– अर्थाभास: – अर्थवत् इव आभासत: इति अर्थाभास: ।

– अपगतसमीचीनार्थत्वेन वाग्ववस्तुमात्रम् ।यथोचितं विषयस्य अनुपस्थिति: नाम वाग्ववस्तुमात्रम् ।

– अभिप्रेतार्थेन नाम अभीष्टं अभीष्टं प्रयोजनं सिद्धयितुं अन्येषां अर्थान् परिकल्प्य अन्यस्य वचनम् अनुचितं सिद्धयितुं प्रस्तोतव्यं नाम छलम् ।

यदुक्तं न्यायदर्शने

''वचनविधातोऽर्थविकल्पोपपत्त्यात् छलम् ।'' न्या. द. १।२।१०

– अर्थविकल्पस्य प्रतिक्रियया वचनविघातनं नाम छलम् ।

– न्यायोक्त: उपचार: छलम् चरकोक्ते वाक्छले एव समाविष्टं भवति ।

– वाक्छलम् – सामान्यशब्दोक्ते हि अर्थे वक्तु: अभिप्रायात् अर्थान्तरकल्पना वाक्छलम् । वक्त्रा येन अभिप्रायेण शब्दप्रयोग: कृत: तस्य भिन्नस्य अर्थस्य कल्पनाकरणम् ।

उदा. – मञ्चा: क्रोशन्ति? अस्मिन् वचने 'यस्मिन् पुरुषा: उपविशन्ति ईदृश: अचेतन: मञ्च: कथं आक्रोशेत्' एवं प्रत्युत्तरणीयम् ।

– सामान्यछलम् – चरकेण सामान्यछलस्य लक्षणं न वर्णितम् । अत्र न्यायोक्तं लक्षणं ग्रहीतव्यं भवति ।

'' संभवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यछलम् ।''न्या. द. १।२।१३

– संभवनीयम् अर्थम् अतिसामान्येन योगेन अर्थस्य कल्पनाकरणं सामान्यछलम् ।

गङ्गाधर: –

– प्रशस्ते वाक्ये अपि वादी छलितुं शक्नोति अत: वाक्यप्रशंसाया: अनन्तरं छलं वर्णितम् ।

– न्यायदर्शनं तथा तदुपरितनं वात्स्यायनभाष्यं उद्धृतम् ।

छलम् – वचनोविघातोऽर्थविकल्पोपपत्या छलमिति ।

– वात्स्यायनोक्तं विशेषं वर्णनम् ।

– छलस्य सामान्यलक्षणं वर्णयितुं न शक्नोति ।तस्य विभागानुसारं उदाहरणेन ज्ञानं प्राप्तुं शक्यम् ।

– विभाग: त्रिविध: – वाक्छलम् सामान्यछलम् उपचारछलम् ।

वाक्छलम् – अविशेषे अभिहिते अर्थे वक्तु: अभिप्रायात् अर्थान्तरस्य कल्पनाकरणं नाम वाक्छलम्

– वाक्छलात् उपचारछलस्य अवैशिष्टत्वात् तस्य समावेश: वाक्छले एव क्रियते ।

– शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन:– परिशठं वञ्चनाप्रयुक्तम् ।

– अर्थवत् इव अवभासते इति अर्थाविभासम् ।

– न्या. द. १।२।५१, ५२, ५३, ५४, ५५ एतेषां सूत्राणां उद्धरणं दत्तम् ।

– गौतमोक्तस्य तृतीयभेदस्य उपचारछलस्य वर्णनं चरकाचार्येण वाक्छले एव कृतम् ।

– शेषा टीका अविशेषा ।

ज्योतिषचन्द्र सरस्वति: – परिशठं शठतामूलकं मोहयितुकामेव प्रत्युक्तम् ।

– अर्थाभासं वक्तुरभीप्सितार्थं विहाय अन्यार्थे प्रयुक्तम् ।

निरर्थकं निष्प्रयोजनम् ।

– न्यायोक्तां सूत्राणां वर्णनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अहेतु:

चरक: प्रकरणसम: संशयसम: वर्ण्यसम: च एतेभ्य: अहेतव: इति वदन्ति ।

प्रकरणसम: अहेतु: –

'शरीरात् भिन्न: आत्मा नित्य: अस्ति' अस्मिन् वाक्ये प्रतिपक्ष: वदति यत् यस्मात् शरीरात् आत्मा भिन्न: अस्ति तस्मादेव स: नित्य: अस्ति यत: शरीरम् अनित्यम् अस्ति । तस्मात् आत्मा तस्य निधर्मी स्यात् अत: आत्मा नित्य: । एष: अहेतु: अस्ति ।

अस्मिन् यः पक्षः एव नास्ति सः एव हेतुः भवति । एवम् एषः प्रकरणसमः अहेतुः अस्ति ।

संशयसमः अहेतुः –

यः संशयस्य हेतुः भवति सः एव संशयछेदस्य अपि हेतुः । उदा. 'एषः पुरुषः आयुर्वेदस्य एकं अंशं कथयन् अस्ति । अस्मिन् वाक्ये कोऽपि संशयं करोति यत् किम् एषः पुरुषः चिकित्सकः अस्ति? तर्हि पूर्ववादी वदेत् यस्मात् एषः पुरुषः आयुर्वेदस्य एकं अंशं कथयन् अस्ति तस्मात् सः चिकित्सकः'।

अत्र संशयं उत्पाद्यमानः हेतुः एव संशयं निराकुर्वन् हेतुः अस्ति ।

वर्ण्यसमः अहेतुः –

यः हेतुः विषयवर्णनस्य योग्यः न भवति ।उदा. अस्पर्शत्वात् बुद्धिः अनित्या शब्दवत् इति । अत्र शब्दः बुद्धिः च उभे वर्ण्ये स्तः । तेन उभयवर्ण्यत्वस्य अविशिष्टत्वात् एषः अहेतुः सिध्यति ।

चक्रपाणिः– अहेतुः नाम यः हेतुः असाधकः अस्ति । येन हेतुना साध्यं न सिध्यति सः अहेतुः इति

– प्रकरणसमे अहेतौ एकेन पक्षेन साध्यं न सिध्यति । उदाहरणे वर्णितं शरीरं आत्मा च एतयोः नित्यत्वे चार्वाकस्य मतम् उद्धृत्य एषः अहेतुः कथं भवति इति वर्णितम् ।

– संशयसमस्य अहेतोः उदाहरणे आयुर्वेदस्य एकम् अंशं कथयन् पुरुषः चिकित्सकः अस्ति वा न वा अस्मिन् विषये संशयं उत्पद्यते । यतः अचिकित्सकः पुरुषः अपि किमपि श्रुत्वा आयुर्वेदस्य कमपि अंशं कथयितुं शक्नोति ।

तेन साध्यसिद्धेः हेतुः संशययुक्तः अस्ति । संशयं दूरीकर्तुम् अविशेषः अस्ति ।

गङ्गाधरः – वादे छलवचनात् हेतुः अपि अहेतुः भवति । अतः अहेतुः वर्णितः ।

– अहेतुः हेतुलक्षणाभावात् हेतुसामान्यात् हेतुवत् आभासमानो हेतुः अहेतुः उच्यते ।

– गौतमः न्यायदर्शने पञ्चविधान् अहेतून् वर्णयति ।

- सव्यभिचारः
- विरुद्धः
- प्रकरणसमः
- साध्यसमः
- अतीतकालः

एते न्यायोक्ताः पञ्च हेतवः सन्ति ।

– एतस्मिन् सव्यभिचार: विरुद्ध: अतीतकाल: च एतेषां विवरणं चरक: भिन्नं करोति ।

– न्यायोक्त: साध्यसम: अहेतु: चरकोक्त: वर्ण्यसम: अहेतुः अस्ति ।

– चरकोक्तस्य संशयसमस्य अहेतो: वर्णनं न्यायदर्शने 'जात्यां' (जाति: मध्ये) कृतम् ।

– न्यायोक्तं सूत्रं तद्गतं वात्स्यायनभाष्यस्य च उद्धरणं दत्तम् ।

योगीन्द्रनाथ सेन: – अहेतु: इति असाधकहेतु: । वस्तुतो न हेतु: । किन्तु हेतुरिव आभासते इति हेत्वाभास: । न्यायनये हेत्वाभास: पञ्चविध: अस्ति ।

– प्रकरणं नाम पक्ष: । य: पक्ष: स: एव हेतु: भवति । अत: एष: प्रकरणसम: अहेतु: ।

– न्याय द. १।२।४५, ४८, ४९ एतेषां सूत्राणाम् उद्धरणं दत्तम् ।

ज्योतिषचन्द्र सरस्वति: – केवलं शब्दार्थस्य अविशेषं विवरणम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अतीतकालम्** – सूत्रम् ५८

चरक: – यद् वाक्यं पूर्वम् उच्चारणीयम् आसीत् तस्य पश्चात् उच्चारणेन तद् अग्राह्यं भवति तम् अतीतकालम् उच्यते ।

– प्रतिपक्षे निग्रहप्राप्ते अपि पराजितं न कृत्वा पक्षान्तरं कृत्वा पश्चात् निग्रहवचनं उच्चारितं चेत् तत् कालातीतत्वात् अग्राह्यं भवति ।

चक्रपाणि: – निगमनानन्तरं प्रतिज्ञाकरणं नाम अतीतकालम् । शेष: अविशेष:

गङ्गाधर: – अतीतकालस्य शब्दार्थश: व्याख्यावर्णनम् ।

– गौतमोक्तम् हेत्वाभासे वर्णितम् अस्ति ।

– कालात्ययापदिष्ट: – कालातीत: । वात्स्यायनेन अस्य व्याख्यानम् अत्र कृतम् ।

– य: कालातीत: भवति तस्यैव वर्णनं हेत्वाभासे कृतम् ।

– साधारणविषये तन्त्रे पृथक् वर्णनं कृतम् अत: कालातीतम् एनम् विरोध: नास्ति ।

योगीन्द्रनाथ सेन: – केवलं अर्थश: अविशेषं विवरणम् ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## उपालम्भः – सूत्रम् ५९

चरकः – उपालम्भो नाम हेतोः दोषवचनम् । उदा. – अहेतुरुपः हेत्वाभासः ।

चक्रपाणिः – कालात्ययापदिष्टम् असिद्धम् च एताभ्यां द्वाभ्यां अनुक्तयोः ग्रहणं नाम हेतौ दोषवचनकरणम् । एतदर्थम् उदाहरणार्थम् अहेतवः वर्णिताः ।

– हेतुवत् आभासन्तः इति हेत्वाभासाः ।

गङ्गाधरः – हेतौ दोषवचनकरणम् ।

– प्रत्यक्षादयः हेतवः उपलब्धिकारणाः सन्ति । हेतुदृष्टान्तादिभिः स्थापयित्वा अवर्ण्यसमः, विकल्पसमः, साध्यसमः एवं बहुविधाः उपालम्भाः सन्ति ।

– तेषां नामानि –

| | | | | |
|---|---|---|---|---|
| प्रकरणसमः | प्राप्तिसमः | अनुपलब्धिसमः | संशयसमः | अप्राप्तिसमः |
| नित्यसमः | वर्ण्यसमः | प्रसङ्गसमः | अनित्यसमः | अवर्ण्यसमः |
| प्रतिदृष्टान्तसमः | कार्यसमः | उत्कर्षसमः | अनुत्पत्तिसमः | अपकर्षसमः |
| अहेतुसमः | विकल्पसमः | अर्थापत्तिसमः | साध्यसमः | अविशेषसमः |
| साधर्म्यसमः | उपपत्तिसमः | वैधर्म्यसमः | उपलब्धिसमः | |

एते सर्वे हेतुदोषाः सन्ति ।

योगीन्द्रनाथ सेनः – हेतोः दोषकथनं उपालम्भाः । प्रकरणसमादयः हेतुदोषाः भवन्ति ।

– 'अहेतु' शब्देन तद् संहितायां प्रागेव वर्णितम् ।

ज्योतिषचन्द्र सरस्वतिः

– हेतोः दोषवचनमिति भवदुत्थापितो हेतुरेषः अहेतुः हेत्वाभासो वेत्युक्तिः इत्यर्थ्यः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## परिहारः – सूत्रम् ६०

चरकः – हेतुगतानां दोषवचनानां परिहरणं नाम परिहारः ।

उदा. नित्यः आत्मा शरीरस्थ सन् जीवलिङ्गानि दृश्यन्ते । सः आत्मा निर्गते सति एतानि लक्षणानि न दृश्यन्ते । एतस्मात् शरीरात् आत्मा भिन्नः अनित्यः च इति ज्ञायते ।

चक्रपाणि: – अविशेषा टीका ।

गङ्गाधर: – परिहरणस्य उद्धार: प्रत्यवस्थानं च इति द्वे पर्यायेत: ।

– चरकोक्तयो: उपालम्भपरिहारयो: वर्णनं गौतमेन 'जाति' मध्ये कृतम् ।

– न्यायोक्ताया: जात्या: ससूत्रं वर्णनम् ।

– चतुर्विंशति प्रकारस्य उपालम्भपरिहारयो: न्यायदर्शगतानां सूत्राणां वर्णनम् ।

योगीन्द्रनाथ सेन: – हेतुदोषपरिहरणं परिहार: ।

– प्रकरणसमहेतुदोषस्य वर्णनं परिहरणस्य उदाहरणै: चरकेन दत्तम् ।

ज्योतिषचन्द्र सरस्वति: – टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**प्रतिज्ञाहानि:** – सूत्रम् ६१

चरक:– यदा पराजितत्वात् वादी प्रथमकृतां प्रतिज्ञां त्यजति तस्मै प्रतिज्ञाहानि: इति वदन्ति ।

उदा. प्रथमं प्रतिज्ञा कृता यत् पुरुष: नित्य: अस्ति । यदा वादे पराजय: प्रारब्ध: तदा वादी प्रतिज्ञाविरुद्धम् अवदत् यत् 'पुरुष: अनित्य: अस्ति' तर्हि सा प्रतिज्ञाहानि: इति ।

चक्रपाणि:– टीका नास्ति ।

गङ्गाधर: – प्रवर्तमाने वादे कस्य जय: कथं भवति वा कस्य पराजय: कथं भवति एतत् कथितुं वादमार्गपदस्य वर्णनं कृतम् ।

– एवं बहुविधा: प्रतिज्ञाहानय: सन्ति । तासां विशेषं वर्णनं निग्रहस्थाने कृतम् ।

– प्रतिज्ञाहानि: चतुर्विधा अस्ति । एतासां वर्णनं न्यायदर्शने अस्ति ।

अ) प्रतिज्ञाहानि:

आ) प्रतिज्ञान्तरम्

इ) प्रतिज्ञाविरोध:

ई) प्रतिज्ञासन्यास: – एतासां चतुर्विधानां गौतमोक्तानां सूत्राणां वर्णनम् ।

योगीन्द्रनाथ सेन: – प्रतिज्ञाया: त्याग: हानि: प्रतिज्ञाहानि: ।

– प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानि: । न्या. द. ५।२।२

ज्योतिषचन्द्र सरस्वति: – शब्दार्थविवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अभ्यनुज्ञा** – सूत्रम् ६२

चरक: – यत्र इष्टानिष्टे एते द्वे वचने स्वीक्रियेते तौ अभ्यनुज्ञा इति कथ्यते ।

चक्रपाणि: – अस्य उदाहरणेन वर्णनं कृतम् ।

– यदा वादी प्रतिवादिनम् अवदत् यद् 'भवानव चौर:' तदा प्रतिवादी स्वदोषस्य परिहारं न कृत्वा तं प्रत्युत्तरयन् अवदत् यत् 'भवान् अपि चौर:' तर्हि एतद् वचनं प्रतिवादिनं स्वम् अनिष्टम् वादिनम् इष्टं च अस्ति । यत: तस्मात् अनाकल्नय प्रतिवादी स्वयं चौरम् इति अमन्यत । न्यायशास्त्रे इदं मतानुज्ञा इति उच्यते ।

गङ्गाधर: – य: इष्ट: स्वपक्ष: अस्ति तं अपरया व्यक्त्या प्रदर्शितात् दोषत्वात् अनिष्टं कृत्वा परमतस्य स्वीकार: नाम अभ्यनुज्ञा अथवा मतानुज्ञा ।

गौतमस्य सन्दर्भ: – स्वपक्षदोषाभ्युपगमात् परपक्षदोष – प्रसङ्गो मतानुज्ञा ।

– या व्यक्ति: अपरेण उद्धृतं दोषं स्वपक्षे स्वीकरोति अपि च तस्य परिहारं न कृत्वा परपक्षे तं दोषं आरोपयति तं मतानुज्ञा नाम निग्रहस्थानं प्राप्यते ।

योगीन्द्रनाथ सेन: – इष्ट: नाम परपक्षदोष: उत अनिष्ट: नाम स्वपक्षदोष: ।

– एतयो: अभ्युपगम: नाम स्वीकार: इति अभ्यनुज्ञा ।

– न्यायमतेन एषा मतानुज्ञा इति उच्यते । न्यायदर्शनस्य सन्दर्भ: – ५।२।२१

ज्योतिषचन्द्र सरस्वति:

– स्वपक्षदोषं अनिराकृत्य परपक्षदोषस्य वर्णनम् एतेन स्वपक्षस्य दोषस्य स्वीकृति: भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**हेत्वन्तरम्** – सूत्रम् ६३

चरक: – यत्र प्रकृतहेतु: कथनीय: तत्र विकृतहेतुकथनम् इति हेत्वन्तरम् ।

चक्रपाणि: – नास्ति टीका ।

गङ्गाधर: – अविशेषोक्ते हेतौ प्रतिषिद्धस्य विशेषहेतो: अपेक्षा इति हेत्वन्तरम् इति गौतम:।

– शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: – अस्य उल्लेख: न्यायदर्शने ५।२।६ मध्ये अस्ति ।

ज्योतिषचन्द्र सरस्वति: – प्रकृतहेतौ प्रत्यनीकस्य विकृतहेतो: वाच्यम् । उदाहरणार्थम् वातवृद्धौ रुक्षत्वादीनां हेतूनां वर्णनम् अकृत्वा प्रत्यनीकानां स्निग्धत्वादीनाम् हेतूनां कथनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अर्थान्तरम्** – सूत्रम् ६४

चरक: – यत्र यस्य विषयस्य कथनं आवश्यकमस्ति तत्र स: न कथयित्वा अन्यस्य विषयस्य कथनम् । यथा यत्र ज्वरलक्षणस्य वर्णनम् आवश्यकं तत्र प्रमेहलक्षणानां वर्णनम् ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – गौतमस्य संदर्भ: – प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ।

– स्वाभाविकविषयस्य प्रतिपादने अप्रतिसम्बन्धविषयस्य वर्णनम् । शेष: अविशेष: ।

योगीन्द्रनाथ सेन: – न्यायदर्शनस्य ५।२।७ सन्दर्भ: । शेषं केवलं शब्दार्थस्य विवेचनम्

ज्योतिषचन्द्र सरस्वति: – केवलं उदाहरणं वर्णितम् ।

– निदानस्य ग्रन्थे चिकित्साया: वर्णनं इति अर्थान्तरम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**निग्रहस्थानम्** – सूत्रम् ६५

चरक: – निग्रहस्थानं नाम पराजयप्राप्ति: ।

ज्ञानवत्यां सभायां त्रिवारं कथयित्वा अपि वादं कुर्वाणं वाक्यपरिज्ञानं न भवेत् अथवा स: अननुयोज्यस्य अनुयोगं वा अनुयोज्यस्य अननुयोगं वा न कुर्यात् तर्हि स: पराजय: अस्ति ।

| | | |
|---|---|---|
| प्रतिज्ञाहानि: | अभ्यनुज्ञा | कालातीतवचनम् |
| अहेतु: | न्यूनम् | अधिकम् |
| व्यर्थम् | अनर्थकम् | पुनरुक्तम् |
| विरुद्धम् | हेत्वन्तरम् | अर्थान्तरम् |

एतानि निग्रहस्थानानि सन्ति ।

चक्रपाणि: – पराजयस्य स्थानवत् स्थानम् ईदृशं कारणम् नाम निग्रहस्थानम् ।

– यदि परिषद् तद्वाक्यस्य अर्थं जानाति परं प्रतिवादी न जानाति चेत् तत् प्रतिवादिन: निग्रहस्थानम् ।

– बुद्धिमन्त: अत्र अप्रतिभादीन् न्यायोक्तान् घटकान् अपि समाविशेत् ।

– आयुर्वेदे निग्रहस्थानस्य उपयोगित्व इत्यस्य अभावेन अस्य विषयस्य विस्तृतं वर्णनं न कृतम् ।

– न्यायशास्त्रज्ञेभ्य: इदम् अनुक्तमपि सुगमम् । यत: यद्यपि आयुर्वेदे न वर्णितम् तथापि न्यायशास्त्रे अस्य वर्णनम् अस्ति । अत: न्यायशास्त्रं अभ्यस्यन्तं मनुष्यं ज्ञानं भवति । तस्मात् स: वादे सुगमताम् अनुभवति । अपि च य: न्यायदर्शनं न जानाति तस्मै स्वल्पं कथितं चेद् तथापि तद ज्ञानं पूर्णयितुं असमर्थं अस्ति ।

अत: आयुर्वेदे अयं विषय: तन्त्रे विस्तारेण वर्णित: इति न दृश्यते ।

गङ्गाधर: – येन पराजयं प्राप्नोति तां पराजयप्राप्तिं निग्रहस्थानम् इति नामधेयम् ।

– अविज्ञातार्थादिका: तस्य विभागा: सन्ति ।

– गौतमेन अस्य सामान्यं लक्षणं वर्णितम् – '' विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।''

विप्रतिपत्ति: – विपरीता वा कुत्सिता वा प्रतिपत्ति: विप्रतिपत्ति: ।

विप्रतिपद्यमान: पराजयमाप्नोति ।

अप्रतिपत्ति: – अप्रतिपत्ति: तु आरम्भविषये न प्रारम्भ: ।

परेण स्थापितं वा न प्रतिषेधति प्रतिषेधं वा नोद्धरति ।

निग्रहस्थानम् → विप्रतिपत्ति:
निग्रहस्थानम् → अप्रतिपत्ति:

– एताभ्यां विप्रतिपत्ति: अप्रतिपत्ति: च विकल्पाभ्यां निग्रहस्थानं बहुत्वं प्राप्नोति ।

– विकल्प: – नानाकल्पो विकल्पो विविधो वा कल्पो विकल्प: ।

– अप्रतिपत्तिनिग्रहस्थानम् – अविज्ञानम् अननुभाषणम् अप्रतिभाविक्षेप: मतानुज्ञा पर्यनुयोज्य उपेक्षणम्

– विप्रतिपत्तिनिग्रहस्थानम् – शेष: ।

– एभ्य: अत्र विप्रतिपत्तिविकल्पेन भवत् निग्रहस्थानं वर्णितम् ।

– चरकसंहितायां अभिप्रेता निग्रहस्थानस्य व्याख्या –

''विज्ञानवत्यां परिषदि न तु मूढायां वादे प्रवर्तमानयो: द्वयो: एकेन वादिना पारिषदेन वा श्लिष्टशब्दगूढार्थशब्द–अप्रतीतप्रयोग–दुर्बोधार्थ–अतिद्रुतोच्चारितादिशब्दै: त्रिरुक्तस्य वाक्यस्य अर्थत: अपरस्य वादिनो यन्न विज्ञानं भवति तत् खल्वविज्ञातार्थमुच्यते निग्रहस्थानम् ।''

– गौतमोक्तम् –

''परिषदि प्रतिवादिना त्रिवारम् उच्चार्थ अपि अर्थज्ञानं न भवनम् एष: अविज्ञातार्थ: ।''

तस्य कारणम् – श्लिष्टशब्दम् अप्रतीतप्रयोगम् अतिद्रुतोच्चारितम् च ।

योगीन्द्रनाथ सेन:

– गौतमानुसारं – विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । न्या. द. १।२।६०

– वात्स्यायन: – निग्रहस्थानं खलु पराजयप्राप्ति: ।

– विपरीता कुत्सिता वा प्रतिपत्ति: विप्रतिपत्ति: । विप्रतिपद्यमान: अप्रतिपद्यमानो वा पराजयं प्राप्नोति ।

– निग्रहस्थानं विज्ञानवत्यां परिषदि त्रि: उक्तस्य वाक्यस्य अविज्ञानम् ।

– अविज्ञातम् च अज्ञानम् । न्या. द. ५।२।१८

– पारिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् । न्या. द. ५।२।९

– अत्र अविज्ञानम्, अनुयोज्यस्य अननुयोग: तथा अननुयोज्यस्य अनुयोग: एतानि त्रिविधानि निग्रहस्थानानि कथितानि ।

– अतिदेशेन प्रतिज्ञाहानि इत्यादीनां निग्रहस्थानानां बोध: अथ कारणीय: ।

– अस्मिन् व्यर्थ: नाम अपार्थक: ।

– गौतमोक्तानां निग्रहस्थानानां नामोल्लेख: ।

ज्योतिषचन्द्र सरस्वति: – केवलं शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरण ३ उपाधिकरणम् क

## वादः – आयुर्वेद कर्तव्यम् – सूत्रम् ६७

चरकः

– वादे प्रवृत्ते वैद्याः आयुर्वेदशास्त्रे एव वादं कुर्युः न अन्येषु शास्त्रेषु ।

– वादे आयुर्वेदगतानां सर्वाधिकरणानां वाक्यानि प्रतिवाक्यानि च युक्तिपूर्वकं तथा विस्तारेण उपपत्तिपूर्वकं उद्धृतव्यानि ।

– अप्रकृतकम् अशास्त्रम् अपरीक्षितम् असाधकम् आकुलम् अथवा अव्यापकम् एतादृशानि वाक्यानि नोच्चारणीयानि ।

– सर्वाणि वचनानि हेतुयुक्तानि स्युः ।

– हेतुयुक्तः दोषरहितः वादः प्रशस्तबुद्धिं वर्धयति तथा चिकित्सायां साफल्यं यच्छति ।

– अनुपहता बुद्धिः आरब्धे सर्वस्मिन् कार्ये सिद्धिं यच्छति ।

चक्रपाणिः – अस्मिन् सूत्रे आयुर्वेदम् अधीयानेन आयुर्वेदे कथं वादः करणीयः अस्य विवरणं कृतम्

– 'सर्वाधिकरणेषु' इति पदे 'सन्ति' इति पदस्य शेषः अस्ति ।

– अनुपहता बुदिधः न केवलं चिकित्सासिद्धिं करोति अपि तु सर्वस्मिन् आरम्भके कार्ये सिद्धिं प्रयच्छति ।

गङ्गाधरः

– अकलुषा नाम विशदा इति । अनुपहतं नाम प्रशस्तम् । वैद्याः वादे तद्विद्यसम्भाषां कुर्युः ।

योगीन्द्रनाथ सेनः – समासकथनम् उद्देशः । विस्तरकथनम् निर्देशः ।

– उपपत्तिः इति सम्यक् अवेक्ष्य । अप्रकृतिकम् असंबद्धम् । अपरीक्षितं प्रमाणैः असाधकम् ।

– आकुलीकरणं व्यामोहजनकम् । अकलुषः अस्य अर्थः 'विशदः' इति ।

ज्योतिषचन्द्र सरस्वतिः – तु इति अवधारणे । खलु इति निश्चितम् ।

– सर्वाधिकरणम् अस्य अर्थः आयुर्वेदगतं विषयादि पञ्चाङ्गात्मकम् ।

विषयोऽ विषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चागं शास्त्रेऽधिकरणं स्मृतम् ।।

अस्मिन् विषयः – विचारार्ह वाक्यम् ।

अविषयः – संशययुक्तं वाक्यम्

पूर्वपक्षः – प्रकृतार्थ विरोधितर्कोपन्यासः ।

उत्तरम् – सिद्धान्तानुकूलतर्कोपन्यासः ।

निर्णयः – सिद्धान्तसिद्धविचार्य वाक्यतात्पर्यावधारणम् ।

एवं प्रकारेण यत्र विवेचनं क्रियते तद् अधिकरणम् ।

–अप्रकृतिकम् अहेतुकम् । अशास्त्रं शास्त्रविरोधि । अपरीक्षितं विविधैः प्रमाणैः अप्रमाणितम् ।

असाधकं यथार्थनिर्णये अप्रयोजकम् । आकुलं विपरीतार्थकम् । अव्यापकं व्याप्तिरहितम् ।

– अकलुषा दोषरहिता । अनुपहता निर्मला ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## अधिकरणम् चतुर्थम्

## भिषजां ज्ञानार्थं कानिचित् प्रकरणानि ।

सूत्राणि ६८ – १५१

अस्मिन् अधिकरणे द्वे उपाधिकरणे स्तः ।

अ) कारणादि दशपदानि सूत्राणि ६८ – ७९

आ) वमनादि परीक्षादेः नवकः संप्रश्नः सूत्राणि ८० – १५१

एतद् अनुसारं विषयविवेचनं पश्याम् ।

अ) कारणादि दशपदानि – अस्मिन् अग्रीम् घटकाधारेण वर्णनं कृतम् ।

१) प्रकरणोद्देशः – सूत्रम् ६८

२) कारणादि वर्णनम् – सूत्राणि ६९ – ७८

३) प्रकरणोपसंहारः – सूत्रम् – ७९

(१) प्रकरणोद्देशः –

चरकः – कुशलाः ज्ञानपूर्वकं हि कर्मणां समारम्भं प्रशंसन्ति ।

– यः पुरुषः कारणादिघटकान् सम्यक् ज्ञात्वा सम्यक् कार्यं करोति सः इष्टफलं प्राप्नोति ।

चक्रपाणि: – बुद्धिवर्धनार्थं तद्विद्यसम्भाषाप्रकरणस्य अनुषंगेन आयुर्वेदगतम् उपयुक्तं कारणादि विवेचनं कृतम् । ‘ज्ञानपूर्वकं’ इत्यर्थ: ‘कर्तव्यस्य अनुगुणानां पदार्थानां ज्ञानसहाय्येन’ इति भवति

– इष्टम् – तादात्विकं फलम् । अनुबन्धम् – आयतीयफलम् ।

गङ्गाधर: – अनुपहतबुद्धीनां सर्वारम्भसिद्धे: हेतवे तद् प्रसंगेन केचन विषया: वर्णिता: ।

– अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन: – केवलम् अर्थश: विवेचनम् ।

ज्योतिषचन्द्र सरस्वति: – ज्ञानपूर्वकं नाम ज्ञानप्राप्ते: अनन्तरं कार्यकरणम् ।

– कर्ता चिकित्सक: स्वल्पप्रयासेन एतेषां कारणादिघटकानां ज्ञानं प्राप्य कार्यारम्भं करोति । तस्मात् चिकित्सां कुर्वन् सम्यक् इष्टम् अनुबन्धस्वरुपि आरोग्यप्रदं च फलं प्राप्नोति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) **कारणादीनां वर्णनम्** – सूत्राणि ६९ – ७८

१) **कारणम्** – कारणं नाम य: कार्यं करोति स एव हेतु: स एव कर्ता इति उच्यते ।

चक्रपाणि: – अत्र चक्रपाणि: ‘यत्’ इति पाठं स्वीकरोति । ‘कारणम्’ इत्यस्य नपुंसकलिंगिन: पदस्य विशेषणम् अत: ‘यद्’ पदस्य नपुंसकलिंगिनं रुपं योजितम् ।

– ‘करोति’ इति पदेन ‘कर्ता तस्य कार्यं स्वतन्त्रेण कर्तुंशक्नोति’ इति अर्थ: ।

गङ्गाधर: – गङ्गाधरेण ‘यद्’ स्थाने ‘य:’ इति पाठ: योजित: ।

– कर्ता हेतु: च एतौ कारणस्य पर्यायौ स्त: । तथैव कारकप्रयोजकौ अपि पर्यायौ स्त: ।

– पाणिने: वचनम् – ‘‘कारके स्वतन्त्र: कर्ता प्रयोजको हेतुश्चेति ।’’

– फलरुपाणां क्रियाणां निष्पादनं करोति स: कारक: । क्रियाया: मुख्यम् आश्रयस्वरुपं कारणम् ।

– कर्मविषये विस्तृतं विवेचनम् ।

योगीन्द्रनाथ सेन: – कारणपदे ‘स्वार्थे णिच्’ प्रत्यय: युक्त: । अविशेषा टीका ।

ज्योतिषचन्द्र सरस्वति: – ‘य:’ इति पाठभेद: विधेयप्राधान्यात् ‘पुलिंगी’ योजित: ।

निष्कर्ष: – ‘यद्’ इति पदे पाठभेद: अस्ति । तेन वैधर्म्यं भवति ।

## २) करणम्

चरकः – कर्तुः कार्याभिनिर्वृत्तो प्रयतमानस्य यद् उपकरणाय उपकल्पते तद् करणम् ।

चक्रपाणिः – 'उपकरणाय' इत्यर्थः 'कर्तुः सम्पादनयोग्ये कार्ये सहकारिणि रुपे प्रयुज्यमानः' एवं भवति । कर्तुः कार्ये साधकतमम् अस्ति तद् करणम् ।

– यः कार्ये कारणान्तरप्रेरकः अस्ति सः कर्ता अत्र कारणशब्देन उच्चारितः ।

– यः बुध्दिप्रयत्नैः युक्तः सन् अन्यकारणान् प्रेरयति तस्यैव कर्तृत्वं मुख्यं भवति ।

गङ्गाधरः – साधकतमं करणम् ।

– वातादिभ्यः उपयुक्तानां मधुराद्यचेतनद्रव्याणां वातादिहरणे कार्ये तस्य द्रव्यस्य सम्पत्तिः उपकरणाय कल्प्यते ।

– तस्याः करणत्वनिवारणाय 'प्रयतमानस्य' पदं योजितम् ।

– 'प्रयत्नः' चेतनवतां घटकानां लक्षणम् । अचेतनेषु प्रयत्नः इति लक्षणं न भवति ।

– तस्मात् प्रयत्नं कुर्वतः भिषगादेः कर्तुः चिकित्साकार्यस्य प्रवृत्तौ भेषजं शस्त्रम् इत्यादयः उपकरणस्वरुपिणः सन्ति । एवं भेषजं शस्त्रम् इत्यादिकानि करणानि सन्ति ।

योगीन्द्रनाथ सेनः – प्रयतमानस्य इति व्यापारवतः । क्रियते अनेन इति करणम् ।

– साधकतमं करणम् ।

ज्योतिषचन्द्र सरस्वतिः – कार्यसम्पादनाय चेष्टन्तं कर्तारं यद् द्रव्यं साधनीभूतं तद् करणम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## (३) कार्ययोनिः

चरकः – यद् विकृतं भूत्वा कार्यत्वम् आगच्छति तद् 'कार्ययोनिः' इति उच्यते ।

चक्रपाणिः – कार्ययोनिः कार्यस्य समवायिकारणम् अस्ति ।

– विक्रियमाणा – रुपान्तरमापद्यमाना । विक्रियमाणं कारणं कार्यरुपं प्राप्नोति ।

उदाहरणार्थम् – मृत्तिका घटस्य कार्ययोनिः अस्ति । मृत्तिका अवस्थान्तरणं प्राप्य घटं भवति ।

गङ्गाधरः – विक्रियमाणा – विकृतिम् आपद्यमाना ।

उदाहरणार्थम् – मधुरादीनि रसयुक्तानि द्रव्याणि सेवनानन्तरं रसरक्तादिरुपत्वं प्राप्नुवन्ति ।

रसरक्तादिकार्यस्ययोनि: मधुरादीनि द्रव्याणि सन्ति ।

– तद्वत् वातादीनि ज्वरादिकार्यस्य योनि: अस्ति ।

योगीन्द्रनाथ सेन: – विक्रियमाणा – विकृतिम् अवस्थान्तरमापद्यमाना ।

–तण्डुल: कार्ययोनि: ओदनं कार्यम् । जलाग्निसंयोगेन विक्रियमाणा: तण्डुला: ओदनत्वं प्राप्नुवन्ति ।

– मृत्तिका घटस्य योनि: अस्ति ।

– कार्यस्य समवायिकारणम् अस्ति ।

ज्योतिषचन्द्र सरस्वति: – कार्यस्य योनि: नाम तस्य समवायिकारणं भवति । यस्या: विकृत्या कार्योत्पत्ति: भवति ।

निष्कर्ष: – 'विक्रियमाणा ' इति पदे वैधर्म्यं अस्ति ।

## ४) कार्यम्

चरक: – यस्य अभिनिर्वृत्तिम् अभिसन्धाय कर्ता प्रवर्तते, तद् कार्यम् ।

चक्रपाणि: – 'अभिनिर्वृत्तिम् अभिसन्धाय' अस्य अर्थ: 'कर्तव्यबुद्धिं स्थिरीकृत्य' इति अस्ति ।

गङ्गाधर: – यस्य उत्पत्यै समविषमयोगेन बुद्ध्यादीनि अभिसन्धाय कर्ता प्रवर्तते तं कार्यं इति वदेत् । कार्यम् एतत् वाण्या मनसा शरीरेण च चेष्टारुपम् अस्ति ।

– कर्तारम् ईप्सिततं कार्यम् अस्ति ।

उदाहरणार्थम्

(१) देवदत्त: तण्डुलानां ओदनं पचति । अस्मिन् उदाहरणे तण्डुल: इति कार्ययोनि: अस्ति । ओदनम् इति कार्यम् । तस्य अभिनिवृत्तये अवयवशैथिल्यम् अभिसन्धाय देवदत्त: काष्ठानिस्थाल्यारोपणादिषु प्रवर्तते ।

(२) देवदत्त: ग्रामं गच्छति । अस्मिन् ग्रामं विक्रियमाणं भूत्वा कार्यत्वं न प्राप्नोति । तस्मात् तद् कार्ययोनि: अपि नास्ति । अथवा ग्रामोत्पत्तये देवदत्त: अभिसन्धानं कृत्वा पादस्पन्दनादिषु न प्रवर्तते । तस्मात् ग्रामं कार्यं नास्ति ।

– कार्यं हि कर्मकारकम् । अत्र द्वितीया विभक्ति: अस्ति ।

– देवदत्तः पूर्वदेशं विहाय उत्तरदेशस्य संयोगाय अभिसन्धाय पादस्पन्दनादिषु प्रवर्तते । एवं देवदत्तः ग्रामसंयोगस्वरुपं कार्यं करोति । अस्य कर्मणः आश्रयेण ग्रामं कर्मत्वं प्राप्नोति ।

– अस्मिन् उदाहरणे पथः अपि संयोगः भवति । परं तद् कार्यत्वं न प्राप्नोति । देवदत्तस्य अभिसन्धिः ग्रामसंयोगार्थम् अस्ति न पथसंयोगार्थम् ।

– अभिसन्धिः हि प्रयोजनसिद्धौ चरमहेतुतया तद्वस्तुज्ञानम् ।

– देवदत्तः तण्डुलान् ओदनं पचति । अत्र तण्डुलेषु शिथिलावयवरुपं उत्पत्य ओदनेषु अवयवशैथिल्यम् उत्पद्यते । तदर्थं कर्ता प्रवर्तते ।

– एवम् ओदनम् इति एकम् अवयवशैथिल्यं द्वितीयं कार्यम् एवं कार्यद्वयं घटते ।

– तस्मात् शिथिलावयवत्वात् तण्डुलानां कर्मत्वम् अवयवशैथिल्यवत्वात् ओदनस्य कर्मत्वम् एवं प्रकारे कार्यद्वयस्य बोधः भवति ।

– विकार्यस्थले विकृतिः द्विधा अस्ति ।

अ) प्रकृत्युच्छेदसम्भवरुपान्तरम्  ब) गुणान्तरोत्पत्तिनिमित्तरुपान्तरम्

<u>योगीन्द्रनाथ सेनः</u> – अभिनिर्वृत्तिम्  – निष्पत्तिम् । अभिसन्धाय – अभिप्रेत्य ।

<u>ज्योतिषचन्द्र सरस्वतिः</u>  – अभिनिर्वृत्तिम् – सम्पादनम् । अभिसन्धाय – उद्दिश्य ।

<u>निष्कर्षः</u> – वैधर्म्यं नास्ति ।

## ५) कार्यफलम्

<u>चरकः</u>  – यद् प्रयोजना कार्याभिनिर्वृत्तिः इष्यते, तद् कार्यफलम् ।

<u>चक्रपाणिः</u> – कार्यफलशब्देन अत्र तादात्विकं कार्यफलं गृहीतव्यम् । उदाहरणार्थम् – कुम्भकाराय घटनिर्मित्यां तस्य मूल्यं प्राप्नोति ।

– भविष्यकालीनं फलम् ''अनुबन्धम्'' इति पदेन ग्राह्यम् । उदाहरणार्थम् – घटमूलस्य विनियोगेन कुटुम्बपोषणादिः फलप्राप्तिः ।

<u>गङ्गाधरः</u> – न्यायदर्शनं, पुष्पदन्तः, चरकः, बृहदारण्यकोपनिषद, छान्दोग्यपोनिषद् च एतेषां संदर्भाणां सहाय्येन कार्यं कार्यफलम् अनुबन्धः मोक्षः च एतेषां विषयाणां विस्तृतं विवेचनं कृतम् । यद् विशेषमस्ति ।

– यस्मै प्रयोजनाय कार्यं क्रियते तं कार्यफलम् इति उच्यते । उदाहरणार्थम् – धातुसाम्यं कार्यं उत सुखावाप्ति: कार्यफलम् अस्ति ।

– शुभाशुभकर्मणाफलं शुभाशुभम् अस्ति ।

– कर्मफलं द्विविधम् अस्ति । – सद्य:फलम्

कालान्तरफलम् च ।

– एतयो: सद्यफलं कार्यफलम् उत कालान्तरफलम् अनुबन्ध: इति पदेन सम्बुध्यते ।

– कार्यफलस्य विवरणे एव अनुबन्धस्य अपि न्यायोक्तविवरणं कृतम् यस्मिन् वैधर्म्यं नास्ति ।

– केषांचन पदानां व्याख्या: वर्णिता: यासां वर्णनं परिभाषाप्रकरणे कृतम् ।

<u>योगीन्द्रनाथ सेन:</u> – अर्थश: अविशेषा टीका ।

<u>ज्योतिषचन्द्र सरस्वति:</u> – प्रयोजनम् इति अर्थ: । शेषा टीका अविशेषा ।

<u>निष्कर्ष:</u> – वैधर्म्यं नास्ति ।

## <u>६) अनुबन्ध:</u>

– य: कर्तारं कार्यात् उत्तरकालं कार्यनिमित्त: शुभो वा अपि अशुभो भाव: अवश्यम् अनुबन्ध्नाति स अनुबन्ध:।

<u>चक्रपाणि:</u> – उत्तरकाले कर्त्रा सह सम्बन्धित: अस्ति ।

– शुभकार्यस्य शुभं फलम् अशुभकार्यस्य अशुभम् इति उत्तरकालीनं फलम् ।

<u>गङ्गाधर:</u> –

दृष्टार्थकर्मण: → कार्यफलम् – इहलोके – भोग्यम् ।
दृष्टार्थकर्मण: → अनुबन्ध: – इहलोके – भोग्य: ।

अदृष्टार्थकर्मण: → कार्यफलम् – परलोके भोगावसानम्
अदृष्टार्थकर्मण: → अनुबन्ध: – जन्मान्तरभोग्य: ।

– ‘कर्ता’ इति पदं वैद्यानाम् ऋत्विगादीनां व्यावृत्यर्थम् अस्ति ।

– कार्यात् उत्तरकालम् – इति पदेन समाप्तस्य अवैगुणस्य कार्यस्य बोद्धा ग्रहीतव्य: ।

– तेन व्यभिचारिकारणं व्यवच्छिन्नम् ।

– दुर्बला: निदानादय: यदा अप्रकर्षेण परस्पराणाम् अनुबन्धं कुर्वन्ति तदा विकार: न निर्माति ।

– कार्यनिमित्तफलस्य अनुबन्ध: अपेक्षित: न फलजन्य: अनुबन्ध: ।

योगीन्द्रनाथ सेन: – अनुबन्ध्नाति इति अनुबन्ध: । कार्यस्य शुभाशुभ: उदर्क: ।

ज्योतिषचन्द्र सरस्वति: – कार्यसम्पादनस्य उत्तरकाले तत्कार्यजन्य: मङ्गलावह: वा अमङ्गल्य: च एतेषां भावानाम् अवश्यमेव अनुबन्ध: अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### ७) देश:

चरक: – देश: तु अधिष्ठानम् ।

चक्रपाणि: – कार्यस्य अनुगुण: अननुगुण: वा आधाररुप: देश: नाम अधिष्ठानम् ।

गङ्गाधर: – अधितिष्ठति अस्मिन् इत्यर्थे अधिष्ठियते यत् तद् अधिष्ठानम् स देश: ।

– एष: देश: आतुर: आतुरशरीरप्रदेश: मनोस्वरुपी च अस्ति ।

– भूमि: अपि देश: अस्ति । सा आनूपा, जाङ्गला, साधारणा च एवं त्रिविधा अस्ति ।

योगीन्द्रनाथ सेन: – अधितिष्ठति अस्मिन् अधिष्ठीयते यत् वा तद् अधिष्ठानम् ।

– तम् 'आधार:' इत्यपि वदन्ति ।

ज्योतिषचन्द्र सरस्वति: – कार्यस्य अधिकरणम् एव अधिष्ठानम् अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### ८) काल:

चरक: – काल: इति परिणाम: ।

चक्रपाणि: – परिणमन् ऋतु: अयनादिरुपम् इति काल: ।

– अनेन वचनेन निमेषादि: नित्यग: काल: निराकृत: । नित्यग: काल: सर्वेषां साधारणत्वात् अस्मिन् अधिकरणे तस्य महत्त्वं नास्ति। अत्र स: अनपेक्षणीय: ।

गङ्गाधर: – तिस्त्रैषणीये अध्याये परिणाम: वर्णित: ।

योगीन्द्रनाथ सेन: – मात्राकाष्ठकलादिरुपेण परिणमन्तं कालं परिणाम: इति उच्यते ।

ज्योतिषचन्द्र सरस्वति: – ऋत्वादे: अखण्डकालस्य विवरणम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## ९) प्रवृत्ति:

चरक: – प्रवृत्ति: तु कार्यार्था चेष्टा, सा एव क्रिया कर्म यत्न कार्यसमारम्भ: च ।

चक्रपाणि: – चेष्टा क्रिया इत्यादय: पर्यायिन: शब्दा: सन्ति ।

गङ्गाधर: – चेष्टा – वाङ्मन:शरीराणां प्रवर्तनम् ।

– कार्यार्था नाम कार्यस्य फलार्थम् इति । 'अर्थ:' इति पदम् फलम् इत्यर्थेन योजित: ।

– सैव क्रिया – भावकृदन्तत्वात् करणम् कर्मेति च – भावकृदन्तत्वात् ।

– पूर्वाध्याये 'संयोगे च विभागे च' अस्मिन् सूत्रे इदं वर्णितम् । यत्नम् इति यतनम् न प्रयत्न: ।

–स इच्छासमयोगात् मनस्यात्मप्रवृत्तिरुप:, तस्य समयोगात् तु वाङ्मन:शरीरप्रवृत्तिरुपे अयं यत्न: ।

– प्रयत्नादि कर्म चेष्टितमुच्यते । च. सू. १

– गौतम उक्त – प्रवृत्ति: वाग्बुद्धिशरीरारम्भ: ।

योगीन्द्रनाथ सेन: – कार्यार्था चेष्टा व्यापार: प्रवृत्ति: । क्रियादय: शब्दा: पर्याया: ।

– न्यायदर्शनस्य १/२/१७ सन्दर्भ: प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ: ।

– आरम्भ: व्यापार: ।

– 'बुध्दि:' इति पदं मनोवाचकम् अस्ति ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## १०) उपाय:

चरक:

– कारणं करणं कार्ययोनि: च एतेषां त्रयाणां सौष्ठवं सम्यक् रुपेण अभिविधानं च तथा कार्यफलं कार्यम् अनुबन्ध: च एतान् वर्जयित्वा कारणादीनां त्रयाणां कार्यार्थम् अभिनिर्वर्तनं नाम उपाय: ।

– कार्यस्य अभिनिवृत्ते: प्राक् उपाय: अपेक्ष्यते । निष्पन्ने कार्ये उपायस्य न प्रयोजनम् ।

– कार्यसमाप्ते तादान्विकानुबन्धस्वरुपे अपि उपायस्य प्रयोजनं नास्ति ।

चक्रपाणि:– सौष्ठवम् इति सुष्ठुत्वं कर्त्रादिनां कार्यानुगुणयोगित्वम् ।

– अभिविधानम् – कारणादीनां कार्यानुगुण्येन अवस्थानम् ।

उदा: – शिरोविरेचनकारकस्य भेषजस्य तापनं पिचुदानम् इत्यादि: ।

– तन्तु: इति पटस्य कारणं पटवापनयोग्यतया भवनम् ।

– उपाय: कार्यस्य अभिनिवर्तक: अस्ति । एतद् कार्यस्य अपरं स्वरुपम् ।

– उपायाभावात् कारणादय: एतद् कार्य कर्तुम् असमर्थ: । उपायो हि कार्यकारक: ।

– कार्योत्पत्यानन्तरम् उपायस्य प्रयोजनं न भवति यत: उत्पन्नं कार्यं पुन: कर्तुम् अशक्यम् ।

– कार्योत्पत्यानन्तरम् शीघ्रं तथा उत्तरकालेऽपि उपायस्य प्रयोजनं न भवति ।

गङ्गाधर: – सौष्ठवं – सुष्ठुत्वं साधुत्वम् ।

– गङ्गाधर: ‘ अभिविधानम् ’ इति पदस्थाने ‘ अभिसन्धानम् ’ इति पाठभेदं स्वीकरोति ।

– कार्यस्य सम्यक् अभिनिर्वर्तकात् उपाय: इति उच्यते ।

– कारणस्वरुप: वैद्य: धातुसाम्यरुपि कार्यं पूर्णांशेन उत्पादयितुं न शक्नोति ।

– यदि वैद्य: स्वगुणसम्पन्न: न स्यात् तर्हि स: व्याधिं प्रशमितुम् असमर्थ: । एष: भिषज: सौष्ठवोपाय: अस्ति । उत्तमगुणसम्पन्न: वैद्य: यदि व्याधिप्रशमार्थम् अभिसन्धानं न कुर्यात् तर्हि व्याधिप्रशम: न भवेत् । उत्तमवैद्य: धातुसाम्यनिर्मातुं न शक्नुयात् ।

अत: वैद्यद्वारा तद् तद् कर्मकरणम् एष: अभिसन्धानोपाय: ।

– करणं नाम शस्त्रादिभेषजम् । तस्य कार्यं, कार्यफलम् अनुबन्ध: च अस्ति इत्यर्थ: धातुसाम्यं कृत्वा सुखावाप्ते: निर्माणम् ।

– यदि करणस्य गुणसौष्ठवं (गुणसम्पन्नत्वम्) न स्यात् तर्हि तद् आतुरस्य अक्लेशपूर्वकं धातुसाम्यादिकं निर्मातुं न शक्नुयात् ।

उदाहरणार्थम् – यदि सम्यक् निशितं शस्त्रं स्यात् तर्हि तद् छेत्तुं शक्नुयात् ।

एवं करणस्य सौष्ठवोपाय: अभिसन्धानोपाय: स्त: ।

– वातादिवैषम्यरुपकार्यस्य योनि: – अयोगातियोग: मिथ्यायोगयुक्त:

– ज्वरादिरुपस्य कार्यस्य योनि: – धातुवैषम्यम् ।

– धातुवैषम्यम् इति कार्ययोने: सौष्ठवम् अभिसन्धानम् एते अपि विचारणीये ।

– एवं कारणं करणं कार्ययोनि: च एतेषां सौष्ठवम् अभिसन्धानं नाम उपाय: ।

– शेषम् अर्थश: विवेचनम् ।

योगीन्द्रनाथ सेन: – सौष्ठवम् – सुष्ठुत्वं यथोक्तगुणवत्ता ।

– अभिसन्धानम् – देशकालापेक्षया कार्यनिष्पत्यनुगुणत्वेनसमायोग: ।

– कार्याभिनिर्वर्तकत्वात् उपाय इत्युच्यते । कार्यादिषु न उपायत्वं भवति ।

ज्योतिषचन्द्र सरस्वति: – अर्थश: विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

### ३) प्रकरणस्य उपसंहार: – सूत्रम् ७९

– एवं दशविधानां परीक्षा प्रथमं करणीया । तत्पश्चात् कार्यार्था एव प्रवृत्ति: योग्या ।

– अत: कार्येच्छु: भिषग् कार्यस्य प्रारम्भात् प्राक् परीक्ष्यस्य परीक्षणं परीक्षाभि: सम्पूर्णतया कृत्वा पश्चात् कार्यारम्भं कुर्यात् ।

चक्रपाणि: – प्रकरणस्य उपसंहार: ।

गङ्गाधर: – शास्त्रीयकर्मकरणविषयम् इदम् वचनम् । कार्यात् प्राक् आप्तोपदेश: प्रत्यक्षम् अनुमान: च एतै: परीक्षणीयान् भावान् परीक्ष्य तत्पश्चात् कार्यनिष्पादनव्यापार: करणीय: ।

योगीन्द्रनाथ सेन: – अर्थश: विवेचनम्

ज्योतिषचन्द्र सरस्वति: – केवलं कृत्स्नम् । निगमनतन्त्रयुक्ते: उपयोग: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणं चतुर्थम्

## आ) वमनादि परीक्षादे: नवम: संप्रश्न: ।

सूत्राणि ८० त: १५१

अस्मिन् प्रकरणे अग्रिमानि उपप्रकरणानि सन्ति ।

१) उद्देश: – सूत्राणि ८० त: ८२

२) नवक: संप्रश्न – सूत्राणि ८३ त: १५१

१) उद्देश:

चरक: – वैद्य: अथवा सामान्य पुरुष: अपरस्मै वैद्याय वमनादिकर्मविषये नवप्रश्नान् पृच्छेत् । येषां वर्णनं अग्रिमे प्रकरणे कृतम् ।

– यदि प्रश्नकर्तारम् भ्रान्तव्यं चेत् वैद्य: तं बहुविधा: परीक्षा: । बहुविधा: परीक्षाविधय: बहुविधानि भेदाग्राणि च एतेषां विषये कथयेत् । प्रश्नकर्ता कस्य विषयस्य परिचयं वाञ्छति तमनुसृत्य वर्णनीयम्

प्रश्नकर्ता यदि अस्मिन् सम्यक् उत्तरति चेत् तदा तदा तं यथोक्तं प्रतिवचनं करणीयम् । तस्मै संपूर्णरुपेण यथार्थं ज्ञानं दातव्यम् ।

चक्रपाणि: – निष्ठा इति निश्चय: तद्भवं नैष्ठिकम् ।

– प्राप्तं इत्यस्य अत्रस्थ: अर्थ: 'उचितम्' इति ।

– शेष: अविशेष: ।

गङ्गाधर: – परीक्ष्यविशेष: परीक्षणीयानां प्रभेद: ।

– निवृत्ति: इति अकर्तव्यता । शेषा टीका केवलं शब्दार्थस्य विवेचनम् ।

योगीन्द्रनाथ सेन: – निवृत्ति: अकर्तव्यता ।

– निष्ठा निश्चय: तद्भवं नैष्ठिकम् । शेषा टीका अविशेषा ।

ज्योतिषचन्द्र सरस्वति: – केवलं शब्दार्थस्य विवेचनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## चतुर्थप्रकरणम् आ) नव प्रश्ना:

**प्रथम: प्रश्न: – कतिविधया परीक्षया भिषजा कर्माणि प्रयोक्तृकामेन परीक्ष्याणि ।**

चरक: – ज्ञानवतां द्विविधे परीक्षे प्रत्यक्षम् अनुमानम् च त्रिविधा: वा उपदेशेन सह ।

चक्रपाणि: – ज्ञानवताम् इत्यस्य अर्थः यै: आप्तोपदेशेन शास्त्रज्ञानं प्राप्तम् । तेषां कृते द्विविधे परीक्षे स्त: । प्रत्युत येभ्य: आप्तोपदेश: न प्राप्त: तेषांकृते त्रिविधा: परीक्षाः सन्ति । अस्य विस्तृतं विवरणं त्रिविधरोग विशेष विज्ञानीये अध्याये अस्ति ।

गङ्गाधर: – ज्ञानवतां इति आप्तोपदेशेन वस्तुषु ज्ञानवताम् अज्ञानवतां प्रत्यक्षानुमानमुपदेश: च तिस्त्र: परीक्षाः।

योगीन्द्रनाथ सेन: – ज्ञानवतां आप्तोपदेशजनितंज्ञानवताम् शेषः शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:– ज्ञानवतां शास्त्रज्ञानसम्पन्नाम् । शेषः शब्दार्थः ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**द्वितीय: प्रश्न: – कतिविधं च परीक्ष्यम् ?**

चरक: – कारणादि दशविधं परीक्ष्यम् ।

– भिषक्विद्यायां दशविधः

| | | |
|---|---|---|
| कारणम् | – | भिषक् |
| करणम् | – | भेषजम् |
| कार्ययोनि: | – | धातुवैष्यम्यम् |
| कार्यम् | – | धातुसाम्यम् |
| कार्यफलम् | – | सुखावाप्ति: |
| अनुबन्ध: | – | आयु: |
| देश: | – | भूमि: आतुर: च |
| काल: | – | संवत्सर: आतुरावस्था च |
| प्रवृत्ति: | – | प्रतिकर्मसमारम्भ: |
| उपाय: | – | भिषगादीनां सौष्ठवं सम्यक् अभिविधानं च । |

चक्रपाणि: –

– वैद्येभ्य: उपयुक्तै: उदाहरणै: विषयस्य वर्णनं कृतम् ।

– धातुवैषम्यम् इति विषमतां गता धातव: एते धातव: विषावस्थां विहाय आरोग्यसंज्ञकाया: साम्यावस्थाया: समवायि कारणं सन्ति तेन कार्ययोनिं प्राप्यन्ते ।

– सुखावाप्तिःइति आरोग्यावाप्ति: । उक्तं च सुखसंज्ञकं आरोग्यम् । (सूत्रस्थानं अध्याय: ९)

– आयु: अनुबन्धफलरुपम् अस्ति । आयु: यद्यपि रोगिगतं अस्ति तथापि न वैद्यगतम् । तथापि तद् वैद्यद्वारा आतुरार्थं इच्छितं अत: तद् वैद्याधीनं मन्यते । अत: एव वैद्य: कर्ता इति सम्बोधित: ।

– प्रतिकर्म नाम चिकित्सा । सा अपि आतुरार्था एव भवति । शेषा – टीका शब्दार्थ:

गङ्गाधर: –

– कारणदय: या: दशविध: परीक्षा: पूर्वम् वर्णिता: सार्वशास्त्रिका: (सर्वेभ्य: शास्त्रेभ्य: उपयुक्ता:) सन्ति । अत: आर्युर्वेदे चिकित्सादृष्ट्या एते दशविधा: कथं विचारार्ह: सन्ति अस्य विवरणम् अत्र कृतम् । आयुर्वेदशास्त्रे चिकित्सासमारम्भे भिषगादिषु संसरणं कृत्वा दर्शयति ।

– करणम् – कारणरुपा: वैद्या: पृथक् उल्लिखिता: तेन त्रिपादरुपं गुणवत् करणम् । कारणम् – चिकित्साकर्ता भिषक् ।

– कार्ययोनि: – ज्वरादीनां व्याधिस्वरुपिण: कार्यस्य योनिस्वरुपं धातुवैषम्यं वातादिधातूनां वैषम्येन ज्वरादिकार्यं उत्पद्यते । अत: सर्वत्र हेतुवैषम्यम् एव कार्ययोनि: अस्ति । यत: धातुवैषम्यम् अपि हेतव: एव कारणरुपा: सन्ति । काल: बुद्धि: इन्द्रियार्थः च एतेषां वैषम्यं नाम अयोग: अतियोग: मिथ्यायोग: च । एते धातुवैषम्यरुपं कार्यं उत्पद्यन्ते।

– कार्यम् – ज्वरादीनां चिकित्सां कृत्वा धातुसाम्यं प्रस्थापनीयं एतत् कार्यम् ।

– कार्यफलम् – धातुसाम्स्य फलं नाम सुखावाप्ति: । सुखनिवृत्ति: एतद् एव फलम् ।

– अनुबन्ध: – जीवितार्थम् आयु: ।

– देश: – आनुपादिरुपा भूमि: । आतुर: – व्याधितः स्वस्थ: च पुरुष: ।

– काल: – संवत्सररुप: । तदन्तर्गतानां क्षण: मुहूर्त: दिन: पक्ष: मास: ऋतु: एतेषाम् अपि ग्रहणं करणीयम् । आतुरावस्था – अ) स्वाभाविकी ब) वैकारिकी

आतुरावस्था –

| स्वाभाविकी | वैकारिकी |
|---|---|
| अ) शैशवं, बाल्यं, पौगण्ड्यं, कैशोरं | साध्यं, असाध्यं कृच्छ्रसाध्यं |
| यौवनं, मध्यमस्थं, स्थाविर्यं, अतिस्थाविर्यम् | दारूणं,आतुरबलमांसादिक्षयम् |
| ब) दौर्बल्यं, अदौर्बल्यं, सत्वरजतमोबहुलं, | |
| ब्राह्मसत्वादिरुपम्,वातलादि समवातादि रुपम् | |

– प्रवृत्ति – व्याध्यनुसारं चिकित्सा प्रारभणीया

– उपाय: –भिषगादिनां सौष्ठवं अभिसन्धानं च पुरा वर्णितवत् यत् कार्यं कार्यफलं अनुबन्ध: च एतान् अनुसृत्य उपायवर्णनम् अस्ति तदेव चिकित्सार्थं आवश्यकानां उपायानां वर्णनम्।

– धातुसाम्यरुपिणि कार्ये वमनादिषु कर्मसु उपाया: न सन्ति । वमनादि कर्मण: कार्यकाले अपि उपाया: न भवन्ति । वमनादि कर्मोत्तरम् अपि उत्तरकाले सुखावाप्ति: आयु: च (फलं अनुबन्ध: च) एतयो: उपाया: न भवन्ति । प्रत्युत कर्मात्पूर्वम् एव वैद्य: औषधम् आतुर: परिचारक: च एतेषां सौष्ठवरुपेण उपाया: आवश्यका: सन्ति नाम उपायानाम् उपस्थिति: प्राक्कर्मकाले अस्ति ।

योगीन्द्रनाथ सेन: –अकारणम् उपायपर्यन्तं दशविधानि परीक्ष्याणि भावानि आयुर्वेदे तदनुसारं वर्णितानि सन्ति । शेषः शब्दार्थ: विवेचनम्

ज्योतिषचन्द्र सरस्वति: – संसार्यं इत्यस्य अर्थ: उदाहरणेन कृतम् प्रतिपादनम् । शेषः शब्दार्थ: विवेचनम्

निष्कर्ष: – वैधर्म्यं नास्ति ।

**तृतीय: तथा चतुर्थ: प्रश्न: –क: अत्र परीक्ष्यविशेष: कथं च परीक्षितव्य: ?**

सूत्राणि ८५ – १३१

एतयो: प्रश्नयो: उत्तरंसविस्तरं वर्णितम् अस्ति। अस्मिन् दशविधा: परीक्षा: तथा च देशपरीक्षाया: अन्तर्गतानां दशविधानां परीक्ष्याणां भावानां वर्णनम् अस्ति ।

प्रकरणस्य उद्देश: – सूत्रम् ८५

कारण परीक्षा – सूत्रम् ८६

| | | |
|---|---|---|
| करण परीक्षा | – | सूत्रम् ८७ |
| कार्ययोनि परीक्षा | – | सूत्रम् ८८ |
| कार्य परीक्षा | – | सूत्रम् ८९ |
| कार्यफल परीक्षा | – | सूत्रम्९० |
| अनुबन्ध परीक्षा | – | सूत्रम् ९१ |

देश परीक्षा – अ) भूमि परीक्षा – आतुरपरिज्ञानहेतुना – सूत्रे ९२–९३

आ) आतुर परीक्षा – बलदोषप्रमाणज्ञानहेतुना – सूत्रम् ९४

| | | |
|---|---|---|
| दशविधानि परीक्ष्याणि | –प्रकृतित: | सूत्राणि ९५–१०० |
| | विकृतित: | सूत्रम् १०१ |
| | सारत: | सूत्राणि १०२–११५ |
| | संहननत: | सूत्रम् ११६ |
| | प्रमाणत: | सूत्रम् ११७ |
| | सात्म्यत: | सूत्रम् ११८ |
| | सत्वत: | सूत्रम् ११९ |
| | आहारशक्तित: | सूत्रम् १२० |
| | व्यायामशक्तित: | सूत्रम् १२१ |
| | वयत: | सूत्रम् १२२ |
| | उपसंहार: | सूत्रे १२३, १२४ |

– कालपरीक्षा – अ) संवत्सररुपा परीक्षा – सूत्राणि १२५ त: १२७

आ) आतुरावस्थारुपा परीक्षा – सूत्रम्१२८

– प्रवृत्तिपरीक्षा – सूत्रम् १२९

– उपायपरीक्षा – सूत्रम् १३०

– प्रकरणस्य उपसंहार: – सूत्रम् १३१

अनेन क्रमेण अस्य प्रकरणस्य उहापोहं कुर्याम।

**प्रकरणस्य उद्देश:** – सूत्रम् ८५

चरक: – दश परीक्ष्यविषयाणां यथा विशेषा: तथा व्याख्यानं कृतम् अस्ति ।

चक्रपाणि: – शब्दार्थस्य विवरणम् ।

गङ्गाधर: – यज्ञे एतासां दशविधानां परीक्षाणां यादृशं विवरणं क्रियते तादृशं व्याख्यानम् आयुर्वेदगतानां दशविधपरीक्षाणां अग्रिमे प्रकरणे कृतम् ।

यज्ञे – कारणम् – यजमान: कर्ता ।

करणम् – ऋत्विग् याज्ञिकद्रव्यादिकम् ।

कार्ययोनि – यजमानशरीरस्थ: नियतिरुप: परमात्मा पुरुष: ।

कार्यम् – धर्म: ।

कार्यफलम् – स्वर्गप्राप्ति: ।

अनुबन्ध: – पुनर्जन्मपुत्रदारधनबान्धवादिप्राप्ति: ।

देश: – याज्ञिकदेश: ।

काल: – यज्ञकाल: ।

प्रवृत्ति: – यागादिक्रियारम्भ: ।

उपाय: – यजमानादीनां सौष्ठवं अभिसन्धान: च ।

एवं वैधेतरकर्मणि च अधर्मकार्यं काम्यकर्मफलत्याग: मोक्ष: इति ।

योगीन्द्रनाथ सेन: – शब्दार्थस्य विवरणम्

ज्योतिषचन्द्र सरस्वति: – व्यासत: परीक्षणस्य प्रकरणस्य प्रतिज्ञा ।

निष्कर्ष: – वैधर्म्यं नास्ति । गङ्गाधरस्य विशेषं वर्णनम् ।

**कारणपरीक्षा** – सूत्रम् ८६

चरक: – अ) कारणम् इति भिषक् ।

आ) तस्य परीक्षा –

– भिषङ्नाम यो भिषज्यति ।

– सूत्रार्थप्रयोगकुशल:

– आयु: सर्वथा विदितं यस्य ।

– सर्वधातुसाम्यं चिकिर्षन् आत्मानमेव आदित: परीक्षेत ।

– भिषग्गुणा: –

| | | | |
|---|---|---|---|
| पर्यवदातश्रुतता | परिदृष्टकर्मता | दाक्ष्यम् | शौचम् |
| जितहस्तता | उपकरणवत्ता | सर्वेन्द्रियोपपन्नता | प्रकृतिज्ञता |
| प्रतिपत्तिज्ञता | | | |

चक्रपाणि: – भिषज्यति इति चिकित्सति

– आयु: सर्वथा जानाति इत्यर्थ: सुखायु: दु:खायु: हितायु: अहितायु: च स्वरुपि आयु: जानाति ।

– चिकित्सक: अन्यया व्यक्त्या परीक्षणीय: अस्ति । तथैव तेन आत्मपरीक्षणम् अपि नित्यं करणीयम् भवति ।

– गुणत: आत्मपरीक्षणं करणीयम् । चिकित्सक: आत्मपरीक्षणं कृत्वा एवं कल्पेत यत् इमं रोगिणं चिकित्सितुम् अहं सक्षम: अस्मि वा न वा।

– प्रतिपत्ति: इत्यर्थः उत्पन्नयां व्याधौ शीघ्रतया यथोचितम् कर्तव्यम् ।

गङ्गाधर: – अत्र भिषक् पदस्य व्यूत्पत्तिपूर्वक व्याख्या गङ्गाधरणे वर्णित अस्ति ।

भिषक् –

यो भेषतीति भिष रूग्जये सौत्रधातुरौणादिक प्रत्ययेन व्युत्पन्नार्थः यः सूत्रर्यिप्रयोगकुशलः प्रकरणात् आयुर्वेदीपसूत्रार्थप्रयोगयोः दक्षः यस्य च आयुः यथावत् सर्वथा विदितं पूर्वत्रासिद्धपिविधेः अनित्यत्वात् क्तान्तप्रयोगेऽपि कर्तारि षष्ठी स भिषकृ नाम भवति ।

– भिषजस्य गुणाः दशप्राणायतनीपअध्याये व्याख्याताः । शेषः शब्दार्थः विवेचनम् ।

योगीन्द्रनाथ सेन: – भिषक् शब्दस्य निरुक्ति: ।

य: भेषति रुजं जयति शमयति स भिषक् । भिष् रुग् जये । सौत्रधातु: अयम् ।

तत: औणादिक: अजक् प्रत्यय: ।

– सूत्रार्थप्रयोगकुशल: नाम आयुर्वेदीयस्य सूत्रस्य अर्थे कर्मणि च कुशल: ।

– आतुरस्य सर्वथा हिताहितत: सुखासुखत: प्रमाणाप्रमाणत: यथावत् स्वरुपत: आयु: जानाति स एव वैद्य: । 'च' कारेण आयुष: हिताहितं कारणरुपम् अपि स: जानाति ।

–य: शास्त्रज्ञ: कर्मज्ञ: च उभयम् अस्ति स एव वैद्य: ।

– पर्यवदातश्रुतता – सुविमलं शास्त्रज्ञानं यस्य ।

– परिदृष्टकर्मता – सर्वतोभावेन दृष्टं कर्म येन ।

– जितहस्तता  – शस्त्रोपचारादिषु हस्तलाघवम् ।

– प्रतिपत्तिज्ञता – प्रतिपत्तिज्ञानम् । यो विकार: यथा प्रतिपत्तव्य: तस्य तथा अनुष्ठानं प्रतिपत्ति: ।

दशप्राणायतनीये अध्याये अस्य सविस्तरं वर्णनमस्ति ।

ज्योतिषचन्द्र सरस्वति: – य: रुजां दूरीकरोति स भिषक् ।

– सूत्रार्थकुशल: इति सम्यक् अधीतायुर्वेद: ।

– गुणवत: पुरुषात् स्वपरीक्षणं कारणीयम् अथवा आत्मपरीक्षणं करणीयम् ।

– पर्यवदातश्रुतता – तन्त्रज्ञता

– परिदृष्टकर्मता – पुन: पुन: कर्मं दृष्ट्वा लब्धज्ञानता ।

– दाक्ष्यम् – कार्यदक्षता ।

– जितहस्तता– अष्टविधे शस्त्रकर्मणि बस्त्यादिप्रयोगे च पुन: पुन: योग्यां कृत्वा स्ववशहस्त ।

– उपकरणवत्ता – सम्भृतसम्भारता ।

– प्रकृतिज्ञता – व्याध्यातुरदेशकालप्रकृतिज्ञता ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**करण परीक्षा** – सूत्रम् ८७

चरक: – करणम् इति भेषजम् ।

– भेषजं नाम तद् यद् भिषज: धातुसाम्याभिनिवृत्तौ प्रयतमानस्य विशेषत: च उपायान्तेभ्य: उपकरणाय उपकल्पन्ते । व्यपाश्रयभेदात् करणं द्विविधम्

दैवव्यपाश्रयम् – मन्त्रादि

युक्तिव्यपाश्रयम् – संशोधनोपशमने दृष्टफला: चेष्टा: च ।

– अङ्गभेदात् करणं द्विविधम्

द्रव्यभेदात् – वमनादिषु योगमुपैति ।

अद्रव्यभूतम् – यद् उपायाभिप्लुतम् ।

– अद्रव्यभूतम् – उपायाभिप्लुतम् ।

उपाय: नाम भयदर्शनविस्मापनविस्मारणक्षोभणहर्षणभर्त्सनवधबन्धनस्वप्नसंवाहनादि: अमूर्त: भावविशेष: ।

–करणस्य परीक्षा – एवं प्रकृति: एवं गुणम्

एवं प्रभावम् अस्मिन् देशे जातम्

अस्मिन् ऋतौ जातम् एवं गृहितम्

एवं निहितम् एवं उपस्कृतम्

अनया मात्रया युक्तम्

अस्मिन् व्याधौ एवंविधस्य पुरुषस्य एतावन्तं दोषं अपकर्षति उपशमयति वा ।

– एते नियमा: अन्यम् अनुक्तभेषजमपि विधन्ति ।

चक्रपाणि: – कार्ययोनि: प्रवृत्ति देश: काल: उपाय: च एतेषाम् अतिरिक्तं रोगनाशकरणस्य चिकित्सकस्य यद् साधनं भवति तं करणम् इति वदन्ति ।

– कार्ययोनि: विपरितं कार्यं करोति । तेन सा साधकतमात् करणात् भिन्नं वर्तते । प्रवृत्ति: उपाय: च एतौ कार्यकारणधर्मस्य सद्भ्यां करणसंज्ञां न अर्हतौ ।

– देशकालौ चिकित्साकर्मणि न साधकतमौ । अत: ये चिकित्सकम् उपरकणभूता: तान् एव करणम् इति वदन्ति ।

–दैवव्यपाश्रय: युक्तिव्यपाश्रय: च एतयो: द्विविधभेषजप्रकारयो: सत्वावजयस्य अपि अन्तर्भाव: भवति ।

सत्वावजय:

प्रत्यक्ष उपकारक: – युक्तिव्यपाश्रये समाविष्ट:

अदृष्ट उपकारक: – दैवव्यपाश्रये समाविष्ट:

– युक्तिव्यपाश्रये दृष्टफल चेष्टायां मानसानां क्रियाणामपि समावेश: भवति ।

– अङ्गभेद: इत्यस्य अर्थ: शरीरं किंवा स्वरुपभेद: ।

– उपायाभिप्लुत: इत्यस्य अर्थ: उपायै: व्याप्ता: अथवा उपायाणां स्वरुपे ग्राह्यमाना: इति भवति ।

अमूर्तभावविषये विवरणम्

– भयादय: अमूर्तभावा: साक्षात् आरोग्यसाधका: न भवन्ति अपि तु शरीरस्थेषु दोषेषु परिणम्य आरोग्यं निर्मान्ति ।

– अमूर्तभावा: मूर्तशरीरधातूनाम् उत्पत्तौ समवायि कारणं न सन्ति । द्रव्यभूतानि भेषजानि शरीरस्थं धातुसामर्थ्यं समवायि कारणं भवन्ति । तेन द्रव्यभूत भेषजानाम् आरोग्ये साधकतमं करणत्वं उचितम् अस्ति ।

– ये अमूर्तभावा: सन्ति तेषां भेषजसमानं साधकतमत्वं न भवति । तस्मात् द्रव्योत्पन्ने धातुसाम्ये तेषां उपायत्वं उचितम् अस्ति ।

– एवं सूक्ष्मबुद्ध्या भयाद्यमूर्तभावानाम् उपायत्वं तथा स्थूलबुद्ध्या तेषां भेषजत्वं भवति । एतस्मात् भयाद्यमूर्तभावानाम् भेषजस्वरुपे व्यवहार: ग्रंथकारै: कृत: ।

– केवलं अद्रव्यभूतानि भेषजानि एव चिकित्साकर्मणि उपायरुपेण व्यवहृता: सन्ति प्रत्युत परिचारकादय: घटका: अपि उपायस्वरुपेण ग्रहीष्यमाणा: सन्ति ।

– अत: एव परिचारकादीन् 'सिद्धि उपाया:' इति वदन्ति । तत्र सूत्रस्थाने दशविधानां परीक्षाणां साक्षात् वर्णनं न सदपि ता: उपायेषु अन्तर्भूता: सन्ति । शेषा टीका शब्दार्थ: ।

गङ्गाधर:

– विषमधातूनां साम्यकरणार्थं वैद्याय यद् साधनभूतं तं भेषजम् इति वदन्ति ।

– सूचीकटाहन्यायस्य उल्लेख: । शेषा टीका शब्दार्थ: । केवलं शब्दार्थ: ।

योगीन्द्रनाथसेन:

दैवव्यपाश्रय: – दैवम् अदृष्टं व्यपाश्रयो यस्य तत् ।

यत् दैवमाश्रित्य धातुसाम्यकरम् ।।

– मन्त्रादिभि: आतुरस्य शुभम् अदृष्टम् उत्पाद्य पापं नाशितं तेन निमित्तेन रोग: उपशाम्यति ।

युक्तिव्यपाश्रय:

– युक्ति: योग: जठराग्निसंयोग: ।  तद् व्यपाश्रय: यस्य तद् युक्तिव्यपाश्रयम् ।।

– संशोधनं दोषान् निहृत्य यत् धातुसाम्यकरम् । संशमनं दोषान् अनिहृत्य यत् उपशमयति ।

– शारीररोगस्य अधिकरणत्वात् अत्र सत्वावजयभेषजं न उल्लिखितम् ।

शेषा टीका अविशेषा: ।

ज्योतिषचन्द्र सरस्वति: –

– दैवव्यपाश्रयम् नाम कर्मजा: तथा औपसर्गिका: च एतासां व्याधीनां शमनार्थं कर्मक्षयाय ग्रहादिशान्त्यै च मन्त्रादिनि उपक्रमाणि योजनीयानि ।

– युक्तिव्यपाश्रयम् नाम धातुसाम्यार्थ्यं द्रव्यभूतानाम् औषधानां प्रयोग: तथा स्वप्नसंवाहनादय: अद्रव्यभूता: चेष्टा: ।

– अद्रव्यभूते भेषजे सप्तशतीपाठ: चण्डीपाठ: इत्यादीनाम् उल्लेख: अस्ति । शेषा टीका अविशेषा: ।

निष्कर्ष: – वैध्यर्म्यं नास्ति ।

## **कार्ययोनिपरीक्षा** – सूत्रम् ८८

चरक: – कार्ययोनि: इति धातुवैषम्यम् । तस्य लक्षणं विकारागम: ।

– तस्य परीक्षा

अ) विकारप्रकृतिविशेष: ।

ब) विकारस्य साध्यासाध्यत्वविशेष: ।

चक्रपाणि: – विकारप्रकृति: इत्यस्य अर्थ: विकारस्य कारणस्वरुप: दोष: ।

गंगाधर: – विकारप्रकृति: नाम – वातादिशारीरमलस्य रक्तादिधातूपधातो: रजस्तमयोः मानसमलयो: सत्वस्य दूष्यस्य एतेषाम् ऊनातिरिक्तलिङ्गम् अवेक्षणम् ।

– हीनलक्षणस्य परीक्षणेन ह्रासत: व्याधिजन्मन: अनुमानं शक्यम् । तथा अतिरिक्तलक्षणस्य परीक्षणेन वृद्धित: व्याधिजन्मन: अनुमानं शक्यम् ।

– एवमेव विकारस्य साध्यत्वादिन: लक्षणविशेषस्य अवेक्षणेन अपि कार्ययोनिपरीक्षा कर्तुं शक्या ।

योगीन्द्रनाथ सेन: – विकारप्रकृति: – दोषस्य अल्पस्य वा अधिकस्य लिंगविशेषस्य परीक्षणम् ।

– साध्यादि लक्षणम्

- व्याधिः
  - साध्या
    - मृदु – सुखसाध्या
    - दारुणा – कृच्छ्रसाध्या
  - असाध्या
    - मृदु – याप्या
    - दारुणा – प्रत्याख्येया

– ऐतेषां लक्षणानि सूत्रस्थाने महाचतुष्पदे अध्याये वर्णितानि ।

ज्योतिषचन्द्र सरस्वतिः –

– व्याधिनिर्मितिः जाता अस्ति तस्याः धातुवैषमस्य अनुमानं करणीयम् । एवं विकारागमः एतद् कार्ययोनिलक्षणम् । शेषा टीका शब्दार्थः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**कार्यपरीक्षा** – सूत्रम् ८९

चरकः – कार्यं धातुसाम्यम् । तस्य लक्षणम् – विकारोपशमः ।

– तस्य परीक्षा

रुगुपशमनम् , स्वरवर्णयोगः, शरीरोपचयः, बलवृद्धिः,अभ्यवहार्याभिलाषः, रुचिराहारकाले यथाकालं निद्रालाभः,आहारस्य काले सम्यग्जरणम् ,सुखेन प्रतिबोधनम् ,वातमूत्रपुरीषरेतसां मुक्तिः, वैकारिकाणां स्वप्नानां अदर्शनम् , सर्वाकारैः मनोबुद्धीन्द्रियाणां अव्यापत्तिः ।

चक्रपाणिः – सर्वाकारैः इति शुभलक्षणैः ।

गंगाधरः – रूगुपशमनं इति यातनोपशमनम् ।

– यातनायाः उपशमनात् ज्वरादीनां विकाराणां उपशमस्य अनुमानं करणीयम् ।

– ज्वरादीनां विकाराणां उपशमनात् धातुवैषम्यस्य अभावस्य अनुमानं करणीयम् ।

– सुखेन प्रतिबोधनम् – ज्ञेये अर्थे सुखेन ज्ञानम् इति ।

– अव्यापत्तिः इति सम्पत् । एवं कार्यस्य परीक्षा करणीया ।

योगीन्द्रनाथ सेनः – रुग् उपशमनम् इति वेदनोपशमनम् ।

– सुखेन प्रतिबोधनम् इति जागरणम् । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वति: – स्वरवर्णयोगानाम् अर्थ: स्वरस्य तथा शरीरवर्णस्य स्वाभाविकी प्राप्ति: ।

– सुखेन प्रतिबोधनम् इति निद्रया सम्यक् तृप्ति: इत्यर्थ: ।

– अव्यापत्ति: यथावत् विषयग्रहणे सामर्थ्यम् ।

निष्कर्ष: – सुखेन प्रतिबोधनम् तथा अव्यापत्तिः च एतयोः पदयोः व्याख्यायां वैधर्म्यं अस्ति ।

**कार्यफलपरीक्षा** – सूत्रम् ९०

चरक: – कार्यफलं सुखावाप्ति: । तस्य लक्षणम् – मनोबुद्धीन्द्रियशरीरतुष्टि: ।

चक्रपाणि: – सुखावाप्ति: इत्यस्य अर्थ: आत्मगुणात्मकस्य सुखस्य प्राप्ती: ।

गङ्गाधर: – मनोबुद्धीन्द्रियशरीराणां परितोषात् कार्यफलं परीक्षितव्यम् । तुष्टि: परितोष: ।

योगीन्द्रनाथ सेन: – तुष्टि: परितोष: ।

ज्योतिषचन्द्र सरस्वति: – सुखावाप्ति: नाम आरोग्यस्य प्राप्ति: ।

– तुष्टि: इत्यस्य अर्थ: दु:खकरभावानां अपगमनोत्तरं मनोबुद्ध्यादय: सुखेन व्याप्नुवन्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अनुबन्ध परीक्षा** – सूत्रम् ९१

चरक: – आयु: इति अनुबन्ध: । तस्य लक्षणं प्राणै: सह संयोग: ।

चक्रपाणि: – अत्र प्राणशब्देन वायु: बोधनीय: । एवं प्राणशब्दस्य आयु: अपेक्षया भिन्नार्थेन लक्ष्यलक्षणयोर्मध्ये अभेद: अस्ति ।

गङ्गाधर: – प्राण: नाम पञ्चप्राणाख्यादय: वायव: । तेन सह संयोगेन उत्पनानि लक्षणानि – श्वास: उच्छवास: स्पन्दनं वचनं इत्यादिभि: आयुष: अनुमानं करणीयम् इति तस्य परीक्षणम् अस्ति ।

– श्वासादीनां लक्षणानाम् अभावात् प्राणवियोग: जात: इति अनुमानं भवति । प्राणवियोगात् मृत्यो: अनुमानं तथा मृत्यो: आयुष: अभावस्य अनुमानं भवति । एवं अनुबन्धरुपि आयु: परीक्षणीयम् ।

योगीन्द्रनाथ सेन: – अनु इति पदं सह अर्थेन अस्ति ।

– अत: प्राणै: सह बन्ध: नाम संयोग: = आयु: ।

– प्राणसंयोगात् आत्मसंयोगस्य ज्ञानं भवति । प्राणादय: आत्मभावा: सन्ति । (सन्दर्भ– कतिधापुरुषीय अध्यायः) । आत्मा सत्व द्वारेण जीवशरीरं प्रविशति । एवं शरीरसत्वात्मसंयोग: नाम आयु: इत्यस्य निश्चय: भवति ।

<u>ज्योतिषचन्द्र सरस्वति:</u> – देहप्राणसंयोगकाल: एव आयु: ।

<u>निष्कर्ष:</u> – वैधर्म्यं नास्ति ।

**<u>देशपरीक्षा</u>** – सूत्राणि ९२ त: १२८

– देशपरीक्षा विस्तृता वर्णिता अस्ति । अस्याम् एव दशविधपरीक्ष्य भावा: वर्णिता: सन्ति ।

– देश: भूमि: आतुर: च ।




– अस्मिन् अध्याये ( विमान ८ ) देशपरीक्षा द्विविधा वर्णिता ।

भूमि परीक्षा – आतुरपरिज्ञान हेतु

आतुरपरीक्षा – बलदोषप्रमाणज्ञान हेतु

**<u>भूमिपरीक्षा</u>** – सूत्रम् ९३

आतुरस्य विशेषज्ञानार्थं एषा परीक्षा करणीया । अस्यां विचारणीयाः घटका: अधोक्ताः ।

अयं रुग्ण: कस्मिन् भूमिदेशे जात: ।

कस्मिन् भूमिदेशे संवृद्धः ।

कस्मिन् भूमिदेशे व्याधित:

तस्मिन च भूमिदेशे मनुष्याणां किं आहारजातं किं विहारजातं किं आचारजातम् ,

कतिविधं बलम्　　　　　　　　　　कतिविधं सत्वम्

कतिविधं सात्म्यम्　　　　　　　　कतिविधा: दोषा:

का भक्ति:　　　　　　　　　　　　का: व्याधय:

किम् हितम्　　　　　　　　　　　किम् अहितम् ।

एतै: प्रश्नै: परीक्षणीयम् ।

चक्रपाणि: – आतुरपदेन अत्र स्वस्थाया: व्यक्ते: अपि समावेश: करणीय: । अत: स्वस्थवृत्तप्रयोगार्थम् अपि इदं परीक्षणं करणीयम् ।

– परिशब्द: विशेषार्थ: ।

– आतुरस्य पूर्वदेशकृतं विशेषस्य ज्ञानं नाम आतुरपरिज्ञानम् ।

– हितम् इति पदेन देशापेक्षया विपरीतगुणस्य सात्म्यं ग्रहीतव्यम् ।'प्रायोग्रहणेन' इति पदेन एवं सूचितं भवति यत् इदं परीक्षणं एकान्तत: न कुर्यात् । प्राय: पदेन देशस्थानाम् आहारादिभावानां निश्चय: न भवति। तस्य प्रायोभावित्वं प्रदर्शितं भवति । शेष: शब्दार्थ: ।

गङ्गाधर: – आहारादिज्ञानेन रोगाणां कारणस्य ज्ञानं तथा रुग्णानां क्रियासहत्वासहत्वादीनां विशेषज्ञानं ज्ञायते । विहार: परिस्पन्दनव्यापार: ।

– आचार: वैधावैधक्रियाहेतु उपवासादि व्यापार: ।

– भक्ति: इति भजनशीलता । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: –आतुरपरिज्ञानहेतु: देशकृतसात्म्यसत्त्वादि ज्ञानार्थम् । औषधपरिज्ञानहेतु: देशकृतविशेषज्ञानार्थम् । आचार: शास्त्रोक्तव्यवहार: ।

– सात्म्यम् इह ओकसात्म्यम् । भक्ति: इति इच्छा । शेष: अविशेष: ।

ज्योतिषचन्द्र सरस्वति: – भूमि: इत्यस्य अर्थ: आतुरस्य जन्मभूमि: व्याधे: उत्पत्तिस्थानं भेषजस्य उत्पत्तिदेश: इति स्वीकरणीय: ।

– भूमिपरीक्षया आतुरगतस्य ज्ञानं कथं भवति अस्य विवरणम् अत्र अस्ति । शेषा टीका शब्दार्थ: ।

निष्कर्ष: – 'भक्तिः' इति पदे वैधर्म्यं अस्ति

## आतुररुपिणी देशपरीक्षा सूत्रम् ९४

– आतुर: तु खलु कार्यदेश: । द्विविध: विचार: –

– आयुष: प्रमाणज्ञानहेतुना ।

– बलदोषप्रमाणज्ञानहेतुना ।

– तत्र इह बलदोषप्रमाणज्ञानहेतो: देशपरीक्षा ।

– दोषप्रमाणस्य अनुरुपं औषधस्य प्रमाणविशेष: बलप्रमाणविशेषापेक्षया भवति । व्याधे: व्याधितस्य च ज्ञानं बलप्रमाणविशेषेण ज्ञातव्यम् ।

– अतिबलवद् औषधम् अपरीक्ष्य यदि अल्पबलवन्तं रुग्णं यदि सहसा दत्तं तर्हि तद् तं नाशयति ।

– अग्निवायुगुणप्रधानानि अतिबलवन्ति औषधानि अग्निक्षारशस्त्रकर्माणि च अल्पबलवान् रुग्ण: न सहते ।

– असह्यत्वात् अतितीक्ष्णवेगत्वात् तानि सद्य: प्राणहराणि भवन्ति ।

– तस्मादेव हीनबलयुक्तेन आतुरेण अविषादकराणि मृदुनि सुकुमारप्रायाणि शनै: शनै: गौरवं वर्धयन्ती विभ्रमरहितानि अनात्यायिकानि औषधानि च उपयोजितव्यानि ।

– विशेषत: नार्या एतादृशानि औषधानि ग्राह्याणि ।

– यत: नारी तु अनवस्थिता मृदु: विवृतविक्लवहृदयस्य तथा विक्लवहृदयस्य भवति । प्राय: सुकुमारा अस्ति / अबला परावलंबिनी अस्ति ।

– तथैव बलवत्या व्यक्त्या बलवत्यां व्याध्यां भूतायां अल्पबलानां औषधानां परीक्षणं न कृत्वा प्रयोग: कृत: चेत् तेन औषधेन रोग: न शाम्यति ।

अत: आतुरस्य बलप्रमाणविशेषज्ञानार्थम् अग्रिमानां भावानां सहाय्येन परीक्षणीयम् । –

| | |
|---|---|
| प्रकृतित: | सात्म्यत: |
| विकृतित: | सत्वत: |
| सारत: | आहारशक्तित: |
| संहननत: | व्यायामशक्तित: |
| प्रमाणत: | वयत: |

चक्रपाणि: – कार्यदेश: इति कर्तव्यधातुसात्म्यस्य आधार: ।

– दोषप्रमाणापेक्षया भेषजस्य प्रमाणं निश्चितं भवति, तेन यादृशी सिद्धि: भवेत् तादृशी शरीरस्य बलप्रमाणपरीक्षा करणीया ।

– बलप्रमाणविशेषं नाम – यदि बलवत् शरीरं अस्ति तर्हि तस्य बलवतां दोषाणां अपेक्षया औषधस्य प्रमाणं गुरु: अपेक्ष्यते । यदि दुर्बलंशरीरं स्यात् तर्हि दुर्बलदोषापेक्षया अल्पौषधम् आवश्यकम् ।

– अविषादकरं शरीरमनसो: अग्लानिकरम् ।

– हृदयशब्देन हृदयस्थं मनः इति ज्ञेयम् ।

– मृदुविवृतं नाम न अगम्भीरम् इति भवति ।

– विक्लवा अस्य अर्थ: अल्पेन क्लेशेन प्रभाविनी दुर्बलमना इति भवति ।

– बलप्रमाणविशेषग्रहणेन सामान्यत: देहबलस्य तथा दोषबलस्य ग्रहणं करणीयम् ।

– विकृतित: शरीरज्ञानेन दोषबलज्ञानं भवति । शेषा टीका शब्दार्थ:

गंगाधर: – विक्लवं विशिष्टभयशीलं हृदयम् । केवलं शब्दार्थ: टीका ।

– नारी कथं अबला अस्य वर्णनं गंगाधरेण विस्तृतं कृतम् ।

– नार्या: अबलवत्वम्

| कारणम् | | वर्णनम् |
|---|---|---|
| अनवस्थितहृदयम् | – | न क्षणमपि एकरुपेण अवस्थितम् । |
| मृदु हृदयम् | – | कोमलम् |
| विवृतं हृदयम् | – | न संवृतं गोपनबुद्ध्या नावृतम् । |
| विक्लवं हृदयम् | – | विशिष्टभयशीलम् । |
| सुकुमारा: अबला: | – | अल्पबला: । |
| परमसंस्तभ्या: | – | परमस्तम्भनीया: न तु संशोधनीया: । |

– हृदयं षडाङ्गविज्ञानेन्द्रियं तदर्थं सगुणात्ममनसां स्थानम् ।

प्रकृत्यादिज्ञानम्

↓

आतुरस्य बलप्रमाणज्ञानम् ।

↓

आतुरबलप्रमाणपेक्षया दोषप्रमाणज्ञानम् ।

↓

तद् अनुरुपो भेषजप्रमाणविशेषज्ञानम् ।

योगीन्द्रनाथ सेनः–व्याधिव्याधितबलापेक्षया हि भेषजप्रमाणं भवति । उर्वरिता टीका शब्दार्थः अविशेषः ।

ज्योतिषचन्द्र सरस्वतिः– वा इति अयं समुच्चये । हृदयं चित्ताधिष्ठानम् ।शेषा टीका अविशेषः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**प्रकृतितः परीक्षेत्** – सूत्राणि ९५ तः १००

चरकः – शुक्रशोणितप्रकृतिः मातुराहारविहारप्रकृतिः

कालगर्भाशयप्रकृतिः महाभूतविकारप्रकृतिः

– एताः चतस्रः प्रकृतयः गर्भशरीरस्य निर्माणार्थं आवश्यकाः । एतेषु चतुर्षु घटकेषु यस्य यस्य व एकस्य वा अनेकानां दोषाणां अनुबन्धः अस्ति तेन तेन दोषेण गर्भः अपि अनुबद्धः भवति । अनन्तरं मनुष्याणां तदनुसारं दोषानुबन्धं गर्भादिप्रवृत्ता दोषप्रकृतिः इति वदन्ति ।

– अतः केचन मनुष्याः श्लेष्मलाः केचन पित्तलाः केचन वातलाः केचन संसृष्टाः प्रत्युत केचन समधातोः सन्ति । तेषां लक्षणानि अग्रिमे सूत्रे वर्णितानि ।

चक्रपाणिः – 'प्रकृति' इति पदस्य अस्मिन् अधिकरणे अर्थः 'स्वभावः' अस्ति ।

शुक्रशोणितप्रकृतिः – शुक्रशोणितयोः यस्याम् अवस्थायां वातादयः दोषाः स्युः तदसमाने गर्भे दोषाणां स्वभावः उत्पद्यते ।

कालगर्भाशयप्रकृतिः – शुक्रशोणितयोः मेलककाले यं ऋतुस्वरुपम् स्यात् तदनुसारं यः दोषः उत्कटः स्यात् तदनुसारं गर्भस्थः दोषस्वभावः उत्पद्यते ।

तथैव गर्भाशयस्थस्य दोषस्वरुपानुसारं गर्भस्थानां दोषाणां प्रकृतिः भवति ।

मातुः आहारविहारप्रकृतिः – मातुः तत्कालिन आहारविहारानुसारं यः दोषस्वभावः स्यात् तद्समाने गर्भशरीरे प्रकृतिः उत्पद्यते ।

महाभूतविकारप्रकृति: – प्रकृत्यादीनां आरम्भकेषु कारणेषु य: भाव: इतराणाम् अपेक्षया बलवान् स्यात् तद्नुसारं गर्भस्थ: दोषस्वभाव: भवति ।

– कालादय: घटका: शुक्रशोणितान् उत्पाद्य प्रकृतिजनका: सन्ति । एवं वर्णयित्वा तन्त्रान्तरे (इतरतन्त्रे) शुक्रशोणितगतान् दोषान् एव प्रकृति उत्पादका: इति उक्तम् ।

–'गर्भादिप्रवृत्ता' इत्यस्य अर्थ: 'गर्भस्य आदि:' नाम प्रारम्भे काले मूलकरुपे प्रवर्तमाना:' इति भवति । प्रकृते: विकारस्य च वर्णनं सूत्रस्थाने कृतम् ।

गंगाधर:

– यस्य स्वरुपस्य पुरुषे शुक्र: तथा यस्य स्वरुपस्य नार्यां शोणिता: तदनुरुपा प्रकृति: भवति ।

– कालगर्भाशयप्रकृति: मातु: किशोरयौवनतारुण्यप्रौढादिषु आवस्थिकेषु कालेषु गर्भाशयस्य या प्रकृति: स्यात् तां कालगर्भाशयप्रकृति: इति वदन्ति ।

– मातु: आहारविहारप्रकृति: गर्भाधाने माता यादृशौ आहारविहारौ कुर्यात् तस्य प्रकृति: ।

– महाभूतविकारप्रकृति: – शुक्रआर्तवयो: आहारद्रव्यरसे आत्मजा: इति वातादय: चत्वार: महाभूता: तथा विभो: आकाशस्य यद् स्वरुपं सा प्रकृति: ।

– या: चतस्त्र: प्रकृतय: गर्भशरीराय आवश्यका: तासु य: एकस्य अथवा अधिकानांसमदोषाणाम् अनुबन्ध: अस्ति तस्य आरब्धस्य तथा आकरत्वानुसारं गर्भे एकस्य वा अधिकानां समदोषाणाम् अनुबन्ध: भवति ।

– अत: स्वप्रकृतिशुक्रशोणितादीनाम् अनुबन्धकदोषाणाम् अनुबन्धात् सा सा स्वप्रकृति शुक्रशोणितादिनी अनुबन्धकदोषप्रकृति: मनुष्येषु उत्पद्यते।

– अत: तस्य तस्य दोषस्य प्रकृतिव्यपदेशेन श्लेष्मलादय: विविधा: पुरुषा: उत्पद्यते ।

तेषां स्वस्थत्वम् आतुरत्वं च स्वस्थचतुष्के तथा रोगानीकविमाने वर्णितम् ।

योगीन्द्रनाथ सेन: – पित्रो: शुक्रशोणितयो: प्रकृतिम् ।

– गर्भकालस्य गर्भाधारस्थानस्य च प्रकृतिम् । मातुराहारविहारयो: प्रकृतिम् ।

– शुक्रशोणितगता: शरीरारम्भका: महाभूतविकारा: तेषां प्रकृतिम् । एतानि गर्भस्य शरीरं कर्तुं अपेक्ष्यते । तस्य तस्य दोषस्य उल्बणीभावात् सा सा दोषप्रकृति: निर्मिमीते । उदा– श्लेष्मलादि ।

– यत्र शुक्रशोणितादिषु प्रकृतिषु समदोषैः अनुबन्धः भवति तत्र गर्भे अपि समदोषानुबन्धः भवति ।

– एषा एव प्रकृतिः यतः साम्यं प्रकृतिः उच्यते ।

– यदा दोषवैषम्यात् श्लेष्मलादयः प्राकृतः ( प्रकृतिस्थाः ) न सन्ति

– समप्रकृतिः एषा एव प्राकृतावस्था । श्लेष्मलपित्तलादयः न प्रकृतिस्थाः ।

– समवातपित्तश्लेष्माणः इह प्रकृतिस्थाः ।

– तस्मात् वातलादिनाम् इह दोषप्रकृतिः इति संज्ञा ।

– एतद् वर्णनं पूर्वं रोगानीकविमाने आगतम् । सुश्रुतेन अपि शारीरस्थाने चतुर्थे अध्याये एतदेव वर्णनं कृतम् ।

– दोषः एकैकशः तिस्त्रः, द्विशः तिस्त्र, सर्वशः एका एवं सप्त प्रकृतयः भवन्ति ।

| | | | |
|---|---|---|---|
| दोषः – | एकैकशः | – | तिस्त्रः |
| | द्विशः | – | तिस्त्रः |
| | सर्वशः | – | एका |

इति सप्त प्रकृतयः भवन्ति ।

ज्योतिषचन्द्र सरस्वतिः –

– कैशोरयुवप्रौढत्वादीनां कालभेदानुसारं शुक्रशोणितयोः तथा गर्भाशयस्य वैशिष्टात् विभिन्नकालेषु जातेषु सन्तानेषु एकस्य एव मातृपित्रोः उदरात् जन्मगृहीत्वा अपि प्रकृतिवैशिष्ट्यं दृश्यते ।

– चतुर्विधाः प्रकृतयः सन्तानस्य प्रकृतेः कारणस्वरुपिणः सन्ति ।

– प्रकृतिः इत्यस्य अर्थः स्वभावः । शेषा टीका शब्दार्थः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**श्लेष्मलप्रकृतिः** – सूत्रम् ९६

| श्लेष्मा गुणः | लक्षणयुक्तः पुरूषः |
|---|---|
| स्निग्धः | स्निग्धांगाः |
| श्लक्ष्णः | श्लक्ष्णांगाः |
| मृदुः | दृष्टिसुखसुकुमारवदातगात्राः |

| | |
|---|---|
| मधुर: | प्रभूतशुक्रव्यवायापत्या: |
| सार: | सारसंहतस्थिरशरीरा: |
| सान्द्र: | उपचितपरिपूर्णसर्वांगा: |
| मन्द: | मन्दचेष्टाहारव्याहारा: |
| स्तिमित: | अशीघ्रारम्भक्षोभविकारा: |
| गुरू: | साराधिष्ठितावस्थितगय: |
| शीत: | अल्पक्षुत्तृष्णासंतापस्वेददोषा: |
| विज्ञल: | सुश्लिष्टसारसन्धिबन्धना: |
| अच्छ: | प्रसन्नदर्शनानना: प्रसन्नस्निग्धवर्णस्वरा: च । |

अनेन गुणयोगेन श्लेष्मला व्यक्ति: बलवती, वसुमती, विद्यावती ओजस्विनी शान्ता आयुष्मती च अस्ति ।

चक्रपाणि: – मृदुत्वं जलात् विद्यते ।

– मृदुत्वात् श्लेष्मलव्यक्ते: गात्रं अवदातं (गौरं) भवति ।

– अशीघ्रम् इति पदम् आरम्भ: क्षोभ: विकार: च एतान् त्रीन् पदान् सम्बध्नाति ।

– सारगतियुक्ताया: व्यक्ते: त्वरितं स्खलनं अशक्यम् ।

– अवस्थितगतियुक्ताया: व्यक्ते: गति: न चञ्चला ।

– एतानि लक्षणानि प्रकृते: प्रभावेण भवन्ति एवं ज्ञातव्यम् ।

गङ्गाधर:– सार: नाम प्रसादरुपम् ।

– विज्ञल: नाम पिच्छिलम् । प्रत्युत अच्छ: नाम वैमल्यवान् ।

– श्लक्ष्णांगा: नाम अकर्कशांगा: ।

– श्लेष्मला व्यक्ति: सुखदर्शना अस्ति । सुकुमारा (मृदुयुक्ता) तथैव निर्मलांगस्य भवति ।

– उपचितपरिपूर्णसर्वांगा – सर्वाणि अङ्गानि समृद्धानि अहीनानि सन्ति ।

– व्याहारा: इति वाच: । श्लेष्मलाया: व्यक्ते: चेष्टाआहार: वाणी च एते अल्पा: सन्ति ।

– आरम्भ: शरीरवाङ्मनसां प्रवृत्ति: ।

– क्षोभ: मनसोऽकस्मात् क्षुब्धता ।

– विकारा: मनस: शरीरस्य वा वैषम्यम् ।

– साराधिष्ठितगति: – सारेण अधिष्ठितात् प्रमत्तगजसमाना गति: भवति ।

– तृष्णदिभि: व्याधिभि: अपि श्लेष्मला: दोषजन्याभि: व्यक्तय: स्वल्पमात्रायां ग्रास्यन्ते ।

– ओज: बलहेतुधातुविशेष: ।

– एवं प्रकारेण आयु: प्रमाणज्ञानहेतुना आतुरपरीक्षायाम् आतुरस्य बलदोषप्रमाणज्ञानार्थं प्रकृतित: परीक्षणं करणीयम् । उर्वरिता टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन: – मधुररसस्य शुक्रवर्धनकारणात् श्लेष्मलायां व्यक्त्यां मधुराधिक्येन प्रभूतानि शुक्रव्यवायअपत्यानि सन्ति ।

– आरम्भ: वाङ्मन: शरीरप्रवृत्ति: । क्षोभ: मनस: क्षुब्धता । वसु इति धनम् ।

– सुश्रुतोक्त: श्लेष्मप्रकृत्या: संदर्भ: । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: –

– श्लेष्मण: एकैकेन गुणेन श्लेष्मलशरीरे यानि गुणलक्षणानि उत्पद्यन्ते तेषां वर्णनम् ।

– 'कारणगुणा: कार्यगुणमारभ्भन्ते' । अनेन वचनानुसारं त्रिधातुनां शरीरोपादानत्वे तेषां गुणै: शरीरगता: गुणा: निर्मिमते । यथा घटकारस्य (कुलालस्य) गुणा: घटे न संक्राम्यन्ति तथा केवलं निमित्तकारणै: गुणै: शरीरगुणा: न उत्पत्स्यन्ते । अत: वातादीनां शरीरोपादानत्वं स्वीकृत्य तेषां एकैकं गुणं उल्लिख्य तद् गुणविशिष्टं शरीरं प्रतिपादितम् ।

– श्लक्ष्ण: इति मसृणा: । दृष्टिसुखानि – नयनतृप्तिकारकाणि । अवदातानि इति शुभ्रवर्णानि गात्राणि । उपचितांगा: परिपुष्टांगा: । मन्दचेष्टा: इति स्वल्पव्यायामशीला: ।

– मन्दव्याहारा: इति स्वल्पवाच: । स्तैमित्येन जडीभूत्य अशीघ्रं नाम धीरगत्या आरम्भ: क्षोभ: विकार: च इति श्लेष्मलस्य लक्षणं अस्ति ।

– आरम्भ: कार्यम् । क्षोभ: चित्तचाञ्चल्यम् । वसुमन्त: धनवन्त: । शान्ता: शमगुणयुक्ता: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## पित्तलप्रकृतिः

| गुणः | लक्षणयुक्तपुरूषः |
|---|---|
| उष्णः | उष्णासहाः |
| | उष्णमुखाः |
| | सुकुमारावदातगात्राः |
| | प्रभूतपिप्लुव्यंगतिलापिडकाः |
| | क्षुत्पिपासावन्तः |
| | क्षिप्रवलिपलितखालित्यदोषाः । |
| | मृद्वल्पकपिलश्मश्रुलोमकेशाः । |
| तीक्ष्णः | तीक्ष्णपराक्रमाः । |
| | तीक्ष्णाग्नयः । |
| | प्रभूताशनपानाः । |
| | क्लेशासहिष्णवाः । |
| | दन्दशूकाः । |
| द्रवः | शिथिलमृदुसन्धिमांसाः । |
| | प्रभूतसृष्टस्वेदमूत्रपुरीषाः । |
| विस्रः | प्रभूतपूतिकक्षास्यशिरःशरीरगन्धाः । |
| कटु–अम्लः | अल्पशुक्रव्यवायापत्याः । |

एतेन गुणयोगेन पित्तला व्यक्तिः मध्यबला, मध्यायुयुक्ता मध्यज्ञानविज्ञानवित्तोपकरणवती भवति ।

चक्रपाणिः –

– दन्दशूकः नाम वारं वारं भोक्ता । अस्मात् बहुभक्षणत्वात् पित्तला व्यक्ति प्रभूताशन् अस्ति ।

– शेषः अविशेषः ।

गङ्गाधर:

– गङ्गाधरेण पित्तस्य गुणेषु ‘द्रव’ स्थाने ‘द्रुतं’ इति पाठभेदं स्वीकृत्य तस्य‘द्रुतं इति द्रवं’ इदृशी टीका कृता । तस्मात् अत्र वैधर्म्यं नास्ति ।

– विस्रं अस्य अर्थ: आमगंधि इति ।

– उष्णासहा: उष्णं सोढुं अशक्ताः ।

– गङ्गाधरेण ‘उष्णमुखा: सुकुमारावदातगात्रा:’ इति स्थाने ‘शुष्क सुकुमारावदातगात्रा:’ इति पाठभेदं गृहीत्वा टीका कृता ।

– शुष्क: इत्यस्य अर्थ: पित्तलस्य गात्राणि नि:स्नेहानि सन्ति । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन:

– विस्रं इति आमगन्धि ।

योगीन्द्रनाथसेनेन ‘शुष्कासुकुमारगात्रा:’ इति पाठं स्वीकृत्य शुष्कम् असुकुमारं (अमृदु) च इदृशं गात्रं पित्तलस्य अस्ति इति अर्थः गृहीतः ।

– शेषा टीका शब्दार्थ: ।

– सुश्रुतोक्तस्य पित्तप्रकृते: सूत्रस्य वर्णनम् ।

ज्योतिषचन्द्र सरस्वति:

– पित्तस्य ये गुणा: आधिक्येन शरीरे संक्राम्यन्ति तान् वर्णयित्वा तेन एकैकेन गुणेन शरीरस्य गुणवत्वं वर्णितम् ।

– ‘शुष्कसुकुमारावदातगात्रा:’ इति पाठ: अस्ति ।

– शुष्कम् अल्पस्नेहम् ।

– पिप्लुनि वङ्भाषायां ‘जडुल’ इति उच्यते ।

– दन्दशूका: पुन: पुन: चर्व्यद्रव्यभोजनप्रिया: ।

निष्कर्ष:

– पाठभेदा: सन्ति किन्तु वैधर्म्यं नास्ति ।

## वातलप्रकृति:

| गुण: | लक्षणयुक्तपुरूषः |
| --- | --- |
| रुक्ष: | रुक्षापचिताल्पशरीरा: |
| | प्रततरुक्षक्षामसन्नसक्तजर्जरस्वराः |
| | जागरुका: |
| लघु: | लघुचपलगतिचेष्टाहारव्याहाराः |
| चल: | अनवस्थितसन्ध्यास्थिक्षिभ्रू– |
| | हन्वोष्ठजिव्हाशिर:स्कन्धपाणिपादा: |
| बहु: | बहुप्रलापकण्डरासिराप्रताना: |
| शीघ्र: | शीघ्रसमारम्भक्षोभविकारा: |
| | शीघ्रत्रासरागविरागा: |
| | श्रुतग्राहिणोऽल्पस्मृतय: |
| शीत: | शीतासहिष्णव: |
| | प्रततशीतकोद्वेपकस्तम्भा: |
| परुष: | परुषकेशश्मश्रुरोमनखदशन– |
| | वदनपाणिपादा: |
| विशद: | स्फुटितांगावयवा: |
| | सततसन्धिशब्दगामिन: |

एतेन गुणयोगेन वातला व्यक्ति: प्राय: अल्पबला अल्पायुयुक्ता अल्प–अपत्या अल्पसाधना तथा च अल्पधनयुक्ता भवति ।

चक्रपाणि:–

– प्रततम् इत्यस्य अर्थ: प्रसृतम् इति ।

– सन्न: इति हीन: ।  – सक्त: इति बद्ध: ।

– जर्जर: भग्नपात्रध्वनिसम: ।  – शेष: शब्दार्थ: ।

गङ्गाधरः –

– अपचितं इति कृशम् ।

– प्रततम् इति निरन्तरं विस्तरेण वा ।

– रुक्षस्वरः इति कर्कशस्वरः ।

– क्षामस्वरः इति क्षीणस्वरः ।

– भिन्नस्वरः इति भङ्गरुपः स्वरः ।

– सक्तस्वरः इति अव्यक्तस्वरः ।

– जर्जरस्वरः इति असंहतः स्वरः ।

– उद्वेपकः इति उत्कम्पता ।

– शेषः शब्दार्थः ।

योगीन्द्रनाथ सेनः – बहुः प्राणादिभेदात् अनेकात्मकः ।

– प्रततं सततम् ।

– क्षामः क्षीणः ।

– भिन्नः भग्नपात्रध्वनिसमः ।

– सक्तः बद्धः ।

– जर्जरः असंहतः ।

– जागरुकाः जागरणशीलाः अल्पनिद्रा ।

– 'त्रास' इति पदेन अत्र 'भयम्' इति अर्थः स्वीकरणीयः ।

– उद्वेपकः इति कम्पः ।

– सुश्रुतोक्तस्य वातप्रकृतेः सूत्रस्य वर्णनम् । शेषः शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः –

– वातले अल्पवित्तोपकरणत्वं भवति इति वर्णनम् असंबध्दम् । एतेषां परस्परैः सह किमपि सम्बन्धः नास्ति एवं भातुं शक्यम् ।

– परं वातला व्यक्तिः तेन गुणयोगेन तत्स्वरुपिण्या शारीरमानसावस्थया वित्तोपकरणानि संग्रहीतुं असमर्था अस्ति । तेन तत्समीपे वित्तोपकरणानि प्रमाणेन अल्पानि सन्ति । शेषः अविशेषः ।

निष्कर्षः – एकः पाठभेदः तथा त्रिणि वैधर्म्याणि च सन्ति ।

**संसृष्टा तथा समधातुप्रकृतिः** – सूत्रे – ९९, १००.

चरकः– एतासां प्रकृतिलक्षणानां संयोगेन संसृष्टा (द्वन्द्वजा) प्रकृतिः भवति ।

– सर्वगुणसमुदिता व्यक्तिः समधातोः वर्तते ।

– एवं प्रकृतिः परीक्षणीया ।

चक्रपाणि:– सर्वगुणसमुदिता इत्यस्य अर्थ: सर्वप्रकृतिगतै: प्रशस्तै: गुणै: युक्ता इति भवति ।

– वाग्भटेन उक्तं यत् – 'समधातु: समस्तातु श्रेष्ठा ।'

– यदि प्रशस्तगुणा: न सन्ति तर्हि श्रेष्ठत्वं न स्यात् ।

– साम्यभावात् स्थिता: दोषा: साम्यप्रभावेण श्रेष्ठान् गुणान् उत्पादयन्ते ।

गङ्गाधर:– प्रकृतिस्थ गुणानां समुदाय: समधातुप्रकृतौ अस्ति ।

योगीन्द्रनाथ सेन: – संसर्गप्रकृते: तथा सन्निपातप्रकृते: वर्णनम् । दोषै: सप्तप्रकृतय: वर्णिता: ।

– दोषवत् गुणै: सत्वादीनां अपि प्रकृतय: भवन्ति । ता: महागर्भावक्रान्तिशारीरे अध्याये वर्णिता: ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थ: टीका ।

निष्कर्ष:– वैधर्म्यं नास्ति ।

**विकृतित: परीक्षेत्** – सूत्रम् – १०१

चरक:– विकृति: इति विकार: उच्यते ।

– विकारं हेतु–दोष–दूष्य–प्रकृति–देश–काल–बलविशेषै: लिङ्गतः च परीक्षेत ।

– यत: एतेषां हेत्वादीनां बलस्य ज्ञानात् ऋते व्याधिबलस्य ज्ञानम् अशक्यम् ।

– यस्यां व्याध्यां दोष–दूष्य–प्रकृति–देश–काल–बल एतेषां साम्यं अस्ति तथा हेतुनां लक्षणानां च महत् अस्ति । ता व्याधि: बलवती अस्ति । अस्य विपरीता व्याधि: अल्पबलवती अस्ति ।

– दोषदूष्यादिषु क्वचित् समानता क्वचित् यदि असमानता स्यात् तथा हेतुलक्षणानां बलं मध्यमं स्यात् तर्हि व्याधि: मध्यबलवती अस्ति ।

चक्रपाणि:– दोषदूष्यादिषु साम्यम् अस्ति अस्य अर्थ: तेषु परस्परतुल्यगुणता वर्तते ।

– शेष: अविशेष: ।

गङ्गाधर:– विकार: इत्यस्य अर्थ: धातुवैषम्यनिमित्त: ज्वरादि: । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: – विकृति: नाम विकार: धातुवैषम्यम् च अस्ति ।

– लिङ्ग पदेन पूर्वरुपं रुपं च अनयो: उभयो: समावेश: भवति ।

– रुपस्य तथा पूर्वरुपस्य बलविशेषात् विकारस्य बलविशेषा: परीक्षणीया: ।

– व्याधि: बलवती अस्ति नाम असाध्या भवति ।

–चरकस्य सूत्रस्थानस्य दशमाध्यायगतानां सुसाध्या तथा असाध्या व्याधिलक्षणानां संदर्भ: दत्त: ।

ज्योतिषचन्द्र सरस्वति: – अविशेषा टीका ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**सारत: परीक्षेत** – सूत्राणि १०२ त: ११५

एतेषु परीक्ष्यभावेषु अधोक्तानां घटकाधारेण वर्णनं कृतम् ।

| | | |
|---|---|---|
| सारपरीक्षणं उद्देश: | – | सूत्रम् १०२ |
| त्वक्सारम् | – | सूत्रम् १०३ |
| रक्तसारम् | – | सूत्रम् १०४ |
| मांससारम् | – | सूत्रम् १०५ |
| मेद: सारम् | – | सूत्रम् १०६ |
| अस्थिसारम् | – | सूत्रम् १०७ |
| मज्जासारम् | – | सूत्रम् १०८ |
| शुक्रसारम् | – | सूत्रम् १०९ |
| सत्वसारम् | – | सूत्रम् ११० |
| सारपरीक्षणात् बलपरीक्षणम् | – | सूत्राणि १११ – ११४ |
| सारपरीक्षणस्य महत्त्वम् | – | सूत्रम् ११५ |

**सारपरीक्षणस्य उद्देश:** –

चरक: – अष्टप्रकाराणां साराणां बलमानविशेषज्ञानार्थं परीक्षणं करणीयम् ।

– अष्टौ साराणि – त्वग्रक्तमांसयमेदो ऽ स्थिमज्ज्ञशुक्रसत्वानीति ।

चक्रपाणि: – सारशब्देन विशुद्धतरो धातु: उच्यते ।

गङ्गाधर: – सत्वपदेन मन: बोधनीयम् । न सत्वगुणानाम् ।

योगीन्द्रनाथ सेन: – शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

| | | |
|---|---|---|
| <u>त्वक्सारम्</u> – | लक्षणम् | कर्म |
| | स्निग्धत्वक् | सुखम् |
| | श्लक्ष्णत्वक् | सौभाग्यम् |
| | मृदुत्वक् | ऐश्वर्यम् |
| | प्रसन्नत्वक् | उपभोगः |
| | सूक्ष्मलोमात्वक् | बुद्धिः |
| | गम्भीरलोमात्वक् | विद्या |
| | सुकुमारलोमात्वक् | आरोग्यम् |
| | सप्रभात्वक् | प्रहर्षणम् |
| | | आयुष्यत्वम् |

<u>चक्रपाणिः</u> – सप्रभात्वक् अस्य अर्थः प्रभया युक्तावक्

<u>गङ्गाधरः</u> – आचष्टे इति व्यनक्ति ।

<u>योगीन्द्रनाथ सेनः</u> – आचष्टे इति ज्ञापयति ।

<u>ज्योतिषचन्द्र सरस्वतिः</u> – गम्भीरं नाम दीर्घसंसक्तमूलं लोम इति । सुकुमारं नाम मृदु ।

– प्रसन्ना नाम निर्मला । निर्मला नाम अविकृता त्वक् ।

<u>निष्कर्षः</u> – वैधर्म्यं नास्ति ।

| रक्तसारम् | लक्षणम् | | कर्म |
|---|---|---|---|
| | कर्ण: | | सुखम् |
| | अक्षि: | | उद्धताम् |
| | मुखम् | | मेधाम् |
| | जिव्हा | स्निग्धम् | मनस्वित्वम् |
| | नासा | रक्तवर्ण: | सौकुमार्यम् |
| | ओष्ठः | श्रीमद् | अनतिबलम् |
| | पाणितलम् | भ्राजिष्णु: | अक्लेशसहिष्णुत्वम् |
| | पादतलम् | | उष्णासहिष्णुत्वम् |
| | नखम् | | |
| | ललाटम् | | |
| | मेहनम् | | |

चक्रपाणि: – श्रीमद् नाम शोभायुक्तम् ।

गङ्गाधर: – उद्धताम् इति विपुलां मेधाम् ।

योगीन्द्रनाथ सेन: – उद्धताम् मेधां विपुलां मेधाम् ।

सुश्रुतोक्त: रक्तसारस्य वर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – श्रीमद् इति कान्तिमत् ।

भ्राजिष्णु: इति दीप्तिमत् ।

उद्धतां मेधां श्रुतिधरयोग्यां मेधाम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**मांससारम्** –

| लक्षणम् | | कर्म |
|---|---|---|
| शङ्ख: | | क्षमा |
| ललाटम् | | धृतिम् |
| कृकाटिका | | अलौल्यम् |
| अक्षि: | | वित्तम् |
| हनु: | | विद्याम् |
| गण्ड: | स्थिरम् | सुखम् |
| ग्रीवा | गुरुम | आर्जवम् |
| स्कन्ध: | शुभम् | आरोग्यम् |
| उदरम् | मांसोपचितम् | दीर्घबलम् |
| कक्ष: | | दीर्घायु: |
| वक्ष: | | |
| पाणिसन्धय: | | |
| पादसन्धय: | | |

**चक्रपाणि:** – टीका नास्ति ।

**गङ्गाधर:** – शङ्ख: नाम ललाटस्य एक: भाग: । तर्हि ललाटं नाम मध्यललाटम् ।

– कृकाटिका नाम घाटा । दीर्घबलं नाम अतुलबलम् ।

**योगीन्द्रनाथ सेन:** – कृकाटिका घाटा ।

– आर्जवम् ऋजुताम् । अलौल्यम् अलोलुपत्वम् ।

– सुश्रुतोक्त: मांससारस्य लक्षणम् ।

**ज्योतिषचन्द्र सरस्वति:** –

–सर्वाणां अवयवानां रचनात्मका: व्याख्या:

– आर्जवं सारल्यम् ।

**निष्कर्ष:** – वैधर्म्यं नास्ति ।

**मेद:सारम्** – लक्षणम् कर्म

| लक्षणम् | | कर्म |
|---|---|---|
| वर्णः | | वित्तम् |
| स्वरः | | ऐश्वर्यम् |
| नेत्रम् | | सुखम् |
| केशः | | उपभोगप्रदानम् |
| लोम | विशेषम् | आर्जवम् |
| नखम् | स्निग्धम् | सुकुमारम् |
| दन्तः | | उपचारता |
| ओष्ठः | | |
| मूत्रम् | | |
| पुरीषः | | |

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः – वित्तं धनादि ।

ऐश्वर्यं प्रभुता ।

योगीन्द्रनाथ सेनः – वित्तं धनं ।

ऐश्वर्यं प्रभुत्वम् ।

सुकुमारोपचारता मृदु उपचारार्हता ।

ज्योतिषचन्द्र सरस्वतिः – सुकुमारोपचारतां मृदु औषधेन चिकित्स्यत्वम् ।

प्रदानं दानशीलता ।

निष्कर्षः – वैधर्म्यं नास्ति ।

अस्थिसारम् –

| लक्षणम् | | कर्म |
| --- | --- | --- |
| पार्ष्णि: | स्थूलम् | महोत्साहा: |
| गुल्फम् | स्थूलम् | क्रियावन्त: |
| जानु | स्थूलम् | सारशरीरा: |
| अरत्नि | स्थूलम् | स्थिरशरीरा: |
| जत्रु | स्थूलम् | आयुष्मन्त: |
| चिबुकम् | स्थूलम् | |
| शिर: पर्व: | स्थूलम् | |
| स्थूलास्थि: | स्थूलम् | |
| स्थूलनखा: | स्थूलम् | |
| स्थूलदन्ता: | स्थूलम् | |

चक्रपाणि: – अरत्नि इति कफोणिका ।

गङ्गाधर: – शब्दार्थ: ।

योगीन्द्रनाथ सेन: – सर्वप्रत्यंगानां व्याख्या: वर्णिता: सन्ति ।

– सुश्रुतस्य अस्थिसारस्य वर्णनम् ।

– सारकारणात् एतेषां मनुष्याणां शरीरं स्थिरं भवति ।

ज्योतिषचन्द्र सरस्वति: – प्रत्यंगानां व्याख्या: वर्णिता: ।

– एते पुरुषा: अकस्मात् दुर्बला: न भवन्ति ।

– स्थिरशरीराणां विद्यन्ते ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

मज्ञासारम् –

| लक्षणम् | कर्म |
| --- | --- |
| मृदु अंगम् | दीर्घायु: |
| बलवान् | बलवन्त: |
| स्निग्धवर्ण: | श्रुतभाज: |
| स्निग्धस्वर: | वित्तभाज: |
| स्थूलदीर्घवृत्तसंधि: | विज्ञानभाज: |
| | अपत्यभाज: |
| | संमानभाज: |

चक्रपाणि: – टीका नास्ति ।

गंगाधर: – शब्दार्थ: ।

योगीन्द्रनाथ सेन: – शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – श्रुतभाज: इति वेदज्ञा: ।

– विज्ञानभाज: इति शिल्पकलादिज्ञा: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

| **शुक्रसारम्** – | लक्षणम् | | कर्म |
|---|---|---|---|
| | सौम्याः | | |
| | सौम्यप्रेक्षिणः | | स्त्रीप्रियोपभोगः |
| | क्षीरपूर्णलोचनाः | | बलवन्तः |
| | प्रहर्षबहुलाः | | सुखभाजः |
| | स्निग्धम् | | ऐश्वर्यभाजः |
| | वृत्तम् | | आरोग्यभाजः |
| | सारम् | | वित्तभाजः |
| | समम् | } दशनाः | संमानभाजः |
| | संहतम् | | अपत्यभाजः |
| | शिखरम् | | |
| | प्रसन्नस्निग्धवर्णस्वराः | | |
| | भ्राजिष्णुः | | |
| | महास्फिचः | | |

चक्रपाणिः – शिखरदशनाः इति शोभनदशनाः ।

– प्रियोपभोगः अस्य अर्थः ये संभोगस्वरुपिणं उपभोगं प्राप्नुवन्ति ते ।

गंगाधरः – प्रहर्षबहुलः अस्य अर्थः अतिमात्रायां मैथुनं कुर्वाणाः ।

–स्त्रिप्रियाः अस्य अर्थः येषु स्त्रियः स्निह्यन्ति ।

योगीन्द्रनाथ सेनः– सौम्याः अस्य अर्थः येषां मूर्तिः सौम्या अस्ति ।

– येषां शीलं सौम्यं तान् सौम्य प्रेक्षिणः इति वदन्ति । प्रहर्षः मेहनोच्छ्रायः ।

– शिखरिवत् उन्नताग्राः दशनाः येषां ते शिखरिदशनाः ।

– स्त्रीभ्याः प्रियाः ये ते स्त्रीप्रियाः । येभ्यः उपभोगः प्रियः ते प्रियोपभोगाः । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – सौम्याः मनोज्ञा आकृतयः । येषाम् अग्राणि सूक्ष्माणि ते शिखरिदशनाः ।

निष्कर्षः – स्त्रीप्रियाः उपभोगप्रियाः शिखरिदशनाः च एतेषां पदानां विवरणे वैधर्म्यम् अस्ति ।

| सत्वसारम् | लक्षणम् | कर्म |
|---|---|---|
| | स्मृतिमन्तः | शुचि |
| | भक्तिमन्तः | महोत्साहः |
| | कृतज्ञः | दक्षः |
| | प्राज्ञः | धीरः |
| | समरविक्रान्तयोधिनः | त्यक्तविषादः |
| | सुव्यवस्थितगतिः | गम्भीरबुद्धिः |
| | कल्याणाभिनिवेशिनः | गम्भीरचेष्टः |

चक्रपाणिः –

– युद्धे ये शौर्येण युध्यन्ते तान् समरविक्रान्तयोधिनः इति वदन्ति ।

गंगाधरः –

– युद्धे वा मल्लयुद्धे वा शस्त्रास्त्रयुद्धे वा वाग्युद्धे वा व्यवहारयुद्धे ये पराक्रमेण युद्ध्यन्ते ते समरविक्रान्तयोधिनः ।

– गंगाधरेण कल्याणाभिनिवेशः अस्यापेक्षया कल्पनाभिनिवेशः इति पाठभेदं स्वीकृत्य टीका कृता ।

– कल्पनायां क्लृप्तिकरणे अभिनिवेशशीलाः ।

योगीन्द्रनाथ सेनः

– कल्याणाभिनिवेशः – शुभेषु अवहिताः ।

– शेषः शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः

– कल्याणाभिनिवेशः सर्वेषां मंगलक्रर्थकाः ।

निष्कर्षः – एकः पाठभेदः किन्तु वैधर्म्यं नास्ति ।

**सारविशेषात् बलप्रमाणविशेषः** –

चरकः – सर्वसारयुक्तः पुरुषः अधःलक्षणैः युक्तः भवति ।

| | | |
|---|---|---|
| अतिबलाः | | परमसुखयुक्ताः |
| सर्वारम्भेषु आत्मानि जातप्रत्ययाः | | स्थिरसमाहितशरीराः |
| कल्याणाभिनिवेशिनः | | सानुनादस्निग्धगम्भीर महास्वराः |
| सुसमाहितगतयः | | सुखम् |
| ऐश्वर्यम् | भाजः | मन्दजराः |
| वित्तम् | भाजः | मन्दविकाराः |
| उपभोगः | भाजः | प्रायः तुल्यगुणविस्तीर्णापत्यः |
| सम्मानः | भाजः | चिरजीविनः |

एतेभ्यः विपरीतलक्षणयुक्ता व्यक्तिः असारा अस्ति ।

– मध्यगुणैः युक्ता व्यक्तिः मध्यसारा अस्ति

– एवं बलप्रमाणविशेषज्ञानार्थं अष्टसाराणि परीक्षणीयानि ।

चक्रपाणिः – स्वतुल्यगुणसमानानि अपत्यानि सर्वसारव्यक्तिः उत्पद्यते

– प्रायः शब्दो नियमेन निषेधयति ।

गङ्गाधरः – सर्वासां क्रियाणां आरम्भे सामर्थ्यं प्रकटयन्ति ।

– कल्याणाभिनिवेशः – शुभे अभिनिवेशिनः ।

– अष्टसारेभ्यः विपरीतैः लक्षणैः युक्तः पुरुषः असारः भवति ।

– एतेषु सारलक्षणेषु कैश्चित् लक्षणैः युक्ता व्यक्तिः मध्यसारम् भवति ।

योगीन्द्रनाथ सेनः – सारविशेषेण बलप्रमाणस्य विशेषज्ञानं भवति ।

– तद् त्रिविधम् – उत्तमः मध्यमः अधमः च ।

– उत्तमः – सर्वेः अष्टविधैः सारैः उपेताः पुरुषाः ।

– अधमः – उत्तरसारेभ्यः उक्तलक्षणेभ्यः विपरीतलक्षणाः ।

– मध्यमः – प्रवरावरमध्यस्थैः सारविशेषैः मध्यसाराणां गुणविशेषाः ।

– अनुनाद प्रतिध्वनि: । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – सर्वसारसम्पन्नानां व्यक्तीनां गुणानां वर्णनम् । शेष: शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## सारपरीक्षणस्य महत्त्वम्

चरक: – केवलं रुग्णशरीरं दृष्ट्वा वैद्य: एतत् कल्पितुं न शक्नोति यत् एषा व्यक्ति: उपचितत्वात् बलवती स्यात् कापि व्यक्ति: कृशत्वात् अल्पबलवती स्यात् स्थूलशरीरात् महाबलवती स्यात् अल्पशरीरात् अल्पबलवती स्यात् ।

– यत: यथा पिपीलिका स्वभारापेक्षया अधिकं भारं स्कुन्दते तथा काश्चित् अल्पशरीरस्य कृशव्यक्तय: अपि बलवत्या: सन्ति इति व्यवहारे दृश्यते ।

– अस्य संशयस्य निराकरणार्थम् एव सारपरीक्षणस्य वर्णनं कृतम् ।

चक्रपाणि: – उपचितत्वं नाम स्थूलत्वम् । शेष: शब्दार्थ: ।

गङ्गाधर: – केवलं शरीरदर्शनेन बलज्ञानं भवितुं न शक्यते । अत: सारपरीक्षणं वर्णितम्

योगीन्द्रनाथ सेन:– सारपरीक्षणस्य उपदेश: किमर्थं कृत: अस्य विवरणम् अस्मिन् सूत्रे कृतम् । केवलं शरीरदर्शनात् वलयपरीक्षणे वैद्य: मोग्धुं शक्य: । अत: बलप्रमाणस्य विशेषज्ञानार्थं सारत: परीक्षणीयम् ।

– उपचितत्वं इति पुष्टत्वम् । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:–

– सारउल्लेखस्य प्रयोजनम् अत्र वर्णितम् ।

– उपचितत्वात परिपुष्टशरीरत्वात् ।

– यथा पिपीलिका स्वदेहस्य चतु:गुणितं भारं नयति तद्वत् काश्चन अल्पशरीरा: व्यक्तय: स्कन्दित्वा बलवत्य: सन्ति ।

– शेष शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## संहननतः परीक्षेत् – सूत्रम् ११६

चरकः – संहननं संहतिः संयोजनं च एतानि पदानि एकार्थवाचकानि सन्ति । अस्मिन् समसुविभक्तास्थि, सुबद्धसन्धि, सुनिविष्टमांसशोणितम च एतादृशं शरीरं सुसंहतं शरीरम् इति वदन्ति ।

– सुसंहतशरीरस्य पुरुषः प्रायः बलवान् अस्ति । तद्विपरीतलक्षणस्य पुरुषः अल्पबलवान् भवति । संहननस्य मध्यत्वात् मध्यबलवान् पुरुषः अस्ति ।

चक्रपाणिः – निबिडसन्धानता नाम संहतिः ।

गङ्गाधरः – समं यथायोग्यं सुष्ठु विभक्तम् अस्थि यत्र समसुविभक्तास्थि । सुष्ठु बद्धाः सन्धयो यत्र तत् सुबद्धसन्धिम् । सुष्ठु निविष्टे मांसशोणिते यत्र तत् सुनिविष्टमांसशोणितम् । शेष शब्दार्थः ।

योगीन्द्रनाथ सेनः – शब्दार्थस्य विवेचनम् ।

ज्योतिषचन्द्र सरस्वतिः – सुनिविष्टम् अस्य अर्थः प्रमाणानुरूपं यथावत् विन्यस्त्यं इति । शेषः शब्दार्थाः

निष्कर्षः – वैधर्म्यं नास्ति ।

## प्रमाणतः परीक्षेत – सूत्रम् ११७

– अस्यां परीक्षायां व्यक्तेः अंगुल्याः प्रमाणानुसारं शरीरस्य उत्सेधविस्तारआयामस्वरुपिणः शरीरप्रमाणस्य विचारः कृतः ।

– विविधशरीरावयवानां अंगुलीप्रमाणं वर्णितम् ।

| अवयव | अंगुली | अवयवः | अंगुली |
|---|---|---|---|
| पाद उत्सेधम् | ४ | कटि विस्तारः | १६ |
| पाद विस्तारः | ६ | पार्श्व विस्तारः | १० |
| पाद आयामः | १४ | पार्श्व आयामः | १२ |
| जंघा आयामः | १८ | बस्तिशिरः | १० |
| जंघा परिक्षेपः | १६ | उदर विस्तारः | १० |
| जानुः आयामः | ४ | उदर आयामः | १२ |

| | | | |
|---|---|---|---|
| जानु: परिक्षेप: | १६ | स्तनान्तरम् | १२ |
| ऊरु परिक्षेप: | ३० | स्तनपर्यन्तम् | २ |
| ऊरु आयाम: | १८ | उर: विस्तार: | २४ |
| वृषण आयाम: | ६ | उर: उत्सेधम् | १२ |
| वृषण परिणाहम् | ८ | हृदयम् | २ |
| शेफ आयाम: | ६ | स्कन्धौ | ८ |
| शेफ परिणाहम् | ५ | अंसौ | ६ |
| भग विस्तार: | १२ | प्रबाहु: | १६ |
| प्रपाणिः | १५ | हस्तौ | १२ |
| कक्षौ | ८ | त्रिक् उत्सेधम् | १२ |
| पृष्ठ उत्सेधम् | १८ | शिरोधरा उत्सेधा | ४ |
| आननं उत्सेधम् | १२ | शिरोधरा परिणाहा | २२ |
| आननं परिणाहम् | २४ | आस्यम् | ५ |
| चिबुकम् | ४ | ललाटम् | ४ |
| ओष्ठ: | ४ | शिर: उत्सेधम् | १६ |
| कर्ण: | ४ | शिर: परिणाहम् | ३२ |
| अक्षिमध्यम् | ४ | पूर्ण शरीरम् | ८४ |
| नासिका | ४ | | |

– यदा शरीरस्य आयामविस्तारौ समानौ भवत: तदा तद् समशरीरं भवति ।

– एतस्मिन् समशरीरयुक्ते मनुजे आयुबलओज सुखऐश्वर्यवित्तानि तथा च अन्ये इष्टभावा: आयत्ता:

– अस्य विपरीतभावा: हीने वा अधिकप्रमाणयुक्ते शरीरे आयत्ता: ।

चक्रपाणि: – अनया परीक्षया अंगअवयवयो: प्रशस्तप्रमाणस्य ज्ञानं भवति ।

– जङ्घा जानु अधस्ताद् उच्यते । जानु: जङ्घोरूसन्धि: ।

– प्रबाहु: अंसात् अर्वाक् कफोणिपर्यन्तम् । प्रपाणि: कफोणि अधस्तात् ।

– त्रिकम् इति गुदास्थ्नः प्रभृतिः कटीकपालोर्ध्वपर्यन्तम् ।

– शिरः षड् अङ्गुलिमितम् अस्ति । एतद् प्रमाणं पृष्ठतः ग्रीवोपरि गणनीयम् ।

– आपादशिरं ८४ अङ्गुलमितं भवति शरीरम् । स्वहस्तस्य प्रमाणानुसारं सार्धत्रिहस्तं शरीरप्रमाणं भवति । सुश्रुतेन शरीरस्य मानं १२० अङ्गुलमितं कथितम् । एतद अन्तरम् अङ्गुलिमानस्य भेदेन अस्ति ।

– शरीरस्य आयामविस्तारौ उभौ ८४ अङ्गुलानि स्याताम् । विस्तारः विस्तृतबाहुद्वयप्रमाणेन ज्ञातव्यः । शेषः अविशेषः ।

गङ्गाधरः – उत्सेध इति उच्चतः । विस्तार इति विस्तीर्णत्वात् । आयाम इति दैर्घ्यात् ।

– पादप्रमाणस्य विवरणम् – स्वअंगुलीमानेन पादः चतुर्दशअंगुल्याः अस्ति । सुश्रुतेन अस्य विवरणं कृतम् । पादाङ्गु प्रदेशिनी च द्वे द्वे अंगुल्यौ स्तः ।

– प्रदेशिन्याः अपेक्षया मध्यमा अनामिका कनिष्ठा च एताः यथोत्तरं पञ्चमभागहीनाः सन्ति । प्रपदं पादतलं च चतुरंगुली आयामस्य तथा पञ्चांगुलीविस्तारस्य स्तः ।

– चरकसुश्रुतयोः अंगुलीप्रमाणवैधर्म्यस्य विस्तृतं विवेचनं कृत्वा एतद् वैधर्म्यं कथं नास्ति इति गङ्गाधरेण वर्णितम् ।

– चरकेण शरीरप्रमाणं ८४ अंगुल्याः तथा सुश्रुतेन १२० अंगुल्याः प्रमाणितम् अस्ति । अस्मिन् अंगुल्याः पर्वस्य दैर्ध्यभेदात् एतद् अन्तरं वर्तते । अस्मिन् वैधर्म्यं नास्ति ।

– सुश्रुतेन अंगुलीप्रमाणेन सह एव अंगप्रत्यंगप्रमाणानाम् आयुर्बलादयः भावाः परीक्षणीयाः इति कथितम् । तस्य अपि समावेशः अस्यां परीक्षायां करणीयः भवति ।

योगीन्द्रनाथ सेनः – चरकेण शेफसः प्रमाणं षड् अंगुल्याः प्रत्युत सुश्रुतेन चतुरांगुल्यः कथितम् अस्ति । अस्मिन् शेफः उच्छ्रितः नास्ति तदा तस्य प्रमाणं चतुरांगुल्यः तथा च यदा उच्छ्रायमानं भविष्यति तदा षड् अंगुल्याः प्रमाणम् भवति इति ज्ञातव्यम् ।

– चरकेण ८४ अंगुल्यः प्रमाणं तथा सुश्रुतेन १२० अंगुल्यः प्रमाणं सर्वशरीरस्य कथितम् । पादाग्रात् ऊर्ध्वबाहुः पुरुषस्य प्रमाणं १२० अंगुल्याः अस्ति । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वतिः – शरीरांगप्रत्यंगानाम् अनुषंगेन प्रमाणतः परीक्षणं वर्णितम् ।

– केन मानेन शरीरस्य प्रमाणं कल्पितव्यम् । यत: मानवस्य ह्रस्वदीर्घत्वात् एवं सामान्यं प्रमाणं वर्णितुम् अशक्यम् ।

– अत: स्वांगुलीप्रमाणं विचारयित्वा तद् द्वारा प्रमाणपरीक्षणं निर्मितम् ।

– स्वांगुल्या: प्रमाणेन शरीरांगप्रत्यंगानां प्रमाणं यदि गणितं तर्हि तद् प्राय: एकसमानम् आगच्छति ।

– अत्र पदतलत: क्रमश: प्रमाणं वर्णितम् ।

बस्तिशिर: – नाभे: अध: रोमान्तपर्यन्तं यद् बाह्यागं तद् बस्तिशिर: । कोष्ठांगस्था बस्ति: अस्य अवयवस्य अग्रभागस्य अपि बस्तिशिर: अथवा बस्तिमुखम् इति संज्ञा अस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति । योगीन्द्रनाथसेनेन विशेषमतं वर्णितम् अस्ति ।

## सात्म्यत: परीक्षेत – सूत्रम् ११८

चरक: – सात्म्यं नाम तद् यद् सातत्येन उपसेव्यमानम् उपशेते ।

– या: घृतक्षीरतैलमांसरससात्म्या: सन्ति तथा सर्वरससात्म्या: सन्ति ता: व्यक्तय: बलवत्य: क्लेशसहा: चिरजीविन्य: सन्ति ।

– या: रुक्षसात्म्या: तथा एकरससात्म्या: सन्ति ता: प्राय: अल्पबलवत्य: अल्पक्लेशसहा: आयु: युक्ता: तथा अल्पसाधनयुक्ता: सन्ति ।

– या: यामिश्रसात्म्या: सन्ति ता: मध्यबलवत्य: ।

चक्रपाणि: – अत्र सात्म्यशब्देन ओकसात्म्यम् उच्यते ।

– अल्पसाधना: इति अल्पभेषजा: । ये एकरससात्म्या: सन्ति तान् अन्येषां पञ्चरसाणां अपथ्यात् उपलब्धानि औषधानि अल्पानि सन्ति इति अभिप्रेतार्थ: ।

गङ्गाधर: – सततोपयोगेन यद् उत्तरकाले सुखानुबन्धम् उत्पद्यते तं सात्म्यम् इति वदन्ति ।

– द्रव्यविशेषसात्म्यस्य अपेक्षया बलविशेषं वर्णितम् ।

– अल्पसाधना: इति अल्पक्रियानिर्वाहका: ।

– अत्र 'च' इति पदं 'पुन:' एतेन अर्थेन उपयोजितम् । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – सात्म्यम् इति पदेन अत्र ओकसात्म्यम् अभिप्रेतम् ।

– यस्य सततं अभ्यासेन सुखं लभते तद् सात्म्यं उच्यते ।

– रसविमाने अध्याये एतेषां त्रिविधसात्म्यानां ( प्रवरं मध्यममवरम् ) वर्णनं कृतम् ।

– अस्मिन् ये घृतादिसात्म्या: सन्ति ते प्रवरसात्म्याः ये रुक्षसात्म्या: तथा एकरससात्म्या: सन्ति ते अवरसात्म्या: तथा ये व्यामिश्रसात्म्या: ते मध्यसात्म्या: सन्ति ।

– अल्पसाधना: इति अल्पक्रियानिर्वाहका: । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – केवलं शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**सत्वत: परीक्षेत** – सूत्रम् ११९

चरक: – सत्वं इति मन: उच्यते । तद् आत्मसंयोगात् शरीरस्य तन्त्रकम् अस्ति ।

– तद् बलभेदेन त्रिविधम् – प्रवरं मध्यमम् अवरं च ।

– तदनुसारं प्रवरमध्यमावरसत्वानां पुरुषाणां निर्मिति: भवति ।

– प्रवरसत्वम् – सत्वसारे लक्षणानां वर्णनमस्ति । प्रवरसत्वस्य व्यक्ति: स्वल्पशरीरिणी सती अपि सत्वप्राबल्येन महत्व्याधे: पीडां अपि सोढुं शक्नोति ।

– मध्यसत्वम् – अन्यस्य धैर्यं दृष्ट्वा स्वसत्वबलं वर्धयित्वा सक्षमा: भवन्ति अथवा अन्यस्मात् प्राप्तया धृतिना सक्षमा: भवन्ति ।

– हीनसत्वम् – एतासां व्यक्तीनां सत्वबलं न आत्मबलेन अथवा न अन्यस्य साहाय्येन वर्धते ।

एषा व्यक्ति: बृहती शरीरिणी सती अपि अल्पामपि वेदनां सोढुं न शक्नोति । सदैव भयशोकलोभमोहमानै: ग्रस्ता: सन्ति । विविधै: कारणै: एते विषादवैवर्ण्यमूर्च्छादीभि: लक्षणै: ग्रस्यन्ते अथवा मरणं गच्छन्ति ।

चक्रपाणि: – 'तन्त्रकम' इत्यस्य अर्थ: प्रेरकं धारकं च ।

– सत्वं आत्मसंयोगेन शरीरं प्रेरयति धारयति च ।

– प्रवरसत्ववत्य: व्यक्तय: सत्वगुणस्य स्थिरत्वात् वेदनाविकारौ सोढुं शक्नुवन्ति ।

– मध्यसत्ववत्य: व्यक्तय: वेदनां सहमानम् अन्यं दृष्ट्वा 'यदि स: सोढुं शक्नोति तर्हि अहमपि शक्नोमि' इति विचारेण स्थिरा भवन्ति ।

गंगाधर: – 'तन्त्रकम' इत्यस्य अर्थ: नियामकम् इति ।

– मनस: आत्मना नित्यसंयोग: अस्ति अत: तद् शरीरं नियमति ।

– बलभेदेन त्रिविधम् – प्रवरबलं मन: । मध्यमबलं मन: । अवरबलं मन: ।

– यदि सत्वसारपरीक्षया रुग्णस्थं सत्वं परीक्ष्यते तर्हि पुन: पृथक् सत्वत: परीक्षावर्णनस्य किं कारणम् ? – तत: सारवचनेन सत्वस्य प्रवरावरमध्या: भेदा: वर्णितुं न शक्यते । तथैव जन्मोत्तरकाले त्रिविधसत्वानां बलप्रमाणज्ञानम् अपि केवलं सत्वसारपरीक्षणेन न शक्यम् । अत: आतुरस्य सत्वत: परीक्षा पृथक् वर्णिता ।

योगीन्द्रनाथ सेन: – अत्र सत्वम् इति पदं मनोवाचकम् अस्ति ।

– मन: आत्मन: संयोगेन शरीरेन्द्रियाणां प्रेरकं कार्यं करोति ।

– मन: आत्मनि अधिष्ठाय इन्द्रियाणि यथास्वं स्वविषयग्रहणार्थं प्रेरयति ।

– 'खुड्डीकागर्भावक्रान्ति' अध्याये त्रिविधं सत्वं वर्णितम् । 'शुद्धं राजसं तामसं च इति त्रिविधं सत्वम् अस्ति ।' ( च. शा. ३ )

– तन्मध्ये शुद्धम् – प्रवरम्

राजसम् – मध्यमम्

तामसम् – अवरम्       एवं विषयार्थं ज्ञातुं शक्यते ।

– एतेषां त्रिविधानां सत्वप्रकारानुरुपं त्रिविधा: पुरुषा: सन्ति ।

– एतेषु प्रवरसत्ववती व्यक्ति: सत्वसारा वर्तते ।

– अष्टांगसंग्रहस्य संदर्भ: त्रिविधसत्वविषये उद्धृत: अस्ति । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – तन्त्रकम् इति परिचालकम् । शेषा टीका शब्दार्थ: ।

निष्कर्ष: – तन्त्रकम् इति पदस्य टीकायां पदश: वैधर्म्यं दृश्यते ।

**आहारशक्तित: परीक्षेत** – सूत्रम् १२०

चरक: – आहारशक्ते: परीक्षा अभ्यवहरणशक्त्या तथा जरणशक्त्या च करणीया ।

– आयुर्बले आहारे अवलंबेते । अत: आतुरस्य आहारशक्तित: परीक्षणं करणीयम् ।

चक्रपाणि: – जरणशक्ते: परीक्षणं करणीयम् अस्य अर्थ: व्यक्ति: सेवितम् आहारं सम्यक् पाचयति वा न वा इति परीक्षणीयम् । यत: या व्यक्ति: अधिक मात्रायां आहारं सेवेत परं तद् सम्यक् न

पाचयेत् तर्हि तस्य अभ्यवहरणशक्तिः न उपयोगाय । अतः अभ्यवहरणशक्त्या सह जरणशक्तेः अपि परीक्षा करणीया ।

गंगाधरः – अभ्यवहरणशक्तिः नाम भोजनशक्तिः । परीक्षणात् आयुर्बले अनुमन्तव्ये ।

– यथा – अधिका अभ्यवहरणशक्तिः – अधिके बलायुषी

मध्यमा अभ्यवहरण शक्तिः – मध्ये बलायुषी

अल्पा अभ्यवहरणशक्तिः – अल्पबलायुषी ।

– तस्मात् बलं त्रिविधम् – प्रवरं मध्यमम् अवरम् । आयुः त्रिविधम् – दीर्घ मध्यमं अल्पं च ।

योगीन्द्रनाथ सेनः – अभ्यवहरणशक्तिः इति भोजनशक्तिः । जरणशक्तिः इति परिपाकशक्तिः ।

ज्योतिषचन्द्र सरस्वतिः – अभ्यवहरणशक्तिः इति भोजनशक्तिः । ये अत्याधिकमात्रायां भुञ्जते । तं सम्यक् परिपाचयन्ति तेषाम् आहारशक्तिः उत्तमा अस्ति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**व्यायामशक्तितः परीक्षेत** – सूत्रं १२१

चरकः – कर्म कुर्वाणस्य शक्त्या व्यायामशक्तिः परीक्षणीया ।

– कर्मशक्त्या एव त्रिविधानि बलानि अनुमन्तुं शक्यानि ।

– अतः आतुरस्य व्यायामशक्तितः परीक्षणं करणीयम् ।

चक्रपाणिः – भारवहनादीन्ः कर्म इति उच्यन्ते ।

– एषा कार्यकरणशक्तिः नाम कर्मशक्तिः ।

गंगाधरः – क्रियानिष्पादनव्यापारद्वारा कर्मशक्तिः परीक्षणीया । यथा कर्मशक्तिः प्रवरा मध्यमा अवरा च ईदृशी त्रिविधा भवति तथा त्रिविधं बलमपि अनुमन्तुं शक्यम् ।

योगीन्द्रनाथ सेनः –व्यायामः शरीरायासजननं कर्म ।

– अतः कर्मशक्त्या व्यायामशक्तिः अनुमन्तव्या ।

– त्रिविधा अस्ति एषा कर्मशक्तिः तदनुसारं त्रिविधं बलम् अनुमन्तुं शक्यम् ।

ज्योतिषचन्द्र सरस्वतिः – व्यायामशक्तिः परिश्रमशक्तिः । शेषः अविशेषः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## वयत: परीक्षेत – सूत्रम् १२२

चरक:– आतुर: वयत: परीक्षणीय: । कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वय: इति उच्यते ।

– वय: स्थूलभेदेन त्रिविधम् । बालं मध्यं जीर्णं च ।

| वय: | लक्षणम् | दोषाधिक्यम् | काल: |
|---|---|---|---|
| बालम् | अ) अपरिपक्वधातुम् | श्लेष्मप्रायम् | अषोडशवर्षम् |
| | अजातव्यञ्जनम् | | |
| | सुकुमारम् | | |
| | अक्लेशसहम् | | |
| | असम्पूर्णबलम् | | |
| | आ) विवर्धमानधातुगुणम् | | आत्रिंशदवर्षम् |
| | अनवस्थितसत्वम् | | |
| मध्यम् | समत्वागत बलादिभावा: | पित्तधातुप्रायम् | आषष्ठिवर्षम् |
| | समत्वागतसर्वधातुगुणम् | | |
| | बलस्थितम् | | |
| | अवस्थितसत्वम् | | |
| | अविशीर्यमाणधातुगुणम् | | |
| जीर्णम् | हीयमानधातुइन्द्रियादि | वायुधातुप्रायम् | आवर्षशतम् |
| | भ्रश्यमानधातुगुणम् | | |

– अस्मिन् कलियुगे काले आयुषः प्रमाणं वर्णशतम् अस्ति ।

– सन्ति पुन: अधिकोनवर्षशतजीविन: अपि मनुष्या: ।

– दशविध परीक्ष्यभावत: विकृतित: परीक्ष्यभावं वर्जयित्वा अन्येषां भावानां परीक्षणद्वारा बलविशेषेण आयुष: प्रमाणं लक्षणत: आकलयितव्यम् । तत: तेन वय: त्रिविधं विभाजनीयम् ।

चक्रपाणि: – कालप्रमाणानुसारं भेदयोगेन युक्ता शरीरावस्था वय: इति उच्येत ।

– बालवयः द्विविधावस्थायाः भवति –

अपरिपक्वधातुः – षोडशवर्षाणि ।

वर्धमानधातुः – त्रिंशद् वर्षाणि ।

– आषोडशवर्षस्य बालवयसि अल्पं मृदु च औषधीनाम् उपयोगः करणीयः भवति । तदोत्तरं बालवयसि अल्पमृद्व्योः औषधोः उपचारः माऽस्तु ।

– षष्ठिवर्षवयसोत्तरं क्रमेण धातुहानिः भवति । सहसा धातुबलादिऱ्हासः न भवति ।

– प्रकृतिसारादीनां प्रवरमध्यावरबलविशेषानुसारं प्रवरमध्यावररुपिणः आयुषः प्रमाणं निश्चेतुं शक्यम् । तथा तेन वयः त्रिषु भागेषु विभक्तुं शक्यम् ।

– एतदनुसारं यस्य प्रकृतिबलम् उत्तमम् अस्ति तथा श्लेष्मप्रकृतिः अथवा समप्रकृतिः स्यात् ते दीर्घायुषः सन्ति ।

– हीने प्रकृतिबले अल्पायुः भवति । एवमेव सारादिभावविशेषविषये निश्चेतव्यम् ।

– एव यस्याः प्रकृत्यादयः सर्वे भावाः बलवन्तः स्युः सा व्यक्तिः शताधिकानि वर्षाणि जीवेत ।

– यदि कस्यचित् एतेषां भावविशेषाणां उत्तमबलानुसारं आयुः १२० वर्षाणि स्यात् तर्हि पूर्वोक्त वयोविभाजनस्य अनुमानानुसारं तस्याः व्यक्तेः

३६ वर्षपर्यंतम् – बालवयः ।

७२ वर्षपर्यंतम् – मध्यवयः ।

तदनन्तरम् १२० वर्षपर्यंतम् – वृद्धवयः ईदृशं वयविभाजनं स्यात् ।

– यदि प्रकृत्यादीनां भावविशेषाणां मध्यबलं स्यात् तेन तस्य अनुमानेन ८० वर्षानां आयुः यदि निर्धारिता तर्हि तस्याः व्यक्तेः

२५ वर्षपर्यंतम् – बालवयः

५० वर्षपर्यंतम् – मध्यवयः

तदग्रे ८० वर्षपर्यंतम् – वृद्धवयः । ईदृशं वयविभाजनं स्यात् ।

– केवलं प्रकृत्यादीनां भावानां बलाबलत्वानुसारम् आयुर्मर्यादा निश्चितव्या । प्रत्युत शारीरस्थाने वर्णितं शरीरं प्रतिबद्धानां आयुर्लक्षणानां अपि अस्मिन् विषये विचारः करणीयः ।

– आयुर्लक्षणै: अपि वयविभाजनस्य मर्यादा निश्चितुं शक्या।

– येषां परमायु: (विंशति) २० वर्षाणि इत्यादीनि अस्ति तेषां वयविभाजनमर्यादा निश्चेतुं न आवश्यकी । यत: ते मध्यमावस्थां अप्राप्य एव मरणं गच्छन्ति ।

गङ्गाधर: –'कालप्रमाणापेक्षिणी ' इति पदेन वयस: निर्धारणं शरीरावस्थया सह एव आतुरावस्थया अपि कर्तुं शक्यते इति दर्शितम् । बालवय: द्विविधं अस्ति ।

– अजातव्यञ्जनं इत्यस्य अर्थ: जन्मोत्तरकाले भव्यानि श्मश्रु इत्यादीनि लक्षणानि अस्मिन् बालवयसिन उत्पन्नानि । सुकुमारं सुष्ठुकौमार्यशालि ।

– १६ त: ३० वर्षाणि एषा बालवयस: द्वितीया अवस्था अस्ति । अस्मिन् धातुगुणा: विवर्धमाना: सन्ति । तथा सत्वम् अनवस्थितं (चञ्चलम्) अस्ति । एतां अवस्थामेव तरुणवय: अथवा यौवनमिति उच्यते ।

– एकत: षोडशवर्षपर्यन्तं वय: श्लेष्मधातुप्रायम् अस्ति । प्रत्युत १६ त: ३० वर्षपर्यन्तं वय: न श्लेष्मप्रायं न पित्तप्रायमिति मध्यमावस्थाया: भवति ।

– तरुणवयसि विवर्धमाना: धातुगुणा: तां अवस्थां त्यक्त्वा स्थिरीभवन्ति । एतद् मध्यवयस्थं 'समत्वागतंधातुगुणम्' इति उच्यते ।

– ग्रहणं अर्थत: ग्रहणम् । इन्द्रियविषयाणां ग्रहणम् उत्तमतया भवति एतद् मध्यवयस: प्राकृतं लक्षणम् अस्ति ।

– धारणं शब्दत: ग्रहणम् ।

– बलस्थितं इत्यस्य अर्थ: शारीरमानसिके बले स्थिरे स्त: । न तयो: ऱ्हास: भवति ।

– अविशीर्यमाणधातुगुणं इत्यस्य अर्थ: धातुगुणानां क्षय: न भवति ।

– अस्मिन् कल्पे कलियुगे सामान्यत: १०० वर्षाणि आयु: अस्ति । इति श्रुति: अपि प्रतिपादयति यथा – ''शतायुर्वैपुरुषा: शतायुषा पुत्रपौत्रान् वृणीष्व ।'' (श्रुति:)

– चरकाधिष्ठे काले १०० वर्षाधिकम् आयुर्मानं सन्त: जना: अपि आसन् । चरकस्य प्रत्यक्षं दृष्टप्रमाणात् एतद् ज्ञायते । अस्य विस्तृतं व्याख्यानं सद्वृत्तस्य फलस्य टीकायां कृतम् ।

योगीन्द्रनाथ सेन: – वय: परीक्षायां प्रथमं वयसः स्वरुपं वर्णितम् ।

– अनवस्थितं अस्यार्थः अस्थिरमिति । समत्वागतं नाम समत्वं प्राप्तम् ।

– सुश्रुतेन वर्णितं वयोविभाजनं तथा लक्षणानि उल्लेखितानि ।

– चरकेण त्रिंशतवर्षपर्यन्तं बाल्यावस्था कथिता प्रत्युत सुश्रुतेन १६ वर्षपर्यन्तं कथिता । अस्य मतवैधर्म्यस्य निर्णयः अधोक्तवत् करणीयः ।

– सुश्रुतेन दोषाणां चयकालानुसारं वयोविभागः कृतः ।

– चरकेण धातुनां वृद्धिसाम्यक्षयानुरुपं वयोविभागः कृताः । एवं अनयोः मतयोः विरोधः नास्ति ।

ज्योतिषचन्द्र सरस्वतिः – कालप्रमाणभेदेन या पृथक् शरीरावस्था भवति तं पण्डिताः 'वयः' इति वदन्ति । शेषा टीका अविशेषा ।

निष्कर्षः – वैधर्म्यं नास्ति ।

**देशतः परीक्षायाः उपसंहारः** – सूत्रे १२३ – १२४

चरकः – विकृतितः परीक्षणं विहाय अन्येषां प्रकृतितः इत्यादीनां भावानां परीक्षणेन आतुरस्य प्रवरमध्यावराणि इति त्रिविधबलविशेषाः विभाजनीयाः ।

– विकृतितः परीक्षणेन विकृतेः त्रिविधैः बलैः त्रिविधाः दोषबलाः अनुमन्तव्याः ।

– अनन्तरं ओषधस्य तीक्ष्णमृदुमध्यप्रकारानुसारं यथा दोषं ओषधं योजनीयम् । एवं बलदोषप्रभावज्ञानं प्राप्तव्यम् ।

– आयुषः प्रमाणज्ञानस्य लक्षणात्मकं वर्णनं इन्द्रियस्थानमध्ये जातिसूत्रीयशरीरस्थानमध्ये च कृतम्

चक्रपाणिः – अविशेषा टीका

गङ्गाधरः – विकृतेः परीक्षणेन स्वाभाविकस्य आयुषः प्रमाणं निश्चेतुम् अशक्यम् । परं अरिष्टैः लक्षणैः असाध्यावस्थायाः तथा च आयुषः उर्वरितमानं निश्चेतुं शक्यते । अतः विकृतिपरीक्षणं विहाय अन्येषां परीक्षणानां प्रवरावरमध्यबलविशेषैः त्रिविधानि बलानि अनुमीयन्ते ।

– एवं बलप्रमाणविज्ञानार्थं वयसः परीक्षणं कर्तुं शक्यम् ।

– धातुवैषम्यनिमित्तेन ज्वरादीनां विकाराणां त्रिविधैः बलैः तद् विकारगतानां दोषाणां बलस्य त्रैविध्यं अनुमानुं शक्यते । दोषाणां त्रिविधबलानां ज्ञानेन ओषधानां त्रिविधबलानां निर्णयं कृत्वा यथा दोषं ओषधस्य उपयोजनं कर्तुं शक्यते । एवं दोषप्रमाणज्ञानार्थं वयसः परीक्षणं कर्तुं शक्यम् ।

योगीन्द्रनाथ सेन:– आतुरपरीक्षाया: प्रयोजनम् ।

अ) आयुष: प्रमाणज्ञानम् ।

आ) बलस्य दोषाणां च प्रमाणज्ञानम् । इति द्विविधम् अस्ति ।

– तन्मध्ये बलदोषप्रमाणज्ञानार्थं प्रकृत्यादय: दश भावा: वर्णिता: सन्ति ।

– अस्मिन् विकृतित: भावै: विना अन्येषां भावानां परीक्षणात् त्रिविधानां बलानां निश्चिति: शक्या ।

– विकृते: त्रिविधबलानुरुपं दोषाणां त्रिविधानि बलानि ज्ञातव्यानि ।

– अग्रिमे सूत्रे भैषज्योपयोगे बलदोषप्रमाणविशेषान् कथयित्वा तया अपेक्षया भैषज्यस्य उपयोग: कथं करणीय: इत्यस्य वर्णनम् आगतम् । शेषा टीका शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:– आतुरबलं दोषबलं च निर्धार्य यथादोषं यथाबलं तीक्ष्णमध्यमृदुविभागेन औषधयोजना करणीया ।

– अत्र वर्णनम् एवमस्ति यत् आयु: प्रमाणज्ञानस्य लक्षणानां वर्णनं इन्द्रियस्थानगते शारीरस्थानगते च जातिसूत्रीये अध्याये कृतम् । केवलं अस्याम् चरकसंहितायाम् इन्द्रियस्थाने एवं दीर्घायुषः वा अल्पायुषः लक्षणानि इति स्पष्टं वर्णनं न दृश्यते ।

– इन्द्रियाणि स्वरा: वर्णानिच इत्यादीनां घटकानां विकृते: वर्णनात् रिष्टरुपेण ऱ्हसितायुष: ज्ञानं कारयितव्यम् ।

– केवलं अग्निवेशस्य सहाध्यायिन: भेलनस्य संहितायां इन्द्रियस्थाने प्रथमे अध्याये एकमासत: शतवर्षपर्यंन्तं पृथक् पृथक् आयु: प्रमाणस्य लक्षणानि वर्णितानि ।

– एतस्मात् एवम् अनुमानं आवश्यकं करणीयं यत् अग्निवेशतन्त्रे अपि अस्य विषयस्य वर्णनस्य कोऽपि अध्याय: स्यात् । परं कालवशात् स: लुप्त: स्यात् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**कालत: परीक्षा** – सूत्राणि १२५ – १२८

चरक: –

काल: – अ) संवत्सराणि – सूत्राणि १२३–१२७

आ) आतुरावस्था – सूत्रम् १२८

अ) संवत्सरकाल: – सूत्राणि १२५–१२७

– एष: काल: द्विध: त्रिध: षोढा द्वादध: एवं विभिन्नानां प्रकाराणां भवति । अस्मिन् अध्याये तस्मात् षोढा विभाजनं कृत्वा कालस्य वर्णनं कृतम् ।

हेमन्त: – शीतलक्षण:

ग्रीष्म: – उष्णलक्षण:

वर्षा – वर्षलक्षण:

– अस्मिन् त्रिषु ऋतुषु आगच्छन्त: अन्ये त्रय: ऋतव: प्रावृट् शरद् वसन्त: एते साधारणलक्षणानां सन्ति ।

– प्रावृट् इति प्रथम: प्रवृष्ट: काल: । तस्य अनुबन्ध: हि वर्षा ।

– एवं संशोधनकर्मण: अधिकरणेन ऋतुनां षोढा विभाजनं कृतम् ।

चक्रपाणि: – आतुरपरीक्षणार्थं कालपरीक्षा वर्णिता अस्ति ।

| | | | |
|---|---|---|---|
| – संवत्सर भेद: – | अयनभेदेन | – | द्विविध: । |
| | शीतोष्णवर्षभेदेन | – | त्रिविध: । |
| | ऋतुभेदेन | – | षड्विध: । |
| | मासभेदाने | – | द्वादशविध: । |
| | पक्षभेदेन | – | चतुर्विंशतिविध: । |
| | प्रहरादिभेदेन | – | अनेकविध: । |

– साधारणम् इति अनतिशीतोष्णवर्ष: । प्रथमप्रवृष्टम् शब्देन आषाढश्रावणमासयो: अभिप्रेतार्थ: ।

– एतदग्रे द्वयो: द्वयो: मासस्य उर्वरितानां ऋतूनां विचार: करणीय: ।

एष: ऋतुक्रम: रसोत्पत्ति इत्यादिषु न गण्यते प्रत्युत शोधनकर्मण: प्रारम्भाय एष: ऋतुक्रम: वर्णित: ।

– सिद्धिस्थानस्य षष्ठः अध्यायस्था: संदर्भा: –

| | | |
|---|---|---|
| शक्र: (आषाढ ) नभ: (श्रावण:) | – | प्रावृट् |
| उर्ज: ( आश्विन ) सह: ( कार्तिक: ) | – | शरद् |
| तपस्य: ( फाल्गुन ) मधु (चैत्र: ) | – | वसन्त: |

– एते ऋतवः संशोधनाय योग्याः सन्ति । अस्मिन् उपरोक्ते ऋतुक्रमे शिशिरऋतुः न उल्लिखितः । किम् अस्य कारणम् ? गङ्गायाः दक्षिणकूले वर्षा बहु भवति तेन तत्र प्रावृडादिक्रमः । गङ्गोत्तरकूले शीतं बहु भवति तेन तत्र हेमन्तशिशिरौ भवतः ।




– काश्यपेन अपि उपरोक्तं वर्णनम् अनुमोदमानः संदर्भः कथितः । परं काश्यपोक्तः क्रमः देशभेदात् अस्ति । अत्र संशोधनभेदात् वर्णनं अभिप्रेतं अस्ति ।तेन एषः काश्यपोक्तः क्रमः न अत्र अभिमतः।

गंगाधरः – चकारः एषः समुच्चयः इत्यर्थेन योजितः ।

– संवत्सरस्य द्वौ प्रकारौ अयनभेदेन उत्तरायणं दक्षिणायनम् इति भवतः । केवलं तयोः प्रयोजनं अस्मिन् कालपरीक्षा इति अधिकरणे नास्ति । अतः न तेषाम् अत्र वर्णनं कृतम् । अयनभेदेन कालविचारः तस्याशितीय अध्याये (सूत्रस्थाने षष्ठः अध्यायः) कृतः ।

– हेमन्तादयः त्रयः योगारुढस्वरुपात्मकाः यौगिकाः सन्ति । तस्याशितीये अध्याये कालस्य विस्तृतं वर्णनमस्ति । तेषां विभजनेन परीक्षणार्थं वर्णनम् अत्र अस्ति ।

साधारणाः लक्षणात्मकाः ऋतवः –

हेमन्तग्रीष्मवर्षासु अन्ये त्रयः ऋतवः ते साधारणलक्षणानाम् सन्ति ।

मन्दशीतलक्षणः – शरद् ।

मन्दोष्णलक्षणः – वसन्तः ।

मन्दवर्षालक्षणा – प्रावृट् ।

एतेषां त्रयाणां ऋतूनां प्रतिलोमतन्त्रयुक्त्या वर्णनं कृतम् । तेन

कार्तिकादयो चत्वारो मासाः – हेमन्तः – शीतलक्षणाः ।

फाल्गुनादयो चत्वारो मासाः – ग्रीष्मः – उष्णलक्षणाः ।

आषाढादयो चत्वारो मासाः – वर्षा – वर्षालक्षणाः ।

– प्रावृट् – प्राक् वृट वृष्टे: काल इति । पृषोदरादित्वात् प्रावृट् इत्यभिप्रायेण आह प्रथम इति । अथवा – प्र: प्रकृष्टो वृष्टे काल: इति पृषोदरादित्वात् आकारागमेऽपि प्रावृट् इत्यभिप्रायेण आह प्रवृष्टे: काल: इति ।

– तस्य प्रवृष्टे: कालस्य अनुबन्ध: अनुरुपेण बन्ध: वर्षा इति ।

– एषा प्रावृट् नातिशीत नात्युष्णरुपेण साधारणलक्षणानाम् ऋतु अस्ति ।

– सूत्रस्थानस्य षष्ठे तस्याशितीये अध्याये शिशिरऋतु: उल्लिखित: अस्ति । हेमन्तशिशिरवसन्तग्रीष्मवर्षाशरद् एवं ऋतुक्रम: अस्ति ।प्रत्युत अस्मिन् अध्याये शिशिरं न उल्लिख्य प्रावृट् उल्लिखित: ।

शरद – हेमन्त – वसन्त – ग्रीष्म – प्रावृट् – वर्षा ईदृश: क्रम: अस्ति । किमर्थम् एवम् ?

प्रत्युत अस्मिन् अध्याये संशोधनकर्मानुरुपं प्रावृटादि: क्रम: अस्ति । तथा तस्याशितीये अध्याये चर्यानुरुपेण शिशिरादि: क्रम: अस्ति ।

<u>योगीन्द्रनाथ सेन:</u> – प्रकर्षेण वृष्टि: प्रवृष्टि: । तस्या प्रथम: काल: प्रारम्भ: प्रावृट् । तस्या अनुबन्ध: वर्षा । वर्षणकालस्य प्रथमो भाग: प्रावृट् इति विकल्प्यते । अन्त्य: भाग: च वर्षा ।

– शेषा टीका चक्रपाणे: गंगाधरस्य च समाना वर्णनात्मका ।

<u>ज्योतिषचन्द्र सरस्वति:</u> – शब्दार्थ: टीका ।

<u>निष्कर्ष:</u> – वैधर्म्यं नास्ति ।

<u>सूत्रम् १२६ चरक:</u> –

– एतेभ्य: षड् ऋतुभ्य: त्रिषु साधारणऋतुषु वमनादिशोधनकर्मणा प्रवृत्ति: करणीया । अन्येषु त्रिषु ऋतुषु शोधनकर्माणि मा कुर्यात् । यत: साधारणा: ऋतव: मन्दशीतोष्णवर्षलक्षणात्मका: सन्ति । तेन वमनादिकर्मभ्य: सुखतमा: सन्ति ।

– तथैव शरीरे शोधनकर्म ओषधिप्रयोगं च कर्तुं उपद्रवरहिता: सन्ति ।

– अन्ये त्रय: ऋतव: वर्षाहेमन्त: ग्रीष्म: च अतीव शीतोष्णवर्षालक्षणात्मका: सन्ति तेन शोधनकर्मभ्य: दु:खतमा: । तथा च अस्मिन् काले ओषधिप्रयोगं कर्तुं उपद्रवयुक्ता: सन्ति ।

चक्रपाणि: – ओषधय: अविकल्पा: सन्ति इत्यर्थ: शरीरे कृत्रिमगुणापादानभेदका: न सन्ति । तथैव तस्य प्रमाणस्य उत्कर्षापकर्षस्वरुपात्मका: भेदकारका: न सन्ति ।

गङ्गाधर: – अयनादिनावधिनुसारं ऋतुमाससम्बन्ध:

सह + सहस्य: – हेमन्त:

तप: + तपस्य: – शिशिर:

मधु + माधव: – वसन्त:

शुक्र + शुचि: – ग्रीष्म:

नभ + नभस्य – वर्षा

अश्वयुक् + कार्तिक: – शरत्

– 'मन्दम्' इति पदम् अल्पम् इति अर्थेन योजितम् ।

– शरीराणाम् अविकल्पका: – भावान्तराकल्पका:

औषधानाम् अविकल्पका: –गुणान्तराकल्पका: ।

– पौषमाघात्मक: हेमन्त: अत्यर्थशीलत्वात् दु:खतम: ।

वैशाखजेष्ठरुपो ग्रीष्म: अत्यर्थोष्णत्वात् दु:खतम: ।

भाद्राश्विनरुपो वर्षा अतिवर्षत्वात् दु:खतमा । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: – अविकल्पका: अव्यापादका: । शेषा टीका शब्दार्था ।

ज्योतिषचन्द्र सरस्वति: – अविकल्पका: विकृतिरहिता: ।

– औषधस्य अविकल्पका: – अयोगातियोगरहिता:

शरीरस्य अविकल्पका: – अपरिवर्तनशीलता ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

सूत्र – १२७ अस्मिन् सूत्रे चतुर्षु उपअधिकरणे वर्णनमस्ति ।

१) हेमन्तगता संशोधनस्य अकर्तव्यता । २) वर्षागता संशोधनस्य अकर्तव्यता ।

३) ग्रीष्मगता संशोधनस्य अकर्तव्यता । ४) आत्ययिकअवस्थायां संशोधनार्थ: नियम: ।

१) हेमन्तगता संशोधनस्य अकर्तव्यता ।

चरक: – हेमन्तऋतौ शरीरं अतिशीतोपहतत्वात् दु:खरुपं भूतमस्ति । अतिशीतेन वायुना दोषा: अवबद्धा: जाता: अस्मिन् समये उष्णगुणात्मकं ओषधं यदि शोधनार्थं दत्तं तर्हि अतिशीतगुणत्वात् ओषधं हतवीर्यं भूत्वा मन्दायते । अतिशीतगुणयुक्तं शरीरं मन्दवीर्यऔषधानां संयोगत्वात् च शोधनस्य अयोग: भवति तथा च शरीरे वातोपद्रवा: उत्पद्यते ।

चक्रपाणि: – अविशेष: ।

गङ्गाधर: – हेमन्त: शरीरौषधानां दु:खतम: विकल्पक: च भवति अस्य वर्णनमस्ति ।

– दारुणीभूतम् इति अतिरौक्ष्यकर्कशादिमत्तया कठिनीभूतम् । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – दारुणीभूतम् इति बहुगुरुदोषम् ।

– अवरुद्धदोषम् इति अतिस्तब्धदोषम् । शेष: शब्दार्थ:

ज्योतिषचन्द्र सरस्वति: – दारुणीभूतम् इति अशिथिलीभूतम् ।

– अवबद्धदोषम् इति स्त्रोत:सु अतिसंश्लिष्टदोषं शरीरं भवति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

२) ग्रीष्मगता संशोधनस्य अकर्तव्यता –

चरक: – ग्रीष्मे अतीव उष्णत्वात् शरीरं दु:खयुक्तं भवति । उष्णवायु: तीक्ष्णातप: च आभ्यां शरीरस्या: दोषा: अतिशिथिलीभूत्वा प्रविलीना: भवन्ति । एवं उष्णगुणस्य संशोधनभेषजं एतस्मिन् काले दत्तेन उष्णता अनुगामित्वात् अतीव तीक्ष्णा भवति । एवं प्रकारस्य शरीरौषधयो: संयोगेन शोधनस्य अतियोग: भवति । शरीरे पिपासास्वरुपी उपद्रव: उत्पद्यते ।

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – शब्दार्थ: ।

योगीन्द्रनाथ सेन: – शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – संशोधनस्य अतियोगात् शरीरस्थानां जलीयधातूनां क्षय: भवति तेन पिपासाधिक्यं भवति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

३) वर्षाऋतुगता संशोधनस्य अकर्तव्यता ।

चरक: – वर्षाऋतौ मेघजलाभ्यां सूर्यचंद्रतारका: अवगूहन्ति । आकाशं पर्जन्यधाराभि: व्याप्नोति । भूमि: जलपंकाभ्याम् आवृता भवति । एतादृशे काले सर्वेषां प्राणिमात्राणां शरीरेषु क्लिन्नता वर्धते ।

– एभि: कारणै: विहतै: (निवीर्यै:) सर्वै: औषधै: जलमेघवायूनां संसर्गात् गुरुप्रवृत्तानि वमनादीनि कर्माणि भवन्ति तथा शरीरे गुरुगुणेन उत्पन्ना: विकारा: उत्पद्यन्ते ।

चक्रपाणिः – अत्यधिकेन गुरूगुणेन यथा दुःखकराणि लक्षणानि उत्पद्वन्ते तद्वत् अस्मिन् कालगर्तेः औषधैः एतादृशाः उपद्रवाः उत्पद्यन्ते ।

– गुरुगुणानां शोधनकर्मेण क्लेशयुक्तं शरीरं अतीव प्रयासै: प्राकृतं भावं प्राप्नोति ।

गंगाधर: – गुरुप्रवृत्तं वमनादि: अस्य अर्थ: वमनादिना शोधनकर्मेण शरीरे अपेक्षितं लाघवत्वं न उत्पद्यते । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – शोधनाय अयोग: उत्पद्यते ।

ज्योतिषचन्द्र सरस्वति: – अविशेष:

निष्कर्ष: – वैधर्म्यं नास्ति

४) आत्यायिकावस्थायां संशोधनार्थं नियम: ।

चरक: – विना आत्यायिकां स्थितिं हेमन्तग्रीष्मवर्षाऋतुषु संशोधनं न कुर्यात् । यदि आत्यायिका अवस्था आगता चेत् यद् शोधनं करणीयं तस्य अनुकूलऋतुनुसारं शरीरे कृत्रिमेणागुणोपधानेन तथैव तस्य ऋतो: विपरीतानां गुणानाम् औषधिसंयोग: संस्कार: प्रमाणं च एतेषां विकल्पेन तस्या: औषध्य: योग्य: उपयोग: करणीय: ।

चक्रपाणि: – विकल्प: इत्यस्य अर्थ: औषधाय अल्पगुणयुक्तकरणम् ।

– कृत्रिमगुणोपधानम् – शीते काले शीतगुणस्य प्रतिकारार्थं उष्णसदनादीनि नियोजतव्यानि ।

– शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम्
कृत्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् । (सु.सू.३५)

– भेषजप्रतीकार: – अ) संयोगविकल्प: –

यथा शीते काले तद् प्रतिकारार्थं अधिकायां मात्रायां त्रिवृत्म् उष्णे गोभूत्रे मिश्रयित्वा दातव्यम् ।

ब) प्रमाणविकल्प: – अयोगस्य प्रतीकारार्थं अतिमात्रायां त्रिवृत्तम् दातव्यम् ।

– संयोगविकल्पौ एवं करणीयौ येन विरूद्धवीर्यस्य भेषजस्य मेलनं न भूयात् । तथा प्रमाणविकल्पः एवं करणीयः येन प्राणविरोध न भूयात् ।

गंगाधरः – शब्दार्थः टीका न विशेषं वर्णनम् ।

योगीन्द्रनाथ सेन: – कृत्रिमगुणोपधानं यथा हेमन्ते गर्भगृहादि । ग्रीष्मे धारागृहादि ।

शेषः शब्दार्थः

ज्योतिषचन्द्र सरस्वति: – यदा आत्यायिकी अवस्था स्यात् तदा आवश्यकं कर्म ऋतुं अविचार्य करणीयम् । अन्यथा जीवितनाश: सम्भवेत् । उदा. विषपीत: इत्यादि ।

– इदं कर्म कुर्वता कृत्रिमेन गुणोपधानेन यथेष्टं ऋतुं निर्मीय यथासम्भवं ऋतुगुणाः उत्पादयितव्य: ।

– सुश्रुतस्य अग्रिमं सूत्रं वर्णितम् ।

' शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् । कृत्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ।।

– तथैव संयोगसंस्कारादिभि: कालस्वभावेन च भेषजस्थं मृदुवीर्यं तीक्ष्णं करणीयम् अथवा तीक्ष्णं मृदु करणीयम् पश्चात् सावधानतया उपयोजितव्यम् ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## आतुरावस्था स्वरूपतः कालः – सूत्रम् १२८

चरकः – व्यक्तेः आतुरावस्थानुसारं अपि कार्यं (चिकित्साकरणम्) तथा अकार्यं (चिकित्सा न करणम्) एतयोः संदर्भे कालः अकालः च इति संज्ञे योजिते स्तः । उदा. एतस्यां एतस्यां अवस्थायाम् इदम् औषधं दापनस्य कालः तथा इदम् औषधं न दापनस्य कालः ।

तस्य परीक्षा – पुनः पुनः आतुरस्य सर्वेषाम् अवस्थाविशेषाणाम् अवेक्षणं कृत्वा यथायोग्यं औषधं योजनीयम् । औषधं दापनस्य काले अतीते (अतीतकालं) तथा औषध दापनस्य काले न सति (अप्राप्तकालं) दत्तम् औषधं यौगिकं न भवति । यथोचित प्रयोगकालात् औषधपचनानंतरम् औषधाय सुखकरः परिणामः उत्पद्यते ।

चक्रपाणि: – उदाहरणम् – नवज्वरे कषायकाल: नास्ति । ( इत्यर्थ: नवज्वरे कषायं न दद्यात् ) । प्रत्युत षड् दिवसानन्तरं कषायकाल: भवति ।

– योग्यकाले औषधं दापनेन साध्यस्य रोगस्य चिकित्सा सफला भवति ।

गंगाधर: – आतुराणाम् अवस्था एष: अपि काल: अस्ति । तदनुषंगेन कालपरीक्षा वर्णिता अस्ति ।

योगीन्द्रनाथ सेन: – कालपेक्षया उपयुज्यमानं हि भेषजं यौगिकं भवति । पर्याप्तिम् इति सिद्धिम् ।

ज्योतिषचन्द्र सरस्वति: – अविशेषा टीका

निष्कर्ष: – वैधर्म्यं नास्ति ।

## प्रवृत्तिपरीक्षा – सूत्रम् १२९

चरक: – प्रवृत्ति: तु प्रतिकर्मसमारम्भ: ।

– प्रतिव्याधिं तदनुसारं चिकित्साकर्मण: प्रारम्भकरणं नाम प्रवृत्ति: इति ।

– तस्याः लक्षणम् – वैद्य:, औषधं , रुग्ण: परिचारक: एतेषां क्रियासमायोग: ।

चक्रपाणि: – प्रतिकर्म नाम चिकित्सा ।

गंगाधर: – प्रतिकर्म नाम व्याधिप्रतिकारस्य लङ्घनादय: उपक्रमा: ।

– समारम्भ: नाम वाङ्मन: शरीराणां सम्यक् प्रवृत्ति: । शेषा टीका शब्दार्थ:

योगीन्द्रनाथ सेन: – प्रतिकर्म इति चिकित्सा ।

ज्योतिषचन्द्र सरस्वति: – प्रतिकर्म समारम्भ: नाम चिकित्साया: उद्योग: ।

– चतुष्पदां एकत्रक्रियाणां मेलनम् इति तस्य लक्षणम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## उपाय परीक्षा – सूत्रम् १३०

चरक: – उपाय: नाम भिषकादीनां चतुष्पदां सौष्ठवं सम्यक् अभिविधानं च । तस्य लक्षणम् –

– षोडशकलानाम् यथोक्तगुणसंपत् । देश: काल: प्रमाणं सात्म्यं क्रिया च इत्यादीनां सिद्धिकारणै: सम्यक् निर्मितानाम् औषधानां प्रयोग: ।

चक्रपाणि: – सौष्ठवं नाम यथोक्तगुणसंपत् इति ।

गंगाधर: – सम्यक् उपपादिनम् इत्यस्य अर्थ: योग्यरीत्या उपकल्पनां कृत्वा तस्य उपयोगं करोति शेषा टीका शब्दार्थ: ।

योगीन्द्रनाथ सेन: – सौष्ठवं इति यथोक्तगुणवत्ता ।

– सम्यक् अभिसन्धानं इति देशकालादिना अपेक्षया समायोग: । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति:– सौष्ठवं इत्यस्य अर्थ: खुड्डाकचतुष्पादे अध्याये वर्णित: षोडशगुणयुक्त: ।

– अभिसन्धानं इति यथावत् प्रयोग: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

प्रकरणस्य उपसंहार: – सूत्रम् १३१

चरक: – एवं दशपरीक्ष्यविशेषाणां पृथक् पृथक् परीक्षा वर्णिता ।

चक्रपाणि: – अत्र वर्णितानां परीक्ष्यविशेषाणां योग्यं परीक्षणं कर्तव्यम् ।

गंगाधर: – क: च अत्र परीक्ष्यविशेष: तथा कथं च परीक्षितव्यम् इति प्रश्नद्वयस्य उत्तरार्थं प्रकरणं कृत्वा व्याख्यायते ।

– के प्रश्नविशेषा: सन्ति तथा कथं परीक्षणीया: इत्यस्य वर्णनम् अस्मिन् उपप्रकरणे कृतम् ।

– करणादिरुपाणां भिषगादीनां दश परीक्ष्यविशेषाणां वर्णनम् ।

योगीन्द्रनाथ सेन:– शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थ: ।

निष्कर्षं: – वैधर्म्यं नास्ति ।

अधिकरणं चतुर्थम् – पञ्चम: प्रश्न: – किं प्रयोजना परीक्षा ?

चरक: – परीक्षाणां प्रयोजनं प्रतिपत्तिज्ञानं इदमस्ति ।

– रोगज्ञानं यथा वर्णितं तद् ज्ञात्वा रोगविशेषानुसारं वर्णिताया: चिकित्सया अनुष्ठानं नाम प्रतिपत्ति:

चक्रपाणि: – प्रतिपत्तव्यं नाम कार्यकरणस्य विधिना कार्यं सम्पादनार्थं योग्यम् ।

गंगाधर: – प्रतिपद्यते अनेन इति प्रतिपत्ति: शास्त्रम् ।

– य: विकार: यथा शास्त्रानुसारं वा प्रत्यक्षानुमानानुसारं वर्णित: अस्ति तस्य रोगस्य तदनुसारं अनुष्ठानस्य (उपक्रमादे: चिकित्साया:) आचरणस्य ज्ञानं यथा वर्णितं स्यात् तम् अनुष्ठानज्ञानरुपिणं शास्त्रं वदन्ति ।

– तस्य शास्त्रज्ञानस्य प्रयोजनस्य उदाहरणम् – यदि संशोधनकाले कारणादीनां ज्ञानस्य उपयोग: न अभविष्यन् तर्हि कथं करणीयं संशोधनम् ?

– अत: कारणादीनां परिपूर्णा ज्ञानप्राप्ति: इति परीक्षाणां प्रयोजनम् अस्ति । अत: अस्य आयुर्वेदस्य अधिकरणे परीक्षाभि: विकारस्य परिपूर्णा ज्ञानप्राप्ति: विकारस्य अनुष्ठानस्य परिपूर्णं ज्ञानं प्राप्तं करणीयम् एतद् महत्वपूर्णम् अस्ति ।

योगीन्द्रनाथ सेन: – शब्दार्थ: टीका

ज्योतिषचन्द्र सरस्वति: – प्रतिपत्तिज्ञानं विकाराणां क्रियाक्रमज्ञानम् ।

'केन क्रमेण का क्रिया (उपक्रम:) करणीया अस्य अनुष्ठानस्य ज्ञानम्' इति प्रतिपत्ति: पदस्य अर्थ:

– भिषगादीनां परीक्षाणां परीक्षणं विना अनुष्ठानज्ञानं प्राप्तुं न शक्यम् अत: परीक्षाणां प्रयोजनं विकाराणां अनुष्ठानज्ञानरुपि प्रतिपत्तिज्ञानम् इदमस्ति ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**षष्ठ: सप्तम: च प्रश्न: ।**

**क्व वमनादीनां प्रवृत्ति:? तथा क्व वमनादीनां निवृत्ति: च ?**

चरक: – अस्य प्रश्नस्य उत्तरम् अत्र अदत्वा सिद्धिस्थाने कृतमस्ति । (अनागतावेक्षणतन्त्रयुक्ति:)

चक्रपाणि: – अविशेष: ।

गंगाधर: – शब्दार्थ: ।

योगीन्द्रनाथ सेन: –अस्य पूर्वं संवत्सरात्मके काले वमनादीनां प्रवृत्ति: निवृत्ति: च वर्णिता अस्ति ।

– अत्र आतुर्यलक्षणे अतिदेशेन अस्य विषयस्य उल्लेख: कृत: । ये रुग्णा: वमनादीन् उपक्रमान् योग्या: वा अयोग्या: सन्ति तेषां विस्तृतं वर्णनं पञ्चकर्मीयसिद्धि: इति सिद्धिस्थानस्य द्वितीये अध्याये वर्णितम् अस्ति ।

ज्योतिषचन्द्र सरस्वति: – शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**अष्टम् प्रश्न: । किं प्रवृत्तिनिवृत्तिलक्षणसंयोगे नैष्ठिकम् ?** सूत्रम् १३४

चरक: – प्रवृत्ति: (कर्मारम्भ:) निवृत्ति: (कर्मनिषेध:) च एतयो: संयोगस्य अवस्था यस्मिन् रोगे युगपद् उत्पद्यते तदा रोगदोषयो: गुरुलाघवत्वस्य (प्राबल्यं दौर्बल्यं च) सम्यक् विचारं कृत्वा एकस्य कार्यस्य प्रवृत्ति: अन्यस्य च निवृत्ति: करणीया ।

– शास्त्रे उत्सर्गः (कार्यनिषेधः) तथा अपवादः (कार्यविधिः) एतयोः रुपेण चिकित्सायाः अनुषंगेन व्याधीनां निर्देशः कृतः ।

– अतः रोगदोषयोः गुरुलाघवत्वं दृष्ट्वा चिकित्सायाः योग्यः निश्चयः (अध्यवसायः) करणीयः भवति

चक्रपाणिः – अन्यतरनिष्ठायाम् इति पदस्य अर्थः एकपक्षविषयकस्य निर्णयस्य व्यवस्था करणीया ।

– रोगदोषयोः गुरुलाघवत्वस्य निश्चयः अभविष्यत् तदा गुरुव्याधेः गुरुदोषस्य च प्रतिक्रिया साक्षात् न वर्णिता अपि तस्याः ज्ञानं कर्तुं शक्य भवति ।

– एवं शास्त्रकारैः गुरुव्याधेः प्रतिकारस्य निश्चयः साक्षात् न कृता तथापि ज्ञातुं शक्यते ।

– दुर्बलान् उपद्रवान् विहाय बलवतां उपद्रवाणां बलवत्याः चिकित्सायाः उपदेशः कर्तुं शक्यते ।

गंगाधरः – एकस्मिन् एव पुरुषे वमनादिभिः साध्नुवतः व्याधितोपक्रमस्य प्रवृत्तिः तथा अन्येषु वमनादिषु अनर्ह व्याधिषु उपक्रमस्य निवृत्तिः ईदृशी अवस्था यदि चेत् तर्हि प्रवृत्तिनिवृत्त्योः गुरुलाघवत्वं दृष्ट्वा पश्चात् उपक्रमस्य निश्चयः करणीयः ।

– प्रवृत्तिनिवृत्त्योः गुरुलाघवत्वं नाम प्रवृत्तिलक्षणानां गौरवं वा लाघवं वा अस्ति उत निवृत्तिलक्षणानां गौरवं वा लाघवं वा अस्ति अस्य निश्चयं करणम् ।

– तदनन्तरं एकस्य गुरुलक्षणं निश्चित्य योग्येन प्रकारेण लघुलक्षणादीनां प्रवृत्तिः त्याज्या । अपि च गुरुलक्षणादीनां निवृत्तिः अवधारणीया ।

– उत्सर्गः त्यागः । अपवादः उपादनः । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेनः – गङ्गाधरस्य समानं वर्णनम् ।

– एकस्मिन् एव पुरुषे एकः रोगः वमनादि साध्यः अपरः रोगः वमनादि असाध्यः ईदृश्यम् अवस्थायां द्वयोः रोगयोः गुरुलाघवत्वं प्रथमं विनिश्चितव्यम् ।

– तत्रस्थः यः गुरुलक्षणानां रोगः स्यात् तदनुसारम् उपक्रमाणां प्रवृत्तिः करणीया । तथा यः लघुलक्षणानां रोगः स्यात् तस्य उपक्रमाणां निवृत्तिः ।

– शास्त्रे उपक्रमाणां प्रवृत्तिः निवृत्तिः च एतयोः द्वयोः उपदेशः कृतः । अवस्थायाः योग्यतां दृष्ट्वा सः निर्णयितव्यः ।

ज्योतिषचन्द्र सरस्वति: – यदा युगपत् कर्तव्यम् अकर्तव्यं च एते विचारणीय भवत: तदा कस्य प्रवृत्ति: करणीया इत्यस्य विवेचनम् अस्य प्रश्नस्य उत्तरे वर्णितम् ।

– एकस्मिन् एव आतुरे वमनादीनां कर्तव्यम् अकर्तव्यम् च ईदृशी अवस्था सत्यां गुरुलाघवस्य विचार: करणीय: । इत्यस्य अर्थ: वमनादिनि: कर्माणि कृतानि अथवा न कृतानि तर्हि के तेषां परिणामा: भवेयु:? तथा किं तत् हिकरं वा अहितकरं स्यात् इति अपि विचारः आवश्यकः । अथवा सामान्यविधौ विशेषविधि: अवधारणीय: एतत् निर्णितव्यम् ।

– उपक्रमस्य अवधारणं प्रतिचिकित्सं सामान्यविशेषविधिना निर्दिष्टव्यम् । उदाहरणार्थम् – 'वमनं श्लेष्महराणाम्' एष: सामान्यविधि: अस्ति । तस्मिन् 'न वामयेत् तैमिरिकं न गुल्मिनाम्' एवं गुल्मे सति वमनं न दद्यात् एष: अपवाद: (विशेष:) कथित: । अग्रे अस्मिन् विशेषविधौ 'मन्दोऽग्निर्वेदना मन्दा..सगुल्मी वमनोपग:' एवं अवस्थाविशेषानुसारं कफजे गुल्मे वमनसाध्यायां अवस्थायां वमनं दद्यात् एवं विधि: कथित: ।

– एवं विवेचनानुसारं अन्यतर निष्ठानुसारं कर्तव्याकर्तव्यं विचार्य प्रवृत्तिनिवृत्तिसंयोगे निर्णय: आवश्यक: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## नवम: प्रश्न: – कानि वमनादीनां द्रव्याणि उपयोगं गच्छन्ति ?

– अस्मिन् प्रकरणे अग्रिमानि उपाधिकरणानि सन्ति ।

- वमनद्रव्याणां कल्पसंग्रह: – सूत्रम् १३५
- विरेचनद्रव्याणां कल्पसंग्रह: – सूत्रम् १३६
- आस्थापनद्रव्याणां कल्पसंग्रह: – सूत्रम् १३७
- षड् आस्थापन स्कन्ध: – सूत्राणि १३७ तः १४९
- अनुवासन द्रव्याणि – सूत्रम् १५०
- शिरोविरेचनद्रव्याणि – सूत्रम् १५१

अनेन क्रमेण अस्य अधिकरणस्य वर्णनं पश्याम ।

## अ) वमनद्रव्याणां कल्पसंग्रहः –

चरकः – वमनकर्म कुर्वतां द्रव्याणां तथा तेषां कल्पना वर्णनम् । एतानि द्रव्याणि संस्कृत्य वर्तिः चूर्णम् अवलेहः च इत्यादयः विविधाः कल्पनाः वमनार्थं करणीयाः ।

– एताभिः कल्पनाभिः वमनार्हाभ्यः व्यक्तिभ्यः विधिवत् वमनं दद्यात् ।

– अस्य विस्तृतं वर्णनं कल्पस्थाने कृतम् ।

चक्रपाणिः – द्रव्याणाम् अर्थस्य पर्यायस्य च वर्णनम् । वर्तिक्रिया वर्तिरुप दीर्घभक्ष्यकरणम् ।

– प्रायः समानगुणानां भिन्नभिन्नपाठानुसारं आरग्वधादि इत्यादि वर्गानुसारं वर्णिताः सन्ति ।

– कल्पनम् इति कल्पः प्रयोगः ।

गङ्गाधरः – संग्रहः इति संक्षेपः । संक्षेपेण कल्पानां वर्णनम् । द्रव्याणां शब्दार्थस्य वर्णनम् । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेनः – यथा इष्टानि द्रव्याणि गृहीतव्यानि इत्यस्य अर्थः दोषदूष्यादीनाम् अपेक्षया अथवा यथा प्रयोजनं द्रव्याणि वृणितव्यानि । द्रव्यपर्यायस्य वर्णनम् । शेषा टीका शब्दार्था ।

ज्योतिषचन्द्र सरस्वतिः – कल्पानां व्यवहारविधिः कल्पस्थाने वर्णितः ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## आ) विरेचनद्रव्याणां कल्पसंग्रहः

चरकः – विरेचनकर्म कुर्वतां द्रव्याणां विविधानां कषायादिकल्पानां वर्णनम् ।

– एतेषां कल्पानां विस्तृतं वर्णनं कल्पस्थाने कृतम् ।

चक्रपाणिः – विक्लिप्तिः द्रव्यान्तरसंयोगः । अविक्लिप्तिः केवलप्रयोगः ।

– 'विक्लिप्ताविक्लिप्तिः' इति पदस्य अर्थः विरेच्यानि द्रव्याणि अन्येषां द्रव्याणां संयोगेन वा संयोगं न कृत्वा एकैशः उपयोजितव्यानि ।

– द्रव्यपर्यायस्य वर्णनम् ।

गङ्गाधरः – द्रव्यपर्यायस्य वर्णनम् । केवलं शब्दार्थ टीका ।

योगीन्द्रनाथ सेनः – 'विक्लिप्ताविक्लिप्तैः विकल्पितेः अविकल्पिषितैः व्यस्तसमस्तैः इत्यर्थः ।

– द्रव्यपर्यायः । शेषा टीका शब्दार्थः ।

ज्योतिषचन्द्र सरस्वति: – विक्लिप्ताविक्लिप्तै: एकैकश: मिलिता वा कृतकल्पनै: ।

– द्रव्यपर्यायस्य वर्णनम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**इ) रसत: आस्थापनद्रव्याणि** – सूत्रम् १३७

चरक: – आस्थापनायाम् अनेका: कल्पा: तेषु तेषु अवस्थान्तरेषु योजिता: भवन्ति ।

– आस्थापनार्थं कल्पे उपयुक्तानां द्रव्याणाम् अवस्थानान्तरानुसारं नामत: वर्णनं यदि कृतम् तर्हि तत् अतीव विस्तृतं भवेत् । यत: नामत: एतानि द्रव्याणि अतिबहुत्वात् अपरिसंख्येयानि भवन्ति ।

– एतत् शास्त्रं नाति संक्षेपविस्तारेण उपदेशं कुर्वाणम् अस्ति ।

– तस्मात् एतेषां द्रव्याणां नामत: वर्णनं न कृत्वा रसत: वर्णनं कृतम् ।

– रसानां संसर्गेण भवन्त: अंशांशबलविकल्पा: भूरित्वात् आस्थापनार्थानां द्रव्याणां रससंसर्गविकल्पविस्तार: अपरिसंख्येया: सन्ति ।

– अत: आस्थापनार्थानां द्रव्याणां एकदेशेन उदाहरणमात्रम् इति रसेषु विभाजनं कृत्वा एकैकश: रसानां षड् स्कन्धान् कृत्वा तदनुसारं नामलक्षणार्थं वर्णनं कृतम् । नामलक्षणार्थं रसानुसारं षड् आस्थापनस्कन्धा: वर्णिता: ।

चक्रपाणि: – यद् द्रव्यम् एतेषु स्कन्धेषु अनुक्तम् अस्ति तस्य ज्ञानम् अपि यथासामान्यद्वारा ज्ञातव्यम् । रसप्राधान्येन तथा द्रव्यस्य रसाश्रयेण अनतिसंक्षेपविस्तारेण उपदेशकरणस्य योग्यतया रसत: वर्णनं कृतम् ।

– रसाणां संसर्गश: वर्णनं नास्ति । तस्मिन् तस्मिन् द्रव्ये य: रस: सर्वप्रमुख:/ उत्कट: स्यात् तदनुसारं तद् तद् द्रव्यं तस्मिन् तस्मिन् रसस्कन्धे समाविष्टम् ।

– रसानुसारं द्रव्याणां वर्णनम् एकदेशेन कृतम् ।

नामलक्षणार्थं – एते षड् आस्थापनस्कन्धा: वर्णिता: । तस्मात् वर्णनात् –

– यानि द्रव्याणि उक्तानि सन्ति तेषां नामार्थम् उदाहरणार्थं जीवकादि । तथा यानि द्रव्याणि अनुक्तानि सन्ति तेषां तेषां जातीयत्वानुसारं लक्षणार्थं वर्णनम् अस्ति ।

– आस्थाप्यते अनेन इति आस्थापनम् । स्कन्ध: समूह: ।

गङ्गाधर:– आस्थापनद्रव्याणां नामत: वर्णनं यदि कृतं तर्हि अतिविस्तारेण तेषाम् उपदेश: भवेत् ।

– अनतिसंक्षेपविस्तारेण कृत: उपदेश: ज्ञानार्थं भवति । प्रत्युत अतिविस्तारेण यदि वर्णनं कृतं तर्हि तस्य सम्पूर्णं ज्ञानम् अशक्यम् । अत: रसत: वर्णनं कृतम् ।

– रसाणां संसर्गसमवायेन कृत: विकल्प: अतिविस्तृत: भवति यथा हीन: हीनतर: हीनतम: मध्य: मध्यतर: मध्यतम: अधिक: अधिकतर: अधिकतम: इत्यादि इत्यादि ।

– तस्मात् आस्थापनरुपिण: वृक्षस्य रसरुपिणीषु बृहत्–शाखासु विभज्य तस्य ज्ञानप्राप्ति: सुगमा कृता।

– षड् स्कन्धानां वर्णनं एकदेशेन कृतम् ।

– नामलक्षणार्थम् इति नामज्ञानार्थम् । शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेन: – आस्थापनोपयोगिनां नामत: एकैकश: वर्णनं अतिबहुत्वात् अशक्यम् ।

– आस्थापनाया: नैककल्पगतानां अनेकानां द्रव्याणां रुग्णस्य अवस्थान्तरेषु यौगिकत्वानुसारं अतिबहुत्वं भवति । तस्य नामत: विस्तार: अपरिसंख्येय: भवति ।

– तन्त्रे (शास्त्रे) कृत वर्णनं न संक्षिप्तं न वा विस्तृतं स्यात् । संक्षिप्तं वर्णनं परिपूर्णं न भवति विस्तृतं वर्णनं अवधारणार्थम् अशक्यम् अस्ति ।

– अत: आस्थापनोपयोगिनां द्रव्याणां वर्णनं नामत: न कृत्वा रसत: कृतम् ।

– परंतु रसत: वर्णनमपि अतिविस्तृतं भवति । रसानां षड् प्रकारान् कृत्वा अपि तेषां अन्योन्यसंसृष्टत्वेन अतिबहुविकल्प: भवन्ति ।

– आस्थापनोपयोगिनां द्रव्याणां रसानुसारं समवाय विकल्पानुसारं विस्तार: अपरिसंख्येय: अस्ति ।

– अन्योन्यसंसृष्टेन सह रसानां अंशांशानुसारं ये विकल्पा: भवन्ति तेऽपि अतिबहव: सन्ति ।

– अत: केवलं केषांचित् द्रव्याणां नामलक्षणार्थं उदाहरणम् इत्यत: षड् स्कन्धेषु वर्णनं कृतम् ।

– स्कन्ध: द्रव्यसमूह: । शेष: अविशेष: ।

ज्योतिषचन्द्र सरस्वति: – नामलक्षणार्थं नामज्ञानार्थम् । स्कन्ध: समूह: ।

– शेषा टीका शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

सूत्रम् १३८ चरक: – एकैकरसानुसारं षड् आस्थापनस्कन्धानाम् वर्णनम् आवश्यकम् । परं केवलं एकैकरसं सत् द्रव्यं दुर्लभतमम् ।

– प्रत्येकस्मिन् द्रव्ये रसानां तरतमसंयोगा: सन्ति ।

– अत: मधुरं मधुरप्रायं मधुरविपाकयुक्तं मधुरप्रभावयुक्तं च इदृशानां द्रव्याणां समावेश: मधुरस्कन्धे कृत: । एवमेव पञ्च अन्यस्कन्धविषये ज्ञातव्यम् ।

चक्रपाणि: – किमपि द्रव्यम् एकरसस्य (शुद्धस्य एकरसस्य) न भवति । तेन येषां द्रव्याणां विपाक: मधुर: अस्ति तेषामपि समावेश: अस्मिन् स्कन्धे कृत: ।

– मधुरप्रायम् इत्यस्य अर्थ: उत्कृष्टमधुररसयुक्त: । शेषा टीका अविशेषा: ।

गंगाधर: – षड् स्कन्धेषु द्रव्या: कथं समाविष्टा: अस्मिन् विषये विवेचनम् –

– एक: रस: यत्र तद् एकरसम् ।

– द्रव्याणां संसृष्टरसभूयिष्ठत्वात् एकरसात्मकं द्रव्यं दुर्लभतमं अस्ति । तस्मात् एकस्येव रसस्य द्रव्याणां स्कन्ध: दुर्लभतम: । अत: मधुरं मधुरप्रायं मधुरप्रभावप्रायं मधुरविपाकवबहुलं च एतानि द्रव्याणि मधुरस्कन्धे समाविष्टानि सन्ति ।

| | |
|---|---|
| मधुरस्कन्ध: | मधुरं , मधुरप्रायं , मधुरप्रभावयुक्तं, मधुरविपाकबहुलम् |
| अम्लस्कन्ध: | अम्लं , अम्लप्रायं , अम्लप्रभावयुक्तं , अम्लविपाकबहुलम् |
| लवणस्कन्ध: | लवणं , लवणप्रायं , लवणप्रभावयुक्तं , लवणविपाकबहुलम् |
| कटुस्कन्ध: | कटु , कटुप्रायं , कटुप्रभावयुक्तं , कटुविपाकबहुलम् |
| तिक्तस्कन्ध: | तिक्तं , तिक्तप्रायं , तिक्तप्रभावयुक्तं , तिक्तविपाकबहुलम् |
| कषायस्कन्ध: | कषायं , कषायप्रायं , कषायप्रभावयुक्तं , कषायविपाकबहुलम् |

– स्कन्धसमावेशविषये – प्रतिज्ञावर्णनम् ।

योगीन्द्रनाथ सेन: – द्रव्याणां संसृष्टरसभूयिष्ठत्वं नाम द्रव्यस्थानां पंचमहाभूतानाम् अन्योन्यसंसर्ग: बहुविध: अस्ति । मधुरद्रव्यम् इत्यस्य अर्थ: मधुररसात्मकं द्रव्यम् ।

– मधुरप्रायं द्रव्यं नाम संसृष्टरसात्मके मधुररस्सस्य बाहुल्यं धारयन्तं द्रव्यम् ।

– प्रभाव: द्रव्याणाम् अचिन्त्यशक्ति: ।

– यद् द्रव्यं विपाकेन प्रभावेन च मधुररसस्य कार्यं करोति तद् मधुरविपाकबहुलं मधुरप्रभावयुक्तं च द्रव्यम् । एतेषां सर्वेषां समावेश: मधुरस्कन्धे भवति ।

– तथैव अन्यस्कन्धविषये ज्ञातव्यम् ।

ज्योतिषचन्द्र सरस्वति: – अविशेष: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

**षड् आस्थापनस्कन्धा:** – सूत्राणि १३९ त: १४४

चरक:

– मधुर:, अम्ल:, लवण:, कटु, तिक्त:, कषाय: च एतेषां रसानाम् आस्थापनस्कन्धानां वर्णनम् ।

| | | |
|---|---|---|
| मधुरस्कन्ध: | सुखोष्णं घृततैलवसामज्ञालवणं च एतै: फाणितोपहिता बस्ति: | वातविकार: |
| मधुरस्कन्ध: | शीतामधुसर्पियुक्ता बस्ति: | पित्तविकार: |
| अम्लस्कन्ध: | सुखोष्णं तैलवसामज्ञालवणं एतै: फाणितोपहिता बस्ति: | वातविकार: |
| लवणस्कन्ध: | अम्लद्रव्ययुक्ता उष्णोदकोपहिता स्नेहयुक्ता सुखोष्णा बस्ति: | वातविकार: |
| कटुकस्कन्ध: | गोमूत्रमधुतैललवणयुक्ता सुखोष्णा बस्ति: | श्लेष्मविकार: |
| तिक्तस्कन्ध: | मधुतैललवणयुक्ता सुखोष्णा बस्ति: | श्लेष्मविकार: |
| तिक्तस्कन्ध: | शीता मधुसर्पियुक्ता बस्ति: | पित्तविकार: |
| कषायस्कन्ध: | मधुतैललवणोपहिता सुखोष्णा बस्ति: | श्लेष्मविकार: |
| कषायस्कन्ध: | शीता मधुसर्पियुक्ता बस्ति: | पित्तविकार: |

चक्रपाणि: – द्रव्यपर्याय वर्णनम् । अस्मिन् स्कन्धे यद् द्रव्यं स्कन्धद्रव्ये वर्णितं स्यात् तद् उभयगुणयुक्तत्वात् उभये स्कन्धे यौगिकम् अस्ति ।

गङ्गाधर: – द्रव्यपर्यायवर्णनम् । स्कन्धानुसारं बस्ति निर्माण विधि: ।

योगीन्द्रनाथ सेन: – द्रव्यपर्याय वर्णनम् । स्कन्धानुसारं बस्तिनिर्माणविधि: ।

ज्योतिषचन्द्र सरस्वति:– द्रव्यपर्यायवर्णनम् । स्कन्धानुसारं बस्तिनिर्माणविधि: ।

– यद् द्रव्यं स्कन्धद्वये वर्णितं तत् मिश्रत्वेन उभयत्र यौगिकम् अस्ति ।

निष्कर्ष: – द्रव्याणां पर्याये वैधर्म्यं दृश्यते । तस्य विवेचनं वैधर्म्यप्रकरणे कृतम् ।

सूत्राणि १४५ त: १४९

चरक: –

– आस्थापनार्थं षड् स्कन्धानां रसभेदत: वर्णनं कृतम् । तानि द्रव्याणि सार्वयौगिकानि सन्ति ।

– यासु व्याधिषु आस्थापना बस्ति: हितकरा कथिता तन्मध्ये अस्मिन् स्कन्धगतानि सर्वाणि अथवा अर्धानि अथवा यानि प्राप्तानि भविष्यन्ति तानि द्रव्याणि गृहीत्वा कुशलतया बस्ति: दातव्या

– ये स्कन्धा: येषां येषां दोषव्याधयो: शमनार्थं कथिता: न सन्ति ते स्कन्धा: तान् तान् दोषव्याधी कुप्यन्ति । एवं षड् आस्थापनस्कन्धा: वर्णिता: ।

निष्कर्ष: – १) बुद्धिमता वैद्येन स्कन्धे वर्णितं सदपि यदि तद् द्रव्यं अयौगिकं स्यात् तर्हि तद् कल्पात् वर्ज्यम् ।

२) तथैव यद् द्रव्यं यौगिकं अस्ति परं स्कन्धे न समाविष्टं स्यात् तदापि कल्पे तद् समावेशितव्यम्

३) अस्य प्रयोगविध्यनुसारं एकं वर्गं द्वितीयेन वर्गेण सह संमिश्य अथवा अनेकान् वर्गान् संमिश्य युक्तिपूर्वकं आस्थापनार्थम् उपयोग: करणीय: ।

४) बुद्धिमते वैद्याय सूत्रात्मकं अल्पज्ञानमपि अधिकं ज्ञानार्थम् उपयुक्तं भवति । तदर्थं चरकेण द्वौ दृष्टान्तौ कथितौ ।

अ) यथा भिक्षुक: भिक्षार्थम् अटन् अल्पेन अल्पेन अन्नेन उदरभरणं कृत्वा अन्नं पूरयति ।

ब) तथैव यथा कृषक: अल्पं बीजं क्षेत्रे उप्त्वा तस्मात् भूरि धान्यं प्राप्नोति ।

तथा बुद्धिमान् वैद्य: सूत्रात्मकात् अल्पज्ञानात् अनुक्तं विस्तृतं ज्ञानं संपादयति ।

५) अत: बुद्धिमान् वैद्य: ऊहापोहवितर्काभ्यां सूत्रश: वर्णितं विषयं बुद्धिपूर्वकं विस्तारयेत् ।

६) मन्दबुद्धि: वैद्य: शास्त्रे वर्णितस्य उपदेशस्य अनुसारम् एव कार्यं कुर्यात् ।

७) शास्त्रेषु वर्णितानां नातिसंक्षेपविस्तारस्वरूपाणां शास्त्रवचनानां अनुसारेण भिषज: स्वकार्येषु भवति तथा रोगप्रशमनकार्यं ।

चक्रपाणि: – आस्थापनगणानां यद् इदं यौगिकत्वं वर्णितम् तद् न दोषविशेषेण अपि तु सामान्यत: सर्वेषु आस्थापनसाध्येषु रोगेषु हितकरत्वं विचार्य वर्णितम् ।

उदाहरणार्थम् पित्तज्वरे कटुस्कन्धेन आस्थापनं दत्तं चेत् पित्तकरत्वात् ज्वरवृद्धि: भवेत् ।

वैद्येन दोषविशेषान् ज्ञात्वा पश्चात् उपयोग: करणीय: ।

दोषविशेषे तस्य तस्य वर्गस्य अननुगुणस्य घटकस्य (दोषस्य) प्रकोप: निषिद्ध: एव ।

१) प्रथमं मतम् – उदा – मधुरस्कन्ध: कफशमनार्थं न कथित: । अनेन मधुरस्कन्धेन कफवर्धनम् एव भवेत् । एवमेव अन्यवर्गविषये ज्ञातव्यम् ।

– मधुरस्कन्ध: वातपित्तशामक: कथित: । कफस्य उल्लेख: नास्ति । अत: स: कफवर्धक: अस्ति ।

२) द्वितीयं मतम् – सार्वयौगिकं एतेन उल्लेखेन उक्तवर्गाणां समासव्यासयोगेन सम्पूर्णास्थापन साध्यरोगाणां नाशत्वं वर्णितम् । प्रत्येकवर्गविषये अथवा तत्रस्थे प्रत्येकद्रव्यविषये ईदृशं वर्णनं नास्ति । तत् तारतम्येन ज्ञातव्यं भवति ।

– प्रतिवर्गस्य साध्यत्वानुसारं अनुक्तव्याधीनां शमनं विचारणीयम् ।

– यौगिकस्य प्रक्षेप: तथा अयौगिकस्य उद्धरणं कथं कुर्यात् ?

– बुद्धिमद्भि: एतादृशेषु गणेषु द्रव्यस्य प्रक्षेपोद्धरणं कर्तव्यम् । न एतद् कार्यं मन्दबुद्ध्या करणीयम् । यत: मन्दबुद्धय: ऊहापोह कर्तुम् असमर्था: सन्ति ।

यदि बुद्धिमन्त: कमपि द्रव्यं कस्यामपि अवस्थायाम् अयौगिकं इति मन्यमाना: चेत् तथा मन्दबुद्धय: शास्त्रवर्णनानुसारं तस्य उपयोगं कुर्वाण: चेत् तथापि भूरिप्रमाद: नास्ति । यत: तेन बहुबृहत् व्यापद: न भवन्ति । अस्य कारणं य: विधि: शास्त्रोक्त: अस्ति स: प्राय: यौगिक: एव अस्ति ।

– यत्र संयोगेन कार्यं भूयमानं तत्र प्रक्षेपोद्धार: न कर्तव्य: । उदा.– 'अगस्त्यहरीतकी' इत्यादि

– सुश्रुतस्य संदर्भ: कथित: ।

गङ्गाधर: – सार्वयौगिकं नाम आस्थापनायोग्यं सर्वव्याधिअवस्थायाम् उपयुक्तम् ।

– बुद्धिमद्भि: तत्वातत्वबुद्धे: उपयोगेन किं द्रव्यं योग्यम् वा किं द्रव्यम् अयोग्यम् इति विनिश्चिय: करणीय: । शेषा टीका शब्दार्था ।

योगीन्द्रनाथ सेन: – षड्स्कन्धस्थानि द्रव्याणि सर्वासु आस्थापनसाध्य व्याधिषु उपयुक्तानि ।

– इदम् इत्थम् इदं नेत्थंम् इति ऊहापोहौ: । बुद्धिमान् नाम य: प्रमाणयुक्तिकुशल: अस्ति स: ।

– शेषा टीका शब्दार्था ।

ज्योतिषचन्द्र सरस्वति: – सर्वासु व्याधिषु सर्वे वर्गा: योजनीया: इति अयोग्यम् अस्ति । यद् यद् द्रव्यं यस्य यस्य दोषस्य शमनार्थं वर्णितं तान् शाम्यति । तथा येषां उल्लेख: नास्ति तान् वर्धयति ।

– एवं सार्वयौगिकानाम् आस्थापनद्रव्याणां विचार: करणीय: ।

उदाहरणार्थ – मधुरवर्ग श्लेष्मप्रकोपक: अम्लवर्ग: पित्तश्लेष्मप्रकोपक: अस्ति ।

– अयौगिकं नाम तद् व्याधि: अप्रत्यनीका ।

– सिद्धान्त: – तस्मात् बुद्धिमताम् ऊहापोहविर्तका: मन्दबुद्धे: तु यथोक्तानुगमनमेव श्रेय: ।

– ऊह: अतिरिक्त: संयोग: । अपोह: ततो निष्कासनम् ।

– वितर्क: च अत्र अयं यौगिक: न वा इति विचार: । शेष: शब्दार्थ: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अनुवासनद्रव्याणि – सूत्रम् १५०

चरक: – अनुवासनं तु स्नेहम् एव । स्नेह: द्विविध: । स्थावरात्मक: आजङ्गमात्मक: च ।

स्थावरात्मक: स्नेह: – तैलम् अतैलम् च ।

तत् इयं तैलमेव कृत्वा उपदिक्ष्यते, सर्वत: तैलप्राधान्यात् ।

जङ्गमात्मक: स्नेह: – वसा मज्ञा सर्पि: च ।

– वातश्लेष्मविकारार्थं तथा अनुवासनार्थं तैलं, वसा, मज्ञा सर्पि: च एते यथापूर्वं श्रेष्ठा: सन्ति ।

– पित्तविकारेषु तैलं, वसा, मज्ञा, सर्पि: च एते यथोत्तरं श्रेष्ठा: सन्ति ।

– सर्वे स्नेहा: संस्कारविशेषेण युक्तिपूर्वकं सर्वेषु विकारेषु उपयोक्तुं शक्यते ।

चक्रपाणि: – तैलं इति सर्षपस्नेहादि तैलभूतम् ।

– स्थावरस्नेहेषु तिलतैलस्य प्राधान्यम् अस्ति । अत: सर्वान् स्थावरस्नेहान् तैलं इति सञ्ज्ञा युज्यते । तैलस्य य: विधि: कथिता स: सार्षषादीनं अन्यान् स्नेहानपि सम्बध्नाति । तिलभवस्नेहस्य प्राधान्य प्रख्यापनार्थं तैलशब्देन सार्षपादीन् सर्वान् स्थावरस्नेहान् संबोधितं भवति

– सुश्रुतेन सूत्रस्थानस्य ४५ तमे अध्याये कथितं यत् निष्पत्ति: गुण: च एते तैलसमाने स्त: ।

– अतः अन्येषां स्नेहानां ग्रहणमपि अनेनैव तैलपदेन क्रियते ।

गङ्गाधरः – तैलम् – तिलप्रभवस्नेहः ।

अतैलम् – सर्षपादिप्रभवः स्नेहः ।

अस्मिन् तैलम् अतैलं इति स्नेहद्वये तैल प्राधान्यात् सर्वान् स्थावरस्नेहम् तैलम् इति संज्ञा युज्यते शेषा टीका अविशेषा ।

योगीन्द्रनाथ सेनः – तैलम् – तिलप्रभावः स्नेहः ।

अतैलम् – सर्षपादिप्रभवः स्नेहः ।

– एतौ द्वौ अपि तैलं इति संबुध्यते । यतः सर्वेषु स्थावरस्नेहेषु तिलप्रभवस्नेहस्य प्राधान्यं भवति । तैले यः विधिः अस्ति सः एव सार्षपादिषु स्नेहेषु अस्ति ।

– येषु वातश्लेष्मविकारेषु अनुवासनम् आवश्यकम् । तस्मिन् यथापूर्वं तैलं वसा मज्ञा सर्पिः च एते श्रेष्ठाः सन्ति ।

ज्योतिषचन्द्र सरस्वतिः – अनुवासनम् – स्नेहबस्तिः । तैलम् – तिलभवः स्नेहः ।

– अतैलम् – अन्यान्यस्नेहः ।

– तैलप्राधान्येन सर्वान् स्थावरस्नेहान् तैलं संज्ञा युज्यते ।

– संस्कारविशेषः तैः तैः दोषहरैः द्रव्यैः सह पाकात् द्रव्याणि योजितुं शक्यं भवति ।

निष्कर्षः – वैधर्म्यं नास्ति ।

## शिरोविरेचनद्रव्याणि – सूत्रम् १५१

चरकः – फलं पत्रं मूलं कन्दः पुष्पम् निर्यासः त्वक् च एवं सप्तविधेन आश्रयभेदेन शिरोविरेचनद्रव्याणां वर्णनम् ।

– उक्तानुक्तशिरोविरेचनार्थं द्रव्यनिकषाः – १) लवण कटु तिक्त कषाय रसात्मकः ।

२) इन्द्रियोपशमनानि द्रव्याणि ।

३) यदि उपरोक्ते वर्गद्वये न समाविशत् अपि यद् द्रव्यं तस्याम् अवस्थायां यौगिकं स्यात् तद् उपयुक्तमेव ।

४) यथायोगविहितानि अपराणि अनुक्तानि अपि द्रव्याणि ।

चक्रपाणि: – आश्रयभेदानुसारं द्रव्योल्लेखे 'च' कारेण तेषां द्रव्याणाम् अन्येषाम् अङ्गानाम् अपि उपयोग: शक्य: इति अध्याहृतम् ।

उदा. शिग्रु: – फलाश्रये वर्णितम् अस्ति । तथापि शिग्रो: त्वग् अपि शिरोविरेचनार्थं ग्राह्यम् अस्ति ।

– यानि द्रव्याणि लवणकटुतिक्तकषायरसानां सन्ति । तथा इन्द्रियानुपघातकराणि सन्ति । तानि एव शिरोविरेचनाय अर्हाणि सन्ति ।

– यानि द्रव्याणि मधुराम्लकषायानि सद्पि यौगिकानि स्यु: तानि अपि शिरोविरेचनाय योजितुं शक्यानि ।

गङ्गाधर: – पाठभेद:– १) फलाश्रये 'अजाजे:' उल्लेख: नास्ति ।

२) त्वगाश्रये 'तेजोवती' स्थाने 'तेजस्विनी' इति पाठ: ।

– मधुरम् अम्लं च एते द्रव्ये शिरोविरेचनाय न यौगिके । परं यदि ते इन्द्रियोपशामके स्याताम् तर्हि उपयोक्तं न कापि अंतराय: ।

– द्रव्यपर्यायवर्णनम् ।

योगीन्द्रनाथ सेन:– आश्रय: इति योनय: ।

– सुश्रुतस्य मतं वर्णितम् । सुश्रुतेन सार: इति अष्टम: आश्रय: मत्वा अष्टविधानां शिरोविरेचन योनीनां वर्णनं कृतम् ।   (संदर्भ: सु सू ३९)

– द्रव्यपर्यायवर्णनम् । शेषा टीका शब्दार्था ।

ज्योतिषचन्द्र सरस्वति: – द्रव्यपर्यायवर्णनम् ।

– अनुक्तानि शिरोविरेचनद्रव्याणि सैन्धवस्फटिककर्पूरादीनि । शेषा टीका शब्दार्था ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् पञ्चमम् ।

## अध्यायस्य उपसंहार: ।

चरक:  – रोगाणां भिषग्जितीयम् नाम्नि अध्याये अग्रिमाणां विषयाणां वर्णनं कृतम् ।

– लक्षणम् आचार्य: शिष्य: च एतेषां परीक्षा कारणं च ।

– अध्ययनम् अध्यापनम् सम्भाषणविधि: च ।

– चतुश्चत्वारिंशत् वादमार्गपदानि ।

– अन्यानि कारणादीनि पदानि ।

– परीक्षादे: वमनादिषु नवक: संप्रश्न: ।

चक्रपाणि: – अध्यायसंग्रह: । लक्षणम् इति शास्त्रम् । अध्येयम् इति अध्येतव्यम् ।

– अध्यापनविधी: – अध्येतव्यस्य विधि: । अध्ययनविधि: ।

गङ्गाधर: – अध्यायार्थम् उपसंहरति । लक्षणम् इति तन्त्रम् । शेष: शब्दार्थ: ।

योगीन्द्रनाथ सेन: – लक्षणम् इति शास्त्रम् ।

अतीतावेक्षणानुसारं सूत्रस्थानम् ३० (अर्थेदशमहामूलीयम्) अध्यायस्य संदर्भ:

शास्त्रं लक्षणं तन्त्र मित्यनर्थान्तरम् ।

– अध्याय: शिष्य: । अध्यापक: आचार्य: ।

ज्योतिषचन्द्र सरस्वति: – अध्यायसमाप्तिसूचिकां सूचीं वक्ति । लक्षणम् इति तन्त्रम् ।

– अध्येयम् इति अध्ययनम् ।

निष्कर्षं: – 'अध्येयाध्ययनविधि:' इति पदे पाठभेद: तथा तज्ज्ञन्य: वैधर्म्यम् अस्ति ।

## अधिकरणम् षष्ठम्

## अध्याय प्रशस्ति:

चरक: – सूत्रे १५५, १५६

बहुविधम् अर्थजातं बहुविधं विचित्रवाक्यं तथा विचित्र: मनोरम: अर्थ:, बहुविधं शुभशब्दसन्धियुक्तं, बहुविध: वाद: इत्यस्य नाशं कुर्वत: अस्य अध्यायस्य अध्यापनेन या मति: उत्पद्येत तेन परमतवादस्य नाश: शक्य: तथा परवचनद्वारा कदापि न पराजितं भविष्यति ।

चक्रपाणि: –

अर्थजातम् – शास्त्रं आचार्य: तथा शिष्य: एतेषां परीक्षा एते विषय: अस्मिन् अध्याये वर्णिता: ।

अर्थकान्तम् – विषयाणाम् अर्थ: सुंदरतया वर्णनस्य प्रयत्न: अस्मिन् अध्याये कृत: ।

शब्दसन्धि: – शब्दस्य वाक्ये योजनं इति शब्दसन्धि: अस्मिन् अध्याये वाक्ये शब्दानां वरणं तथा योजना अतीव शास्त्रोक्तया पद्धत्या कृता अस्ति ।

गङ्गाधर: – अध्यायं प्रशंसति ।

– बहुविधविचित्रवाक्यै: बहुविधानि अर्थजातानि वर्णितानि । अर्थकान्तम् इति अर्थत: मनोरमम् ।

– अस्य अध्यायस्य पठनेन वा अवबोधेन बहुविधहेतुसंश्रया मति: उत्पद्यते येन वैद्य: परवचनात् पराजित: न भवति तथा परवचनं खण्डितुं शक्नोति ।

योगीन्द्रनाथ सेन: – वाक्यम् इति पदसङ्घात: । अर्थत: कान्तं मनोरमम् । शेष: शब्दार्थ: ।

ज्योतिषचन्द्र सरस्वति: – अर्थकान्तम् कमनीयार्थम् ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## अधिकरणम् सप्तमम्

## विमानस्थान प्रशस्ति:

चरक: – सूत्रम् १५७

– दोषादीनां भावानां सकारणं ज्ञानं कारयितुं विमानस्थाने सम्यक् रीत्या विभागश: वर्णितम् ।

चक्रपाणि: – विमानस्थानार्थसंग्रह: । दोषोत्पत्ति: येन प्रकारेण भवति तेनैव प्रकारेण तस्य मानज्ञानं ज्ञातव्यम् इति सूचयितुं ‘हेतुमत्’ इति पदम् योजितम् ।

गङ्गाधर: – स्थानार्थम् । श्लोकानां विमानस्थानग्रंथसंख्या – त्रयोविंशति: अधिकं सहस्त्रम् ।

योगीन्द्रनाथ सेन: – विमानस्थानस्य निरुक्तिम् ।

– हेतु: इति उक्ति: ।

– निरुक्तानि निरुह्य उक्तानि ।

– दोषादीनां विशेषेण मानं विमानम् ।

– तस्य अत्र उपदिष्टत्वात् इदं विमानस्थानम् उच्यते ।

ज्योतिषचन्द्र सरस्वति: – विमानस्थानस्य निरुक्ति: ।

निष्कर्ष: – वैधर्म्यं नास्ति ।

## वैधर्म्यस्थानानां विवेचनम् – Editing Stage

### वैधर्म्याणां सूचि:

अस्य अध्ययने आकलितानि ७७ वैधर्म्याणि सम्प्राप्तानि । एतेषां वैधर्म्याणां सूचि: अत्र कुर्म: ।

| सन्दर्भ | वैधर्म्यस्थलम् |
|---|---|
| १/४ | यापयन्ति |
| १/६ | असंसृष्टरसदोषयो: परस्परसम्बन्ध: |
| १/१४ | अमधुरम् |
| १/१७ | क्षार: पाठभेद: |
| १/१७ | जनपद: |
| १/१७ | लाघवोपपन्न: |
| १/२२ | गुणान्तराधानम् |
| १/२५ | परिऱ्हासयति |
| १/२५ | उत्स्नेहनम् |
| १/२५ | अवसादनम् |
| २/७ | सारविधमनम् |
| २/१३ | विमुक्तामप्रदोष: |
| २/१३ | स्वेदनम् |
| २/१८ | सर्वाश्रयम् |
| ३/७ | अत्यभिष्यन्दिनम् |
| ३/७ | उपक्षीणजलेशयम् |
| ३/१५ | आत्मनो गुप्ति: |
| ३/२४ | परिग्रह: |
| ४/४ | अप्रमाणवचनं दुष्टादुष्ट: |

| | |
|---|---|
| ४/४ | अविर्तक: |
| ४/४ | प्रत्यक्षलक्षणम् |
| ४/६ | आत्मानम् |
| ४/८ | उपधि |
| ४/८ | व्यवसाय: |
| ४/८ | अवस्थानम् अविभ्रमेण |
| ४/८ | धृतिं अलौल्येन |
| ५/४ | स्रोतमयपुरुष: विचारस्य खण्डनम् |
| ५/७ | महास्रोत: |
| ५/७ | प्रकुपितम् |
| ५/८ | मूत्रवहस्रोतसां दुष्टिलक्षणवर्णने अतिबद्धं प्रतिबद्धं च पाठौ स्त: |
| ५/८ | क्लोम |
| ५/९ | स्थानस्था: |
| ५/१२ | अतिमात्रम् |
| ५/१९ | शुक्रवहस्रोतसां दुष्टिनिदानवर्णने अकालयोनिगमनात् पाठे भेद: अस्ति |
| ५/२० | मूत्रवहस्रोतसां दुष्टिनिदानवर्णने अभिक्षतस्य अतिकृशस्य च पाठौ स्त: |
| ५/२१ | पुरीषवहस्रातसां दुष्टिनिदानवर्णने संधारणात् विधारणात् च पाठौ स्त: |
| ५/२२ | स्वेदवहस्रातसां दुष्टिनिदानवर्णने अतिसंतापात् अतिसंक्षोभात् च पाठौ स्त: |
| ५/२३ | धातुभि: विगुण: इत्यत्र पाठभेद: |
| ५/२३ | सामान्य स्रोतोदुष्टीहेतव: |
| ५/२३ | धातुभि: विगुण: |
| ५/२४ | सूत्रान्वये सूत्रार्थे च वैधर्म्यम् |

| | |
|---|---|
| ५/२४ | सामान्य स्रोतोदुष्टीलक्षणम् |
| ५/२४ | विमार्गगमनम् |
| ६/५ | यथोचितम् |
| ६/११ | अनुबन्ध्यानुबन्धः |
| ७/३ | अधमत्वम् |
| ७/८ | सर्वक्रिमीणां पुरुषसंश्रयाणाम् |
| ७/११ | पाठभेदः |
| ७/१२ | श्लेष्मज कृमिनामानि |
| ७/१२ | संकीर्णभोजनम् |
| ७/१३ | पुरीषज कृमिलक्षणम् |
| ७/१३ | सूत्रे यदन्तरं तदन्तरम् एतयोः पदयोः पाठभेदः |
| ७/१६ | कृमिकोष्ठ चिकित्सा अपकर्षणम् |
| ७/१७ | कृमिकोष्ठ चिकित्सा अपकर्षणे आस्थापनम् |
| ७/१९ | शैखरिककषायः |
| ८/४ | जितहस्तम् |
| ८/४ | प्रकृतिज्ञः |
| ८/४ | अनुपस्कृतविद्यम् |
| ८/४ | दक्षम् |
| ८/७ | कल्यः कृतक्षणः |
| ८/९ | परिधिन् |
| ८/१५ | पिण्ड |
| ८/६९ | कारणपरीक्षालक्षणम् |
| ८/७१ | कार्ययोनि परीक्षालक्षणेषु विक्रियमाण इति पदेषु वैधर्म्यम् |

| | |
|---|---|
| ८/८९ | सुखेन प्रतिबोधनम् |
| ८/८९ | अव्यापत्ति: |
| ८/९३ | भक्ति: |
| ८/९५ | कालगर्भाशयप्रकृति |
| ८/९६ | क्षोभ: श्लेष्मल प्रकृति लक्षणम् |
| ८/९८ | पाठभेद: तज्ञन्य वैधर्म्यं च वातलप्रकृति स्वरलक्षणम् |
| ८/९८ | सक्त: वातलप्रकृतिलक्षणम् |
| ८/९८ | वातलप्रकृति स्वरलक्षणम् |
| ८/१०९ | शुक्रसारलक्षणानि |
| ८/१०९ | शुक्रसारलक्षणानि |
| ८/११० | कल्याणिभिनिवेशिन: |
| ८/११९ | तन्त्रकम् |
| ८/१५७ | अध्येय अध्याय: च पाठभेदौ |

# वैधर्म्याणां ऊहापोहम्

अस्य अध्ययनविषयस्य पद्धत्या चतुर्णां टीकाकाराणां ऊहनं तेषां तौलनिकम् अध्ययनं च कृत्वा तेषु आकलितानि ७७ वैधर्म्याणि सम्प्राप्तानि । एतेषां वैधर्म्याणां ऊहापोहं अत्र कुर्मः । टीकाकाराणां विवरणे परस्परेषु यानि वैधर्म्याणि उपलभ्यन्ते तेषां द्वौ प्रकारौ स्तः ।

१) पाठभेदः तस्मात् उत्पन्नम् वैधर्म्यं च

अ) पाठभेदाः तथा वैधर्म्याणि सन्ति । सर्वे पाठाः योग्याः ।

आ) पाठभेदाः वैधर्म्यं च अस्ति । सर्वे पाठाः योग्याः । परं तस्मात् एक पाठः युक्तियुक्ततरः भाति

इ) पाठभेदाः सन्ति । परं तदुपरि टीका न उपलब्धा । सर्वे पाठाः योग्याः ।

ई) पाठभेदाः सन्ति । तेषु शब्दशः वैधर्म्यं दृश्यते । परन्तु अभिप्रेतार्थे वैधर्म्यं नास्ति ।

उ) पाठभेदाः सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरम् एवं निष्कर्षः प्राप्यते यत् एकः पाठः अव्याप्तः सन् अन्ये पाठाः योग्याः ।

ऊ) पाठभेदाः सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरम् एवं निष्कर्षः प्राप्यते यत् ऐतैः पाठभेदैः एकस्य एव विषयस्य विभिन्नं मतान्तरं अनुभूयते ।

ए) द्रव्यनामसंज्ञायां पाठभेदाः तज्ञन्यवैधर्म्याणि च ।

२) कस्मिन् विषयविवेचने वैधर्म्यम्

अ) वैधर्म्यम् अस्ति । शब्दशः वैधर्म्यं दृश्यते । परं ऊहनोत्तरम् अभिप्रेतार्थे वैधर्म्यं न भवति ।

आ) वैधर्म्यम् अस्ति । एतेभ्यः वैधर्म्येभ्यः एकः विचारः अव्याप्तः अस्ति उत अन्यः विचारः योग्यः

इ) वैधर्म्यं अस्ति । शब्दशः अभिप्रेतार्थतः च वैधर्म्यं अस्ति । एते सर्वे विभिन्नविचारप्रवाहाः योग्याः सन्ति ।

ई) वैधर्म्यम् अस्ति । एते विभिन्नाः विचाराः एकस्य एव विषयस्य विविधान् दृष्टिकोणान् विविधाः अवस्थाः च दर्शयन्ति ।

उ) वैधर्म्याणि सन्ति । परं विषयाधिकरणानुसारं तानि न समन्वितानि । अतः भाविसंशोधनाय प्रेरकं वैधर्म्यम् अस्ति । एतयोः द्वयोः वैधर्म्यप्रकारयोः साकल्येन ऊहापोहं कुर्मः ।

ऊ) द्रव्यनामसंज्ञायां वैधर्म्याणि

१) पाठभेदः तस्मात् उत्पन्नं वैधर्म्यम् –

अ) पाठभेदाः तथा वैधर्म्याणि सन्ति । सर्वे पाठाः योग्याः ।

अस्य वैधर्म्यप्रकारे १६ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भः – च. वि. १।२२(२)

मूलसूत्रम् – करणं पुनः स्वाभाविकानां द्रव्याणामभिसंस्कारः । संस्कारो हि गुणान्तराधानमुच्यते ।

अधिकरणम् – 'अष्टौ आहारविधिविशेषायतनम्' इति अधिकरणे संस्कारः (करणम्) इति आयतनस्य वर्णनं अस्मिन् सूत्रे कृतम् अस्ति ।

वैधर्म्यम् – अस्मिन् सूत्रे 'गुणान्तराधानम्' इति पदे 'गुणाधानम्' एवं पाठभेदः अस्ति तथा तदनुसारं टीका अस्ति ।

टीका

| टीकाकारः | पाठभेदः | टीका |
|---|---|---|
| चक्रपाणिः | गुणान्तराधानम् | विस्तृतं विवेचनम् |
| गङ्गाधरः | गुणाधानम् | ये गुणाः न स्वाभाविकास्तेषां योगं आधानमित्युत्तरकालं गुणयोगः करणम् । |
| योगीन्द्रनाथसेनः | गुणान्तराधानम् | गुणान्तरस्य स्वाभाविकादन्यस्य गुणस्य आधानम् उत्पादनं हि संस्कारः उच्यते । |
| ज्योतिषचन्द्रसरस्वतिः | गुणान्तराधानम् | अभिसंस्कारो गुणान्तराधानम् । |

विवेचनम् –

– अन्तरम् – क्ली (अन्तं राति ददाति, अन्त + रा + कः, उपपदसमासः)

– अवकाशः । अवधिः । परिधानम् । अन्तर्धानम् । भेदः । तादर्थ्यम् । अवसारः । मध्यम् अन्तरात्मा । छिद्रम् । आत्मीयः । विना । वहिः । इति अमरः ।

सदृशः । इति मेदिनी । (शब्दकल्पद्रुमः)

– न अन्तं राति ददाति रा – क ।

– अवकाशे, अवधौ, परिधानांशुके, अन्तर्धाने, भेदे, परस्परवैलक्ष्यण्यरुपे, विशेषे, तादर्थ्ये, छिद्रे, आत्मीये, विनार्थे, वहिरर्थे, व्यवधाने, मध्ये, सदृशे च ।

आसन्ने त्रि. । (वाचस्पत्यम् । खण्डः १)

– being in the interior, near, Proximate, related, intimate, lying adjacent to, distant, a hole, different from, exterior, opening, etc. (monier williams / ४३)

– सर्वं विचार्यं तथा अस्य अधिकरणं दृष्टवा 'अन्तरम् इति पदस्य अर्थः different from,भेदः, परस्परवैलक्ष्यणरुपम् इति एवं ग्रहीतुं योग्यः ।

– आधानम् – क्ली,आधीयते आङ् + धा + भावे ल्यट् यद्वा आधीयते स्थाप्यते यत् कर्मणि ल्युट् । गर्भाधानम्, अग्न्याधानम् स्थापितद्रव्यम् । इति स्मृतिः

ग्रहणम्, धारणम्, अधिगमः, करणम्, सम्पादनम् । (शब्दकल्पद्रुमः / खण्डः १)

– Putting near or upon, depositing, placing, lightning, kindling, Placing, Causing, Effecting, Pledging, Depositing, taking, Having, Receiving, Containing,

(monier williams / १३८)

– अस्मिन् अधिकरणे 'आधानम्' इति पदस्य अर्थः उत्पादनं, सम्पादनम् इति एव अधिकः योग्यः

– योगेन्द्रनाथसेनेन अपि 'आधानम्' इति पदस्य अर्थः 'उत्पादनम्' एव कथितः ।

– तर्हि गङ्गाधरेण 'आधानस्य अर्थः' 'उत्तरकालं गुणयोगः करणम्' इति वर्णितः ।

– चरकसंहितायाम् इतरत्राः आगताः सन्दर्भाः –

१) भूयश्चैषां बलाधानं कार्यं स्वरसभावनैः । च. क. १२/४७

२) रक्तं हि विषाधानं वायुरिवाग्नेः प्रदेहसेकैस्तत् ।। च. चि. २३/४२

विषाधानमिति विषस्य प्रसारकम् । चक्र.

३) धीधृतिस्मृतिबलाधानम् । च. शा. ५/१२

४) पुरुषस्य गर्भाधानम् । च. शा. ५/५

५) पुरीषाधानम् । च. शा. ३/६

पुरीषाधानं पक्वाशयम् । चक्र.

६) पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः । च. सू. ५/९८

७) बलसमाधानं हि शरीरम् । च. नि. ६/५

बलेन सम्यगाधीयते धार्यत इति बलसमाधानं शरीरम् । चक्र.

८) पुरीषाधानम् । च. सू. २०/८

– ग्रन्थे 'आधानम्' इति पदं सम्पादनं, उत्पादनं, निर्माणम् इति अर्थेन योजितम् ।

– अस्मिन् सूत्रे 'गुणान्तराधानम्' 'गुणाधानम्' च इति द्वौ पाठौ स्तः, तस्य ऊहापोहं करवाम ।

गुणाधानम् –

– एषः पाठः केवलं गङ्गाधरेण स्वीकृतः । सम्पूर्णस्य सूत्रस्य विचारयता

'संस्कारो हि गुणाधानम् ।'

– एतस्य शब्दशः अर्थः संस्कारेण द्रव्ये गुणस्य आधानं भवति । नाम एकस्तु वर्तमानाः गुणाः परिवर्तेरन् वा नूतनस्य गुणस्य उत्पत्तिः भवेत् ।

– अस्मिन् विषयस्य स्पष्टीकरणार्थं गङ्गाधरेण अधोक्ता टीका कृता ।

''गुणाधानमिति ये गुणा न स्वाभाविकाः तेषां योग आधानमित्युत्तरकालं गुणयोगः करणम् ।''

– अस्य अर्थः संस्कारेण कस्मिंश्चित् द्रव्ये अथवा घटके ये गुणाः स्वाभाविकाः / स्वभावसिद्धाः न सन्ति एतादृशानां गुणानाम् उत्तरकाले (उत्पत्त्यनन्तरं) तस्मिन् द्रव्ये निर्मिति भवति ।

– ये गुणाः स्वाभाविकाः सन्ति तेषु अपि गच्छता कालेन, शौचमन्थनादिभिः संस्कारैः परिवर्तनं शक्यम् उदा. – अम्लरसात्मकम् उष्णवीर्यं पित्तप्रकोपकम् अपक्वम् आम्रफलं कालान्तरेण पक्वं आम्रं भूत्वा मधुरसात्मकं शीतं तथा पित्तशामकं च एतैः गुणैः युक्तं भवति ।

दधौ मन्थनेन गुणान्तरं भूत्वा नवीनं गुणात्मकं कर्मात्मकं च सिद्धं भवति ।

– तदा 'गुणाधानम्' इति पदस्य गङ्गाधरस्य टीका, व्याकरणं तथा तन्त्रयुक्तिः एताभिः द्वाराभिः एवं निष्कर्षः जानीयात् यद् 'स्वगुणवृद्धिः तथा नूतनगुणानां निमिर्तिः ।

स्वगुणवृद्धिः – उदा. रुक्षगुणात्मके त्रिफला इति संयोगरुपिणि द्रव्ये भावना इति संस्कारेण रुक्षगुणस्य वृद्धिः भवति । कस्मिंश्चित् द्रव्ये तद्गतं कस्यचिद् विशिष्टगुणस्य वृद्धिः केनापि विशिष्टेन कर्मणा / संस्कारेण भवितुं शक्यम् । तदा स्वगुणवृद्धिः अपि गुणाधाने अन्तर्भूता भवति ।

परगुणनिर्मिति: –

– द्रव्ये पूर्वं नोत्पन्नान् स्वाभाविकान् गुणान् विहाय अन्येषां गुणानां निर्मिति: संस्कारेण शक्या ।

– एतदर्थं गङ्गाधरेण बहूनि उदाहरणानि दत्तानि ।

– फलादिषु अपक्वत: कालान्तरेण पक्वं भवता नवीना: गुणा: उत्पद्यन्ते ।

– बाल्यादिषु वयोऽवस्थायां गुणा: परिवर्तन्ते ।

– कठिणखरादिगुणयुक्ते द्रव्ये जलसम्पर्केण मार्दवं मृत्स्नादय: च गुणा: उत्पद्यन्ते ।

– विषवत् ताम्रे शौचसंस्कारेण गुणाधानं भवति ।

– उपनयनेन वेदाध्ययनादिषु कर्मसु अधिकारं प्राप्नोति ।

– विवाहसंस्कारेण गृहस्थाश्रमाय योग्यतां प्राप्नोति ।

तदा गङ्गाधरस्य टीकानुसारं तद् 'गुणाधानं' पदं 'वाक्यशेषं' तन्त्रयुक्तिं योजयित्वा अग्रिम: अर्थ: मिलति ।

''स्वगुणस्य वा अन्तरगुणस्य वा आधानम् ।''

यदनुसारं गङ्गाधरस्य पाठ: तथा तस्मिन् टीका अतीव महत्त्वपूर्णा चिन्तनीया च अस्ति ।

गुणान्तराधानम् –

– चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: एष: पाठ: स्वीकृत: ।

– अस्मिन् 'अन्तरम् ' इति पदम् अधिकम् अस्ति । 'अन्तरम्' इति पदस्य अर्थ: पूर्वं दृष्टवत् अन्यं, परविकल्पं, द्वितीयं, नूतनं च एवम् अधिकरणानुसारं ग्रहीतुं शक्यम् ।

–अस्य सरल: अर्थ: एकस्मिन् द्रव्ये संस्कारेण पूर्वम् न उपस्थिता: अन्ये नूतना: गुणा: उत्पद्यन्ते ।

– अस्मिन् चक्रपाणे: विवेचनं मननीयम् ।

१) कस्मिंश्चित् द्रव्यगत: स्वाभाविकगुण: केनापि संस्कारेण न परिवर्तते । उदा – अग्निस्थम् औष्ण्यं, वायुस्थं चलत्वं, तैलस्य स्निग्धत्वं इत्यादय: ।

२) द्रव्याणाम् उत्पत्तिकाले उत्पन्नेषु स्वाभाविकेषु जातिप्रतिबद्धेषु गुणेषु बहुपरिवर्तनं न शक्यते । उदा– माष: द्रव्यगत: गुरु: इति गुण: तस्मात् विभेत्तुम् अशक्यम् । संस्कारेण तस्मिन् तरतमत्वं शक्यम् ।

३) किन्तु केऽपि स्वाभाविकाः गुणाः कालान्तरेण परिवर्तन्ते ।

उदा. धान्यगताः गौरवाद्यः गुणाः कालान्तरेण नश्यन्ति ।

४) द्रव्ये संस्कारेण नैकवारं नूतनाः गुणाः उत्पद्यन्ते ।

उदा. व्रीहीणां लाजाः यदा कृताः तदा गुणाः परिवर्तन्ते ।

५) द्रव्यगताः गुणाः द्रव्यविनाशानन्तरं वा संस्कारेण परिवर्तन्ते अथवा नश्यन्ति ।

– योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतयोः विचारः एवं प्रकारेण अस्ति ।

तर्हि, सर्वाः टीकाः विचारयता ––

१) टीकाकारेषु वैधर्म्यं नास्ति ।

२) गङ्गाधरेण विस्तृतं विचारं कृत्वा स्वगुणवृद्धिः वा अन्यगुणनिर्मितिः इमौ विचारौ यथायोग्यं स्थापितौ ।

३) चक्रपाणिः योगीन्द्रनाथसेनः तथा ज्योतिषचन्द्रसरस्वतिः च एतैः स्वाभाविकगुणापेक्षया भिन्नानां गुणानाम् उत्पत्तिः संस्कारेण भवति, इति वर्णनं कृतम् ।

निष्कर्षः –

वाक्यशेषं तन्त्रयुक्तिः व्याकरणानुसारं च टीकाकारेषु वैधर्म्यं नास्ति ।

(२) संदर्भ: – च. वि. १/ २५ (७)

मूलसूत्रम् – नातिद्रुतमश्नीयात् अतिद्रुतं हि भुञ्जानस्य उत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च ।

अधिकरणम् – आहारविधिविधानम् इति अधिकरणे अतिद्रुतं न अश्नीयात् इति विषयस्य वर्णनम् ।

वैधर्म्यम् – अस्मिन् सूत्रे पाठभेदं वैधर्म्यं च स्त: । 'उत्स्नेहनम्' पदे पाठभेदं वैधर्म्यं च स्त: ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | उत्स्नेहनम् | उन्मार्गगमनम् । |
| गङ्गाधर: | स्नेहनम् | तत् स्नेहनस्य भुक्तद्रव्याणां स्वाभाविकस्नेहस्य न भवति । |
| योगीन्द्रनाथसेन: | उत्स्नेहनम् | उन्मार्गगमनम् । |
| ज्योतिषचन्द्रसरस्वति: | उत्स्नेहनम् | भोजनस्य खाद्यस्य उत्स्नेहनम् लालादिरुपकफस्रावसमयाल्पत्वात् कफसंसर्गाल्पतया न खाद्यस्य सम्यक् स्नेहनम् भवतीत्यर्थ: । |

विवेचनम्

– अस्मिन् सूत्रे उत्स्नेहनम् पदे द्वौ पाठौ स्त: ।

चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: – उत्स्नेहनम् ।

गङ्गाधर: – स्नेहनम् ।

अनयो: पदयो: विवरणे वैधर्म्यम् अस्ति ।

– चक्रपाणि: योगीन्द्रनाथसेन: च एताभ्याम् उन्मार्गगमनम् इति अर्थ: स्वीकृत: प्रत्युत गङ्गाधारेण ज्योतिषचन्द्रसरस्वतिना च स्नेहनम् न सम्यक् भवनम् इति अर्थ: स्वीकृत: ।

– भोजनविधौ: अतिद्रुतं भोजनं न करणीयं तथा तथा कृते किं किं व्यापद: उत्पत्स्यन्ते इत्यस्य विवरणम् अस्मिन् सूत्रे कृतम् । अत्र उभयो: पाठभेदयो: वैधर्म्यस्य च विचारं कुर्म: ।

– चक्रपाणि: योगीन्द्रनाथसेन: च उभौ उत्स्नेहनस्य अर्थम् उन्मार्गगमनम् इति वर्णयत: ।

– उन्मार्गगमनम् नाम स्वस्य प्राकृतं मार्ग त्यक्त्वा अन्येन मार्गेण गमनम् ।

– अतीव जलदया गत्या अन्नं सेवेत तर्हि अन्नं मुखमार्गं अगत्वा कण्ठमार्गे, नासामार्गे च गच्छति । ततः अग्रे व्यापदः उत्पद्यन्ते । अतः एषः अर्थः युक्तियुक्तः अस्ति ।

– गङ्गाधारेण स्नेहनम् इति पाठः वर्णितः ।

अतीव जलदं अन्नं सेवेत तर्हि तस्य द्रव्यस्य स्वाभाविकः स्नेहः न उत्पद्यते । अन्नस्य योग्यरीत्या क्लिन्नता सुपाचनाय अत्यावश्यकी भवति । यदि त्वरया अन्नं सेवते तर्हि तत् सम्यक न क्लिद्यति । तेन तस्य पचनं शरीरे सम्यक् न भवति । एषः अतिद्रुतं अन्नसेवनस्य व्यापद् अस्ति ।

– एतादृशः अर्थः ज्योतिषचन्द्रसरस्वतिः उत्स्नेहनम् इति पाठं स्वीकृत्य वर्णितः ।

कफः भुक्तस्य अन्नस्य स्नेहनं करोति । यदि अतिद्रुतं भुक्तं तर्हि लालादिरुपं कफस्त्रावं अल्पसमयः मिलति । कफाय अन्नसंसर्गः अल्पकालम् अल्पमात्रायां भवति । तेन अन्नस्य स्नेहनं सम्यक् न भवति । एषः अपि पाठः तस्य अर्थः च योग्यौ एव ।

निष्कर्षः –

१) उभौ पाठौ योग्यौ ।

२) टीकाकारैः कृतौ अर्थौ अपि योग्यौ ।

३) द्वौ अपि पाठौ वैधर्म्यं च स्वीकरणीयौ ।

(३) संदर्भ –   च. वि. १/२५ (७)

मूलसूत्रम् – नातिद्रुतमश्नीयात् अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनम् ।।

अधिकरणम् – आहारविधिविधानस्य वर्णने अतिद्रुतान्नसेवनस्य निषेध: तथा अतिद्रुतान्नसेवनेन उत्पद्यमाना: व्यापदा: च वर्णिता: ।

वैधर्म्यं – अस्मिन् सूत्रे अवसादनम् इति पदे त्रय: पाठभेदा: सन्ति । तदनुसारं वैधर्म्यम् अस्ति ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | अवसादनम् | अवसादनम् अवसाद: |
| गङ्गाधर: | स्वादनम् | स्वादस्य भोजनस्य च यथास्थानं न भवति |
| योगीन्द्रनाथसेन: | अवसादनम् | अवसादकरत्वम् |
| ज्योतिषचन्द्रसरस्वति: | अवसदनम् | अव मार्गमतिक्रम्य सदनं गमनं तेन प्राणवहस्त्रोतसि प्रवेश: । |

विवेचनम्

– प्रथमं पदानां व्याकरणं पश्याम: । अत्र अवसादनम्, अवसदनम् अवसाद: स्वादनम् च एतेषां पदानां व्याकरणं पश्याम: ।

– अवसाद: – पुं (अव+सद्+घञ्।) अवसन्नता । विषाद:, साद:, विषस्यता । हेमचन्द्र: । शेष: क्षय: । किरातार्जुनीयम् (शब्दकल्पद्रुम । खण्ड: १ / १६९)

– Sinking (as of a chair), The growing faint (as of a sound), Failing exhaustion, fatigue, lassitude, Defeat, want of energy or spirit, end, termination

(Monier Williams / १०५)

– अवसादनम् – am. n. oppressing, disheartening, The state of being disheartened.

(Monier Williams / १०५)

– अवसद् – ava - sad, P-sidati. to sink, to sinkdown, faint, growlean become exhausted, slacken, come to an end to render down hearted, dispirit, ruin to frustrate

(Monier Williams /१०४)

– स्वादनम् –क्ली(स्वाद्+ल्युट्) प्रीतिकरणम् । रसग्रहणम् । स्वाद्धातो: अनट् प्रत्ययेन निष्पन्नम्

अवसाद: । अवसादनम् । अवसदनम्

– उपरोल्लिखितात् व्याकरणात् लक्ष्यते यत् अवसाद:, अवसादनम्, अवसदनम् एतानि पदानि क्षयकारकम्, च्यवनं मज्जनं, समापनं, क्लमनं, मन:क्लमनं, विषाद: एतै: अथै: सन्ति ।

– अस्मिन् अधिकरणे भक्षितान्नार्थं पदम् एतद् उपयोजितम् । यदि अतीव द्रुतगत्या भक्ष्येत तर्हि भुक्तान्नस्य अवसाद: भवति इति वर्णितम् । अयं पाठ: योग्य: भाति यत: अतित्वरया: अन्नं यदि सेवितम् तर्हि भुक्तान्नं सम्यक् न पचति । सूक्ष्मांशे तस्य विघटनं न भवति । स्थूलसूक्ष्मे विघटने विकृतिं यात: । घनभागस्य शिथिलिकरणं न भवति ।

– अन्नस्य विघटनं सम्यक् न भूत्वा तस्य गुणानां कर्मण: च क्षय: भवति ।

– अवसादनम् इति पदं ग्रन्थे अन्यत्रापि अनेनैव अर्थेन योजितम् ।

१) अवसादनम् – उत्सन्नव्रणमांसक्षयकरम् । चक्रपाणि च. चि. २५/४२

२) अनुपानकर्म – भुक्तमवसादयति । च. सू. २७/३२६

३) कटुरसकर्म – व्रणान् अवसादयति । च. सू. २६/४३ (४)

– अवसादनं अनुत्साहकृत् । डल्हण सु.सू.४२/१०(४)

४) बहुदोषलिङ्गम् – अवसादक: । च. सू. १६/१४

टीका – मनोऽवसाद: । चक्र.

५) श्लेष्मवृद्धिलक्षणम् – अवसाद: । सु. सू. १५/१३

टीका – अवसाद: चित्तदेहयो: ग्लानि: । डल्हण

६) व्रणोपक्रम: – अवसादनम् । च. चि. २५/४२, सु. सू. ३७/३२

७) अवसादनम् उन्नतव्रणस्य निम्नत्वकरणम् । डल्हण सु. चि. १/८३

८) अवसादनम् ग्लानि: । डल्हण सु. चि. ३७/९१

९) सादयति अवसादयति शोषयति इत्यर्थ: । डल्हण सु. उ ६/२३

– अन्ये साहित्ये अपि 'अवसादनं' पदम् अनेनैव अर्थेन योजितम् ।

''धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।'' किरातार्जुनीयम् ।

– तस्मान् अवसदनम् अवसादः, अवसादनम् एते पाठाः योग्याः एव इति मे मतिः ।

स्वादनम्

– अयं पाठः गङ्गाधरेण स्वीकृतः । तस्य अर्थः 'स्वादस्य भोजनस्य यथावस्थानं न भवति' एवं टीकातः गृहीतः । इत्यर्थः भोजनस्य स्वादः सम्यग् न भवति इति ।

– गङ्गाधरस्य अस्मिन् पाठे 'न' पदं अग्रे क्रियापदेन सह वर्णितम्

''अतिद्रुतं हि भुञ्जानस्य तत् स्नेहनस्वादनभोजनस्याप्रतिष्ठानं भोज्यदोषसाद्गुण्योपलब्धिश्च न नियता ।''

इमम् अनुसृत्य अर्थः भवति अतिद्रुतं यदि भुक्तं तर्हि अन्नस्य स्वादः सम्यक् न ज्ञायते ।

व्याकरणानुसारम् अपि अयं योग्यः अर्थः ।

– अतः गङ्गाधरेण स्वीकृतः अयं पाठः अपि योग्यः एव भाति ।

निष्कर्षः

१) त्रयः अपि पाठाः योग्याः ।

२) व्याकरणम् अन्वयार्थः, अतीतावेक्षणम्, अनागतावेक्षणम् स्वसंज्ञा च एताः तन्त्रयुक्तयः तथा स्वतन्त्रप्रत्ययः परतन्त्रप्रत्ययः च एतान् अनुसृत्यः चतुर्णामपि टीकाकाराणां पाठाः टीकाश्च योग्याः सन्ति इति मे भाति ।

(४) सन्दर्भः – च. वि. ४ । ८

मूलसूत्रम्

इमे तु खल्वन्येऽप्येवमेव भूयोऽनुमानज्ञेया भवन्ति भावाः । तद्यथा उपधिमनुबन्धेन... इति ।

अधिकरणम्

' त्रिविधरोगविशेषविज्ञानम् ' अस्मिन् प्रकरणाधिकरणे ' त्रिविधपरीक्षाभिः ज्ञेया भावाः ' इति उपप्रकरणाधिकरणे अनुमानज्ञेयभावानां वर्णने एतद् सूत्रम् आगतम् ।

पाठभेदः वैधर्म्यं च – अस्य सूत्रस्य ' उपाधिम् ' पदे पाठभेदः तथा वैधर्म्यम् दृश्यते ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | उपधिम् | उपेत्य धीयते इति उपधिः छद्म इत्यर्थः । |
| गङ्गाधरः | उपाधिम् | उपाधिः आधुनिकसङ्केतः सङ्केतकर्तृभिः कृतः । |
| योगीन्द्रनाथसेनः | उपाधिम् | उपाधिं सात्विकत्वादिकं अनुबन्धेन सत्वादीनामनुवृत्या |
| ज्योतिषचन्द्रसरस्वतिः | उपाधिम् | उपाधिं धर्मचिन्तां अनुबन्धेन यज्ञाद्यनुष्ठानेन । |

विवेचनम्

१) चक्रपाणेः टीकायां तथा तया टीकया सह सति चरकस्य पाठे 'उपधिम् ' इति पदपाठः अस्ति । प्रत्युत अन्येषां त्रयाणां टीकायां तथा मूले सूत्रे ' उपाधिम् ' इति पदपाठः अस्ति ।

२) उपधिः – पुं उप + धा – भावे क्लि । अन्यथा प्रकाशनरुपे व्यापारः ।

छलम् । आधारः । रथचक्रम् । (वाचस्पत्यम् / खण्डः २ )

– पुं उपधीयते आरोप्यते ऽ नेन । उप + धा + किः । कपटः । अमरः ।

रथचक्रम् । हेमचन्द्रः ( शब्दकल्पद्रुमः / खण्डः १ )

Act of putting to, addition. The part of wheel between the nase and the circumforence , Fraud - circumvention condition attribute, support

(Monier Williams/199)

Fraud, dishonesty, suppression of truth, a false suggestion, terrer, threat, compulsion. (आपटे शब्दकोशः / ११०)

३) उपाधि: अ) पुं – उप + आ + धा + कि: । धर्मचिन्ता । कुटुम्बव्यापृत: । छलम्

विशेषणम् । नामचिन्हम् । अलङ्कारमते जातिगुणक्रियायदृच्छास्वरुप: ।

(शब्दकल्पद्रुम:/खण्ड: १/२६२)

आ) पु. उप + आ+ धा + कि । अन्यथास्थितस्य वस्तुनोऽन्यथा प्रकाशनरुपे ।

कपट: । स्वसामीप्यादिना अन्यस्मिन् स्वधर्मारोपसाधने विशेषभेदे । धर्मचिन्ता ।

उपलक्षणरुपे विशेषणे च । कुटुम्बव्याप्टते । उपनामानि । पदार्थभेदे । आधुनिकसङ्केत: ।

(वाचस्पत्यम्/ खण्ड: २/ १३५४ )

इ)That which is put in the place of another thing, a substitute, anything which may taken for or has the mere name or appearance of another thing

- appearance, phantom, disguise (Monier Williams)

ई) Fraud, deceit, tricle Deception, disguise, discriminative or distinguishing,property, attribute, peculiarity, A title, nickname. limitation, condition, object. A man who is careful to support his family. (आपटे शब्दकोश: । ११५ )

४) ‘ उपाधि: ’ पदस्य चरक तथा सुश्रुतसंहितागता: अन्ये संदर्भा: टीका च अधोल्लिखितवत् ।

अ) औपधिकम् छद्मप्रचारिणम् । चक्रपाणि: च. शा. ४ । ३८

आ) औपधिकम् शाठ्यप्रचारिणम् । चक्रपाणि: च. शा. ८ । २१

इ) औपधिकम् छद्मपरम् । डल्हण: सु. शा. ४ । ८८

५) उपाधि: इति पदं चरकसंहितायाम् अथवा सुश्रुतसंहितायां कुत्रापि न उल्लिखितम् ।

६) परं च वि ४ / ८ मध्ये गङ्गाधर: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: ‘उपधि:’ अपेक्षया ‘उपाधि:’ इति मूलसूत्रे पाठ: स्वीकृत: ।

७) उपधि: उपाधि: च एतयो: कोशगतौ अथौ लक्ष्यते चेत् टीकाकारै: स्वीकृता: अर्थ: योग्या: एव ।

८) अस्मिन् सूत्रपाठे उपधि: उपाधि: च इति द्वौ अपि पाठौ तथा तदुपरि कृतं सर्वेषां टीकाकाराणां विवेचनं युक्तियुक्तम् अस्ति ।

निष्कर्ष: – १) वैधर्म्यं अस्ति ।

२) द्वौ अपि पाठभेदौ तथा चतुर्णाम् अपि टीकाकाराणां विवेचनं युक्तियुक्तं स्वीकरणीयं च ।

(५) सन्दर्भ: – च. वि. ५/८

मूलसूत्रम्

मूत्रवहानां स्त्रोतसां ...............तदयथा अतिसृष्टमतिबद्धं प्रकृपितमल्पाल्पम् ........।।

अधिकरणम् – मूत्रवहस्त्रोतसां मूलस्थानस्य तथा दुष्टिलक्षणानां अस्मिन् सूत्रे वर्णनम् अस्ति ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रे 'अतिबद्धम्' पदे 'प्रतिबद्धम्' इति पाठभेद: अस्ति ।

टीका

| टीकाकार: | पाठ: | टीका |
| --- | --- | --- |
| चक्रपाणि: | अतिबद्धम् | अतिसृष्टं वा अतिबद्धं वेति विकल्पेन बोद्धव्यम् अतिसृष्ट्यतिबद्धयो: एकत्रासम्भवात् । |
| गङ्गाधर: | प्रतिबद्धम् | सर्वं मूत्रणक्रियाविशेषणम् । |
| योगीन्द्रनाथसेन: | प्रतिबद्धम् | अतिसृष्टमित्यादि सर्वं मूत्रयन्तमिति क्रियाया: विशेषणम् |
| ज्योतिषचन्द्रसरस्वति: | पाठोपलब्धि: नास्ति । | |

विवेचनम्

१) अस्मिन् पदे अतिबद्धम् प्रतिबद्धम् च इति पाठभेदौ स्त: ।

चक्रपाणि: – अतिबद्धम् ।

गङ्गाधर: योगीन्द्रनाथसेन: – प्रतिबद्धम् ।

ज्योतिषचन्द्रसरस्वते: पाठ: वयं न प्राप्तवन्त: । इति टीकाकारै: स्वीकृता: पाठ: ।

२) अस्मिन् सूत्रे मूत्रवहस्त्रोतसां दुष्टिलक्षणानि वर्णितानि सन्ति । अतिसृष्टं वा प्रतिबद्धम् इति मूत्रवहस्त्रोतसां दुष्टिलक्षणम् अस्ति ।

३) अत्र सर्वै: टीकाकारै: टीका न कृता । परं सर्वाणि लक्षणानि मूत्रयन्तम् इति पदस्य विशेषणानि भवति इति लिखितम् ।

४) अतिबद्धम् – अतिमात्रेण बद्धम् । अति – व्य, प्रशंसा । अत + इ + पूजायां । प्रकर्षम् । अतिशयम् । क्रान्तम् । पूजनम् । असम्भावना । लङ्घनम् । (शब्दकल्पद्रुम)

– अतिमात्रेण प्रकर्षेण बद्धमूत्रत्वं इति एकं दुष्टिलक्षणम् ।

५) प्रतिबद्धम् – त्रि, प्रति + बन्ध – कर्मणि क्त । १.प्रतिबद्धे २. साकल्येन सम्बन्धे व्यापके च (वाचस्पत्यम् / खण्ड ६/१११३)

– त्रि, प्रतिबन्धविशिष्टः । प्रतिपूर्वबन्धधातोः कर्मणि क्तप्रत्ययेन निष्पन्नः ।

(शब्दकल्पद्रुम / खण्ड ३)

– साकल्येन संपूर्णतः बद्धमूत्रत्वम् इति अन्यं पाठभेदजनितं दुष्टिलक्षणम् भवति ।

६) सर्वतः विवेचनोत्तरं एवं भाति यद् द्वौ अपि पाठभेदौ युक्तियुक्तौ स्तः ।

७) अभिप्रेतार्थतः विधर्मता नास्ति ।

निष्कर्षः

१) उभौ पाठौ युक्तियुक्तौ तथा स्वीकरणीयौ च ।

२) अभिप्रेतार्थतः विधर्मता अस्ति ।

(६) सन्दर्भः – च. वि. ५/२१

मूलसूत्रम् – संधारणादत्यशनादजीर्णाध्यशनात्तथा ।

वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च ।।

अधिकरणम् – पुरीषवह स्त्रोतसां दुष्टिनिदानम् अत्र वर्णितम अस्ति।

पाठभेदः – अस्मिन् सूत्रे 'संधारणात्' पदे पाठभेदः अस्ति।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | संधारणात् | टीका नास्ति |
| गङ्गाधरः | विधारणात् | विधारणादिति वर्चोवेगविधारणात्। |
| योगीन्द्रनाथसेनः | संधारणात् | शकृद्वेगस्य संधारणात् । |
| ज्योतिषचन्द्रसरस्वतिः | विधारणात् | विधारणात् मलवेगरोधात्। |

विवेचनम्

१) अस्मिन् पदे संधारणात् विधारणात् च इति पाठभेदौ स्तः।

चक्रपाणिः योगीन्द्रनाथसेनः च – संधारणात्

गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च – विधारणात्

इति टीकाकारैः स्वीकृताः पाठाः।

२) अस्मिन् पदे पाठभेदः अस्ति परं टीकाकाराणां विवेचने वैधर्म्यं नास्ति।

सवैः टीकाकाराः समान विवेचनं कुर्वन्ति । 'मलवेगस्य अवरोधः' इति तेषां टीकार्थाः ।

३) संधारणम् – सम् + धारणम् । सम् – व्य –समार्थः । प्रकृष्टार्थः । सङ्गतः । शोधनः समुच्चयः (शब्दकल्पद्रुम / खण्ड ६)

- with, together with , (monier williams)

– संधारणम् अस्य पदस्य अर्थः परिपूर्णं धारणम् अथवा प्रकर्षेण धारणम् इति । एतद् पदं पुरीष पदस्य विशेषणम् अस्ति ।

४) विधारणम्   – वि + धारणम् । वि – व्य , निग्रहः । वियोगः । निश्चयः । असहनम् । हेतुः ।

अव्याप्तिः । विनियोगः । ईषदर्थः । विज्ञानम् । विशेषः । वैरुध्य । गतिः । आलम्भः ।

– विधारणम् इति पदस्य अर्थः विशेषं धारणम् अथवा निश्चयेन धारणम् इति । तद् अपि पुरीषपदस्य विशेषणम् अस्ति ।

५) पदयोः व्यूत्पत्तेः ऊहनोत्तरं एतद् निष्कर्षयति यद् – उभयोः पाठयोः वैधर्म्यं नास्ति । अपि तु विशेषवर्णनं भाति ।

निष्कर्षः –

१) उभौ पाठौ तथा तेषां विवेचनं योग्यम् ।

२) अभिप्रेतार्थतः वैधर्म्यं नास्ति ।

(७) सन्दर्भ: – च. वि. ५/२२

मूलसूत्रम् – व्यायामादतिसंतापाच्छीतोष्णाक्रमसेवनात् । स्वेदवाहीनि दुष्यन्ति . . . ।।

अधिकरणम् – स्वेदवहस्रोतसां दुष्टिनिदानम् अस्मिन् सूत्रे वर्णितम् अस्ति ।

पाठभेद: वैधर्मं च – अस्मिन् सूत्रे 'अतिसंतापात्' पदे 'अतिसंक्षोभात्' इति पाठभेद: अस्ति । तेन विधर्मता उत्पादयति ।

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | अतिसंतापात् | टीका नास्ति । |
| गङ्गाधर: | अतिसंक्षोभात् | टीका नास्ति । |
| योगीन्द्रनाथसेन: | अतिसंक्षोभात् | टीका नास्ति । |
| ज्योतिषचन्द्रसरस्वति: | पाठोपलब्धि: नास्ति । | |

विवेचनम् १) अस्मिन् पदे अतिसंतापात् अतिसंक्षोभात् च इति पाठभेदौ स्त: ।

| | |
|---|---|
| चक्रपाणि: | – अतिसंतापात् |
| गङ्गाधर: योगीन्द्रनाथसेन: च | – अतिसंक्षोभात् |
| ज्योतिषचन्द्रसरस्वति: | – पाठस्य उपलब्धि नास्ति । |

इति टीकाकारै: स्वीकृता: पाठा:

२) अस्मिन् सूत्रे स्वेदवहस्रोतसां दुष्टिनिदानानां वर्णनम् अस्ति ।

३) स्वेद: पित्तस्य आश्रित: भावपदार्थ: तथा शरीरे निर्मित: मलभूत: भावपदार्थ: अस्ति ।

४) पित्तेन सह आश्रयाश्रयीभावरुपेण स्वेद: वर्तते ।

५)अनेन न्यायेन पित्तप्रकोपका: हेतव: स्वेदवहस्रोतसां दुष्टिनिदानम् अपि भवन्ति । तेन उभयो: पाठयो: वर्णिते निदाने पित्तप्रकोपका: स्त: । तन्यायेन एते निदाने स्वेददोषके अपि स्त: ।

६)एवं उभौ पाठौ योग्यौ भवत: । टीकाकारै: अपि अस्मिन् विवेचनं न कृत्वा एतौ पाठौ स्वीकृतौ ।

निष्कर्ष: – उभौ पाठौ युक्तियुक्तौ स्वीकरणीयौ च ।

(८) सन्दर्भ: – च. वि. ६/ ५

मूलसूत्रम् – तस्मात् यथाचित्रं विकारानुदाहरणार्थम् ।

अधिकरणम् – रोगानीकम् अधिकरणस्य व्याधीनामपरिसंख्येयत्वम् इति उपाधिकरणे अस्मिन् सूत्रस्य वर्णनम् अस्ति ।

पाठभेद: वैधर्मं च – अस्मिन् सूत्रे 'यथाचित्रं' पदे पाठभेद: अस्ति । तेन विधर्मता उत्पादयति ।

पाठ: – चक्रपाणि: – तस्मात् यथाचित्रं विकारानुदाहरणार्थम् ।

गङ्गाधर: – तस्मात् यथोचितं विकारानुदाहरणार्थम् ।

योगीन्द्रनाथसेन: – तस्मात् यथोचितं विकारानुदाहरणार्थम् ।

ज्योतिषचन्द्रसरस्वति: – तस्मात् यथोचितं विकारानुदाहरणार्थम् ।

टीका –

चक्रपाणि: – यथाचित्रमिति यथाविन्यासं तेन यानेव पूर्वाचार्या विकारानधिकमत्वेनोक्तवन्त: तानेव व्याख्यास्याम:, न तु सर्वान् अशक्यत्वात् । किंवा 'यथोचित्रम्' इति पाठ: ।

गङ्गाधर: – यथोचितमिति प्रायोभाविनो रोगस्य ।

योगीन्द्रनाथसेन: – तस्मात् व्याधीनामपरिसंख्येयत्वात् उदाहरणार्थं यथोचितं कांश्चित् विकारान् तेषामनवशेषेण वस्तुमशक्यत्वात् ।

ज्योतिषचन्द्रसरस्वति: – तस्मात् व्याधीनामसंख्येयत्वात् दोषाणाञ्च संख्येयत्वाद् उदाहरणार्थं विकारान् यथोचितं यथाविन्यस्तं तन्त्रेऽस्मिन् ये ये व्याधय: उल्लिखितास्तानेव असंख्येयत्वात् न तु सर्वान् विकारान् दोषांश्च संख्येयत्वात् अनवशेषेण सर्वानेव अनुव्याख्यास्याम: ।

विवेचनम् – चक्रपाणिना यथाचित्रं अन्यै: त्रिभि: यथोचितम् इति भिन्न: पाठ: स्वीकृत: अस्ति ।

– तथापि यदि टीका निरीक्षिता तर्हि अभिप्रेतार्थत: वैधर्म्यं नास्ति इति ज्ञायते ।

– अत्र सर्वासां व्याधीनां वर्णनमशक्यमस्ति । यत: विविधै: भेदै: व्याधय: अपरिसंख्येया: सन्ति । अत: ताभ्य: कासांश्चित् व्याधीनां एकदेशेन वर्णनं कृतमस्ति ।

– उपरोक्त: सूत्रपाठ: एतदेव कथयितुमस्ति । यद्यपि शब्दश: पाठभेद: दृश्यते तथापि वैधर्म्यं नास्ति ।

अ) यथा – उचितम् –

– उचितमिति पदस्य द्वौ अर्थौ स्त: ।

१) योग्य: २) अभ्यास:

– अत्र 'उचितम्' इति पदस्य 'योग्य:' इति अर्थ: अभिप्रेत: अस्ति । पूर्णतया सर्वासां व्याधीनां वर्णनं ग्रन्थविस्तारभयेन बुद्धिमर्यादया च अशक्यमस्ति ।

– अत: योग्यानां कासांञ्चित् व्याधीनां वर्णनं कृतमस्ति ।

– अनेन अर्थेन 'यथोचितम्' इति पदं योजितम् ।

ब) यथा–चित्रम् –

– चक्रपाणिना एतद् पदम् उपयोजितम् । 'चित्रम्' इति पदस्य विभिन्ना: अर्था: सन्ति । चक्रपाणिना टीकायां 'यथाचित्रम्' इति यथाविन्यासमेव वर्णितमस्ति । विन्यास: इति पदस्य अर्थ: विशेषत: संक्षेपेण कृतं वर्णनमिति भवति ।

– अत: सर्वासां व्याधीनां वर्णनापेक्षया संक्षेपत: कासांञ्चित् व्याधीनां वर्णनं कृतमिति एव अर्थ: अभिप्रेत: अस्ति ।

निष्कर्ष: – यद्यपि शब्दार्थत: वैधर्म्यं भासते तथापि अभिप्रेतार्थत: वैधर्म्यं नास्ति । तस्य निरास: कृत: अस्ति ।

(९) सन्दर्भः – च. वि. ७/३

मूलसूत्रम् – लघुव्याधितोऽपरः सत्वादीनामधमत्वाद् गुरुव्याधित इव दृश्यते ।

अधिकरणम् – व्याधितरुपाधिकरणम् अधिकरणे अस्मिन् सूत्रस्य वर्णनम् अस्ति ।

पाठभेदः वैधर्मं च – अस्मिन् सूत्रे 'अधमत्वाद्' पदे पाठभेदः अस्ति । तेन विधर्मता उत्पादयति ।

| टीकाकारः | | पाठ | टीका |
|---|---|---|---|
| चक्रपाणिः | – | अधमत्वाद् | अधमत्वात् इति अवरत्वात् । |
| गङ्गाधरः | – | अल्पत्वात् | अल्पत्वात् इति अभावात् । |
| योगीन्द्रनाथसेनः | – | अल्पत्वात् | अल्पत्वात् इति अपकर्षणदर्शनात् । |
| ज्योतिषचन्द्रसरस्वतिः | – | अधमत्वाद् | अधमत्वात् इति निकृष्टबलत्वात् । |

अत्र चक्रपाणिना ज्योतिषचन्द्रसरस्वतिना च 'अधमत्वात्' प्रत्युत गङ्गाधरेण योगीन्द्रनाथसेनेन च 'अल्पत्वात्' एवं प्रकारकः पाठभेदः मूलसुत्रे वर्णितः ।

विवेचनम्

विषयाधिकरणम् – यः रुग्णः लघुव्याधितः सः सत्वबलशरीराणां निकृष्टतया गुरुव्याधितः भासते ।

– अल्पत्वाधमत्वयोः कोशगतौ अर्थौ अधोनिर्दिष्टौ ।

– अधम – त्रि, अव – अम – घादेशः । (वाचस्पत्यम् १/१२०)

त्रि, अव पालने + अम वस्य – आदेशः

पर्यायाः– न्यूनम् निन्दितम् अपकृष्टम् , निकृष्टम् , कुत्सितम् , गर्ह्यम्

(शब्दकल्पद्रुम/खण्डः १/३६)

– अल्पत्व – त्रि अल् + प । ईषत् , मनाक् , स्तोकम् (शब्दकल्पद्रुम/खण्ड १/ १२१)

– यदि द्वयोः पदयोः अर्थो लक्ष्यते चेत् तन्मध्ये वैधर्म्य नास्ति । एकमेव अर्थम् दर्शयन्ते एते पदे स्तः ।

– यदि 'अधमत्वम्' पदं योज्यते तर्हि वाक्यस्य अर्थः एवं भवति – लघुव्याधिते रुग्णे यदि सत्वबलशरीराणां संपद् यदि निकृष्टः अवरस्तरस्य वा स्यात् तर्हि सः गुरुव्याधितः भासते ।

– अल्पत्वात् इदं पदं योज्यते चेत् तदा वाक्यस्य अर्थः एवं भवति –

लघुव्याधिते रुग्णे सत्वबलशरीराणां संपद् अल्पं न्यूनं वा स्यात्, तेषाम् अभाव: स्यात् तदा स: गुरुव्याधित: भाति ।

तत्वत: अर्थश: वा वैधर्म्य नास्ति । किंतु अर्थांशे कश्चित् भेद: दृश्यते ।

अधमत्वम् गुणानां निकृष्टत्वं अवरत्वं दर्शयति अपि च अल्पत्वत् गुणानां न्यूनता अभाव: वा दर्शयति ।

निष्कर्ष:–

अर्थश: वैधर्म्यं नास्ति ।

अर्थावयवश: कश्चित् भेद: दृश्यते ।

द्वौ अपि पाठौ स्वीकरणीयौ योग्यौ च स्त: ।

(१०) सन्दर्भ:- च वि ७/१७

मूलसूत्रम् – त्रिवारं सप्तरात्रं वा ऽ स्थापयेत् ।

अधिकरणम् – कृमिकोष्ठचिकित्सायां अपकर्षणे आस्थापनस्य वर्णने अस्मिन् सूत्रस्य वर्णनम् अस्ति

पाठभेद: वैधर्मं च – अस्मिन् सूत्रे 'त्रिवारं' पदे 'त्रिरात्रं' पाठभेद: अस्ति । तेन विधर्मता उत्पादयति ।

| टीकाकार: | पाठ |
|---|---|
| चक्रपाणि: – | त्रिवारं सप्तरात्रं वाऽस्थापयेत् । |
| गङ्गाधर: – | त्रिरात्रं सप्तरात्रं वाऽस्थापयेत् । |
| योगीन्द्रनाथसेन: – | त्रिवारं सप्तरात्रं वाऽस्थापयेत् । |
| ज्योतीषचन्द्रसरस्वति: – | त्रिरात्रं सप्तरात्रं वाऽस्थापयेत । |

विमर्श: – (१) गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एताभ्यां त्रिरात्रम् तथा चक्रपाणि: योगेन्द्रनाथसेन: च एताभ्यां त्रिवारम् इति पाठ: स्वीकृत: ।

(२) अत्र योगेन्द्रनाथसेनस्य टीका महत्वपूर्णा विद्यते –

''त्रिवारमिति दोषापेक्षया । तथा च बस्तिसूत्रीयसिद्धौ एकोऽपकर्षत्यनिलं स्वमार्गात् पित्तं द्वितीयस्तु कफं तृतीय: (च सि ३/३ ) ।''

– त्रिवारं बस्ति: दातव्या: एतदर्थं तेन अनागतावेक्षणं तन्त्रयुक्ति साहाय्येन सिद्धिस्थानं तृतीयम् इति संदर्भ: गृहीत: ।

– तदाधारेण दोषापेक्षया त्रय: बस्तय: दातव्या: प्रथम: बस्ति: वायुं द्वितीय: पित्तं अपि तृतीय: कफं (कर्षयित्वा निष्कासति) अपकर्षति।

(३) चक्रपाणिना अत्र टीका न कृता । तथापि एते त्रय: बस्तय: दोषानुसारं दातव्या: इत्येव तम् अभिप्रेतम् अस्ति ।

(४) तथैव एष: उपक्रम: दोषानुसारं बस्तिसंख्यां निश्चित्य सप्तदिनानि कर्तव्य: ।

(५) अधुना विचारांश: त्रिरात्रं सप्तरात्रं वा इति पाठस्य । अस्य अर्थ: स्पष्ट: सरल: च अस्ति । रुग्णबलदोषबले च विचार्य स्नेहनस्वेदनोत्तरं त्रीणि अथवा सप्त दिनानि आस्थापनबस्ति: दातव्य: ।

निष्कर्षः –

(१) वैधर्म्यम् अस्ति ।

(२) द्वयोः विचारयोः प्रयोजनं ज्ञातुं शक्यम् ।

(३) द्वौ अपि विचारौ ग्राह्यौ । रुग्णबलव्याधिबलदोषबलानुसारं ऊह्यसंभवयोः तन्त्रयुक्त्योः उपयोगं कृत्वा योग्येन निर्णयेन उपक्रमः करणीयः ।

(४) प्रथमं दोषबलानुसारं एकः द्वौ अथवा त्रयः बस्तयः सप्तदिनानि दातव्याः । अथवा दोषबलानुसारं त्रीणि अथवा सप्त दिनानि प्रतिदिनं एकः एव आस्थापन बस्तिः दातव्यः ।

(११) सन्दर्भ: – च. वि. ८/४

मूलसूत्रम् – ततोऽनन्तरमाचार्यं परीक्षेत तद्यथा – पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं प्रतिपत्तिज्ञमनुपस्कृतविद्यं ------ अनहङ्कृतं-----॥

अधिकरणम् –

लक्षणाचार्यशिष्याणां परीक्षालक्षणम् अस्मिन् अधिकरणे 'आचार्यपरीक्षालक्षणम्' इति उपाधिकरणस्यान्तर्गते अस्य सूत्रस्य वर्णनमस्ति ।

पाठभेद: वैधर्म्यं च ।

अस्मिन् सूत्रे 'अनुपस्कृतविद्यम्' इति पदे पाठभेद: तेन च वैधर्म्यं दृश्यते ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | अनुपस्कृतविद्यम् | अनुपस्कृतविद्यमिति शास्त्रान्तरज्ञानेन नास्ति एव उपस्कृता विद्या यस्य स तथा, य: आयुर्वेदज्ञ: सन् शास्त्रान्तेरणापि संस्कृतो भवति, स तु नितरामुपादेय: |
| गङ्गाधर: | उपस्कृतविद्यम् | उपस्कृतविद्यं तदायुर्वेदीयतन्त्रविद्या येन तदर्थ पर्यवदातत्वेनोपार्जिता पुनरुपस्कृता शास्त्रान्तरसमूह अध्ययनेन संहतीकृता वा भूषणीकृता वा दृढतायां पुन: पुन: प्रतियतिता वा तर्कान्वितीकृता वा तश्चाचार्यतयैवोरीकुर्यात् इत्युपस्कृतविद्यमाचार्यं विद्यात् । अनुपस्कृतविद्यमिति पाठे तु अविकृतीभूता यस्य विद्या तमाचार्यं विद्यात् । |
| योगीन्द्रनाथ सेन: | उपस्कृतविद्यम् | उपस्कृता शास्त्रान्तरज्ञानेन संस्कृता विद्या येन तम् । अनुपस्कृतविद्यमिति पाठे तु अविकृतविद्यम् । विकारे सुट् । |
| ज्योतिषचन्द्रसरस्वति: | अनुपस्कृतविद्यम् | अनुपस्कृतविद्यमिति अविकृतज्ञानम् । |

विवेचनम् –

– चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एताभ्यां 'अनुपस्कृतविद्यम्' इति पाठ: स्वीकृत: । प्रत्युत गङ्गाधर: योगेन्द्रनाथसेन: च एताभ्यां उपस्कृतविद्यम् इति पाठ: स्वीकृत: । आदौ एतौ पाठौ तयो: च टीकानाम् ऊहनं कुर्म: ।

अनुपस्कृतविद्यम्

एष: पाठ: चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एताभ्यां स्वीकृत: । तथैव गङ्गाधर: योगेन्द्रनाथसेन: च एताभ्याम् अपि 'अन्या पाठभेद:' इति अस्य पदस्य उल्लेख: क्रियते ।

चक्रपाणे: व्याख्या –

– अन्यानां शास्त्राणाम् अध्ययनं कृत्वापि यस्य विद्या (स्वशास्त्रज्ञानं) न उपस्कृता स: अनुपस्कृतविद्या ।

उदा– य: आयुर्वेदशास्त्रज्ञ: अस्ति तस्मै च अन्येषां शास्त्राणाम् अपि ज्ञानमस्ति एतेन शास्त्रान्तरज्ञानेन तु यस्य आयुर्वेदशास्त्रज्ञानं न उपस्कृतम् एवंविध: पुरुष: अतीव योग्य: ।

– अत्र ' उपस्कृतम्' नाम अन्यशास्त्रज्ञानेन स्वशास्त्रज्ञानस्य अभिभवनम् इति भवति । कश्चित् पुरुष: असङ्ख्यशास्त्राणाम् अध्ययनं करोति परन्तु तेन स: स्वस्य मूलशास्त्रज्ञानं विस्मरति । एवंविध: पुरुष: आचार्यपद: न अर्हति ।

– किन्तु य: पुरुष: असङ्ख्यानां शास्त्राणाम् अध्ययनं कृत्वापि तेषां अन्यशास्त्राणां ज्ञानस्य परिणामं स्वशास्त्रे नातिवर्तयते स एव आचार्य: भवितुम् अर्हति ।

– चक्रपाणे: विचार: एतादृश: अस्ति ।

ज्योतिषचन्द्रसरस्वते: व्याख्या

– अनुपस्कृतविद्यं नाम अविकृतं ज्ञानम् ।

– गङ्गाधरेण योगेन्द्रनाथसेनेन च पाठभेद: इति अनुपस्कृतविद्यम् एषा व्याख्या वर्णिता । ज्योतिषचन्द्रसरस्वते: एषा व्याख्या एतयो: व्याख्यां पूर्णतया अनुसरति ।

– अत्र उपस्कृतं नाम विकृतम् इति ।

– यस्य विद्या (ज्ञानम्) अन्यैः बाह्यैः इतरैः वा घटकैः न विकृता स एव योग्यः ज्ञानसम्पन्नः आचार्यः ।

उपस्कृतविद्यम्

गङ्गाधरस्य व्याख्या

– येन आचार्येण निजगुरुसमीपे आयुर्वेदतन्त्रविद्या प्राप्ता तथैव तेषु शास्त्रेषु अर्थतत्वनिश्चये सन्देहशून्यत्वं प्राप्तं तदनन्तरं सा विद्या –

– अन्यशास्त्राणाम् अध्ययनं कृत्वा तेषु आवश्यकानां विषयाणां संहतिकरणं कृत्वा

– अन्यशास्त्राणां सन्दर्भाणां स्थाने आधारं कृत्वा स्वशास्त्रं भूषयित्वा

– पुनः पुनः स्वशास्त्राभ्यासं दृढयित्वा

– तर्काधारेण स्वशास्त्रम् अन्वेत्य पुनः पुनः उपस्कृता स एव योग्यः आचार्यः ।

– अत्र 'उपस्कृतं' नाम बृंहणं (करणीयं) वर्धनम्, अलङ्करणं, दृढीकरणम् अन्यैः घटकैः विकृतत्वात् रक्षणम् इति भवति ।

योगेन्द्रनाथसेनस्य व्याख्या

– उपस्कृतविद्या नाम शास्त्रान्तरज्ञानेन संस्कृता विद्या ।

– नाम अन्यशास्त्राणाम् अध्ययनेन स्वशास्त्रम् उपबृंहणीयम् ।

पाठभेदः – गङ्गाधरः योगेन्द्रनाथः सेनः च एताभ्यां 'अनुपस्कृतविद्यम्' इति अन्यपाठः वर्णितः । तस्य व्याख्यापि समाना एव ।

उपस्कृतम् – furnished with added, supplied, prepared, ornamented, decorated , embellished

(monier william)

– त्रि, उप + कृ – क्त उपस्कारशब्दोक्तभूषणादौ सुट् ।

भूषिते, संहते, संस्कृते, विकृते, अध्याहृते, ।

(वाचस्पत्यम्/खण्डः २।१३३९)

| कोशस्य अर्थ: | | टीकाकाराणाम् अर्थ: |
|---|---|---|
| भूषिते | – | भूषणीकृता (गङ्गाधर:) |
| संहते | – | संहतीकृता (गङ्गाधर:) |
| संस्कृते | – | संस्कृता (चक्रपाणि:) |
| विकृते | – | विकृता |
| | | (योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: गङ्गाधर:) |
| अध्याहृते | – | –––––– |

एवं टीकाकाराणां सर्वे अर्था: कोशसदृशा: एव ।

– एवं पाठभेदे शब्दार्थत: च वैधर्म्यं यद्यपि अस्ति तथापि अभिप्रेतार्थे वैधर्म्यं नास्ति ।

निष्कर्ष:

१) द्वयो: पाठभेदयो: अभिप्रेतार्थ: समान: एव ।

२) गङ्गाधर: योगीन्द्रनाथसेन: एताभ्यां पाठयो: उल्लेख: व्याख्या च कृता अस्ति ।

३) अत: तत्वत: वैधर्म्यं नास्ति ।

(१२) सन्दर्भः – च. वि. ८।१५

मूलसूत्रम्

यच्चाचार्यः शिष्याय शुश्रूषवे प्रसन्नः क्रमेणोपदिशति गुह्यमभिमतमर्थजातं तत् परस्परेण सह जल्पन् पिण्डेन विजिगीषुराह संहर्षात् –––– ।

अधिकरणम् – तद्विद्यसंभाषा इति त्रिविधे ज्ञानोपाये तृतीयस्य उपायस्य वर्णने इदं सूत्रं वर्णितम् ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे 'पिण्ड' इति पदस्य वर्णने पाठभेदः वैधर्म्यं च स्तः ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | पिण्डेन | पिण्डेन सारोद्धारेण । |
| गङ्गाधरः | पण्डेन | पण्डेन स्वपाण्डित्यप्रकाशनेन । |
| योगीन्द्रनाथसेनः | पण्डेन | पण्डेन स्वपाण्डित्यप्रकाशनेन । |
| ज्योतिषचन्द्रसरस्वतिः | पण्डेन | पण्डेन निर्बोधेन । |

विवेचनम्

१) पाठः – केवलं चक्रपाणिना 'पिण्डेन ' इति पाठः गृहीतः उत शेषैः त्रीभिः पण्डेन इति ।

२) संभाषाकरणस्य उपयोगाः अस्मिन् सूत्रे वर्णिताः । केन केन उपदेशेन संभाषा करणीया तद् अस्मिन् सूत्रे वर्णितम् ।

३) कोऽपि शिष्यः सेवया शुश्रूषया च गुरोः प्रसन्नतां प्राप्नोति । तया प्रसन्नतया गुरुः तम् किमपि गुह्यं महान्तं विषयं पाठयति यः विषयः गुरुणा अन्येभ्यः शिष्येभ्यः अकथितः ।

एवं गुरोः विशेषोपदेशं प्राप्तेन शिष्येण सह सम्भाषा समये सः विजिगीषुः शिष्यः ईदृशः गूढं गम्भीरं अनुक्तं विषयं पुरस्थापयति ।

तेन अनासायेन सः गुह्य विषयः ज्ञायते यः तेन शिष्येण महता कष्टेन अर्जितः अस्ति ।

– अयमपि सम्भाषायाः एकः लाभः । अस्मिन् विवरणे 'पिण्डम् ' इति पदमागतम् ।

४) 'पण्डः' इत्यर्थः स्वपण्डित्येन प्रकाशनम् । एषः अर्थः गङ्गाधरः योगीन्द्रनाथसेनः च एतौ स्वीकुरुतः ।

– उत निर्बोधत्वं नाम संपूर्णबोधकरणम् इति अर्थः ज्योतिषचन्द्रसरस्वतिः स्वीकरोति ।

– संपूर्णतया निःशेषं बोधं कारयितुं स्वशास्त्रे पाण्डित्यं अतीव महत्वम् अर्हति ।

– तस्मात् गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतेषां व्याख्यासु वैधर्म्यं नास्ति ।

५) 'पिण्डः' इत्यस्य अर्थः चक्रपाणिना सारोद्धारः कृतः । विजिगिषुना वृत्त्या गूढः विषयः सारतः कथनीयः इति अर्थः प्रतीयते ।

अस्मिन् अपि पाण्डित्यं स्यात् तदा गूढाः विषयाः ज्ञायन्ते । तथैव किमपि विषयं सारांशतः कथयितुमपि प्रकाण्डं पाण्डित्यम् आवश्यकम् भवति ।

एवं द्वयो अपि पाठयोः अभिप्रेतार्थे वैधर्म्यं नास्ति ।

निष्कर्षः

१) पाठभेदाः सन्ति । शब्दशः वैधर्म्यं दृश्यते ।

२) परम् अभिप्रेतार्थे वैधर्म्यं नास्ति ।

३) द्वौ अपि पाठौ योग्यौ स्वीकरणीयौ च ।

(१३) सन्दर्भ: – च. वि. ८/८९

मूलसूत्रम् – कार्यं धातुसाम्यं, तस्यं लक्षणं विकारोपशम: । परीक्षा त्वस्य.....सुखेन च प्रतिबोधनं ।

अधिकरणम् –

'दशविधपरीक्षा' इति अस्मिन् उपाधिकरणे वैद्यकविद्यायां भिषक्ज्ञानार्थम् एतासां दशविधपरीक्षाणां विवरणं कृतम् । तस्मिन् उपरि निर्दिष्टे सूत्रे कार्यपरीक्षाया: वर्णनं कृतम् ।

पाठभेद: वैधर्म्यं च

अस्मिन् सूत्रे 'सुखेन प्रतिबोधनम्' इति पदे पाठभेद: अस्ति अत: वैधर्म्यम् उत्पन्नम् ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | सुखेन प्रतिबोधनम् | टीका नास्ति । |
| गङ्गाधर: | सुखेन प्रबोधनम् | ज्ञेयेषु अर्थेषु सुखेन ज्ञानं भवति । |
| योगीन्द्रनाथसेन: | सुखेन प्रतिबोधनम् | सुखेन प्रतिबोधनं जागरणम् । |
| ज्योतिषचन्द्रसरस्वति: | सुखेन प्रतिबोधनम् | सुखेन प्रतिबोधनं निद्रया सम्यक् तृप्ति: |

विवेचनम् –

१) अस्मिन् पदे गङ्गाधरेण 'सुखेन प्रबोधनम्' इति पाठ: स्वीकृत: तथैव चक्रपाणि:, योगेन्द्रनाथ: सेन:, ज्योतिषचन्द्रसरस्वति: एतेभ्य: 'सुखेन प्रतिबोधनम्' इति पाठ: स्वीकृत: ।

२) एतत् सूत्रं कार्यपरीक्षा वर्णयति । अस्मिन् सूत्रे कार्यपरीक्षाया: आयुर्वेदानुषङ्गेन वैद्यस्य ज्ञानार्थम् उपयुक्ततानुसारेण उदाहरणै: सह वर्णनमस्ति ।

३) सूत्रक्रमाङ्के २ मध्ये कार्यपरीक्षाया: व्याख्या वर्णिता अस्ति । ''कार्यं तु तद्यस्याभिनिर्वृत्तिमभिसन्धाय कर्ता प्रवर्तते'' नाम कार्यस्य अर्थ: यस्मिन् कर्तव्यबुद्धिं स्थिरीकृत्य कर्ता प्रवर्तते यस्मै कर्ता उद्युक्त: भवति तत् कार्यम् ।

– आयुर्वेदशास्त्रे कार्यं नाम धातुसाम्यम् । रुग्णेषु धातुसाम्यं प्रस्थापयितुमेव वैद्य: उद्युक्त: भवति । धातुसाम्यकार्याय एव वैद्य: चिकित्सां करोति ।

– विकारोपशमनम् तस्य लक्षणम् । यदा विकारोपशमनं भवति तदा धातुसाम्यम् इति कार्यं सिद्धम् । आधातुसाम्यं चिकित्सकेन क्रिया करणीया ।

४) एतस्य कार्यस्य परीक्षा कैश्चित् लक्षणैः करणीया । यदा एतानि लक्षणानि रुग्णे दृष्टा तदा धातुसाम्यं प्रस्थापितम् इति प्रत्यक्षानुमानाप्तोपदेशैः बोधितव्यम् ।

अस्मिन् परीक्ष्यलक्षणेषु 'सुखेन प्रतिबोधनम्' (प्रबोधनम्) इति लक्षणं समाविष्टम् ।

५) धातुसाम्यं नाम धातुवैषम्यस्य अभावः ।

'धातुवैषम्यम् – धातवोः वैषम्यं व्यवह्रियमाणस्वास्थहेतोः स्वमानात् न्यूनत्वमधिकत्वं वा ।

(चक्रपाणिः च. सू. ९/४)

स्वमानावस्थायाः न्यूनता (क्षीणत्वं) अथवा आधिक्यं (वृद्धिः) नाम वैषम्यम् । एतस्य विपर्ययः कृतः चेत् क्षयस्य वृद्धेः च अभावः स्वस्य प्राकृतावस्थायां स्थानावस्थायां साम्यावस्थायां च स्थित्वा शरीरे सञ्चरण–अवस्थायां कार्यम् इति धातुसाम्यम् ।

६) एवं प्राकृतावस्थायां सतां क्षीणो वृद्धो वा असतां धातूनां साम्यावस्थायाः लक्षणानि अस्मिन् सूत्रे वर्णितानि ।

७) यदा शरीरस्थाः सर्वधातवः साम्यावस्थायां कार्यं कुर्वन्ति तदा तेषां शरीरस्थसञ्चारः सम्पूर्णशरीरे च प्राकृतकार्यस्य अभिव्यक्तिः प्राकृता भवति ।

तेषां कार्यस्य एषा अभिव्यक्तिः यैः लक्षणैः परीक्षणीया भवति तानि लक्षणानि अस्मिन् सूत्रे वर्णितानि सन्ति ।

८) प्रतिबोधनम् – प्रति + बुध् – भावे घञ् । जागरणे, ज्ञाने । (वाचस्पत्यम् / खण्डः ६)

– Awakening, instructing (आपटे शब्दकोशः / ३५८)

– कोशेषु प्रतिबोधनस्य अर्थः जागरणम् उत्थानं ज्ञानं च इत्यर्थेन अस्ति । चक्रपाणिः ज्योतिषचन्द्रः सरस्वतिः तथा योगेन्द्रनाथः सेनः एतैः एषः पाठः स्वीकृतः ।

– चक्रपाणिना अस्मिन् पदे भाष्यं न कृतम् । योगेन्द्रनाथसेनेन एतस्य अर्थः 'जागरणम्' इति स्वीकृतः

– ज्योतिषचन्द्रसरस्वतिना प्रतिबोधनस्य अर्थः 'निद्रया जागरित्वा तृप्तेः भावेः' इति स्वीकृतः ।

– ग्रन्थे अन्यत्र प्रतिबोधनम् इति पदं न योजितम् । यदा शरीरे धातुसाम्यं भवति, कापि विकृतावस्था न भवति तदा निद्रा सम्यक् भवति ।

– यत: निद्रां विकृतयन्त: भावा: विकृतदोषा: एव शरीरे उपस्थिता: न भवन्ति ।

'.................. निद्रानाशोऽतिनिद्रता ।

बहुदोषस्य लिङ्गानि .................. ।। च. सू. १६ / १४–१५

– शरीरे सञ्चितायां बहुदोषावस्थायां निद्रानाश: अतिनिद्रता वा लक्षणं उत्पद्यते । निद्रानाश: अतिनिद्रता च द्वे अपि लक्षणे दोषप्रकोपेण उत्पद्येते ।

– एवं विपर्ययेन यदि दोषा: विकृता न भवन्ति साम्यावस्थायां भवन्ति तदा निद्रा सम्यक् भवति अत: जागरणं निद्रोत्तरा तृप्ति: च एतौ प्रतिबोधनस्य अर्थौ युक्तौ ।

९) प्रबोधनम् – प्र + बुध् – भावे ल्युट् । यथार्थज्ञाने, निद्रापगमे, उद्दीपने ।

(वाचस्पत्यम् / खण्ड: ६)

– Awakening, rousing, waking, Regaining one's consciousness, Knowledge, Wisdom, advising. (आपटे / ३६५)

– प्र + बुध – । विनिद्रत्वम् । प्रकृष्टज्ञानम् । अनुबोध: । बोधजनन: ।

(शब्दकल्पद्रुम: / खण्ड: ३)

– कोशेषु प्रबोधनम् इति पदं 'प्रतिबोधनम्' इति पदसदृशं विनिद्रत्वं, निद्रापगमनं जागरणं यथार्थज्ञानं च इत्यर्थै: योजितम् ।

– गङ्गाधरेण प्रबोधनं इति पदस्य कृत: अर्थ: 'ज्ञेयेषु अर्थेषु सुखेन ज्ञानं भवति' इति व्युत्पत्तिव्याकरणकोशानुसारै: युक्त: अस्ति ।

– चरकसंहितायां प्रबोधनम् इति पदं त्रिषु स्थानेषु योजितम् ।

अ) हिंगूषणसमायुक्तं यावत् संज्ञाप्रबोधनम् । च. सू. २४/५०

संन्यासव्याध्यां संज्ञाप्रबोधनार्थं क्रियमाणा चिकित्सा अस्मिन् अधिकरणे वर्णिता अस्ति ।

ब) प्रयोक्तव्यं मनोबुद्धिस्मृतिसंज्ञाप्रबोधनम् । च. चि. ९/३२

उन्मादव्याध्यां मनबुद्धिस्मृतिसंज्ञानां प्रबोधनाय आवश्यकी चिकित्सा अस्मिन् अधिकरणे वर्णिता अस्ति ।

क) तैरावृतानां हृत्स्त्रोतोमनसां संप्रबोधनम् । च. चि. १०/१४

अपस्मारे आवृतानि हृदयस्थानि स्त्रोतांसि तथा मनः एतेषां प्रबोधनाय चिकित्सा करणीया । अस्मिन् चक्रपाणिना व्याख्या कृता यत्

'प्रबोधनमिति दोषविरहितत्वेन सम्यक्स्वव्यापारकरम् ।'

कामपि विकृतिं विना सम्यक्प्रकारेण स्व–कार्यं कर्तुम् उद्युक्तकरणं नाम प्रबोधनम् ।

– इत्थं 'प्रबोधनम्' इति पाठः तस्य च गङ्गाधरेण कृता व्याख्यापि यथार्थः अस्ति ।

– यदि धातुसाम्यत्वं स्यात् तर्हि एव विषयाणां सम्यक् ज्ञानं भवति । ज्ञानग्रहणार्थं शरीरस्यघटकानां प्राकृतावस्था आवश्यकी ।

१०) एवं द्वावपि पाठौ तेषां च टीका युक्ता ।

<u>निष्कर्षः</u> – १) वैधर्म्यम् अस्ति ।

२) तथापि विषयानुषङ्गेन प्रतिबोधनं प्रबोधनं च पाठौ तेषां च टीका युक्तियुक्ता स्वीकरणीया च ।

३) शब्दकोशेषु प्रतिबोधनप्रबोधनयोः पदयोः अर्थौ समानौ स्तः । केवलं गङ्गाधरेण पृथक् अर्थं स्वीकृत्य व्याख्या कृता या योग्या अस्ति ।

४) वैधर्म्यं स्यादपि उभौ पाठौ टीका च युक्तियुक्ता ।

(१४) सन्दर्भः – च. वि. ८/९८

मूलसूत्रम् – वातस्तु --- प्रततरुक्षक्षामसन्नसक्तजर्जरस्वराः ।

अधिकरणम् –

दशविधाः परीक्ष्यभावाः अस्मिन् अधिकरणे प्रकृतितः परीक्षणान्तर्गतं वातलानां पुरुषाणां दोषगुणैः उत्पन्नानां लक्षणानां वर्णनम् अस्मिन् सूत्रे कृतम् ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे पाठभेदः अस्ति । तस्मात् वैधर्म्यम् उत्पन्नम् ।

टीका

| टीकाकारः | पाठः |
|---|---|
| चक्रपाणिः | प्रततरुक्षक्षामसन्नसक्तजर्जरस्वराः |
| गङ्गाधरः | प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वराः । |
| योगीन्द्रनाथसेनः | प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वराः । |
| ज्योतिषचन्द्रसरस्वतिः | पाठं न लभते । |

विवेचनम्

१) मूले एव सूत्रे चक्रपाणेः 'सन्न' इति भिन्नेन पाठेन पाठभेदः निर्मितः किन्तु अस्मिन् सूत्रे तस्मात् एव पदानां व्याख्यायाम् अपि वैधर्म्यम् उत्पन्नम् ।

स्वरसम्बधीनि वातलपुरुषस्य लक्षणानि

| लक्षणम् | चक्रपाणिः | गङ्गाधरः | योगीन्द्रनाथसेन | ज्यो.स. |
|---|---|---|---|---|
| रुक्षस्वरः | – | कर्कशः | – | – |
| क्षामः | – | क्षीणः | क्षीणः | – |
| सन्नः | हीनः | – | – | – |
| भिन्नः | | भङ्गरूपः | भग्नपात्रध्वनिसमः | – |
| सक्तः | बद्धः | अव्यक्तः | बद्धः | – |
| जर्जरः | भग्नपात्रध्वनिसमः | असंहतः | असंहतः | – |
| प्रततः | प्रसृतः | निरन्तरं विस्तरेण वा | सततम् | – |

– मूले सूत्रे टीकां लिखन् ज्योतिषचन्द्रसरस्वतिः मूलं सूत्रं न वर्णयति । तस्मात् तत्रभवतः पाठः न उपलभ्यते । तथैव अस्मिन् सूत्रे व्याख्याम् अकृतात् पाठः अनुमितुम् अशक्यः ।

२) अत्र केवलं सन्नः भिन्नः च एतयोः द्वयोः पाठभेदयोः विवेचनं क्रियते । अन्येषां वैधर्म्याणां विवेचनम् अन्यत्र कृतम् ।

– सन्न – पुं सद् + क्तः सीदति इत्यर्थे । (शब्दकल्पद्रुमः/खण्डः ५/वाचस्पत्यम् /६ खण्डः)

- set down, occupied with, sunk down, exhausted, depressed, lost, perished, motionless (monier williams / 1139)

– सन्नवाक् – speaking with low or feeble voice.

सन्नः इत्यस्य अर्थं चक्रपाणिः हीनः इति करोति । एतद् सन्नः पदं 'स्वरः' इत्यस्य विशेषणम् । अतः चक्रपाणेः अर्थः कोशार्थं युनक्ति ।

४) भिन्नः – split, broken, shattered, pierced, destroyed, violated, divided, into parts.

भिन्नस्वरः – having a broken or changed voice , discardant

( monier williams | 757)

गङ्गाधरः योगीन्द्रनाथसेनः च अपि भिन्नस्वरः इति पाठं स्वीकुरुतः । तस्यार्थः अपि कोशार्थं युनक्ति ।

५) एवम् उभौ पाठौ तथा तयोः टीकाः युक्तियुक्ताः सन्ति ।

६) अर्शचिकित्सा अध्याये सहजार्शस्य प्रकरणस्य वर्णने अधोक्तं लक्षणसूचकं सूत्रम् अस्ति ।

'क्षामभिन्नसन्नसक्तजर्जरस्वरः ।'

इदं सूत्रं तथा विमानस्थाने ८/९८ तमं सूत्रं पूर्णतया समानम् अस्ति । चरकाचार्येण अपि उभौ पाठौ अर्शसम्बधिनि सूत्रे वर्णितौ ।

अतः उभौ पाठौ स्वीकरणीयौ इति मे मतिः ।

निष्कर्षः

१) पाठभेदः अस्ति । उभौ पाठौ स्वीकरणीयौ ।

२) वैधर्म्यं सदपि उभे टीके योग्ये स्तः ।

(१५) सन्दर्भ: – च. वि. ८/११०

मूलसूत्रम् – स्मृतिमन्तो भक्तिमन्त: . . . . . . . . कल्याणाभिनिवेशिनश्च सत्वसारा: ।

अधिकरणम् – दशविधपरीक्षाभावगतस्य सारत: परीक्षणस्य अन्तर्गतं सत्वसारस्य लक्षणानां वर्णनं अस्मिन् सूत्रे अस्ति ।

पाठभेद: वैधर्म्यं च –

अस्मिन् सूत्रे 'कल्याणाभिनिवेशिन:' इति पदे पाठभेद: अस्ति । तस्मात् वैधर्म्यं दृश्यते ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | कल्याणाभिनिवेशिन: | टीका नास्ति । |
| गङ्गाधर: | कल्पनाभिनिवेशिन: | कल्पनायां क्लृप्तीकरणे अभिनिवेशशीला: । |
| योगीन्द्रनाथसेन: | कल्याणाभिनिवेशिन: | कल्याणेशु शुभेषु अभिनिवेशिन: अवहिता: । |
| ज्योतिषचन्द्रसरस्वते: | कल्याणाभिनिवेशिन: | सर्वेषां मंगलक्रर्थका: । |

विवेचनम्

१) अस्मिन् सूत्रे द्वौ पाठौ स्त: । – गङ्गाधर: – कल्पनाभिनिवेशिन: ।

चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: – कल्याणाभिनिवेशिन: इति द्वौ पाठौ स्त: ।

२) द्वौ: अपि पाठयो: टीका निरीक्षिता चेत् तस्या: अर्था: विषयांशं युनक्ति ।

३) सत्वसारस्य पुरुषस्य लक्षणानां वर्णनम् अस्मिन् सूत्रे कृतम् । उत्तमसत्त्वस्य सारभागेन युक्त: य: पुरुष: भवति तम् उत्तमा: कल्पना: स्फुरन्ति ।स: पुरुष: कल्पनानां अभिनिवेशेन युक्त: भवति ।

४) तथैव अन्येषां अपि कल्याणं भुयात् अनेन हेतुना स: उत्तमसत्वस्य सारभागेन युक्त: पुरुष: सर्वं कार्यं करोति ।

५) एवं कल्याणाभिनिवेश: कल्पनाभिनिवेश: च इति द्वौ पाठौ सत्वसार: इति अधिकरणं योग्यौ भवत: ।

निष्कर्ष: १) पाठभेद: वैधर्म्यं च अस्ति ।

२) द्वौ अपि पाठौ द्वयो: अर्था: च योग्या: सन्ति ।

(१६)सन्दर्भः – च. वि. ५/२३

मूलं सूत्रम् – आहारश्च विहारश्च यः स्यात् दोषगुणैः समः ।

धातुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषकः ।।

अधिकरणम् – अस्मिन् अधिकरणे स्त्रोतसां सामान्यदुष्टिहेतवः वर्णितः सन्ति ।

पाठभेदः वैधर्म्यं च

अस्मिन् सूत्रे 'धातुभिः' पदे गङ्गाधरेण भिन्नः पाठः गृहीतः । तेन 'धातुभिः' स्थाने 'ऋतुभिः' इति पाठं गृहीत्वा टीका कृता ।

| टीकाकारः | – | पाठः |
|---|---|---|
| चक्रपाणिः | – | धातुभिः |
| गङ्गाधरः | – | ऋतुभिः |
| योगीन्द्रनाथसेनः | – | धातुभिः |
| ज्योतिषचन्द्रसरस्वतिः | – | धातुभिः |

त्रय टीकाकाराः 'धातुभिः' इति पाठं स्वीकुर्वन्ति उत गङ्गाधरः 'ऋतुभिः' इति पाठं स्वीकरोति । – एतासु टीकासु शब्दार्थतः अल्पं वैधर्म्यं अस्ति । तस्य विवेचनं द्वितीये घटके कुर्मः । अत्र पाठभेदं विचार्यते ।

धातुभिः विगुणः –

अन्वयार्थः – धातुनां विगुणः आहारः स्त्रोतसे प्रदूषकः भवति ।

टीका – चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः च अस्य पदार्थं धातुविरोधकः इति स्वीकुरुतः । उत योगीन्द्रनाथसेनेन धातुविपरितः इति स्वीकृतः ।

विवेचनम् – पूर्णस्य सूत्रस्य अन्वयं लक्ष्यते चेत् अयं पाठः योग्यः । यौ आहारविहारौ दोषाणां समानगुणानां तथा धातूनां विरुद्धस्य स्वभावस्य भवतौ तौ स्रोतसां प्रदूषकौ स्तः ।

अतः 'धातुभिः विगुणः' इति त्रीभ्यः टीकाकारेभ्यः सम्मतः पाठः योग्यः ।

ऋतुभिः विगुणः –

अयं पाठः गङ्गाधरेण वर्णितः । तदुपरि अग्रिमा टीका कृता च ।

''ऋतुभिर्विगुणश्चाहारो विहारश्च यस्मिन्नृतौ यद्विहितं तद्विपरीतम् आहारश्च विहारश्च ऋतुभिर्विगुण: स्यात्''

– अर्थ: – यौ आहारविहारौ यस्मिन् ऋतौ येषां गुणानां विहितौ तद्विपरितौ आहारविहारौ तस्मिन् ऋतौ करणं नाम स्त्रोतसां दुष्टिहेतु: अस्ति ।

– अस्मिन् पाठे 'ऋतुसात्म्यम्' इति संकल्पना विमर्शिता ।

ऋतुसात्म्यम् –

– ऋतु: येषां गुणानां स्यात् तद्विपरितानां गुणानां आहारविहारौ तस्मिन् ऋतौ हितकरौ भवत: । एवं हितकरयो: आहारविहारयो: सेवनं नाम 'ऋतुसात्म्यम्' इति उच्यते ।

– उदाहरणार्थम् – रुक्षे उष्णे ग्रीष्मे ऋतौ स्निग्ध: द्रव: मधुर: शीत: आहार: विहार: च स्यात् । अतिशीते रुक्षे शिशिरे ऋतौ उष्णसदनं स्निग्ध: गुरु: मधुर: आदि: ऋतुगुणानां विपरीत: आहार: विहार: च स्यात् ।

– गङ्गाधरराय सम्मते 'ऋतुभि: विगुण:' पाठे अयमेव अर्थ: अभिप्रेत: । उदा. – ग्रीष्मे ऋतौ निर्दिष्टौ हितकरौ नाम स्निग्धद्रवमधुरशीतौ आहारविहारौ न सेवित्वा यदि उष्णरुक्षकटु आहारविहारौ सेवितौ चेत् वातपित्तयो: दोषाणां अत्यधिकायां मात्रायां दुष्टि: भवितुं शक्या ।

अनेन हेतुसेवनेन दोषवहानि तथा पर्यायेण अन्यानि अपि स्त्रोतांसि दूष्यन्ति तथा पश्चात् सम्प्राप्ति: सम्भाव्या ।

अत: गङ्गाधरस्य: 'ऋतुभि: विगुण:' इति पाठ: अपि अर्थवाही अस्ति ।

निष्कर्ष: –

१) 'धातुभि: विगुण:' 'ऋतुभि: विगुण:' च इति द्वौ अपि पाठौ योग्यौ भात: ।

२) पाठद्वयं स्वीकरणीयम् अस्ति ।

आ) पाठभेदा: वैधर्म्यं च अस्ति । सर्वे पाठा: योग्या: परं तस्मात् एक पाठ: युक्तियुक्ततर: भाति ।

अस्य वैधर्म्यप्रकारे ३ वैधर्म्याणि सम्प्राप्तानि ।

(१)संदर्भ: – च. वि. १/२५ (१)

मूलं सूत्रम् – उष्णम् अश्नीयात् उष्णं हि भुज्यमानं स्वदते ........श्लेष्माणं च परिऱ्हासयति .....।।

अधिकरणम्

आहारविधिविधाने अधिकरणे अन्नम् उष्णं सदेव सेवनस्य उपयोग: तथा कर्म अस्मिन् सूत्रे वर्णिते ।

पाठभेद: वैधर्म्यम् च

अस्मिन् सूत्रे 'परिऱ्हासयति' इति पदस्थाने 'परिशोषयति' इति पाठभेद: अस्ति । तदनुसारं टीकायां भिन्नता दृश्यते ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | परिऱ्हासयति | परिऱ्हासयतीति भिन्नसङ्घातं करोति । |
| गङ्गाधर: | परिशोषयति | टीका नास्ति । |
| योगीन्द्रनाथसेन: | परिशोषयति | श्लेष्माणं परिशोषणं च करोति । |
| ज्योतिषचन्द्रसरस्वति: | परिऱ्हासयति | टीका नास्ति । |

विवेचनम् –

१) चक्रपाणि: 'परिऱ्हासयति' इति पाठं गृहीत्वा उष्णान्नं सेवनात् श्लेष्मण: सङ्घातभेदनं भवति इति वर्णयति । ''परिऱ्हासयति इति भिन्नसङ्घातं करोति ।'' (टीका) इमं पाठं विषये प्रथमं विमर्शाम: ।

२) उष्णगुणस्य कार्यम् –

द्रव्यस्य स्वेदने कर्मणि शक्ति: उष्ण: । (हेमाद्रि अ. हृ. सू. १/१८)

द्रव्यगतेन येन गुणेन स्वेदनं कर्म घटते तं शक्तिरुपं गुणं 'उष्ण:' इति उच्यते ।

३) तत्रोष्णं भ्रमतृङ्ग्लानिस्वेददाहाशुपाकिता: शमं च वातकफयो: करोति ।। अ.हृ.सू. ९/१८

उष्णवीर्यस्य कर्मलक्षणे उपरितने सूत्रे वर्णितानि ।

४) उष्ण: शब्द: उष् रुजायाम् इति धातो: सिद्ध: । शीघ्रकारित्वं तस्य निरुक्तिजन्यं कर्म ।

५) उष्ण: गुण: शीतगुणस्य विपरीत: द्रव्यस्य स्तम्भने कर्मणि शक्ति: शीत: । (हेमाद्रि:)

शीत: गुण: स्तम्भनकर: भवति । अत्र विपर्यय तन्त्रयुक्ति: उपयुज्यते चेत् उष्णेन गुणेन स्तम्भनस्य विपरितं विलयनं,भिन्नसङ्घात:, परमाणूनां सङ्घातस्य वियोग: एतानि कर्माणि सन्ति इति स्पष्टम् । तदर्थं चरकाचार्येण सिद्धिस्थानस्य नवमे अध्याये शिरोरोगाणां चिकित्सायाम् उल्लिखितं सूत्रं आधारं मन्यामहे ।

स्वेदेनोत्क्लेशित: श्लेष्मा नस्त:कर्मण्युपस्थित: ।

भूयः स्नेहस्य शैत्येन शिरसि स्त्यायते ततः ।। च. सि. ९ / १०५

– स्नेहस्य शीतगुणेन शिरायां श्लेष्मा स्त्यान: भवति । अत्र गुणेन कर्म अभिप्रेतम् । शीतगुणेन श्लेष्मणे स्त्यानत्वं  प्राप्यते । तस्य सङ्घात: भवति ।

– अत्र विपर्ययतन्त्रयुक्ति: उपयोजिता चेत् अधोल्लिखितवत् अर्थनिष्पत्ति: भवति यत् उष्णेन गुणेन श्लेष्मण: विलयनं भवति । तस्य सङ्घातस्य भेदनं भवति ।

– एवं चक्रपाणे: पाठ: तथा तदुपरिगता टीका पुष्यति ।

६) ज्वरचिकित्सायां उष्णगुणस्य जलपानक्रियाया: उपयोगं वर्णयन् वाग्भट: अग्रिमं सूत्रं उद्धरति ।

तृष्णगल्पाल्पमुष्णाम्बु पिबेद्वातकफज्वरे ।

तत्कफं विलयं नीत्वा ––––––––––– ।। अ.हृ.चि. १/११

उष्णगुणयुक्तं जलं कफं विलयं नयति इति स्पष्ट: उल्लेख: अत्र अस्ति ।

७) एवं उष्णाहारसेवनेन श्लेष्मण: भिन्नसङ्घात: भवति इति 'परिऱ्हासयति' इति पाठस्य टीकाया: स्पष्टार्थ: योग्य: भाति ।

८) गङ्गाधर: योगीन्द्रनाथसेन: च एतौ 'परिऱ्हासयति' इति पदापेक्षया 'परिशोषयति' इति पाठं स्वीकुरुत: । परं तदुपरि विशेषां टीकां न कुरुत: ।

– 'परिशोषयति' इति पदविषये ऊहनं कुर्म: ।

– श्लेष्मण: प्राधान्येन महाभूते पृथ्वी जलं च । श्लेष्मणि जलीयांशस्य उत्कटता वर्तते ।

– उष्ण: गुण: रुक्षत्वेन शोषणकर: अस्ति । तेन उष्णगुणयुक्तस्य आहारस्य सेवनेन श्लेष्मगत: अतिरिक्त: जलीयांश: शुष्यति ।

– अत: एषः पाठ: अपि योग्य: ।

९) परम् आहारविधिविधानस्य अधिकरणानुसारं चक्रपाणे: 'परिऱ्हासयति' इति पाठ: अधिक: सयुक्तिकर: भाति ।

निष्कर्ष:

१) पाठद्वयमपि योग्यम् । तज्ञायमाना अर्थनिष्पत्ति: अपि योग्या ।

२) परं मम मतेन चक्रपाणे: 'परिऱ्हासयति' इति पाठ: तथा 'भिन्नसङ्घातं करोति' इति टीका अपि अधिका युक्तियुक्ता भाति ।

यत: अधिकरणानुसारं तद् विषयांशाय अधिकम् अभिप्रेतम् अस्ति ।

(२) सन्दर्भ: – च. वि. ४ । ४

मूलं सूत्रम् – तत्राप्तोपदेशो नामाप्तवचनम् ।....अप्रमाणं पुनर्मतोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति।

अधिकरणम्

'त्रिविधरोगविशेषविज्ञानम्' इति अधिकरणस्य अन्तर्गतम् 'आप्तोपदेश:' इति अधिकरणस्य प्रसङ्गे उपरोक्तं सूत्रं वर्णितम् । 'कस्य वाक्यम् अप्रमाणं भवति ? इत्यस्य विवरणे 'दुष्टादुष्ट:' इति पदं आगतम् ।

पाठभेद: वैधर्म्यं च – अस्य सूत्रस्ये ' दुष्टादुष्ट: ' पदे पाठभेद: अस्ति तस्मात् वैधर्म्यम् अस्ति ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | दुष्टादुष्ट | दुष्टश्चासावदुष्टश्चेति दुष्टादुष्ट: तेन पिता हि पुत्रस्य दुष्टोऽपि अदुष्टत्वात् आप्त: एव भवति किंवा दुष्टो वञ्चक: । |
| गङ्गाधर: | दृष्टादृष्ट | ते वक्तारश्चेति ते मत्तोन्मत्तमूर्खवक्तारस्तेषां दृष्टादृष्टयो: वस्तुनोर्विषये यद्वचनं तदप्रमाणं तेषां दृष्टविषये वचनमपि न प्रमाणं यद्धि तैर्दृष्टं तदुपदेशे तत्वतो वक्तुमशक्तत्वात् मत्तत्वादुन्मत्तत्वान्मूर्खत्वाच्च । |
| योगीन्द्रनाथसेन: | दृष्टादृष्ट: | ये वक्तारं तेषां दृष्टादृष्टवचनं दृष्टार्थमदृष्टार्थं च वचनं ऐहिकमुष्मिकवचनं पुनरप्रमाणम् । |
| ज्योतिषचन्द्रसरस्वति: | दृष्टादृष्ट: | ये वक्तार: तेषां दृष्टवचनं यथावदनुभूतेरभावाद् अदृष्टवचनं तु अप्रत्यक्षीकृतं अनुमितामित्यर्थ: । |

विवेचनम्

– केवलं चक्रपाणिना दुष्टादुष्ट: इति पाठ: स्वीकृत: प्रत्युत अन्यै: त्रीभि: दृष्टादृष्ट: इति ।

– प्रथमं इमं सूत्राधिकरणं विमर्शाम: । 'आप्तोपदेश:' इति विशेषविज्ञानस्य वर्णनम् अत्र अस्ति । कस्मै आप्त: इति वक्तव्यम् ? कस्मै न ? कस्य वाक्यं प्रमाणं न मन्तव्यम् इत्यस्यापि वर्णनम् अस्मिन् सूत्रे अस्ति ।

– तस्मिन् मत्तः उन्मत्तः मूर्खः रक्तः दुष्टादुष्टौ च एतेषां वाक्यं न प्रमाणं जानीयात् इति वर्णितम् । एतासां व्यक्तीनां भाषणे प्रमाणत्वं मत्वा तस्याधारेण कार्यं न कुर्यात् । अस्मिन् सूत्रे पाठभेदाः वैधर्म्याणि च सन्ति ।

– चक्रपाणेः पाठः – अप्रमाणं पुनः मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनम् इति । मत्तः उन्मत्तः मूर्खः रक्तः दुष्टादुष्टौ एतेषां वचनम् अप्रमाणं भवति ।

– अस्मिन् सूत्रस्थे केवलं दृष्टादृष्टः इति पदे एव चक्रपाणिः व्याख्यां करोति । रक्तः नाम ये रागेण (प्रेम्णा) युक्ताः तादृशाः पुरुषाः ।

– रागः इति मनोभावेन तेषां मनः व्याप्तं भवति । अतः ते प्रीतिः उपतापः च एतयोः युक्तं वचनं कार्यं च कुर्वन्ति । मत्तः उन्मत्तः, मूर्खः च एतेषामपि वचनं तद्कारणात् अग्राह्यं भवति ।

दुष्टादुष्टः

– दुष्टश्चासौ अदुष्टश्च इति दुष्टादुष्टः । इति सामासिकं पदं चक्रपाणिः गृह्णाति अत्र । अस्यार्थः अधोल्लिखितवत् कोऽपि पुरुषः दुष्टः स्यादपि सः स्वपुत्राय अदुष्टः भवति । एतादृशं कुपितरम् आप्तं मत्वा यदि सः पुत्रः तस्य वचन प्रमाणं मत्वा कार्यं करोति चेत् सः आपद्ग्रस्तः भवेद् एव ।

– अतः एतादृशस्य पुरुषस्य वचनं प्रमाणं न मन्तव्यम् ।

– चक्रपाणिः ' दुष्टः ' इत्यस्य अधिकम् एकम् अर्थं यच्छति – ''दुष्टो वञ्चकः ।''

– दुष्टः नाम ठगः वञ्चकः पुरुषः । एतादृशस्य सुवचनमपि (अदुष्टवचनमपि) अप्रमाणं भवति ।

– एवं चक्रपाणिः भिन्नं पाठं तथा तस्य अर्थद्वयं च वर्णयति ।

गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतेषां पाठः ।

अप्रमाणं पुनर्मत्तोन्मत्तमूर्खवक्तृदृष्टादृष्टवचनम् इति ।

– चक्रपाणेः ' रक्तः ' इति पाठापेक्षया एतैः ' वक्तृ ' इति पाठः स्वीकृतः ।

– वाक्यार्थः – मत्तः उन्मत्तः मूर्खः च ईदृशानां वक्तृणाम् दृष्टवचनं अदृष्टवचनं च अप्रमाणं भवतः । एतस्मिन् त्रयाणां टीकाकाराणां व्याख्यानं अधोक्तम् ।

गङ्गाधरः – मूर्खः मत्तः उन्मत्तः च ईदृशां वक्तृणां दृष्टः च अदृष्टः च एतयोः वस्तुविषयसम्बन्धि यद् वचनं तद् अप्रमाणम् अस्ति ।

– एतस्मिन् दृष्टविषयविषये ईदृशः मूर्खः मत्तः उन्मत्तः च पुरुषः यद् पश्यति तस्य मत्तत्वात् उन्मत्तत्वात् मूर्खत्वात् च यथायोग्यं उपदेशं कर्तुं न शक्नोति ।

– यदि दृष्टविषयविषये एवम् अप्रामाण्यं भवेत् तर्हि अदृष्टविषयविषये प्रामाण्यं सुतराम् अशक्यम् ।

– अत्र गङ्गाधरः दृश्यमानादृश्यमानौ वस्तुविषयौ विमृश्यति ।

योगीन्द्रनाथसेनः

– मत्तः उन्मत्तः मूर्खः च ईदृशानां वक्तृणां दृष्टादृष्टार्थे वचने अप्रमाणे स्तः ।

– दृष्टार्थस्य अर्थः ऐहिकं वचनं प्रत्युत अदृष्टार्थस्य अर्थः आमुष्मिकं वचनम् ।

– अस्य ऐहिकलोकविषये परलोकविषये च वचनं इति क्रमेण अर्थः भवति ।

ज्योतिषचन्द्रसरस्वतिः

–दृष्टवचनम् इत्यर्थः यथावत् अनुभूतेः अभावात् कृतं केवलं श्रवणे आधृतं परं प्रत्यक्षीकृतं वचनम् ।

– अदृष्टवचनम् इत्यर्थः अप्रत्यक्षीकृतं अनुमानेन कृतं वचनम् ।

– चरकसंहितायाः विमानस्थानस्य अष्टमे अध्याये अष्टत्रिंशे सूत्रे शब्दः इति वादमार्गपदस्य वर्णनम् अस्ति । सः चतुर्विधः । सत्यम् , अनृतम् , दृष्टार्थः अदृष्टार्थः च । एतद्विषये विस्तृता टीका गङ्गाधरः चरकसंहितायाः सूत्रस्थानस्य एकादशे अध्याये १८, १९ सूत्रयोः विवरणे करोति ।

– आप्तोपदेशः एव शब्दः । शब्दः चतुर्विधः ।

– अतः अत्रस्थस्य दृष्टादृष्टयोः सम्बन्धः चतुर्थे विमाने आप्तोपदेशगतस्य अप्रमाणवचनस्य विवरणाय योजयितुं शक्यम् ।

– सर्वतः ऊहापोहानंतरं एवं भाति यद् द्वौ अपि पाठौ युक्तियुक्तौ स्तः ।

– परं गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः योगीन्द्रनाथसेनः च एतेषां 'दृष्टादृष्ट' पाठः तथा तदुपरि कृतं विवेचनम् अधिकं युक्तियुक्तं भासते ।

निष्कर्षः

१) द्वौ अपि पाठौ तथा तदुपरि कृताः व्याख्याः च योग्याः ।

२) तस्मिन् दृष्टादृष्ट पाठः अधिकः युक्तियुक्तः ।

(३) सन्दर्भ: – च. वि. ५ । ७

मूलं सूत्रम् – तत्र प्राणवहानां स्त्रोतसां ––– । अतिसृष्टमतिबद्धं प्रकुपितमल्पमभीक्ष्णं वा ।।

अधिकरणम् – अस्मिन् सूत्रे प्राणवहानां स्त्रोतसां मूलस्थानं तथा प्रदुष्टलक्षणानां वर्णनमस्ति ।

वैधर्म्यम् –

अस्य सूत्रस्थस्य ' प्रकुपितम् ' इति पदस्य टीकायां वैधर्म्यमस्ति । तथा पाठभेद: अपि ।

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | कुपितम् | टीका नास्ति । |
| गङ्गाधर: | प्रकुपितम् | सर्वं उच्छ्वासक्रियाविशेषणम् –– । प्रकुपितं वृद्धमुच्छ्वसति । |
| योगीन्द्रनाथसेन: | प्रकुपितम् | प्रकुपितं प्रवृद्धम् । सर्वं क्रियाविशेषणम् । |
| ज्योतिषचन्द्रसरस्वति: | प्रकुपितम् | प्रकुपितं दुष्टम् । |

विवेचनम्

(१) अस्मिन् पदे चक्रपाणि: अत्र न भाषते । गङ्गाधर: योगीन्द्रनाथसेन: एताभ्यां 'प्रकुपितम्' इत्यस्य अर्थ: वृद्धम् उच्छ्वसन्तम् इति गृहीत: प्रत्युत ज्योतिषचन्द्रसरस्वतिना 'दुष्टम्' इति ।

(२) सूत्रान्वय: – आदौ अस्य सूत्रस्य अन्वयं कुर्म: ।

मूलं सूत्रम् –

अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमच्छ्वसन्तं दृष्ट्वा प्राणवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात् ।

अन्वय: –

अतिसृष्टम् उच्छ्वसन्तं वा अतिबद्धम् उच्छ्वसन्तं वा कुपितम् उच्छ्वसन्तं वा अल्पाल्पम् उच्छ्वसन्तं वा अभीक्ष्णम् उच्छ्वसन्तं वा सशब्दशूलम् उच्छ्वसन्तं दृष्ट्वा ––––––– ।

– अन्वयानुसारं कुपितम् ( प्रकुपितम् ) उच्छ्वसन्तं क्रियाया: विशेषणम् अस्ति । अत: प्रकुपितं पदस्य अन्वय: उच्छ्वसन्तम् इति क्रियावाचकं पदं युज्यते ।

(३) यदा प्राणवहं स्त्रोत: प्रदूष्यति तदा सूत्रोक्तानि लक्षणानि दृश्यन्ते । व्यतिरेकेण एवं ज्ञातव्यं यद् यदा अतिसृष्टादीनि लक्षणानि उद्‌भवेयु: तदा प्राणवहं स्त्रोत: दुष्टम् इति ।

(४) 'कुपितम्' इति पदस्य सूत्रगतम् अभिप्रेतार्थम् आकलनात् पूर्वम् अन्यान् अर्थान् पश्येम ।

- अतिसृष्टम्- उच्छ्‌वासस्य विसर्ग: दीर्घ: भवति । दीर्घं कालम् उच्छ्‌वास: चलति ।
- अतिबद्धम् - उच्छ्‌वासस्य विसर्ग: अल्पं कालम् अस्ति । प्रश्वासापेक्षया उच्छ्‌वास: अल्पकालं भवति ।
- अल्पाल्पम् - वारंवारं स्तब्ध्वा उच्छ्‌वास: भवति । अल्पाल्प कालेन उच्छ्‌वास: अस्ति ।
- अभीक्ष्णम् - उच्छ्‌वास: अविरतं चलति । अस्मिन् श्वसनगति: अपि वर्धते ।
- सशब्दशूलम् - उच्छ्‌वसता ध्वनि: भवति तदा शूलोत्पत्ति: च ।
- एतेषां सर्वेषां पदानां तस्य तस्य अर्थस्य पार्श्वभूम्यां कुपितम् ( प्रकुपितम् ) पदस्य अभिप्रेतार्थ: विचारणीय: ।

(५) कुपितम् पदस्य व्याख्या चक्रपाणिना शारीरस्थाने षष्ठमे अध्याये अग्रिमवत् कृता ।

''कुपिता: च इति पदेन वातादय: सामान्येन क्षीणा वृद्धा वा गृह्यन्ते । विकृतिमात्रम् हि वातादिनां प्रकोप: ।'' (चक्रपाणि: च. शा. ६ । १७)

- शारीरस्थाने षष्ठमे अध्याये मलभूतानां प्रसादभूतानां च शारीरभावानां वर्णने इदं पदं अस्ति । अत: वातादि शारीरभावानाम् अधिकरणानुसारं कुपितम् पदस्य अर्थ: सामावस्था प्रणश्य क्षीणत्वं वा वृद्धत्वम् इति गृहीत: । पुन: स्पष्टं कर्तुं व्याख्या कृता यत् वातादिषु किमपि विकृतिभवनं नाम तेषां प्रकोप: ।
- अत: तस्य अध्यायस्य अधिकरणानुसारं कुपितम् इत्यस्य अर्थ: तत्र योग्य: ।

(६) केवलं अस्मिन् सूत्रे कुपितम् पद् क्रियाविशेषणरुपेण योजितम् । उच्छ्‌वसन्तम् इति क्रियाया: तद् विशेषणम् । कुपितम् इति पदस्य निश्चितार्थं आकलनात् पूर्वं उच्छ्‌वसन्तम् पदं योजितानि अन्यानि विशेषणानि विचारणीयानि

- अतिसृष्टम्-अस्मिन् उच्छ्‌वास: दीर्घ: भवति । यासु यासु व्याधिषु उच्छ्‌वास: दीर्घकालं चलति ता: सर्वा: अवस्था: अतिसृष्टम् इत्यस्यां समाविष्टा: ।

– उदाहरणार्थम् – उच्चै: श्वसिति संरुद्धो मत्तर्षभ इवानिशम् । (च. चि. १७ । ४६)

– एतेषु महाश्वासस्य लक्षणेषु रुग्ण: ऊर्ध्वं श्वसिति इति विशिष्टं वर्णनम् अस्ति ।

अस्मिन् चक्रपाणिना 'उच्चैरिति दीर्घम् ।' ईदृशी व्याख्या कृता ।

इत्यर्थ: महाश्वासे दीर्घश्वसनम् इदम् लक्षणम् ।

– तथैव – दीर्घं श्वसिति यस्तूर्ध्वं न च प्रत्याहरत्यध: ।

श्लेष्मावृतमुखस्त्रोता: क्रुद्धगन्धवहार्दित: ।। (च. चि. १७ । ४९)

– ऊर्ध्वश्वास: इति श्वासप्रकारे अपि दीर्घश्वसनम् अस्ति ।

'दीर्घं श्वसिति श्वासस्य बहिर्निगमनं दीर्घकालं करोति ।

अत: ऊर्ध्वश्वास: अपि ' अतिसृष्टम् उच्छ्वसन्त: ' इत्यस्मिन् भवति ।

– <u>अतिबद्धम्</u> – प्रश्वासात् उच्छ्वास: अल्पकालं भवति । छिन्नश्वासप्रकारे इदं लक्षणम् अस्ति ।

' यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडित: ।

न वा श्वसिति ---- ।। (च. चि. १७ । ५२)

श्वसिति विच्छिन्नमिति नि:श्वस्य पुन: क्षणान्तेन श्वसिति । न वा श्वसिति न श्वासं लभते ।''

(चक्रपाणि टीका)

–अस्मिन् छिन्नश्वासे उच्छ्वास: वारंवारं स्तब्ध्वा भवति निश्वस्य पुन: क्षणस्य अल्पकाले श्वस्यते ।

<u>अभीक्ष्णम्</u> – सततम् उच्छ्वास: प्रचलति ।

– ''विशुष्कास्यो मुहु: श्वासो मुहुश्चैवावधम्यते।।''(च. चि. १७ । ६१)

मुहुश्चैवावधम्यते इति क्षणं क्षणं श्वसनेन वायुनाऽवधम्यते । (चक्रपाणि:)

– तमकश्वासे सततं श्वासोच्छ्वास: प्रचलति । इदं लक्षणम् 'अभीक्ष्णम्' मध्ये भवति ।

<u>अल्पाल्पम्</u>

– उच्छ्वास: अल्प: अस्ति ।

'' रुणध्द्युच्छ्वासमार्गं तु प्रणष्टबलचेतस: । (च. चि. १७ । ३०)

– गम्भीरायां हिक्कायाम् उच्छ्वासस्य मार्गम् अवरुध्य अल्पाल्पं श्वसनम् अस्ति ।

– तथैव क्षुद्रहिक्कायाम् अपि अधोक्तवत् लक्षणं भवति ।

‘ न चोच्छ्वासान्नपानानां मार्गमावृत्य तिष्ठति । (च. चि. १७ । ३५)

– एवं विविधासु अवस्थासु अल्पाल्पम् उच्छ्वसन्त: इति लक्षणं दृश्यते ।

– अपतानकम् इति व्याध्याम्

कृच्छ्रेण चाप्युच्छ्वसिति --- ।।

इदं लक्षणं दृश्यते । कष्टेन अल्पाल्प: उच्छ्वास: इदम् अपतानकस्य लक्षणम् ।

(७) एवं अतिसृष्टम् , अतिबद्धम् , अल्पाल्पम् अभीक्ष्णं च एतेषां लक्षणानां काश्चन अवस्था: वयम् अत्र दृष्टवन्त: ।

एता: अवस्था: विहाय यत्र श्वसनस्य अन्या कापि विकृति: स्यात् तां ‘ प्रकुपितम् उच्छ्वसन्तम् ’ इत्यस्मिन् समावेष्टुं शक्यम् ।

(८) गङ्गाधर: योगीन्द्रनाथसेन: च एताभ्यां ‘ प्रकुपितम् ’ पदस्य गृहीत: वृद्धम् अर्थ: योग्य: अस्ति परं स: अव्याप्त: भाति । प्रकुपितम् इत्यस्य लक्षणस्य सर्वा: अवस्था: तस्मिन् न समाविशन्ति ।

– ज्योतिषचन्द्रसरस्वतिना वर्णित: ‘दुष्टम्’ इति अर्थ: अधिक: योग्य: भाति ।

– दुष्टम् इत्यर्थ: कापि स्वरुपा विकृति: ।

(९) ‘ प्रकुपितम् उच्छ्वसन्तम् ’ इत्यस्मिन् अग्रिमा: अवस्था: शक्या: ।

- प्राणवह: स्त्रोतोरोध: ।
- अभिष्यन्द: ।
- सन्तर्पणम् ।
- उरोगतं श्लेष्मा ।
- उरोगत विद्रधि: अर्बुद ग्रन्थी इत्यादय: ।

– इत्यादिभि: उच्छ्वासं भवन्ती विकृति: ।

<u>निष्कर्ष:</u> – १) वैधर्म्यं नास्ति ।

२) गङ्गाधर: योगीन्द्रनाथसेन: च एतयो: व्याख्ये योग्ये परं तत्र अव्याप्तता भासते । वृद्धम् इति दुष्टम् इत्यस्य एक: भाग: अस्ति ।

३) ज्योतिषचन्द्रसरस्वते: दुष्टम् इति व्याख्या सर्वव्यापिनी तथा अधिका योग्या भासते ।

इ) पाठभेदा: सन्ति । परं तदुपरि टीका न उपलब्धा । सर्वे पाठा: योग्या: ।

अस्य वैधर्म्यप्रकारे ४ वैधर्म्याणि सम्प्राप्तानि ।

(१) संदर्भ: – च. वि. १/१७

मूलं सूत्रम् – क्षार: पुन: औष्ण्यतैक्ष्ण्यलाघवोपन्न: क्लेदयत्यादौ पश्चाद्विशोषयति, स पचनदहनभेदनार्थमुपयुज्यते ............ ।

अधिकरणम् – द्रव्यप्रभावे अधिकरणे 'त्रीणि अनभ्यस्त' इति उपाधिकरणे क्षारद्रव्यस्य वर्णनम् अस्ति ।

पाठभेद: – अस्मिन् सूत्रे गङ्गाधर: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: भिन्न: पाठ: गृहीत: ।

''क्षार: पुन: औष्ण्यतैक्ष्ण्यलवणोपपन्न: क्लेदयति त्वादौ पश्चादुपशोषयति दहति पचति भिनत्ति सङ्घातम् । स पचनदहनभेदनार्थमुपयुज्यते ।

टीका – चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – पचनदहनभेदनानि त्रीणि गुणप्रभवजानि कर्माणि क्षारस्य प्रभावा: ।

योगीन्द्रनाथसेन: – सङ्घातं पिण्डितं शोफादिकं भिनत्ति दारयति । दहनपचनादि शक्तिरस्य आग्नेयौषधिगुणभूयिष्ठत्वात् । तस्मात् स दहनपचनादिकर्मसु प्रयुज्यते ।

ज्योतिषचन्द्रसरस्वति: – सङ्घातमस्थ्यादिदृढसंश्लेषं भिन्नति । भित्वा अवकाशबहुलं करोति दहनपचनाद्यर्थत्वात् ।

विवेचनम् – गङ्गाधर: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: चक्रपाणे: मूलस्य पाठापेक्षया अतिरिक्तै: पदै: युक्त: सूत्रपाठ: गृहीत: । परं अर्थदृष्ट्या तस्मिन् न वैधर्म्य आगच्छति ।

– गङ्गाधरेण विशेषा टीका कुर्वता पचनदहनभेदनादय: इति क्षारस्य क्रियारुपिण: द्रव्यप्रभावा: सन्ति । उत आदौ क्लेदयति पश्चात् विशोषयति इति क्षारस्य द्रव्यप्रभाव: अस्ति । इति वर्णनम् अस्ति । प्रत्युत योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतौ सङ्घातं भिन्नानि इति पदे टीकां कुर्वत: । शब्दश: भिन्नता अस्ति तथापि अर्थभिन्नता नास्ति ।

निष्कर्ष: – पाठभेद: अस्ति परं वैधर्म्यं नास्ति ।

(२) सन्दर्भ: – च. वि. ५/२०

मूलसूत्रम् – मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात् ।

मूत्रवाहीनि दुष्यन्ति क्षीणस्याभिक्षतस्य च ।।

अधिकरणम् – मूत्रवहस्त्रोतसाम् दुष्टिनिदानम् अत्र वर्णितम् अस्ति ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रे 'अभिक्षतस्य' इति पदे पाठभेद: तज्जन्यं वैधर्म्यं च स्त: ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | अभिक्षतस्य | टीका नास्ति |
| गङ्गाधर: | अतिकृशस्य | टीका नास्ति |
| योगीन्द्रनाथसेन: | अतिकृशस्य | टीका नास्ति |
| ज्योतिषचन्द्रसरस्वति: | अभिक्षतस्य | अभिक्षतस्य मूत्रवह स्त्रोत: सु |

विवेचनम्

१) अस्मिन् पदे अभिक्षतस्य अतिकृशस्य स इति पाठभेदौ स्त: ।

चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च – अभिक्षतस्य

गङ्गाधर: योगीन्द्रनाथसेन: च – अतिकृशस्य

इति टीकाकारै: स्वीकृता: पाठा: ।

२) अस्मिन् पदे केवलम् ज्योतिषचन्द्रसरस्वतिना कृता टीका उपलब्धा अस्ति । योगीन्द्रनाथसेन: केवलं शब्दार्थं उद्धरति ।

अभि – व्य न भाति , म + भा + कि ।

उपसर्गविशेष: । अस्यार्थ: । समन्तात् । उभयार्थ: । वीप्सा । इत्यम्भाव: । घर्षणम् । इति दुर्गादास: । अभिलाष: । अभिमुख्यम् । इति मेदिनी । चिन्हम् । इति बोपदेवहेमचन्द्रौ ।

क्षतम् –क्ली , – क्षण्यते वध्यते अनेन । क्षण + करणे क्त: ।

व्रण: । अरु: । ईर्म्मम् । क्षणनु: । विनाश: । विद्ध: । क्षतियुक्त: । रोगविशेष: ।

(शब्दकल्पद्रुम / खण्ड २)

अतिकृशस्य – अतिमात्रया कृश: य: तस्य ।

३) अभिक्षत: तथा अतिकृश: एतौ द्वौ हेतौ अपि वातप्रकोपजन्यौ स्त: ।

४) मूत्रवहस्त्रोतसि क्षतेन विकृतिम् उत्पद्यते । तेन क्षतम् मूत्रवहस्त्रोतस: दुष्टिनिदानं भवति ।

५) मूत्रवहस्त्रोतसि क्षतयुक्तेन रुग्णेन मूत्रनिग्रह: कृत: चेत् स: अपि हेतु: इति गण्यते ।

एष: शल्यस्वरुपी हेतु: अस्ति । एष: पाठ: तस्य विवेचनं च योग्यम् अस्ति ।

अतिकृशस्य

६) अन्वय: – अतिकृशस्य मूत्रनिग्रहात् ।

अतिकृशत्वं वातप्रकोपजनितम् अस्ति । अस्याम् अवस्थायाम् वेगनिग्रहेण तीव्रतरं वातप्रकोप: उत्पद्यते । एतेन वातप्रकोपेण मूत्रवहस्त्रोतसि विकृतिं जायते । अत एव एतत् मूत्रवहस्त्रोतस: दुष्टिनिदानं भवति ।

निष्कर्ष: –

१) उभौ पाठौ तथा तेषां विवेचनं युक्तं स्वीकरणीयं च ।

२) पाठभेद: वैधर्म्यं च अस्ति । परं उभौ पाठौ स्वीकरणीयौ ।

(३) सन्दर्भ: – च वि ७/११

मूलसूत्रम् – शोणितजानां प्रभाव: केशश्मश्रुनखलोमपक्ष्मापध्वंस:

अधिकरणम् – शोणितजानां कृमीणां प्रभाव: इति अधिकरणे अस्मिन् सूत्रस्य वर्णनम् अस्ति ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रे ' केशश्मश्रुनखलोमपक्ष्मापध्वंस:' इति पदे पाठभेद: तज्जन्यं वैधर्म्यं च स्त: ।

टीका

चक्रपाणि: – शोणितजानां प्रभाव: केशश्मश्रुनखलोमपक्ष्मापध्वंस:

गङ्गाधर: – शोणितजानां प्रभाव: केशश्मश्रुलोमपक्ष्मापध्वंस: ।

योगीन्द्रनाथसेन: – शोणितजानां प्रभाव: केशश्मश्रुलोमपक्ष्मापध्वंस: ।

ज्योतिषचन्द्रसरस्वति: – शोणितजानां प्रभाव: केशश्मश्रुलोमपक्ष्मापध्वंस: ।

विमर्श:–

– शोणितजानां कृमीणां प्रभावे चक्रपाणिना 'नखापध्वंस' इति पदं वर्णितम् ।

– किंतु गङ्गाधरेण, योगीन्द्रनाथसेनेन ज्योतिषचन्द्रसरस्वतिना एतै: 'नख' पदस्य वर्णनं न कृतम् ।

– अस्मिन् किमपि वैधर्म्य नास्ति । परं अन्यै: नखस्य अपध्वंस: इति पाठ: किमर्थ न वर्णित: इति न ज्ञायते ।

– चक्रपाणिना एष: अधिक: पाठ: वर्णित: ।

निष्कर्ष: –

१) उभौ पाठौ युक्तम् स्वीकरणीयं च ।

२) पाठभेद: वैधर्म्यं च अस्ति । परं उभौ पाठौ स्वीकरणीयौ ।

(४) सन्दर्भ: – च. वि. ७/१२

मूलसूत्रम् – .....अन्त्रादा: उदरादा: हृदयचरा:....... ।

अधिकरणम् – श्लेष्मजानां कृमीणां नाम वर्णनम् इति अधिकरणे अस्मिन् सूत्रस्य वर्णनम् अस्ति ।

पाठभेद: वैधर्मं च – अस्मिन् सूत्रे ' हृदयचरा:' पदे पाठभेद: अस्ति । तेन विधर्मता उत्पादयति ।

| टीकाकार: | | पाठ |
|---|---|---|
| चक्रपाणि: | – | हृदयचरा: |
| गङ्गाधर: | – | हृदयचरा: |
| योगीन्द्रनाथसेन: | – | हृदयदा: |
| ज्योतिषचन्द्रसरस्वति: | – | हृदयचरा: |

विवेचनम् –

– चक्रपाणि: गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एतै: हृदयचरा: इति पाठ: प्रत्युत योगीन्द्रनाथसेनेन हृदयाद: इति पाठ: स्वीकृत: ।

– श्लेष्मजानां कृमीणां नामविषये वैधर्म्यं दृश्यते । हृदयचर: हृदयाद: च एतौ पाठौ ।

– हृद्याद: – हृदयं अदन्ति इति हृद्याद: ।

– हृदयचर: – हृदये चरन्ति इति हृदयचर: ।

– योगीन्द्रनाथसेनस्य पाठानुसारं ये हृदयप्रदेशस्थानां धातूनां भक्षणं कुर्वन्ति ते हृद्यादा: इति एक अर्थ: श्लेष्मजानां कृमीणां नामानुसारम् अर्थ: भवति ।

– अपि च चक्रपाणि: गङ्गाधर: ज्योतिषचन्द्रसरस्वति: एतेषां पाठानुसारं ये हृदयप्रदेशे परिभ्रमन्ति ते हृदयचरा: इति अर्थ: भवति ।

निष्कर्ष: –(१) पाठद्वयस्य अर्थ: भिन्न: ।

(२) अत्र योगीन्द्रनाथसेनस्य पाठवैधर्म्यं अस्ति ।

(३) एष: पाठ: कृमीणां नामवर्णनस्य अस्ति अत: स: यथा अस्ति तथैव स्वीकार्य: इति आवश्यकम् ।

(४) वैधर्म्यम् अस्ति तथा द्वौ पाठौ स्वीकरणीयौ ।

ई) पाठभेदा: सन्ति । तेषु शब्दश: वैधर्म्यं दृश्यते । परन्तु अभिप्रेतार्थे वैधर्म्यं नास्ति ।

अस्य वैधर्म्यप्रकारे ५ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भ: – च. वि. २/१८

मूलं सूत्रम् – आमाशयगत: पाकमाहार: प्राप्य केवलम् ।

पक्व: सर्वाशयं पश्चाद् धमनीभि: प्रपद्यते ।।

अधिकरणम् – आमाशयवर्णनं प्रमाणं च इति अधिकरणे इदं सूत्रम् उल्लिखितम् ।

वैधर्म्यं पाठभेद: च – अस्मिन् सूत्रे सर्वाशयं पदे पाठभेद: अस्ति तस्मात् वैधर्म्यं दृश्यते ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | सर्वाशयम् | सर्वाश्रयं सर्वशरीरम् |
| गङ्गाधर: | सर्वाशयम् | सर्वाशयं रसरक्तादिधात्वाशयम् |
| योगीन्द्रनाथसेन: | सर्वाशयम् | सर्वाशयं सर्वशरीरम् । |
| ज्योतिषचन्द्रसरस्वति: | सर्वाश्रयम् | सर्वाश्रयं सर्वशरीरम् । |

विवेचनम् –

१) गङ्गाधर: योगीन्द्रनाथसेन: च एतौ 'सर्वाशयम्' इति पाठं स्वीकुरुत: ।

२)चक्रपाणि: सर्वाशयम् इति मूलपाठं स्वीकृत्य टीकां कुर्वता तु सर्वाश्रयम् इति पाठं स्वीकरोति ।

३) ज्योतिषचन्द्रसरस्वति: सर्वाश्रयम् पाठं स्वीकरोति ।

४) कोऽपि पाठ: अस्तु चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एते सर्वशरीरम् इति समानां व्याख्यां कुर्वन्ति । उत गङ्गाधरेण सर्वाशयम् इत्यस्य अर्थ: रसरक्तादीनां धातुनाम् आशय: इति व्याख्या कृता ।

५) सूत्रान्वय: तथा तस्य अर्थ:

आमाशयं गत: (प्राप्त:) आहार: यदा पूर्णरूपे परिपाचित: भवति तदा तस्य पक्व सारांश: (आहारस्य) धमनीभि: सर्वाशयं/सर्वाश्रयं प्राप्नोति ।

६) यदि सूत्रान्वय: दृश्यते सर्वाशयम् /सर्वाश्रयम् इति सर्वशरीरम् अर्थ: योग्य: ।

७) गङ्गाधरेण कृता रसरक्तादिधातूनाम् आशय: इति व्याख्या अव्याप्ता भाति ।

८) आमाशयात् परिपाचित: आहाररस: धातुषु प्रविश्य धातूनां परिणमनप्रक्रियां समाविश्य उत्तरोत्तरं धातुं निर्माति ।

९) अत: आहाररस: तु सर्वेषां धातूनां आशयं गच्छति उत धातुव्यतिरिक्तेषु अन्येषु शारीरभावेषु प्रविश्य तानपि पुष्यति ।

१०) अत: गङ्गाधरस्य व्याख्या यद्यपि योग्या । सती अपि सा अव्याप्ता भाति ।

११) आश्रयम् आशयम् च एतौ: द्वयो: पदयो: शब्दार्थ: प्राय: समान: एव ।

| आश्रय | आशय |
|---|---|
| १) resting place | resting place |
| २)आधार: | आधार: |
| ३) कोष्ठागारम् | गृहम् |

१२) अत: आश्रय: आशय: च एतौ: पदयो: अत्रस्थ: अभिप्रेतार्थ: समान: ।

निष्कर्ष:

१) शब्दश: वैधर्म्यं सदपि अभिप्रेतार्थे वैधर्म्यं नास्ति ।

२) गङ्गाधरस्य व्याख्या योग्या अस्ति परम् अव्याप्ता भाति ।

(२) सन्दर्भः – च. वि. ४/४

मूलसूत्रम् – प्रत्यक्षं तु खलु तद्वत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते ।

अधिकरणम् – प्रत्यक्षप्रमाणस्य लक्षणम् अस्य सूत्रे वर्णितम् अस्ति ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे 'मनसा' पदे पाठभेदः तज्जन्यः वैधर्म्यं च स्तः ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | मनसा | सर्वैः टीकाकारैः विस्तृता टीका कृता । |
| गङ्गाधरः | आत्मना | |
| योगीन्द्रनाथसेनः | आत्मना | |
| ज्योतिषचन्द्रसरस्वतिः | आत्मना | |

विवेचनम्

१) अस्मिन् सूत्रे मनसा आत्मना च इति पाठभेदौ स्तः ।

चक्रपाणिः – मनसा

गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः – आत्मना

इति टीकाकारैः स्वीकृताः पाठाः ।

२) सर्वे टीकाकारैः व्याख्यानप्रसङ्गे अस्मिन् विषये विस्तृता टीका कृता । तेषां उहापोहः अग्रिमवत्

चक्रपाणिः – विशेषां टीकां न कुर्वता चक्रपाणिना प्रत्यक्षं बाह्यप्रत्यक्षं मानसप्रत्यक्षं च एवं भित्वा तन्माध्यमेन वर्णनं कृतम् ।

बाह्य प्रत्यक्षम् – स्वस्य चक्षुरादिभिः इन्द्रियैः अव्यवधानेन रुपादिनां विषयाणां ज्ञानप्राप्तिः ।

मानसप्रत्यक्षम् – मनसा अव्यवधानेन सुखादीनां ज्ञानप्राप्तिः ।

गङ्गाधरः – अतीव विस्तृता मूलगामिनी च टीका कृता अस्ति ।

– गङ्गाधरेण अस्मिन् सूत्रे पाठभेदः स्वीकृतः अस्ति ।

–'मनसा' इति पदस्य स्थाने 'आत्मना' इति पदं गृहीत्वा तस्मिन् टीका कृता अस्ति ।

– प्रत्यक्षविषये तिस्त्रैषणीये अध्याये विस्तृता टीका कृता अस्ति । (अतीतावेक्षणतन्त्रयुक्तिः)

– प्रत्यक्षं व्याख्या

आत्मेन्द्रियमनो ऽ र्थानां सन्निकर्षात् प्रवर्तते ।

व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ।। (च. सू. ११)

– अस्यैव पुनर्वर्णनं व्याख्यानप्रसंगेन अत्र क्रियते । (व्याख्यानं प्रसंगः च तन्त्रयुक्तिः)

– प्रत्यक्षं इन्द्रियात्मभ्यां प्राप्यते । पृथक् इन्द्रियपदेन श्रवणादिनां पञ्चज्ञानेन्द्रियाणां प्रत्यक्षप्रमाणत्वं ख्यापितम् ।

– आत्मन् इति पदेन बुद्धिः तथा बुद्धेः आश्रयत्वात् मनः अनयोः उभययोः समावेशः भवति ।

– स्वयं पदेन आत्मनः त्रिविधः विचारः कृतः ।

– आत्मनः बुद्ध्या सह नित्य योगः अस्ति अतः बुद्धेः अपि त्रिविधं चिन्तनं कृतम् ।

– यत् इति पदेन शब्दद्वया पञ्चइन्द्रियार्था चिन्त्यविचार्यादयः मनसः अर्थः सुखादयः बुद्धेः अर्थाः एते विवक्षिताः ।

– प्रत्यक्षस्य सर्वसमावेशिका व्याख्या –

–'जागरितस्थानेन वैश्वानरात्मा स्वप्नस्थानेन तैजसात्मा सुषुप्तिस्थानेन प्राज्ञात्मा एतैः ( त्रिविधैः ) पञ्चेन्द्रियाणां सन्निकर्षेण यद् वस्तु (ब्रह्म) उपलभ्यते यद् मनसा बुद्ध्या च ज्ञायते तं उपलब्धिज्ञानं प्रत्यक्षं इति ब्रूयात् ।'




अत्र गङ्गाधरेण सांख्यविचाराणां आधारः गृहीतः

– तेन प्रत्यक्षस्य सप्तप्रकाराः भवन्ति । एष विषयः रोगभिषग्जितीये अध्याये अपि वर्णितः अस्ति ।

(अनागतावेक्षणतन्त्रयुक्तिः)

– आत्मेन्द्रियाभ्यां यद् आत्मानं प्राप्यते तत् प्रत्यक्षम् । अत्र सुखदुःखादयः आत्मप्रत्यक्षं तथा शब्दादयः इन्द्रियं प्रत्यक्षं सन्ति ।

– कणादवचनं उक्तम् – ''सुखादयः आत्मगुणाः न मनः प्रत्यक्षाः अपि तु आत्मप्रत्यक्षाः सन्ति ।''

– अत एव मनसा इति पदस्थाने आत्मना इति पदं योग्यमस्ति

एतद् कथं तर्हि तदर्थं द्वै वैशेषिकसूत्रे स्तः ।

१) परत्रसमवायात् तथा प्रत्यक्षत्वात् आत्मगुणाः न मनसः गुणाः । यतः ते अप्रत्यक्षाः सन्ति इति ।

२) बुद्धि–इच्छास्य एते प्रत्यग् आत्मगुणाः सन्ति । ते न मनसाः गुणाः यतः परत्रसमवायात् एव ।

प्रत्यगात्मनः परत्र समवायात् ।

– पराव्यक्तनामकस्य क्षेत्रज्ञस्य सुखादयः आत्मगुणाः (परमात्मनःआत्मगुणः) प्रत्येकस्मिन् आत्मनि अभिव्यक्ताः सन्ति । इन्द्रियाणां बुद्ध्या सह सम्बधेन एते आत्मगुणाः प्रत्येकस्मिन् जीवात्मानि भिन्नाः भासन्ते । (परमात्मनः गुणाः जीवात्मनि प्रतिबिंबिता सन्ति ।)

– मनसः आत्मना सह संयोगन एते गुणाः मनसा माध्यमेन व्यक्ताः भवन्ति । यदि एवं तर्हि तद्प्रत्यक्षत्वं न भवेत् ।

– सुखदुःखादयः एते प्रत्यगात्म प्रत्यक्षाः सन्ति ।

– अतः बुद्धिसुखादयः एते मनःप्रत्यक्षाः न सन्ति यतः ते प्रत्यक्षाः सन्ति ।

– मनः बुद्ध्यादि गुणान् न जानति । एवं मनःप्रत्यक्षस्य अभावात् आत्मगुणाः न मनसः गुणाः ।

गौतमेन उक्तम् – गौतमेन अपि सुखादयः आत्मप्रत्यक्षाः सन्ति इति फलपरीक्षया कथितम् ।

सूत्रम् – ''प्रीतेरात्माश्रयत्वादप्रतिषेध ।।'' (न्यायसूत्रम्)

अनेन सूत्राधारेण वात्स्यायने भाष्ये अधोक्तं वर्णनं कृतम् ।

''प्रीतिः आत्मप्रत्यक्षत्वात् आत्मनः आश्रयेन अस्ति ।''

अतः प्रीतिः इति आत्मगुणः अस्ति । तथैव

सुषुप्त्याम् आत्मा प्रज्ञाबुद्धियुतः वर्तते । तदा सः अव्यक्तः इति उच्यते । सः स्वयं सुषुप्तः समाधिस्थः जीवनमुक्तः च भवति । एतादृशः अयम् अव्यक्तात्मा शुद्धसत्वात्मिकया प्रज्ञया तथा महत्तत्वाच्यया बुद्ध्या तुरीयं शिवं रसं लब्धानन्दं परमात्मनं सम्मिलति ।

– एषा ज्ञानोपलब्धिः आत्मप्रत्यक्षा अस्ति ।

कपिलेन उक्तम् (सांख्यमतम्)– प्रज्ञा/बुद्धिः त्रिगुणात्मिका महती अस्ति । तन्मनः इति कपिलस्य सूत्रम् । अनेन उपलब्धिज्ञानेन तथा प्रत्यक्षेण एषा प्रज्ञा प्रत्यक्षा भवति । एवं सः अव्यक्तात्मा

त्रिगुणात्मकेन महत्तत्वेन त्रिगुणात्मकेन मनसा अहं (अहमेव) अस्मि इति मन्यते । स: महात्मा 'अहमेव करोमि' (अहंकार:) इति अविद्या नाम बुद्धिं उत्पद्यते ।

अत: अहंकारात् उत्पन्नानि पञ्चमहाभूतानि पञ्चतैजसात्मांशेन निर्मीयन्ते ।

– अहंकारिदशेन्द्रियाणि मन: अर्थपञ्चकं तथा पञ्चप्राणयुक्तं स्वप्नस्थाने एते स्वप्ने सुखदु:खादिन् प्रत्यक्षं पश्यन्ति । तया अहंकारबुद्धया स्वप्ने तत् प्रत्यक्षं दृश्यते । जागृत्यां प्रत्यक्षं नास्ति ।

– सैव तैजसआत्मा देवनरादियोनिषु शुक्रशोणितादि–बीजसंयोगे प्राप्य पञ्चमहाभूतानि उत्पाद्य तै: सह युक्त: सन् जागरितस्थानस्य वैश्वानर: नामक: आत्मा भवति ।

तेषां भूतानां साहाय्येन स आत्मा अहंकारिकदशेन्द्रियेषु प्रविश्य एकैकतन्मात्रतया उत्पन्नानां भूतानां साहाय्यं गृहीत्वा तथैव त्रिन् गुणान् उत्पाद्य अहंकारिमनसि प्रविश्य तद् गतस्य त्रिगुणात्मकस्य सत्त्वगुणबहुलस्य स्थूलमनस: साहाय्यं गृहीत्वा तथैव पञ्चस्थूलशब्दादि अर्थानां पञ्चप्राणानां च साहाय्येन स आत्मा चतुर्विंशतिक: भवति ।

एष आत्मा जागरितावस्थायां सुखादय: स्थूलविषयं तथा स्थूल अहंकारि बुद्धिं च प्राप्यते । एवं बुद्धि: सुख: दु:खे इच्छा आद्य: आत्मप्रत्यक्ष: वर्तन्ते ।

– 'आदि' पदे मन:प्रत्यक्ष: चिन्त्यादय: अर्थ: अपि भवति ।

मन:प्रत्यक्षम् – सुषुप्तिस्वप्नयो: सन्धिकाले आत्मा महत्तत्वेन मनसा च यस्य चिन्तनं तर्कं विचारं च करोति तं मन:प्रत्यक्षम् इति ब्रूयात् । स्वप्नस्थानस्थ: तैजसात्मा यदा अहंकारिमनसा युक्त: चिन्तनीयादीन् प्राप्नोति तमपि मन:प्रत्यक्षं ब्रूयात् ।

– जागरितस्थानस्थ: वैश्वानरात्मा आत्मकृतेन सत्वादिगुणमयेन स्थूलमनसा यान् चिन्तनीयादीन् प्राप्नोति तं लोकेषु मन:प्रत्यक्षम् इति उच्यते ।

इन्द्रियप्रत्यक्षम् – स्वप्नं सुषुप्ति: च एतयो: सन्धिकाले अहंकारिपंचेन्द्रियाणां तथा अर्थानाम् अभावेन अत्र इन्द्रियप्रत्यक्षं न भवति । स्वप्नस्थानस्थ: तैजसात्मा अहंकारिश्रोत्रादिभि: यान् शब्दादीन् गृह्णाति तं स्वप्नगतम् इन्द्रियप्रत्यक्षं उच्यते । जागरितस्थानस्थ: वैश्वानरात्मा स्वयं बाह्य लोकेषु सन्निकृष्टानां शब्दादिकानां भौतिकश्रोत्रादिभि: इन्द्रियै: ग्रहणं करोति । तं इन्द्रियप्रत्यक्षं उच्यते ।

एतन्मध्ये इन्द्रियाणि अर्थाः च एतयोः सन्निकर्षस्य वर्णनं तिस्त्रैषणीये अध्याये कृतम् अस्ति ।

– इन्द्रियप्रत्यक्षबाधकानां दशकारणानाम् उल्लेखः कृतः ।

– अनन्तरं पञ्च इन्द्रियाणां भावगुणानाम् अभावगुणानां वर्णनं कृतम् ।

– एवं आत्मप्रत्यक्षादिसप्तविधप्रत्यक्षं प्राप्यार्थग्रहणरुपिणौ द्विविधौ स्तः ।

अ) क्षणिकम् । ब) निश्चयात्मकम् ।

अत्र क्षणिकम् अप्रमाणम् अस्ति प्रत्युत निश्चयात्मकं प्रमाणम् अस्ति ।

– तन्मध्ये पञ्च इन्द्रियार्थाणां सन्निकर्षेण उत्पन्नम् आत्ममनसोः संयोगपूर्वकं अव्यपदेश्यं अव्यभिचारि व्यवसायात्मकं च ज्ञानं नाम प्रत्यक्षप्रमाणम् । एतदेव पञ्चविधम् इन्द्रिज्ञानम् ।

– आत्मप्रत्यक्षं अप्राप्तग्रहणात् आप्तोपदेशेन ज्ञातव्यम् । एतन्मध्ये लौकिकम् – प्रमाणम् ।

अलौकिकम् – अप्रमाणम् । अप्राप्त्यर्थत्वात् अलौकिकं प्रमाणत्वं नास्ति ।

– सर्वं मानसप्रत्यक्षं प्रमाणं नास्ति । अतः मानसप्रत्यक्षप्रमाणस्था प्रत्यक्षं संज्ञां निष्कास्य अनुमानम् इति संज्ञा दत्ता अस्ति ।

<u>योगीन्द्रनाथसेनः</u> – गङ्गाधरवत् 'मनसा' स्थाने 'आत्मना' इति पदं गृहीत्वा पाठभेदः स्वीकृतः । परं टीकां कुर्वता 'मनसा' इत्येव वर्णनम् कृतम् ।

– इन्द्रियमनसोः साहाय्येन स्वयं उपलभ्य भवनम् अथवा साक्षात् कृतिकरणम् ।

– शब्दादिविषयाणां ज्ञानम् इन्द्रियप्रत्यक्षम् अस्ति प्रत्युत सुखदुःखादि मानसप्रत्यक्षम् अस्ति ।

– चक्रपाणिसमानम् वर्णनम् – तिस्त्रैषणीयस्थं अध्यायस्थं प्रत्यक्षलक्षणस्य सूत्रम् उद्धृतम् ।

<u>ज्योतिषचन्द्र सरस्वतिः</u> – प्रत्यक्षप्रमाणे स्वानुभूतस्य ज्ञानस्य समावेशः भवति ।

– अपरप्रत्यक्षं नाम इतरेभ्यः प्रत्यक्षं भविष्यतः ज्ञानस्य समावेशः उपदेशे अन्तर्गतः अस्ति ।

– मृतशरीराय किमपि ज्ञानं न भवति इति 'स्वयं' पदेन वोध्यते ।

– आत्मेन्द्रियविषयाणां सन्निकर्षेण भविष्यत् ज्ञानं प्रत्यक्षम् ।

<u>निष्कर्षः</u> – १) पाठभेदः अस्ति । २) परं टीकाकारैः अस्य विषयस्य विस्तारेण समानं वर्णनं कृतम् । ३) तेन अभिप्रेतार्थेन विधर्मता नास्ति । ४) गङ्गाधरस्य टीका विशेषा ।

(३)सन्दर्भ: – च वि ७/१३

मूलसूत्रम् – सूक्ष्मवृत्तपरीणाहा: श्वेता दीर्घा ऊर्णांशुसंकाशा: ।

अधिकरणम् – पुरीषजकृमिवर्णनम् इति अधिकरणे इदं सूत्रम् उल्लिखितम् ।

पाठभेद: वैधर्म्यं च –

अस्मिन् सूत्रे ' दीर्घा ऊर्णांशुसंकाशा:' पदे पाठभेद: तज्जन्य: वैधर्म्यं च स्त: ।

टीका

चक्रपाणि: – सूक्ष्मवृत्तपरीणाहा: श्वेता दीर्घा ऊर्णांशुसंकाशा: ।

गङ्गाधर: – सूक्ष्मवृत्तपरीणाहा: श्वेता दीर्घोणांशुसंकाशा: ।

योगीन्द्रनाथसेन: – सूक्ष्मवृत्तपरीणाहा: श्वेता दीर्घोणांशुसंकाशा: ।

ज्योतिषचन्द्रसरस्वति: – सूक्ष्मवृत्तपरीणाहा: श्वेता दीर्घा ऊर्णांशुसंकाशा: ।

विमर्श: –

– गङ्गाधर: योगीन्द्रनाथसेन: च एताभ्यां दीर्घोर्णांशुसंकाशा: इति पाठ: प्रत्युत चक्रपाणि ज्योतिषचन्द्रसरस्वति: एताभ्यां दीर्घा ऊर्णांशुसंकाशा: इति पाठ: गृहीत: अस्ति ।

– पुरीषजानां कृमीणां वर्णने तेषां संस्थानम् (आकृति:) कथनसमये उपरिनिर्दिष्टं सूत्रम् आगतम् ।

– यदि चक्रपाणि: ज्योतिषचन्द्रसरस्वति: एतयो: पाठं स्वीकृत: तर्हि केचन पुरीषजकृमय: सूक्ष्मवृत्तपरीणाहा: श्वेतवर्णिन: दीर्घा: मेषलोमतुल्या: सन्ति इति अस्य अर्थ: भवेत् ।

यदि गङ्गाधर: योगीन्द्रनाथसेन: एतयो: श्वेतवर्णिन दीर्घा: मेषलोमसमाना: सन्ति इति अस्य अर्थ: भवति ।

– चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च दीर्घ: ऊर्णांशुसंकाश: एते द्वे भिन्ने कृमीणां लक्षणे स्त: । तदनुसारं तस्य अर्थ: भवति ।

– योगीन्द्रनाथसेन: गङ्गाधर: च दीर्घोर्णांशुसंकाश: इति समासं कृत्वा दीर्घ: इति मेषलोमस्य विशेषणं भवति तथापि स एव अर्थ: भवति ।

निष्कर्ष:–

शब्दश: वैधर्म्यं भासते तथापि अभिप्रेतार्थ: भिन्न नास्ति । पाठद्वयस्य अभिप्रेतार्थ: एक: एव ।

(४)सन्दर्भः – च. वि. ७/१३

मूलसूत्रम् –

यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः ।

अधिकरणम् – पुरीषकृमीणां स्थानवर्णनम् इति अधिकरणे इदं सूत्रम् उल्लिखितम् ।

पाठभेदः वैधर्म्यं च –

अस्मिन् सूत्रे 'स्युर्यदन्तरं तदन्तरं' पदे पाठभेदः तज्ञन्यः वैधर्म्यं च स्तः ।

पाठः –

चक्रपाणिः – यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः

गङ्गाधरः – यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः

योगीन्द्रनाथसेनः – यस्य पुनरामाशयोन्मुखाः स्युस्तस्योद्गार निःश्वासाः ।

ज्योतिषचन्द्रसरस्वतिः – यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः ।

टीका

चक्रपाणिः – यदन्तरमिति यस्मिन् काले तदन्तरं तत्कालमेव ।

ज्योतिषचन्द्र सरस्वतिः – यदन्तर यदा यस्मिन् काले तदन्तरं तदा ।

विमर्शः–

– योगीन्द्रनाथसेनेन 'यदन्तरं तदन्तरं ' एतौ पदौ सूत्रे न गृहितौ ।

– 'यदन्तरं', 'तदन्तरं', एते अव्यये च तयो अर्थः 'यदा तदा' इति अनुक्रमेण भवेत् ।

– चक्रपाणिः ज्योतिषचन्द्र सरस्वतिः च एताभ्यां टीकायामपि एषैव अर्थः वर्णितः ।

– 'यदा तदा' यदन्तरं एतानि अव्ययानि सर्वदा वाक्यशेषं तन्त्रयुक्त्यनुसारं च योज्यन्ते ।

– चक्रपाणिः गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च एतैः चरकस्य मूलपाठे तानि पदानि वर्णितानि ।

– यद्यपि योगेन्द्रनाथसेनेन वर्णितानि तथापि वाक्यशेषं तन्त्रयुक्त्यनुसारं च तानि तत्र गृहीत्वा एव अर्थ निर्णयं भवेत् ।

निष्कर्षः–पदशः वैधर्म्यंम् अस्ति । वैधर्म्यं स्यादपि वाक्यशेषं तन्त्रयुक्त्यनुसारं स दुरीकर्तुं शक्यम् ।

(५) सन्दर्भ: – च वि ८/६९

मूलसूत्रम् – तत्र कारणं नाम तद् यद् करोति स एव हेतु: स कर्ता ।

अधिकरणम् –

दशविधपरीक्षावर्णनविषये कारणम् इति पदस्य विवेचनम् अस्मिन् सूत्रे वर्णितम् अस्ति ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रे 'यद्' पदे पाठभेद: तज्जन्य: वैधर्म्यं च स्त: ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | यद् | यदिति कारणप्रत्यवमर्शात् नपुंसकम् । |
| गङ्गाधर: | य: | भगवान् पाणिनिरप्युवाच कारके स्वतन्त्र: कर्ता प्रयोजको हेतुश्चेति |
| योगीन्द्रनाथसेन: | य: | यत् करोति क्रियां निष्पादयति तत् कारणम् । एवं च कारयतीति कारणम् । अत्र स्वार्थे णिच् । |
| ज्योतिषचन्द्रसरस्वति: | य: | य इति विधेयप्राधान्यात् पुंल्लिंगम् । |

विवेचनम् – १) अस्मिन् सूत्रे यद् य: च इति पाठभेदौ स्त: ।

२) एवं सर्वनाम्न: पाठद्वयं योजनीयस्य कारणमपि टीकाकार: कथयन्ति । पाठद्वये विवेचनं योग्यम् अस्ति ।

४) 'यद्' इति नपुंसकलिङ्गं पदं कारणम् इति नपुंसकलिङ्गं पदम् अन्वितम् । प्रत्युत: य: इति पदं कर्ता इति पुंल्गिं पदम् अन्वितम् अस्ति ।

५) चक्रपाणि: वर्णयति यत् 'यद्' इति पदं कारणपदस्य बोधकम् । तस्मात् तस्य प्रयोग: नपुंसकलिङ्गिन: कृत: ।

६) प्रत्युत पाणिने: सूत्रानुसारेण कारकेषु कर्ता स्वतन्त्र: भवति स: प्रयोजक: हेतु: च अस्ति अत: गङ्गाधरेण अस्य कर्तु: बोधक: सर्वनाम्न: य: इति पुल्लिङ्गिन: प्रयोग: सूत्रे कृत: ।

७) प्रत्युत ज्योतिषचन्द्रसरस्वति य: इति पदं विधेयप्राधान्यात् न तु उद्देशप्राधान्यात् उपयुक्ते ।

निष्कर्ष: – द्वौ अपि पाठौ योग्यौ स्त: । अभिप्रेतार्थत: वैधर्म्यं नास्ति । तथापि 'यद्' नपुंसकलिङ्गी पाठ: योग्यतर: भाति ।

उ) पाठभेदाः सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरम् एवं निष्कर्षः प्राप्यते यत् एकः पाठः अव्याप्तः सन् अन्ये पाठाः योग्याः ।

अस्य वैधर्म्यप्रकारे १० वैधर्म्याणि सम्प्राप्तानि ।

(१) संदर्भः – च. वि. १/१७

मूलं सूत्रम् – क्षारः पुनरौष्ण्यतैक्ष्ण्यलाघवोपपन्नाः.............।।

अधिकरणम् – द्रव्यप्रभावस्य अधिकरणे 'त्रीणि अनभ्यस्त द्रव्याणि' इति उपाधिकरणे क्षारद्रव्यस्य वर्णनम् उपरितने सूत्रे अस्ति ।

पाठभेदः वैधर्म्यम् च – अत्र टीकाकारैः पाठभेदं गृहीत्वा विवेचनं कृतम् । लाघवम् इति पदस्य स्थाने 'लवणं' पाठभेदः अस्ति ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | लाघवोपपन्नः | टीका नास्ति । |
| गङ्गाधरः | लवणोपपन्नः | औष्ण्यतैक्ष्ण्यलवणास्त्रयो गुणाः प्रभावाः । |
| योगीन्द्रनाथसेनः | लवणोपपन्नः | क्षारः पुनः औष्ण्यं तैक्ष्ण्यं लवणरसः तैरुपपन्नः । उष्णः तीक्ष्णः लवणरसभूयिष्ठश्च । |
| ज्योतिषचन्द्रसरस्वतिः | -- | -- |

विवेचनम् – १) क्षारं द्रव्यं अधिकायां मात्रायां न सेवनीयम् । अस्य द्रव्यस्य प्रभावः अस्मिन् सूत्रे वर्णितः । क्षारस्य गुणधर्माः कर्म तथा अतिप्रमाणे सेवनस्य दुष्परिणामाः इत्यादीनां घटकानां वर्णनं कृतम् ।

२) यदि मूलं सूत्रं दृष्टं तर्हि प्रथमायां पङ्क्त्यां क्षारस्य गुणधर्माः वर्णिताः । उष्णतीक्ष्णयोः गुणयोः वर्णनं तथा तेनैव सह लाघवं लवणं च इति पाठभेदौ सती पदयोः वर्णनम् ।

३) लाघवं लवणं एते पदे 'उपपन्नः' इति पदं संलग्नम् । प्रथमं तस्य अर्थं पश्येम ।

उपपन्नः – त्रि उप + पद – क्त । युक्तियुक्तः । प्राप्तः । सतोगुणान्तराधानरुपसंस्कारयुक्तः । उत्पन्नः । (वाचस्पत्यम् / खण्ड २/ १२२४)

– One who has approached a teacher. One who has obtained or reached, obtained, reached, gained, happened, produced, effected, existing, endowed with, fill, suited, adequates. (Monier Williams / 201)

- Obtained, attended by, in company with Right, Fit, Proper, Suitable.

(आपटे शब्दकोश: / १११)

– अत: उपपन्न: पदस्य अर्थ: एतै: घटकै: युक्तता, सहवास:, प्रापणं संयुक्त: प्राप्त: इत्यादय: अर्था:

– तदा औष्ण्यतैक्ष्ण्यलाघवो (लवणो) लवण: उपपन्न: । अस्य वाक्यस्य अर्थ: उष्णत्वं तीक्ष्णत्वं लाघवत्वं (लवणत्वं) च एतै: युक्त अनेन गुणेन प्राप्त: संयुक्त: इति भवति ।

४) यासां त्रयाणां गुणानां वर्णनं कृतम् । तस्मिन् औष्ण्यं तैक्ष्ण्यं च अनुक्रमेण उष्णस्य गुणस्य भाव: तीक्ष्णस्य गुणस्य भाव: च इदृशी अर्थात्मका पदयोजना अस्ति ।

'औष्णं' पदं उष्मन् पदं व्यञ् प्रत्ययं संयुज्य सिद्धम् । तस्य अर्थ: उष्णता औष्ण्यस्य भाव: च अस्ति । तथैव

तैक्ष्ण्यं पदं तीक्ष्ण पदं व्यञ् प्रत्ययं संयुज्य सिद्धम् । तस्य अर्थ: तीक्ष्णता तैक्ष्ण्यस्य भाव: इति भवति ।

एतै: पादै: सह लाघवं पदं सयुक्तिकं अस्ति ।

लाघवम् – लघो: भाव: । लघु + व्यञ् + अण् । नाम लघुत्वं लघो: भाव: च भवति ।

अत: लाघवं पदं औष्ण्यं तैक्ष्ण्यं एतयो: सह यथायोग्यं भाति ।

५) अधुना लवणम् इति पाठभेदविषये विमर्शाम: । गङ्गाधर: योगीन्द्रनाथसेन: च एतौ लवणं पाठं स्वीकुरुत: । गङ्गाधरेण लवणं इति क्षारस्य गुण: वर्णित: ।

– ग्रन्थे रसवाचकानि पदानि नैकवारं तस्मिन् घटके तिष्ठानां महाभूतसङ्घटनं दर्शयितुं वर्णितानि ।

उदा. – वातजे प्रमेहे शरीराय कषायत्वं भवति इत्यर्थ: वातजे प्रमेहे शरीरे केवलं पार्थिवा: वायवीया: च घटका: अवशिष्टा: सन्ति ।

यदि लवणम् इति पाठ: गुणवाचक: गृहीत: तर्हि अर्थ: भवति यद् क्षारे जलीयं वा आग्नेयं महाभूतप्राधान्यं अस्ति । अत: इमं पदं गुणै: सह संलग्नम् ।

६) केवलं औष्ण्यं तैक्ष्ण्यं इति भाववाचकाभ्यां पदाभ्यां सह लवणं पदं न युक्तिसंगतम् इति ।

७) तदर्थं अग्रिमं सूत्रम् आधारार्थं गृह्णामि –

अतश्च प्राकृतं बुद्ध्वा देशकालान्तराणि च ।

तन्त्रकर्तृरभिप्रायानुपायांश्चार्थमादिशेत् ।।    च. सू. २६/३७

अस्य अर्थ: किमस्ति तन्त्रकर्तृ: अभिप्राय: एतद् प्राकृतदेशान्तरकालान्तरादिभि: घटकै: ज्ञात्वा पश्चान् तदनुसारं अभिप्रेतार्थ: निश्चितव्य: ।

– 'प्रकृतं बुद्ध्वा' इति पदस्य टीका अग्रिमवन् –

''प्रकृतं बुद्ध्वा यथा 'क्षारा: क्षीरं फलं पुष्पम्' इत्यत्रोद्भिदगणस्य प्रकृतत्वात् क्षीरमिति स्नुह्यादिक्षीरमेव क्षीरशब्देन वदेत् ।'' चक्रपाणि:

– नाम औद्भिदगणे क्षीरं पदेन दुग्धं अर्थम् अस्वीकृत्य स्नुह्यादि क्षीरस्य अभिप्राय: स्वीकार्य: ।

उपरितने सूत्रे अपि एवमेव शब्दयोजना अर्थयोजना च करणीया ।

अत: औष्ण्यं तैक्ष्ण्यं च इति भाववाचकपदाभ्यां सह लाघवं इति लघुत्वस्य भाववाचक: शब्द: अधिक: युक्तियुक्त: भाति ।

निष्कर्ष: –

१) लाघवं लवणं च एतौ द्वौ पाठौ गर्भितार्थदृष्ट्या योग्यौ भात: ।

२) परं तथापि व्याकरणं तन्त्रयुक्ति: तथा तन्त्रकर्तु: अभिप्राय: च एतान् अनुसृत्य लवणं पाठापेक्षया लाघवं पाठ: अधिक: युक्तियुक्त: अस्ति इति मे मति: ।

(२) सन्दर्भ: – च. वि. २।१३

मूलं सूत्रम् – तत्र साध्यमामं प्रदुष्टमलसीभूतमुल्लेखयेदादौ पाययित्वा सलवणमुष्णं वारि । तत: स्वेदनवर्तिप्रणिधानाभ्यामुपाचरेदुपवासयेच्चैनम् ।

अधिकरणम् – आमप्रदोषचिकित्सा इति अधिकरणान्तर्गतम् अस्य सूत्रस्य उल्लेख: अस्ति ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रस्थे स्वेदनपदे पाठभेद: अस्ति तस्मात् विधर्मता दृश्यते ।

टीका–

| टीकाकार: | पाठ: |
|---|---|
| चक्रपाणि: | तत: स्वेदनवर्तिप्रणिधानाभ्याम् । |
| गङ्गाधर: | तत: छेदनवर्तिप्रणिधानाभ्याम् । |
| योगीन्द्रनाथसेन: | तत: स्वेदनवर्तिप्रणिधानाभ्याम् । |
| ज्योतिषचन्द्रसरस्वति: | तत: स्वेदनवर्तिप्रणिधानाभ्याम् । |

विवेचनम्

१) चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: स्वेदन इति पाठ: स्वीकृत: प्रत्युत गङ्गाधरेण छेदन इति ।

२) इदम् अधिकरणं साध्यस्य आमस्य उपक्रमस्य अस्ति ।

३) अस्मिन् चरकाचार्येण अग्रिम: उपक्रम: वर्णित:

प्रदुष्ट अलसीभूत: साध्य: आम:
↓
उल्लेखनम् – सलवणम् उष्णं वारि
↓
स्वेदनम्
↓
वर्तिप्रणिधानम्
↓
उपवास:
↓
विरेचनम्

अस्मिन् चिकित्साक्रमे गङ्गाधर: स्वेदनस्थाने छेदन इति पाठभेदं स्वीकरोति ।

४) गङ्गाधरस्य टीका– गङ्गाधरेण साध्यायाम् आमावस्थायाम् उल्लेखनस्य पश्चात् छेदनं करणीयम् इति वर्णितम् । अत्र श्लेष्मा छिन्दताम् कट्वादिरसैः युक्तद्रव्याणाम् उपयोगः सूचितः अस्ति ।

५) चरकाचार्यः आदिशति यत् साध्ये वा आमविषे औषधस्य प्रयोगसमये पूर्णतया निरामावस्थायाः प्राप्तिः आवश्यकी । तस्याम् अवस्थायां प्राप्तायाम् एव औषधं प्रयोजितव्यम् ।

६) आमावस्थायाम् अजीर्णावस्थायां किमपि अन्नं वा औषधं मा सेवेत । अन्यथा आमावस्था वा सम्प्राप्तिः अधिका वर्धते।

७) दुर्बलः अग्निः युगपत् दोषः आहारः औषधं च एतेषां त्रयाणां परिणमनं कर्तुं न शक्नोति ।

८) अतः अजीर्णावस्थायां तीव्रशूलज्वरादीनि लक्षणानि सन्ति चेत् तेषां शमनार्थं औषधं न सेवेत इति निर्देशः अस्ति ।

९) आमावस्थायाम् अपतर्पणम् एव प्रथमा प्रधाना च चिकित्सा अस्ति ।

१०)प्राप्तायां निरामावस्थायां जीर्णाहारस्य लक्षणानि उत्पन्ने सति अन्नकाले शेषदोषपाचनार्थं अग्निसंधुक्षणार्थं च औषधं सेवनीयम् ।

११) यदि गङ्गाधरस्य पाठानुसारम् अर्थः गृहीतः उल्लेखनानन्तरं कटुरसादिगुणानि कफच्छेदनं कुर्वन्ति द्रव्याणि उपयोजितानि तर्हि तेन सिद्धान्तः तु बाधितः भवेत् एव प्रत्युत औषधस्य अजीर्णेन आमदोषस्य सम्प्राप्तिः जीर्णा भवति ।

१२) अतः चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतेषां स्वेदन पाठः योग्यः भाति । स्वेदनम् इति उष्णा क्रिया अस्ति । वमनोत्तरं शेषान् आमदोषान् विलीय तां प्रवाहयमाना चिकित्सा अस्ति ।

१३) ज्योतिषचन्द्रसरस्वतिना उदरप्रदेशे स्वेदनं कुर्यात् इति विशेषः वर्णितः ।

<u>निष्कर्षः</u>

– गङ्गाधरस्य छेदनम् पाठः सिद्धान्तदृष्ट्या अधिकरणानुसारेण अव्याप्तः भाति ।

(३)सन्दर्भः – च. वि. २/१३

मूलं सूत्रम् – विमुक्तामप्रदोषस्य पुनः .......................... ।।

अधिकरणम् – आमप्रदोषे नष्टे करणीया चिकित्सा अस्मिन् सूत्रे अस्ति । अस्य सूत्रस्य पूर्वे सूत्रे आमप्रदोषः तज्जन्याः व्याधयः च एतासां सूत्ररुपेण चिकित्सा वर्णिता ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रस्थे 'विमुक्तामप्रदोषस्य' इति पदे पाठभेदः अस्ति तस्मात् विधर्मता दृश्यते ।

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | विमुक्तामप्रदोषस्य | विमुक्तामप्रदोषस्य इत्यादिनाऽभ्यङ्गादिविधानं व्याधिजनित अतिदौर्बल्यादि दोषप्रशमनार्थम् । |
| गङ्गाधरः | अनुद्रिक्तामप्रदोषस्य | अनुद्रिक्तामदोषस्य अप्रबलामदोषस्य । |
| योगीन्द्रनाथसेनः | विमुक्तामप्रदोषस्य | टीका नास्ति |
| ज्योतिषचन्द्रसरस्वतिः | विमुक्तामप्रदोषस्य | पुनरेव लङ्घनेन आमप्रदोषं निराकृत्य व्याधिप्रत्यनीकेन चोपद्रवान् प्रशाम्य अभ्यङ्गादीन् विधिवत् .......। |

विवेचनम्

१) अस्मिन् सूत्रे चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतैः विमुक्तामप्रदोषस्य उत गङ्गाधरेण 'अनुद्रिक्तामप्रदोषस्य' इति पाठभेदः स्वीकृतः ।

२) आदौ 'विमुक्तम्' 'अनुद्रिक्तं' च अनयोः व्याकरणं पश्येम ।

– विमुक्त – त्रि (वि + मुच् + क्तः) विशेषेण मुक्तः । व्यक्तः । (शब्दकल्पद्रुमः । खण्डः ५)

– मुक्त – त्रि मुच् क्तः । त्यक्तः प्राप्तमोक्षः आनन्दितः । (वाचस्पत्यम् । खण्डः ६)

-vi + mue to unloose unharness , to take off , to release to set free liberate
to leave abandon guit desert give up relinguish, to shun avoid to loose to pardon, forgive, to emit, discharge shed, pour or send forth, to set free, to throw, hurt, to utter, to drop or to expelled, to be freed or delivered or redeased, get rid of , escape from, to be deprived of, to loosen, detach, to keep off

(Monier Williams / 980)

३) अनुद्रिक्त – न उद्रिक्तः अनुद्रिक्तः । (नञ् तत्पुरुष समासः)

– उद्रिक्तः– mfn prominent, Standing out, increased, augmented, abundant, abounding, excessive, superflows, left, remaining.

– त्रि उत् + रिच् + क्त । स्फुटम् । स्पष्टम् । (शब्दकल्पद्रुमः । खण्ड १/२४२)

– उद् + रिच् + क्त । अतिशयिते । अधिके । स्फुटे । (वाचस्पत्यम् । खण्डः २/११८४)

४) 'विमुक्तम्' पदे वि उपसर्गः मुच् धातवे संयुज्य पदं सिद्धम् ।

– वि – निग्रहः । वियोगः । पदपूरणम् । निश्चयः । असहनम् । हेतुः । अव्याप्तिः । विनियोगः । ईषदर्थः । परिभवः । शुद्धम् । अवलम्बनम् । विज्ञानम् । विशेषः । गतिः । व्यालम्भः । पालनम् ।

– वि – विशेषवैरुप्यनञर्थगतिदानेषु । इति दुर्गादासः मुग्धबोधटीकायाम् ।

(शब्दकल्पद्रुमः । खण्डः ५/३७०)

– मुच् – क मोक्षे । (कविकल्पद्रुमः) मोक्षस्त्यागः । (दुर्गादासः)

(शब्दकल्पद्रुमः । खण्डः ४/७४१)

– मुक्तः त्रि ( मुच् + क्तः ) प्राप्तमोक्षः । मोक्षितः । नन्दितः । नृपविशेषः । ऋषिविशेषः ।

(शब्दकल्पद्रुमः/खण्डः ३/७२९)

अतः 'विमुक्तः' इत्यस्य अर्थः विशेषतः विमुक्तः इति भवति । विशेषेण प्रयत्नेन कस्मादपि वस्तुविषयात् मोचनं नाम विमुक्तः ।

– अस्मिन् अधिकरणे आमप्रदोषजविकाराणां चिकित्सा वर्णिता । आदौ आमप्रदोषः नाशनीयः । तदर्थम् उल्लेखनं स्वेदनं वर्तिप्रणिधानं लङ्घनं विरेचनं च इत्यादिः चिकित्सा करणीया । पश्चात् दोषशेषपाचनार्थम् अग्निसंधुक्षणार्थं च औषधं सेवनीयम् । एवं युक्तिपूर्वं हेतुविपरीतां चिकित्सां कृत्वा आमप्रदोषः नाशनीयः ।

– एतौः विशेषैः प्रयत्नैः आमप्रदोषात् मोचनानन्तरं नष्टे आमप्रदोषे अभ्यङ्गम् आस्थापनम् अनुवासनं स्नेहपानं च एतानि युक्तिपूर्वं करणीयानि ।

एवं ' विमुक्तः ' पाठः अस्मै सूत्रविषयाय युक्तियुक्तः भाति ।

५) अनुद्रिक्त: – अत्र  अन् + उद् + रिच् क्त एवं पदं निर्मितम् । अन् इति पदं नकारार्थकम् । नाम यद् न उद्रिक्तं तादृशं तद्

– उद् – व्य + उ – क्विप् + तुक् । पृषोदरादित्वात् साध: ।  ऊर्ध्वम् । उत्कर्ष: । प्राकट्यम् । नैकट्यम् । प्रकाश: । विभाग: । प्राबल्यम् । अस्वास्थ्यम् । शक्ति: । प्राधान्यम् । बन्धनम् । भाव: । मोक्ष: । लाभ: ।                                        (शब्दकल्पद्रुम:/खण्ड: १/२२९)

– रिच् – कि सम्पर्कवियोगयो: । ( कविकल्पद्रुम: )

इर् ध ञ् व्यौ विरेके । विरेक: पौन: पुन्येन पुरीषोत्सर्ग: । (शब्दकल्पद्रुम:/खण्ड: ४/१६१)

अत: उद्रिक्त: अस्य अर्थ: अत्यधिके प्रमाणे उत्सर्जनम् ।

– उत्सन्न: सन् उत्स्त्रष्टुं प्रवर्तनम् । संक्षेपत: प्रमाणे आधिक्यं भूत्वा उत्सष्टुं प्रवर्तनम् ' एवम् उद्रिक्त: इति वक्तुं शक्यम् । अस्मै 'अन्' संयुज्य तस्य विपरीत: अर्थ: भवेत् ।

– यद् प्रमाणे न वृद्धम् अपि च न उत्सर्जति तद् अनुद्रिक्तम् ।

– गङ्गाधरस्य पाठानुसारं यदि अनुद्रिक्तं पदं युज्यते चेत् अधोनिर्दिष्टवत् अर्थविवेचनम् आवश्यकम्

– प्रथमं उल्लेखनं – लङ्घनादिभि: उपक्रमै: आमप्रदोष: नाशनीय: । शेषदोषपाचनार्थम् औषधं दद्यात् । पश्चात् आमप्रदोष: न अधिक: वृद्ध: अपि च न बहिरागच्छति इति दृष्ट्वा अग्रिमा अभ्यंगस्नेहादि: चिकित्सा करणीया ।

– गङ्गाधरेण अनुद्रिक्त: आमप्रदोष: इत्यर्थ: 'अप्रबल आमदोष:' इति कृत: । अस्यार्थ: एवं भविष्यति न अधिक: बलवान् परंतु कस्यांश्चित् मात्रायां उपस्थित: आमप्रदोष: ।

– यदि एवम् अर्थ: गृहीत: चेत् अस्मिन् सूत्रे वर्णितानाम् उल्लेखनलङ्घनादीनां चिकित्सानां किमपि प्रयोजनमेव न अवशिष्यते ।

– यत: एतस्मात् पूर्वम् उत्क्लिष्टम्– आमदोष: उल्लेखनादि चिकित्सया निष्कासितव्य: । शेषदोषार्थं पाचनं लङ्घनं भेषजं च इति चिकित्सा अभिप्रेत: अस्ति ।

– एतया सर्वथा चिकित्सया आमदोष: पूर्णतया नाशनीय: । यदि स्वल्प: अपि आमदोष: अवशिष्येत तर्हि एतादृशायाम् अवस्थायां स्नेहपानम् अनुवासनम् अभ्यङ्गं च एते उपक्रमा: क्रियेत तदा आमप्रदोषस्य विकृति: वर्धते ।

''अशुद्धकोष्ठस्य स्नेहपानं व्याधिवर्धनं भवति ।'' (चक्रपाणि: च चि ७/४२ )

– एवं गङ्गाधरस्य 'अनुद्रिक्त आमप्रदोष:' इति पाठ: सूत्रविषयाय युक्तियुक्त: न भाति इति मे मति:

निष्कर्ष:

१) पूर्णतया ऊहापोहानन्तरं मम मतम् एवम् अस्ति यत् गङ्गाधरस्य 'अनुद्रिक्त:' इति पाठ: तथा तदुपरिस्था व्याख्या विषयाधिकरणाय न युक्तियुक्ता भाति ।

२) चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतेषां 'विमुक्त:' इति पाठ: तथा तस्य विवेचनम् अधिकं युक्तियुक्तम् इति मे मतम् ।

(४) सन्दर्भ – च.वि. ३/७ (२)

मूलसूत्रम् – उदकं तु खल्वत्यर्थविकृतगन्धवर्णरसस्पर्शं क्लेदबहुलं अपक्रान्तजलचरविहङ्गम् उपक्षीणजलेशयम् अप्रीतिकरम् अपगतगुणं विद्यात् ।

अधिकरणम् – जलम् भावस्य वैगुण्यलक्षणानां वर्णनम् । अत्र एकस्मिन् लक्षणे टीकाकारा: पाठभेदान् स्वीकुर्वन्ति तेन विधर्मता दृश्यते ।

पाठभेद: वैधर्म्यं च –

अस्मिन् सूत्रस्थे उपक्षीणजलेशयम् पदे पाठभेद: अस्ति तस्मात् विधर्मता दृश्यते ।

टीका

| टीकाकार: | पाठ: | टीका |
|---|---|---|
| चक्रपाणि: | उपक्षीणजलेशयम् | टीका नास्ति । |
| गङ्गाधर: | उपक्षीणजलाशयम् | प्राय: शुष्काल्पजलाशयम् । |
| योगीन्द्रनाथसेन: | उपक्षीणजलेशयम् | उपक्षीणा: जलचरा: प्राणिन: मत्स्यादय: । |
| ज्योतिषचन्द्रसरस्वति: | उपक्षीणजलेशयम् | स्वल्पमत्स्यादिकम् । |

विवेचनम् – अस्मिन् सूत्रे पाठद्वयम् उपलभ्यते ।

१) उपक्षीणजलेशयम्

२) उपक्षीणजलाशयम्

अत्र 'जलेशयम् ' 'जलाशयम्' च इत्यस्य व्याकरणं पश्याम ।

जलेशयम् – पुं जले शेते शी – अच् अलुक् समा.। विष्णु: । जलस्थायिमात्रम् । मत्स्य: ।

(वाचस्पत्यम् खण्ड ४)

– पु ( जले शेते इति । शी + अच् । 'तत् पुरुषे कृतीति' । अलुक् । विष्णु: मत्स्य: ।

(शब्दकल्पद्रुमम् / खण्ड २)

जलाशयम् – पुं जले तत् समीपे आशेते । आ + शी – अच् । आधारे ।

जलम् आशय: आधारो यस्य । (वाचस्पत्यम् खण्ड ४)

– क्ली जले जलबहुलप्रदेशे आशेते इति । आ + शी + अच् । उशीरम् लामज्जकम् ।

जलाशयः – पुं. जलस्य आशयः आधारः । जलाधारः । स तु पुष्करिण्यादिः । अमरः

जलम् आशेते तिष्ठति अत्र । आ + शी + '' पुंसि संज्ञायां घः प्रायेण ।''

समुद्रः हेमचन्द्रः । शृङ्गाटकः । राजनिघण्टु । (शब्दकल्पद्रुम खण्ड २)

– जलेशयः इत्यर्थः जले वसन्तः मत्स्यादयः प्राणिविशेषाः उत जलाशयः इत्यर्थः जलस्य आधारः यत्र जलम् स्थिरमस्ति । एतयोः द्वयोः अपि पाठयोः तद् तद् टीकाकारः तदनुरूपा टीकां करोति ।

– पूर्णं सूत्रं यदि विचार्यते – ''उदकं तु खल्वत्यर्थविकृतगन्धवर्णरसस्पर्शं क्लेदबहुलं अपक्रान्तजलचरविहङ्गम् उपक्षीणजलेशयम् ( जलाशयम् ) अप्रीतिकरम् अपगतगुणं विद्यात् ।

– अतः अस्मिन् सूत्रे प्रथमम् 'अपक्रान्तजलचरविहङ्गम् ' इति पदम् आगतम् । तस्य अर्थः दूषितजलात् जलचरविहङ्गाः निर्गच्छन्ति इति भवति । अस्मात् वर्णनात् पुनः उपक्षीणजलेशयम् इति पाठः गृह्यते चेत् जलचरप्राणिनः क्षीयन्ते, तेषां प्रमाणं न्यूनीभवति इति स्वीकरणम् अयोग्यं भवति । यतः एषा पुनरुक्तिः भवेत् । एषः तन्त्रदोषः उत्पद्यते ।

– यदि उपक्षीणजलाशयम् इति पाठः स्वीक्रियते तर्हि जलस्य आशयः क्षीयते इति अर्थः भवेत् । एषः पाठः योग्यतरः भाति । अस्मिन् पाठे पुनरुक्तदोषः न उद्भवति ।

– ' न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि ।

न वासोभिः सहाजस्त्रं नाविज्ञाते जलाशये ।। (मनुस्मृति । ४ । १२९)

मनुस्मृतौ कुत्र स्नानं नाचरणीयम् इत्यस्य वर्णने जलाशयम् उल्लिखितम् ।

– वृद्धवाग्भटेन दूषितजलं वर्णयता एवम् उक्तम् –

रसवर्णादिविकृतमपक्रान्तविहङ्गम् ।

निन्दितप्रभवं तोयमुपक्षीणजलाशयम् ।। (अष्टांगसंग्रह सूत्रस्थानम् ९ )

– अस्मिन् अपि ' उपक्षीणजलाशयम् ' इत्येव पाठः स्वीकृतः । एवं उपरोक्तात् सर्वस्मात् वर्णनात् गङ्गाधरेण स्वीकृतः 'उपक्षीणजलाशयम्' पाठः तथा तद्गतं तस्य विवेचनं योग्यं भाति।

निष्कर्षः – 'उपक्षीणजलेशयम्' इति पाठः अव्याप्तः । 'उपक्षीणजलाशयम्' इति गङ्गाधरेण स्वीकृतः पाठः तथा तस्योपरि कृता टीका स्वीकारार्हा योग्या च अस्ति ।

(५) सन्दर्भः – च. वि. ६/११

मूलसूत्रम् – तत्रानुबन्ध्यानुबन्धकृतो विशेषः .............अनुबन्ध्यलक्षणसमन्वितास्तत्र यदि दोषा भवन्ति तत्त्रिकं सन्निपातमाचक्षते द्वयं वा संसर्गम् ।

अधिकरणम् – दोषविवेचनम् इति अधिकरणे शारीरदोषानुबन्धः इति उपाधिकरणे उपर्युक्तं सूत्रं वर्णितम् । अस्मिन् सूत्रे स्वतन्त्रपरतन्त्रविचारः उल्लिखिताः ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे 'अनुबन्ध्यलक्षणसमन्विताः' इति पदे पाठभेदः अस्ति । तस्मात् टीकाकारेषु वैधर्म्यं दृश्यते ।

टीका

| टीकाकारः | पाठः |
|---|---|
| चक्रपाणिः | अनुबन्ध्यलक्षणसमन्विताः |
| गङ्गाधरः | अनुबन्ध्यानुबन्धलक्षणसमन्विताः |
| योगीन्द्रनाथसेनः | अनुबन्ध्यानुबन्धलक्षणसमन्विताः |
| ज्योतिषचन्द्रसरस्वतिः | अनुबन्ध्यानुबन्धलक्षणसमन्विताः |

विवेचनम्

– गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतैः चक्रपाणेः अपेक्षया भिन्नः पाठः स्वीकृतः ।

– पाठभेदस्य प्रत्यक्षम् ऊहनात् पूर्वं अनुबन्धानुबन्ध इति पदयोः विचारं कुर्मः ।

अनुबन्ध्यः – 'स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानप्रशमो भवति अनुबन्धः ।

अनुबन्धः – 'परतन्त्रो अव्यक्तलिङ्गो अयथोक्तसमुत्थानप्रशमो भवति अनुबन्धः ।

– यदा दोषः स्वहेतुभिः विकृतः स्यात् तथा तस्य लक्षणानि व्यक्तानि स्युः तदा सः स्वतन्त्रः तथा अनुबन्ध्यः अस्ति । तद्विपरीतं अन्यदोषस्य हेतुना विकृताः अव्यक्तलक्षणदर्शकः दोषः अनुबन्धः वा परतन्त्रः अस्ति ।

– निदानं चिकित्सा च समये एतयोः स्वतन्त्रपरतन्त्रयोः विचारः अतीव महत्त्वम् अर्हति ।

उदा.–अ) श्लेष्मजे ज्वरे श्लेष्माप्रकोपः अनुबन्ध्यः अस्ति प्रत्युत पित्तविकृतिः अनुबन्धः अस्ति ।

आ) अतिशीतगुणस्य अत्यम्बुपानं क्रियते चेत् अंशात्मकैः गुणैः श्लेष्मापित्तविकृतिः च स्वतन्त्रे स्तः ।

– स्वतन्त्रपरतन्त्रयोः निदानात् संसर्गः सन्निपातः च एतयोः अवस्था निश्चितुं शक्यते । आदौ अस्मिन् सूत्रे चतुर्णा टीकाकाराणां विवेचनं किम् अस्ति तद् पश्याम् ।

अनुबन्ध्यलक्षणसमन्विताः –

– चक्रपाणिना अनुबन्ध्यलक्षणसमन्विताः इति पाठाः गृहीतः । अस्यार्थः द्वौ दोषौ स्वगुणेन विकृतौ स्तः तदा सः संसर्गः इत्युच्यते । तथा च यदा त्रयः अपि दोषाः स्वगुणेन विकृताः तदा सः सन्निपातः इत्युच्यते ।

यदा एकोऽपि दोषः परतन्त्रः स्यात् तर्हि तं संसर्गः सन्निपातः वा इति वक्तुं न शक्यम् । अनुबन्ध्यः इत्यर्थः व्यक्तलिङ्गतादिधर्मेण युक्तानां दोषाणां अत्र विचारः करणीयः ।

परतन्त्रः अनुबन्धः वा दोषः यदि सम्प्राप्त्यां समाविष्टः स्यात् तर्हि सः संसर्गः वा सन्निपातः वा इति वक्तुं न शक्यम् ।

'नैकदोषजो व्याधिः -----।' (अष्टांगहृद्य सूत्रस्थाने ९/३)

सृष्टौ सर्वाणि पाञ्चभौतिकानि द्रव्याणि एकरसात्मकानि न सन्ति । तस्मात् तदुद्भवः व्याधयः अपि एकदोषजः न सन्ति ।

इत्यर्थः अनुबन्धः उपस्थितः अस्ति एव । परन्तु यदा तस्य विकृतिः दृश्यते तदा सः परतन्त्रदोषविकृतिः इति संज्ञां प्राप्नोति ।

उदाहरणार्थ –

अ) ' अजीर्णे हि भुञ्जानस्य त्रयो दोषाः युगपत् प्रकोपमापद्यते ।' च. वि. १/२५

आ) 'प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम् ।' च. शा. १

इ) 'यो हि मूर्तानां आहारजातानां सौहित्यं गत्वा द्रवैस्तृप्तिमापद्यते तस्य -----

त्रयो दोषाः युगपत् प्रकोपमापद्यते ।'च. वि. २/८

अतः प्रायः अनेकवारं परतन्त्रदोषविकृतिः अस्ति एव । परं संसर्गसन्निपातयोः विचारसमये स्वतन्त्राणाम् एव विचारः करणीयः । संसर्गसन्निपातौ अनुबन्ध्यानाम् एव स्तः ।

अनुबन्ध्यानुबन्धलक्षणसमन्विता:

अ) गङ्गाधर: –

‘अनु अल्पबलेन येन यो बलवान् बध्यते सोऽल्पबलोऽनुबन्ध: प्रबल: तु अनुबन्ध्य: ।’

अनुबन्ध्यानुबन्धयो: समन्वयेन दोषा: बहुभेदा: भवन्ति ।

– यदा एक: दोष: अनुबन्ध्यरुपी अस्ति तदा तद् व्यपदेशात् अनुबन्धरुपी अप्रधान: दोष: अस्ति एव । अनुबन्ध्यानुबन्ध्ययो: लक्षणै: संसर्ग: वा सन्निपात: भवति ।

– केवलं अनुबन्ध्यलक्षणसमन्वयेन संसर्ग: वा सन्निपात: न भवति ।

आ) योगीन्द्रनाथसेन:

– अत्र भवता अधिकं विवेचनं न कृत्वा संसर्गसन्निपातौ इति परिभाषिकी संज्ञा अस्ति ।

– अनुबन्ध्यानुबन्धयो: समवायेन संसर्गसन्निपातौ भवत: इति वर्णितम् ।

इ) ज्योतिषचन्द्रसरस्वति:

– यदा एक: एव दोष: दुष्ट: अस्ति तदा प्रत्येकसमये संसर्ग: सन्निपात: वा नास्ति ।

– अनुबन्ध्यानुबन्धलक्षणै: द्वयो: दोषयो: मेलनं नाम संसर्ग: ।

– अत्र भवता, चक्रपाणे: पाठ: उद्धृत: अपि च अग्रे वदति यत् द्वयो: अथवा त्रयाणाम् अनुबन्ध्यानां क्रियासांकर्यात् एषा अवस्था असाध्या ।

– तस्मात् प्राय: अनुबन्ध्यानुबन्धयो: मेलनेन एव संसर्गसन्निपातौ भवत: ।

– ‘‘तेनानुप्रधानानुगमनीये सन्निपाते’’ इति सूत्रेण अयं एव अर्थ: चक्रपाणे: अभिप्रेत: इति स्वमतं प्रकटीकरोति ज्योतिषचन्द्रसरस्वति: ।

– अस्य सूत्रस्य अधिकरणं स्वतन्त्रपरतन्त्रयो: संकल्पनानां व्याख्यावर्णनं इति अस्ति ।

– प्रसंगतन्त्रयुक्ति: आधारेण तत्र भवता संसर्गसन्निपातौ वर्णितौ ।

– ग्रन्थे संसर्ग: वा संसृष्ट: इति वर्णनस्य पद्धति: अस्ति । परन्तु तत्र तन्त्रकर्तृ: अभिप्रायस्य ज्ञानम् अनिवार्यम् अस्ति ।

‘तन्त्रकर्तृ: अभिप्रायान् उपायांश्च अर्थमादिशेत् । च. सू. २६/३७

– अनुबन्धपरतन्त्रयोः उपस्थितिः यदा अनुबन्ध्य–स्वतन्त्राभ्यां भवति तदा तत् साहचर्यम् अस्ति न संसर्गः ।

– तथापि प्रायः अनेकेषु स्थानेषु संसृष्टसाहचर्यम् इति अर्थेण संसर्गः इति पदं योजितम् ।

– सन्निपातः इति पदम् अपि अनेकवारं मेलकम् /साहचर्यम् इति अर्थेण उपयुज्यते ।

उदाहरणार्थम् –

अ) 'त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मा प्रकोपमापद्यते'(च. वि. ४/८)

'सन्निपाते मेलके ।' (चक्रपाणि टीका)

प्रमेहसम्प्राप्तौ यदा निदानं दोषः दूष्यं च एतेषां विशेषाणां सन्निपातः भवति तदा श्लेष्मा क्षिप्रं प्रकुपितः भवति ।

अस्मिन् सूत्रे सन्निपातः इति पदं मेलकः इति साहचर्यबोधकेन अर्थेन योजितम् ।

आ) 'संसर्गात् लोहितप्रदूषणात् लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितपित्तमित्याचक्षते ।।'

(च. वि. २/५)

'संसर्गात् लोहितसम्बधात् । (चक्रपाणि)

अत्रापि संसर्गः इति पदं साहचर्यवाचकम् अस्ति ।

इ) गुल्मसम्प्राप्तौ अनुबन्धानां साहचर्यम् अतीव महत्त्वं अर्हति । (च. वि. ५)

– तदा अनेकवारं साहचर्यम् इति अर्थेन संसर्गसन्निपातौ इति पदयोः योजना भवति ।

–अनेन अर्थेन 'अनुबन्ध्यानुबन्धलक्षणसमन्विता' इति पाठः तथा तस्मिन् विवेचनं योग्यम् अस्ति ।

– परं अत्रस्थं अधिकरणं स्वतन्त्रपरतन्त्रयोः दोषवर्णनस्य अस्ति ।

– अतिसारः ज्वरः च एतयोः व्याधयोः सन्निपातजः त्रिदोषजः च इति उभयप्रकारयोः उल्लेखः अस्ति ।

– अनुबन्धः इति पदं तु ग्रन्थे अनेकविधैः अर्थैः योजितम् । परं अनुबन्ध्यः इति पदं केवलं स्वतन्त्रदोषविकृतिः अनेनेव अर्थेन योजितम् ।

– संसर्गवाचकः अनुबन्धः इति पदं सन्दर्भेण ज्ञातुं शक्यम् ।

– चिकित्सासमये अपि स्वतन्त्रपरतन्त्रयोः पदयोः ऊहनं सन्दर्भेण करणीयम् ।

– रक्तपित्ते अर्शे च अनुबन्धः पदं उपयोजितम् । उदाहरणार्थम् – यदि उष्णगुणेन स्निग्धगुणेन च अनुबन्धः स्यात् तर्हि रक्तपित्तं कफसंसृष्टं भवति ।

तथा उष्णरुक्षस्य अनुबन्धः स्यात् तर्हि तत् वातसंसृष्टं रक्तपित्तं भवति ।

– एवं द्वौ अपि पाठौ अर्थदृष्ट्या योग्यौ स्तः । तथापि अधिकरणं प्रसङ्गः ऊहनं तन्त्रयुक्ति आधारः च एतेभ्यः चक्रपाणेः पाठः योग्यतरः अस्ति इति मे मतिः ।

निष्कर्षः –

अधिकरणानुसारं चक्रपाणिसम्मतः पाठः योग्यतरः इति मे भाति ।

(६) सन्दर्भः – च. वि. ७/८

मूलसूत्रम् – भगवन्तमात्रेयमग्निवेशोऽतः परं सर्वक्रिमीणां पुरीषसंश्रयाणां समुत्थानस्थानसंस्थान वर्णनामप्रभावचिकित्सितविशेषान् पप्रच्छोपसंगृह्य पादौ ।

अधिकरणम् – उपरितनं सूत्रं कृमीविज्ञानम् इति अधिकरणस्य उद्देशसूत्रम् अस्ति ।

पाठभेदः – अस्य सूत्रस्य मूले पाठे पाठभेदः अस्ति । तस्य विवेचनम् अत्र क्रियते ।

पाठः – चक्रपाणिः – सर्वक्रिमीणां पुरीषसंश्रयाणाम्........।

गङ्गाधरः – सर्वक्रिमीणां पुरुषसंश्रयाणाम् .......।

योगीन्द्रनाथसेनः – सर्वक्रिमीणां पुरुषसंश्रयाणाम् .......।

ज्योतिषचन्द्रसरस्वतिः – सर्वक्रिमीणां पुरुषसंश्रयाणाम् .......।

विवेचनम् – चक्रपाणिः – पुरीषसंश्रयाणाम् ।

योगीन्द्रनाथसेनः गङ्गाधर ज्योतिषचन्द्रसरस्वतिः – पुरुषसंश्रयाणाम् ।

व्याधितरुपाधिकारस्य वर्णनोत्तरं संशयकरस्य कृमिव्याधिताधिकारस्य वर्णनमस्ति । कृमिव्याधितः पुरुषः यदि योग्यतया न परीक्षितः एकदेशेन वा परीक्षितः तर्हि निदानप्रमादः सम्भवः । तस्य कृमिदोषः नास्ति इति निर्णीय कृमिचिकित्सां न कृत्वा अयोग्या चिकित्सा शक्यते ।

अस्मिन् विवेचने उपरिनिर्दिष्टं सूत्रम् अस्ति अस्य पाठे योगीन्द्रनाथसेनः गङ्गाधर ज्योतिषचन्द्र सरस्वतिः च एतैः 'पुरुषसंश्रयाणाम्' इति अपि तु चक्रपाणिना 'पुरीषसंश्रयाणाम्' इति पाठः स्वीकृतः अस्ति ।

अ) अग्रिमे वर्णने न केवलं पुरीषसंश्रितानां कृमीणां वर्णनं अपि तु बाह्यमलजः रक्तजः श्लेष्मजः च एतेषां कृमीणामपि वर्णनम्।

ब) विषयाधिकरणम् व्याधितरुपसंबंधि अस्ति ।

अतः चक्रपाणिनेः पाठः अयोग्यः अन्येषां त्रयाणां 'पुरुषसंश्रयः कृमिभिः' एषः पाठः एव योग्यः ।

निष्कर्षः– चक्रपाणिना स्वीकृतः पाठः अयोग्यः भाति । प्रायः टीकां सम्पादयतः अनवधानेन एषः सम्पादनगतः प्रमादः अथवा मुद्रणपद्धत्याः दोषेण प्रमादः भूतः स्यात् । ईदृशाः मुद्रणदोषाः अन्यत्रपि सन्ति । 'पुरुषसंश्रयाणाम्' अयं पाठः योग्यः ।

(७) सन्दर्भः – च. वि. ८/७

मूलसूत्रम् – तत्रायमध्ययनविधिः कल्यः कृतक्षणः प्रातरुत्थायोपव्यूषं वा........।

अधिकरणम् – अस्मिन् सूत्रे 'त्रिविधज्ञानोपायाः' इति अधिकरणान्तर्गते अध्ययनविधि विषयस्य वर्णनम् अस्ति ।

पाठभेदः वैधर्म्यं च –अस्मिन् सूत्रे 'कल्यः कृतक्षणः' इति पदे पाठभेदः तज्जन्यं वैधर्म्यम् अस्ति ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | कल्यः कृतक्षणः | कल्यः नीरोगः । कृतक्षणइति अनन्यव्यापारत्वेन अध्ययनाय कृतकालपरिग्रहः । |
| गङ्गाधरः | कल्यकृतक्षणः | कल्यः प्रातः कालः तत्र कृतः नियतरुपः क्षणो येन स कल्यकृतक्षणः । |
| योगीन्द्रनाथसेनः | कल्यः कृतक्षणः | कल्यः नीरोगः । कृतक्षणः कृतकालनियमः । |
| ज्योतिषचन्द्रसरस्वतिः | कल्यकृतक्षणः | कल्ये प्रातरेव कृतावसरः अन्यकार्यव्यापारोऽध्ययनप्रत्यूहो भवतीत्याशयः |

विवेचनम् –

१) अस्मिन् सूत्रे द्वौ पाठौ स्तः ।

चक्रपाणिः योगीन्द्रनाथसेनः च – कल्यः कृतक्षणः

गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च – कल्यकृतक्षणः

इति टीकाकारैः स्वीकृताः पाठाः ।

२) कल्यः कृतक्षणः

– चक्रपाणि योगीन्द्रनाथसेनः च एताभ्यां कल्यः कृतक्षणः च इति द्वे भिन्ने पदे योजिते स्तः ।

– कल्यः इत्यस्य अर्थः निरामयत्वं स्वास्थ्यं एवं यदि क्रियते तर्हि कृतक्षणः इत्यस्य अर्थः अन्यं व्यापारं विहाय केवलं अध्ययने समययापनम् ।

३) कल्यकृतक्षणः – गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः एताभ्यां एवं सामासिकं पदं योजितम् ।

– कल्यं नाम प्रात: काल: तस्मिन् समये केवलं अध्ययिनीयम् इति अस्य सामासिकपदस्य अर्थ: योजित: अस्ति ।

४) कल्यम् – क्ली, कल्यते आगम्यते । कल गतौ + कर्मणि यत् । प्रत्यूष: । मधु: ।

इदं च कल्य उत्थाय प्राञ्जलि:.....। (भागवते ८/९८/७८)

कल्य: – त्रि. , कलासु साधु इति यत् । सज्ज: । निरामय: । वाक्श्रुतिवर्जित: ।

दक्ष: । कल्याणवचनम् । उपायवचनम् । (शब्दकल्पद्रुम/खण्ड २)

कृतक्षण: – waiting impatiently for the exact moment (आपटे शब्दकोश:)

५) मूले सूत्रे कल्य: इति पुल्लिङ्गी पदं योजितम् । अत: कोशानुसारं निरामय: इति अर्थ: योग्य: ।

६) तथैव ''कल्य: कृतक्षण: प्रातरुत्थाय उपव्यूषं वा --।''

इति मूले सूत्रे प्रात: काले वा उष:काले उत्थाप्यं इति वर्णयन्ती पदानि अग्रे योजितानि । अत: कल्यकृतक्षण: इति सामासिकं पदं कृत्वा कल्यस्य अर्थ: प्रात:काल: अनया उक्त्या पुनरुक्तितन्त्रदोष: उत्पद्येत ।

७) अत: चक्रपाणि: योगेन्द्रनाथसेन: च एताभ्यां वर्णित: कल्य: कृतक्षण: इति पाठ: तथा तद्गता टीका युक्तियुक्ता अस्ति ।

निष्कर्ष:

१) गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एतयो: 'कल्यकृतक्षण:' इति पाठ: पुनरुक्तिदोषं उत्पादयति । तथैव स: पाठ: सूत्रान्वये अपि युक्ता न भवति ।

२) चक्रपाणि: योगेन्द्रनाथसेन: च एतयो: 'कल्य: कृतक्षण:' इति पाठ: युक्तियुक्त: अत: स्वीकरणीय: अस्ति ।

(८) सन्दर्भः – च. वि. ८ /१०९

मूलसूत्रम् – शुक्रसाराः । ते स्त्रीप्रियोपभोगा ------- भवन्ति ।

अधिकरणम् – दशविधपरीक्ष्यभावेभ्यः सारतः परीक्षणान्तर्गते शुक्रसारस्य गुणानां वर्णनम् अस्मिन् सूत्रं कृतम् ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे स्त्रीप्रियोपभोगाः पदे पाठभेदः वैधर्म्यं च स्तः ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | स्त्रीप्रियोपभोगाः | स्त्रीप्रिय उपभोग संभोगो येषां ते तथा । |
| गङ्गाधरः | स्त्रीप्रियाः प्रियोपभोगाः | स्त्रीप्रियाः स्त्रीणां प्रियाः । |
| योगीन्द्रनाथसेनः | स्त्रीप्रियाः प्रियोपभोगाः | स्त्रीणां प्रियाः । प्रियः उपभोगो येषां ते । |
| ज्योतिषचन्द्रसरस्वतिः | स्त्रीप्रियाः प्रियोपभोगाः | टीका नास्ति । |

विवेचनम् –

१) अस्मिन् पदे चक्रपाणिना भिन्नः पाठः स्वीकृतः । अन्यैः त्रिभिः ' स्त्रीप्रियाः प्रियोपभोगाः ' इति पाठः स्वीकृतः उत चक्रपाणिना ' स्त्रीप्रियोपभोगाः ' इति पाठः स्वीकृतः ।

२) शुक्रधातोः सारत्वं येषु पुरुषेषु भवति तेषां गुणानां लक्षणानां च वर्णनम् अस्मिन् सूत्रे कृतम् ।

३) 'सारशब्देन विशुद्धतरो धातुरुच्यते ।' उपरि निर्दिष्टा सारशब्दस्य व्याख्या चक्रपाणिना कृता । 'सारत्व' स्य अर्थः तद्धातोः विशुद्धतरा अवस्था ।

४) यदा कस्मिंश्चित् पुरुषे शुक्रधातुः विशुद्धतरावस्थायाम् अस्ति तदा स पुरुषः शुक्रसारः भवति । यैः लक्षणैः तस्य परीक्षणं भवति तानि लक्षणानि अस्मिन् सूत्रे वर्णितानि ।

५) शुक्रः सप्तमः धातुः सन् नवनिर्मितिं कुर्वाणः शारीरभावः अस्ति । शरीरे यदा कोऽपि नूतनः भावपदार्थः अथवा घटकः उत्पद्येते तदा तयोः कारणं शुक्रधातुः एव ।

६) यदा शुक्रसारत्वं भवति तदा शरीरे नूतनभावपदार्थानां निर्मितिः उत्तमपद्धत्या प्रचलति । तेन शरीरे सर्वभावपदार्थाः सारवन्तः उत्तमगुणैः युक्ताः प्राकृताः शक्तिसम्पन्नाः च सन्ति ।

तस्मात् शरीरस्य मनसः च अवस्थापि प्रसन्ना व्याधिविरहिता उत्साहपूर्णा भवति । स्वाभाविकतया एतादृशी आनन्दिनी प्रसन्ना च व्यक्तिः सर्वेषां प्रिया ।

७) अत्र 'स्त्रीप्रियः' लक्षणम् उपलक्षणमात्रम् अस्ति । यदि स्त्री शुक्रसारयुक्ता स्यात् तदा सा पुरुषाणां प्रिया भवेत् ।

तथैव एवंविधा व्यक्तिः सर्वेषामेव प्रिया भवति । अतः एतद् पदम् उपलक्षणमात्रं ग्रहीतुं शक्नुयात् ।

८) अपरः विचारः अस्ति यत् शुक्रधातोः सारवत्वात् शरीरे बलम् ऊर्जा शक्तिः उत्साहः च एतेषां परिपूर्णत्वात् व्याध्यवस्थाः अभावात् एतस्यां व्यक्तौ उत्तमं मैथुनसामर्थ्यं भवति । तस्माद् अपि एषा व्यक्तिः प्रिया भवति । चक्रपाणेः एषः अर्थः अनया पद्धत्या योग्यः ।

९) एषा व्यक्तिः व्याधिविरहिता प्रसन्ना उत्साहपूर्णा सती सा जीवने सर्वभोगानाम् अयम् आनन्दम् उपभोक्तुम् अर्हति । अतः प्रियः उपभोगः अयं पाठः अनया दृष्ट्यापि योग्यः ।

१०) सर्वघटकान् विचार्य 'स्त्रीप्रियोपभोगः' पदं संभोगः इति अर्थस्य पाठस्यापेक्षया 'स्त्रीप्रियाः प्रियोपभोगाः' अयं पाठः अधिकः योग्यः सर्वसमावेशकः इति अहं मन्ये ।

११) चक्रपाणेः पाठः तथा तस्मिन् टीका विषयस्यानुषङ्गेन योग्या अस्ति परं सा विषयानुरोधेन एकान्तिका अव्याप्ता च भाति ।

१२) ' स्त्रीप्रियाः प्रियोपभोगाः ' । इति पाठः अधिक योग्यः ।

निष्कर्षः – चतुर्णामपि टीकाकाराणां पाठः तस्मिन् टीका च योग्ये स्तः ।

– परन्तु प्रकरणाधिकरणानुसारेण विषयानुषङ्गेन च गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्र सरस्वतिः च एतेषां 'स्त्रीप्रियाः प्रियोपभोगाः' पाठः अधिकः योग्यः अस्ति ।

(९) सन्दर्भः – च. वि. ८/ १०९

मूलसूत्रम् – सौम्याः.............स्निग्धवृत्तसारसमसंहतशिखरदशनाः शुक्रसाराः ।

अधिकरणम् – दशविधपरीक्ष्यभावानां वर्णने सारतः परीक्ष्यभावस्यान्तर्गतं शुक्रसारव्यक्तेः लक्षणानि अस्मिन् सूत्रे वर्णितानि ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे ' शिखरदशनाः ' पदे पाठभेदः वैधर्म्यं च स्तः ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | शिखरदशनाः | शिखरदशनाः इति शोभनदशनाः । |
| गङ्गाधरः | शिखरदशनाः | शिखरदशना येषां ते तथा । |
| योगीन्द्रनाथसेनः | शिखरिदशनाः | शिखरिणः शिखरिवदुन्नताग्राः दशनाः दन्ताः । |
| ज्योतिषचन्द्रसरस्वतिः | शिखरिदशनाः | शिखरिणि सूक्ष्माग्राणि दशनानि । |

विवेचनम् –

१) अस्मिन् पदे शिखरदशनाः शिखरिदशनाः च इति पाठभेदौ स्तः ।

चक्रपाणिः गङ्गाधरः च – शिखरदशनाः

योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च – शिखरिदशनाः इति टीकाकारैः स्वीकृताः पाठाः ।

२) शिखरम् –

– mfn. Pointed, spiked, crested, a peak, mountain, top, summit, edge and Pinnacle, spire, the bud of the Arabian jasmine

(Monier Williams / 1070)

– क्ली, शिखास्यास्तीति । 'वुच्छण्कठजिति (४/२/८०)

शिखा + रः । ह्रस्वश्च । पर्वताग्रम्, कूटम्, श्रृङ्गम् । वृक्षाग्रम् । शिरम् । प्राग्रम् । अग्रम् । पुल्कः । कक्षः । (शब्दकल्पद्रुम / खण्डः ५/७१)

– The top, Summit or peak of a mountain, the top of a tree, crest, point or edge of a sword, (आपटे शब्दकोशः / ५५४)

– चरकसंहितायां वातकलाकलीये अध्याये शिखरपदस्य उपयोगः कृतः ।

'शिखरिशिखरावमथनम् ।' च.सू. १२/८

अस्मिन् सूत्रे शिखरपदम् अग्रं सर्वोच्चस्थानं, top of mountain इत्यर्थेनैव योजितम् । पर्वताग्रम् एव एतस्य पदस्य अर्थः ।

३) 'कुमारसम्भवम् ' काव्ये कालिदासेन शिखरपदं पर्वताग्रम् इत्यर्थेन एव योजितम् ।

'जगाम गौरीशिखरं शिखंडीमत् । (कुमारसम्भवम् – ५/७)

तस्मात् शिखरपदस्य अर्थः पर्वताग्रं, सर्वोच्चस्थानम् इति एव भवति ।

४) परन्तु चक्रपाणिना स्वीकृतः शोभनम् इत्यर्थः कोशे न अन्विष्यते प्रायः पर्वतस्य अग्रभागसदृशः तीक्ष्णाः शङ्क्वाकृतयः दन्ताः, तां व्यक्तिं शोभन्ते इति लक्षणार्थेन तेन 'शोभनम्' इति अर्थः स्वीकृतः स्यात् ।

५) चक्रपाणिना 'ज्वरचिकित्सा' अध्याये ३२२ सूत्रे टीकां कुर्वता ''सदवाक्यैः इति शोभनवचनै' । इति ''सद्' पदस्य अर्थः शोभनम् इति स्वीकृतः ।

अतिदेशः विपर्ययः च एतयोः तन्त्रयुक्त्याः उपयोगं कुर्वता, अस्मिन् सूत्रे 'शोभनदशनाः' 'इत्यस्य अर्थः 'सद्दशनाः' इति गृह्णीयात् ।

शुक्रसारव्यक्तेः दन्ताः 'सद्' नाम प्राकृताः सन्ति इति शोभनं शिखरं च पदयोः अर्थः चक्रपाण्यनुसारं स्वीकर्तुं शक्यते ।

६) <u>शिखरी</u> –

– Shikharin - Pointed, Peaked, a peaked mountain , any mountain, a hill - post

(Monier William / 1070)

(आपटे शब्दकोशः / ५५४)

न् (पुं) –शिखरोऽस्यास्तीति । शिखर + इनिः । पर्वतः । वृक्षः । अपामार्गः ।

(शब्दकल्पद्रुम / खण्डः ५)

चक्रपाणिना अपि 'शिखरि' पदस्य अर्थः पर्वतः इत्येव स्वीकृतः ।

– शिखरि पर्वतः । चक्रपाणि च. सू. १२/८

अस्मिन् एव पदे गङ्गाधरः योगीन्द्रनाथसेनः च एताभ्यां सममेव व्याख्या कृता अस्ति ।

पर्वतस्य श्रृङ्गभञ्जनम् । गङ्गाधर:

शिखरिणां पर्वतानां शिखराणि श्रृङ्गाणि । यो. से.

एवं व्याकरणकोशटीकाकाराणामनुसारेण शिखरिपदस्य अर्थ: 'पर्वत:' इत्येव भवति ।

७) वसूनां पावकश्चास्मि मेरु: शिखरिणामहम् । (गीता १०/२३)

श्रीमद्‌भगवत् गीतायामपि 'शिखरि' पदं पर्वत: इत्यर्थेन एव दृश्यते ।

८) इतश्च शरणार्थिनां शिखरिणां गणा: शेरते । (भर्तृहरि: नीतिशतकम् / ७६)

भर्तृहरिणा नीतिशतके 'शिखरि' पदं पर्वत: इत्यर्थेन एव योजितम् ।

९) रघुवंशम् ९/१२, २२, मेघदूतम् / १३ च मध्ये अपि 'शिखरि' पदं पर्वत: इत्यर्थेन एव योजितम् ।

१०) अस्मिन् सूत्रे 'शिखरि' पदं दन्तस्य विशेषणार्थं योजितम् ।

सुश्रुतसंहितायां चिकित्सास्थाने कुटिप्रावेशिकरसायनविधौ नूतना: दन्ता: उत्पद्यन्ते तेषां वर्णनं अग्रिमे दत्तमस्ति ।

'तत: सप्तदशाष्टदशयो: दिवसयो: दशना जायन्ते शिखरिण: स्निग्धवज्रवैदूर्यस्फटिकप्रकाशा: समा: स्थिरा: सहिष्णव: ।' (सु. चि. २९/१२)

अस्मिन् सूत्रे दन्तस्य विशेषणम् इति शिखरिपदं योजितम् ।

११) द्वयो: पाठयो: विचारं कुर्वता –

शिखरदशना: – पर्वताग्रसदृशा: उन्नता: शोभायमाना: दन्ता: ।

शिखरिदशना: – पर्वतसदृशा: स्थिरा: कठिणा: अचला: दन्ता: । इति अर्थनिष्पत्ति: भवति

१२) द्वावपि पाठौ योग्यौ परन्तु – अतिदेश: अतीतावेक्षणम् परतन्त्रप्रत्यय: अधिकरणम्

एतेषामनुसारेण ' शिखरिदशना: ' इति पाठ: अधिक: योग्य: मे भाति ।

निष्कर्ष: – शिखरदशना: शिखरिदशना: च उभौ पाठौ अभिप्रेतार्थत: योग्यौ । परन्तु व्याकरणतन्त्रयुक्त्यो: विचारं कुर्वता ' शिखरिदशना: ' अयं पाठ: अधिक: योग्य: इति अहं मन्ये । सुश्रुतेनापि दन्तस्य विशेषणम् इति 'शिखरि' पदं योजितम् । तस्मात् परतन्त्रप्रत्ययानुसारेण शिखरिदशना: इति पाठ: अधिक: योग्य: ।

(१०) सन्दर्भः – च. वि. ८/१५२

मूलसूत्रम् – लक्षणाचार्यशिष्याणां परीक्षा कारणं च यत् ।

अध्येयाध्यापनविधी सम्भाषाविधिरेव च ।।

अधिकरणम् – अध्यायस्य उपसंहारे रोगभिषग्जितीये अध्याये वर्णितानां विषयाणां सूचिः अस्मिन् सूत्रे उल्लिखिताः ।

पाठभेदः वैधर्म्यं च – अस्मिन् सूत्रे 'अध्येयाध्यापन' इति पदे टीकाकारः पाठभेदं स्वीकुर्वन्ति तस्मात् वैधर्म्यं अस्ति ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | अध्येयाध्यापन | अध्येयम् अध्येतव्यम् तस्य विधिरध्ययनविधिरेव । |
| गङ्गाधरः | अध्येयाध्यापन | अध्येयस्याध्यायनस्य विधिः । भावे कृत् । |
| योगीन्द्रनाथसेनः | अध्यायाध्यापक | अध्यायः शिष्यः । अध्यापकः आचार्यः। तयो विधिः । अध्ययन विधिः अध्यापनविधिश्चेत्यर्थः । |
| ज्योतिषचन्द्रसरस्वतिः | अध्येयाध्यापन | अध्येयस्य अध्यापनस्य । |

विवेचनम्

१)चक्रपाणिः गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च एते 'अध्येयाध्यापनविधिः' इति पाठं वर्णयन्ति । प्रत्युत योगीन्द्रनाथसेनेन 'अध्यायाध्यापकविधिः' इति पाठः ।

२) अस्मिन् सूत्रे उपसंहारं कुर्वता अध्यायगतानां सर्वेषां वर्णितविषयाणां सूचिः वर्णिता । विमानस्थाने अष्टमे अध्याये द्वितीयं अधिकरणं 'त्रिविधज्ञानोपायाः' इति अस्ति ।

३) त्रिविधज्ञानोपाये अध्ययनम् अध्यापनं तद्विद्यसम्भाषा च एतेषां वर्णनम् अस्ति । उपर्युक्ते विवेच्यपदे अस्य उल्लेखः अस्ति ।

४) पूर्वं सूत्रं अग्रिमवत् –

''अध्येयाध्यापनविधिः सम्भाषाविधिरेव च ।''

– अत्र सम्भाषाविधेः उल्लेखः स्पष्टतया अग्रिमे पदे कृतः । अतः प्रथमपदे अध्ययनाध्यापनविधी एतयोः उल्लेखः क्रमप्राप्तः ।

५) अस्मिन् अध्ययनाध्यापनविधिं बोधके सामासिके पदे योगीन्द्रनाथसेनेन अध्यायाध्यापकविधिः इति पाठः गृहीतः । प्रत्युत अन्यैः त्रिभिः टीकाकारैः 'अध्येयाध्यापनविधिः' इति स्वीकृताः ।

६) अध्याय – पुं. अधि + इङ् – घञ् । अध्ययने कर्मणि घञ् । वेदादिशास्त्रस्य

एकार्थकविषयसमाप्तिद्योतके विश्रामस्थाने अङ्गविशेषे ।

अध्यापन – पुं, अधि + इङ् – णिच् – भावे ल्युट् । पाठनायाम् ।

अध्यापकः – पुं., अध्यापयति अधि +इङ् णिच् णुख् । अध्ययनकारयितरि उपाध्याये च ।

अध्ययनम् – नपुं , अधि + इङ् – ल्युट् । पठनम् ।

अध्येतव्य – त्रि. , अधि + इङ् कर्मणि क्त । पाठ्ये ।

(वाचस्पत्यम् / खण्ड १)

७) 'अध्येय' इति पदम् – अधि + इङ् इत्यस्य विध्यर्थं विशेषणम् अस्ति । अस्यार्थः पठनाय योग्यः अभ्यासाय योग्यः वा इति भवति ।

८) 'अध्याय' इति पदस्य अर्थः कस्मिन् अपि कोशे वा ग्रन्थे अध्ययनाय योग्यः इति न प्राप्यते ।

अध्यायः इत्यर्थः प्रकरणम् अङ्गविशेषः इत्येव लभते ।

९) चरकसंहितायाः सूत्रस्थाने ३० अध्याये अध्यायपदस्य व्याख्या अग्रिमवत् वर्णिता ।

''अधिकृत्यार्थमध्यायनामसंज्ञा प्रतिष्ठिता । (च. सू. ३०/७०)

टीका –'अधिकृत्येति अधिकरणं कृत्वा । अर्थं दीर्घञ्जीवितादिकम् । अध्यायनामसंज्ञा अध्यायरुपा नामसंज्ञा नामसंज्ञा च योगरुढा संज्ञोच्यते किंवा 'अध्यायो नाम' इति पाठः तदा नामशब्दः प्रकाशने तेन अधिकारः इत्यर्थः । अर्थशब्दोऽत्रार्थान्तरे तेन युक्ताऽऽध्यायसंज्ञा सा च अधिकरण साधना करणसाधना वा कर्मसाधना वा बोद्धव्या । अधीयतेऽस्मिन् अध्येत्यनेन वा अधीयते वेत्यध्यायः । (चक्रपाणि टीका)

कस्यापि विषयस्य अधिकरणस्य अर्थेन अध्यायः इति योगारुढसंज्ञा जायते । किमपि अधिकरणं करणं वा कर्म एतेषां साधनरुपबोधकं इदृशी एषा संज्ञा अस्ति ।

१०) उपरितना सर्वविवेचना एवं सिध्यति यत् ‘अध्यायाध्यापकविधि:’ इति योगीन्द्रनाथसेनस्य पाठ: अव्याप्त: भाति । यत: अध्याय: इति पदम् अध्ययनविधि: अथवा अध्ययनाय योग्य: इति अर्थेन न प्राप्यते । अध्येय: इति पदपाठ: तेन अर्थेन व्याकरणदृष्ट्या योग्य: ।

तथैव अध्यापक: अस्मार्थ: अध्ययनं कारणीय: मनुष्य: आचार्यस्वरुप: इति । अत: अध्यापकविधि: इति पदं अस्य विषयाधिकरणानुसारम् अयोग्यम् अस्ति ।

११) अत: योगेन्द्रनाथसेनेन स्वीकृत: ‘अध्यायाध्यापकविधि:’ इति पाठ: तथा तदुपरि तत्र भवता रचिता व्याख्या अयोग्या अस्ति इति मम मतम् ।

१२) चक्रपाणि: गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एतेषां पाठ: तथा तस्मिन् पाठ: युक्तियुक्त: अस्ति ।

निष्कर्ष:

१) वैधर्म्यं पाठभेद: स्त: ।

२) योगीन्द्रनाथसेनेन स्वीकृत: पाठ: तथा तस्मिन् रचिता व्याख्या अव्याप्ता: अस्ति इति अहं मन्ये

३) चक्रपाणि: गङ्गाधर: ज्योतिषचन्द्रसरस्वति: च एतेषां पाठ: टीका च युक्तियुक्तौ स्त: ।

ऊ) पाठभेदा: सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरम् एवं निष्कर्ष: प्राप्यते यत् ऐतै: पाठभेदै: एकस्य एव विषयस्य विभिन्नं मतान्तरं अनुभूयते ।

अस्य वैधर्म्यप्रकारे २ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भ: – च. वि. ५/४

मूलसूत्रम् – न त्वेतदेवं यस्य हि स्त्रोतांसि यच्च वहन्ति यच्चावहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्य:।

अधिकरणम् – अस्मिन् सूत्रे स्त्रोतोमय: पुरुष: एष: पूर्वपक्षस्य खण्डनस्य वर्णनम् अस्ति: ।

पाठभेद: वैधर्म्यं च – अस्मिन् सूत्रे पाठभेदा: तज्ञन्या: वैधर्म्याणि सन्ति ।

पाठभेद: – टीकाकार: पाठ:

चक्रपाणि: – यच्च वहन्ति यच्च आवहन्ति

गङ्गाधर: – यच्च वहन्ति यथा वहन्ति

योगीन्द्रनाथसेन: – यद्वहन्ति यथा वहन्ति

ज्योतिषचन्द्रसरस्वति: – यच्च वहन्ति यच्च अवहन्ति

टीका

चक्रपाणि: – यस्य हि स्त्रोतांसि यद्भटितानीत्यर्थ: यच्च वहन्तीति यद्रसादि वहन्तीत्यर्थ: यच्चावहन्तीति यच्च पुष्यन्तीत्यर्थ: यत्र चावस्थितानीति यत्र मांसादौ संबद्धानीत्यर्थ: तत् सर्वं धमनीभ्योऽन्यत् तस्मान्न स्त्रोतोरुप एव पुरुष इत्यर्थ:।

गङ्गाधर:– हि यस्मात् यस्य च मूर्त्तिमतो भावस्य स्त्रोतांसि यानि यच्च वहन्ति तद् यथा वहन्ति तत् प्रकार: यत्र चावस्थितानि तच्च स्थानं तदेतत् सर्वं तेभ्य: स्त्रोतोभ्योऽन्यत् न तु स्त्रोतांस्येव तस्मात् न स्त्रोत: समुदाय एव पुरुष इत्यर्थ:।

योगीन्द्रनाथसेन: – हि यत: यस्य मूर्तिमतो भावस्य स्त्रोतांसि यानि तत् वहन्ति । यथा प्रकृततया विकृततया वा वहन्ति । तेषां यानि प्रशमनानि प्रकोपणानि च इत्यर्थ:। स्त्रोतांसि यत्र यस्मिन् शरीरप्रदेशे अन्यत् । न तु स्त्रोतांस्येव । तस्मात् न स्त्रोतोरुप एव पुरुष: ।

ज्योतिषचन्द्रसरस्वति: – यस्य प्राणादे: स्रोतांसि यच्च रसरक्तादिकं वहन्ति यच्च रसवहं स्रोत: रक्तादिकं अवहन्ति न वहन्ति यत्र कोष्ठादौ चावस्थितानि तत् सर्वं दोषधात्वादय: कोष्ठाद्यवयवाश्च तेभ्य: स्रोतोभ्य: अन्यत् पृथग्भवतीति शेष:।

निष्कर्ष:

१) पाठभेद: वैधर्म्यं च स्त:।

२) अस्मिन् सूत्रे टीकाकारै: चत्वार: विभिन्ना: पाठभेदा: स्वीकृता:।

३) यद्यपि पाठभेदा: सन्ति तथापि विषयविवेचनं कुत्र अपि न बाधते।

४) केवलं ऐतै: पाठभेदै: एकस्य एव विषयस्य विभिन्नं मतान्तरं अनुभूयते।

(२) सन्दर्भः – च. वि. ५/१९

मूलसूत्रम् – अकालयोनिगमनान्निग्रहादतिमैथुनात् । शुक्रवाहीनि दुष्यन्ति.....।।

अधिकरणम् – शुक्रवहस्त्रोतसां दुष्टिनिदानम् अस्मिन् सूत्रे वर्णितम् अस्ति ।

पाठभेदः वैधर्म्यं च –

अस्मिन् सूत्रे 'अकालयोनिगमनात्' इति पदे पाठभेदः तज्जन्यं वैधर्म्यं च स्तः ।

टीका

| टीकाकारः | पाठः | टीका |
|---|---|---|
| चक्रपाणिः | अकालयोनिगमनात् | अकालयोनिगमनादिति अहर्षकालगमनात् , तथाऽनुचितयोनौ गमनात् । |
| गङ्गाधरः | अकालयोनिगमनात् | अकालयोनिगमनादिति रजस्वलागमनात् । |
| योगीन्द्रनाथसेनः | अकालायोनिगमनात् | अकाले निषिद्धदिने पर्वादौ । अयोनौ निषिद्धयोनौ । न रजस्वलां नातुरां नामेध्या मित्यादिना प्रतिषिद्धासु रजस्वलादिषु इत्यर्थः |
| ज्योतिषचन्द्रसरस्वतिः | अकालायोनिगमनात् | अकाले बाल्ये जरायां या अथवा पर्वादिवर्जनीये काले ग्रीष्मादावृतौ वा गमनात् स्त्रीसंसर्गात् । अयोनिगमनात् कृत्रिमोपायेन पश्वादिगमनात् वा |

विवेचनम्

१) अस्मिन् पदे अकालयोनिगमनात् अकालायोनिगमनात् च इति पाठभेदौ स्तः ।

गङ्गाधरः चक्रपाणिः च – अकालयोनिगमनात ।

योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च – अकालायोनिगमनात् ।

इति टीकाकारैः स्वीकृताः पाठाः ।

२) उभयोः पाठयोः अत्र विवेचनीयौ ।

३) अकालयोनिगमनात् –

चक्रपाणिः गङ्गाधरः च एतौ इदं पाठं स्वीकुर्वतः । एतद् पञ्चम्यन्तं सामासिकं पदम् ।

चक्रपाणि: –

– चक्रपाणिना 'अकाले योनिगमनम् अयोनिगमनम् वा' एताभ्यां अर्थाभ्यां सामासिकं पदं वर्णितमस्ति ।

– अकाल: पदस्य अर्थ अहर्षकाल: इति तत्र भवान् व्याख्याति ।

'अहर्षकाले अमेद्रोत्थाने संकल्परहिते वा मैथुनरत: इति तस्य अभिप्रेतार्थ: ।

– अयोनि: पदस्य अर्थ: अनुचितयोनि: इति व्याख्याति ।

तस्य अभिप्रेतार्थ अग्रिमवत् –

- मैथुनकर्मे अयोग्या योनि
- अतिबाला स्त्री
- वृद्धा स्त्री
- व्याधिता स्त्री
- योनिव्यापदयुक्ता स्त्री
- अप्रिया स्त्री
- हर्षरहिता स्त्री
- अननुरक्ता क्रोधिता चण्डा क्रूरा कुटिला वा ।

गङ्गाधर:

– गङ्गाधरेण 'अकालयोनिगमनम्' इति पदस्य अर्थ: रजस्वलागमनम् इति कृत: ।

– रजस्वलाकालं मैथुने निषिद्ध: भवति । तेन अस्मिन् अनुचितकाले अनुचितयोनौ मैथुनरतं इति तस्य अभिप्रेतार्थ: ।

४) द्वितीय: पाठ: । अकालायोनिगमनात् –

– अकाल अयोनिगमनात् एते पदे 'अक: सवर्णे दीर्घ:।' इति अष्टाध्यायी स्वरसन्धिनियमानुसारेण एषा सन्धि: भूत्वा पदं निर्मितम् ।

योगीन्द्रनाथसेन: – असौ विस्तारेण एतद् विषयं वर्णयति ।

अकालगमनम् – अस्य अर्थ: पर्वादौ निषिद्धदिने मैथुनं कृतम् इति ।

– पौर्णिमायां अमावस्यायां च पर्वकाले प्रदोषकाले वा मैथुनं कृतम् ।

अयोनिगमनम् – इति निषिद्धयोनौ । रजस्वला आतुरा अमेध्या गुरुपत्नी बन्धुपत्नी भगिनी योगिनी च अन्येऽपि मैथुनाय निषिद्धा: स्त्रिया: ।

ज्योतिषचन्द्रसरस्वति: – असौ: विशेषवर्णनं करोति ।

अकालगमनम् – बाल्ये मैथुनम्

– जरायां मैथुनम्

– पर्वादिवर्जनीयकाले मैथुनम्

– ऋतुविपरीतमैथुनम्

अयोनिगमनम् – कृत्रिमोपाय: – मुखमैथुनम्

हस्तमैथुनम्

गुदमैथुनम्

कृत्रिमयोनौ मैथुनम्

– पश्वादिगमनम् ।

५) सर्वत: ऊहापोहोत्तरं एवं भाति यद् द्वौ अपि पाठौ युक्तियुक्तौ स्त: ।

६) परं अकालगमनम् अयोनिगमनम् च एतयो: पदयो: विविधानां अर्थछटानां वयं प्राप्नुम: ।

निष्कर्ष:

१) उभौ पाठौ तथा तेषां विवेचनं युक्तियुक्तं स्वीकरणीयं च ।

२) अभिप्रेतार्थत: विधर्मता नास्ति ।

ए) द्रव्यनामसंज्ञायां पाठभेदा: तज्ञन्यवैधर्म्याणि च

अध्याय ७

| क्रमांक | सूत्र | चक्रपाणि: | गङ्गाधर: | योगेन्द्रनाथसेन: | ज्योतिषचन्द्रसरस्वति: |
|---|---|---|---|---|---|
| १ | २१ | मूलकपर्णी | मूषिकपर्णी | मूषिकपर्णी | मूषिकपर्णी |

अध्याय ८ पाठभेद

| क्रमांक | सूत्र | चक्रपाणि: | गङ्गाधर: | योगेन्द्रनाथसेन: | ज्योतिषचन्द्रसरस्वति: |
|---|---|---|---|---|---|
| १ | १३५ | विदुल | निचुल | विदुल | निचुल |
| २ | १३५ | कालंकृत | काल | कालंकत | कालंकत |
| ३ | १३५ | एलापर्णी | ऐरापर्णी | एलापर्णी | एलापर्णी |
| ४ | १३९ | असनपर्णी | शणपर्णी | शणपर्णी | – |
| ५ | १३९ | मधुपर्णी | – | – | – |
| ६ | १३९ | – | पयस्या | पयस्या | – |
| ७ | १३९ | उरुबूक | एरण्ड | एरण्ड | – |
| ८ | १३९ | इक्षु | – | इक्षु | – |
| ९ | १३९ | कपोलवल्ली | – | कपोलवल्ली | – |
| १० | १३९ | काकनासिका | काकनासिका | काकनासा | – |
| ११ | १३९ | कपोतवल्ली | कपोतवल्ली | – | कपोतवल्ली |
| १२ | १४० | गण्डीर | करीरक | गण्डीर | करीरक |
| १३ | १४० | नन्दीतक | – | नन्दीतक | – |
| १४ | १४१ | आनूप | – | – | – |
| १५ | १४२ | हिंगुनिर्यास | हिंगु | हिंगु | – |
| १६ | १४२ | किलिम | द्रुकिलिम | द्रुकिलिम | – |
| १७ | १४२ | कुठेरक | – | – | – |
| १८ | १४२ | गण्डीर | काण्डीर | काण्डीर | – |
| १९ | १४२ | तेजोवती | तेजस्विनी | तेजोवती | – |
| २० | १४२ | मधुशिग्रुक | शिग्रुक | मधुशिग्रु | – |
| २१ | १४३ | कुलक | कूणक | कूणक | – |
| २२ | १४३ | वचा | वरा | वरा | – |
| २३ | १४४ | असन | असन | – | – |
| २४ | १४४ | शण | असन | – | – |
| २५ | १४४ | पुर | – | – | – |

| | | | | | |
|---|---|---|---|---|---|
| २६ | १४४ | कुम्भी | कुम्भीक | कुम्भीक | कुम्भी |
| २७ | १४४ | माचीक | माठीक | माठीक | माठीक |
| २८ | १४४ | तरुण | तरुणी | तरुणी | तरुण |
| २९ | १४४ | – | अश्वकर्ण | – | – |
| ३० | १५१ | अजाजी | – | अजाजी | अजाजी |
| ३१ | १५१ | गण्डीरपुष्पी | गण्डीर | गण्डीरपुष्पी | गण्डीरपुष्पी |
| ३२ | १५१ | तेजोवती | तेजस्विनी | तेजोवती | तेजोवती |

२) मूलसूत्रे पाठभेदाः न सन्ति परंतु विषयविवेचनेषु टीकाकाराणां वैधर्म्यं दृश्यते ।

– टीकाकाराणां विवेचनेषु दृश्यमानानां वैधर्म्याणां एष द्वितीयः वर्गः अस्ति ।

– अस्मिन् टीकाकाराः मूलसूत्रे एकसमानं पाठं वर्णयन्ति । परं कस्मिन् अपि पदे अथवा वर्ण्यविषये टीकां कुर्वद्‌भिः तैः विभिन्नाः विचाराः प्रकटिताः । अतः टीकाकारेषु वैधर्म्यं दृश्यते ।

– ईदृशानां वैधर्म्याणां ऊहापोहं कुर्मः अत्र । चरकसंहितायाः विमानस्थाने अष्ट अध्यायेषु टीकाकाराणाम् ईदृशानि पाठभेदरहितानि वैधर्म्याणि कलित्वा १२५ प्राप्तानि ।

– तस्मिन् द्रव्यनामसंज्ञागतानि ८८ वैधर्म्याणि अध्ययनस्य अधिकरणं नासत्वात् अस्मिन् अध्ययने विवेचनार्थं न समावेशिताः । तस्मात् ३७ वैधर्म्याणां विवेचनम् अत्र कुर्मः । एतेषाम् वैधर्म्याणां अग्रिमवत् उपप्रकारेषु विभाजनं कृत्वा विवेचनं कुर्मः ।

अ) वैधर्म्यम् अस्ति । शब्दशः वैधर्म्यं दृश्यते । परं ऊहनोत्तरम् अभिप्रेतार्थे वैधर्म्यं न भवति ।

अस्य वैधर्म्यप्रकारे १४ वैधर्म्याणि सम्प्राप्तानि ।

(१)संदर्भः– चरक विमानम् १/४

मूलं सूत्रम् – रसास्तावत् षड् मधुराम्ललवणकटुतिक्तकषायाः । ते सम्यगुपयुज्यमानाः शरीरं यापयन्ति ।

अधिकरणम् – 'रसद्रव्यदोषविकारप्रभवे' प्रकरणे रसानां दोषाणां च पृथक् प्रभावत्वम् अस्मिन् उपाधिकरणे वर्णितम् । तस्मिन् उपरितने सूत्रे रसानां प्रभावः वर्णितः ।

वैधर्म्यम् – सूत्रस्थस्य 'यापयन्ति' इति पदस्य विवरणे शब्दार्थशः वैधर्म्यं दृश्यते ।

टीका – चक्रपाणिः – यापयन्तीति साम्येनावस्थापयन्ति ।

गङ्गाधरः – शरीरमारोग्येण कालं यापयन्ति गमयन्ति ।

योगीन्द्रनाथसेनः – शरीरं यापयन्ति स्वास्थ्ये वर्तयन्ति वातादीन् साम्ये अवस्थाप्य ।

ज्योतिषचन्द्रसरस्वतिः – यापयन्ति पालयन्ति ।

विवेचनम्

– अस्मिन् वैधर्म्यविवेचने सर्वप्रथमं 'यापयन्ति' इति व्याकरणं पर्यायान् च पश्यामः ।

– यापयन्ति – 'या' धातोः रुपम् । वर्तमानकालस्य तृतीयपुरुषस्य बहुवचनम् ।

– यापनम्– क्ली.(या + णिच् + ल्युट् ।) वर्तनम्, कालक्षेपणम्, प्रापके ।(शब्दकल्पद्रुम)

– न. (या +णिच् +ल्युट्) कालादेः क्षेपणे इति हेमचन्द्रः निरसने इति मेदिनी ।(वाचस्पत्यम्)

mfn - causing to go or pass a way bringing to an end, Caring, all eviating.
- Prolonging, Supporting, Causing time to pass away, decay
procrastination, Maintainance (Monnier Williams / 849)

यापनम्, यापना, यापयन्ति, यापयेत् इत्यादीनि पदानि ग्रन्थे उपयोजितानि ।

१) यापना बस्तेः वर्णनं सिद्धिस्थानस्य द्वादशे अध्याये कृतम् । चक्रपाणिना तस्य व्याख्या एवं कृता – 'आयुषो यापनं दीर्घकालानुवर्तनं कुर्वन्तीति यापना बस्तयः ।' (च.सि.१५/१५ चक्रपाणि)

२) यात्राकरम् यापनाकरम् – च. सू. १८/३७–४१ चक्रपाणि

३) 'यापयेत्' पदस्य उपयोगः च. चि. १८/३१, च. चि. १३/९२, च. चि. २/२७

यापयन्ति पदस्य उपयोगः च. सू. २१/२० चक्रपाणि टीका अत्र कृतः अस्ति ।

उपरोक्तैः सन्दर्भैः एवं लक्ष्यते यत् यापयन्ति, यापयेत् यापना इत्यादीनि पदानि दीर्घकालानुवर्तनम् यात्राकरम्, पालनम् गमनम् इत्यादिभिः अर्थैः ग्रन्थे योजितानि ।

चक्रपाणिः – साम्येन अवस्थापयन्ति । इत्यर्थः शरीरगताः यच्चयावन्ताः भावपदार्थाः तेषां प्राकृतावस्थायां साम्यावस्थायां च दीर्घकालं स्थापनीयाः नाम यापनम् ।

गङ्गाधरः – शरीरं आरोग्येण कालं गमयन्ति । इत्यर्थः शरीरे आरोग्यं स्वास्थ्यं च प्रस्थाप्य शरीरं दीर्घकालं चालनीयं स्थापनीयं च । अतः यद्यपि भिन्नं पदं योजितं तथापि अर्थभिन्नता नास्ति ।

योगीन्द्रनाथसेनः – वातादीन् साम्ये अवस्थाप्य शरीरं स्वास्थ्ये वर्तयन्ति ।

– शरीरगतान् वातादीन् घटकान् साम्यावस्थायाम् अवस्थाप्य शरीरस्य वर्तनं स्वास्थ्यावस्थायां करणीयम् ।

ज्योतिषचन्द्रसरस्वतिः– पालयन्ति । शरीरस्य अनुपालनं स्थापनं च ।

– तस्मात् चत्वारः अपि टीकाकाराः सममेव वर्णनं कुर्वन्ति ।

निष्कर्षः –

१) यद्यपि पदशः वैधर्म्यं दृश्यते तथापि न अर्थशः ।

२) चत्वारः अपि टीकाकाराः समानमताः ।

(२) संदर्भः – च. वि. १/६

मूलं सूत्रम् – तत्र दोषमेकैकं त्रयस्त्रयो रसा जनयन्ति त्रयस्त्रयश्चोपशमयन्ति...... ।।

अधिकरणम् –

उपरितनस्य सूत्रस्य वर्णनं 'असंसृष्टरसदोषयोः परस्परसम्बन्धः इति अधिकरणे कृतम् ।'

वैधर्म्यम् – अस्य सूत्रस्य विषयवर्णने वैधर्म्यं दृश्यते ।

टीका

चक्रपाणिः– १) असंसृष्टरसानां कर्मोपदेशः ।

२) रसद्वारेण दोषाणाम् उत्पाद्यत्वशमनत्वयोः वर्णनम् ।

३) 'परिपन्थिनी' पदस्य उपयोगः ।

४) सर्वात्मवैपरित्येन शमनम् ।

गङ्गाधरः–१) रसाः प्राकृतावस्थायां शरीरयापनां तथा विकृतावस्थायां शरीरोपघातं कुर्वन्ति ।

२) प्रभावसाम्यं चेत् रसाः दोषान् वर्धयन्ति ।

३) प्रभाववैपरीत्यं अस्ति चेत् रसाः दोषान् शमयन्ति ।

४) प्रभावसामान्यं प्रभाववैशेष्यं च एते रसानां दोषगतस्य कर्मणः कारणम् ।

५) इमम् अधिकरणानुसारं प्रभावस्य वर्णनम् ।

योगीन्द्रनाथसेनः –

१) महाभूतसामान्यं महाभूतवैशिष्ट्यं च एते रसानां दोषगतस्य कर्मणः कारणम् ।

२) 'गुणः' इति पदं महाभूतवाचकम् ।

३) रसाः समानगुणस्य दोषं वर्धयन्ति उत विपरीतगुणस्य दोषं शमयन्ति ।

ज्योतिषचन्द्रसरस्वतिः– १) कार्यकारणभावानुसारं रसात् दोषाः शमनत्वं वृद्धिं च कुर्वन्ति ।

२) सूक्ष्मपचने पक्वाः रसाः दोषान् शमयन्ति वर्धयन्ति च ।

चत्वारः टीकाकाराः भिन्नान् घटकान् वर्णयन्ति येन रसद्वारेण दोषाणां शमनत्वं वा वृद्धिः भवति । ते घटकाः एवं वर्तन्ते –

गङ्गाधरस्य प्रभावः योगीन्द्रनाथसेनस्य महाभूतसङ्घटनम्, चक्रपाणे: रसानां कर्मोपदेशस्य वर्णनम् तथा ज्योतिषचन्द्रसरस्वते: कार्यकारणभाव: तथैव सूक्ष्मपचने: पक्का: रसा: इति ।

एतेषु घटकेषु दृश्यमानां वैधर्म्याणां ऊहापोहं कृत्वा टीकाकाराणां विमर्शं कुर्म: ।

१) अस्य संपूर्णस्य अध्यायस्य अधिकरणं ''रसप्रभाव:– दोषप्रभाव:, द्रव्यप्रभाव: – विकारप्रभाव: च एतेषां विवेचनम् अस्ति ।

२) तद्गतयो: रसदोषयो: परस्परप्रभावस्य वर्णनम् अस्य सूत्रस्य अधिकरणम् ।

३) अत्र 'प्रभाव:' इति संज्ञा प्रथमं विचारणीया ।

चरकाचार्येण अस्मिन् अध्याये 'प्रभाव:' संज्ञा विभिन्नै: अर्थै: योजिता । एषा ''स्वसंज्ञा तन्त्रयुक्ति:''।

– ''रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् ।'' इति यस्य वर्णनं, यम् अचिन्त्या शक्ति: इति उच्यते तस्य अमीमांस्य द्रव्यशक्तिस्वरुपप्रभावस्य वर्णनम् अथवा अभिप्रेतार्थ: अत्र न अपेक्षित: ।

– अत्र प्रभाव: पदेन 'प्रकृष्टो भाव: प्रभाव: शक्ति: इत्यर्थ: ।' (चक्रपाणि:),

इति भाव: अपेक्षित: ।

– कोऽपि द्रव्यगत: घटकगत: भावपदार्थगत: प्रकृष्ट: वा उत्कट: वा उत्कर्षितः वा भाव: नाम प्रभाव: । एष: अर्थ: अस्य अध्यायगतस्य अधिकरणानुसारं स्वीकरणीय: ।

– अत्र पदार्थ: स्वसंज्ञा अधिकरणम् ऊह्य: च एतासां तन्त्रयुक्तीनां उपयोग: करणीय: भवति ।

– चक्रपाणि: प्रभावस्य द्वौ प्रकारौ मन्यते । चिन्त्य: अचिन्त्य: च ।

– अस्मिन् अध्याये रसदोषयो: द्रव्यविकारभावयो: प्रकृष्ट: भाव: वर्णित: । एष: चिन्त्य: प्रभाव: ।

– अत्र अस्मिन् अध्याये केवलं चिन्त्य: एव प्रभाव: वर्णित:

गङ्गाधरस्य वर्णनमपि यथा अधोक्तम् ।

''प्रभवन्ति प्रभवो भवन्ति भावा: कर्मसमर्था: भवन्त्येतै: स्वभावैर्वा गुणैर्वा कर्मभि: वा इति प्रभावा: ।''

– इत्यर्थ: द्रव्ये कोऽपि प्रकर्षेण उपतिष्ठन् भाव: नाम प्रभाव: ।

– अतः अत्र अस्मिन् अध्याये कोऽपि उत्कटः उत्कर्षितः प्रकृष्टः भावः नाम पदार्थः एषा व्याख्या अवश्यं ज्ञातव्या अस्ति ।

४) इमां व्याख्याम् अनुसृत्य 'रसप्रवाहः' इत्यस्य अर्थः रसस्थस्य कस्यापि भावस्य उत्कटता । विशेषतः गुणानां उत्कटता ।

५) रसैः दोषेषु भवन्तं कार्यं तस्मिन् द्रव्ये तद्रसगतानां गुणानां तरतमया उत्कटतया सम्भवति ।

– रसगतानां गुणानां यादृक् तरतमत्वं यादृशी उत्कटता तादृशं तस्य दोषेषु कार्यं सम्भवति ।

– उदाहरणार्थम् – मधुर – रसस्य गुणाः पूर्णतः वा अंशतः वायोः विपरीताः सन्ति तेन मधुररसेन वायोः शमनं भवति ।

योगीन्द्रनाथसेनेन गुण पदेन अत्र महाभूतम् अर्थः ग्रहीतव्यः इति आदिष्टम् ।

६) रसस्य प्रभावः प्रकृष्टता उत्कृष्टता

↓

महाभूतसङ्घटनम् (महाभूतस्य प्राधान्यम्)

↓

तेषां महाभूतानां गुणानाम् अवस्था (उत्कटता/तरतमत्वम्/हीनत्वम्)

↓

तेन तस्मात् रसात् भूयमानं दोषस्य शमनम् वृद्धिरुपं कार्यं च ।

७) मधुरम् – पृथ्वी + जलम्

अम्लम् – पृथ्वी + अग्निः

लवणम् – जलम् + अग्निः

| वायुदोषः – वायुः + आकाशम् ।

– एतानि रसगतानि महाभूतानि वातदोषस्य महाभूतापेक्षया विपरीतानि सन्ति । वायुदोषस्थं महाभूतसंघटनस्य विरुद्धं संघटनं मधुराम्ललवणरसगतस्य महाभूतप्राधान्यस्य अस्ति ।

– तथैव मधुराम्ललवणरसैः वातदोषः शाम्यति । तथैव कटुतिक्तकषायरसगतं महाभूतसङ्घटनं वायोः अंशात्मकगुणानुसारं वृद्धिं करोति ।

८) अतः गङ्गाधरेण पुरस्कृतौ प्रभावसामान्य प्रभावविशेषाः तथा योगीन्द्रनाथसेनेन पुरस्कृतौ महाभूतसामान्यमहाभूतविशेषौ एतौ विचारौ एकस्य एव विचारप्रवाहस्य द्वे अवस्थे स्तः ।

९) गङ्गाधरेण वर्णित: प्रभाववाद: नाम कस्मिन् अपि द्रव्ये सन् प्रकृष्ट: वा उत्कट: वा चिन्त्य: भाव: । एष: एव योगीन्द्रनाथसेनस्य विचारेण तद् द्रव्यगतानां महाभूतानां प्राधान्यरुपि वा अंशात्मकरुपि सङ्घटनम् ।

१०) तस्मात् टीकाकारेषु अर्थभिन्नता नास्ति ।

११) किमपि द्रव्यं यदि द्वाभ्यां विभिन्नाभ्यां विरुद्धभावाभ्यां युक्तं अस्ति यथा भल्लातकं मधुररसात्मकम् उष्णवीर्यात्मकं च अस्ति । परस्परविरुद्धौ भावौ अस्मिन् द्रव्ये उपास्थितौ । एतादृशे स्थाने दोषकार्ये रसप्रभाव: वियुङ्क्ते । अत: एव चक्रपाणिना अस्य सूत्रस्य अधिकरणं वर्णयता 'असंसृष्टरसस्य कार्यदर्शनम्' इति कृतम् ।

– यदा रसेभ्य: रसस्य महाभूतसंघटनेभ्य: विरुद्धन्त: अन्ये घटका: न स्यु: तदा एव इदं असंसृष्टरसस्य कार्यं घटते ।

– यदि एवं विरोधिन: घटका: स्यु: तर्हि रसस्य दोषगते कार्ये अपवादं भूत्वा कर्मवैपरीत्यं घटते ।

उदा. – अर्क: अगुरु: गुडूची च एतानि द्रव्याणि तिक्तरसस्य सन्ति अपि तद्गतात् उष्णवीर्यत्वात् वातप्रकोपं न निर्मान्ति ।

१२) चक्रपाणि: परिपान्थिनी पदं उपयुङ्क्ते । 'परिपन्थि' इति पदस्य अर्थ: शब्दकल्पद्रुमे अवरोध: शत्रु: वा इति दत्त: । द्रव्यगतं गुणवैपरित्यं दर्शयितुम् इदं योजितम् ।

– उपरितने अर्कादीनाम् उदाहरणे द्रव्यगतं उष्णवीर्यत्वं अनेभ्य: वातजननकारकेभ्य: घटकेभ्य: परिपन्थी (शत्रुरुप: अवरोधत्मक:) अस्ति ।तेन रसद्वारेण घटितुम आवश्यकं कर्म न भवितुमर्हति ।

१३) एवं चक्रपाणे विचारा: अपि अन्येषां टीकाकाराणां समाना: तान् विचारान् पुष्यन्त: सन्ति ।

१४) चक्रपाणि: सर्वात्मवैपरित्यं सर्वात्मसाधर्म्यं च पदे य उपयुज्य रसानां दोषकार्यं वर्णयति ।

– यै: रसै: तद्गतस्य महाभूतसंघटनस्य समानं संघटनं सतां दोषाणां निर्मिति: भवति तद्विपरीतानां महाभूतसङ्घटनात्मकानां दोषाणां क्षय: भवति ।

– तथैव सर्वात्मवैपरित्यरुपिभि: रसै: तद्तद्दोषाणां शमनं भवति अपि च सर्वात्मसाधर्म्यस्वरुपिभि: रसै: तद् तद् दोषाणां वृद्धि: भवति ।

१५) ज्योतिषचन्द्रसरस्वतिः कार्यकारणभावं उल्लिखति । एषः अपि एतादृशः एव विचारः । दृष्टिकोणः केवलं भिन्नः ।

– यादृक् कारणं भवति तद्स्वरुपि तद्गुणात्मकं कार्यं भवति ।

– अत्र रसगतानि महाभूतानि एतद् कारणं तदनुसारं दोषगतं शमनत्वं वा वृद्धत्वं कार्यं भवेत् ।

– यथा महाभूतसंघटनम्  प्रकृष्टभावः तथा दोषगतं कार्यं भवेत् ।

– अतः एषः अपि विचारः अन्येषां टीकाकाराणां समानः एव ।

१६) ज्योतिषचन्द्रसरस्वतिः एवमपि वर्णयति यत् सूक्ष्मे पचने पक्वाः रसाः दोषान् शमयन्ति वर्धयन्ति च । अत्र अवस्थापकानां विचारः करणीयः ।

अविदग्धः कफं पित्तं विदग्धः पवनं पुनः ।

सम्यग्विपक्वो निस्सारः आहारः परिबृंहयेत् ।। सु सू ४६/५२७

– मधुर अवस्थापाकगतः आहारः अविद्ग्धायाम् अवस्थायां मधुरावस्था सति (पार्थिवः तथा आप्यः प्राधान्यः) कफस्य परिबृंहणं करोति । कफस्य परमाणून् उत्पादयति ।

– अम्लअवस्थापाके विद्ग्धः अम्लीभूतः (पार्थिवः तथा आग्नेय प्रधानः) आहारः पित्तस्य परिबृंहणं करोति । पित्तस्य परमाणून् निर्माति ।

– कटु अवस्थापाके सम्यक् विपक्वः सारकिट्टविभक्तः निर्गतसारः आहारः वायोः परिबृंहणं करोति । वायोः परमाणून् निर्माति ।

एवं आहारस्य पाञ्चभौतिकं सङ्घटनं यद्स्वरुपं तस्य साधर्म्यस्य दोषाः वर्धन्ते तथैव वैधर्म्यरुपिणः दोषाः शाम्यन्ति ।

अतः ज्योतिषचन्द्रसरस्वतेः विचारः अपि अन्येषां टीकाकाराणां समानः एव ।

१७) योगीन्द्रनाथसेनः इममेव विषयं विस्तारयन् सुश्रुताचार्यस्य संदर्भम् उद्धरति ।

एते रसाः स्वयोनिवर्धनाः । अन्य योनिप्रशमनाः च । सु सू ४२

– रसाः अस्यार्थः येभ्यः महाभूतेभ्यः उत्पन्नाः तद्समानेभ्यः महाभूतेभ्यः उत्पन्नानां भावघटकानां ते वृद्धिं कुर्वन्ति तथा तदविपरीतेभ्यः महाभूतेभ्यः उत्पन्नानां भावघटकानां शमनं कुर्वन्ति ।

– दोषशमनत्वं दोषकोपनत्वं च रसानां प्रभाव: । समानगुणत्वं सतां रसानां वृद्धि: तथा विपरीतगुणसंपन्नानां रसानां शमनं कुर्वन्ति ।

– योगीन्द्रनाथसेनेन अनुमततन्त्रयुक्तिं उपयुज्य भेलसंहिताया: संदर्भेण विषय: स्पष्टीकृत: ।

१८) अस्य सूत्रस्य टीकायां शब्दश: यदि वैधर्म्यं दृश्यते तथा तस्यां न अर्थभिन्नता ।

१९) अधिकरणम् इति विषय: तथा तस्य महत्वम् एतासां टीकानां विवेचनम् अधिकं स्पष्टं भवति ।

निष्कर्ष: – १) चतस्त्र: अपि टीका: समाना: । अर्थभिन्नता नास्ति इति मे प्रतिभाति ।

२) शब्दश: वैधर्म्यं दृश्यते परं अभिप्रेतार्थत: अर्थश: वैधर्म्यं नास्ति ।

(३)संदर्भ: – च. वि. १/१७

मूल सूत्रम् – क्षार: पुन: ............ये ह्येनं ग्रामनगरनिगमजनपदा: सततमुपयुज्यते ।।

अधिकरणम् – 'द्रव्यप्रभाव:' इति अधिकरणे क्षारं द्रव्यं वर्णितम् । यस्मिन् ग्रामादिषु क्षार: अधिक: सेव्यते तत्र उत्पद्यमानानां व्यापदां वर्णनं उपरितने सूत्रे अस्ति । तत्र ग्रामं, नगरं, निगमं जनपद: च एतेषां व्याख्या: टीकाकारा: कुर्वन्ति ।

वैधर्म्यम् – जनपद: इति पदस्य योजना: अर्थ: च एतयो: वैधर्म्यं भाति ।

टीका

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – जनपदा: जनसमूहा: ग्रामीणा: जनपदा: वा नागरिका जनपदा वा निगमवासिनो जनपदां वा...।

योगीन्द्रनाथसेन: – ग्राम: प्रसिद्ध: । नगर: आढ्यानां निवास: । तदासन्न: निगम: । जनपद: देशश्च ।

ज्योतिषचन्द्रसरस्वति: – जनपदस्तु बहुग्रामपूर्ण: प्रदेश: । जनपद: इति पदस्य व्याकरणं पश्याम: ।

विवेचनम् –१) जनपद: – पुं. जनस्य लोकस्य पदं आश्रयस्थानं यत्र । जन: पदं वस्तु यस्येति वा देश: । चाणक्यशतकम् । महाभारतम् । जन: । मेदिनी (शब्दकल्पद्रुम: खण्ड: २)

– पुं जना: पद्यन्ते गच्छन्ति यत्र पद आधारे ध्दा देशे । अमर: । समूह: । म. भा. ।

(वाचस्पत्यम्)

Community, nation, people, an empire, inhabited coutry, mankind. The district formed by a country. The chief country - ruler of a country, a king. Crowded with people (Monier Williams / 410)

Community, Race, Nation, Kingdom, an empire, the people, subjects.

(आपटे शब्दकोश / २१५)

२) जनपदस्य अर्था: टीकाकारै: गृहिता: अधोनिर्दिष्टा: –

| | | |
|---|---|---|
| गङ्गाधर: | – | जनसमूह: । |
| योगीन्द्रनाथसेन: | – | देश: । |
| ज्योतिषचन्द्रसरस्वति: | – | बहुग्रामपूर्ण: प्रदेश: । |

– चक्रपाणिः अस्मिन् सूत्रे जनपदः इति पदे टीकां न करोति ।

– परं संदर्भे टीकां कुर्वता तेन जनपदः पदे अधोक्ता व्याख्या कृता अस्ति ।

अ) जनपदम् – मण्डलम् । च. वि. ६/१३

ब) जनपदमण्डलं इति जनपदवसत्युपलक्षितं मण्डलम् । च. वि. ३/३

क) देशशब्देन इह देशवासिनो जनपदा अभिप्रताः । च. चि. ३०/३१५

एवं चक्रपाणिः जनपदः पदं जनसमूहः देशः च इति उभयार्थे योजयति ।

३) तथैव कोशे अपि जनपदः पदं देशः समूहः प्रदेशः च इत्यादिभिः सर्वैः अर्थैः उद्देशितः अस्ति ।

४) चरकसंहितायाः चिकित्सास्थानस्य त्रिंशत्तमे अध्याये ३१५ सूत्रस्य टीकायां चक्रपाणिः स्पष्टं करोति यत् ''देशः पदेन तद्देशगतानां जनानां समूहः अभिप्रेतः'' इमम् स्थानं तथा गुणिगुणविभवः इति ताच्छिल्यप्रकारं उच्यते ।

५) अतः टीकाकाराणां शब्दशः दृश्यमाने वैधर्म्ये तत्वतः अर्थभिन्नता नास्ति ।

६) गङ्गाधरः टीकायां जनपदः इति पदस्य अन्वयः ग्रामम् नगरम् निगमम् च एतेभ्यः पदेभ्यः युनक्ति ।

– तेन ग्रामिणः जनपदः, नागरिकः जनपदः, निगमवासी जनपदः इति अर्थः गृहीतः ।

– अतः गङ्गाधरस्य मतेन अपि जनपदः पदेन लोकानां समूहः इत्येव अभिप्रेतम् ।

७) योगीन्द्रनाथसेनः जनपदस्य अर्थः देशः इति प्रत्युत ज्योतिषचन्द्रसरस्वतिः बहुग्रामपूर्णः प्रदेशः इति स्वीकुरुतः ।

योगीन्द्रनाथसेनेन चरकनिदानस्थानस्य षष्ठे अध्याये त्रयोदशे सूत्रे अधोक्ता टीका कृता ।

''शून्यानां जनशून्यानां तेषां ग्रामादिनां जनशून्यत्वेन स्वप्ने अभीक्ष्णं दर्शनम् । निगमः देशः ।''

अनया टीकया एतद् स्पष्टं भवति यत् योगीन्द्रनाथसेनस्य अत्र जनपदः इति पदेन जनसमूहः इत्यर्थः अभिप्रेतः ।

अतः सर्वेषां टीकाकाराणां जनपदः पदस्य जनसमूहः देशः च इति द्वौ अर्थौ अभिप्रेतौ ।

८) डल्हणाचार्येण अपि जनपदः पदं लोकः समूहः देशः च इति अर्थेन योजिताः ।

अ) स्वपरिचयं कारयन् डल्हणः स्वप्रदेशं अधोक्तशब्दैः वर्णयति ।

''समस्तजनपदतिलककल्पे श्रीभादानकदेशे नगरीवरमथुरासमीपे अङ्कोलानामकं वैद्यस्थानम् अस्ति'' (सु. सू. १/१ डल्हण टीका)

अत्र जनपद: पदं प्रदेश: इत्यर्थेन योजितम् ।

ब) काशिराजस्य दिवोदासस्य परिचयं कारयन् डल्हण: अधोक्तं लिखति ।

काशिराजं वाराणसीजनपदनृपतिम् ।'' सु. सू. १/३ टीका

अत्र जनपद: पदं देश: इति अर्थेन योजितम् ।

क) जनपदा: लोका: । सु. सू. ६/१९ टीका

अत्र जनपद: पदं लोकसमूह: इत्यर्थेन योजितम् ।

निष्कर्ष: –

१) आयुर्वेदस्य संहितायां जनपद: पदं प्रदेश: समूह: लोक: देश: इत्यर्थै: उपयोजितम् ।

२) कोशेषु अपि एते एव सन्दर्भा: उपलभ्यन्ते ।

३) टीकाकारा: अपि विविधेषु स्थानेषु जनपद: पदं एतै: एव भिन्नै: अर्थै: उपयुञ्जन्ति ।

४) अत: शब्दश: वैधर्म्यं चेदपि तत्वत: अर्थभिन्नता नास्ति ।

(४)संदर्भ: – चरक विमानम् २/७

मूलं सूत्रम् – अमात्रावत्वं ............................... सारविधमनम् .......... ।।

अधिकरणम् – अस्मिन् अधिकरणे अमात्रावत: आहारस्य लक्षणानि वर्णितानि । आहारस्य अमात्रा द्विविधा भवति । अ) हीनमात्रा ब) अतिमात्रा

उपरोक्ते सूत्रे एतयो: हीनमात्रागतस्य आहारस्य लक्षणानि वर्णितानि । एतेभ्य: लक्षणेभ्य: आहार: अल्पमात्रायां गृह्यते इति ज्ञातव्यम् तानि एतानि लक्षणानि सन्ति । एतेषु अन्यतमम् अस्ति 'सारविधमनम्' इति लक्षणम् ।

वैधर्म्यम् – 'विधमनम्' पदे कृतायां टीकायां शब्दश: वैधर्म्यं भासते ।

टीका

चक्रपाणि: – सारविधमनमिति रोगभिषग्जितीये ।(वि. अ. ८) वक्ष्यमाणत्वक्सारादिविधमनम् ।

गङ्गाधर: – सारविधमनं वक्ष्यमाणाष्टविधसारस्य समस्तस्य व्यस्तस्य वा विधमनं ऱ्हासकरम् ।

योगीन्द्रनाथसेन: – सार: त्वग्रक्तादि । तस्य विधमनं नाशनम् ।

ज्योतिषचन्द्रसरस्वति: – शरीरसाराणां रसादीनां विधमनं ऱ्हासकरम् ।

विवेचनम्

– चक्रपाणि: विधमनम् पदस्य व्याख्यां न करोति । योगीन्द्रनाथसेनेन नाशनम् उत ज्योतिषचन्द्रसरस्वतिना गङ्गाधरेण च 'ऱ्हासकरम्' इति व्याख्या कृता ।

– विधमनम् – vi - dham - mfn blowing out, extinguishing, blowing away, destroying

(Monier Williams)

'नाशनम्' इत्यस्य अर्थ: पूर्णत: नाश: तथा ऱ्हासकरम् इत्यस्य अर्थ: 'सत्सु अवस्थागुणप्रमाणेषु क्षय: ।' विधमनम् इत्यस्य कोशगत: अर्थ: - destroy ।

चरक संहितायां सूत्रस्थाने षड्विंशति अध्याये त्रिचत्वारिंश: सूत्रस्य लवणरसकार्ये

'लवणो रसः पाचनः....स्तम्भबन्धसङ्घातविधमनः... ।' च.सू. २६

इति लक्षणं वर्णितम् । अस्मिन् टीका .......

गङ्गाधर: – विधमनम् विनाशनम् ।

योगीन्द्रनाथसेन: – विधमनम् विनाशनम् ।

– 'लवणरस: स्तम्भबन्धादीन् नाशयति' इति अर्थ: भवति । तदा 'विधमनम्' पदस्य नाशनम् अर्थ: योग्य: । तथापि गङ्गाधरेण ज्योतिषचन्द्रसरस्वतिना ऱ्हासकरम् इति व्याख्या कृता ।

– ऱ्हास: नाम नाशस्य आद्या अवस्था ।

– अष्टविधा: सारा: शरीरस्था: अतीव महत्त्वपूर्णा: घटका: । प्रतिधातो: उत्कृष्ट: पोषकांश: 'सारम्' इति उच्यते ।

– 'सारम्' पदस्य Essential, Besat, most excellent, strong, Essence, essentisl part, strength, vigour, wealth, firmness, climax, steel इत्यादय: विविधा: अर्था: सन्ति ।

अत: शरीरस्य तथा धातो: सर्वोत्तम: बलवान् महत्वांश: नाम 'सारम्' अस्मिन् सारे बहुनि लक्षणानि अवलम्ब्यन्ते ।

– विमानस्थानस्य अष्टमे अध्याये एतेषाम् । अष्टविधानां साराणां वर्णनम् अस्ति ।

– चक्रपाणि: एनम् 'विशुद्धतर: धातु:' इति वदति । तरतमत्वेन धातो: विशुद्धगुणानां अत्यन्त्यं उत्कर्षप्राप्त: अंश: नाम तस्य सारभाग: ।

– एतादृशस्य अस्य सारभागस्य सहसा संपूर्णं विनाशं न भवतुम् अर्हति । प्रथमं ऱ्हास: पश्चात् तस्य व्याप्ति: वर्धते । अनन्तरम् एव पूर्ण: नाश: भवेत् । यत: धातो: परिणमने एष: विशुद्धतर: अंश: अल्पमात्रायां अस्तु परं उत्पन्नः भवेत् इति निश्चिंतम् । तस्मात् हीनमात्रायां आहारसेवनेन क्रमश: धातो: सारभागस्य नाश: भवति । तदनन्तरमपि यदि योग्यायां मात्रायां आहारात् पोषकांशा: न मिलन्ति तर्हि सारभाग: पूर्णत: नष्टुं शक्यम् ।

– पर्युषणम्, तीव्र उपवास: प्रायोपवेशनं इत्यादिना प्राप्त: मृत्यु: (साने गुरुजी महोदय:, वि. दा. सावरकर महोदय:) सारविधमनस्य एव उदाहरणम्

निष्कर्ष: –

– टीकायां वैधर्म्यदर्शनं भासते तथा अपि अभिप्रेतार्थ वैधर्म्यं नास्ति ।

– ऱ्हासः नाशस्य पूर्वा अवस्था । अतः ऱ्हासकरं तथा नाशनम् एतद् टीकाद्वयां योग्यमेव ।

(५) सन्दर्भ: – च. वि. ३/१५

मूलं सूत्रम् – सत्यं भूते दया दानं बलयो देवतार्चनम् ।

सद्वृत्तस्यानुवृत्तिश्च प्रशमो गुप्तिरात्मन: ।

अधिकरणम् – जनपदोद्ध्वंससमये येषां जनानां मृत्यु: अनियत: (अनिश्चितः) अस्ति तेषां रक्षणाय चिकित्सा उपक्रमा: करणीया: इत्यस्य वर्णनं सूत्रे अस्ति ।

वैधर्म्यम् – 'आत्मनो गुप्ति:' एतयो: पदयो: टीकायां वैधर्म्यं दृश्यते ।

टीका

| | | |
|---|---|---|
| चक्रपाणि: | – | गुप्ति: इति मन्त्रादिना रक्षा । |
| गङ्गाधर: | – | आत्मनो गुप्ति: – देशान्तरगमनम् । |
| योगीन्द्रनाथसेन: | – | गुप्ति: रक्षणम् । |
| ज्योतिषचन्द्रसरस्वति: | – | गुप्ति: रक्षाकरम् । |

विवेचनम् – आदौ गुप्ति: पदस्य व्याकरणं पश्याम: ।

गुप्ति: – स्त्री गुप् भावे क्तिन् । गोपने । संवरणे । रक्षणे । मन्त्रसंस्कारभेदे । अवस्करस्थाने । कारागारस्थाने । भूगर्ते । अहिंसादौ योगांगे यमे च । गर्तार्थे । नौकाच्छिद्रे ।

(वाचस्पत्यम् खण्ड: ४/२६१३)

– स्त्री: गुप् + अधिकरणभावकरणादिषु यथायथं क्तिन् । अवस्करस्थानम् कारागारस्थानम्, रक्षणम् । मेदिनी, संवरणम् । कुमार: । भूगर्त: यम: । हेमचन्द्र:, गर्तार्थम्, क्षितेरुत्खननम्, नौकाच्छिद्रम् । अमरटीका भरत: । ग्रहणीयमन्त्रसंस्कारविशेष: । (शब्दकल्पद्रुम: खण्ड २/३३९)

– Preserving, Protection, Concealing, hiding, Covering, Sheathing, A hole in the ground, a Covern, Sink, Cellar, Digging a hole in the ground, A meant of protection fortification rampart, Confinement prison, The lower deck of a boat, Check, Stoppage.

(आपटे शब्दकोश १८९)

– 'गुप्ति: पदस्य उपरोक्तेन अर्थेन अन्येषु ग्रन्थेषु योजित: संदर्भ:

– गोपनम् अर्थेन – भयगौरवलज्जादे: हर्षाद्याकारगुप्तिरवहित्या । (साहित्यदर्पणम् ३/१५५)

– संवरणम् अर्थेन – बृहन्मणिशिलासालं गुप्तावपि मनोरमम् । (दशकुमारचरितम्)

– रक्षणम् अर्थेन – सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः । (मनुस्मृतिः)

– तं हि स्वयम्भुः स्वादास्यात्तपस्तप्त्वादित्रोऽसृजत् ।

हव्यकथादिवाह्याय सर्वस्यास्य च गुप्तये ।। (मनुस्मृतिः १/९८)

– ग्रहणीयमन्त्रसंस्कारविशेषः अर्थेन –

यजनं जीवनं पश्चात् ताडनं बोधनं तथा । तथाभिषेको विमलीकरणाप्यायने पुनः ।

तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।। (गौतमस्य तन्त्रसारधृतम्)

– तथैव चरकसंहितायां एकस्मिन् अधिके स्थाने गुप्तिः पदस्य संदर्भः अस्ति ।

ईतेः प्रशमनं बल्यं गुप्त्यावरणशङ्करम् ।

घर्मानिलरजोम्बुघ्नं छत्रधारणमुच्यते ।। च. सू. ५/१०१

एतद्गतायां टीकायां चक्रपाणिः वदति – गुप्तिः पिशाचादिभ्यो रक्षा ।

गङ्गाधरः – गुप्तिः पिशाचादिभ्यः रक्षा ।

योगीन्द्रनाथसेनः – गुप्तिं रक्षाम् ।

अतः अत्रपि गुप्तिः पदं रक्षणम् इत्यर्थेन योजितम् ।

उपरोक्तात् वर्णनात् एवं लक्ष्यते यत् गुप्तिः पदं रक्षणं संवरणं मन्त्रादिनां उपयोगः इत्यर्थेन युज्यते ।

– अस्मिन् सूत्रे कृतायां टीकायां योगीन्द्रनाथसेनेन ज्योतिषचन्द्रसरस्वतिना आत्मनो गुप्तिः इत्यस्य अर्थः रक्षणं रक्षाकरम् इति गृहीतः । यः व्याकरणदृष्ट्या योग्यः एव ।

– अस्मिन् 'रक्षाकरम् रक्षणम्' मध्ये विविधोपायैः जीवितस्य संरक्षणं समाविशति ।

यैः कैः उपायैः / उपक्रमैः च आयुषः रक्षणं भवेत् ते गुप्तिः मध्ये समाविशेयुः ।

– जनपदोद्ध्वंसे येषां मृत्युः नियतः (निश्चितः) भवति तेषां आयुषः देहस्य रक्षणं केनोपायेनापि भवितुं नार्हति । तेषां मरणं ध्रुवम् ।

– परं येषां मृत्युः अनियतः (अनिश्चितः) तेषां आयुषः रक्षणं यथायोग्यैः उपायैः आवश्यकम् । तस्यैव वर्णनम् अस्मिन् अधिकरणे अस्ति ।

– एतेषु उपायेषु स्वस्थवृत्तस्य पालनम्, दिनऋतुचर्ययो: पालनम्, व्यायाम: मन्त्रदीनाम् उपयोग:, जलशुद्धिकरणोपाया:,ध्यानम्, वायुशुद्धिकरणं प्राकृतानां वनस्पतीनां सेवनम्, सद्वृत्तं, योग्यौ आहार विहारौ आदय: घटका: समाविष्टा: ।

– जनपदोद्ध्वंसकरा: भावा: विकृता: स्यु: तेषां त्याग: एष: अपि रक्षाकर: एव हेतु: ।

– एतदनुसृत्य दूषितं जलं दूषित: वायु: च न सेवनीयौ । देश: यदि विकृत: जात: तर्हि देशान्तरगमनम् एते उपाया: अपि आयुष: रक्षाकरहेतव: इति स्पष्टम् ।

– इदं विवेचनम् अनुसृत्य चक्रपाणिवर्णितं 'मन्त्रादीनां रक्षणम्' गङ्गाधरवर्णितं 'देशान्तरगमनम्' एते टीके योग्ये । ताभ्यां योगीन्द्रनाथसेनवत् ज्योतिषचन्द्रसरस्वतिवत् रक्षाकरम् इति सर्वसमावेशिकां व्याख्यां अकृत्वा विशेषघटकाः वर्णिताः ।

निष्कर्ष: –

चतस्र: अपि टीका: योग्या: ।

यद्यपि शब्दश: वैधर्म्यं दृश्यते तथापि अर्थश: तन्नास्ति ।

(६) सन्दर्भः – च. वि. ४ । ६

मूलं सूत्रम् – तत्रेदमुपदिशान्ति बुद्धिमन्तः रोगमेकैकमेवं प्रकोपणम्..... एवमात्मानम्.....।

अधिकरणम् – त्रिविधरोगविशेषविज्ञाने अधिकरणे ' आप्तोपदेशेन परीक्ष्यभावस्य ' अन्तर्गतं

उपरितनस्य सूत्रस्य वर्णनम् अस्ति ।

वैधर्म्यम् – अस्य सूत्रगतस्य ' आत्मानम् ' पदस्य टीकायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणिः – आत्मा स्वभावः यथा रोहिण्यां दारुणत्वं संन्यासस्य शीघ्रोपक्रमणीयत्वादि ।

गङ्गाधरः – एवमात्मानं शीतात्मकं वोष्णात्मकमेवादि

योगीन्द्रनाथसेनः – आत्मा स्वरुपम् ।

ज्योतिषचन्द्रसरस्वतिः – एवमात्मानम् एवं स्वभावम् ।

विवेचनम्

१) आत्मा – व्याकरणम् –

– आत्मन् पुं अतति सन्ततभावेन जाग्रदादिसर्वावस्थासु अनुवर्तते , अत सातत्वगमने + मनिण् । यत्नः । धृतिः । बुद्धिः । स्वभावः । ब्रह्म । देहः । इति अमरकोशः । मनः । इति मेदिनी । परव्यावर्तनम् । पुत्र । इति शब्दरत्नावली । जीवः । हुताशनः । वायुः । इति हेमचन्द्रः ।

( शब्दकल्पद्रुमः / खण्डः १ / १७२ )

२) अस्य कोशस्य अर्थे ' आत्मा ' पदस्य अर्थः स्वभावः इति प्राप्यते ।

३) अस्मिन् सूत्रे आत्मा पदस्य अर्थं टीकाकाराः अधोल्लिखितवत् स्वीकुर्वन्ति ।

चक्रपाणिः – स्वभावः व्याधेः स्वभावः स्वरुपं च कथम् अस्ति तद् परीक्षणीयम् । अस्य उदाहरणं चक्रपाणिः ददाति । रोहिणी इति व्याधिः दारुणस्वभावस्य प्रत्युत संन्यासः शीघ्रोपकरणीय स्वभावस्य अस्ति ।

गङ्गाधरः – अत्रभवान् आत्मानम् इत्यस्य अर्थं शीतात्मकं वा उष्णात्मकं स्वीकरोति । इत्यर्थः व्याधेः स्वभावः अथवा स्वरुपम् ।

व्याधेः कः प्रकारः अस्य परीक्षणं 'एवं आत्मानम्' पदेन अभिप्रेतम् ।

योगीन्द्रनाथसेनः – अत्रभवता आत्मा पदस्य अर्थः स्वरुपं इति स्वीकृतः । स्वरूपस्य अर्थः अपि ‘व्याधिः कीदृशी , तस्याः स्वभावः कः’ इत्येव भवति ।

यद्यपि भिन्नं पदं योजितं तथापि अर्थः एकः एव ।

ज्योतिषचन्द्रसरस्वतिः – अत्रभवता चक्रपाणिः गङ्गाधरः च एतयोः सदृशम् आत्मा पदस्य अर्थः ‘स्वभावः’ एव गृहीतः ।

४) एवं टीकाकारेषु वैधर्म्यं नास्ति । भिन्नं पदं योजितं तथापि अर्थः एकः एव ।

निष्कर्षः

१) पदशः वैधर्म्यं दृश्यते तथापि अभिप्रेतार्थः समानः एव ।

२) वैधर्म्यं नास्ति ।

(७) सन्दर्भ: – च. वि. ४/८

मूलं सूत्रम् –

इमे तु खल्वन्येऽप्येवमेव भूयोऽनुमानज्ञेया भवन्ति भावा: । ...तद्यथा अवस्थानमविभ्रमेण ...इति ।

अधिकरणम् – 'त्रिविधरोगविशेषविज्ञानम्' इति प्रकरणाधिकरणे 'त्रिविधपरीक्षाभि: ज्ञेया भावा:' इति उपप्रकरणे अनुमानज्ञेयभावानां वर्णने इदम् सूत्रम् अस्ति ।

वैधर्म्यम् –

अस्य सूत्रस्थस्य 'अवस्थानम् अविभ्रमेण' इति पदयो: विवरणे शब्दार्थत: वैधर्म्यं दृश्यते ।

टीका चक्रपाणि: – अवस्थानं स्थिरमतित्वम् । अविभ्रमेणेति अभ्रान्त्या ।

गङ्गाधर: – टीका नास्ति ।

योगीन्द्रनाथसेन: – अविभ्रमेण अभ्रान्त्या अवस्थानं स्थिरमतित्वम् ।

ज्योतिषचन्द्रसरस्वति: – अवस्थानं धारणं अविभ्रमेण स्मृत्यविभ्रंशेन ।

विवेचनम्

१) अवस्थानम् –क्ली अव + स्था + ल्युट् । स्थिति: । वास: । प्रतिष्ठा । अवस्था ।

(शब्दकल्पद्रुम: । खण्ड: १/१२९)

– standing, residing, dwelling, situation, position, residence, abode, place, period of staying. ( आपटे शब्दकोश:)

२) अविभ्रम: – न विभ्रम: अविभ्रम: । (नञ् तत्पुरुषसमास:)

विभ्रम: – पुं – वि + भ्रम + घञ् । हावभेद: । स तु स्त्रीणां श्रुङ्गारभावज: क्रियाविशेष: ।

विभ्रान्ति: । भ्रान्ति: । शोभा । संशय: । भ्रमणम् ।

(शब्दकल्पद्रुम: । खण्ड: ५/ वाचस्पत्यम् । खण्ड: ६)

– Roaming, wandering about, Errer, mistake, blunder, Hurry, Confusion, Flurry, the flurry of mind caused by love. (आपटे शब्दकोश:)

३) चक्रपाणि: योगीन्द्रनाथसेन: च एतयो: विवरणं समानम् ।

– अवस्थानम् – स्थिरमतित्वम् । अविभ्रम: – अभ्रान्ति: ।

प्रत्युत ज्योतिषचन्द्रसरस्वतिना भिन्नैः शब्दैः व्याख्या कृता ।

– अवस्थानम् – धारणम् । अविभ्रमः – स्मृति अविभ्रंशः ।

अस्मिन् ऊहापोहः आवश्यकः ।

४) तत्पूर्वं चरक संहितागताः अवस्थानम् अविभ्रमः च एतयोः सन्दर्भान् पश्यामः ।

अ) एतावान् प्रसवकालः वैकारिकमतः परं कुक्षाववस्थानं गर्भस्य ।(च. शा. ४/२५)

अस्मिन् सूत्रे प्रसवकालः दत्तः । दशमासोत्तरं गर्भस्य कुक्ष्यां स्थितिः वैकारिकी अस्ति ।

अत्र अवस्थानम् पदं धारणं स्थितं इति अर्थेन योजितम् ।

ब) स प्रकुपितो ................. पिण्डितोऽवस्थानं करोति । (च. नि. ३/७)

एतद् सूत्रं गुल्म सम्प्राप्तेः अस्ति । अस्मिन् विकृतः वायुः वाह्यमानाम् धातुघटकान् गृहीत्वा महास्त्रोतसि अवतिष्ठति (अवस्थानं करोति)। अत्र अपि अवस्थानं पद धारणं, वासकरणमगत्वा उपवेशनम् इति अर्थैः योजितम् ।

क) अरतिः अनवस्थानलक्षणा ।(चक्रपाणिः च. सू. १०/२०)

चञ्चलत्वं, अस्थिरत्वं नाम अरतिः । अत्र अपि अवस्थानं पदं स्थिरत्वम् इति अर्थेन अस्ति ।

ड) स्थानं स्वमानावस्थानम् । (चक्रपाणिः च. सू. १७/११२)

स्वमाने स्थित्वा शरीरे सर्वत्र सञ्चारः एषा दोषाणां स्थानगतिः अस्ति अत्र अपि अवस्थानम् पदं धारणं, स्थगनं भवनम् इत्यर्थेन आगतम् ।

इ) विष्टम्भः अप्रचलनरुपतया अवस्थानम् । (चक्रपाणिः च. चि. १५/३५)

सञ्चारं न कृत्वा एकस्मिन् स्थाने अवस्थानं तस्य धारणम् इत्यस्य अर्थः विष्टम्भः । अत्र अपि अवस्थानं पदस्य अर्थः स्थगतं धारण करणम् इत्यर्थेन एव भवति ।

– एवं टीकाकारैः स्वीकृतौ स्थिरत्वं धारणम् च एतौ अर्थौ कोशः व्याकरणम् तन्त्रयुक्तिः एतैः युक्तियुक्ताः तिष्ठन्ति ।

५) विभ्रम पदस्य अपरे सन्दर्भाः – १) चक्षुर्विभ्रमम् – च. सि. ९ । ६

२) नेत्रर्विभ्रमम् – च. सि. ७ । ४५

३) विभ्रमं भ्रान्तिः – चक्रपाणिः च. सि. ६ । ७३

४) वातजमदात्यय लक्षणम् – विभ्रम: – च. चि. २४ । ९४

५) धीविभ्रम: – उन्मादलक्षणम् – च. चि. ९ । ६

६) अविभ्रमै: अवैकारिकै: । च. वि. ८ । ९४

७) मनोबुद्धिसत्व....विभ्रमं । उन्माद व्याख्या च. वि. ७ । ५

एवं विभ्रम: इति पदस्य अर्था: अपि भ्रान्ति: वैकारिकत्वं विकृति: विभ्रंश: च एते अर्था: प्रतीता: भवन्ति । एवं अतीतावेक्षणं अनागतावेक्षणं च एताभ्यां तन्त्रयुक्तिभ्याम् अवस्थानं अविभ्रम: च एतयो: टीकाकाराणां अर्था: सिध्यन्ति ।

६) चक्रपाणि: योगीन्द्रनाथसेन: च एतयो: व्याख्या –

अत्र भवद्भ्यां अवस्थानम् – स्थिरमतित्वम् । अविभ्रम: – अभ्रान्ति: । ईदृश: अर्थ: गृहीत: । अत्र अवस्थानस्य अर्थ: अधिकरणानुसारं मत्या संयुज्य निष्पादित: । मत्या: स्थिरत्वम् इत्यस्य अनुमानं ‘ अभ्रान्ति स्थिति: ’ एतस्मात् कर्तु शक्यम् ।

– अस्मिन् अपि कार्ये वा विषये भ्रान्ते: अभाव: एतस्मात् स्थिरमतित्वम् अनुमीयते ।

– एष: अर्थ: युक्तियुक्त: अस्ति ।

७) ज्योतिषचन्द्रसरस्वतिना कृता व्याख्या –

– अवस्थानम् – धारणम्। अविभ्रम: – स्मृति अविभ्रंश: । स्मृतिविभ्रंशस्य अभावात् धारणाशक्ति: अनुमीयते ।

– उन्मादे एषा एव धारणाशक्ति: विभ्रम: भवति । अस्य एव विपर्ययेन ज्योतिषचन्द्रसरस्वतिना स्मृतिअविभ्रंशेन धारणाशक्ते: अनुमानं करणीयम् इति अर्थ: स्वीकृत: ।

– धारणाशक्ति: इत्यर्थ: विषयज्ञानम् अर्थज्ञानं कर्मज्ञानं च एतेषां मत्याम् स्थिरत्वम् ।

– अत: एषः अर्थ: चक्रपाणि: योगीन्द्रनाथसेन: च एतयो: टीकायै युक्तियुक्त: भवति ।

८) एवं शब्दश: यद्यपि वैधर्म्यं दृश्यते तथापि अभिप्रेतार्थे वैधर्म्यं नास्ति । तन्त्रयुक्त्याधारेण एतद् वैधर्म्यं दूरीभवति ।

निष्कर्ष: – १) शब्दश: वैधर्म्यं दृश्यते तथापि अभिप्रेतार्थेन वैधर्म्यं न विद्यते ।

२) टीकाकाराणाम् अभिप्रेतार्थ: समान: एव ।

(८) सन्दर्भ: – च. वि. ५/७

मूलसूत्रम् – तत्र प्राणवहानां स्त्रोतसां हृदयं मूलं महास्त्रोतश्च ।

अधिकरणम् – प्राणवहस्य स्त्रोतस: मूलस्थानम् अस्मिन् सूत्रे वर्णितम् ।

वैधर्म्यम् – अस्मिन् सूत्रे 'महास्त्रोत:' इति पदकृतायां व्याख्यायां वैधर्म्यम् अस्ति ।

टीका –

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – महास्त्रोत: च महासरणं महाच्छिद्रम् इत्यर्थ: ।

योगीन्द्रनाथसेन: – महास्त्रोत: कोष्ठं च ।

ज्योतिषचन्द्रसरस्वति:– महास्त्रोत: कोष्ठमित्यनर्थान्तरम् । यदुक्तं ''कोष्ठं पुनरुच्यते शरीरमध्यं महानिम्नामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे'' इति (च.सू.११) तस्य कोष्ठार्थतोऽपीदं तस्यैकदेशस्य उर: कोष्ठस्यैव परिग्रहो भवति तेन तद्गतं फुप्फुसयन्त्रमवहननाख्यमेव गृह्यते ।

विवेचनम् –

१) 'चक्रपाणिना 'महास्त्रोत:' इति पदे व्याख्या न कृता । तथापि 'प्राणवहम्' इति पदे अग्रिमानुसारं व्याख्या कृता अस्ति –

''प्राणवहानामिति प्राणसंज्ञकवातवहानाम् । एतच्च प्राणाख्यविशिष्टस्य वायोर्विशिष्टस्त्रोत: सामान्येन तु वायो: सर्वा एव धमन्य इति न विरोध: ।''

– प्राणवहेन अत्र 'प्राण:' नाम वातस्य आत्मरुपस्य वहनस्य स्त्रोत: अभिप्रेतम् । यदि वायु: यच्चयावत् सर्वाषु धमनीषु सञ्चरति तर्हि प्राणवायो: एतद् विशिष्टं स्त्रोत: अस्ति ।

– 'प्राण:' इति वातस्य आत्मरुपस्य वर्णनं चरकेण अग्रिमानुसारं कृतम् ।

स्थानं प्राणस्य मूर्धोर: कण्ठजिव्हास्यनासिका: ।

ष्ठीवनक्षवथूद्गारश्वासाहारादि कर्म च ।। च. चि. २८।६

– प्राण: इति वायो: स्थानं – मूर्धा, उर:, कण्ठ:, जिव्हा, आस्यं, नासिका

कर्म – ष्ठीवनं, क्षवथुं, उद्गार:, श्वास:, आहारादय:

तदा 'प्राण:' इति वायो: पञ्चात्मरुपेभ्य: एकस्य आत्मरुपस्य स्थानकर्मयो: वर्णनं विमानस्थानगतं

प्राणवहस्य स्त्रोतस: मूलस्थानेन तथा प्रदूष्टलक्षणै: संयुतम् अस्ति । एवं प्रकारेण प्राणसंज्ञकस्य वायो: वहनस्य स्त्रोत: प्राणवहम् अस्ति इति चक्रपाणे: मतं योग्यम् ।

२) गङ्गाधरेण योगीन्द्रनाथसेनेन च 'महास्त्रोतस: अर्थ: ' कोष्ठं महाच्छिद्रं महासरणम् एवं गृहीत: ।

य: अर्थ: च. सू. ११ इत्यस्य सन्दर्भानुसारं युक्तियुक्त: अस्ति ।

३) तथापि ज्योतिषचन्द्रसरस्वतिना अत्र विशेषां अर्थनिष्पति: कृता । ज्योतिषचन्द्रसरस्वति: चतुर्षु टीकाकारेषु आधुनिकतम: टीकाकार: अस्ति तत्रभवत: काल: विंशतितमं शतकम् । तत्रभवत: पुस्तकम् अपि उपलब्धम् आसीत् इति तत्रभवत: टीकाया: ज्ञायते ।

– तर्हि ज्योतिषचन्द्रसरस्वति: आधुनिकं शरीरविज्ञानं शिक्षित: आचार्य: आसीत् इति तत्रभवत: विविधेभ्य: विवेचनेभ्य: स्पष्टं भवति ।

– क्लोमस्य व्याख्यायामपि तत्रभवत: एष: दृष्टिकोण: ज्ञायते ।

– तदा तत्रभवत: पद्धत्यानुसारं तथा आयुर्वेदाधुनिकयो: शारीरविषयस्य अभ्यासानुसारम् अमुना 'महास्त्रोत:' इति पदस्य व्याख्या कृता ।

– तत्रभवता सर्वप्रथमं 'महास्त्रोत:' नाम कोष्ठम् इति वर्णितम् । नाम प्रथमत: वैधर्म्यं अनश्यन् । इदम् विधानं ज्योतिषचन्द्रसरस्वतिना अतीतावेक्षणं तन्त्रयुक्त्यनुसारं चरकसूत्रस्थाने ११ अध्यायगत: सन्दर्भ: उद्धृत: ।

''कोष्ठं पुनरुच्यते महास्त्रोत: शरीरमध्यं महानिम्नामपक्वाशयश्चेति पर्यायशब्दै: तन्त्रे ।''

च. सू. ११

अस्मिन् तन्त्रे कोष्ठम् इति शब्दस्य कृते महास्त्रोत: शरीरमध्यं महानिम्न: आमपक्वाशय: इत्यादय: पर्यायवाचिन: शब्दा: सन्ति ।

– तस्मिन् अपि एकदेशस्य तन्त्रयुक्ते: उपयोगं कृत्वा ज्योतिषचन्द्रसरस्वतिना कोष्ठार्थम् इति अर्थेन प्राणवहे उरकोष्ठयो: परिग्रह: कृत: । अत्र कोष्ठम् इति पदेन 'उर:स्थ: कोष्ठम्' एवम् अधिकरणानुसारम् अर्थ: बोधितव्य: इति तत्रभवत: मतम् तथा तेन (वैद्येन) उर: कोष्ठगतं 'फुप्फुसयन्त्रम्' अस्य ग्रहणं करणीयम् ।

– तर्हि महास्त्रोतस: अर्थ: एकदेश: अतीतावेक्षणं तथा अधिकरणतन्त्रयुक्ते: अनुसारं फुप्फुसयन्त्रम्

इति गृह्णीयात् एवं ज्योतिषचन्द्रसरस्वतेः मतम् ।

४) ज्योतिषचन्द्रसरस्वतिना अतिविशेषं महत्त्वपूर्णं च विवेचनं कृतम् । तस्मात् विवेचनात् तत्रभवतः शारीररचनायाः गभीरअभ्यासः दृश्यते । ज्योतिषचन्द्रसरस्वतिः विंशतिशतकस्य टीकाकारः सन् तत्रभवता प्राचीनार्वाचीनानां विचाराणां समन्वयः तथा आधुनिकैः यन्त्रैः शास्त्रं द्रष्टुं परिवर्तितः दृष्टिकोणः एतयोः समावेशः स्वविवेचने कृतम् इति दृश्यते ।

चरकः प्राचीनाः टीकाकाराः च एतेषां उरःप्रदेशः, वक्षः, हृदयः इत्यादयः पदेभ्यः यद् अभिप्रेतम् अस्ति तद् अर्वाचीनशास्त्रं तथा प्रत्यक्षप्रमाणं एतेषाम् अविरोधेन अतिशयया सुरीत्या ज्योतिषचन्द्रसरस्वतिना स्व व्याख्यायां वर्णनं कृतमस्ति ।

निष्कर्षः –

१) तत्वतः वैधर्म्यं नास्ति ।

२) एकदेशतन्त्रयुक्तिम् अनुसारं ज्योतिषचन्द्रसरस्वतिना महास्त्रोतः (कोष्ठं) अस्य ‘फुप्फुसयन्त्रम् ’ इति अर्थः कृतः । एतद् विवेचनं विशेषमस्ति ।

(९) सन्दर्भ:    – च. वि. ५ । १२

मूलसूत्रम् – अतिमात्रस्य चाकाले चाहितस्य च भोजनात् ।

अन्नवाहिनी दूष्यन्ति वैगुण्यात् पावकस्य च ।।

अधिकरणम् – अन्नवहस्य स्त्रोतस: दुष्टीहेतूनां वर्णनम् अस्मिन् सूत्रे कृतमस्ति ।

वैधर्म्यम् – अस्मिन् सूत्रे 'अतिमात्रस्य ' पदकृतायां टीकायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि:  – टीका नास्ति ।

गङ्गाधर: – 'अतिमात्रस्य भोजनात् । अकाले मात्रावदपि भोजनात् ।

योगीन्द्रनाथसेन: – मात्रामतिक्रान्तस्य अतिमात्रस्य । इह मात्रा द्रव्यापेक्षया त्रिभागसौहित्यादिका ।

तथाविधस्य अन्नस्य भोजनात् ।

ज्योतिषचन्द्रसरस्वति:– मात्रामतिक्रम्य भोजनादिति मात्राधिकस्य न्यूनमात्रस्य च भोजनादित्यर्थ: ।

विवेचनम् –

१) चक्रपाणिना अस्मिन् सूत्रे टीका न कृता । गङ्गाधरेण केवलम् अन्वय: वर्णित: । योगीन्द्रनाथसेनेन 'मात्रामतिक्रान्तम्' एवं वर्णनं कृत्वा 'त्रिविधकुक्षीयं विमानम्' इति अध्यायगतं त्रिभागसौहित्यादे: मात्राया: उल्लेखं कृतमस्ति । ज्योतिषचन्द्रसरस्वतिना 'मात्राम् अतिक्रम्यस्य' अर्थ: अधिकमात्रं वा न्यूनमात्रम् इति व्याख्या कृता ।

२) मूलसूत्रं पश्यता पाठ: अग्रिमानुसारम् अस्ति ।

'अतिमात्रस्य च'

– अत्र वाक्यशेषतन्त्रयुक्ते: उपयोग: आवश्यक: । यदि वाक्यशेषम् उपयोजितं चेत् सूत्रान्वय: अग्रिमानुसारं भवेत् ।

'अतिमात्रस्य च न्यूनमात्रस्य च'

३) शरीरस्य यापनं कुर्वन्ती उपबृंहणं कृत्वा शरीरस्य कार्यं नियन्त्रितं स्थापयन्ती पुरुषानुरुपा योग्या मात्रा अस्ति तं पुरुषं तस्यां योग्यायां मात्रायाम् आहारसेवनं हितकरं भवति । यदि सम्यक् मात्रापेक्षया अधिकायां वा न्यूनायां मात्रायाम् आहारसेवनं कृतं तर्हि तस्मात् अन्नवहस्त्रोतसि

विकृति: उत्पद्यते तथा तस्य परिणामस्वरुपं अग्निमांद्यम् अजीर्णम् आमप्रदोषजं ईदृश्या: नैका: व्याधया उत्पद्यन्ते ।

४) तदा ज्योतिषचन्द्रसरस्वतिना कृतं विवेचनम् अधिकं योग्यं भाति । वाक्यशेषतन्त्रयुक्त्यनुसारं तद् सिद्धम् अपि भवति ।

५) योगेन्द्रनाथसेन: अपि एष: एव अर्थ: अभिप्रेत: स्यात् ।

यत: अत्रभवता योग्या मात्रा का स्यात् ? एतस्य वर्णनं कुर्वता 'त्रिविधकुक्षीयविमानम्' इति अध्यायगतं द्रव्यस्य अपेक्षया कुक्ष्या: त्रिभागं कृत्वा मात्रां निश्चेतुं वर्णनं कृतमस्ति ।

कुक्ष्या: त्रिभागं कृत्वा सेविता एषा मात्रा सम्यक् भवति शरीरस्य यापनं करोति स्वास्थ्यं रक्षति च ।

अस्या: मात्राया: अतिक्रमणं नाम अस्या: मात्रापेक्षया अधिकमात्रायां वा न्यूनमात्रायां आहारसेवनम् इति अर्थ: सुयोग्य: ।

अत: योगेन्द्रनाथसेनस्य अपि एष: एव अर्थ: अभिप्रेत: अस्ति ।

निष्कर्ष: –

१) टीकाकारेषु वैधर्म्यं नास्ति ।

२) वाक्यशेषतन्त्रयुक्ते: उपयोगं कृत्वा शब्दश: दृश्यमानं वैधर्म्यं नश्यति ।

३) ज्योतिषचन्द्रसरस्वते: व्याख्या सुस्पष्टा अधिका च योग्यतरा भासते ।

(१०) संदर्भ: – च. वि. ७/१२

मूलसूत्रम् – घृणाविषयमलादिमिश्रितव्यञ्जनादिभोजनम् ।

अधिकरणम् – कृमीणाम् समुत्थानम् ।

वैधर्म्यम् – अस्मिन् सूत्रे ' संकीर्णभोजनं' पदकृतायां टीकायां वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणि: – घृणाविषयमलादिमिश्रितव्यञ्जनादिभोजनम् ।

योगीन्द्रनाथसेन: – हिताहितयो: ऐकध्यं भोजनम् ।

विमर्श:

– चक्रपाणे: तथा योगीन्द्रनाथसेनस्य टीका अस्ति ।

तथा गङ्गाधरस्य ज्योतिषचन्द्रसरस्वते: टीका नास्ति ।

– श्लेष्मजकृमीणां हेतौ संकीर्णभोजनं समाविष्टम् ।

– अस्मिन् पदे गङ्गाधरस्य ज्योतिषचन्द्रसरस्वते: च टीका नास्ति ।

चक्रपाणिमतेन येषां घटकानां घृणा भवति तादृशै: मलादिघटकै: मिश्रितं भोजनं संकीर्णं भोजनम् ।

उत योगीन्द्रनाथसेनस्यानुसारं हिताहितकरं भोजनं एकत्रसेवनं संकीर्णभोजनम् ।

– चरकसंहितायां अधिके स्थानद्वये संकीर्णभोजनं पदम् दृश्यते ।

अ) नातिस्निग्धमसंकीर्णं श्व: स्नेहं पातुमिच्छता । (च सू १३/६०)

असंकीर्णं विरुद्धवीर्यम् । चक्रपाणि:

असंकीर्णम् अपथ्येन अमिश्रितम् । योगीन्द्रनाथसेन:

ब) तिलक्षीरगुडाजीर्णपूतिसङ्किर्णभोजनात् । च. सू. २०/२७

असंकीर्णभोजनं विरुद्धाहार: । चक्रपाणि:

संकीर्णभोजनं बहुद्रव्याणि मेलयित्वा अभ्यवहार: । योगीन्द्रनाथसेन:

संदर्भद्वयस्यानुसारं टीकानुसारं सङ्कीर्णं नाम विरुद्धाहार: अथवा विरुद्धवीर्यद्रव्याणां एकत्रसेवनम् इत्यर्थ: ।

अ) योगीन्द्रनाथसेनस्य मतमपि एतादृशमेव वर्तते । हिताहितकरयोः एकत्रसेवनमपि अन्यतः विरुद्धाहारः एव ।

तथा चक्रपाण्यनुसारं घृणोत्पादकद्रव्याणां सेवनमपि हृद् विरुद्धं संपत्विरुद्धं अग्निविरुद्धं च । अतः शब्दशः यदि वैधर्म्य भाति अभिप्रेतार्थेन वैधर्म्य नास्ति ।

निष्कर्षः–

शब्दार्थतः वैधर्म्यमस्ति । तस्य निरसनमात्रं कृतम् ।

(११) <u>सन्दर्भ:</u> – च. वि. ८/७१

<u>मूलसूत्रम्</u> – कार्ययोनिस्तु सा या विक्रियमाणा कार्यत्वमापद्यते ।

<u>अधिकरणम्</u> – दशविधा परीक्षा इति अधिकरणे कार्ययोनि: इति परीक्षाया: लक्षणसूत्रम् अस्ति ।

<u>वैधर्म्यम्</u> – अस्मिन् सूत्रगतस्य 'विक्रियमाणा' पदस्य व्याख्यायां टीकाकारेषु वैधर्म्यं दृश्यते ।

<u>टीका</u>

| | |
|---|---|
| चक्रपाणि: | – विक्रियमाणा रुपान्तरमापद्यमाना । |
| गङ्गाधर: | – विक्रियमाणा विकृतिमापद्यमाना । |
| योगीन्द्रनाथसेन: | – विक्रियमाणा अवस्थान्तरमापद्यमाना । |
| ज्योतिषचन्द्रसरस्वति: | – यस्या विकृत्या कार्योत्पत्तिर्भवेदित्यर्थ: । |

<u>विवेचनम्</u>

१) शब्दार्थत: टीकाकारेषु विधर्मता दृश्यते ।

२) आदौ 'विक्रियमाणा' पदस्य व्याकरणं पश्येम् ।

३) विक्रियमाणा – स्त्री – वि + कृ + ''कृण: शच ।'' ३/३/१०० । इति श: । टाप् ।

कर्मणि वर्तमानकालवाचकं धातुसाधितं विशेषणम् ।

विकार: । प्रकृतेरन्यभाव: । विरुद्धा क्रिया ।

(शब्दकल्पद्रुम: / खण्ड: ४)

– transformation, change, modification altered or unnatural condition, change for the worse, deterioration, deformity, affection

( monier williams | 954)

– विक्रियमाणा इति पदस्य कोशगत: अर्थ: टीकाकाराणाम् अर्थम् युनक्ति ।

– विकार: इत्यर्थ: ''य: घटक: कस्मादपि अन्यस्मात् घटकात् उत्पन्न:''।

उदाहरणार्थम् दधि दुग्धस्य विकृति: अस्ति ।

– कारणात् कार्योत्पत्ति: । तदा कारणं कार्यस्य प्रकृति: प्रत्युत कार्यं कारणस्य विकार: । विकृति: अस्ति । यदा प्रकृतित: तस्या: विकृति: उत्पद्यते तदा कारणस्य समानानि लक्षणानि कार्ये सन्ति

एव परं कारणे रुपान्तरं वा अवस्थान्तरं उत्पद्य कार्ये कानिचन भिन्नानि गुणलक्षणानि अपि उत्पद्यन्ते । उदाहरणार्थम्

शीतं द्रवं स्निग्धम् – दुग्धम्
↓
पिच्छिलं गुरु शीतं स्निग्धं अभिष्यन्दि – दधि
↓
रुक्षं शीतं, लघु अनभिष्यन्दि – तक्रम्

– एवम्

प्रकृति: (कारणम्)
अवस्थान्तरम् ↓ रुपान्तरम्
विकार: (कार्यम्)

ईदृशी उत्पत्तिप्रक्रिया भवति ।

४) चक्रपाणिना 'रुपान्तरमापद्यमाना', योगीन्द्रनाथसेनेन 'अवस्थान्तरमापद्यमाना', गङ्गाधरेण विकृतिमापद्यमाना तथा ज्योतिषचन्द्रसरस्वतिना विकृतिं प्राप्य कार्योत्पत्ति: भवति इति वर्णितम् ।

५) एतद् सर्वेषां टीकाकाराणां विवेचनं योग्यम् ।

निष्कर्ष:

१) शब्दार्थश: वैधर्म्यं भाति परं एते एकस्या: एव कार्यप्रक्रियाया: विभिन्ना: दृष्टिकोणा: सन्ति ।

२) अभिप्रेतार्थे वैधर्म्यं नास्ति ।

(१२) सन्दर्भ: – च. वि. ८/९६

मूलं सूत्रम् – श्लेष्मा हि ------- स्त्यैमित्यादशीघ्रारम्भक्षोभविकारा: ।

अधिकरणम् – दशविधपरीक्ष्यभावस्य प्रकृतित: परीक्षेत इति उपाधिकरणे श्लेष्मल मनुष्यस्य दोषलक्षणानां परीक्षणम् अस्मिन सूत्रे करोति ।

वैधर्म्यम् – अस्मिन् सूत्रस्थस्य क्षोभ इति पदस्य व्याख्यायां शब्दार्थश: वैधर्म्यं दृश्यते ।

टीका

| | |
|---|---|
| चक्रपाणि: | – टीका नास्ति । |
| गङ्गाधर: | – क्षोभो मनसोऽकस्मात् क्षुब्धता । |
| योगीन्द्रनाथसेन: | – क्षोभ: मनस: क्षुब्धता । |
| ज्योतिषचन्द्रसरस्वति: | – क्षोभ: चित्तचाञ्चल्यम् । |

विवेचनम्

१) चक्रपाणि: अत्र क्षोभ: पदस्य व्याख्यां न करोति । गङ्गाधर: योगीन्द्रनाथसेन: च एतौ क्षोभ: अस्य अर्थं मनस: क्षुब्धता इति कुरुत: । उत ज्योतिषचन्द्रसरस्वतिना चित्तचाञ्चल्यम् इति कृत: ।

२) क्षोभ: पदस्य व्याकरणं तथा कोशस्थ: सन्दर्भ:

– क्षोभ: – पुं क्षुभ् + भावे घञ् । क्षुभ् धातु: सञ्चलने । चित्तचाञ्चल्यम् । परीवाह सेतुभेदे ।

(शब्दकल्पद्रुम: /खण्ड: २)

– पुं क्षुभ् – घञ् । सञ्चलने । विकारे । (वाचस्पत्यम् / खण्ड: ३/२४१०)

– to shake, tremble, to agitated or disturbed , to unsteady, stumble, tossing, emotion an emotion that is the cause of any harsh speeches or reproaches.

(monier williams/ 331)

३) चरक संहितायां क्षोभ: पदं विविधै: अर्थै: विविधेषु स्थानेषु योजितम् । तत् अधोक्तवत् –

– मन्थनम् – विनिर्मथ्येति शोणितमेव क्षोभयित्वा । चक्र च. सि. ९।७८

– विकृति: – वातक्षोभ: । च. सि. १।४८

– रथक्षोभ: । च. सि. १२।१४

– निरूहजनितवातक्षोभयुक्तपुरुषविषयम् । चक्र. च. सि. १।२०

– उपनाह योग्य गुल्मलक्षणम् । च. चि. ५/४१

– रथक्षोभात् सर्वदेहपीडा । चक्र च. सि. १२/११

– यानक्लान्तस्य क्षोभव्यापन्न: । च. सि. २/१५

– वातजकास लक्षणम् । च. चि. १८/१२

– गर्भस्त्रावहेतु: । च. शा. ८/२४

– कफजगुल्म हेतु: । च. नि. ३/१०

– पञ्चकर्मप्रवृत्तिक्षोभजन्यवातजयार्थ । चक्र च. सू. २/१५

– क्षोभात् क्षते। अश्मरीजन्य मूत्रमार्गक्षत । च. चि. २६/३९

– तृष्णा हेतु: । च. चि. २२/४

– प्रधानशुद्धे भूरिदोषगमनक्षोभात् अग्निमान्द्यं सम्भवति ।

चक्रपाणि: च. सि. १/११

– सञ्चलनम् – उदकपूर्णदृतिसंक्षोभसंस्पर्शत्वम् । च.चि. १३/४९

– तैलपात्रसङ्क्षोभयताऽन्तर्वत्नी । च. शा. ८/२२

– प्रमाथि – प्रमाथित्वात् क्षोभकारित्वात् । चक्र च. चि. १३/१८०

– मानसक्षोभ: – मद्येन मनसश्चास्य सङ्क्षोभ: क्रियते महान् । च.चि.२४/५३

– मनो विक्षोभयञ्जन्तो सञ्ज्ञां सम्मोहयेत्तदा । च. सू. २४/२८

–वर्तका अकस्मादुत्पतन्त: क्षोभं मनसो जनयन्तीति लोकप्रसिद्धम् । चक्र च. सू. ३०/७८

– इच्छाविघात: च मन: क्षोभकरभयादिवद् वातप्रकोपको भवति । चक्र च. शा. ४/१९

उपरितनात् सर्वस्मात् विवेचनात् इति स्पष्टं भवति यत् क्षुब्धता चाञ्चल्यं च एकस्या: एव मनोप्रवृत्या: विशेषणे स्त: । अत: टीकाकारेषु अपि शब्दश: वैधर्म्यं दृश्यते तथापि अभिप्रेतार्थे वैधर्म्यं नास्ति ।

निष्कर्ष: – शब्दश: वैधर्म्यं दृश्यते ।

परन्तु पदार्थ: अधिकरणम् ऊहयं तन्त्रयुक्ते: आधारेण अभिप्रेतार्थे वैधर्म्यं नास्ति । वैधर्म्यं नास्ति ।

(१३) सन्दर्भ: – च. वि. ८/८९

मूलं सूत्रम् – कार्यं धातुसाम्यं – सर्वाकारैर्मनोबुध्दीन्द्रियाणां चाव्यापत्तिरिति ।

अधिकरणम्

आयुर्वेदशास्त्रस्य अनुषंगेण दशविधपरीक्षा: वर्णयता कार्ययोने: वर्णनम् अस्मिन् सूत्रे कृतम्

वैधर्म्यम् – 'अव्यापत्ति:' इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – अव्यापत्ति: सम्पत् ।

योगीन्द्रनाथसेन: – अव्यापत्ति: अव्यापत् सुखम् ।

ज्योतिषचन्द्रसरस्वति:– अव्यापत्ति: यथावद् विषयग्रहणे सामर्थ्यम् ।

विवेचनम्

१) व्यापत्ति:– Ruin, calamity, misfortune, substitution of one thing to another, Death.

(आपटे शब्दकोश:/५४०)

वि + आ + पद् – Falling into calamity or misfortune, suffering injury, failure, loss, ruin, death, disappearance, substitution

(Monier williams / 1037)

२) आयुर्वेदे व्यापत्ति: इति पदं विकृतिवाचकेन अर्थेन योजितम् ।

अ) स्नेहव्यापत्तिभेषजम् । च. सू. १३/७८

आ) घृतव्यापत्तिप्रशमन । च. सू. २/३०

इ) गर्भकराणां भावानां व्यापत्तिनिमित्तमस्या जन्म भवति । च. शा. ४/२८

उ) मद्यव्यापत्तिजन्यै: विकारै: ............. । चक्रपाणि: च. चि. २४/२०६

३) व्यापत्ति: इत्यस्य अर्थ: विकार: दु:खं विकारकर: हेतु: इत्यस्ति प्रत्युत अव्यापत्ति इत्यस्य अर्थ: सुखं, स्वास्थ्यं स्वास्थ्यकर: हेतु: इति भवेत् ।

न व्यापत्ति: अव्यापत्ति: । इति विपर्ययेण एष: अर्थ: भवेत् ।

– अत: गङ्गाधरस्य सम्पत् तथा योगीन्द्रनाथसेनस्य सुखम् इति अर्थौ युक्तियुक्तौ ।

४) ज्योतिषचन्द्रसरस्वतिना ‘यथावद् विषयग्रहणे सामर्थ्यम्’ इति अर्थः कृतः । विषयग्रहणकार्ये मनसः प्राकृतं कार्यम् इदमपि सुखस्वरुपस्य स्वास्थ्यस्य लक्षणम् अस्ति ।

५) अस्मिन् विमानस्थानगते सन्दर्भे ‘धातुसाम्यम्’ इति कार्यस्य लक्षणस्वरुपं वर्णनं कृतम् । तस्मिन् ’सर्वाकारैर्मनोबुद्धीन्द्रियाणां चाव्यापत्तिः’ इति लक्षणं वर्णितम् ।

– अत्र अव्यापत्तिः इति पदं मनः बुद्धिः इन्द्रियाणि च एतेभ्यः सम्बन्धितम् अस्ति ।

– अतः ज्योतिषचन्द्रसरस्वतेः अर्थः योग्यः अस्ति ।

६) एवं अभिप्रेतार्थशः वैधर्म्यं नास्ति । सर्वैः टीकाकारैः कृताः टीकाः योग्याः ।

निष्कर्षः

१) वैधर्म्यं नास्ति ।

२) शब्दशः वैधर्म्यं दृश्यते परं अभिप्रेतार्थे वैधर्म्यं नास्ति ।

(१४) सन्दर्भ: – च. वि. ८ । ११९

मूलसूत्रम् – सत्वतश्चेति सत्वमुच्यते मन: । तच्छरीरस्य तन्त्रकमात्मसंयोगात् ।

अधिकरणम् – दशविधपरीक्ष्यभावेभ्य: सत्वत: परीक्ष्य भावस्य वर्णनम् अस्मिन् सूत्रे अस्ति ।

वैधर्म्यम् – अस्मिन् सूत्रे 'तन्त्रकम्' इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका –

| टीकाकार: | | टीका |
|---|---|---|
| चक्रपाणि: | – | तन्त्रकमिति प्रेरकं धारकं च। |
| गङ्गाधर: | – | तन्त्रकं नियामकम् । |
| योगीन्द्रनाथसेन: | – | तन्त्रकं प्रेरकम् ।<br>मन: आत्मना अधिष्ठितं हि इन्द्रियाणि यथास्वं विषयेषु प्रेरयति । |
| ज्योतिषचन्द्रसरस्वति: | – | तन्त्रकं परिचालकम् । |

विवेचनम् –

१) देशपरीक्षाया: अन्तर्गतं देश: इत्यस्यार्थेन आतुरपरीक्षा भूमिपरीक्षा च वर्णिते ।

तस्मिन् आतुरपरीक्षायां बलदोषप्रमाणज्ञानार्थं दशविधपरीक्ष्यभावा: वर्णिता: तस्मिन् सत्वत: परीक्षणम् एक: भाव: अस्ति ।

२) 'सत्व' नाम मन: । आतुरस्य बलदोषप्रमाणज्ञानार्थं तस्य मनस: अपि परीक्षणम् अत्यावश्यकम् तस्मात् दशविधपरीक्ष्यभावेषु सत्वत: परीक्षणस्य अन्तर्भाव: कृत: ।

३) बलभेदेन आतुरे सत्वं त्रिविधम् । तस्य परीक्षणीयानि लक्षणानि अपि अस्मिन् सूत्रे एव अग्रे वर्णितानि ।

४) तस्मिन्नेव 'सत्वं शरीरस्य तन्त्रकम् आत्मसंयोगात्' इति वर्णितं यस्य शब्दार्थ: अग्रिमवत् –

'मन: आत्मनासार्धं संयोगेन शरीरस्य तन्त्रकं भवति ।'

५) अस्मिन् द्वौ घटकौ चिन्तनीयौ स्त: ।

अ) मनस: आत्मनासार्धं संयोग:

आ) शरीरस्य तन्त्रक:

६) 'शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम् ।' (च. सू. १)

शरीरेन्द्रियसत्वात्मसंयोगानन्तरमेव आयुष:/जीवितस्य प्रारम्भ: भवति । आसंयोगमेव आयुष: अनुबन्ध: भवति । संयोगान्ते आयु: नश्यति ।

७) मन: वा आत्मा वा शरीरं च एते कदापि एकाकीन: कार्यं कर्तुं न शक्नुवन्ति । तेषां संयोग: एव कार्यमूलक: ।

८) तत्रापि विशेषत्वेन शरीरोत्पत्ते: प्राक् मन: आत्मा च सहकार्येण संयोगरुपी कार्यं कुर्वाणौ भवत:

'नित्यानुबन्धं मनसा देहकर्मानुपातिना । 'च. शा. १ । ८१

देहकर्मण: अनुसारेण आत्मन: मनसा नित्यानुबन्धं भवति । य: शरीरधारणाया: अपि प्राक् भवति । शरीरधारणानन्तरमपि शरीरस्थै: सर्वभावघटकेन्द्रियै: सह मनस: आत्मान: च संयोगं भूत्वा सर्वाणि कार्याणि प्रवर्तन्ते ।

९) भूतै: चतुर्भि: सहित: सुसूक्ष्मै: मनोजवै: । देहमुपैति देहात् । (च. शा. २/३१)

जीवात्मा एकं शरीरं त्यक्त्वा सुसूक्ष्मचतुर्भूतानां परमाणुभि: सह मनोजवेन मनस: संयोगेन च अग्रिमे देहे प्रविशति । पञ्चदशी नाम्नि ग्रन्थे पञ्चकोशानां वर्णनमस्ति । तत्रापि मनोमयकोशे एते सर्वघटका: वर्णिता: ।

१०) अचेतनं क्रियावच्च मनश्चेतयित्वा पर: ।

युक्तस्य मनसा तस्य निर्दिश्यन्ते विभो: क्रिया: ।। च. शा. १/७५

मन: अचेतनम् इति अस्ति परं क्रियावान् । अणुत्वम् एकत्वं च गुणाभ्यां तत् विविधा: क्रिया करोति । आत्मा तु विभु: तथैव चेतनावान् ।

अचेतनमनसा सह चेतनस्वरुपस्य आत्मन: संयोगं भूत्वा सर्वा: क्रिया: भवन्ति । आत्मा चेतनावान् तस्मात् सर्वासां क्रियाणां कर्ता ।

११) एवं मनसा: आत्मन: संयोग: सर्वा: क्रिया: करोति । शरीरस्थान् सर्वान् घटकान् प्रेरणा अपि आत्मस्थचेतनास्वरुपेण तथा मनस: कर्तुगुणेन प्राप्यते ।

–तस्मात् मनस: आत्मन: च संयोग: शरीरं तत्स्था: सर्वे भावघटका: क्रिया: वेदना: च एतेषां प्रेरक: अस्ति । एवं चक्रपाणि: योगीन्द्रनाथसेन: एताभ्यां स्वीकृत: तन्त्रकस्य प्रेरक: इति अर्थ: योग्य: ।

विशेषत: एतेन संयोगेनैव इन्द्रियाणि स्व – स्व – विषयांप्रति प्रेरिता: कार्यं कुर्वन्ति ।

(सन्दर्भ: – च.शा. १/१३८)

१२) एतेषां सर्वक्रियाणां नियन्त्रणम् अयोग्य–अहितकारकक्रियाभ्य: परावर्तनं शरीराय हितकरयोग्यक्रियां प्रति शरीरस्यघटकान् चोदयित्वा तासां क्रियाणां नियमनम् एतानि कार्याणि अपि मनस: आत्मन: संयोग: एव करोति । क्रियाणां व्याप्ति: आवश्यकतानुसारेण न्यूनाधिकं कृत्वा तस्मात् शरीररक्षणं तथा च शरीरे व्याधे: उत्पति: मा भूयात् इति कार्यम् अपि सत्वस्य आत्मन: संयोगेनैव भवति । तस्मात् गङ्गाधरेण कृत: ' नियामक: ' इत्यर्थ: अपि युक्तियुक्त: ।

१३) शरीरमनआत्मनाम् आसंयोगमेव आयुष: अनुबन्धं भवति । संयोगस्य समाप्त्यानन्तरम् आयु: नश्यति । तस्माद् शरीरं शरीरस्था: सर्वे भावपदार्था: क्रिया: च एतेषां धारणाकार्यमपि एतेन संयोगेनैव भवति ।

एवं चक्रपाणे: 'धारकम्' इत्यर्थ: अपि योग्य: ।

१४) शरीरम् एतस्य संयोगस्य अधिष्ठानम् अस्ति । कर्मफलेन प्रेरित: भूत्वा जीवात्मा फलं भोक्तुं तद्स्वरुपिणं शरीरं धारयति । एषा परम्परा प्रतिजन्म प्रवर्तते ।

एवम् एष: संयोग: परिचालक: इति कार्यं करोति इति ज्योतिषचन्द्रसरस्वते: अर्थ: अपि युक्तियुक्त: ।

१५) इत्थं चतुर्भि: टीकाकारै: 'तन्त्रकम्' इति पदस्य कृता व्याख्या योग्या अस्ति । तासु वैधर्म्यं नास्ति परन्तु संयोगेन घटमाना: विविधा: क्रिया: तस्या: तस्या: व्याख्याया: स्पष्टा: भवन्ति ।

निष्कर्ष: – १) टीकाकारेषु वैधर्म्यं नास्ति ।

२) सत्वम् आत्मन: संयोगेन शरीरतन्त्रणस्य कार्यं करोति । तस्य कार्यस्य विविधानि अङ्गानि चतुर्णां टीकाकाराणां वर्णनात् दृश्यन्ते ।

३) चतुर्णामपि टीकाकाराणां टीका: योग्या: ।

आ) वैधर्म्यम् अस्ति । एतेभ्य: वैधर्म्येभ्य: एक: विचार: अयोग्य: अव्याप्त: अस्ति उत अन्य: विचार: योग्य: ।

अस्य वैधर्म्यप्रकारे ०९ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भः – च.वि. ३/७ (१)

मूलं सूत्रम् – तत्र वातमेवंविधमनारोग्यकरं विद्यात् तद्यथा......अतिरुक्षमत्यभिष्यन्दिनम्...।

अधिकरणम् – जनपदोद्ध्वंसकरा: चत्वार: भावा: ये सर्वेषु जनपदेषु समाना: तेषां विगुणत्वस्य वर्णनम् । अस्मिन् सूत्रे वायो: वैगुण्यलक्षणानि वर्णितानि । तस्मिन् 'अत्यभिष्यन्दिनम्' इति लक्षणमस्ति ।

टीका चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – बहिर्द्रवाभिस्त्रावेण लक्ष्यम् ।

योगीन्द्रनाथसेन: – दोषधातुमलस्त्रोतसां क्लेदजननम् ।

ज्योतिषचन्द्रसरस्वति: – अतिवर्धितवेगम् ।

विवेचनम् – गङ्गाधरेण 'बहिर्द्रवाभिस्त्रावेण लक्ष्यम्' इति वर्णितम् । इत्यर्थ: ' अत्यभिष्यन्दिनम् ' एतद् लक्षणम् द्रवस्य बहि: अभिस्त्रावेन लक्षितव्यम् ।

– शरीरस्थानां द्रवांशानां बहि: स्त्रवणम् इत्येक: अर्थ: । तथैव बहिस्थस्य द्रवस्य अभिस्त्राव: इत्यपि एक: अर्थ: भवितुं शक्यम् ।

– योगीन्द्रनाथसेन: स्पष्टं करोति यत् सृष्टिगत: विकृत: वायु: शरीरस्थदोषधातुमलस्त्रोतस्सु क्लेदम् उत्पाद्यते एतस्मात् वायो: अत्यभिष्यन्दिनम् इति लक्षणं ज्ञातुं शक्यम् ।

– प्रत्युत ज्योतिषचन्द्रसरस्वतिना पूर्णत: भिन्नं विवेचनं कृतम् । 'अतिवर्धितवेगम्' इति ।

– वायो: वेगसम्बन्धिने लक्षणे अतिचलम् अतिकुण्डलिनम् च एते अपि अस्मिन् सूत्रे वर्णिते । अत: अतिवर्धितवेग: इति अर्थ: गृह्यते चेत् पुनरुक्ते: दोष: आपद्येत् ।अत: ज्योतिषचन्द्रसरस्वते: एतद् विवेचनं न भाति ।

निष्कर्ष: – गङ्गाधरस्य योगीन्द्रनाथसेनस्य च वर्णनं योग्यमस्ति उत ज्योतिषचन्द्रसरस्वते: व्याख्या अयोग्या भाति । गङ्गाधरस्य योगीन्द्रनाथसेनस्य च कृतं विवेचनं ग्राह्यं इति मतम् ।

(२) सन्दर्भः – च. वि. ५/८

मूलसूत्रम् – उदकवहानां स्त्रोतसां तालुमूलं क्लोमं च ।

अधिकरणम् – उदकवहास्य स्त्रोतस: मूलस्थानम् अस्मिन् सूत्रे वर्णितम् ।

वैधर्म्यम् – क्लोमं पदस्य विवेचने वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणि: – क्लोम हृदयस्थपिपासास्थानम् ।

गङ्गाधर: – क्लोम कण्ठोरसो: सन्धि: ।

योगीन्द्रनाथसेन: – क्लोम कालखण्डादधस्तात् स्थितं दक्षिणपार्श्वस्थं तिलकं प्रसिद्धम् । तच्च पिपासास्थानम् ।

ज्योतिषचन्द्रसरस्वति:– क्लोमा चामाशयस्य पृष्ठत: पृष्ठाभ्यन्तरभागे संसक्त: तिलसंज्ञ: । दक्षिणे पार्श्वेऽस्य शिरोभाग: स्थूलतम: अन्तर्नाभ्या वेष्टित आस्ते । अयं दक्षिणपार्श्वात् वामपार्श्वस्थं प्लीहानं यावत् प्रसार्य तिर्यग भूय वर्तते । आयामत: प्राय: दशांगुलमित: प्रस्थतश्च प्राय: त्रिचतुरंगुलमित: । अस्य विशेषतो विवृत्ति: मदीये 'शारीरविनिश्चये' कोष्ठाङ्गविनिश्चयाध्याये द्रष्टव्या ।

विवेचनम् –

१) क्लोमम् इति शारीरअवयवविषये नैकवर्षत: विद्वत्सु मतभेदा: सन्ति । विविधै: अभ्यासकै: विविधा: विचारा: प्रकटीकृता । अस्य सूत्रस्य व्याख्यायाम् अपि टीकाकारेषु वैधर्म्यं दृश्यते ।

२) तस्मिन् अपि योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च अनयो: विवेचनयो: बहुतिथं साधर्म्यम् अस्ति । गङ्गाधररायेण भिन्नं विवरणं कृतम् प्रत्युत चक्रपाणिना यथावत् गूढशब्दान् उपयुज्य संदिग्धता तथैव स्थापिता ।

३) निश्चितात् निष्कर्षात् पूर्वं सर्वेषां टीकाकाराणां विवेचनं विस्तारेण पश्याम ।

४) चक्रपाणि: –

चक्रपाणिना अधिकं विवेचनं न कृत्वा हृदयस्थं पिपासास्थानं नाम क्लोमम् इति व्याख्या कृता । चक्रपाणिना अन्यत्र अपि क्लोमसन्दर्भे विशेषविवेचनं न कृतम् ।

१) क्लोमं पिपासास्थानम् ।      च. शा. ७/ १०

२) क्लोमं हृदयावयवविशेष: ।    च. चि. १३ /४५

तदा चक्रपाणे: सर्ववर्णनानुसारं क्लोमम् इति हृदयप्रदेशस्थ: अवयव: अस्ति तथा तद् पिपासास्थानम् अस्ति ।

गङ्गाधर: – अत्रभवता क्लोमस्य व्याख्या कण्ठ: उर: च एतयो: सन्धि: एवं कृता ।

– गङ्गाधरेण च. सू. १७।१०१ तथा च. चि. १३।४५ एतयो: द्वयो: स्थानयो: क्लोमस्य व्याख्या कण्ठोरयो: सन्धिरुपं स्थानम् एव कृता अस्ति ।

– किंन्तु च. शा. ७।१० अत्र क्लोमम् इति पदेन फुप्फुस: तथा उण्डुक: एतयो: अभिप्राय: गृह्णीयात् एवं वर्णितम् ।

– परं एता: सर्वा: व्याख्या: सुस्पष्टं न बोधयन्ति ।

६) योगीन्द्रनाथसेन:

– अत्रभवता 'कालखण्डस्य अध: प्रदेशे दक्षिणपार्श्वे स्थितं तिलकनामकम् अवयवं क्लोमं वदन्ति एवं व्याख्या कृता । एषा एव व्याख्या शब्दश: च. सू. १७ । १०१ इत्यत्र व्याख्यायाम् अपि योगीन्द्रनाथसेनेन उद्धृता ।

– डल्हणस्य व्याख्यायां सु. नि. ९ । १८ अत्र एषैव व्याख्या शब्दश: आगता ।

– कालदृष्ट्या डल्हण: योगीन्द्रनाथसेनस्य पूर्वतन: अस्ति । तदा योगीन्द्रनाथसेनेन क्लोमस्य एषा व्याख्या शब्दश: डल्हणटीकाया: गृहीता एतद् स्पष्टं भवति ।

७) ज्योतिषचन्द्रसरस्वति:

– ज्योतिषचन्द्रसरस्वतिना केवलं बहुविस्तृतं वर्णनं कृतमस्ति ।

– अस्मात् विवेचनात् ज्योतिषचन्द्रसरस्वते: शारीरविषयस्य अभ्यास: प्रतीत: भवति ।

– अत्रभवता स्वयंलिखितं 'शारीरविनिश्चय:' इति पुस्तकं अस्यां व्याख्यायाम् उल्लेखितम् ।

– ज्योतिषचन्द्रसरस्वतिना क्लोमस्य व्याख्या: अधिष्ठानं परिमाणं तथा कार्यं एतेषां वर्णनं कृतमस्ति । एतद् वर्णनं अग्रिमानुसारम् –

क्लोमं नाम आमाशयस्य पृष्ठत: पृष्ठस्य अन्तर्भागं संसक्तं 'तिल:' नाम अवयव: । अस्य

स्थूलशिरोभाग: दक्षिणपार्श्वभागे नाभे: प्रदेशे वेष्टीत: अस्ति । एष: अवयव: दक्षिणपार्श्वप्रदेशत: वामपार्श्वस्य प्लीहापर्यन्तं प्रसारित: सन् वक्रमार्गेण अवस्थित: अस्ति । अस्य आयाम: १० अङ्गुलानि तथा विस्तार: ३४ अङ्गुलानि इयत् अस्ति ।

८) ज्योतिषचन्द्रसरस्वते: टीकाया: एतद् वर्णनं ( पैन्क्रियाझ ) Pancreas इति अवयवस्य अस्ति इति स्पष्टं भवति ।

९) एवं प्रकारे टीकाकाराणां वर्णनं कृत्वा क्लोमसन्दर्भेण विचार: करवाम ।

क्लोमे उपलब्धानां सर्वेषां सन्दर्भाणां विचार: अग्रिमानुसारम्

– चरक: वाग्भट: भेल: तथा काश्यप: एतै: क्लोमं 'कोष्ठाङ्गम्' अस्ति इति स्पष्टीकृतम् अस्ति ।

– अस्मात् गङ्गाधरस्य 'कण्ठोरसो सन्धि:' तथा चक्रपाणिना 'हृदयस्थ:' इति विचारौ अस्वीकरणीयौ स्त: ।

– क्लोमं अन्तराधिकोष्ठगतं वा एकम् अङ्गं स्यात् इति सर्वप्रथमं स्पष्टं भवति ।

– स्त्रोत: कोष्ठाङ्गं च एते द्वे एकम् इति अशक्यम् । एतौ विभिन्नौ: शारीरभावौ तर्हि आमाशय: अग्न्याशय: स्थूलान्त्रम् इत्यादय: महास्त्रोतस: कोष्ठगता: अंशा: अपि क्लोमात् विभिन्ना निश्चिन्वन्ति

– येन गङ्गाधरेण च. शा. ७।७ मध्ये कृता 'उण्डुक: वा फुप्फुस:' एषा क्लोमस्य व्याख्यापि अस्वीकरणीया भवति ।

– 'हृदयं पुन: श्लेष्मरक्तप्रसादात् सम्भवति.......तस्य वामपार्श्वे प्लीहा फुप्फुसाश्च । दक्षिणतो यकृत् क्लोम च' । अ. सं. शा. ५।७१

– 'तस्याधो वामत: प्लीहा फुप्फुसश्च दक्षिणतो यकृत्क्लोम च ।' सु. शा. ४।३०

एतेषां वचनानामनुसारं हृदयस्य अधोप्रदेशे दक्षिणपार्श्वप्रदेशे यकृत क्लोमं च एते अवयवे स्त: इति स्पष्टं भवति । अस्मिन् सूत्रे हृदयस्य अधोभागे वामपार्श्वस्य प्लीहा फुफ्फुसा: च सन्ति तथा दक्षिणपार्श्वे यकृत् क्लोमं च स्त: इति वर्णनतस्ति ।

–तर्हि फुफ्फुस: प्लीहा यकृत् क्लोमं च एते परस्पराणां भिन्ना: अवयवा: सन्ति एतद् सिद्धं भवति ।

– तर्हि पुन: अस्मिन् सूत्रानुसारेण फुफ्फुस: नाम क्लोमम् इति गङ्गाधरस्य व्याख्या अस्वीकरणीया भवति ।

– 'यस्तु शोणितजः किट्टस्तस्मात्क्लोम च जायते ।' सु. नि. ९/२२

क्लोमः शोणितजः किट्टात् उत्पद्यते ।

– क्लोमः उदकवहस्त्रोतसः मूलस्थानम् ।

– 'इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।

यकृत्क्लोमानं वरुणो भिषज्यन्नतस्ने वायव्यैर्न भिनाति पित्तम् ।। (वाजसनेयसंहिता १९/८५)

– वाजसनेयस्य संहितायां वरुणदेवतायै यकृत् क्लोमं पित्तस्थानं च एतेषां निर्माता मन्यते ।

अनेन सन्दर्भेण द्वौ निष्कर्षौ शक्यौ ।

– वरुणः जलस्य देवता अस्ति । तेन क्लोमं तथा शारीरजलं (क्लेदम्) एतयोः सम्बन्धः अस्ति ।

– यकृत् तथा पित्ताशयः एते क्लोमात् भिन्ने किन्तु तयोः निश्चितेन सम्बन्धः अस्ति ।

– 'हृदयात्ते परिक्लोम्नो हलीक्ष्णात्पार्श्वाभ्याम् ।

यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते विवृहामसि । (अथर्ववेदः)

– वैदिककाले क्लोमस्य पर्याप्तं ज्ञानम् आसीन् तथा तत्सम्बन्धेन संदिग्धता नासीत् ।

– तृष्णायाः उत्पत्तौ क्लोमस्य उल्लेखः ग्रन्थकारैः कृतः ।

रसवाहिनाश्च नालीं जिव्हामूलगलतालुक्लोम्नः ।

संशोष्य नृणां देहे कुरुस्तृष्णां महाबलावेतौ ।। च. चि. २२/६

एतद् अपि शरीरस्थस्य उदकस्य तथा क्लोमस्य सन्दर्भः स्पष्टीकरोति ।

– क्लोमे आभ्यन्तरविद्रधिः भवति एवं वर्णनम् अस्ति तथा तस्य लक्षणं 'वारंवार पिपासाभावना' इति अस्ति ।

– क्लोमस्य सन्दर्भः तृष्णारोगः सम्प्राप्तिः आभ्यन्तरविद्रधिः उदकवहस्त्रोतोदृष्टिः च एतेषु तिष्ठति ।

– क्लोमम् इति फुफ्फुसः यकृत् प्लीहा महास्त्रोतः पित्ताशयम् एतेभ्यः भिन्नं कोष्ठाङ्गम् अस्ति ।

– डल्हणेन तस्य वर्णनं 'कालखण्डस्य अधःप्रदेशे दक्षिणपार्श्वे स्थितं तिलकं नाम अवयवः' एवं कृतमस्ति ।

– एवं प्रकरेण क्लोमस्य सर्वं वर्णनं 'पॅन्क्रियाज्' अवयवं युज्यते ।

– तदा ज्योतिषचन्द्रसरस्वतिना कृतं विवेचनम् अधिकं योग्यतरं भाति ।

निष्कर्ष: –

१) टीकाकारेषु वैधर्म्यं अस्ति । क्लोमविषये सर्वेषां सन्दर्भाणाम् ऊहापोहं कुर्वता एवं निष्पद्यते यद् योगेन्द्रनाथसेनेन ज्योतिषचन्द्रसरस्वतिना च कृतं विवेचनं अधिकं योग्यतरम् अस्ति ।

२) चक्रपाणिना कृते वर्णने क्लोमं पिपासास्थानम् अस्ति इति विचार: सर्वै: ग्रन्थकारै: टीकाकारै: च वर्णित: । तस्य सिद्धि: अपि तृष्णा सम्प्राप्ति: तथा आभ्यन्तरविद्रधि: सम्प्राप्ति: च एतेभ्य: ज्ञायते । किन्तु अत्रभवता क्लोमस्य स्थानं हृदयस्थम् इति वर्णितं तद् तु अन्ये सन्दर्भा: तथा तन्त्रयुक्तय: आधारेण न सिद्धति ।

३) गङ्गाधरेण एकस्मिन् स्थाने कण्ठोरसो सन्धि: (च.वि. ५) तर्हि अन्यस्मिन् स्थाने फुफ्फुस: वा उण्डुक: (च.शा.७/१०) इति वर्णनं कृतमस्ति । तदा तस्मिन् विचारे एकवाक्यता न दृश्यते । तथैव त्रयोऽपि विचारा: क्लोमस्य सर्वांगीणसन्दर्भाणाम् ऊहनात् न सिध्यन्ति ।

४) योगेन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतयो: व्याख्ययो: एकसूत्रता अस्ति ।

तथैव तत्रभवन्तौ कालदृष्ट्या आधुनिकौ सन्तौ आधुनिकशरीरशास्त्रं तथा शवविच्छेदनं एतयो: विषयो: अभ्यास: तत्रभवतो: विवरणात् स्पष्टं भवति ।

५) तदा योगेन्द्रनाथसेनेन ज्योतिषचन्द्रसरस्वतिना क्लोमस्य कृतं विवरणं यथार्थं व अधिकं योग्यतरं भाति । एतद् विवरणं डल्हणेन अपि कृतम् तथा क्लोमस्य सर्वेषां सन्दर्भाणां विवरणं योग्यतया युज्यते ।

(३) सन्दर्भः – च वि ५/९

मूलं सूत्रम् – तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्च शरीरधातवः प्रकोपमापद्यन्ते ।

अधिकरणम् – स्त्रोतसां पर्यायः स्त्रोतसः दुष्टिविवेचनम् तथा दोषाणां दुष्टिकर्तृत्वं च एतेषां वर्णनम् अस्मिन् अधिकरणे कृतम् ।

वैधर्म्यम् – 'स्थानस्थाः' पदस्य व्याख्यायां टीकाकारेषु वैधर्म्यं दृश्यते ।

टीका

| | | | |
|---|---|---|---|
| चक्रपाणिः | – स्थानस्थाः | – | आशयस्थाः । |
| गङ्गाधरः | – स्थानस्थाः | – | स्वमानस्थाः । |
| योगीन्द्रनाथसेनः | – स्थानस्थाः | – | आशयस्थाः । |
| ज्योतिषचन्द्रसरस्वतिः | – स्थानस्थाः | – | क्षयं वृद्धिं वा नाप्नुवन्ताः । |

विवेचनम्

१) चक्रपाणिः योगीन्द्रनाथसेनः च स्थानस्थाः पदस्य अर्थं आशयस्थाः इति गृह्णीतः उत गङ्गाधरः स्वमानस्थाः इति गृह्णाति । ज्योतिषचन्द्रसरस्वतिः अधिकं विस्तारं कुर्वन् क्षीणं अथवा वृद्धं न भवत् इति स्वमानस्थाः स्वरुपात्मकः अर्थं गृह्णाति ।

२) ' स्थानम् ' इति पदम् आयुर्वेदे त्रीभिः अर्थैः योजितम् ।

अ) स्थानम् – प्रदेशः अवयवः स्त्रोतस् , मार्गः गात्रावयवः । उदा स्थानं वातस्य तत्राऽपि पक्वाधानं विशेषतः ।

आ) गतिः – क्षयं स्थानं वृद्धिश्च दोषाणां त्रिविधा गतिः ।

इ) प्राकृतावस्था – स्थानं इति स्वमानावस्थानम् । चक्रपाणिः च सू १७/ ११९

स्थानं इति दोषधातुमलसाम्येन अवस्थानम् । डल्हणः सु सू ४१/ १२

स्थानं इति न विमार्गगः । चक्रपाणिः च चि २८/४

३) अधिकरणानुसारं अस्य पदस्य योग्यः अर्थः निश्चेतव्यः तदनुसारं च वाक्ययोजना अर्थयोजना च करणीया ।

४) अस्य सूत्रस्य विचारे अत्र वाक्यशेष तन्त्रयुक्तेः उपयोगः आवश्यकः इति प्रतिभाति ।

५) वाक्यशेष: इत्यस्य अर्थ: सूत्रे स्पष्टतया अवर्णित: विषयांश: अव्ययस्य उपस्थित्यनुसारं तत्र योग्य: भवेत् चेत् गृहीतव्य: । उदा. 'अत्र सभागृहे केचन पुरुषा: सन्ति'। अस्य वाक्यस्य वाक्यशेष: एवं भवति यत् '' अत्र सभागृहे काश्चन् नार्य्य: अपि सन्ति ।''

– वाक्ये यत्र कानिचित् यस्मात् तस्मात् , यदा – तदा – अपि , च एतानि पदानि उपयुज्यन्ते तत्र प्राय: वाक्यशेष तन्त्रयुक्ते: उपयोग: आवश्यक: भवति ।

– च. वि. ५ । ९ इत्यस्य सूत्रं अधोल्लिखितम् ।

'' तेषां प्रकोपात् स्थानस्था: च एव मार्गगा: च शरीरधातव: प्रकोपमापद्यन्ते ।

– अस्मिन् सूत्रे द्विवारं 'च' उपयोगिता: ।

' स्थानस्था: च एव मार्गगा: च ।'

– अत्र वाक्यशेष तन्त्रयुक्ति: स्वीकृता चेत् पदश: अर्थ: अग्रिमवत् निष्पद्यते ।

'स्थानस्था: च अस्थानस्था: च एव मार्गगा: च अमार्गगा: च ' ।

६) यदि एक: एव 'च' उपयोजित: स्यात् चेत् 'यथा–स्थानस्था: च मार्गगा: एव ।' तर्हि अमार्गगा: धातुघटका: नाम स्व–आशयस्था: धातुघटका: एष: स्थानस्थस्य अर्थ: युक्तियुक्त: अभविष्यत् ।

७) परं द्वाभ्यां पदाभ्यां चकारस्य योजनया द्वाभ्याम् अपि वाक्यशेषं कृत्वा अर्थ: ग्राह्य: भवति । प्रथमं 'मार्गगा: च' इत्यस्य विवेचनं कुर्म: ।

८) 'मार्गगा: च' –

– इमं वाक्यशेषं योजयेत् चेत ' मार्गगा: च अमार्गगा: च । इति वाक्यं प्राप्यते ।

–'मार्गेन गच्छन्त:' इति अर्थ: मार्गग: अस्य भवति । तदा एवं न सन्त: धातुघटका: एतं वाक्यशेषं भवेत् । ये मार्गेण न गच्छन्ति इत्यस्य अर्थ: यें एकस्मिन् स्थाने स्थिता: । आशये स्थिता: । विमार्गग: सन्ति । अन्यमार्गेण गच्छन्त: सन्ति । सङ्ग: इति अवस्थां प्राप्नोति इति भवति ।

अत: अमार्गग: इत्यस्य अर्थ: – सङ्गावस्थां प्राप्त: ।

– विमार्गग: ।

– आशयस्थ: ।

– अवरुद्ध: ।

एवं आशयस्थ: इति पदं मार्गग: पदस्य वाक्यशेषं इति निष्पन्नम् ।

९) ‘ स्थानस्था: च’ –

इमं वाक्यशेषं योजितं स्यात् ‘ स्थानस्था: च अस्थानस्था: च ’ । इति वाक्यं प्राप्यते ।

– ‘स्थानम्’ पदेन ‘प्रदेश: गात्रावयव: गति: साम्यावस्था प्राकृतावस्था स्वमानस्थ: इति विविधा: अर्था: वयं दृष्टवन्त: ।

– अस्य आधारेण अस्थानस्थ: इत्यस्य अर्थ: अधोक्तवत् कर्तुं शक्यम् ।

अस्थानस्था:

वृद्ध:

क्षीण:

विकृतावस्था

साम्यावस्था नष्टा:

स्व – आशये । स्व – स्त्रोतसि । स्वप्रदेशे न स्थिता: ।

१०) उपरितनात् सर्वस्मात् विवेचनात् वाक्यशेष: पदार्थ: च अधिकरणं तन्त्रयुक्त्यनुसारं अग्रिमान् निष्कर्षान् ग्रहीतुं शक्यम् ।

निष्कर्ष: –

१)चक्रपाणि: योगीन्द्रनाथसेन: च एतयो: आशयस्था: इति टीका अव्याप्ता तथा अयुक्तियुक्ता भाति

२) वाक्यशेषतन्त्रयुक्ते: उपयोग: कृत: चेत् वाक्यस्य गर्भितार्थं निष्पद्यते ।

३) गङ्गाधरस्य ‘स्वमानस्था:’ तथा ज्योतिषचन्द्रसरस्वते: ‘न वृद्धा: न क्षीणा:’ एषा टीका तन्त्रयुक्त्यानुसारं अधिकं संयुक्तिक: भाति ।

(४)सन्दर्भः – च. वि. ५ / २३

मूलं सूत्रम् – आहारश्च विहारश्च य स्यात् दोषगुणैः समः ।

धातुभिः विगुणश्चापि स्त्रोतसां स प्रदूषकः ।।

अधिकरणम् – स्त्रोतसां सामान्य दुष्टिहेतवः अस्मिन् सूत्रे वर्णिताः ।

वैधर्म्यं पाठभेदः च ।

पाठभेदः – चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः योगीन्द्रनाथसेनः च एतैः 'धातुभिः विगुणः' इति पाठः गृहीतः उत गङ्गाधरेण 'ऋतुभिः विगुणः' इति पाठः स्वीकृतः ।

वैधर्म्यम् –

'धातुभिः विगुणः' इति पाठे चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः एतयोः टीकायां तथा योगीन्द्रनाथ सेनस्य टीकायां वैधर्म्यं दृश्यते अत्र पाठभेदानां विवेचनं न कृत्वा ' धातुभिः विगुणः ' इति पाठगते वैधर्म्यविषये ऊहापोहं कुर्मः ।

| टीकाकारः | टीका |
|---|---|
| चक्रपाणिः | – धातुभिर्विगुण इति धातुविरोधकस्वभाव इत्यर्थः न धातुविपरीतगुणो विगुणः दिवास्वप्नमेद्यादयो हि मेदसा समानगुणा एव मेदोदूषका उक्ताः । |
| योगीन्द्रनाथसेनः | – धातुभिर्विगुणः विपरीतगुणाः । |
| ज्योतिषचन्द्रसरस्वतिः | – धातुभिर्विगुण इति तत्तत् स्त्रोतोवाह्यधातुवैगुण्यकारक इत्यर्थः । न तु विपरीतगुणः मेद्यस्यापि मेदोवहस्त्रोतोदुष्टिकारकत्वात् । |

विवेचनम्

१) चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः च एताभ्यां 'विगुणः' पदस्य अर्थः 'विपरीतः' इति न ग्राह्यः अपि तु 'विरोधकः' ग्राह्यः इति कथितम् । प्रत्युत योगीन्द्रनाथसेनेन अधिकं विवेचनं न कृत्वा 'विपरीतः' अर्थः गृहीतः ।

२) 'विगुणः' पदस्य अर्थः व्याकरणानुसारं 'विपरीतः' अस्ति । तथापि 'विगुणः' एषा आयुर्वेदशास्त्रस्था स्वसंज्ञा अस्ति ।

अतः पदार्थः अधिकरणं स्वसंज्ञा च एतासां तन्त्रयुक्त्याधारेण अस्य अर्थनिश्चितिः करणीया भवेत् ।

३) योगीन्द्रनाथसेनेन धातूनां गुणानां विपरीतगुणानाम् आहारविहारौ इति अर्थ: गृहीत: । परं चक्रपाणि: ज्योतिषचन्द्रसरस्वति: च एतौ एवम् अर्थं न स्वीकुरुत: । तौ 'विरुद्ध:' संकल्पना अत्र विचारिता ।

चक्रपाणि: एवं विवेचनं करोति यत् धातुभि: विगुण: नाम धातुविरोधकस्वभाव: इति अर्थ: योग्य: । धातुविपरीतस्वभाव: इति अर्थ न योग्य: । उदाहरणार्थं दिवास्वप्नं मेद्य: आहार: च एते हेतव: मेदस्य समानगुणा: सन्ति तथापि ते मेदोदुष्टिं कुर्वन्ति ।

प्रत्युत ज्योतिषचन्द्रसरस्वति: एवमेव चक्रपाणिमतम् अन्यसृत्य विवेचनं करोति । तस्य मतेन स्त्रोतोभ्य: वाह्यमानानां धातूनां वैगुण्यकारका: हेतव: 'धातुर्विगुण:' अस्ति । तेन अपि मेदोदुष्टे: एव उदाहरणं चक्रपाणिसमानं दत्तम् ।

४) अत्र प्रथमं 'विरुद्ध संकल्पना' विचारणीया । एषा एका विशेषा स्वशास्त्रीया संकल्पना अस्ति । केवलं कस्यापि भावपदार्थस्य साक्षात् विपरीत गुण: इति विरुद्ध: इत्यस्य अर्थ: नास्ति । अस्मिन् विषये अतीतावेक्षणम् अनागतावेक्षणम् अनुमतम् अतिदेश: स्वसंज्ञा पदार्थ: च एतासां तन्त्रयुक्ते: साहाय्येन विवेचनं कुर्म: ।

' तरतमयोगयुक्ताश्च.......।' सु. सू. २० । १३

भावपदार्थानां गुणा: तरतमत्वेन तिसृषु अवस्थासु सन्ति । उदा. स्निग्ध: स्निग्धतर: स्निग्धतम: , लघु: लघुतर: लघुतम: एवं सर्वेषां गुणविषये ज्ञातव्यम् । एतेषु तरयुक्तान् तमयुक्तान् च गुणान् बलवन्त गुणा: इति वदन्ति ।

बलीनां मिथोगुणां विषमतया समतयाप्युभयथापि ।

संस्कारादिवशादपि भवति निसर्गादपि विरोध: ।। अष्टाङ्गसङ्ग्रह: सूत्रं ९ / १८

बलीनां नाम भावपदार्थगता: ये गुणा: तरत्वेन तमत्वेन च युक्ता: इति । एवं ययो: द्वयो: द्रव्ययो: बलवन्त: गुणा: परस्पराणां समाना: वा विपरीता: सन्ति ते द्वे द्रव्ये परस्पराणां विरुद्धे स्त: । एते बलवन्त: गुणा: निसर्गत: सन्ति अथवा संयोगेन वा संस्कारेण वा उत्पद्यन्ते । उदा.–

(१) दुग्धं मत्स्या: च द्वे अपि द्रव्ये मधुरतरे मधुरविपाकिनी दुग्धं शीतवीर्यस्य तथा मत्स्या: उष्णवीर्यस्य एवं बलवतां विपरीतगुणानां सन्ति । अत: ते परस्पराणां विरुद्धा: सन्ति ।

(२)शीते ऋतौ हिमस्य अतिशीतजलसेवनं विरुद्धम् अस्ति । एवं विरुद्धः नाम विपरीतः इति अर्थः नास्ति उत बलवतां समानां समानानां विपरीतानां गुणानां नाम विरुद्धः । एषा एव संकल्पना चरकसूत्रस्थानस्य षड्विंशे अध्याये चरकाचार्येण सविस्तरं वर्णिता ।

देहधातुप्रत्यनीकभूतानि द्रव्याणि देहधातुभिः विरोधमापद्यन्ते परस्परगुणविरुद्धानि कानिचित् संयोगात् संस्कारात् अपराणि देशकालमात्राभिश्चापराणि तथा स्वभावादपराणि ।।'

च. सू. २६/ ८१

अस्मिन् सूत्रे वाक्यशेषतन्त्रयुक्तिं उपयुज्य 'कानिचित् परस्परगुणविरुद्धानि कानिचित् परस्परगुणसमानानि' इति अन्वयार्थं करणीयः भवति ।

अयमेव अर्थः 'धातुभिः विगुणः' इत्यत्र गृहीतः । धातूनां विपरीतगुणानाम् आहारविहारौ इयान्तं सीमितं अर्थं न गृहीत्वा 'धातूनां समानैः अथवा विपरीतैः गुणैः धातुषु वैगुण्यम् उत्पद्यमानः आहारः' इति अनुक्तार्थः निष्पादनीयः भवति । एतदेव चक्रपाणेः तथा ज्योतिषचन्द्रसरस्वतेः अभिप्रेतम् अस्ति । तत्रभवद्भ्यां दत्तैः उदाहरणैः अपि एतदेव स्पष्टीभवति ।

दिवास्वप्नं मेद्याहारः च मेदस्य समानगुणयोः सन्तौ अपि मेददूषकौ । अतः ' विगुणः ' इत्यस्य अर्थः दुष्टकरः इति स्पष्टं भवति ।

निष्कर्षः

१) ज्योतिषचन्द्रसरस्वतिः तथा चक्रपाणिः च एतयोः टीका तथा तस्याः निष्पद्यमानः अर्थः अधिकः युक्तियुक्तः भाति ।

२) योगीन्द्रनाथसेनस्य ' विपरीतगुणः विगुणः ' एषा टीका अव्याप्ता भाति ।

(५) सन्दर्भः – च. वि. ५/ २३

मूलं सूत्रम् – आहारश्च विहारश्च यः स्याद् दोषगुणैः समः ।

धातुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषकः ।।

अधिकरणम् – स्त्रोतसां दुष्टिहेतवः लक्षणानि वर्णयित्वा पश्चात् स्त्रोतसां सामान्यदुष्टिहेतवः वर्णिताः ।

वैधर्म्यम् – गङ्गाधरेण उक्तम् एतानि वातादिवहस्त्रोतांसि दुष्टिहेतवः सन्ति प्रत्युत चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः योगीन्द्रनाथसेनः च एते वदन्ति यत् एते सामान्यस्त्रोतोदुष्टिहेतवः सन्ति ।

टीका

चक्रपाणिः – आहारश्चेत्यादिना सामान्येन सर्वस्त्रोतोदुष्टिमाह ।

गङ्गाधरः – स्त्रोतसामिति दोषवहाणां स आहारो विहारश्च ।

योगीन्द्रनाथसेनः –प्राणादिवहस्त्रोतसां एकैकस्य प्रकोपहेतुं उक्त्वा सर्वेषां सामान्यतः प्रकोपणमाह ।

ज्योतिषचन्द्रसरस्वतिः – पृथक् पृथक् स्त्रोतोदुष्टिनिदानं निवेद्य सामान्यतः सर्वस्त्रोतोदुष्टिनिदानमाह आहारश्चेति ।

विवेचनम्

१) चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतैः एतद् सूत्रं सामान्यस्त्रोतोदुष्टिहेतोः अस्ति इति वर्णितम् । प्रत्युत गङ्गाधरेण दोषवहानां स्त्रोतसां दुष्टिहेतवः सन्ति इति वर्णितम् ।

२)चरकाचार्येण विमानस्थानस्य पञ्चमे अध्याये षष्ठे सूत्रे दोषवहानां स्त्रोतसां वर्णनं अधोल्लिखितम् ।

'' वातपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वाणि स्त्रोतास्ययनभूतानि..... ।।''

इत्यर्थः दोषाः सर्वशरीरे सर्वेभ्यः स्त्रोतोभ्यः सञ्चरन्ति ।

– दोषाणां परिभ्रमणम् स्त्रोतोभ्यः एव भवति । सर्वाणि स्त्रोतांसि दोषाणाम् अयनभूतानि सन्ति ।

३) 'स्त्रोतांसि खलु परिणाममापद्यमानानां धातूनाम् अभिवाहीनि भवन्त्ययनार्थेन ।। 'च. वि.५/३

इत्यस्य अर्थः स्त्रोतांसि नाम परिणमतां सततं चयापचयं प्राप्नुवतां धातूनाम् अयनभूता अभिवाहिनी प्रणालिः इति ।

४) ज्योतिषचन्द्रसरस्वतिना स्त्रोतसां व्याख्या अतीव समर्पकम् अस्ति ।'' स्त्रोतः शब्दोऽत्र यत्किञ्चिदभिवाहिप्रणालीसामान्यवाची । ''स्त्रोतः नाम धातूनां अभिवहन्ती प्रणालिः अस्ति ।

५) स्त्रोतस: यस्य धातो: अभिवहनं भवति तद् स्त्रोतः तद् वाह्यमानधातुनुसारं संज्ञा दीयते । उदा. मांसधातो: परमाणूनां वहनं यस्मात् स्त्रोतस: भवति तद् मांसवहं स्त्रोत: इति वदन्ति । एवम् अन्यस्त्रोतोविषये ज्ञातव्यम् ।

६) तथैव दोषाणां (दोषाणां परमाणूनाम्) वहनं यस्या: प्रणाल्या: भवति तां तद् तद् दोषवहं स्त्रोत: इति संज्ञा दातुं शक्यम् । उदा. वातवहम्, पित्तवहम् , कफवहं स्त्रोत: ।

७) च. वि. ५/६ मध्ये वर्णनानुसारं दोषा: सर्वेभ्य: स्त्रोतोभ्य: परिभ्रमन्ति । एतेषां प्रकारकानां सूत्राणि ग्रन्थे इतरत्रापि उपलभ्यन्ते । अनागतावेक्षणं, अतीतावेक्षणं तन्त्रयुक्त्यनुसारं वयं इमानि सूत्राणि पश्येम ।

– 'सर्वशरीरचराणां वातपित्तश्लेष्मणां सर्वस्मिन् शरीरे कुपिताकुपिता शुभाशुभानि कुर्वन्ति ।'

च. सू. २०/ ९

– 'वातपित्तकफादेहे सर्वस्त्रोतोऽनुसारिणः ।' च.चि. २८/५९

– 'दोषधातुमलमूलं हि शरीरम् ।' वाग्भटः

अस्य अर्थ: दोष: तथा तेषाम् अभिवहनप्रणालि: च एता: संपूर्णे शरीरे व्याप्ता: सन्ति । तस्मात् चरकाचार्येण तस्य वर्णनम् न कृतम् ।

८) यदा गङ्गाधररॉय: वदति यत् एतद् सूत्रम् वातादिदोषवहानां स्त्रोतसां दुष्टिहेतूनां वर्णनं करोति ।

तदा अत्र हेत्वर्थतन्त्रयुक्ते: उपयोगं करणीय: ।

हेत्वर्थतन्त्रयुक्त्यनुसारं वातादिदोषवहस्त्रोत: इत्यस्य अर्थ: सर्वशरीरे व्याप्ता सर्वेभ्य: स्त्रोतोभ्य: दोषान् वहन्ती प्रणालि: नाम सर्वाणि स्त्रोतांसि । अत: हेत्वर्थतन्त्रयुक्त्यनुसारं एतद् सूत्रं दोषान् वहतां सर्वेषां स्त्रोतसां सामान्यदुष्टिहोतो: इति निश्चितम् ।

९) परं शब्दश: यदि केवलं दोषान् वहन्ती स्त्रोतांसि इति अर्थ: गृहीत: चेत् एषा टीका अव्याप्ता भवेत् । अत: तन्त्रयुक्तिं उपयुज्य शब्दश: दृश्यमानं वैधर्म्यं दूरीभवति ।

निष्कर्ष: – १) गङ्गाधरस्य तथा अन्येषां टीकासु शब्दश: वैधर्म्यं दृश्यते ।

२) शब्दश: अर्थ: गृह्यते तर्हि गङ्गाधरस्य टीका अव्याप्ता सिध्यति ।

३) परं हेत्वर्थतन्त्रयुक्ते: उपयोग: क्रियते तर्हि वैधर्म्यं नश्यति ।

(६) सन्दर्भः – च. वि. ५ । २४

मूलं सूत्रम् – अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा ।

विमार्गगमनं चापि स्त्रोतसां दुष्टिलक्षणम् ।।

अधिकरणम् – सर्वेषां स्त्रोतसां सामान्यानि दुष्टिलक्षणानि अस्मिन् सूत्रे वर्णितानि ।

वैधर्म्यम् – एतद् सूत्रं सर्वेषां स्त्रोतसां सामान्यदुष्टिलक्षणानां अस्ति इति वर्णयन्ति चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः योगीन्द्रनाथसेनः च । प्रत्युत गङ्गाधरः वदति यत् एतद् वातादिदोषवहानां स्त्रोतसां दुष्टिलक्षणानां सूत्रम् अस्ति ।

टीका

चक्रपाणिः – अतिप्रवृत्तिरित्यादिना सामान्येन स्त्रोतोदुष्टिलक्षणामाह ।

गङ्गाधरः – शेषस्त्रोतोदुष्टिलक्षणमाह ।.........स्त्रोतसां वातादिदोषवहस्त्रोतसाम् ।

योगीन्द्रनाथसेनः – स्त्रोतसां सामान्यतो दुष्टिहेतुमुक्त्वा तेषां सामान्यदुष्टिलक्षणमाह........एतत् सर्वं स्त्रोतसां दुष्टिलक्षणम् ।

ज्योतिषचन्द्रसरस्वतिः – पृथक् स्त्रोतोदुष्टिलक्षणानि प्रागभिहितानि साम्प्रतं समासतः सर्वस्त्रोतोदुष्टिलक्षणानि आह अतिप्रवृत्तिरिति ।

विवेचनम्

१) त्रयोविंशतिःतमे मूत्रे स्त्रोतसां दुष्टिहेतवः वर्णिताः । तस्मिन् गङ्गाधरः तथा च अन्ये टीकाकाराः एतेषु शब्दशः वैधर्म्यं दृश्यते तद्वत् एव अस्य सूत्रस्य विवेचने अपि वैधर्म्यं दृश्यते ।

२) अन्ये टीकाकाराः एतद् सूत्रं सामान्यस्त्रोतसदुष्टिलक्षणानाम् अस्ति इति वर्णयन्ति प्रत्युत गङ्गाधरः एतद् सूत्रं वातादिदोषवहानां स्त्रोतसां दुष्टिलक्षणानां सूत्रम् इति वर्णयन्ति ।

३) त्रयोविंशस्य सूत्रस्य वैधर्म्यविवेचने अस्य विषयस्य गभीरं विवेचनम् अस्ति । तस्य आधारेण तद्वदेव अस्य सूत्रस्थस्य वैधर्म्यस्य निर्णयः आवश्यकः ।

४) गङ्गाधरस्य टीका शब्दशः गृहीता तर्हि सा अव्याप्ता भवति । यतः दोषाणाम् अभिवहनप्रणालिः सर्वेषु शरीरचरेषु तथा सर्वेषु स्त्रोतस्सु व्याप्ता भवति । तेन दोषवहानां स्त्रोतसां दुष्टिलक्षणानि इति

यदा उच्यते तदा दोषाः सर्वेभ्यः स्त्रोतोभ्यः अभिवहन्ति तस्मात् एतानि लक्षणानि सर्वेषु स्त्रोतस्सु ग्राह्याः भवन्ति ।

अत्र हेत्वर्थतन्त्रयुक्तेः उपयोगः आवश्यकः भवति ।

निष्कर्षः –

१) चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतेषां विवेचनं यथार्थं भाति ।

२) गङ्गाधरस्य अव्याप्ता भाति ।

३) गङ्गाधरस्य टीकायां हेत्वर्थतन्त्रयुक्तिः अवलंबिता चेत् वैधर्म्य नश्यति समानः अर्थः प्रतीयते ।

(७) सन्दर्भ: – च वि ५ / २४

मूलं सूत्रम् – अतिप्रवृत्ति: सङ्गो वा सिराणां ग्रन्थयोऽपि वा ।

विमार्गगमनं चापि स्त्रोतसां दुष्टिलक्षणम् ।।

अधिकरणम् – सर्वेषां स्त्रोतसां सामान्यदुष्टिलक्षणानां वर्णनम् अस्मिन् सूत्रे अस्ति ।

वैधर्म्यम् – अस्य सूत्रस्य अन्वये तथा तस्मात् निष्पन्ने अर्थे वैधर्म्यं दृश्यते । गङ्गाधरेण अन्येषां टीकाकाराणाम् अपेक्षया भिन्न: अन्वय: साधित: तस्मात् अस्य सूत्रस्य विवेचने वैधर्म्यं उत्पद्यते ।

टीका

चक्रपाणि: – अतिप्रवृत्तिरिह स्त्रोतोवाह्यस्य रसादे: बोधव्या: एवं सङ्गोऽपि रसादेव । विमार्गगमनं च यथा मलस्य मूत्रमार्गगमनम् ।

गङ्गाधर: – सिराणां अतिप्रवृत्तिर्वा सिराणां सङ्गो वा सिराणां ग्रन्थयोऽपि वा सिराणां विमार्गगमनम् चापि स्त्रोतसां वातादिदोषवहस्त्रोतसाम् ।

योगीन्द्रनाथसेन: – अतिप्रवृत्ति: स्त्रोतोवाह्यस्य रसादे: अतिप्रवृत्ति: सङ्गो वा । विमार्गतो गमनं वापि । सिराणां ग्रन्थयश्च ।

ज्योतिषचन्द्रसरस्वति: – अत्रातिप्रवृत्ति: स्त्रोतोवाह्यपदार्थानामिति ज्ञेयम् । सङ्गो विमार्गगमनमपि तेषामेव । सिराणामत्र स्त्रोतसामित्यर्थ: । ग्रन्थय: कुण्डलीभावो विबद्धता वा । विमार्गगमनं प्रतिलोमगमनम् अन्यस्त्रोतसि वा गमनम् ।

विवेचनम्

१) चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतेषां सूत्रान्वय: तस्मिन् टीका च –

अन्वय:–अतिप्रवृत्ति: वा सङ्गो वा सिराणां ग्रन्थयोऽपि वा विमार्गगमनं चापि स्त्रोतसां दुष्टिलक्षणम् ।

टीकार्थ: –

अ) अतिप्रवृत्ति: सङ्ग: विमार्गगमनं च एतानि लक्षणानि तद् तद् स्त्रोतोभ्य: वाह्यमानानां रसादि धातूनां सन्ति ।

ब) स्त्रोतोदुष्टयां तद्स्त्रोतस: वाह्यमानस्य धातो: अतिप्रवृत्ति: भवति अथवा तस्य धातो: सङ्ग: भवति अथवा तस्य धातो: विमार्गगमनं भवति ।

क) सिरा नाम स्त्रोत: । सिरासु ग्रन्थय: उत्पद्यन्ते । इत्यर्थ स्त्रोतसि दुष्टे भूते तस्मिन् स्त्रोतसि उत्सेध: उत्पद्यते । कुण्डलीभाव: विबद्धता च उत्पद्येते ।

२) गङ्गाधरस्य सूत्रान्वय: तस्मिन् टीका च –

अन्वय: – गङ्गाधरेण सिराणाम् पदं सर्वेभ्य: पदेभ्य: संयुज्य अन्वय: कृत: । सिराणाम् अतिप्रवृत्ति: वा सिराणां सङ्गो वा सिराणां ग्रन्थयोऽपि वा सिराणां विमार्गगमनं च अपि ।

अ) गङ्गाधरेण 'सिराणाम्' पदम् अतिप्रवृत्ति: सङ्ग: ग्रन्थय: विमार्गगमनं च एतेभ्य: चतुर्भ्य: अपि लक्षणसूचकेभ्य: पदेभ्य: संयुक्तम् । एतद् अस्या टीकाया: वैशिष्ट्यम् ।

आ) सिराणाम् अतिप्रवृत्ति: ।

सिराणां सङ्ग: ।

सिराणां ग्रन्थय: ।

सिराणां विमार्गगमनम् ।

इति दोषवहानां स्त्रोतसां दुष्टिलक्षणानि सन्ति ।

३) 'सिरा' पदं अस्मिन् अध्याये अध्यायाधिकरणानुसारं 'स्त्रोतस्' इत्यर्थेन योजितम् ।

अध्याय अधिकरणम् इति तन्त्रयुक्ते: उपयोगं अत्र कर्तुं शक्यम् ।

४) अत: स्त्रोतस् अर्थेन युक्तस्य सिरापदस्य अन्वयं गृहीत्वा गङ्गाधरस्य टीकाया: अग्रिम: अर्थ: व्युत्पद्यते ।

'' स्त्रोतसाम् अतिप्रवृत्ति:, स्त्रोतसां सङ्ग:, स्त्रोतसां ग्रन्थि: तथा स्त्रोतसां विमार्गगमनम् च एतानि स्त्रोतोदुष्टिलक्षणानि सन्ति '' ।

५)परन्तु एष: अर्थ: युक्तियुक्त: न भाति यत: स्त्रोत: इति अभिवहनप्रणालिस्वरुपस्य शारीरभावस्य विमार्गगमनं वा सङ्ग: वा अतिप्रवृत्ति: वा न संभवति । यत: शारीरभावे विकृते: उत्पत्ति: अशक्या ।

६) स्त्रोत: तु तस्मात् वहत: धातुघटकस्य अभिवहनप्रणालि: अस्ति । तत: तस्मात् वाह्यमानानां धातूनां (धातूनां परमाणूनां) विमार्गगमनं शक्यम् । तेषां धातूनां परमाणूनां सङ्ग: शक्य: तथैव एतेषां धातूनां परमाणूनाम् अतिप्रवृत्ति: शक्या ।

७) चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: अपि एवमेव व्याख्या कृता ।

स्त्रोतोवाह्यमानानां रसादीनां धातुघटकानाम् अतिप्रवृत्ति: तथैव तेषां सङ्ग: तेषां विमार्गगमनं च एते स्त्रोतोदृष्टिलक्षणे स्त: । एष: एव अर्थ: युक्तियुक्त: भाति ।

८) 'सिराणां ग्रन्थय:' इत्यस्य अर्थ: स्त्रोतस्सु उत्सेधभवनं विबद्धताम् आगत्य स्त्रोतोभ्य: काठिन्यगमनम् ।

एषा विकृति: अपि स्त्रोतोगतानां रुक्षादिगुणानां वृद्धिं भूत्वा तस्मात् वहतां धातुघटकानां तत्र आश्रय: भवति । शनै: शनै: तस्य आप्यायनं भवति तथा स्त्रोतस्सु उत्सेध: काठिन्यं वृद्धि: ग्रन्थय: इत्यादय: विकृतय: उत्पद्यन्ते ।

९) अत: चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतेषाम् अन्वयार्थ: टीका च एते अधिके युक्तियुक्ते भात: ।

निष्कर्ष:

१) गङ्गाधरेण कृत: सूत्रान्वय: टीका च तन्त्रयुक्तिनुसारं शारीरविचयानुसारं च युक्तियुक्त न भाति इति मे मति: ।

२) चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतेषां सूत्रान्वय: टीका च एते अधिके युक्तियुक्ते स्त: ।

(८) सन्दर्भः – च. वि. ७/१६

सूत्रपाठः –अथैनं क्रिमिकोष्ठमातुरमग्रे षड्रात्रं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य श्वोभूते एनं संशोधनं पाययित्वाऽस्मीति ।

अधिकरणम् – क्रिमिकोष्ठचिकित्सा – अपकर्षणम् ।

टीका १) सूत्रेऽस्मिन् पाठभेदाः न सन्ति ।

२) परं ज्योतिषचन्द्रसरस्वतिना एकः भिन्नः विचारः पुरस्कृतः यः अन्यैः टीकाकारैः न स्थापितः ।

ज्योतिषचन्द्रसरस्वति टीका

''अग्रे प्रथमतः भिषक् क्रिमिकोष्ठकमेनम् आभ्यन्तरक्रिमिव्याधितं षड्रात्रं सप्तरात्रं वेति त्रिरात्रं स्नेहविधिना, त्रिरात्रिश्च स्वेदेन मध्ये एकाहं वा विश्रमेतीत्यर्थः ।''

अर्थः – संशोधनं दापनपूर्वं प्रथमं षट् अथवा सप्त दिनानि पूर्वकर्म कुर्यात् । तस्मिन् त्रीणि दिनानि स्नेहविधिः एकदिनस्य विश्रामः अनन्तरं त्रीणि दिनानि स्नेहविधिः एकदिनस्य विश्रामः अनन्तरं त्रीणि दिनानि स्वेदविधिः करणीयः ।

३) एष प्रकारः अन्यैः टीकाकारैः न वर्णितः ।

निष्कर्षः –

१) ज्योतिषचन्द्रसरस्वतेः अस्मिन् विषये इतरेभ्यः वैधर्म्यम् अस्ति ।

२) परं दोषव्याधिरुग्णबलानि हेतुं च विचार्य व्याधिस्वभावानुसारं उपक्रमः करणीयः इति नियमम् अधिकृत्य ज्योतिषचन्द्रसरस्वतिना कृमिकोष्ठचिकित्सायां एवं रीत्या उपक्रमः कृताः स्यात् ।

अनेन मार्गेण उपशमः भवति इति निरीक्षणं प्राप्तं स्यात् ।

अतः एव एतादृशः भिन्नः विचारः तेन अत्र प्रस्थापितः ।

(९) सन्दर्भः – च वि ८/४

मूलसूत्रम् – ततो ऽ नन्तरमाचार्यं परीक्षेत तद्यथा – पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं...।

अधिकरणम् – 'लक्षणाचार्यशिष्याणां परीक्षाकरणम्' अस्मिन् अधिकरणे 'आचार्यपरीक्षाकारणम्' नाम्नः उप–अधिकरणे एतद् सूत्रमस्ति ।

वैधर्म्यम् – 'दक्षम्' इति पदस्य व्याख्यां शब्दशः वैधर्म्यं दृश्यते ।

टीका

| | | |
|---|---|---|
| चक्रपाणिः | – | दक्षमिति अवामबुद्धिः । |
| गङ्गाधरः | – | दक्षं वमनादिसर्वाक्रियासु कुशलम् । |
| योगीन्द्रनाथसेनः | – | दक्षं कर्मसु कुशलम् । |
| ज्योतिषचन्द्रसरस्वतिः | – | दक्षं स्वभ्यस्तकर्माणं कर्मकुशलम् । |

विवेचनम्

– शब्दार्थेन चक्रपाणेः व्याख्या अन्याभ्यः त्रिभ्यः भिन्नाः दृश्यते ।

– आदौ 'दक्ष' इति पदस्य व्याकरणं पश्याम ।

दक्ष – पुं – दक्ष + अच् । प्रजापतिविशेषः । ताम्रचूडः । मुनिभेदः । हरवृषः, द्रुमभेदः, वह्निः, महेशः, विष्णोः नामविशेषः । समर्थः । प्रवृद्धः । दक्षिणम् । अपसव्यम् ।

(शब्दकल्पद्रुमः / खण्डः २/६७०)

दक्ष – त्रि दीयते इति । दा + क्तः । रक्षितम्, कृतदानम्, विसृष्टम् । (वाचस्पत्यम्)

– able, fit, adroit, expert, clever, dexterous, intelligent, strong,

(monier william)

- able, competent, expert, skillful, clever, fit, suitable, ready, prompt, careful, attentive, honest, mental power, ability, capacity

(आपटे शब्दकोशः / २४३)

२) सुश्रुतसंहितायाः टीकायां डल्हणेन द्वयोः स्थानयोः 'दक्ष' इति पदस्य व्याख्या दत्ता ।

अ) दक्षं चतुरम् – डल्हण, सु. क. १/१०

ब) दक्षः नित्याभियुक्तः – डल्हणः, सु. सू. ३/५५

– चतुरस्य अर्थः अपि कार्येषु कुशलः हिताहितज्ञः इति वर्तते । नित्याभियुक्तस्य अर्थः अपि स्वकार्येषु सदैवं नित्यम् अनुबन्धनम् ।

३) आयुर्वेदशास्त्रे 'दक्ष' पदं त्रिभिः अर्थैः योजितम् ।

अ) दक्षः प्रजापतिः

ब) कुक्कुटः

क) कर्मकुशलः मनुजः

४) आदौ चक्रपाणेः व्याख्याम् ऊहामहे – चक्रपाणिना 'दक्ष' पदस्य 'अवामबुद्धिः' इति कृतः । अस्य शब्दार्थः यस्य बुद्धिः वामा नास्ति स अवामबुद्धिः इति ।

वाम – Left, being situated at left, Reverse, Contrary, opposite adverse, unfavourable Perverse, crooked nature, vile, wicked, base, low, bad, Lovely, beauitful, charming

(आपटे शब्दकोशः/५०१)

– त्रि. वमति वम्पते वेति । वम उद्गिरणे + णः । प्रतीपः, सव्यः, अधमः, हरः, कामदेवः, पयोधरः (शब्दकल्पद्रुमः/खण्डः ४/३३६)

– वामः पदस्य अर्थः अधमः विकृतः विपरीतः इत्थं भवति ।

– इदृशीबुद्धिः यस्य नास्ति सः अवामबुद्धिः मनुजः । एवम् अवामबुद्धिः मनुजः एव योग्यम् आवश्यकं महत्त्वपूर्णं यशदायकं च कार्यं कर्तुमर्हति ।

अतः दक्षपदस्य अर्थः उत्तमकार्यं कुर्वाणः अवामबुद्धिः च मनुजः इति भवति ।

५) अन्यानां त्रयाणामपि टीकाकाराणां व्याख्या समाना एव । स्वकार्ये कुशलत्वम् इति तेषाम् अभिप्रायः । गङ्गाधरेण आयुर्वेदतन्त्रस्य अधिकरणेन वमनादिकर्मसु कुशलः इति अर्थः गृहीतः ।

तदा अस्मिन् विषये त्रयाणां टीकाकाराणां साधर्म्यम् अस्ति । अस्य अर्थस्य पोषकः एव कोशे 'दक्षः' इति पदस्य अर्थः अस्ति ।

६) ऋग्वेदे दक्षः इति पदस्य अर्थः 'समर्थः' इति पदेन योजितः ।

''रुहती इव सूनवे रोदसी गिरो होता मनुष्यो न दक्षः ।'' (ऋग्वेदः १/५९/४)

७) अत:/ तदा चक्रपाणे: व्याख्या भिन्ना तथापि तस्या: उह्यतन्त्रयुक्ते: आधारेण 'कर्मकुशल:' इति अर्थ: भवितुमर्हति ।

८) सर्वघटकान् विचार्य एतेन अधिकरणेन गङ्गाधर: ज्योतिषचन्द्रसरस्वति: योगेन्द्रनाथसेन: एतै: कृता 'कर्मकुशल:' इति व्याख्या सम्यक् अस्ति इति मन्ये ।

निष्कर्ष:

१) चक्रपाणे: व्याख्या अन्येषां त्रयाणाम् अपेक्षया भिन्ना अस्ति ।

२) तथापि अवामबुद्धि: मनुज: स्वकार्यकुशल: भवति इति ऊहनोत्तरं निष्पन्नम् ।

३) गङ्गाधर: ज्योतिषचन्द्रसरस्वति: योगेन्द्रनाथसेन: एतेषां 'कर्मकुशल:' इति दक्ष इति पदस्य व्याख्या सम्यक् अस्ति इति मे भाति ।

इ) वैधर्म्यं अस्ति । शब्दश: अभिप्रेतार्थत: च वैधर्म्यं अस्ति । एते सर्वे विभिन्नविचारप्रवाहा: योग्या: सन्ति ।

– अस्य वैधर्म्यप्रकारे ०९ वैधर्म्याणि सम्प्राप्तानि ।

(१) संदर्भ: च. वि. १/१४

मूलं सूत्रम् –सर्पि: खल्वेवमेव पित्तं जयति माधुर्याच्छैत्यान्मन्दत्वाच्च: पित्तं ह्यमधुरमुष्णं तीक्ष्णं च ।

अधिकरणम् – द्रव्यप्रभावम् इति अधिकरणे त्रयाणां द्रव्याणाम् अभ्यास: करणीय: । तेषां त्रयाणां द्रव्याणां प्रभाव: उपरितने उपाधिकरणे वर्णित: । तस्मिन् सर्पि: इति द्रव्यस्य गुणप्रभाव: तथा तस्य पित्तदोषे परिणाम: इत्यस्य वर्णन अस्मिन् सूत्रे अस्ति ।

वैधर्म्यं – अमधुरपदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणि: – अमधुरमिति रौक्ष्यलाघवावृष्यत्वादिना मधुरविपरीतं कटुरसमित्यर्थ: ।

गङ्गाधर: – अमधुरमिति मधुरविपरीतं तिक्तं विदग्धमम्लं तीक्ष्णं चेति विरुद्धगुणम् ।

योगीन्द्रनाथसेन: – अमधुरमिति मधुरविपरीतं कटुकं अम्लं........।

ज्योतिषचन्द्रसरस्वति: – टीका नास्ति ।

विवेचनम्

संहिता ग्रन्थे 'मधुरम्' पदं विशेषत: द्विविधेन अर्थेन युज्यते ।

१) षड् रसेषु अन्यतर: रस: ।

२) पृथ्वी–जल महाभूतप्रधानावस्थाया: बोधक: ।

ग्रन्थेषु पदानां योजनाया: तथा तेभ्य: पदेभ्य: विशिष्टम् अर्थं संपादनस्य विशेषा पद्धति: अस्ति । तां 'स्वसंज्ञातन्त्रयुक्ति:' इति उच्यते । तदनुसारं 'मधुरम्' एषा आयुर्वेदस्य स्वसंज्ञाम् अस्ति । एषा उपरोक्तेन अर्थद्वयेन युज्यते ।

नैकवारं शरीरस्थं महाभूतसंघटनं तथा तस्य प्राबल्यं दर्शयता तस्य महाभूतस्य रसस्य नाम्ना तदवस्थाया: उल्लेख: कृत:

उदाहरणार्थम् – वातजे प्रमेहे शरीरस्था: सर्वे धातव: तथा तेषां सारांश: क्षीण: भूत्वा निर्गच्छति ।

अपि च पार्थिवा: वायवीया: च घटका: अवशिष्यन्ते । अनया अवस्थया शरीरं कषायत्वं प्राप्नोति इति चरकाचार्येण वर्णितम् ।

– कषायरसस्य महाभूते वायु: पृथ्वी च स्त: । अत: तेन शरीरं कषायभूतम् इति वर्णितम् ।

– तथैव अवस्थापाकानां वर्णने प्रथमे अवस्थापाके अन्नं माधुर्यं प्राप्नोति । द्वितीये अवस्थापाके अम्लत्वं तथैव तृतीये अवस्थापाके कटुत्वं प्राप्यते इति वर्णितम् ।

– अस्य गर्भितार्थ: अस्ति यत् अन्नाय मधुरत्वम् अम्लत्वं तिक्तत्वं च लभते इति न । अन्नाय तद् स्वादं लभते इति न । उत आदौ अवस्थापाके अन्नगतानां पार्थिवानां आप्यानां च घटकानां औत्कण्ठ्यं वर्धते तेषां विघटनं भवति च ।

– द्वितीये अवस्थापाके आप्यानाम् आग्नेयानाम् च घटकानां औत्कण्ठयं संवृद्ध्य तेषां विघटनं भवति । अपि च तृतीये अवस्थापाके आग्नेयानां वायवीयानां च घटकानां औत्कण्ठयं संवृद्ध्य तेषां विघटनं भवति । एवं नैकवारं रससंज्ञया ग्रन्थकारा: शरीरस्थानां महाभूतानां अवस्थां वर्णयन्ति ।

– अत: उपरोक्त सन्दर्भानुसारं अस्मिन् सूत्रे 'पित्तम् अमधुरम्' इति उच्यते । अत: शब्दार्थश: रस: अभिप्रेत: अस्ति एव परं गूढार्थत: 'पित्तम्' इति भावपदार्थस्य महाभूतसंघटनत्वम् अभिप्रेतम् अस्ति

– **'मधुरम्' इत्यस्य अर्थ: पार्थिवं जलीयं च** । पृथ्वीजलयो: महाभूतप्रधानत्वं नाम मधुरम् । अस्य अर्थ: यदा चरकाचार्य: पित्तं अमधुरं वदति तदा तन्मध्ये पृथ्वीजलयो: महाभूतयो: उत्कटावस्था नास्ति इत्येव अभिप्रेतम् ।

– पित्तदोष: तेजमहाभूतात् उत्पन्न: । उत तेज: महाभूतं तेजतन्मात्राप्रधानेभ्य: पञ्चतन्मात्राभ्य: पञ्चीकरणया प्रक्रियया उत्पन्नम् । अत: तेजमहाभूतप्रधाने पित्ते पृथ्वीजलयो: महाभूतयो: उत्कटता न भवति । अत: एव पित्तं अमधुरं इति संज्ञा युज्यते ।

तेजतन्मात्रा १/२ + १/८ अन्या: चतस्त्र: तन्मात्रा:
↓
पञ्चीकरणम्
↓
तेजमहाभूतम्
↓
पित्तदोष:
↓
अमधुरम्

– पित्तस्य प्राकृता: गुणा: ग्रन्थे अधोक्ता: वर्णिता: ।

१) सस्नेहमुष्णं च द्रवमम्लं सरं कटु । च. सू. १/६०

२) .......रसौ च कटुकाम्लौ सरत्वं च पित्तस्यात्मरुपाणि । च. सू. २०/१५

–सुश्रुत: सूत्रस्थानस्य विंशतितमे हिताहितीये अध्याये रसानां परस्परविरुद्धत्वं वर्णयति । तस्मिन्

| | | |
|---|---|---|
| मधुरम् अम्लं च | – | रसवीर्यविरुद्धम् |
| मधुरं लवणं च | – | रसवीर्यविरुद्धम् |
| मधुरं कटुः च | – | रसवीर्यविपाकविरुद्धम् |
| मधुरं तिक्तं च | – | रसविपाकविरुद्धम् |
| मधुरं कषायं च | – | रसविपाकविरुद्धम् |

एवं मधुरस्य अनेभ्य: रसेभ्य: विरुद्धत्वं वर्णितम् ।

– तस्मात् 'अमधुरम्' अस्य अर्थ: रसवीर्यविपाकत: तस्य विरुद्धा: अन्ये सर्वे रसा: ।

– तेभ्यं पित्तस्य प्राकृतं रसं ग्रन्थकारा: कटु अम्लं च इति वर्णियन्ति ।

– अमधुरम् पदे टीकाकारा: अधोनिर्दिष्टां अर्थनिष्पत्तिं कुर्वन्ति ।

| | | |
|---|---|---|
| चक्रपाणि: | – | कटु |
| गङ्गाधर: | – | तिक्तम् अम्लम् च । |
| योगीन्द्रनाथसेन: | – | कटु अम्लम् च |
| ज्योतिषचन्द्रसरस्वति: | – | टीका नास्ति । |

– ग्रन्थे नैकवारं कस्यापि घटकस्य वर्णनं उपलक्षणं उदाहरणमात्रं वर्तते । अत: टीकाकारै: टीका कृता तथापि पृथ्वीजलयो: महाभूतयो: अनुत्कटतां धारयन्ती अवस्था इत्येव अर्थ: तेभ्यः अभिप्रेत:

अत: त्रयाणाम् अपि टीकाकाराणां कृत: अर्थ: योग्य: एव ।

– यद् मधुरं नास्ति, यद् पृथ्वीजलप्रधानं नास्ति तद् अमधुरम् ।

– तस्मात् सर्वेषां टीकाकाराणां कटु तिक्तं अम्लं च इति अमधुरस्य अर्थ: योग्य: एव ।

निष्कर्ष: – सर्वेषां टीकाकाराणां टीका: योग्या: एव इति मे प्रतिभाति ।

(२) सन्दर्भ: – च. वि. ४।४

मूलसूत्रम् – तत्राप्तोपदेशो नाम आप्तवचनम् । आप्ता ह्यवितर्कस्मृतिविभागगविदो ----- ।।

अधिकरणम् – 'त्रिविधरोगविशेषविज्ञानम्' इति अधिकरणस्य: आप्तोपदेश: नाम विशेषविज्ञानस्य वर्णनम् अस्मिन् सूत्रे कृतमस्ति ।

वैधर्म्यम् – अस्मिन् पदगतम् अवितर्क: इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणि: – वितर्क: कथंता अनिश्चितज्ञानमिति यावत्......। एतद्विपर्ययात् निश्चयेन अनुभवेन च कात्स्न्ये च ये भावान् जानीते तेऽवितर्क:.....। वितर्कादिवेदी तु नाप्त: प्रतिपाद्यवस्त्वशेषविशेषाविज्ञानात् ।

गङ्गाधर: – अवितर्केण वितर्क ऊहापोहात्मकस्तं वितर्कं विना सदैवाविच्छेदेन युक्तज्ञानेन ...विदन्ति ये ते अवितर्का:... ।

योगीन्द्रनाथसेन: – अवितर्क यथा तथा......। शास्त्रतत्वे नि:संशयितज्ञानसम्पन्ना: इत्यर्थ: ।

ज्योतिषचन्द्रसरस्वति: – अवितर्का: संशयहिता: ।

विवेचनम् –

१) 'वितर्क: ' इति पदस्य व्याकरणम् –

वितर्क: – पुं, वि + तर्क + घञ् । ऊह: । संशय: । ज्ञानसूचक: ।

(शब्दकल्पद्रुम:/खण्ड: ४/३८५)

– पु. वि + तर्क + भावे ण्यच् । सन्देहे, ऊहे, ज्ञानसूचके, अलङ्कारशब्दे

( वाचस्पत्यम् । खण्ड: ६ । १२२६ )

– to reflect, ponder, think, believe, suppose, conjecture, consider as or take for, reasoning, deliberation, purpose, intention .

( monier willams / 962 )

२) कोशानुसारं वितर्क: इति पदस्य त्रय: अर्था: प्राप्ता: ।

– ऊहापोह: । संशय: । ज्ञानसूचक: ।

३) 'ऊह:' इति अर्थेन वितर्क: इति पदं भागवते योजितम् ।

'सरस्वत्यास्तरे राजन् ऋषय: सत्रमासत ।

वितर्क: समभूत्तेषां त्रिज्ष्वधीशेषु को महान् ।। ( भागवत १०/८९/१ )

तथैव 'संशय:' इति अर्थेन वितर्क: इति पदं महाभारते योजितम् ।

यौ तौ कुमाराविव कार्त्तिकेयौ द्वावश्विनेयाविवि मे वितर्क: । (महाभारत १/१९०/२३)

४) अस्मिन् सूत्रे टीकाकाराणां मतम् अधोक्तानुसारम् –

चक्रपाणि: – वितर्क: नाम अनिश्चितं ज्ञानम् । नाम 'संशय:' इति अर्थेन अत्र वितर्क: उद्देशित: ।

य: वितर्केण नाम अनिश्चितेन ज्ञानेन वदति, स: आप्त: नास्ति । अत्र वितर्क: इति पदम् अनिश्चितज्ञानं संशय: च इति अर्थेन अभिप्रेतम् ।

गङ्गाधर: – गङ्गाधरेण वितर्क: इति पदस्य अर्थ 'ऊहापोह:' एवं गृहीत:। एष: अर्थ: अपि व्याकरणं कोश: तथा पदार्थतन्त्रयुक्तिनुसारं योग्य: एव ।

योगीन्द्रनाथसेन: – अत्रभवता अपि 'वितर्कस्य अर्थ: 'संशय:' इति गृहीत: ।

ज्योतिषचन्द्रसरस्वति:– अत्रभवता अपि अस्मिन् सूत्रे वितर्कस्य अर्थ: 'संशय:' इति एव गृहीत: ।

तदा चक्रपाणि: योगीन्द्रनाथसेन: तथा ज्योतिषचन्द्रसरस्वति: एतै: अस्मिन् सूत्रे वितर्कस्य अर्थ: 'संशय:' इति तर्हि गङ्गाधरेण 'ऊहापोह:' इति एव गृहीत: । द्वौ अपि अथौ योग्यौ ।

५) 'वितर्क: ' इति पदस्य चरकसंहितायां अन्ये सन्दर्भा: तथा तद्गता टीका –

अ) ''विद्या वितर्को विज्ञानं ------ । '' च. सू. ९ । २३

वैद्यानां षड्गुणेषु वितर्क: समाविष्ट: । अस्मिन्,

चक्रपाणि: – वितर्क: शास्त्रमूल ऊहापोह: ।

गङ्गाधर: – वितर्क: शास्त्रार्थमूलक ऊहापोह: ।

योगीन्द्रनाथसेन: – वितर्कौ ऊहापोहौ ।

एवम् 'ऊहापोह:' अर्थसूचका: व्याख्या: कृता: ।

आ) शिष्यपरीक्षायां 'वितर्क:' इति शिष्यस्य गुण: वर्णित: । (च. वि. ८।८)

अस्मिन् योगेन्द्रनाथ: सेनेन गङ्गाधरेण च वितर्कस्य अर्थ: 'ऊह:' इत्येव कृत: ।

६) न्यायदर्शनेन तर्कस्य व्याख्या अधोक्तानुसारम् कृता ।

‘‘अविज्ञाततत्वेऽर्थे कारणोपपत्तित: तत्वज्ञानार्थम् ऊह: तर्क: । (न्यायदर्शन: १।१।४०)

७) तदा गङ्गाधरेण वितर्कस्य अर्थ: विशिष्ट: तर्क: इति गृहीत: । ‘वि ‘उपसर्गस्य अर्थ: ‘विशिष्ट: ’ इति अत्र स्वीकृत: ।

८) प्रत्युत चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: ‘वि’ उपसर्गस्य अर्थ: ‘विपरीत:’ इति गृहीत्वा वितर्कस्य अर्थ: ‘संशय:’ इति गृहीत: ।

९) अत: उपसर्गस्य अर्थनिष्पत्तिगतं वैधर्म्येण वितर्कस्य व्याख्यायां वैधर्म्यम् अस्ति । किन्तु एतौ द्वौ अपि अर्थौ योग्यौ ।

निष्कर्ष: –

१) वैधर्म्यम् अस्ति । गङ्गाधरेण ‘ऊहापोह:’ उत अन्यै: त्रिभि: ‘संशय:’ इति अर्थ: गृहीत: ।

२) उपसर्गस्य अर्थनिष्पते: भिन्नत्वात् एतौ द्विविधौ अर्थौ निर्मितौ ।

३) एतौ द्वौ अर्थौ अन्येषु सन्दर्भेषु सर्वै: टीकाकारै: गृहीतौ ।

४) कोशेषु अपि द्वौ एव अर्थौ प्राप्येते ।

५) तदा वैधर्म्यं सद् द्वौ अपि अर्थौ स्वीकरणीयौ, इति मन्ये ।

(३) सन्दर्भः – च. वि. ५ । २४

मूलसूत्रम् – अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयो ऽ पि वा ।

विमार्गगमनश्चापि स्त्रोतसां दुष्टिलक्षणम् ।।

अधिकरणम् – अस्मिन् सूत्रे स्त्रोतसां सामान्यानां दुष्टिलक्षणानां वर्णनम् अस्ति ।

वैधर्म्यम् – 'विमार्गगमनम्' इति पदस्य व्याख्यायां शब्दशः वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणिः – विमार्गगमनं च यथा – मलस्य मूत्रमार्गगमनम् ।

गङ्गाधरः – सिराणां विमार्गगमनं चापि......।

योगीन्द्रनाथसेनः – विमार्गतः गमनं चापि ।

ज्योतिषचन्द्रसरस्वतिः – विमार्गगमनं प्रतिलोमगमनम् । अन्यस्त्रोतसि वा गमनम् ।

विवेचनम्

१) गङ्गाधरस्य अन्वयार्थः भिन्नः अस्ति । तथा अनेन ' विमार्गगमनम् ' इति पदस्य व्याख्या अपि न कृता, तेन उर्वरिताः टीकाकाराः चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतेषां व्याख्याविषयकं ऊहापोहं करवाम ।

२) चक्रपाणिना विमार्गगमनस्य व्याख्यां न कृत्वा उदाहरणं दत्वा स्पष्टीकरणस्य पद्धतिः उपयोजिता अस्ति । अनेन मलस्य मूत्रमार्गात् गमनं भवति इति विमार्गगमनस्य उदाहरणं दत्तम् ।

३) योगीन्द्रनाथसेनेन ' विमार्गतः गमनम् ' एवं निरुक्तिः वर्णिता ।

४) ज्योतिषचन्द्रसरस्वतिना प्रतिलोमगमनं वा अन्यस्त्रोतसि गमनं भवति इति व्याख्या कृता ।

५) विमार्गगमनस्य चरकसंहिता सुश्रुतसंहिता च अनयोः सन्दर्भः अधोक्तवत् –

अ) स्वं स्थानं गमयेदेवं वृतानेतात् विमार्गगान् । च चि २८/ २२१

विमार्गः भूतम् आवृतः च विकृतिवातं प्रकृतिस्थः करणीयः ।

आ) विमार्गस्था ह्ययुक्ता वा रोगैः स्वस्थानकर्मजैः । च चि २८ /१२

अत्र विगुणभूतस्य वातस्य कर्म वर्णितम् अस्ति ।

इ) स्थानस्य इति न विमार्गः । चक्रपाणिः, च चि २८/ ४

विमार्गं न गतं तत् स्थानस्थम् इति ।

ई) प्रतिलोमम् इति विमार्गम् । चक्रपाणि: च. सू ५ / ४८

४) एवं प्रकुपितानां प्रसरतां वायोर्विमार्गगमनाये तत्र तृतीय: क्रियाकाल: । सु. सू. २१/३२

डल्हण: – प्रकृतवायुमार्गादन्यो विमार्ग: ।

५) विमार्गगै: तिर्यग्गतै: । डल्हण: सु. उ. ३९ /२३

६) यदा तु नाडीषु विमार्गमागत: स एव शब्दाभिवहासु तिष्ठति । सु.उ. २० /७

डल्हण: – विमार्गमागत: विरुद्धमार्ग: प्राप्त: । विमार्गग: तिर्यग्गो यदा तिष्ठति ।

७) न्युब्जस्य पुरुषस्य विमार्गगो बस्ति पक्वाधानं पक्वाशयं नाप्नोति । डल्हण: सु.उ. ३६ /२४

८) मैथुनविघातादतिमैथुनाद्वा शुक्रं चलितमनिर्गच्छद् विमार्गगमनादनिलोऽभित: । सु नि ३/१२

डल्हण: – विमार्गगमनात् उन्मार्गगमनात् ।

गयदास: – विमार्गगमनात् मेढ्रवृषणविहितमार्ग अगमनात् ।

९) विगुणानिलजो व्याधि स मूत्रोत्सङ्गसञ्चित: । सु उ. ५८ । १६

डल्हण: – विगुणानिलज इति विमार्ग: वायुज: ।

वायोविमार्गगमनं मार्गावरोधात् स्वहेतुभिश्च केचित् मार्गावरोधमेव विमार्गगमने कारणमिच्छन्ति ।

१०) अनवस्थितदोषा: विमार्गगा: । डल्हण: , सु उ. ३९ । १५९

११) अन्यथाचर इति विमार्गग: । डल्हण: , सु उ. २० । ६

१२) मूढो विमार्गगामी । डल्हण: , सु नि ८ । ३

१३) मूढ: विमार्गवर्ती । गयदास: , सु नि ८ । ३

६) ' विमार्ग: ' इति पदस्य व्यूत्पति: निरुक्ति: च अधोक्तानुसारम्

विमार्ग: – पुं वि पूर्व मृज् धातो: घञ् प्रत्ययेन निष्पन्न: । विरुद्धो मार्ग: । कुपथ: ।

(शब्दकल्पद्रुमः /खण्डः ४/४१५)

७) तदा सर्वे सन्दर्भा: व्यूत्पत्त्य: च अनयो: विचार: कृत: चेत् विमार्ग: इति पदस्य अग्रिमा: अर्था: प्राप्यन्ते । – विरुद्ध: मार्ग: ।

– अन्यथाचरः

– अनवस्थितः

– विगुणः

– मूढः

– न स्थानस्थः

– प्रतिलोमम्

– प्रकृतमार्गात् अन्यमार्गगमनम्

– तिर्यक् गमनम्

– उन्मार्गगमनम्

– विहितमार्गम् अगमनम्

– मार्गावरोधज लक्षणम्

– विकृतत्वम्

– क्षयवृद्धौ वा प्राप्तः

एते सर्वे अर्थाः योग्याः सन्ति । अधिकरणानुसारम् अस्मभ्यं एतस्य अर्थः गृहीतव्यः ।

– 'विमार्गगमनम्' एतस्य पदस्य अर्थं निश्चेतुं स्वसंज्ञा अधिकरणम् पदार्थः अतीतावेक्षणम् अनागतावेक्षणम् ऊह्यः निर्णयः इत्यादीनां तन्त्रयुक्तीनां तथा समानतन्त्रप्रत्ययः परतन्त्रप्रत्ययः इति अर्थाश्रययोः उपयोगः कर्तव्यः ।

८) टीकाकाराणां व्याख्या दृष्टा चेत् ' विमार्गगमनम् ' इति पदस्य अग्रिमः अर्थाः प्राप्यन्ते ।

चक्रपाणिः – मलस्य मूत्रमार्गगमनम् ।

– अस्य भावार्थः एवम् अस्ति यद् एकस्य भावपदार्थस्य वहनं तस्य विहितमार्गं त्यक्त्वा अन्यभावपदार्थस्य मार्गात् भवति ।

योगीन्द्रनाथसेनः – विमार्गतः गमनम् ।

– 'वि' नाम विरुद्धः । 'मार्गस्य' अर्थः स्त्रोतस् पथः गतिः अवस्था च एवम् अस्ति ।

– तदा स्वस्य प्राकृतं , विहितं , स्त्रोतस् , गतिविशेषां वा अवस्थां त्यक्त्वा अन्यं स्त्रोतः गतिं वा अवस्थां गमनं नाम विमार्गगमनम् इति ।

ज्योतिषचन्द्रसरस्वतिः  – अमुना द्वौ अर्थौ दत्तौ ।

१) प्रतिलोमगमनम् – स्वमार्गं त्यक्त्वा अन्यमार्गेण गमनम् ।

२) अन्य स्त्रोतसि गमनम् ।

– टीकाकाराणां एते अर्थाः 'विमार्गगमनम्' इति पदस्य तन्त्रयुक्तेः अर्थाश्रयात् च निष्पन्नं अर्थं युक्तियुक्तः सन्ति । तर्हि त्रयाणां टीकाकाराणां सर्वे अर्थाः योग्याः । एतेषां अर्थानां विस्तारेण ऊहापोहं कुर्मः ।

योगीन्द्रनाथसेनः – विमार्गतः गमनम् ।योगीन्द्रनाथसेनेन एकस्मिन् वाक्ये एव विमार्गगमनं वर्णितम् । अनेन विमार्गगमनम् इति संयुक्तस्य वा सामासिकपदस्य निरुक्तिः वर्णिता ।

– ' विमार्गतः गमनम् ' एतस्य अर्थः अधोक्तानुसारं निष्पन्नः भवति ।

वि – विशेषत्वं , विरुद्धः , विपरीतः , अन्यथा , विकृतत्वम्

मार्ग – स्त्रोतः , पथ , प्रकारः , गतिः , अवस्था

– एतेषां सर्वेषाम् अर्थानां परस्परेषु अन्वयार्थं कृत्वा अस्य अध्यायस्य 'स्त्रोतस्' अधिकरणानुसारं वर्णनं कुर्मः ।

– ' वि + मार्गः ' एतयोः विभिन्नाः अर्थः परस्परेषु अन्वितं कृत्वा अर्थनिष्पत्तिं कुर्मः ।

विरुद्ध – स्त्रोतस्

– कश्चित् वाह्यमानः धातुः तस्य विहितस्त्रोतसः वहनं कुर्वन् तस्य प्राकृतं कार्यं करोति ।

कस्यापि हेतोः (उदाः अवरोधः धातुक्षयः ग्रन्थी वातप्रकोपः इ.) सः वाह्यमानः धातुः स्व–स्त्रोतसः मार्गं त्यक्त्वा अन्यस्मिन् स्त्रोतसि गमनं करोति, तदा तं विमार्गगमनम् इति वदन्ति ।

– एषः एव अर्थः विपरीत–स्त्रोतः अन्यथा स्त्रोतः, प्रतिमार्ग–स्त्रोतस् एतेषां अर्थद्वयानां स्वीकर्तुं शक्यः ।

विपरीत,विरुद्ध–अवस्था / विपरीत,विरुद्ध–गतिः –

– धातोः या अवस्था स्यात् तां त्यक्त्वा अन्याम् अवस्थां गमनम् ।

– अवस्थाः अधोक्तानुसारं शक्नुयुः ।

– क्षयः – साम्यावस्था – वृद्धः

– बाह्य – आभ्यन्तरम्

– अपक्कं – पक्कम् ( सामं – निरामम् )

– नवम् – जीर्णम्

– कस्मिश्चित् साम्यावस्थायां धातुघटक: क्षीण: वा वृद्ध: भवति ।

– काश्चन विकृति: जीर्णावस्थां गच्छति ।

– अपक्का विकृतावस्था पक्का भवति ।

– निरामावस्था आमसंपृक्ता भवति ।

– आभ्यन्तरचर: धातुघटक: बाह्यगामी भवति ।

– बाह्यचर: धातुघटक: अभ्यन्तरगामी भवति ।

एते सर्वे विमार्गगमनस्य अर्था: सन्ति ।

– शरीरस्य अभ्यन्तरे सञ्चरन् धातुघटक: शरीरस्य बहि: स्त्रोतसि सञ्चारं प्रारभते ।

उदा – 'रक्तम्' इति भावपदार्थस्य रक्तवहस्त्रोत: त्यक्त्वा स्वेदवहात् सञ्चार: नाम बहिश्चर भवनम् ।

एतद् अपि विमार्गगमनम् अस्ति ।

– कोष्ठस्थ: भावपदार्थ: शाखेगत: (धातुगमनम्) भवति, एतद् अपि तस्य भावपदार्थस्य विमार्गगमनम् अस्ति ।

– विरुद्ध:, विकृत:, विपरीत: इति विपसर्गस्य अर्थ: तथा गति: इति मार्गस्य अर्थः गृहीत्वा चेत् एषः एव अर्थ: निष्पन्न: भवति ।

<u>विकृत – स्त्रोतस् / गति / अवस्था</u>

– स्त्रोतस: वा तद् वाह्य: भावघटकस्य प्राकृतावस्थां परिवर्त्य विकृतावस्था प्राप्ति: एतद् अपि विमार्गगमनम् अस्ति ।

– स्त्रोत: विकृतं भवेत् तर्हि तस्य परिणाम: तस्मात् वाह्यमाने धातुघटके तथा अन्य स्त्रोतसि भवति पर्यायेण च तस्मिन् विकृति: जायते ।

– धातुघटक: विकृतं भवेत् तर्हि स: स्वस्य मार्गम् अवस्थां वा गतिं परिवर्तयति, एतद् अपि विमार्गगमनम् अस्ति ।

तदा योगीन्द्रनाथसेनेन वर्णितं ' विमार्गत: गमनम् ' एतस्य उपर्यनुसारम् अनेकविधा: अर्था: भवन्ति तथा ते सर्वे शास्त्रोक्त: सन्त: स्वीकरणीयाः ।

ज्योतिषचन्द्रसरस्वति: – अनेन द्विविधेन प्रकारेण विचार: कृत: ।

१) प्रतिलोमगमनम् –

अस्य शब्दश: अर्थ: स्वस्य प्राकृतगतिः वा मार्गापेक्षा विपरीतगत्या वा मार्गेण वहनम्

उदा: – रसधातु: वा रक्तधातु: स्वस्य प्राकृतगतिं वा मार्गं त्यक्त्वा विपरीतगत्या वहनं प्रारभते ।

– अधोगामि शुक्रं विविधै: हेतुभि: (अवरोध:, अश्मरी, धमनीप्रतिचयं, Urethral stricture, Calification of urethra, fistula etc.) स्वमार्गं त्यक्त्वा (Penile urethra) शरीरात् बहि: न गत्वा विपरितमार्गेण । गत्या प्रतिलोमं भवति ।

– अन्यगमिन: प्राणवायो: गतिं अवरुद्ध्य तं उर्ध्वगति: प्राप्यते 'कास' इति लक्षणं उद्भवति च ।

२) अन्यस्मिन् स्त्रोतसि वा गमनम् –

– स्वस्य स्रोत: त्यक्त्वा अन्यस्मिन् स्त्रोतसि गमनम् ।

– उदा – 'रक्त' धातु: रक्तवहस्त्रोत: त्यक्त्वा मांसवहम् अस्थिवहं , पुरीषवहं, मूत्रवहं, शुक्रवहं स्त्रोत:सु गच्छति ।

चक्रपाणि:

– चक्रपाणिना सरला व्याख्या न कुर्वता उदाहरणेन वर्णितम् ।

– ' मलस्य मूत्रमार्गगमनम् ' – अस्य भावार्थ: एक: धातुघटक: स्वमार्गं – स्वस्त्रोत: त्यक्त्वा अन्यस्मात् स्त्रोतस: वहनम् आरभते ।

चक्रपाणे: विचारविषये आक्षेप: तस्य खण्डनं च –

– चक्रपाणे: टीका नित्यम् आक्षेपन्ते ।

– ' मलस्य मूत्रमार्गगमनम् ' एवम् अवस्था कदापि भविष्यति वा ? चक्रपाणिना एवम् अगम्या टीका कथं कृता ? एतद् अर्थ: यत् चक्रपाणि: वैद्य: नासीत् उत केवलं स: संस्कृतस्य तथा साहित्यस्य पण्डित: अवर्तत ।

– अनेन न कदापि रुग्णचिकित्सा कृता , अन्यथा न अनेन एवं टीका कृता स्यात् ।

रक्तम् अन्यस्मात् स्त्रोतमार्गात् गच्छति एवं सरलम् उदाहरणं न दत्वा मल: इति घटक: मूत्रमार्गात् गच्छति एवं कठीणं, दुष्प्राप्यम्, अगम्यम् उदाहरणं चक्रपाणिना किमर्थं दत्तम् ?

एवम् असंख्यान् आक्षेपान् गृहीत्वा बुदिधभ्रमम् उत्पाद्यते, यस्य पर्यावसानं शास्त्रविषये अनास्थानिर्माणे भवति यत: अभिप्रेतार्थस्य अनाकलत्वम् ।

– इमं विषयं विमर्शितुं चक्रपाणे: टीकालेखनशैली पूर्वं विचारणीया ।

– चक्रपाणि: अतीव मितानि मार्मिकाणि च पदानि उपयुज्य व्याख्यां करोति ।

– विस्तृतं विवेचनं अकुर्वन् मितै: शब्दै: सोदाहरणं च विषयवर्णनं अवलम्बिता ।

– अनेन विमार्गगमनस्य विवरणम् अथवा व्याख्या न कृता अपि तु उदाहरणं वर्णितम् ।

– अन्यत्र चक्रपाणि: विमार्गपदस्य अर्थं प्रतिलोमम् , अस्थानस्थम् इति करोति ।

– तस्य सम्बन्ध: अपि अतीतावेक्षणम् अनागतावेक्षणं तन्त्रयुक्त्यानुसारं करणीय: भवति ।

– उदाहरणानुसारं तथा अन्येषां सन्दर्भाणां सहाय्येन चक्रपाणे: अभिप्रेतः विमार्गगमनस्य अर्थ: अधोलिखितवद् निष्पद्यते ।

– कस्यचित् भावघटकस्य वहनं प्रतिलोमम् अन्यथा विकृतया गत्या स्वमार्गं / स्वस्त्रोत: त्यक्त्वा अन्यस्मात् मार्गा / स्त्रोतस: भवति नाम विमार्गगमनम् ।

– तदर्थम् अनेन 'मल:' इति भावघटकस्य वहनं स्वमार्गं त्यक्त्वा 'मूत्रमार्गेण' भवति इति उदाहरणं दत्तम् ।

– उदाहरणस्य विवेचनम् – अस्मिन् उदाहरणे सद्यकालिनः विचारवन्तानाम् नेकै आक्षेपा: सन्ति / तेषां निराकरणस्य प्रयत्न: कुर्म: ।

– चरकसंहिताया: चिकित्सास्थानस्य द्विव्रणीयाध्याये नाडीव्रणस्य वर्णनम् अस्ति । तथैव विद्रधिप्रकरणे अग्रिमवत् वर्णनमस्ति ।

'पक्वप्रभिन्नासूर्ध्वजासु मुखात् स्राव: स्रवति अधोजासु गुदात् उभयतस्तु नाभिजासु ।'

च.सू.१७.१०२

एतस्मिन् वर्णने अपि चक्रपाणिवर्णित: विमार्गगमनस्य अर्थ: प्रकटीत: भवति । एकस्मिन् शरीरावयवात् नाडीव्रण: उत्पद्यते तत: तस्मिन् नाडीव्रणे अन्यभावपदार्थस्य वहनं भवति । एतत्

तद् भावपदार्थस्य विमार्गगमनम् एव । तथैव पक्वा विद्रधि यदा भिद्यते तदा नाडीव्रणं उत्पाद्यते ततः भावपदार्थस्य विमार्गगमनं भवति ।

तेन चक्रपाणिकृता विमार्गगमनस्य टीका युक्तियुक्ता अस्ति इति निष्कर्षः स्वतन्त्रप्रत्ययः नाम अर्थाश्रयेण प्राप्तः ।

ननु परतन्त्रप्रत्ययार्थश्रयस्य उदाहरणम् अग्रिमवत् –

– तदर्थं modern medicine (आधुनिक औषधी) शास्त्रस्य आधारः सन्दर्भार्थं गृह्णामः ।

– आधुनिके वैद्यकशास्त्रे मलगतः घटकः (faecal matter) सूक्ष्मशः मूत्रे दृश्यते तां अवस्थां 'fecaluria' इति वदन्ति ।

Fecaluria - It means faeces in urine.

- It is very uncommon condition
- almost associated with fistula between the colon or recturn and the bladder or fistula between rectum and urethra .
- Diagnosis should be based on -
    - i) simulteneous defecation prior to, during or after urination .
    - ii) Blood clots in urine.
- Causes -
    - i) Post operative
    - ii) inflammatory bowel disease most common in Crohn"s disease.
    - iii) Rectal cancer
    - iv) Bladder cancer
    - v) Diverticulitis
    - vi) absess in rectal / urethral region.
    - vii) trauma ( blunt or penetrating )
    - viii) meckels diverticulum.
    - ix) GUS or Pelvic infection - actinomycosis
    - x ) appendicitis
- Symptoms - Visual faeces
    - Bladder pain
    - painful urination ( dysuria)
    - recurrent or persistent UTI"s

- Haematuria
- malodones urine ( smelly urine)
- tenesmus ( urging )
- incontinence
- faecal meterial specially stercobilinogen can be found in Routine urine analysis or urine culture test

– अस्मिन् आधुनिकवैद्यकशास्त्रगतं सन्दर्भानुसारं एतद् सिद्धं भवति यत् मलघटकः मूत्रमार्गात् गमनं कर्तुं शक्नुवन्ति ।

– यदि दुर्लभा अवस्था स्यात् तर्हि अगम्या अशक्या नास्ति ।

– तदा चक्रपाणेः टीका अयोग्या नास्ति ।

– चक्रपाणिना एतावत् दुर्लभम् उदाहरणं दत्तम् अस्य अर्थः –

१) चक्रपाणिना एवं रुग्णः दृष्टः चिकित्सितः च आसीत् ।

२) एवम् उदाहरणं दत्वा अनेन दुर्लभः इति विमार्गगमनस्य सन्दर्भः वर्णितः । अस्मात् अतिशयं सरलं, नित्यं वर्तमानं विमार्गगमनं वैद्यैः विद्यार्थीभिः अभ्यासकैः च जानीयात् इति अभिप्रेतार्थः अस्ति ।

३) चक्रपाणिः केवलं संस्कृतपण्डितः वा साहित्यकः नासीत् उत दुर्लभः रुग्णः परीक्षकः उच्चतमः चिकित्सकः आसीत् ।

४) चक्रपाणिना टीका सर्वथा युक्तियुक्ता अस्ति ।

निष्कर्षः –

१) टीकाकारेषु वैधर्म्यं नास्ति ।

२) चक्रपाणेः टीकायाम् आक्षेपस्य यथायोग्यया पद्धत्या निराकरणस्य प्रयत्नः कृतः ।

(४) सन्दर्भ: – च. वि. ८/४

मूलसूत्रम् – ततोऽनन्तरमाचार्यं परीक्षेत तद्यथा पर्यवदातश्रुतं....प्रकृतिज्ञं......चेति ।

अधिकरणम् – 'लक्षणाचार्यशिष्याणां परीक्षाकरणम्' इति अधिकरणे आचार्यपरीक्षा इति उपाधिकरणे एतस्य सूत्रस्य वर्णनमस्ति ।

वैधर्म्यम् – अस्मिन् सूत्रे 'प्रकृतिज्ञ:' इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका –

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – प्रकृतिज्ञमिति व्याधितानां व्याधिप्रतिकारे स्वस्थानां वा स्वास्थ्यरक्षणे पुंसां प्रकृतिज्ञानमन्तरेण न क्रियापयोग: सम्पद्यते । प्रकृतिर्हि स्वास्थ्ये पुंसां स्वभाव: सत्वशरीरयो: सात्विकादिरुपा समवातपित्तकफात्मकत्वरुपा च ।

योगीन्द्रनाथसेन: – प्रकृति: आतुरगता । एतच्च परीक्षणीयाणाम् उपलक्षणम् ।

ज्योतिषचन्द्रसरस्वति: – प्रकृतिज्ञं शिष्यप्रकृतिं समीक्ष्य अध्यापनकुशलम् ।

विवेचनम् –

१) 'आचार्यपरीक्षा' अस्मिन् विषये एतद् अधिकरणमस्ति । उत्तमा: आचार्या: कथं स्यु: तेषां गुणलक्षणानि अस्मिन् सूत्रे वर्णितानि ।

२)अध्ययनारम्भात् पूर्वं शिष्येण शास्त्रस्य परीक्षा आचार्यस्य च परीक्षा करणीया । आचार्य: यदि गुणलक्षणै: युक्तो अध्यापनकुशल: अस्ति तदैव तस्मात् ज्ञानप्राप्ति: करणीया । अन्यथा अन्याचार्यं प्रति गन्तव्यम् ।

३) अत्र पदानाम् अर्थान्तरे अस्य अधिकरणस्य अनुषङ्गेन अर्थनिश्चिति: करणीया भवति ।

४) गङ्गाधर: योगीन्द्रनाथसेन: एताभ्याम् एतस्य पदस्य अर्थ: आतुरगत: स्वस्थगत: वा शरीरमनसो: स्वभाव: इति कृत: । रुग्णस्य स्वस्थस्य वा प्रकृति: आचार्याय ज्ञाता अस्ति इति परीक्षणीयं लक्षणम् ।

५) तथापि एतां परीक्षां शिष्य: करिष्यति इति एतेन अनुषङ्गेन स: परीक्षा कुर्यात् इति कस्मिंश्चिद् अंशे सम्यग् भवति तथापि पूर्णत: योग्यं न भाति ।

६) ज्योतिषचन्द्रसरस्वतिना प्रकृतिः इत्यस्य अर्थः शिष्यस्य प्रकृतिः जानानः तदनुषङ्गेन च अध्यापनं कुर्वाणः इति कृतः ।

– अधिकरणानुसारेण एषः विचारः अधिकः योग्यः मन्ये ।

– शिष्याणां बुद्धिः त्रिविधा भवति । उत्तमा मध्यमा अधमा च बुद्धियुक्ताः शिष्याः । एवं त्रिविधबुद्धियुक्तशिष्येभ्यः तेषां बुद्ध्यनुसारेण तैः अवगम्यते इति पद्धत्या अध्यापनं करणीयम् ।

एतद् महत्त्वपूर्णं यत् उत्तमे आचार्ये एषः गुणः भवेत् ।

७) एवं रुग्णस्य प्रकृत्यपेक्षया शिष्यस्य प्रकृतिः जानानः इति 'प्रकृतिज्ञः' इत्यस्य व्याख्या अधिका योग्या ।

८)'प्रकृतिज्ञः' इति पदं चरकसंहितायां प्राणाभिसरवैद्यस्य गुणलक्षणेषु अपि आगतम् ।

'' य इमे कुलीनाः पर्यवदातश्रुताः........प्रकृतिज्ञाः..........ते ज्ञेयाः प्राणानामभिसरा हन्तारो रोगाणाम् ।'' च. सू. २९।७

अस्मिन् सूत्रे अग्रे उल्लेखिते व्याख्ये दृश्येन्ते ।

गङ्गाधरः – प्रकृतिज्ञा आतुरादीनाम् ।

योगीन्द्रनाथसेनः – प्रकृतिं जानन्ति इति प्रकृतिज्ञाः । अन्येषां परीक्षणीयानां प्रकृतौ अवरोधः ।

अत्र प्राणाभिसरवैद्यस्य गुणलक्षणानि वर्णितानि तस्मात् तेन अधिकरणेन 'प्रकृतिज्ञः' इत्यस्य अर्थः आतुरस्य प्रकृतिं जानानः वैद्यः इति योग्यः ।

९)परन्तु विमानस्थाने अष्टमे अध्याये सन्दर्भस्य अधिकरणम् आचार्यस्य परीक्षायाः अस्ति । तेन शिष्यस्य प्रकृतिं ज्ञात्वा तदनुसारेण अध्यापनं कुर्वाणः आचार्यः इति अर्थः अधिकः योग्यः भाति ।

निष्कर्षः –

१) वैधर्म्यम् अस्ति । द्वौ अर्थौ योग्यौ ।

२) तथापि अधिकरणं पदार्थतन्त्रयुक्ति अनुसारेण च ज्योतिषचन्द्रसरस्वतेः अर्थः अधिकः स्वीकरणीयः इति अहं मन्ये ।

(५) सन्दर्भः – च. वि. ८/९

मूलसूत्रम् – एवं विधमध्ययनार्थिनम् उपस्थितमारिराधयिषु आचार्योऽनुभाषेत...क्षौमपरिधीन्

......उपतिष्ठस्वेति ।।

अधिकरणम् – शास्त्रदृढतायै त्रिविधोपायाः अस्मिन् अधिकरणे अध्ययनविधिः इति उपाधिकरणे अध्ययनस्य प्रारम्भे शिष्यः विधिप्रारम्भाय आवश्यकानि वस्तूनि गृहीत्वा आचार्यस्य समीपे उपस्थितः भवेत् । एतेषां वस्तूनां सूच्यां 'क्षौमपरिधीन्' इति पदम् उल्लेखितम् ।

वैधर्म्यम् – अस्मिन् सूत्रे 'परिधिन्' इति पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणिः – परिधयो हस्तप्रमाणा होमकुण्डचतुःपार्श्वे स्थाप्याः पालाशादिदण्डा उच्यन्ते ।

गङ्गाधरः – टीका नास्ति ।

योगीन्द्रनाथसेनः – क्षौमं पट्टवस्त्रम् । परिधयः होमकुण्डचतुःपार्श्वे स्थाप्याः हस्तप्रमाणाः

पालाशादिदण्डाः ।

ज्योतिषचन्द्रसरस्वतिः – क्षौम परिधिस्तु अतसीतन्तुनिर्मितं परिधेयवस्त्रम् ।

विवेचनम् –

१) गङ्गाधरेण अत्र व्याख्या न कृता । परिधेः अर्थः चक्रपाणिः योगीन्द्रनाथसेनः एताभ्यां हस्तप्रमाणाः होमकुण्डस्य चतुर्षु दिक्षु स्थाप्याः पालाशादिवृक्षाणां दण्डाः इति गृहीताः ।

ज्योतिषचन्द्रसरस्वतिना 'परिधि' इति पदस्य 'क्षौमं' पदेन अन्वयं कृत्वा 'क्षौमपरिधी' इत्यस्य अर्थः अतसीतन्तुनिर्मितं परिधेयवस्त्रम् इति गृहीतः ।

२) परिधिः – पुं परिधीयते ऽ नेन । परि + धा + उपसर्गे धोः किः । ३ । ३ । ९२ । इति ।

परिवेशः। चन्द्रसूर्यसमीपमण्डलम् । यज्ञियतरुशाखा । यज्ञियतरोः पलाशादेर्यज्ञपशुबन्धनार्थं या शाखा निखायते तस्याम् । भूगोलादेः वेष्टनम् ।

– क्ली, परिधीयते यदिति । परि + धा + कर्मणि किः । परिधेयवस्त्रम् ।

(शब्दकल्पद्रुमः/खण्डः १)

– paridha - an enclosure, fence, wall, protection, the 3 fresh sticks (called medhyama, dakshing, uttara) laid round a sacrificial fire to keep it together a cover, garment.

(monier willam)

३) 'परिधि' इति पदं शारीरस्थाने अष्टमोऽध्याये दशमसूत्रे अस्ति ।

''तत ऋत्विक्.......कुशैः परिस्तीर्य परिधिभिश्च परिधाय....।।'' च. शा. ८।१०

चक्रपाणिः – परिधिभिरिति चतुर्भिः पलाशबृहद्दण्डैः । परिधायेति वेष्टयित्वा ।

गङ्गाधरः – परिधिभिः पलाशादिशाखासमिद्भिः ।

– पुत्रकामेष्टिविध्यां एतस्य पदस्य उल्लेखः अस्ति । अत्रापि चक्रपाणिः गङ्गाधरः महोदयाभ्यां परिधेः अर्थः 'होमकुण्डचतुःपार्श्वे स्थाप्याः पालाशादिदण्डाः' एवमेव गृहीतः ।

४) पालाशादिदण्डः इत्यस्य अर्थस्य अन्यशास्त्रेषु सन्दर्भः –

– खादिरं पालाशं वैकविशंतिदारुकमिध्वं करोति चयः परिधयः पालाशकाष्ठकाः ।

(आपस्तम्भं धर्मसूत्रम्)

– सप्तास्थासन् परिधयः त्रिः सप्तः समिधः कृताः । (ऋग्वेदः १०/९० /१५)

५) 'परिधिः' इति पदस्य वस्त्रम् इत्यर्थेन वर्णिताः इतरेषु शास्त्रेषु सन्दर्भाः –

''मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मुर्ध्निः

भ्राजद्विलुलितकचः स्त्रग्धरो रक्तनेत्रः ।'' (भागवत – ८। ७ । १७)

कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य । (भागवतटीका)

६) इत्थं कोशव्याकरणपरतन्त्रप्रत्ययानुसारेण 'परिधिः' इति पदस्य द्वौ अपि अर्थौ सिद्धौ ।

– होमकुण्डस्य पार्श्वे स्थाप्याः पालाशादिदण्डः परिधानवस्त्रं च द्वावपि अर्थौ योग्यौ ।

निष्कर्षः – १) वैधर्म्यमस्ति । परन्तु 'परिधि' पदस्य प्राप्तौ द्वावपि अर्थौ योग्यौ ।

२) द्वावपि अर्थौ स्वीकरणीयौ ।

(६) सन्दर्भ: – च. वि. ८/९३

मूलं सूत्रम् – तत्र भूमिपरीक्षा – भक्तिरियम् ......वक्ष्यते ।

अधिकरणम् – अस्मिन् सूत्रे दशविधपरीक्षागताया: देशपरीक्षाया: वर्णनम् अस्ति ।

वैधर्म्यम् – अस्मिन् सूत्रस्थस्य भक्ति: इति पदस्य विवरणे टीकाकारेषु वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – भक्तिरियं भजनशीलता।

योगीन्द्रनाथसेन: – भक्तिरिच्छा ।

ज्योतिषचन्द्रसरस्वति: – भक्ति: इच्छा ।

विवेचनम्

१) भक्ति: इति पदस्य इच्छा भजनशीलता च एतौ द्वौ शब्दार्थौ टीकाकारै: प्रस्तुता ।

२)भक्ति: – attachment devotiom, fondness of, devotion to, trust, homage, worship, faith, love, distribution , partition , seperation share (monier williams)

– स्त्री भज्यते इति । भज् + क्तिन् । विभाग:, सेवा , गौणवृत्ति: उपासना , अनुरागविशेष: परमेश्वरविषये परमप्रेम , श्रद्धा । (शब्दकल्पद्रुम:/खण्ड:५)

आराधना , सेवा , तदेकताने चित्तवृत्तिभेद: विभाग:, उपचार: श्रद्धा रचना अवयव: गौणवृत्ति: ।

(वाचस्पत्यम्/खण्ड:५)

भजन – क्ली भज् + भावे ल्युट् । भाग: सेवा । (शब्दकल्पद्रुम:/खण्ड:५)

– act of sharing, possession, reverence worship, adotration. (monier williams / 749)

३) 'भक्ति:' इति पदस्य अन्ये सन्दर्भा: ।

– १) स्वाद्वस्वादता भक्ति: । च. सू. २६/९

भक्ति: इच्छा इत्यर्थ: । चक्रपाणि:

२) विभागस्तु विभक्ति: स्यात् । च. सू. २६/३३

–विभक्तिः विभजनम् । विभागशः विभक्तत्वेन ग्रहणं यतो भवतीति भावः, तेन विभक्तिरित्येषा भावरुपा प्रतीतिः, न संयोगाभावमात्रं भवति, किन्तर्हि भावरुपविभागगुणयुक्ता इत्यर्थः । चक्रपाणिः

३) आहारयोगिनां भक्तिनिश्चयो न तु विद्यते । च. सू. २७/३०८

भक्तिः विभागः इयत्तेति अथवा भक्तिः इच्छा , तेन पुरुषेच्छानामनियमादुक्तमपि किञ्चित् प्रायः आहारयोगि न भवति.....। चक्रपाणिः

४) तत्र भिषजा पृष्टनैवं चतुर्णामृक्सामयजुरथर्ववेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या ।

च. सू. ३०/२१

भक्तिः सेवा इत्यर्थः । चक्रपाणिः ।

५) उन्मादं पुनः ---- भक्तिः -- विभ्रमं विद्यात् । च. नि. ७/५

भक्तिः इच्छा तद्विभ्रमाच्च यत्रेच्छा पूर्वमासीत तत्रानिच्छा भवति । चक्रपाणिः

६) भक्तिः देशेन । च. वि. ४/८ भक्तिरिच्छा । चक्रपाणिः

७) सत्वजः भावः --- भक्तिः । च. शा. ३/१३ भक्तिः इच्छा । चक्रपाणिः

८) तस्मात्तयोस्ताभिर्भक्तिः संस्पन्दते । च. शा. ४/१५ भक्तिः इच्छा । चक्रपाणिः

९) इह खलु वर्णश्च ---- भक्तिश्च --- । च. इं. १/३ भक्तिः इच्छा । चक्रपाणिः

१०) भक्तिः शीलं स्मृतिरत्यागो -- ।। च. इं. ११/७ भक्तिः इच्छा । चक्रपाणिः

११) नानाविधानां योगानां भक्तिदोषामयान्प्रति ।। च. क. १२/४०

भक्तिः इच्छा । चक्रपाणिः ।

एवं आयुर्वेदशास्त्रे भक्तिः इति पदं विभागः विभक्तिः वाचनं भजनं इच्छा च इति द्वाभ्याम् अर्थाभ्यां योजितम् ।

द्वौ अर्थौ युक्तियुक्तौ सतौ स्वीकरणीयौ च ।

<u>निष्कर्षः</u>

१) वैधर्म्यम् अस्ति ।

२) उभौ अर्थौ योग्यौ स्तः अतः स्वीकरणीयौ च ।

(७) सन्दर्भ: च. वि. ८/९५

मूलसूत्रम् – ''तत्र प्रकृत्यादीन् भावाननुव्याख्यास्याम: तद्यथा शुक्रशोणितप्रकृतिं
कालगर्भाशयप्रकृतिं मातुराहारविहारप्रकृतिं .......। ''

अधिकरणम्

– दशविधानां परीक्ष्यभावानां वर्णनान्तर्गतं प्रकृतित: परीक्षणस्य वर्णनम् अस्मिन् सूत्रे अस्ति ।

वैधर्म्यम् – कालगर्भाशयप्रकृतिम् इति पदस्य विवरणे वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि: – तथा शुक्रशोणितमेलककाले ऋतुरुपे यो दोष: उत्कटो भवति. स प्रकृतिमारभ्यते एवं गर्भाशयस्थश्च दोष: ।

गङ्गाधर: – मातु: कालगर्भाशयप्रकृतिं मातु: कैशोरयौवनतारुण्यप्रौढ्याद्यावस्थिककाले गर्भाशयस्य वा प्रकृति: ।

योगीन्द्रनाथसेन: – कालस्य गर्भकालस्य गर्भाशयस्य गर्भाधारस्थानस्य च प्रकृति: ।

ज्योतिषचन्द्रसरस्वति: – कालस्य कैशोरयुवप्रौढत्वादिकालभेदात् शुक्रस्य वैशेष्यात् एवं कालभेदाद् गर्भाशयस्यापि भेदात् शोणितवैशेष्यं भवेदिति अतो विभिन्नकाले जातस्य सन्तानस्य एकयोरेव पित्रो: शुक्रशोणितारब्धत्वेऽपि प्रकृतिवैशेष्यं भवतीति युज्यते मातुराहारविहारौ च गर्भकालीनौ ज्ञातव्यौ ।

विवेचनम्

– अस्मिन् सन्दर्भे टीकां कुर्वद्भि: टीकाकरै: विभिन्नानां विचाराणाम् अग्रिमं प्रस्तुतीकरणं कृतम् ।

अ) चक्रपाणि: – शुक्रशोणितयो: मेलकसमये य: ऋतुरुप: नित्यग: काल: आसीत् तस्य अनुरुपदोषाणां उत्कटता उत्पद्यते तथा तत्स्वरुपिणी प्रकृति: निर्मिमते ।

आ) गङ्गाधर: – मातु: वयस: अनुसृत्य दोषाणां उत्कटावस्था उत्पद्य तत्स्वरुपिणी प्रकृति: निर्मिमते ।

इ) योगेन्द्रनाथसेन: – गर्भकाल: क:? नाम कास्मिन् ऋतौ गर्भ: मातु: उदरे आसीत् तदनुसारं उत्पन्ना: दोषप्रकृत्ति: भवति ।

ई) ज्योतिषचन्द्रसरस्वतिः –कालवैशेष्येन शुक्रार्तवयोः वैशेष्यं उत्पद्यते तदनुसारं उत्पन्ना प्रकृतिः ।

उ) ज्योतिषचन्द्रसरस्वतिः – विभिन्ने काले एकस्मिन् एव मातापित्रोः शुक्रशोणितस्य गुणावस्थायाः विभिन्नत्वात् सन्तानस्य प्रकृतिः विभिन्ना भवति ।

ऊ) ज्योतिषचन्द्रसरस्वतिः – गर्भकालिनयोः मातुः आहारविहारेण उत्पन्ना दोषप्रकृतिः ।

एते सर्वे विचारप्रवाहाः योग्याः सन् स्वीकरणीयाः ।

निष्कर्षः

१) वैधर्म्यम् अस्ति ।

२) सर्वे विचाराः योग्याः स्वीकरणीयाः सन्ति ।

(८) सन्दर्भः – च. वि. ८।९८

मूलसूत्रम् – वातस्तु.......प्रततरुक्षक्षामसन्नसक्तजर्जरस्वराः ।

अधिकरणम् – दशविधाः परीक्ष्यभावाः इति अधिकरणे प्रकृतितः परीक्षणान्तर्गतं वातलव्यक्तिषु दोषगुणैः उत्पन्नानां लक्षणानां वर्णनम् अस्मिन् सूत्रे कृतम् ।

वैधर्म्यम् – अस्मिन् सूत्रगतस्य 'सक्त' इति पदस्य अर्थे वैधर्म्यं दृश्यते ।

टीका

| | |
|---|---|
| चक्रपाणिः | – सक्तः बद्धः । |
| गङ्गाधरः | – सक्तोऽव्यक्तः । |
| योगीन्द्रनाथसेनः | – सक्तो बद्धः । |
| ज्योतिषचन्द्रसरस्वतिः | – टीका नास्ति । |

विवेचनम् –

– सक्तः इति पदस्य अर्थः चक्रपाणियोगीन्द्रनाथसेनाभ्यां च बद्धः इति अर्थः गृहीतः । प्रत्युत गङ्गाधरेण अव्यक्तः इति गृहीतः ।

– सक्तः – त्रि सनज् + क्तः । अविरतः । आसक्तः (शब्दकल्पद्रुमः/खण्डः५)

- stuck or atlached to, in contact with, addicted devoted to , fond off - fixed or rivetted on (आपटे शब्दकोश)

– सक्त पदस्य चरकसंहितायां अन्यत्र उल्लेखाः

– सक्तविण्मूत्रः – च. सि. १२।१६

– प्रत्येत्यसक्तं सशकृच्च तैलम् । च. सि. १ ।४४

-- असक्तगतिदोषम् । च. चि. २३।२७

– अधः प्रतिहतो वायुरुर्ध्वस्त्रोतः समाश्रितः ।

उदानभावमापन्नाः कण्ठे सक्तस्तथोरसिः । च. चि. १८।६.

– क्षामाभिन्नसन्नसक्तजर्जरस्वरः । च. चि. १४।८

– किञ्चित्सन्धुक्षिते त्वग्नौ सक्तविण्मूत्रमारुतम् ।

द्वहं त्र्यहं वा संस्नेह्य स्विन्नाभ्यक्तं निरुहयेत् ।। च. चि. १५।७८

– स्त्रीषु अतिप्रसक्तस्य ---- । च. चि. ११।८

– रोहिण्यामतिसक्तस्य --- । च. चि. ८।४

– तस्य नारीप्रसक्तस्य शोषोऽन्तायोपजायते । च. इं ५।७

– कृशानां सक्तमूत्राणां -- । च. सू. २७।१७९

एषु सर्वेषु सन्दर्भेषु सक्त इति पदं बन्धनम् आसक्तं रतं भवनं ग्रसनम् अवरुन्धनम् इति अर्थेन योजितम् ।

– अन्ये टीकासन्दर्भाः –

– प्रसक्तम् – निरन्तरम् । चक्रपाणिः च. चि. २०।१५

– असक्ता अविश्रान्ता दोषेषु गतिर्यस्य तत् असक्तगतिदोषम् । चक्रपाणिः च. चि. २३।२४

– असक्तमिति अप्रतिबद्धम् । चक्रपाणिः च. क. १२।५१

– असक्तमिति सङ्गं विना । चक्रपाणिः च. सि. १।४४

– गङ्गाधरेण अन्यस्मिन् एकस्मिन् सन्दर्भे सक्तः पदस्य अर्थः अव्यक्तः इति कृतः ।

सक्तजल्पप्रलापः । च. चि. १७।२५

अव्यक्तजल्पस्य अव्यक्तानर्थकप्रलापस्य । गङ्गाधर टीका

– अत्र सक्त पदस्य अर्थः स्वराय अस्ति ।

– अतः यदा स्वरवहं स्त्रोतः यदा केनापि हेतुना अवरुद्धं स्यात् तदा स्वरोत्पत्तिः अपि अव्यक्ता एव भविता ।

– अतः गङ्गाधरस्य अर्थः अपि योग्यः ।

निष्कर्षः

१) द्वौ अपि अर्थौ योग्यौ अतः स्वीकरणीयौ ।

२) वैधर्म्यं नास्ति ।

(९) सन्दर्भ: – च. वि. ८।९८

मूलसूत्रम् – वातस्तु.....प्रततरुक्षक्षामसन्नसक्तजर्जरस्वरा: ।

अधिकरणम् – दशविधा: परीक्ष्यभावा: इति अधिकरणे प्रकृतित: परीक्षणान्तर्गतं वातलव्यक्ते: दोषगुणै: उत्पन्नानां लक्षणानां वर्णनम् अस्मिन् सूत्रे कृतम् ।

वैधर्म्यम् – अस्मिन् सूत्रस्थस्य जर्जर: इति पदस्य अर्थे वैधर्म्यं दृश्यते ।

टीका

| | |
|---|---|
| चक्रपाणि: | – जर्जर: भग्नपात्रध्वनिसम: |
| गङ्गाधर: | – जर्जर: असंहत: । |
| योगीन्द्रनाथसेन: | – जर्जर: असंहत: । |
| ज्योतिषचन्द्रसरस्वति: | – टीका नास्ति । |

विवेचनम्

१)जर्जर: इति पदं स्वरस्य विशेषणम् । चक्रपाणिना अस्य अर्थ: भग्नपात्रस्य ध्वने: समान: स्वर: इति कृत: । प्रत्युत गङ्गाधर: योगीन्द्रनाथसेन: च एताभ्याम् असंहत: स्वर: इति कृत: ।

२) अस्मिन् सूत्रे पाठभेद: अस्ति । चक्रपाणिना सूत्रे 'सन्न' इति पाठ: स्वीकृत: उत गङ्गाधर: योगीन्द्रनाथसेन: च एताभ्यां भिन्न: इति पाठ: स्वीकृत: । अस्मात् पाठभेदात् जर्जर पदस्य व्याख्यायां वैधर्म्यं प्राप्तम् यत: गङ्गाधर: योगीन्द्रनाथसेन: च एताभ्याम् भिन्न: पाठस्य अर्थ: भङ्गरूप: तना भग्नपात्रध्वनिसम: इति कृत्वा जर्जर: पाठस्य अर्थ: असंहत: इति कृत: । चक्रपाणि: भिन्न: इति पाठस्थाने सन्न: इति पाठ: गृहीत: तस्य टीका हीन: इति कृता च । जर्जर: पदस्य अर्थ: भग्नपात्रध्वनिसम: इति गृहीत: । अत: आदौ जर्जर: पदस्य शब्दार्थ: कोशात् पश्याम: ।

जर्जर: – पुं जर्जति स्वगुणेनापरान् निन्दतीति । जर्ज् + बाहुलकात् अर: । शैलज:, जीर्ण: विदीर्ण:

(शब्दकल्पद्रुम: । खण्ड: ४)

– infirm, decrepit, decayed torn or broken in pieces, perforated divided dull hollow sound.

– चरकसंहितायां जर्जर: पदम् अधोक्ते सन्दर्भे वर्णितम् ।

– शुष्कं रुक्षं यथा काष्ठं जतुजग्धं विजर्जरम् । च. चि. २।४।४२

– जर्जरेणोरसा कृच्छ्रं गम्भीरमनुनादयन् । च. चि. १७।२७

– जर्जरेणोरसा कृच्छ्रमुरः शूलातिपीडितः । च. चि. ८।१८

– सुरा जर्जरीकरोति । च. सू. २७।४

– सक्षीरं वायुना भग्ने दद्याज्ज्जर्जरिते तथा । च. चि. २८।१७१

– जर्जर पदस्य व्याख्याः अन्येषु सन्दर्भेषु टीकाकारैः अधोक्तवत् वर्णिताः ।

जर्जरीकरोतीति श्लथमांसादि उपचयं करोति । चक्र. च. सू. २७।४

जर्जरीकरोतीति मांसादि शिथिलीकरोति । शिवदाससेनः च. सू. २७।४

चूर्णीकृतम् जर्जरीकृतम् । चक्रपाणिः च. चि. १२/३९

चूर्णीकृतानाम् जर्जरीकृतानाम् । चक्रपाणिः च. चि. ७/६३

भञ्जनं जर्जरीकरणम् । चक्रपाणिः च. सू. १८/४

अजर्जरम् अस्फुटितम् । चक्रपाणिः च. शा. ८/५

– चक्रपाणेः भग्नपात्रध्वनिसमः इति अर्थः जर्जरः पदं योग्यमेव अस्ति ।

– गङ्गाधरः योगीन्द्रनाथसेनः एताभ्यां भिन्नः इति पृथक् पाठस्य अर्थः भग्नपात्रध्वनिसमः इति अर्थं गृहीत्वा जर्जरः पदस्य अर्थः असंहतः कृतः । एतद् स्वरविशेषणम् अस्ति । असंहतः इत्यर्थः यस्य संहतीकरणं नास्ति एकसंधत्वं नास्ति तत् ।

– असंहतः स्वरः नाम भाषणसमये स्वरे संहतताया: अभावः । स्खलनं वदति । एकसंधत्वं नास्ति । अतः एषः अपि पाठः योग्यः ।

– एवं जर्जरस्वरस्य द्वौ अर्थौ प्राप्येते ।–

अ) भग्नपात्रध्वनिसमः स्वरः ।

आ) असंहतः एकसंधत्वं न सन् स्वरः स्खलन् भाषणम् ।

एतौ द्वौ अर्थौ युक्तियुक्तौ ।

निष्कर्षः – १) वैधर्म्यम् अस्ति ।

२) द्वौ पाठौ टीका च युक्तियुक्ताः अतः स्वीकरणीयः ।

ई) वैधर्म्यम् अस्ति । एते विभिन्नाः विचाराः एकस्य एव विषयस्य विविधान् दृष्टिकोणान् विविधाः अवस्थाः च दर्शयन्ति ।

अस्य वैधर्म्यप्रकारे ०४ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भः – चरक विमानम् ३/२४

मूलं सूत्रम् – प्रागपि .................. सञ्चयात् परिग्रहः, परिग्रहाल्लोभः प्रादुरासीत् कृते ।

अधिकरणम् – विकाराणां प्रथमोत्पत्तिः कथं भूता तथा आयुषः क्षयक्रमः कथमस्ति अस्य वर्णनम् अस्मिन् सूत्रे अस्ति । कृतयुगस्य अन्ते विकाराणाम् उत्पत्तिः कथं प्रारब्धा इत्यत्र वर्णितम् ।

वैधर्म्यम् – अस्य सूत्रगतस्य 'परिग्रहः' इति पदस्य टीकायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणिः – परिग्रहः ममता ।

गङ्गाधरः – परिग्रहः प्रतिग्रहः ।

योगीन्द्रनाथसेनः – परिग्रहः ममता ।

ज्योतिषचन्द्रसरस्वतिः – अन्योपार्जितस्य ग्रहणम् ।

विवेचनम्

– सर्वादौ एतासां सर्वासां टीकागतानां पदानां च व्याकरणं पश्यामः ।

परिग्रहः – पुं परि + ग्रह् – अप् । स्वीकारे । सैन्यपश्चात्भागे – कर्मणि । भार्यायां परिजने – कर्मणि । करणे – मूले । शपथे । परितोः ग्रहः । राहुणा सूर्येणोः ग्रहणम् । विष्णोः ।

(वाचस्पत्यम् / खण्ड ५/४२४६)

– पुं. (परिग्रहणमिति । परि + ग्रह + ग्रह वृट्निश्चिगमश्च (३/३/८ इति अम् ।)

प्रतिग्रहः । सैन्यपश्चात्भागः । पत्नीः । भार्या । परिजनः । परिवारः ।आदानम् ।स्वीकारः । मूलम् । कन्दः । शापः । शपथः । राहुवक्रस्थः भास्करः । विष्णुः । साधनम् ।

– परिगृह्यते अनेनेति विग्रहे हस्तः । परिगृह्णाति इति वा परिग्रहः ।

(शब्दकल्पद्रुमः / खण्ड ३)

– seizing, holding, taking, grasping, surrounding, enclosing., Putting on,

wrapping round, Assuming, taking, Receiving, taking accepting, Possessions, Property, belongings, Marriage, A wife, Queen, Taking under one's protection, favouring, Attendants, followers, members of a family, a household of a king, Root, Origin, The eclipse of the sun or moon, An Oath, The rear of an Army, Name of Vishnu, Summing up. (आपटे शब्दकोश / ३१९)

ममता – स्त्री ( मम् + भावे तल् । टाप्) दर्पः । अभिमानः । (हेमचन्द्रः) ममत्वम्

ममत्वम् – स्त्री (मम + भावे त्व) मदीयत्वम् (शब्दकल्पद्रुम् । खण्ड ३/६३३)

– स्त्री मम भावः तल् । दर्पे । अहङ्कारे । मत्सम्बन्धे । (वाचस्पत्यम् । खण्डः ६)

– The feeling of mine. The sense of ownership self interest selfishness, Pride, arrogance, self - sufficiency, Individuality. (Monier Williams / 789)

प्रतिग्रहः – पुं. प्रति + ग्रह – अप् । स्वीकारे । अदृष्टार्थदत्तद्रव्यस्य ग्रहणे । सैन्यपृष्ठे । पतद्ग्रहे ।

(वाचस्पत्यम् / खण्डः ६)

– पुं (प्रतिग्रहणमिति । प्रति + ग्रह + ग्रहवृद्निश्चिगमश्च ३ / ३ / ५८ इति भावे अप्) स्वीकरणम्। सैन्यपृष्ठम् । पतद्ग्रहः । (शब्दकल्पद्रुमः / खण्डः ३)

– Receiving, Accepting, A gift, donation, Present, A Receiver, Favour, grace, Marrying, Listening to, The rear of an Army, A Spitting pot

(आपटे शब्दकोशः / ३५७)

– उपरोक्तात् वर्णनात् अग्रिमं विवेचनम् शक्यम् ।

– कृतयुगस्य अन्ते सांपन्निकेषु व्यक्तिषु अत्यादानात् शरीरगौरवः उत्पन्नः । तस्मात् श्रमः श्रमात् आलस्यं प्रादुर्भूतम् । आलस्यात् सञ्चयवृत्तिः वर्धिता ।

– अस्याः एव सञ्चयप्रवृत्याः परिग्रहः उत्पन्नः परिग्रहात् लोभनिर्मितिः अभवत् ।



– एतावती विकृति: कृतयुगस्य अन्तिमे काले सञ्जाता ।

– तत: विकारोत्पत्ति: त्रेतायुगस्य प्रारम्भे अभवत् ।

– अस्यां सम्प्राप्तौ आलस्यात् सञ्चय: सञ्चयात् परिग्रह: परिग्रहात् लोभ: इति अत्रस्थ: विवेचनीय: विषय: अस्ति ।

– यदा अलस: उत्पद्यते तदा परिश्रम्य प्रयत्नेन किमपि प्राप्तव्यम् इति इच्छा नष्टा भवति ।

– तस्मात् मनुष्य: स्वम् आवश्यकान् घटकान् सञ्चयितुं प्रारभते । वस्तुनां सञ्चयात् तदर्थं कष्टान् चेष्टा: प्रयत्नान् च कर्तुं नारभते । एवं आलस्यात् सञ्चय: निर्माति ।

– अनन्तरं यदा वस्तुनां सञ्चय: भवति तदा तेषु आवश्यकीषु वस्तुषु ममत्वम् उत्पद्यते । 'एतानि वस्तुनि मम समीपे भवेत् एव' एतादृशी मनोऽवस्था भवति । एताम् एव प्रतिग्रह: तथा ममतारुपी परिग्रह: इति वदन्ति ।

– एवं सञ्चयात् ममत्वस्वरुपी परिग्रह: उत्पद्यते । चक्रपाणिना योगीन्द्रनाथसेनेन च कृता 'परिग्रह: ममता' इति टीका एवं योग्या अस्ति ।

– गङ्गाधरेण 'परिग्रह: प्रतिग्रह:' इति वर्णितम् । तदपि योग्यमेव । सञ्चयं कुर्वन् येषु वस्तुषु ममत्वं तानि वस्तुनि अनावश्यकानि अपि सन्ति  सञ्चितानि करोति । तानि अनावश्यकानि वस्तूनि अपि स्वस्वामित्वे स्थाप्यन्ते । एतस्मात् लोभ: उत्पद्यते ।

– एतम् अर्थम् गङ्गाधरस्य टीका व्यनक्ति । तद् योग्यम् एव ।

– अनन्तरं ज्योतिषचन्द्रसरस्वतिना स्वटीकायां अस्या: ममत्वप्रतिग्रहावस्थाया: अग्रिमा स्थिति: वर्णिता ।

'परिग्रह: अन्योपार्जितस्य ग्रहणम् ।'

– यदा सञ्चयसमये ममत्वभावयुक्तानां वस्तूनां प्रतिग्रह: क्रियते तदा यद् वस्तु आलस्यात् स्वप्रयत्नेन लब्धुम् अशक्यम् तादृशम् वस्तु यदि अपरेण प्रयत्नपूर्वकं प्राप्तम् स्यात् तदा तस्य ग्रहणम् क्रियते । स्वस्य मनसा ईप्सितं वस्तु अपरस्य स्वामित्वे स्यात् तर्हि तद् तस्मात् बलपूर्वकं प्रापणीयम् इति प्रवृत्ति: उत्पद्यते । एतस्मात् लोभ: चौर्यं च उत्पद्यते ।

– अत: ज्योतिषचन्द्रसरस्वते: टीका अपि योग्या । केवलं तेन ममत्वपरिग्रह्यो: अग्रिमा अवस्था वर्णिता ।

निष्कर्ष: –

१) चतस्त्र: अपि टीका: योग्या: ।

२) शब्दार्थश: वैधर्म्यं दृश्यते ।

३) केवलम् अर्थश: अभिप्रेतार्थश: च एतयो: मध्ये एकस्या: एव घटनाया: विविधा: अवस्था: वर्णिता: इति दृश्यते ।

४) चत्वार: अपि टीकाकारा: एकस्या: एव अवस्थाया: विविधा: अर्थच्छटा: वर्णयन्ति ।

५) विशेषत: ज्योतिषचन्द्रसरस्वतिना परिग्रहस्य अन्तिमा अवस्था नाम चौर्यं वर्णितम् ।

(२) सन्दर्भ: – च वि ४/८

मूलं सूत्रम् – इमे तु खल्वन्येऽप्येवमेव भूयो ऽ नुमानज्ञेया भवन्ति भावा: ।

तद् यथा.......विज्ञानं व्यवसायेन........इति ।

अधिकरणम् – 'त्रिविधरोगविशेषविज्ञानम्' इति प्रकरणाधिकरणस्य अन्तर्गतं 'त्रिविधपरीक्षाभि: ज्ञेया भावा:' इति उपप्रकरणाधिकरणस्य अन्तर्गतानाम् अनुमानज्ञेयभावानां वर्णने एतत् सूत्रम् ।

वैधर्म्यम् – अस्य सूत्रस्य ' व्यवसाय ' पदस्य टीकायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि: – व्यवसाय: प्रवृत्ति: यथा पेयजले पानार्था प्रवृत्ति: तेनानुमीयते जलज्ञानमस्य जातं कथमन्यथा ज्ञानकार्यार्थक्रियायां प्रवर्तत इति ।

गङ्गाधर: – व्यवसायेन शास्त्रादिषु विकल्पबुद्ध्या ।

योगीन्द्रनाथसेन: – व्यवसाय: अध्यवसाय अवधारणम् ।

ज्योतिषचन्द्रसरस्वति: – व्यवसायेन अनुष्ठानेन क्रियेत् इत्यर्थ: ।

विवेचनम्

| |
|---|
| चक्रपाणि: – प्रवृत्ति: |
| गङ्गाधर: – शास्त्रादिषु विकल्पबुद्धि: । |
| योगीन्द्रनाथसेन: – अध्यवसाय अवधारणम् । |
| ज्योतिषचन्द्रसरस्वति: – अनुष्ठानम् |

– व्यवसाय: – व्याकरणम् ।

– पुं – वि + अव + सो + घञ् । उपजीविका । पेशा इति पारस्यभाषा । अनुष्ठानम् । निश्चय: । विष्णु: । ( शब्दकल्पद्रुम: / खण्ड: ४ / ५३४ )

– पुं वि + अव + सो + घञ । उद्यम:। उपजीविका । अनुष्ठानम् । अवधारणम् । विष्णु: । (वाचस्पत्यम् /खण्ड:६/४९८३)

– Strenuous effort or exertion, Settled determination, resolve, purpose, intention to, to make up one's mind, Resolution, Trade, Business an act action performance having a resolute mind. (Monier Williams / 1033)

– कोशस्थ: अर्थ: दृष्ट: चेत् 'व्यवसाय' विभिन्नै: अर्थै: योजित: इति दृश्यते । अत: अस्य पदस्य विभिन्ना: अर्था: प्राप्यन्ते तेन परतन्त्रप्रत्यय: इति अर्थाश्रय: विचार्यते ।

| टीकाकाराणां अर्थ: | – | कोशगत: अर्थ: |
|---|---|---|
| प्रवृत्ति: | – | उद्यम:<br>Business, action, trade, exertion. |
| शास्त्रादिषु विकल्पबुद्धि: | – | Resolution, having a resolute mind |
| अवधारणम् | – | अवधारणम्<br>Settled determination |
| अनुष्ठानम् | – | अनुष्ठानम् । |

– एवं टीकाकाराणां चत्वार: अपि अर्था: कोशदृष्ट्या व्याकरणदृष्ट्या च योग्या: । अधुना प्रतिटीकाकारस्य व्याख्यानां ऊहापोह: क्रियते ।

चक्रपाणि:

– चक्रपाणिना व्यवसायः पदस्य अर्थः अस्य सूत्रस्य कृते प्रवृत्ति: इति कृत: । एतदर्थ: अधोल्लिखितं उदाहरणं दत्तम् ।

पेयजले पानार्था प्रवृत्ति: अस्ति । तस्मात् जलज्ञानम् अनुमीयेत ।

– विज्ञानं साक्षीरुपेण न चेत् सद् तद् संबधितायां क्रियायां विकृता प्रवृत्ति: अशक्या ।

– अत्र अनुमानपरीक्षायां विज्ञानं इति भावपदार्थस्य परीक्षणं अनुमानेन व्यवसायेन भवति ।

– कस्यापि घटकस्य विशिष्ट ज्ञानं (विशेष ज्ञानं) तस्मिन् घटकविषये कृताया: क्रियाया: प्रवृत्तित: एव भवति । यदि क्रियायां प्रवृत्ति: न कृता चेत् तर्हि तस्य घटकस्य विज्ञानं केवलम् अशक्यम् । तथैव कोऽपि पुरुष: कस्मिन् अपि विशेषे स्थाने प्रवर्तेत तर्हि स: घटकं जानाति इति अनुमानेन ज्ञायते । अत: चक्रपाणि: अनेन अर्थेन व्यवसायं वर्णयति ।

– अन्यत्र चरकसंहितायां अन्येषां सन्दर्भाणां टीकासु चक्रपाणि: व्यवसायस्य व्याख्यां अधोनिर्दिष्टां करोति ।– व्यवसायो नाम निश्चय: । च. वि. ८/४७

– व्यवसाय: अवधारणम् । च. सू. १/१३६

– व्यवसायो अध्यवसायो ग्रहणम् । च. नि. १/४१

– अत: व्यवसायस्य निश्चय: अवधारणम् अध्यवसायः च आदयः अन्ये अर्थाः अपि चक्रपाणेः अभिप्रेताः । परं अस्मिन् अनुमानपरीक्षायाः अधिकरणे तत्रभवता व्यवसायस्य अर्थ: 'प्रवृत्ति:' इति गृहीत: ।

– अधिकरणम्, ऊह्यम् पदार्थ: इति तन्त्रयुक्तीनाम् आधारेण एष: अर्थ: योग्य: अस्ति ।

गङ्गाधर:

– अस्मिन् अधिकरणे गङ्गाधर: व्यवसायस्य अर्थं 'शास्त्रादिषु विकल्पबुद्धि: इति स्वीकरोति ।

– विज्ञानस्य अनुमानं व्यवसायेन कर्तव्यम् इति अनुमानपरीक्षायां सूत्रार्थ: अस्ति ।

– शास्त्रादिषु विकल्पबुद्धि: नाम ऊहापोहं कृत्वा योग्यायोग्ये, कर्माकर्मणी, हिताहिते स्वीकार्हास्वीकार्हे आदीन् विकल्पान् विचार्य तथा तस्मात् कार्यकरणस्य प्रेरणा प्राप्ति: । अनया विकल्पबुद्ध्या तद् विषयस्य विशेषं ज्ञानं प्राप्यते ।

–यदा विविधान् विकल्पान् विचार्य बुद्धिपूर्वकं कार्यं क्रियते तदा तद्विषयस्य विशेषं ज्ञानं प्राप्यते ।

– अत: ईदृशाया: विकल्पबुद्धे: अस्तित्वेन विज्ञानम् अनुमीयते ।

– एवं गङ्गाधरस्य अयम् अर्थ: तदनुसारं कृतं विवेचनम् च सर्वथा योग्यम् अस्ति ।

– गङ्गाधरेण अन्यत्र कृता व्यवसायस्य व्याख्या

'मोक्षे व्यवसाय: मोक्षसाधनकर्मसु प्रवर्तनम् ।' (गङ्गाधर: च. शा. १/१४४)

– अत्र मोक्षप्राप्त्यर्थं आवश्यके साधनस्वरुपिणि कर्मणि प्रवृत्ति: इति व्यवसाय: एवम् उक्तम् ।

– अत: गङ्गाधराय व्यवसायस्य प्रवृत्ति: इत्यपि अर्थ: सम्मत: ।

– तथैव व्यवसायस्य अध्यवसाय: निश्चय: च एतौ अपि अर्थौ गङ्गाधर: स्वीकरोति ।

(च. वि. ८/४७)

– एवं गङ्गाधरेणापि अन्यत्र अन्ये अर्थ: वर्णिता: ।

– अस्मिन् सूत्रे तत्रभवता अधिकरणानुसारं अर्थनिष्पत्ति: कृता या सर्वथा युक्तियुक्ता अस्ति ।

योगेन्द्रनाथसेन: – योगीन्द्रनाथसेनेन व्यवसायस्य अर्थ: 'अध्यवसाय: अवधारणम्' इति गृहीत: ।

– अध्यवसाय: इत्यर्थ: निश्चय: । कस्यापि घटकस्य विषयस्य वा विज्ञानं तद्विषयस्य निश्चयपूर्वकं कृतस्य अवधारणया अनुमीयते ।

– कस्यापि विषयस्य निश्चयपूर्वकम् अवधारणात् तद्विषयस्य अनुमानं कर्तुं शक्यम् ।

– यदा निश्चितम् अवधारणं भवति तदैव तद् विषयं प्रति कार्यप्रवृत्ति: शक्या ।

– योगीन्द्रनाथसेनेन चरकशारीरस्थानस्य प्रथमे अध्याये व्यवसायस्य व्याख्या कृता ।

'व्यवसाय: चेष्टा ।' (योगीन्द्रनाथ: च. शा. १/१४४)

– अत: योगीन्द्रनाथसेनस्य व्याख्या तथा तस्य अभिप्रतार्थ: युक्तियुक्त: अस्ति ।

ज्योतिषचन्द्रसरस्वति:

– अत्रभवान् विज्ञानस्य अर्थः शास्त्रादिज्ञानं इति मन्यते । तथा तदनुषंगेन व्यवसायस्य अर्थम् 'अनुष्ठानात् क्रियाकरणम्' इति करोति । एतद् वर्णनं चक्रपाणे: विचारान् अनुसरति । अनुष्ठानात् यदा कार्यप्रवृत्ति: भवति तदा तस्मात् तद्विषयस्य विज्ञानं अनुमीयते ।

– एवं इयम् अपि व्याख्या युक्तियुक्ता अस्ति ।

– टीकाकाराणां सम्पूर्ण: विचार: लक्ष्यते चेत् तत्रभवतां चत्वार: अपि अर्था: एकस्या: एव घटनाया: अवस्थारुपिण: सन्ति ।

विज्ञानं व्यवसायेन

| | | |
|---|---|---|
| विकल्पबुद्धि: | (गङ्गाधर:) | व्यवसाय: |
| ↓ अध्यवसाय: | (योगीन्द्रनाथसेन:) | |
| ↓ अवधारणम् | (योगीन्द्रनाथसेन:) | |
| ↓ कार्येषु प्रवृत्ति: | (चक्रपाणि:) | |
| ↓ अनुष्ठानम् | (ज्योतिषचन्द्रसरस्वति:) | |
| ↓ तद् विषयस्य विज्ञानम् | | |

निष्कर्ष:–

– वैधर्म्यम् अस्ति ।

– परंतु तद् 'व्यवसाय:' इति घटकस्य विविधानाम् अवस्थानाम् अवबोधकम् अस्ति ।

– अत: चतुर्णाम् अपि टीकाकाराणां व्याख्या: युक्तियुक्ता: अभिप्रेतार्था: समाना: च सन्ति ।

(३) सन्दर्भः – च. वि ४/८

मूलं सूत्रम् – इमे तु खल्वन्ये ऽ प्येवमेव भूयोऽनुमानज्ञेया भवन्ति भावाः ।

तद् यथा ---- धृतिमलौल्येन --- इति ।

अधिकरणम् – त्रिविधरोगविशेषविज्ञानम् इति प्रकरणाधिकरणे त्रिविधपरीक्षाभिः ज्ञेया भावाः इति उपप्रकरणे अनुमानज्ञेयभावानां वर्णने एतद् सूत्रम् अस्ति ।

वैधर्म्यम् – अस्य सूत्रस्य 'धृतिम् अलौल्येन' इति पदानां टीकायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणिः – टीका नास्ति ।

गङ्गाधरः – धृतिर्नियमात्मिका बुद्धिः । अलौल्यम् अचञ्चलत्वम् ।

योगीन्द्रनाथसेनः – धृतिं सन्तोषं अलौल्येन मनसः अचापलेन ।

ज्योतिषचन्द्रसरस्वतिः – धृतिम् इन्द्रियनियमनम् अलौल्येन अलोभेन ।

विवेचनम्

| टीकाकारः | धृतिम् | अलौल्यम् |
|---|---|---|
| चक्रपाणिः | – | – |
| गङ्गाधरः | नियमात्मिका बुद्धिः | अचञ्चलत्वम् । |
| योगीन्द्रनाथसेनः | सन्तोषम् | मनसः अचापलम् । |
| ज्योतिषचन्द्रसरस्वतिः | इन्द्रियनियमनम् | अलोभः । |

(सन्दर्भः– च. वि. ४/८)

– व्याकरणम्

धृतिः – स्त्री धृ – क्तिन् । धारणे । तुष्टौ । धैर्ये । अष्टमे योगभेदे । सुखे । मातृकाभेदे । मानस धारणाभेदे । जयद्रथस्य पौत्रः । दक्षसूतारुपधर्मपत्नीभेदे । विश्वदेवभेदे । व्यभिचारिभेदे । भूमिगुणत्वभेदे । (वाचस्पत्यम् /खण्डः ५/३९०६)

– स्त्री धृ + क्तिन् । तुष्टिः । योगभेदः । धैर्यम् । धारणम् । सुखम् । क्रतुः ।

(शब्दकल्पद्रुमः/ खण्डः २/८०५)

– taking, holding, seizing Having, Possessing, maintaining, supporting,

Firmness, Steadiness, constancy, Fortitude, energy resolution, courage, self command, Satisfaction, contentment, pleasent, happiness, delight, joy, Satisfaction considered as one of the 33 subordinate feelings in Rhetoric.

- A sacrific (आपटे शब्दकोश:)

<u>अलौल्यम्</u> – न लौल्यम् अलौल्यम् । (नञ् तत्पुरुष समास:)

–लोल लुल् । त्रि लोड्तीति । लुड् विलोडने+अच् । चञ्चल: । साकाङ्श: । तामसमनु: ।

(शब्दकल्पद्रुम:/खण्ड: ४)

– restlessness, unsteadiness inconstancy, ficleness, Lustfulness, egerness,

greediness passion (Monier Willians)

– चक्रपाणि:– अत्रभवान् अत्र व्याख्यां न करोति ।

– गङ्गाधर: – गङ्गाधरेण धृते: अर्थ: 'नियमात्मिका बुद्धि:' प्रत्युत अलौल्यम् इत्यस्य अर्थ: 'अचञ्चलत्वम्' इति गृहीत: ।

– उभौ अपि अर्थौ कोशाधारेण युक्तियुक्तौ । अचञ्चलत्वात् नियमात्मकबुद्धे: अनुमानम् शक्यम् ।

– नियमात्मकया बुद्ध्या एकादशेन्द्रियाणां नियमनं भवति ।

– इन्द्रियकार्यार्थे, हितकराणां विषयाणां सेवनाय, अहितकरेभ्य: विषयेभ्य: निग्रहाय नियमात्मिका बुद्धि: आवश्यकी ।

एवं गङ्गाधर: ज्योतिषचन्द्रसरस्वत्यो: विवेचने वैधर्म्यं नास्ति ।

– योगेन्द्रनाथसेन: – अत्रभवान् धृते: अर्थं सन्तोष: उत अलौल्यम् इत्यस्य अर्थ: 'मनस: अचापलम्' इति स्वीकरोति । एतौ अर्थौ अपि कोशाधारेण योग्यौ ।

यदि मनस: चापल्यं न स्यात् तस्मात् सन्तोषभाव: अनुमीयते ।

सन्तोष: नाम तुष्टि: । यदा नियमात्मिकया बुद्ध्या इन्द्रियनियमनं भवति तदैव सर्वे विकारा: विनश्य संपूर्णं स्वास्थ्यं प्राप्यते । एतद् संपूर्णं स्वास्थ्यम् एव सत्या तुष्टि: उच्यते । न शारीरी मानसी वा विकृति: इत्येव सत्यसन्तोष: ।

एवं अभिप्रेतार्थया दृष्ट्या वैधर्म्यं नास्ति ।

– ज्योतिषचन्द्रसरस्वतिः – अत्रभवान् धृतेः अर्थम् इन्द्रियनियमनं प्रत्युत अलौल्यस्य अर्थं अलोभः इति गृह्णति । एतौ अपि अर्थौ कोशाधारेण योग्यौ ।

लोभस्य अभावात् इन्द्रियनियमनम् अनुमीयते ।

– एवं सर्वेषां टीकाकाराणां विवेचनं एकस्मिन् एव विषये सम्बद्धम् । केवलं तत्रभवन्तः तस्य तस्य विषयस्य भिन्नाः अवस्थाः विमर्शिताः ।




– अतः टीकाकारेषु शब्दार्थशः वैधर्म्यं दृश्यते तथापि अभिप्रेतार्थतः वैधर्म्यं नास्ति ।

निष्कर्षः

१) टीकाकारेषु न वैधर्म्यम् ।

२) एकस्यैव विषयस्य विविधानाम् अवस्थानां वर्णनम् ।

३) तस्मात् अभिप्रेतार्थः एकः एव ।

(४) सन्दर्भ: – च. वि. ८।४

मूलसूत्रम् – ततोऽननन्तरमाचार्यं परीक्षेत तद्यथा पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं -------- चेति ।

अधिकरणम् – 'लक्षणाचार्यशिष्याणां परीक्षाकारणम्' अधिकरणे आचार्यपरीक्षा इति उपाधिकरणे अस्य सूत्रस्य वर्णनम् अस्ति ।

वैधर्म्यम् – अस्य सूत्रस्य 'जितहस्तम् ' पदस्य व्याख्यायां वैधर्म्यं दृश्यते ।

टीका

चक्रपाणि: – टीका नास्ति ।

गङ्गाधर: – जितहस्तं हस्तेन यत् कर्म चिकित्सार्थं करोति तत् कर्म झटिति सिध्यतीति तं जितहस्तम् ।

योगीन्द्रनाथसेन: – जितहस्तं शस्त्रोपचारादिषु क्षिप्रहस्तम् ।

ज्योतिषचन्द्रसरस्वति: – जितहस्तं शस्त्राद्यवचारणाय मनोऽनुगतहस्तपरिचालनसमर्थम् ।

विवेचनम्

– जितहस्तम् – Jita - won, acquired, conqured, subdued.

- jitahasta - mfn, one who has exercised his hand (monier williams / 420)

– जि – त्रि. जयतीति । जि + बाहुलकात् डि: । जेता । (शब्दकल्पद्रुम:/खण्ड: २/५३४)

– कोशानुसारं जितहस्तम् पदस्य अर्थ:

''ईदृश: पुरुष: येन स्वयं हस्ताय (कार्यस्य) अभ्यास: कारित:''

– आदौ जितहस्तम् पदस्य चरकसंहितागता: अन्ये सन्दर्भा: पश्याम: ।

अ) कारणं भिषगित्युक्तमग्रे तस्य परीक्षा ........जितहस्तता .......चेति । च.वि.८/८६

यत: परीक्षायां भिषक्परीक्षा वर्णिता । वैद्यस्य गुणेषु 'जितहस्तता' वर्णिता अस्ति । अस्मिन् पदे योगेन्द्रनाथसेन: एवं टीकां करोति यत् 'जितहस्तता शस्त्रोपचारादिषु हस्तलाघवम् ।'

– एषा टीका अधिकरणगतस्य उपरोक्तस्य सूत्रस्य योगेन्द्रनाथसेनस्य टीका समाना अस्ति । तथैव ज्योतिषचन्द्रसरस्वति: अग्रिमां व्याख्यां करोति ।

'जितहस्तता अष्टविधे शस्त्रकर्मणि बस्त्यादिप्रयोगे च पुनः पुनः योग्यां कृत्वा स्ववशहस्तता ।'

(ज्योतिषचन्द्रसरस्वतिःच. वि. ८/८६)

– अष्टविधे शस्त्रकर्मणि बस्त्यां च इत्यादौ उपक्रमप्रयोगे पुनः पुनः योग्यां कृत्वा, अभ्यस्य च स्ववशहस्तता प्रापणम् इत्यर्थः जितहस्तः ।

– एवं अस्य सूत्रस्य टीकयोः जितहस्तः पदस्य द्वौ अर्थौ प्राप्येते ।

१) कर्मणि हस्तलाघवम् ।

२) कर्मसु योग्यां कृत्वा स्ववशहस्तता प्रापणम् ।

– पुनः पुनः अभ्यासेन हस्ताय तस्य कर्मणः अभ्यासः भवति हस्तः स्ववशः भवति च । तस्मात् कर्मणि सुकरता लाघवत्वं च प्राप्येते ।

ब) 'भगवानुवाच य इमे कुलीनाः.......जितहस्ता ......ते ज्ञेया प्राणानामभिसरा हन्तरो रोगाणाम् ।

(च. सू. २९/७)

– प्राणाभिसरवैद्यस्य गुणलक्षणेषु 'जितहस्तः' वर्णितम् । अस्मिन् सूत्रे टीका अग्रिमवत्

गङ्गाधरः – यस्य यस्य (रुग्णस्य) क्रियां कुर्वन्ति तस्य तस्यैव रोगजयं भवति ते जितहस्ताः ।

योगीन्द्रनाथसेनः – जितः शस्त्रोपचारादिषु आयत्तीकृतः वेपनादिरहितः हस्तः येषां ते जितहस्ताः ।

शिवदाससेनः – जितहस्ताः लघुहस्ताः ।

– एवं अस्य सूत्रस्य टीकानुसारं जितहस्तस्य अग्रिमाः अर्थाः प्राप्यन्ते ।

– लघुहस्ताः – हस्तलाघवयुक्तः पुरुषः ।

– शस्त्रोपचारादिषु अभ्यासेन वेपनादिरहितहस्तयुक्तः पुरुषः ।

– ईदृशः पुरुषः यः यस्मिन् यस्मिन् कार्ये क्रियां कुर्यात् तस्मिन् तस्मिन् कार्ये साफल्यं प्राप्नुयात् ।

– एवं चरकगताः अन्ये सन्दर्भाः विवेचिताः । अधुना अधिकरणगतानां टीकानां विचारं कुर्मः ।

<u>चक्रपाणिः</u>– चरकसूत्रस्थस्य जितस्य पदस्य चतुर्षु सन्दर्भेषु व्याख्यां न करोति ।

<u>गङ्गाधरः</u>

गङ्गाधरेण च.वि. ८/४, च.सू. २९/७ इत्यत्र पदशः भिन्ना तथापि अर्थशः साधर्म्यस्य व्याख्या कृता । च.चि. ८/८६,च.सू. २९/१३ अत्रस्थायां व्याख्यायां जितहस्ते विवेचनं कृतम् ।

गङ्गाधरोक्त: अर्थ: –

य: वैद्य: चिकित्सार्थं यद् किमपि कर्म करोति तस्मिन् त्वरितं यशं प्राप्नोति स: रोगजयं प्राप्नोति ।

– अस्यै 'झटिति सिद्ध्यै तस्य वैद्यस्य शास्त्राभ्यास: कर्मदर्शनम् कार्याभ्यास: च यथासाङ्गं भूत्वा वारंवारं कर्मकरणस्य अभ्यास: आवश्यक: । एवं गङ्गाधरेण कृता व्याख्या योग्या ।

– योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: एताभ्यां वर्णितानां हस्तलाघवं स्ववशहस्तता क्षिप्रहस्तम् मनोनुगतहस्तपरिचालनसामर्थ्यं एतेषां लक्षणानां फलं गङ्गाधरेण स्वव्याख्यायां वर्णितम् ।

अत: गङ्गाधरस्य व्याख्या कर्मफलस्वरुपं वर्णयन्ती अस्ति इति मे मति: ।

<u>योगेन्द्रनाथ सेन:</u>

– अत्रभवता जितहस्त पदस्य तिस्त्र: व्याख्या प्राप्यन्ते येषां अर्था: समाना: ।

– च. वि. ८/४ शस्त्रोपचारादि कर्मसु सिद्धहस्त: अस्य अर्थ: सर्वं कर्म स्वच्छं सुलभं त्वरितं च कुर्वाण: पुरुष: । अस्मै क्षिप्रकर्मसामर्थ्याय शास्त्राभ्यास: कर्माभ्यास: च अत्यावश्यकौ ।

– च. सू. २९।७ शस्त्रोपचारादिषु कर्मणि अभ्यासात् वेपनादिरहितं हस्तं धारयन् वैद्य: यदा शास्त्राभ्यासं कर्माभ्यासं च पुन: पुन: सूक्ष्मतया करोति तदा स: आत्मविश्वासयुक्त: भवति । तस्मात् वेपनादीनि लक्षणानि न उत्पद्यन्ते ।

<u>ज्योतिषचन्द्र सरस्वति:</u>

– च. वि. ८।४ – शस्त्रादीनां अवचारणार्थं य: पुरुष: यदृच्छया हस्तपरिचालने समर्थ: अस्ति स: जितहस्त: । शस्त्रादीनाम् अवचारणं तथा वमनादिम् उपक्रमं कुर्वता यदृच्छया हस्तपरिचालनार्थं महत: अभ्यासस्य आत्मविश्वसस्य तथा कौशल्यस्य आवश्यकता वर्तते । एतादृशे सामर्थ्ये प्राप्ते त्वरितं कर्मसाफल्यं प्राप्यते ।

– च.वि. ८/८६– सर्वेषु उपक्रमेषु वारंवारं योग्यां कृत्वा स्ववशहस्ततां प्राप्यवान् पुरुष: जितहस्त: भवति ।

योग्या इत्यर्थ: अभ्यास: । पुन: पुन: शास्त्राभ्यासात् तथा कर्माभ्यासात् एव स्ववशहस्तता प्राप्यते ।

– शिवदास सेन: इति टीकाकारेण अपि जितहस्त: इत्यस्य अर्थ: लघुहस्त: इत्येव कृत: । तस्य अर्थ: हस्तलाघवसंपन्न: पुरुष: ।

– जितहस्त: इति पदस्य सन्दर्भात् गवेषयता इति दृष्टम् यत् एतत् पदं केवलं चरकसंहितायामेव वर्णितम् ।

– अग्निवेशसमकालीनासु सुश्रुतकाश्यपभेलसंहितासु एतत् पदं न उल्लिखितम् ।

– तथैव वाग्भट: शारङ्गधर: भावप्रकाश: च एतै: सह तात्कालीकेषु अन्येषु ग्रन्थेषु अपि इदं पदम् उल्लिखितम् इति न दृश्यते ।

– तथैव वाचस्पत्यम् शब्दकल्पद्रुम: च एतयो: कोशयो: अपि जितहस्त: इति पदं न वर्णितम् ।

– केवलं मोनिअर विल्यमस् कोशे इदं पदं दृश्यते ।

– अत: अस्य पदस्य भाषाशास्त्रीयं विवेचनम् अभ्यास: महत्वं च इति विषयेषु तत् शास्त्रसम्बन्धिभ्य: अभ्यासकेभ्य संशोधनस्य अवसर: अस्ति ।

निष्कर्ष: १) टीकाकारेषु शब्दार्थश: वैधर्म्यम् अस्ति । गङ्गाधरस्य व्याख्या कर्मफलस्वरुपं विवेचनं करोति उत योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति:च एतयो: व्याख्ये कर्मस्वरुपं वर्णयत: । एकस्य विषयस्य विविधानि अङ्गानि टीकाभ्य: द्रष्टुं शक्यते । जितहस्त: इति पदस्य पञ्च भिन्ना: अर्थांशा: प्राप्नुवन्ति । परं एते एकस्या: एव घटनाया: विविधा: अवस्था: सन्ति ।

अभ्यासेन स्ववशहस्तता (ज्योतिषचन्द्रसरस्वति:)
↓
मनोऽनुगतहस्तपरिचालनसामर्थ्यम् (ज्योतिषचन्द्रसरस्वति:)
↓
क्षिप्रहस्त: क्षिप्रकर्मता (योगीन्द्रनाथसेन:)
↓
लघुहस्त: – हस्तलाघवम् (योगीन्द्रनाथसेन:)
↓
तत्कारणेन चिकित्साकर्म झटिति सिध्यति । (गङ्गाधर:)
↓
यशप्राप्ति:, रोगजय: (गङ्गाधर:)

– एवं अभिप्रेतार्थत: वैधर्म्य: नास्ति ।

– जितहस्त: इति पदं केवलं चरक संहिताया: चतुर्षु सन्दर्भेषु उल्लिखितम् । अन्येषु ग्रन्थेषु अस्य उल्लेख: न प्राप्यते ।

उ) वैधर्म्याणि सन्ति । परं विषयाधिकरणानुसारं तानि न समन्वितानि । अत: भाविसंशोधनाय प्रेरकं वैधर्म्यम् अस्ति ।

अस्य वैधर्म्यप्रकारे ०१ वैधर्म्याणि सम्प्राप्तानि ।

(१) सन्दर्भ: – च.वि. ७/१९

मुलसूत्रम् – अथैनं सम्यग्विरिक्तं विज्ञायापराह्णो शैखरिककषायं सुखोष्णै: परिषेचयेत् ।

अधिकरणम्–

– अस्मिन् अधिकरणे पुरीषजं श्लेष्मजं च एतयो: कृमियुक्तस्य कोष्ठस्य चिकित्सा वर्णिता ।

वैधर्म्यम् – अस्य सूत्रस्थस्य 'शैखरिक' इति पदस्य विवरणे टीकाकारेषु वैधर्म्यम् अस्ति ।

टीका

चक्रपाणि: – शैखरिककषायेणेति विडङ्गकषायो हि वैद्यकव्यवहारात् शैखरिककषाय: उच्यते ।

गङ्गाधर: – शैखरिकोऽपामार्ग: ।

योगीन्द्रनाथसेन: – शैखरिककषायेण अपामार्गकषायेण ।

ज्योतिषचन्द्रसरस्वति: – शैखरिककषायेण अपामार्गक्काथेन ।

विवेचनम् –

१) चक्रपाणिना शैखरिक: इत्यस्य अर्थ: विडङ्ग: प्रत्युत गङ्गाधर: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एतै: अपामार्गम् इति अर्थ: गृहित: ।

२) शैखरिक: – 'शिखरे भव शैखरिक: भवे (सिद्ध. ६.३.१२३) इति इकण् ।'

य: शिखरे अस्ति अथवा शिखरे उत्पद्यते तं शैखरिक: इति वदन्ति ।

३) केवलं चक्रपाणिना एव केवलं विडंग: इति भिन्न: अर्थ: स्वीकृत: । तत्र भवता अन्यस्मिन् एकस्मिन् सन्दर्भे विडंगकषायस्य नाम शैखरिकषाय: इति सम्बोधितम् ।

''प्रमथ्याशब्दो हि वृद्धपरम्परया पाचनदीपनकषाये वैद्यकशास्त्रे परिभाषित: श्रुयते यथा विडङ्गकषाय: शैखरिककषायशब्देन वैद्येरुच्यते ।'' (चक्रपाणि, च. वि. १९/१९)

४) द्वयो: स्थाने सन्दर्भेण चक्रपाणिना एतत् मतम् प्रस्थापितं भवति ।

५) परं अन्यत्र सर्वत्र कोश: निघण्टु: च एतयो: शैखरिक: इति पदम् अपामार्गम् इति द्रव्यवाचकं दृश्यते–

अ) अपामार्ग: शैखरिक: शिखरि खरमञ्जरी । (कैय्यदेव निघण्टु / ओषधिवर्ग / १०३२)

आ) अपामार्ग: शैखरिक: प्रत्यक्पुष्पी मयूरक: । (अष्टांगनिघण्टु / अर्कादि गण / १२५)

इ) अपामार्गे त्वध:शल्या किणिही खरमञ्जरी । धामार्गव: शैखरिको वशिर: कपिपिप्पली ।।

(निघण्टुशेष: / गुल्मकाण्ड / २०४)

ई) शिखरे भव शैखरिक: ''भवे (सिद्ध. ६.३.१२३) इति इकण् ।

(श्रीवल्लभगणिकृत् टीका / निघण्टुशेष)

उ) अपामार्गस्तु शिखरी किणिही खरमञ्जरी । अध:शल्य: शैखरिक: प्रत्यक्पुष्पी मयूरका ।।

(मदनपालनिघण्टु / अभयादिवर्ग / १०६)

ऊ) अपामार्गश्शैखरिक: .....................। (मदनपालनिघण्टु / चतुर्थगण / १)

ए) अपामार्गस्तु ............... शैखरिको ............. । (धन्वन्तरिनिघण्टु / गुडूच्यादिवर्ग / २९१)

ऐ) अपामार्गस्तु शिखरी ...... काण्डकण्ट: शैखरिको ..... । (राजनिघण्टु / शताव्हादिवर्ग / ८९)

ओ) अपामार्ग: शैखरिको ................. । (शब्दचन्द्रिका / वृक्षादिवर्ग / १३३)

औ) मयूरक: शैखरिके ................. । (शिवकोष / क च – चतुरक्षरं कान्त: / ६६)

शैखरिक: किणिही । (श्रीशिवदत्तकृत् शिवप्रकाशव्याख्या / शिवकोष)

अं) अपामार्ग: शैखरिको ............. । (सरस्वतिनिघण्टु / उलपवर्ग / ८)

अ:) अपामार्गस्तु ................ शैखरिको ................ ।(अभिधानरत्नमाला / तिक्तवर्ग / ७०)

क) अपामार्ग: शैखरिको .............. । (अमरकोश / द्वितीयकाण्ड / वनौषधि वर्ग / ८८)

एवं सर्वै: निघण्टुकोशै: शैखरिक: इत्यस्य अर्थ: अपामार्ग: इत्येव वर्णित: ।

राजनिघण्टौ शैखरिक इत्यस्य समावेश: क्षारदशकेषु कृत: ।

''इक्षुशैखरिकमोचकोद्भवै: क्षारपूर्वदशकं प्रकीर्तितम् । (राजनिघण्टु / मिश्रकादिवर्ग / ५७)

६) अत: अन्येषु सर्वेषु ग्रन्थेषु शैखरिक: इत्यस्य अर्थ: अपामार्गम् इत्येव दत्त: ।

७) परन्तु केवलं चक्रपाणिना सन्दर्भद्वयो: कथितं यत् शैखरिकषाय: इत्यस्य अर्थ: वैद्यकशास्त्रे विडङ्गकषाय: भवति । अत: शैखरिकस्य अर्थ: चक्रपाणि: विडंग: इति किमर्थं स्वकरोति ?

८) शैखरिककषायस्य वर्णनं कृमिकोष्ठचिकित्सायां अपकर्षणम् इति उपक्रमे कृतम् । अत: विडङ्गं इति द्रव्यं कृमिघ्नं अस्ति । तत् व्याधिप्रत्यनीकद्रव्यम् । कटुरसात् उष्णवीर्यात् च तत् वामकं विरेचकं आस्थाप्यं च अस्ति । अत: एतै: सर्वै: गुणकर्मभि: विडङ्गं कृमिषु प्रकृतिविघातस्वरुपं कार्यं करोति । अनेन विचारेण चक्रपाणिना गुणवाचक: विडंग: इति अर्थ: निश्चित: स्यात् ।

९) परन्तु न अन्यस्मिन् कस्मिन् अपि ग्रन्थे वा कोषे शैखरिक: इति पर्याय: विडंगार्थं न दृश्यते ।

१०) चतुर्षु टीकाकारेषु चक्रपाणि: टीकाकार: कालदृष्ट्या पूर्ववर्तितम: । क्वचित् तस्मिन् काले शैखरिकं इति पदं विडङ्गं द्रव्यार्थं योजितम् स्यात् । परं कालान्तरेण कस्मादपि कारणात् एतद् पदम् अपामार्गं योजितुम् आरब्धम् ।

चक्रपाणि: गङ्गाधर: एतयो: कालदृष्ट्या ८०० वर्षाणाम् अन्तरम् अस्ति । प्रत्युत चक्रपाणि: निघण्टुग्रन्थ: च एतयो: न्यूनातिन्यूनं ४०० – ५०० वर्षाणाम् अन्तरम् अस्ति ।

अत: अस्मात् कालभेदात् अन्यस्मात् कस्मादपि कारणात् इदं वैधर्म्यं उत्पन्नं स्यात् ।

११) एतस्मात् सर्वस्मात् एवं निष्कर्षं कर्तुं शक्यते यत् –

– शैखरिक: इति द्रव्यसंज्ञाविषये टीकाकारेषु वैधर्म्यम् अस्ति ।

– 'द्रव्यगुणसंग्रह:' एतादृशं अप्रतिमं ग्रन्थं लिखन् चक्रपाणि: अस्मिन् सूत्रे एवं भिन्नं विशेषं वर्णनं करोति, इति आश्चर्यम् ।

– अस्मिन् विषये अधिकं ऊहनं द्रव्यगुणशास्त्रस्य अनुषंगेन अध्ययनं प्रयोगशालायां परीक्षणं तथा आधुनिकानां साधनानां सहाय्येन निश्चय: करणीय: । द्रव्यगुणविज्ञानं इति शास्त्रशाखायां ये संशोधका: छात्रा: वा सन्ति तेषां कृते एष: विषय: भावि संशोधनार्थम् उपलब्ध: अस्ति ।

– मम अध्ययनस्य उद्देश: द्रव्यनिर्णयकरणं इति नास्ति अपि तु टीकाकाराणां वैधर्म्यविषये ऊहापोहकरणं इति अस्ति । अत: अस्मिन् वर्ण्यविषये वैधर्म्यम् अस्ति । अत्र अधिकं संशोधनम् आवश्यकम् अस्ति इति निष्कर्ष: मया अत्र स्थाप्यते ।

ऊ) द्रव्यनामसंज्ञायां वैधर्म्याणि –

चरकसंहितायाः विमानस्थाने वनस्पतिनां टीकाकारकृतविवरणे वैधर्म्याणि

| क्र. | वैधर्म्यम् | चक्रपाणिः | गङ्गाधरः | योगेन्द्रनाथ सेनः | ज्योतिषचन्द्र सरस्वति | अ. | सूत्रम् |
|---|---|---|---|---|---|---|---|
| १ | इक्ष्वाकु | – | तिक्तालाबु | कटुकालाबु | तिक्तालाबु | ८ | १३५ |
| २ | उद्दाल | बहुवार | कांचन | बहुवार | श्लेष्मान्तक | ८ | १३५ |
| ३ | उद्दालक | बहुवार | बहुवार | कोविदार | श्लेष्मान्तक | ७ | २६ |
| ४ | उदकीर्य | – | करंज | – | महाकरंज | ८ | १३६ |
| ५ | उलूपम् | – | उलुकम् उलुय इति ख्यातम् | उलु इति वंगेषु ख्यातम् | दर्भजाति | ३ | ७ |
| ६ | उपोदिका | – | कलम्बी | कलम्बी | पूतिका 'पुंइ' इति भाषा | ८ | १३५ |
| ७ | उपचित्रा | – | भाण्डी दन्ती वा | पृश्निपर्णी दन्ती वा | मूषिकपर्णी | ८ | १३५ |
| ८ | ओदनपाकी | नीलझिण्टी | नीलझिण्टी | नीलझिण्टी | महासमंगा | ८ | १३९ |
| ९ | आरग्वध | | शोनालु | चतुरंगुल | स्वर्णालु | ८ | १३५ |
| १० | अभीरुपत्री | शतावरीभेद | स्वल्पशतावरी | शतावरीभेद | शतावरीभेद | ८ | १३९ |
| ११ | अम्लिका | कन्दप्रधाना कामरुपे प्रसिद्धा अम्लिकाभेद | – | – | तेतुल इति भाषा | ८ | १४० |
| १२ | अतिच्छत्रा | अरुण कोकिलाक्ष | मधुरिका | अरुण कोकिलाक्ष | मधुरिकाभेद | ८ | १३९ |
| १३ | अजश्रृंगी | – | मेषश्रृंगी | मेषश्रृंगी | गाडलशिंगा इति भाषा | ८ | १३६ |
| १४ | अजगन्धा | – | यमानी | यमानी | फौकान्दिजेयान् इति भाषा | ८ | १३६ |
| १५ | अजकर्ण | शालभेद | असनभेद | शालवृक्ष | शालभेद | ८ | १४३ |
| १६ | अजमोदा | – | – | बस्तमोदा रांधुनी इति वंगेषु ख्याता | यवानी | ८ | १४२ |
| १७ | अलर्क | – | श्वेतार्क | श्वेतार्क | रक्तपुष्पार्क | ८ | १५१ |
| १८ | अश्वकर्ण | प्रियालशाल | लताशाल | बृहच्छाल | – | ८ | १४३ |
| १९ | भद्रपर्णी | भादाली | गाम्भारी | भादाली | गाम्भारी | ८ | १३५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| २० | भूर्ज | – | भूर्जग्रन्थी | वल्कद्रुम | – | ८ | १४३ |
| २१ | छत्रा | कोकिलाक्ष | शताव्हा | कोकिलाक्ष | मधुरिका | ८ | १३९ |
| २२ | चतुरंगुल | – | शोनालु | – | स्वर्णालु | ८ | १३६ |
| २३ | द्रवन्ती | – | क्षुद्रदन्ती | द्रन्तीभेद | लघुदन्ती | ८ | १३६ |
| २४ | दर्भ | – | उलुयामूल | कुश | उलप | ८ | १३५ |
| २५ | दन्ती | – | नागदन्ती | दन्तिनी | – | ८ | १३६ |
| २६ | श्रावणी | – | श्वेतमुण्डेरी | रक्तमुण्डेरी | मुण्डीरी | ८ | १३९ |
| २७ | शृंगाटिका | – | शिंगडा | शृंगाट | पानिफल इति भाषा | ८ | १३५ |
| २८ | गोपवल्ली | अनन्तमूल | अनन्तमूल | अनन्तमूल | मूर्वाभेद | ८ | १३९ |
| २९ | गण्डीर | – | दूर्वाभेद | – | शालिंच | ७ | १७ |
| ३० | गण्डीरपुष्पी | शमठ | बृहत्समठ | शमठ | शमठ | ८ | १५१ |
| ३१ | गुन्द्रा | – | गुडूची | शरभेद | – | ८ | १३९ |
| ३२ | गवाक्षी | – | गोरक्षकर्कटी | इन्द्रवारुणी | गुडुम्बा | ८ | १३६ |
| ३३ | गवाक्षी | – | – | इन्द्रवारुणी | गुडुम्बा | ८ | १५१ |
| ३४ | हंसपादी | – | थुलकुडी | हंसपदाकार पत्रा लता | – | ८ | १३९ |
| ३५ | बिम्बी | – | ओष्ठोपमफला | ओष्ठोपमफला | कुन्दुरु इति भाषा | ८ | १३५ |
| ३६ | बिस | – | – | पद्ममूल | क्षुद्रमृणाल | ८ | १४३ |
| ३७ | जीमूत | – | घोषकभेद | देवताडक | घोषकभेद | ८ | १३५ |
| ३८ | ज्योतिष्मती | – | घोषक | कटभी | – | ८ | १५१ |
| ३९ | खरपुष्पा | – | खरमंजरी अपामार्ग वा | बर्बरी | – | ८ | १४३ |
| ४० | खरपुष्पा | – | यमानी | यमानी | अपामार्ग | ७ | १७ |
| ४१ | केबुक | – | केंऊ | पत्तूर | – | ८ | १४२ |
| ४२ | कैटर्य | – | कट्फल | कट्फल | निम्ब | ७ | १७ |
| ४३ | कुम्भी | कुम्भीक इति ख्याता वा ‘हठ’ | कट्फल | कट्फल | पाना इति भाषा | ८ | १४३ |
| ४४ | कोशाम्र | – | उडिआम्र | क्षुद्राम्र | – | ८ | १४० |
| ४५ | कम्पिल्लक | – | कमलागुडीति लोके | रोचनक | कमलागुंडि इति भाषा | ८ | १३६ |
| ४६ | कर्कश | पटोलभेद | कम्पिल्ल | पटोलभेद | तिक्तपटोल | ८ | १४२ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ४७ | कपोलवल्ली | कवडवेण्डुआ इति ख्याता | – | सूक्ष्मैला | नलिका | ८ | १३९ |
| ४८ | करीर | – | मरुजद्रुम | – | जम्बीरभेदः कयेर | ८ | १४० |
| ४९ | कशेरु | चिञ्चोडक | चिञ्चाइक | केशुर | – | ८ | १३९ |
| ५० | मोरट | मूर्वा | कर्णमोरट | मूर्वा | मूर्वा | ८ | १३९ |
| ५१ | महाश्रावणी | अलम्बुषा | रक्तमुण्डेरी | श्वेतमुण्डेरी | मुण्डीरीभेद | ८ | १३९ |
| ५२ | महासहा | – | श्वेतकुरुवक | श्वेतकुरुवक | इन्द्रवारुणीभेद | ८ | १३९ |
| ५३ | मधूक | – | गुडपुष्प | मधुपुष्प | महुआ इति भाषा | ८ | १३५ |
| ५४ | नीप | – | – | धूलिकदम्ब | कदम्ब | ७ | २१ |
| ५५ | पोटगल | होग्गल | होगल | होगल | नल | ८ | १३५ |
| ५६ | पाठा | – | आकनादि | अम्बष्ठा | आगनति इति भाषा | ८ | १३५ |
| ५७ | पयस्या | – | अर्कपुष्पी | विदारीभेद | दुग्धिका | ८ | १३९ |
| ५८ | ऋष्यप्रोक्ता | बलाभेद | पीतबला | पीतबला | शूकशिम्बिभेद | ८ | १३९ |
| ५९ | राजादन | वेञ्चुलिकी | पियाल | पियाल | – | ८ | १३९ |
| ६० | राजादन | – | पियालभेद | क्षीरिणीवृक्ष | क्षीरणी इति भाषा | ८ | १३५ |
| ६१ | राजक्षवक | – | क्षववृक्ष | राजसर्षप | | ८ | १३९ |
| ६२ | रोमक | रुमानदीभवम् | – | शाकम्भरी देशीय | साम्भरी लवणम् | ८ | १४१ |
| ६३ | शाल्मलिक | रोहितक स्वल्पशाल्मलिः वा | – | रोहितक | मोचरस | ८ | १३५ |
| ६४ | शार्ंगे | गुंजा | रक्तगुंजा | गुंजा | महाकरंज | ८ | १३५ |
| ६५ | सोमवल्ली | सोमलता | सोमलता | सोमलता | ब्राहमी भेद | ८ | १३९ |
| ६६ | शीतक | अम्ललोट | चालित्रफल | अम्बुलोटक | – | ८ | १४० |
| ६७ | शीतपाकी | शीतला | काकोली प्रभेद | शीतला | गुञ्जा | ८ | १३९ |
| ६८ | शंखिनी | – | शंखपुष्पी | तिक्ताला | चोरपुष्पी | ८ | १३६ |
| ६९ | शैखरिक | विडङ्ग | अपामार्ग | अपामार्ग | अपामार्ग | ७ | १९ |
| ७० | सप्तला | – | शंखिनीभेद | सातला चर्मसाव्हा | चर्मकषा | ८ | १३६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ७१ | शुक्ला | शर्करा | शुक्लवर्णा निःक्षीरा विदारी | शर्करा | शर्करा | ८ | १३९ |
| ७२ | सुमना | – | मालती | जाति | – | ८ | १४२ |
| ७३ | सुमना | जाति | मालतीपुष्प | जाति | जातीपुष्प | ८ | १३५ |
| ७४ | सुवहा | – | शेफालिका | शेफालिका | गोधापदी | ७ | २१ |
| ७५ | सुषवी | कारवेल्लक | पर्णासभेद | कारवेल्लक | कारवेल्ल | ८ | १३५ |
| ७६ | वीरा | जालन्धरं शाकम् | क्षीरकाकोली | आमलकी भेद | एलबालुका | ८ | १३९ |
| ७७ | वनत्रपुषी | बृहत्फला गोडुम्बा | वन्यस्वल्प त्रपुष | बृहत्फला गोडुम्बा | – | ८ | १३९ |
| ७८ | द्वारदा | शाकतरु | पालङ्क्शाक | शाकतरु | भूमिसह वृक्ष | ८ | १३९ |
| ७९ | क्षीरशुक्ला | बृहच्छृङ्गाटिका | स्वल्पक्षीरा विदारी | त्रिवृत | निःक्षीरभूमि कुष्माण्ड | ८ | १३९ |
| ८० | क्षुद्रसहा | कुमारी | रक्तकुरुवक | रक्तकुरुवक | इन्द्रवारुणी | ८ | १३९ |

## Vetting – शास्त्रीयअनुसंधान: पद्धत्या निश्चय:

- In this stage Meta Analysis was done.
- After the completion of study, a Proforma was prepared in Microsoft Excel according to observations.
- This Proforma is attached here.
- There are 77 points where commentators have different opinions. Researcher had compared these points according to methodology and made conclusions.
- This comparative study was validated by 3 learned persons (experts) who are scholars of charak samhita and Sanskrit language.
- After the opinions of all the experts, their opinions were cross checked with researcher`s opinions.
- Then statistical test is applied. Here **Correlation Test** is used for validation of study.
- This is as follows :

अध्ययने प्राप्ता: टीकाकारेषु वैधर्म्याणां सूचि: अग्रिमवत् –

| वैधर्म्यस्थलम् | चक्रपाणि दत्त | गंगाधर राय | योगेन्द्रनाथ सेन | ज्योतिषचन्द्र सरस्वति |
|---|---|---|---|---|
| १/४ यापयन्ति | यापयन्ति इति साम्येन अवस्थापयन्ति | यापयन्ति इति शरीरम् आरोग्येण कालं गमयन्ति | यापयन्ति इति स्वास्थ्ये वर्तयन्ति | यापयन्ति इति पालयन्ति |
| १.६ असंसृष्टरस दोषयो: परस्पर सम्बन्ध: | १.असंसृष्टरसानां कर्मोपदेश: २.सर्वात्मवैपरीत्येन शमनम् | प्रभावसामान्यं प्रभाववैशेष्यं च एते रसानां दोषगतस्य कर्मण: कारणम् | महाभूतसामान्यं महाभूतवैशेष्यं च एते रसानां दोषगतस्य कर्मण: कारणम् | १.कार्यकारणभावानुसारं रसात् दोषा: शमनत्वं वृद्धिं च कुर्वन्ति २.सूक्ष्मपचने पक्वा: रसा: दोषान् शमयन्ति वर्धयन्ति च |
| १.१४ अमधुरम् | अमधुरम् इति कटुरसम् | अमधुरम् इति तिक्तं विदग्धमम्लम् च | अमधुरम् इति कटुकं अम्लं च | टीका नास्ति |

| | | | | |
|---|---|---|---|---|
| १.१७ क्षार: : पाठभेद: | दहति पचति भिनत्ति संघातम्  इति पाठ: नास्ति | दहति पचति भिनत्ति संघातम् इति पाठ: अस्ति | दहति पचति भिनत्ति संघातम् इति पाठ: अस्ति | दहति पचति भिनत्ति संघातम्  इति पाठ: अस्ति |
| १.१७ जनपद: | टीका नास्ति | जनपदा: जनसमूहा: | जनपद: देश: | जनपदस्तु बहुग्रामपूर्ण: प्रदेश: । |
| १.१७ लाघवोपपन्न: | लाघवोपपन्न: इति पाठ: | लवणोपपन्न: इति पाठ: | लवणोपपन्न: इति पाठ: | वर्णनं नास्ति |
| १.२२ (२)गुणान्तराधानम् | गुणान्तराधानम् स्वाभाविकगुणा: न परिवर्तते परन्तुसंस्कारेण किंचित् तरतमत्वेन परिवर्तनं शकयम् | गुणाधानम् : उत्तरकालं गुणयोग: करणम् | गुणान्तराधानम् : आधानम् उत्पादनम् | अभिसंस्कारो गुणान्तराधानम् |
| १.२५ (१) परिऱ्हासयति | परिऱ्हासयति : भिन्नसंघातं करोति | परिशोषयति : टीका नास्ति | परिशोषयति : श्लेष्माणं परिशोषणं करोति | परिऱ्हासयति : टीका नास्ति |
| १.२५ (७) उत्स्नेहनम् | उत्स्नेहनम् : उन्मार्गगमनम् | स्नेहनम् : भुक्तद्रव्याणां स्वाभाविकस्नेहस्य न भवति | उत्स्नेहनम् : उन्मार्गगमनम् | उत्स्नेहनम् : खाद्यस्य सम्यक् स्नेहनं न भवति |
| १.२५ (७) अवसादनम् | अवसादनम् : अवसाद: | स्वादनम् : स्वादस्य भोजनस्य यथावस्थानं न भवति | अवसादनम् : अवसादकरत्वम् | अवसदनम् : मार्गमतिक्रम्य गमनम् । |
| २.७ सारविधमनम् | टीका नास्ति | विधमनं ऱ्हासकरम् | विधमनं नाशनम् | विधमनं ऱ्हासकरम् |
| २.१३ विमुक्तामप्रदोष: | विमुक्तामप्रदोष: इति पाठ: | अनुद्रिक्तामप्रदोष: इति पाठ: तदर्थ: अप्रबलामदोष: | विमुक्तामप्रदोष: इति पाठ: | विमुक्तामप्रदोष: इति पाठ: |
| २.१३ स्वेदनम् | स्वेदनम् इति पाठ: | छेदनम् इति पाठ: | स्वेदनम् इति पाठ: | स्वेदनम् इति पाठ: |

| | | | | |
|---|---|---|---|---|
| २.१८ सर्वाश्रयम् | सर्वाश्रयम् सर्वशरीरम् | सर्वाशयं रसरक्तादि धात्वाशयम् | सर्वाशयम् सर्वशरीरम् | सर्वाश्रयम् सर्वशरीरम् |
| ३.७अत्यभिष्यन्दिनम् | टीका नास्ति | बहिर्द्रवाभिस्त्रावेण लक्ष्यम् | दोषधातुमलस्रोतसां कलेदजननम् | अतिवर्धितवेगम् |
| ३.७ (२) उपक्षीण जलेशयम् | उपक्षीण जलेशयम् इति पाठ: परं टीका नास्ति | उपक्षीणजलाशयम् इति पाठ: : प्राय: शुष्काल्पजलाशयम् | उपक्षीणजलेशयम् इति पाठ: उपक्षीणा: जलचरा: प्राणिना मत्स्यादय: | उपक्षीणजलेशयम् इति पाठ: स्वल्पमत्स्यादिकम् |
| ३.१५ आत्मनोगुप्ति: | गुप्ति: इति मन्त्रादिना रक्षा | गुप्ति: इति देशान्तरगमनम् | गुप्ति: रक्षणम् | गुप्ति: रक्षाकरम् |
| ३.२४ परिग्रह: | परिग्रह: ममता | परिग्रह: प्रतिग्रह: | परिग्रह: ममता | परिग्रह: अन्योपार्जितस्य ग्रहणम् |
| ४.४ अप्रमाणवचनं | दुष्टादुष्ट: इति पाठ: | दृष्टादृष्ट: इति पाठ: | दृष्टादृष्ट: इति पाठ: | दृष्टादृष्ट: इति पाठ: |
| ४.४ अविर्तक: | वितर्क: कथंता अनिश्चितज्ञानमिति यावत् एतद्विपर्ययात् निश्चयेन अनुभवेन च कात्स्कर्येन च ये भावान् जानीते तेऽवितर्क: | वितर्कं ऊहापोहात्मकस्तं वितर्कं विना सदैवाविच्छेदेन युक्तज्ञानेन विदन्ति ते अवितर्क: | अवितर्कं यथा तथा । शास्त्रतत्त्वे नि:संशयितज्ञानसम्पन्ना: इत्यर्थ: | अवितर्का: संशयरहिता: |
| ४.४ प्रत्यक्ष लक्षणम् | प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते | प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते | प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते | प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते |
| ४.६ आत्मानम् | आत्मा स्वभाव: | आत्मानं शीतात्मकं वोष्णात्मकमेवमादि | आत्मा स्वरुपम् | आत्मानं स्वभावम् |

| | | | | |
|---|---|---|---|---|
| ४.८ उपधि | उपधि इति पाठः । उपेत्य धीयते इति उपधिः छद्म इत्यर्थः । | उपाधिः आधुनिकसंकेतः संकेतकर्तृभिः कृतः | उपाधिं सात्विकत्वादिकम् | उपाधिं धर्मचिन्ता |
| ४.८ व्यवसाय | व्यवसायः प्रवृत्ति | व्यवसायः शास्त्रादिषु विकल्पबुद्धिः | व्यवसायः अध्यवसाय अवधारणम् | व्यवसायः अनुष्ठानम् |
| ४.८ अवस्थानम् अविभ्रमेण | अवस्थानं स्थिरमतित्वम् अविभ्रमेणेति अभ्रान्त्या | टीका नास्ति | अविभ्रमेण अभ्रान्त्या अवस्थानं स्थिरमतित्वम् | अवस्थानं धारणम् अविभ्रमेण स्मृत्यविभ्रंशेन |
| ४.८ धृतिं अलौल्येन | टीका नास्ति | धृतिर्नियमात्मिका बुद्धिः । अलौल्यम् अचंचलत्वम् । | धृतिं सन्तोषं अलौल्येन मनसः अचापलेन । | धृतिं इन्द्रियनियमनम् अलौल्येन अलोभेन |
| ५.४ स्त्रोतमयपुरुष : विचारस्य खण्डनम् | यस्य हि स्त्रोतांसि यच्च वहन्ति यच्चावहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्यः | यस्य हि स्त्रोतांसि यच्च वहन्ति यथा वहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्यः | यस्य हि स्त्रोतांसि यद्वहन्ति यथा वहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्यः | यस्य हि स्त्रोतांसि यच्च वहन्ति यच्च अवहन्ति यत्र चावस्थितानि सर्वं तदन्यत्तेभ्यः |
| ५.७ महास्त्रोतः | टीका नास्ति | महास्त्रोतः महासरणं महाच्छिद्रम् । | महास्त्रोतः कोष्ठम् | महास्त्रोतः कोष्ठमित्यनर्थान्तरम् । तस्य कोष्ठार्थतोऽपीदं तस्यैकदेशस्य उरःकोष्ठस्यैव परिग्रहो भवति तेन तद्गतं फुफफुसयन्त्रमवहनाख्यमेव गृह्यते |
| ५.७ प्रकुपितम् | टीका नास्ति | प्रकुपितं वृद्धमुच्छ्वसति | प्रकुपितं प्रवृद्धम् | प्रकुपितं दुष्टम् |
| ५.८ मूत्रवह स्त्रोतसां दुष्टिलक्षण | टीका नास्ति | टीका नास्ति | टीका नास्ति | पाठोपलब्धि नास्ति |

| | | | | |
|---|---|---|---|---|
| ५.८ क्लोम | क्लोम हृदयस्थपिपासा स्थानम् | क्लोम कण्ठोरसो: सन्धि | क्लोम कालखण्डादधस्तात् स्थितं दक्षिणपार्श्वस्थं तिलकं प्रसिद्धम् । तच्च पिपासास्थानम् | क्लोमा चामाशयस्य पृष्ठत: पृष्ठाभ्यन्तरभागे संसक्त: तिलसंज्ञ: । दक्षिणे पार्श्वेऽस्य शिरोभाग: स्थूलतम: अन्तर्नाभ्या वेष्टित आस्ते । अयं दक्षिणपार्श्वात् वामपार्श्वस्थं प्लीहानं यावत् प्रसार्य तिर्यग् भूय वर्तते । आयामत: प्राय: दशांगुलमित: प्रस्थतश्च प्राय: त्रिचतुरंगुलमित: । |
| ५.९ स्थानस्था: | स्थानस्था: आशयस्था: | स्थानस्था: स्वमानस्था: | स्थानस्था: आशयस्था: | स्थानस्था: क्षयं वृद्धिं वा नाप्नुवन्ता: |
| ५.१२ अतिमात्रम् | टीका नास्ति | अतिमात्रस्य भोजनात् अकाले मात्रावदपि भोजनात् | मात्रामतिक्रान्तस्य अतिमात्रस्य । | मात्रामतिक्रम्य भोजनादिति मात्राधिकस्य न्यूनमात्रस्य च भोजनादित्यर्थ: |
| ५.१९ शुक्रवह स्रोतसां दुष्टिनिदान | अकालयोनिगमनादिति अहर्ष कालगमनात् तथाऽनुचितयोनौ गमनात् | अकालयोनिगमनादिति रजस्वलागमनात् | अकाले निषिद्धदिने पर्वादौ । अयोनौ निषिद्धयोनौ । | अकाले बाल्ये जरायां वा अथवा पर्वादिवर्जनीये काले ग्रीष्मादावृतौ वा गमनात् । अयोनगमनात् कृत्रिमोपायेन पश्वादिगमनाद्वा । |
| ५.२० मूत्रवह स्रोतसां दुष्टिनिदान | टीका नास्ति | टीका नास्ति | टीका नास्ति | अभिक्षतस्य मूत्रवहस्रोत:सु |
| ५.२१पुरीष वह स्रातसां दुष्टिनिदान | टीका नास्ति | विधारणादिति वर्चोवेगविधारणात् | शकृद्वेगस्य संधारणात् | विधारणात् मलवेगस्य |
| ५.२२स्वेदवह स्रातसां दुष्टिनिदान | अतिसंतापात् | अतिसंक्षोभात् | अतिसंक्षोभात् | पाठोपलब्धि नास्ति |

| | | | | |
|---|---|---|---|---|
| ५.२३ धातुभि:विगुण : पाठभेद: | धातुभि: विगुण: | ऋतुभि: विगुण: | धातुभि: विगुण: | धातुभि: विगुण: |
| ५.२३सामान्य स्रोतोदुष्टी हेतव: | सामान्य स्रोतोदुष्टीहेतव: | दोषवह स्रोतोदुष्टीहेतव: | सामान्य स्रोतोदुष्टीहेतव: | सामान्य स्रोतोदुष्टीहेतव: |
| ५.२३ धातुभि: विगुण: | धातुभिर्विगुण इति धातु विरोधकस्वभाव इत्यर्थ: न तु धातुविपरीत गुणो विगुण: दिवास्वप्नमेद्यादयो हि मेदसा समानगुणा एव मेदोदूषका | पाठभेद: अस्ति | धातुभिर्विगुण: विपरीतगुण: | धातुभिर्विगुण इति तत्तत् स्रोतोवाह्यधातुवैगुण्यकारक इत्यर्थ: । न तु विपरीतगुण: मेद्यस्यापि मेदोवहस्रोतोदुष्टि कारकत्वात् |
| ५.२४ सूत्रान्वये सूत्रार्थे च वैधर्म्यम् | सिरापदस्य अन्वय: ग्रन्थीपदेन कृता: | सिरापदस्य अन्वय: इतरपदानां सह कृता: । | सिरापदस्य अन्वय: ग्रन्थीपदे कृता: | सिरापदस्य अन्वय: ग्रन्थीपदे कृता: |
| ५.२४सामान्य स्रोतोदुष्टी लक्षणम् | सामान्य स्रोतोदुष्टी लक्षणम् | दोषवह स्रोतोदुष्टीलक्षणम् | सामान्य स्रोतोदुष्टीलक्षणम् | सामान्य स्रोतोदुष्टीलक्षणम् |
| ५.२४ विमार्गगमनम् | विमार्गगमनं च यथा मलस्य मूत्रमार्गगमनम् | टीका नास्ति | विमार्गत: गमनम् वापि | विमार्गगमनं प्रतिलोमगमनम् अन्यस्रोतसि वा गमनम् |
| ६.५ यथोचितम् | यथाचित्रं विकारानुदाहरणार्थम् | यथोचितं विकारानुदाहरणार्थम् | यथोचितं विकारानुदाहरणार्थम् | यथोचितं विकारानुदाहरणार्थम् |
| ६.११ अनुबन्ध्यानुबन्ध | अनुबन्ध्यलक्षणसमन्वित: तत्र त्रयो दोषा: सन्निपात | अनुबन्ध्यानुबन्धलक्षणसमन्वित: तत्र त्रयो दोषा: सन्निपात | अनुबन्ध्यानुबन्धलक्षणसमन्वित: तत्र त्रयो दोषा: सन्निपात | अनुबन्ध्यानुबन्धलक्षणसमन्वित: तत्र त्रयो दोषा: सन्निपात |
| ७.३ अधमत्व | अधमत्वात् इति अवरत्वात् | अल्पत्वात् अभावात् | अल्पत्वात् अपकर्षदर्शनात् | अधमत्वात् इति निकृष्टबलत्वात् |

| | | | | |
|---|---|---|---|---|
| ७.८सर्व क्रिमीणांपुरुष संश्रयाणाम् | सर्वक्रिमीणां पुरीषसंश्रयाणाम् | सर्वक्रिमीणां पुरुषसंश्रयाणाम् | सर्वक्रिमीणां पुरुषसंश्रयाणाम् | सर्वक्रिमीणां पुरुषसंश्रयाणाम् |
| ७.११ पाठभेद: | केशश्मश्रुनखलोमपक्ष्मापध्वंस: | केशश्मश्रुलोमपक्ष्मापध्वंस: | केशश्मश्रुलोमपक्ष्मापध्वंस: | केशश्मश्रुलोमपक्ष्मापध्वंस: |
| ७.१२ श्लेष्मज कृमिनामानि | हृदयचरा: | हृदयचरा: | हृदयाद: | हृदयचरा: |
| ७.१२ संकीर्ण भोजनम् | घृणाविषय मलादिभि: मिश्रितव्यंजनादिभोजनम् | टीका नास्ति | हिताहितयो: ऐकध्यं भोजनम् | टीका नास्ति |
| ७.१३पुरीषज कृमिलक्षणम् | दीर्घा ऊर्णांशुसंकाशा: | दीर्घोर्णांशुसंकाशा: | दीर्घोर्णांशुसंकाशा: | दीर्घा ऊर्णांशुसंकाशा: |
| ७.१३ सूत्रे यदन्तरं तदन्तरम् एतयो:पदयो: पाठभेद: | यदन्तरं तदन्तरं इति पदानां योजना | यदन्तरं तदन्तरं इति पदानां योजना | योजना नास्ति | यदन्तरं तदन्तरं इति पदानां योजना |
| ७.१६ कृमिकोष्ठ चिकित्सा अपकर्षणम् | टीका नास्ति | टीका नास्ति | टीका नास्ति | विशेषवर्णनं कृतम् |
| ७.१७ कृमिकोष्ठ चिकित्सा अपकर्षणे आस्थापनम् | त्रिवारं सप्तरात्रं वाऽस्थापयेत् | त्रिरात्रं सप्तरात्रं वाऽस्थापयेत् | त्रिवारं सप्तरात्रं वाऽस्थापयेत् | त्रिरात्रं सप्तरात्रं वाऽस्थापयेत् |
| ७.१९शैखरिक कषाय: | शैखरिक: विडंग: | शैखरिक: अपामार्ग : | शैखरिक: अपामार्ग : | शैखरिक: अपामार्ग : |
| ८.४ जितहस्तम् | टीका नास्ति | जितहस्तं हस्तेन यत् कर्मं चिकित्सार्थं करोति तत् कर्म झटिति सिध्यतीति तम् | जितहस्तं शस्त्रोपचारादिषु क्षिप्रहस्तम् | जितहस्तं शस्त्राद्यवचारणाय मनोऽनुगतहस्तपरिचालन समर्थम् |

| | | | | |
|---|---|---|---|---|
| ८.४ प्रकृतिज्ञः | टीका नास्ति | प्रकृतिज्ञमिति व्याधितानां व्याधिप्रतिकारे स्वस्थानां वा स्वास्थ्यरक्षणे पुंसां प्रकृतिज्ञानमन्तरेण न क्रियोपयोगः सम्पद्यते । | प्रकृतिः आतुरगता । एतच्च परीक्षणीयाणाम् उपलक्षणम् | प्रकृतिज्ञं शिष्यप्रकृतिं समीक्ष्य अध्यापनकुशलम् |
| ८.४ अनुपस्कृत विद्यम् | अनुपस्कृतविद्यम् इति पाठः | उपस्कृतविद्यम् इति पाठः | उपस्कृतविद्यम् इति पाठः | अनुपस्कृतविद्यम् इति पाठः |
| ८.४ दक्षम् | दक्षमिति अवामबुद्धिः | दक्षं वमनादिसर्वक्रियासु कुशलम् | दक्षं कर्मसु कुशलम् | दक्षं स्वभ्यस्तकर्माणं कर्मकुशलम् |
| ८.७ कल्यः कृतक्षणः | कल्यः कृतक्षणः इति पाठः कल्यः नीरोगः | कल्यकृतक्षणः इति पाठः कल्यः प्रातकालः | कल्यः कृतक्षणः इति पाठः कल्यः नीरोगः | कल्यकृतक्षणः इति पाठः कल्ये प्रातः । |
| ८.९ परिधिन् | परिधयो हस्तप्रमाणा होमकुण्डचतुःपार्श्वे स्थाप्याः पालाशादिदण्डा उच्यन्ते | टीका नास्ति | परिधयः होमकुण्डचतुःपार्श्वे स्थाप्याः हस्तप्रमाणा पालाशादिदण्डा | क्षौमपरिधिस्तु अतसीतन्तुनिर्मितं परिधेयवस्त्रम् |
| ८.१५ पिण्ड | पिण्डेन इति पाठः टीका पिण्डेन सारोद्धारेण | पण्डेन इति पाठः टीका स्वपाण्डित्य प्रकाशनेन | पण्डेन इति पाठः टीका स्वपाण्डित्य प्रकाशनेन | पण्डेन इति पाठः टीका निर्बोधेन |
| ८.६९ कारणपरीक्षा लक्षणम् | यद् पाठः : यदिति कारणप्रत्यवमशर्ात् नपुंसकम् | यः पाठः : भगवान् पाणिनिरप्युवाच कारके स्वतन्त्रः कर्ता प्रयोजको हेतुश्चेति | यः पाठः : यत् करोति निष्पादयति तत् कारणम् । अत्र स्वार्थे णिच् । | यः पाठः : य इति विधेयप्राधान्यात् पुलिंगम् |
| ८.७१ विक्रियमाण | विक्रियमाणा रुपान्तरमापद्यमाना | विक्रियमाणा विकृतिमापद्यमाना | विक्रियमाणा अवस्थान्तरमापद्यमाना | यस्या विकृत्या कार्योत्पत्तिर्भवेदित्यर्थः |

| | | | | |
|---|---|---|---|---|
| ८.८९ सुखेन प्रतिबोधनम् | सुखेन प्रतिबोधनम् इति पाठ: टीका नास्ति | सुखेन प्रबोधनम् इति पाठ: टीका ज्ञेयेषु अर्थेषु सुखेन ज्ञानं भवति | सुखेन प्रतिबोधनम् इति पाठ: टीका जागरणम् | सुखेन प्रतिबोधनम् इति पाठ: टीका निद्रया सम्यक् तृप्ति: |
| ८.८९ अव्यापत्ति: | टीका नास्ति | अव्यापत्ति: सम्पत् | अव्यापत्ति: अव्यापत् सुखम् | अव्यापत्ति: यथावद् विषयग्रहणे सामर्थ्यम् |
| ८.९३ भक्ति: | टीका नास्ति | भक्तिरियं भजनशीलता | भक्ति: इच्छा | भक्ति: इच्छा |
| ८.९५ कालगर्भाशय प्रकृति | शुक्रशोणितमेल करुपे ऋतुरुपे उत्कटदोषेण आरभतेप्रकृति: | मातु: आवस्थिककाले गर्भाशयस्य प्रकृति: | गर्भकालस्य गर्भाशयस्य च प्रकृति: | कालस्य शुक्रस्य वैशेष्यात् गर्भाशयस्य शोणितस्य च वैशेष्यात् जात: प्रकृति: |
| ८.९६ क्षोभ: | टीका नास्ति | क्षोभो मनसोऽकस्मात् क्षुब्धता | क्षोभ: मनस: क्षुब्धता | क्षोभ: चित्तचांचल्यम् |
| ८.९८ वातलप्रकृति स्वरलक्षणम् | प्रततरुक्षक्षामसन्नसक्तजर्जरस्वरा: | प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वरा: | प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वरा: | पाठोपलब्धि नास्ति |
| ८.९८ सक्त: | सक्त: बद्ध: | सक्तोऽव्यक्त: | सक्तो बद्ध: | टीका नास्ति |
| ८.९८ जर्जर: | जर्जर: भग्नपात्र ध्वनिसम: | जर्जर: असंहत: | जर्जर: असंहत: | टीका नास्ति |
| ८.१०९ शुक्रसार लक्षणानि | स्त्रीप्रियोपभोगा: स्त्रीप्रिय उपभोग: संभोगो येषां ते तथा | स्त्रीप्रिया:प्रियोपभोगा: स्त्रीप्रिया: स्त्रीणां प्रिया: | स्त्रीप्रिया:प्रियोपभोगा: स्त्रीणां प्रिया: प्रिय: उपभोगो येषां ते | टीका नास्ति |
| ८.१०९ शुक्रसार लक्षणानि | शिखरदशना: इति पाठ: शिखरदशना: इति शोभनदशना: | शिखरदशना: इति पाठ: शिखरदशना: येषां ते तथा | शिखरिदशना: इति पाठ: शिखरिण: शिखरिवत् उन्नताग्रा: दशना: | शिखरिदशना: इति पाठ: शिखरिणि सूक्ष्माग्राणि दशनानि |
| ८.११० कल्याणिभिनिवेशिन: | कल्याणिभिनिवेशिन: इति पाठ: | कल्पनाभिनिवेशिन: इति पाठ: | कल्याणिभिनिवेशिन: इति पाठ: | कल्याणिभिनिवेशिन: इति पाठ: |

| | | | | |
|---|---|---|---|---|
| ८.११९ तन्त्रकम् | तन्त्रकमिति प्रेरकं धारकं च | तन्त्रकं नियामकम् | तन्त्रकं प्रेरकम् | तन्त्रकं परिचालकम् |
| ८.१५७ अध्येय अध्याय: च पाठभेदौ | अध्येय इति पाठ: | अध्येय इति पाठ: | अध्याय: इति पाठ: | अध्येय इति पाठ: |

## Meta analysis - experts opinion

अध्ययने प्राप्ता: टीकाकारेषु वैधर्म्येषु अभ्यासकस्य तथा तज्ञानाम् ऊहनस्य विवेचनम् अग्रिमवत् –

| सन्दर्भ | वैधर्म्य स्थलम् | अभ्यासक | तज्ञ १ | तज्ञ २ | तज्ञ ३ |
|---|---|---|---|---|---|
| १.४ | यापयन्ति | यद्यपि पदश: वैधर्म्यं दृश्यते तथापि न अर्थश: वैधर्म्यम् । | सम्मतम् | सम्मतम् | सम्मतम् –सूत्रस्थाने वर्णिता: आयुपर्यायार्थानुसारेण वर्णनम् । |
| १.६ | असंसृष्टर सदोषयो: परस्परसम्बन्ध: | शब्दश: वैधर्म्यं दृश्यते परं अभिप्रेतार्थत: वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् । टीकाकारै: स्वबुद्धि अनुसारेण वर्णनं कृत: । | सम्मतम् । १) न्हासहेतुविशेषश्च एतत् सूत्रस्य टीकासु साधर्म्यम् । २) प्रकृतिसमसमवायस्य वर्णनम् । ३) गंगाधरयोगेन्द्रनाथयो: विशेषा टीका उत चक्रपाणे: सामान्यं टीका । ४) द्रव्येषु रसाणां तरतमत्वस्य ऊहनं गंगाधरयोगेन्द्रनाथयो: टीकाया: स्पष्टीभवति । ५) अंशांशकल्पना स्पष्टतरं भवति । |

| | | | | | |
|---|---|---|---|---|---|
| १.१४ | अमधुरम् | सर्वेषां टीकाकाराणां टीका: योग्या: एव | सम्मतम् | सम्मतम् । टीकाकारा: यत् प्रधानं मन्यन्ते तद् वर्णनं कृतम् । वेणीमाधवशास्त्री महोदयस्य रसवर्णनानां लेखनं द्रष्टव्यम् । | सम्मतम् |
| १.१७ | क्षार: : पाठभेद: | पाठभेद: अस्ति परं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| १.१७ | जनपद: | वैधर्म्यं चेदपि तत्त्वत: अर्थभिन्नता नास्ति | सम्मतम् | सम्मतम् । कालत: परिवर्तित: परिभाषा । | सम्मतम् |
| १.१७ | लाघवोपपन्न: | लाघवं लवणं च एतौ द्वौ पाठौ गर्भितार्थदृष्ट्या योग्यौ भात: । परं तथापि व्याकरणं तन्त्रयुक्ति: तथा तन्त्रकर्तु: अभिप्राय: एतान् अनुसृत्य लवणं पाठापेक्षया लाघवं पाठ: अधिक: युक्तियुक्त: अस्ति | सम्मतम् | सम्मतम् । सूत्रवर्णने रसस्य क्रम: गुणस्य अग्र: अस्ति तेन क्रमपक्षेऽपि लवणोपपन्न: पाठ: अयोग्य: भाति । | सम्मतम् ।१) लवण: इति क्षारस्य गुण: । २) क्षारेषु प्रक्रियोत्तर लवणं निर्मियते । इतररसा: अपि क्षारेषु भवति उत लवण: नियमेन भवति । ३) तेन लवणोपपन्न: इति पाठ: अपि योग्य: परं लाघवोपपन्न: योग्यतर: । |
| १.२२ (२) | गुणान्तराधानम् | पाठभेद: अस्ति परन्तु वाकयशेषतन्त्रयुक्ति: तथा व्याकरणानुसारेण वैधर्म्यं नास्ति । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| १.२५ (१) | परिऱ्हासयति | १.पाठद्वयमपि योग्यं तथा तज्ज्ञायमाना अर्थनिष्पत्ति: योग्या २. परं चक्रपाणे: सम्मत: परिऱ्हासयति इति पाठ: अधिक: युक्तियुक्त: भाति | सम्मतम् | सम्मतम् | **असम्मतम् । १) परिशोषणं इति गुणकृत कर्म उत परिऱ्हास: इति उष्णवीर्यस्य कर्म । २) श्लेष्माया: भिन्नसंघात: इति वीर्यस्य कर्म । ३) अधिकरणानुसारेण परिशोषणं इति पाठ: योग्यतर: ।** |
| १.२५ (७) | उत्स्नेहनम् | उभौ पाठौ तथा टीकाकारै: कृतौ अर्थौ योग्यौ तथा स्वीकरणीयौ । | सम्मतम् | सम्मतम् । व्यापदानुसारेण विमार्गगमनं स्नेहनं वा निर्णयं कर्तुं शकयम् । | सम्मतम् । उन्मार्गगमनं इति कण्ठनासा तथा प्राणवहस्रोतस्सु गमनम् । |
| १.२५ (७) | अवसादनम् | त्रय: अपि पाठा: योग्या: | सम्मतम् | सम्मतम् । चिकित्सा तथा व्यवहारपक्षे अवसाद: इति पाठ: योग्यतर: भाति । | सम्मतम् । १) अस्वादनम् इति मानसिकी अवस्था उत उत्स्नेहनं इति शारीरिकी । २) सूक्ष्मपचने कफासंसर्गेण अपचनं भवति । |
| २.७ | सारविधमनम् | शब्दश: वैधर्म्यं दृश्यते परं अभिप्रेतार्थत: वैधर्म्यं नास्ति | सम्मतम् । सार विधमनं अनुलोमप्रतिलोमयो: उभयो: मार्गेण भवति । | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| २.१३ | विमुक्तामप्रदोष: | १.अनुद्रिक्ताम प्रदोष: इति पाठ: तथा तस्य गंगाधरस्य टीका योग्या न भाति इति मे मति: । २.विमुक्तामप्रदोष: इति पाठ: अधिक: योग्य: भाति | सम्मतम् | सम्मतम् | सम्मतम् |
| २.१३ | स्वेदनम् | गंगाधरस्य छेदनं इति पाठभेद: युक्तियुक्त: न भाति । | सम्मतम् | सम्मतम् | सम्मतम् |
| २.१८ | सर्वाश्रयम् | शब्दश: वैधर्म्यं दृश्यते परं अभिप्रेतार्थत: वैधर्म्यं नास्ति । गंगाधरस्य व्याख्या अव्याप्ता भाति । | सम्मतम् | सम्मतम् | सम्मतम् । सुश्रुत: शारीरस्थाने वर्णित: यत् पकवाशये प्राप्त: आहार: धमनीमार्गे हृदयं याति । तेन सर्वशरीरम् एष: अर्थ: समर्पक: । |
| ३.७ (१) | अत्यभिष्यन्दिनम् | गंगाधरस्य तथा योगेन्द्रनाथसेनस्य वर्णनं संयुक्तिकं भाति । | सम्मतम् । | सम्मतम् | सम्मतम् |
| ३.७ (२) | उपक्षीणजलेशयम् | उपक्षीणजलेशयम् एष: पाठ: असंयुक्तिक: गंगाधरस्य 'उपक्षीणजलाशयम्' एष: पाठ: तथा तट्टीका युक्तियुक्ता भाति। | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ३.१५ | आत्मनो गुप्तिः | चतस्रः अपि टीकाः युक्तियुक्ता सन्ति । शब्दशः वैधर्म्यं दृश्यते परं अभिप्रेतार्थतः वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ३.२४ | परिग्रहः | चतस्रः अपि टीकाः युक्तियुक्ता सन्ति । शब्दशः वैधर्म्यं दृश्यते परं अभिप्रेतार्थतः वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.४ | अप्रमाण वचनं दुष्टादुष्टः | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकरणीयौ । तथापि तत्र दृष्टादृष्ट इति पाठः स्वीकरणीयः अस्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.४ | अवितर्कः | वैधर्म्यं अस्ति । उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकरणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.४ | प्रत्यक्ष लक्षणम् | पाठभेदः अस्ति परं अभिप्रेतार्थतः वैधर्म्यं नास्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.६ | आत्मानम् | शब्दशः वैधर्म्यं दृश्यते परं अभिप्रेतार्थतः वैधर्म्यं नास्ति । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ४.८ | उपधि | वैधर्म्यं अस्ति । चतुर्णां टीकाकाराणां विभिन्नं विवेचनं युक्तियुक्तं स्वीकरणीयं च । | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.८ | व्यवसाय | वैधर्म्यं अस्ति परं तद् व्यवसाय इति पदस्य विभिन्नानां अवस्थानांद्योतकं | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.८ | अवस्थानम् अविभ्रमेण | शब्दश: वैधर्म्यं दृश्यते परं अभिप्रेतार्थत: वैधर्म्यं नास्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ४.८ | धृतिं अलौल्येन | वैधर्म्यं अस्ति परं तद् वर्ण्यविषयस्य विभिन्नानां अवस्थानां द्योतकं अस्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.४ | स्रोतमय पुरुष: विचारस्य खण्डनम् | पाठभेद: वैधर्म्यं च स्त: परं तद् वर्ण्यविषयस्य विभिन्नानां अवस्थानां द्योतकं अस्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.७ | महास्रोत: | अभिप्रेतार्थत: वैधर्म्यं नास्ति परं एकदेशतन्त्रयुक्ति अनुसारेण ज्योतिषचन्द्र सरस्वते: विवेचन युक्तियुक्तं भाति । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ५.७ | प्रकुपितम् | गंगाधरस्य योगेन्द्रनाथसेनस्य च विवेचनम् अव्याप्तम् । ज्योतिषचन्द्र सरस्वते: विवेचनम् योग्यम् | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.८ | मूत्रवह स्रोतसां दुष्टिलक्षण | उभौ पाठौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.८ | क्लोम | योगेन्द्रनाथसेनस्य ज्योतिषचन्द्रसरस्वते: विवेचनम् युक्तियुक्त: भवति। ज्योतिषचन्द्र सरस्वते: विवेचनं विशेषं भाति । | सम्मतम् । क्लोमस्य वर्णनं शारीरं पारिषद्यम् अत्र विस्तरेण वर्णित: । | सम्मतम् | सम्मतम् |
| ५.९ | स्थानस्थ: | चक्रपाणे: तथा योगेन्द्रनाथसेनस्य विवेचनम् अव्याप्तं भाति । गंगाधरस्य तथा ज्योतिषचन्द्रसरस्वते: स्थानस्था: स्वमानस्था: इति वर्णनं वाक्यशेषतन्त्रयुक्ति अनुसारं युक्तियुक्त: भवति | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ५.१२ | अतिमात्रम् | अभिप्रेतार्थं वैधर्म्यं नास्ति । | सम्मतम् । मात्राधिक्य तथा मात्राक्षयेन उत्पन्नाः विकाराणां विचाराः आवश्यका | सम्मतम् | सम्मतम् |
| ५.१९ | शुक्रवह स्रोतसां दुष्टिनिदान | पाठभेदः वैधर्म्यं च स्तः परं तद् वर्ण्यविषयस्य विभिन्नानां अवस्थानां द्योतकं अस्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२० | मूत्रवहस्रोतसां दुष्टिनिदान | उभौ पाठौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२१ | पुरीषवह स्रातसां दुष्टिनिदान | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२२ | स्वेदवह स्रातसां दुष्टिनिदान | उभौ पाठौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२३ | धातुभिः विगुणः इत्यत्र पाठभेदः | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् । दोषैः धातुवैषम्यं भवति इति वाग्भटस्य विचारः । | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ५.२३ | सामान्य स्रोतोदुष्टी हेतव: | गंगाधरस्य विवेचनम् अव्याप्तम् । परं हेत्वर्थतन्त्रयुक्ते: उपयोगेन वैधर्म्यं नश्यति | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२३ | धातुभि: विगुण: | योगेन्द्रनाथसेनस्य विवेचनम् अव्याप्तम् भवति । चक्रपाणे: ज्योतिषचन्द्र सरस्वते: विवेचनं संयुक्तिकं तथा स्वीकारणीयं भवति | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२४ | सूत्रान्वये सूत्रार्थे च वैधर्म्यम् | गंगाधरस्य विवेचनम् अव्याप्तम् । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२४ | सामान्य स्रोतोदुष्टी लक्षणम् | गंगाधरस्य विवेचनम् अव्याप्तम् । परं हेत्वर्थतन्त्रयुक्ते: उपयोगेन वैधर्म्यं नश्यति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ५.२४ | विमार्गगमनम् | वैधर्म्यं नास्ति । विमार्गगमनस्य १४ अर्था: प्राप्ता: । | सम्मतम् । मलस्य मूत्रमार्गगमनम् एतत् अवस्थाया निश्चयार्थं आधुनिक विज्ञाने परीक्षा अस्ति । | सम्मतम् | सम्मतम् |
| ६.५ | यथोचितम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ६.११ | अनुबन्ध्यानुबन्ध | चक्रपाणिसम्मत पाठाः योग्याः । | सम्मतम् | सम्मतम् । त्रिदोषयोः साहचर्यपदम् आवश्यकम् | सम्मतम् |
| ७.३ | अधमत्व | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ७.८ | सर्वक्रिमीणां पुरुष संश्रयाणाम् | सर्वक्रिमीणां पुरुषसंश्रयाणाम् एषः पाठः युक्तियुक्तः भवति | सम्मतम् | सम्मतम् | सम्मतम् |
| ७.११ | पाठभेदः | उभौ पाठौ योग्यौ स्वीकारणीयौ च। | सम्मतम् | सम्मतम् | सम्मतम् |
| ७.१२ | श्लेष्मज कृमि नाम | उभौ पाठौ योग्यौ स्वीकारणीयौ च। | सम्मतम् | सम्मतम् | सम्मतम् |
| ७.१२ | संकीर्ण भोजनम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ७.१३ | पुरीषज कृमि लक्षणम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | असम्मतम् । वैधर्म्यम् अस्ति । एतद् वर्णनं द्वयोः कृमयोः अस्ति । एकः दीर्घः ऊर्णांशुसंकाशः उत अन्यः दीर्घोंशुसंकाशः |
| ७.१३ | सूत्रे यदन्तरं तदन्तरम् एतयोः पदयोः पाठभेदः | पदशः वैधर्म्यम् अस्ति परं वाकयशेषतन्त्रयुक्तेः उपयोगेन वैधर्म्यं नश्यति । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| | | | | | सम्मतम् । मध्ये विश्रम्य अस्यार्थ: यत् पूर्वप्रधानकर्मयो: मध्ये विश्रम्य । अस्य विवेचनम् अनुभवोत्तरं निष्पन्नम् । |
| ७.१६ | कृमिकोष्ठ चिकित्सा अपकर्षणम् | ज्योतिषचन्द्र सरस्वतिना कृतं वर्णनं विशेषम् | सम्मतम् | सम्मतम् | कृमिकुष्ठादि विकारा: वारम्वारं संशोधनार्हा: सन्ति । दोषप्रबल्य तथा पुनरुद्भव: सन्ति । तेन नित्य अपकर्षणमावश्यकम् । |
| ७.१७ | कृमिकोष्ठ चिकित्सा अपकर्षणे आस्थापनम् | उभौ पाठौ तथा टीकाकारै: कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् । रुग्णस्य अर्थबलं अपि परीक्षणीयम् । | सम्मतम् । त्रिवारं अत्र स्थाने दोषविचार: दोषबलस्य विचार: कृत: । उत त्रिरात्रं अत्र स्थाने रुग्णबलस्य विचार: कृत: । यत्र कृमिकोष्ठे त्रिदोषजलक्षणानि सन्ति तत्र त्रिवारम् आस्थापनं दद्यात् उत यत्र दोषसापेक्षलक्षणानि न सन्ति तत्र त्रिरात्रम् आस्थापनं दद्यात् । |
| ७.१९ | शैखरिक कषाय: | एष: विषय: भावि संशोधनार्थं योग्य: । द्रव्यगुणशास्त्र तथा आधुनिक वनस्पति शास्त्राधारेण एतस्य संशोधनं आवश्यकम् । | सम्मतम् | सम्मतम् । परं परिषेकार्थ विडंग: व्यवहारे योग्यतर: भाति । | सम्मतम् । बाह्यपरिषेकार्थ वा आभ्यन्तरसेवनार्थ एतेन विवेचनद्वारेण संशोधनम् आवश्यकम् । |

| | | | | | |
|---|---|---|---|---|---|
| ८.४ | जितहस्तम् | वैधर्म्यं अस्ति परं तद् वर्ण्यविषयस्य विभिन्नानां अर्थछटायां द्योतकं अस्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.४ | प्रकृतिज्ञः | अधिकरणतन्त्र युक्ति अनुसारेण ज्योतिषचन्द्र सरस्वतेः विवेचनं योग्यं भाति | सम्मतम् | सम्मतम् | **असम्मतम् । उभौ अर्थौ योग्यौ ।** |
| ८.४ | अनुपस्कृत्तविद्यम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.४ | दक्षम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.७ | कल्यः कृतक्षणः | चक्रपाणेः तथा योगेन्द्रनाथसेनस्य विवेचनं युक्तियुक्तःभाति । गंगाधर तथा ज्योतिषचन्द्रसरस्वतेः विवेचनेन पुनरुक्तितन्त्रदोषः उत्पद्यते । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९ | परिधिन् | वैधर्म्यम् अस्ति उभौ अर्थौ तथा विवेचनंयुक्तियुक्तः स्वीकारणीयं च। | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.१५ | पिण्ड | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.६९ | कारण परीक्षा लक्षणम् | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ८.७१ | विक्रियमाण इति पदेषु वैधर्म्यम् | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.८९ | सुखेन प्रतिबोधनम् | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | **असम्मतम् । अधिकरणानुसारेण प्रबोधनम् इति पाठः योग्यतरः भाति ।** | सम्मतम् |
| ८.८९ | अव्यापत्तिः | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९३ | भक्तिः | भक्तिपदस्य उभौ अर्थौ योग्यौ अस्ति । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९५ | काल गर्भाशय प्रकृति | वैधर्म्यम् अस्ति परं चतुर्णां टीकाकाराणां विवेचनंयुक्तियुक्तः स्वीकारणीयं च। | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९६ | क्षोभः | अभिप्रेतार्थं वैधर्म्यं नास्ति | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९८ | वातल प्रकृति स्वरलक्षण | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९८ | सक्तः वातलप्रकृतिलक्षणम् | उभौ अर्थौ तथा विवेचनं योग्यौ स्वीकारणीयौ च। | सम्मतम् | सम्मतम् | सम्मतम् |
| ८.९८ | वातलप्रकृति स्वरलक्षणम् | जर्जरपदस्य उभौ अर्थौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |

| | | | | | |
|---|---|---|---|---|---|
| ८. १०९ | शुक्रसार लक्षणानि | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । परं स्त्रिप्रियाः प्रियोपभोगाः इति पाठः योग्यतरः भाति | सम्मतम् | सम्मतम् । सार्वदेहिकशुक्रस्य लक्षणम् अस्ति । | सम्मतम् |
| ८. १०९ | शुक्रसारलक्षणानि | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ परं शिखरिदशनाः इति पाठः आधिकतरं ंयुक्तियुक्तः भाति | सम्मतम् | **असम्मतम् । उभौ पाठौ योग्यौ । शोभनदशनाः इति टीका अपि योग्या । शिखरवत् उन्नताग्राः दन्ताः सौन्दर्यस्य लक्षणमस्ति । तेन केवलं एकः पाठः अधिकयेन योग्यः इति न भाति इति मे मति** | सम्मतम् |
| ८. ११० | कल्याणि भिनिवेशिनः | उभौ पाठौ तथा टीकाकारैः कृतौ अर्थौ योग्यौ तथा स्वीकारणीयौ । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८. ११९ | तन्त्रकम् | यद्यपि पदशः वैधर्म्यं दृश्यते तथापि न अर्थशः वैधर्म्यम् । | सम्मतम् | सम्मतम् | सम्मतम् |
| ८. १५७ | अध्येय अध्यायः च पाठभेदौ | योगन्द्रनाथसेनस्य पाठः विवेचनं च अयोग्यम् । | सम्मतम् | सम्मतम् | सम्मतम् |

# Correlation Test

There are 77 points of researcher`s work which was correlated with 3 expert`s opinions.

| Expert | Agree | Disagree | % | Average of % of correlation of experts. |
|---|---|---|---|---|
| Expert 1 | 77 | 00 | 100 | 97.83 |
| Expert 2 | 75 | 02 | 97.40 | |
| Expert 3 | 74 | 03 | 96.10 | |

**Conclusion of statistical test** :-

1) Expert 1 is 100% correlated with researcher.
2) Expert 2 is 97.40 % correlated with researcher.
3) Expert 3 is 96.10 % correlated with researcher.
4) Correlation of these three experts with researcher is approximately 97.83%.
5) Opinions of experts and researcher are 97.83% correlated.

**So the research work is accepted**.

## Discussion - ऊहापोहम्

विमानस्थानस्य अष्टसु अध्यायेषु टीकाकार: लिखितानाम् टीकानाम् तौलनिकम् अध्ययनं कृतम् तथा तत्प्राप्तानां वैधर्म्याणां विवेचनमपि कृतम् । तेषां वैधर्म्याणां तन्त्रयुक्त्याधारेण परिशीलनं कृत्वा अधुना सम्पूर्णाध्ययनस्य विवेचनम् अत्र कृतम् । अध्ययनस्य ऊहापोहम् अग्रिमाणां विषयघटकानाम् आधारेण साहाय्येन च कृत: ।

– टीकानाम् अभ्यासपद्धतीनां विवरणम्

– अध्ययनपद्धति:

– टीकालेखनस्य आवश्यकता – कालत: ऐतिहासिकं विवेचनम्

– ऐतिहासिकम् अध्ययनम् – भौगोलिक: सन्दर्भ:

– टीकानाम् अध्ययनस्य महत्त्वम्

– टीकालेखनस्य उद्देश:

– विमानस्थानस्य वैशिष्ट्यम्

– टीकानां टीकाकाराणां च वैशिष्ट्यानि

– वैधर्म्यम्–सारतरोच्चय:

– वनस्पतिजद्रव्यनामसंज्ञावैधर्म्यम्

– पाठभेदविचारा: - Textual Version

– टीकानां तौलनिकाभ्यासस्य महत्वम्

– ज्ञानविकल्पभेदं अन्तरम् – Knowledge Gaps

## टीकानाम् अभ्यासपद्धतीनां विवरणम् ।

– आयुर्वेदस्य सर्वे संहिताग्रन्था: संस्कृतभाषायां सूत्रबद्ध: लिखिता: सन्ति । सूत्रपद्धत्या इत्यर्थ: न्यूनातिन्यूनै: शब्दै: अधिकाधिकं वर्णनम् ।

– तथैव ग्रन्थलेखनस्य कापि शास्त्रीयपद्धति: तस्मिन् काले विकसिता आसीत् । ग्रन्थलेखनं तथा वाचनं च एतदर्थं तन्त्रयुक्ति: अर्थाश्रय: व्याख्या: च इत्यादय: पद्धतय: निर्मिता: सन्ति ।

– अत: एतेषां सर्वेषाम् अभ्यासं कृत: पश्चात् संहिताया: अध्ययनं कुर्वन्ति स्मं ।

– सूत्ररुपेण वर्णितानां संहिताग्रन्थगतानां विषयाणां विस्तृतविवेचनार्थ विविधेषु कालेषु नैकै: आचार्यै: तदुपरि टीका: लिखिता: ।

– एतासां टीकानां लेखनं भाष्यस्वरुपेण अस्ति ।

–टीकानां साहाय्येन तद्गतस्य विस्तृतविवरणस्य आधारेण मूलस्य ग्रन्थस्य अभिप्रेतार्थं ज्ञातुं शक्यते । तस्मात् टीकानां गहनाभ्यास: अतीव आवश्यक: ।

### पूर्वाभ्यास:

– टीकानाम् अध्ययनात् प्राक् केषांचित् घटकानाम् अभ्यास: अपरिहार्य: । ते अभ्यसनीया: घटका: अधोल्लिखिता: –

१) संस्कृतभाषायां ज्ञानम् ।

२) तन्त्रयुक्ति: अर्थाश्रय: व्याख्या: ताच्छिल्यादीनां च ज्ञानम् ।

३) तन्त्रदोषा: तन्त्रगुणा: च एतेषां ज्ञानम् ।

४) दर्शनशास्त्राणाम् अभ्यास: ।

५) इतिहासस्य परिशीलनम् ।

६) विविधानां देशानां तदनुसारं च तत्रस्था: वनस्पतय:, प्राणिन:, आहाराचारविचारभाषा: च इत्यादीनां ज्ञानम् । उपरोक्तानां विषयाणां यथापूर्णं ज्ञानं तद्विद्य आचार्यात् प्राप्तव्यम् ।

– तथैव यस्मिन् ग्रन्थोपरि टीका स्यात् तद् ग्रन्थविषयकं परिपूर्णं ज्ञानम् प्राप्तव्यम् ।

–संहिता ग्रन्थस्य ग्रन्थकार: काल: इतिहास: रचनशैलि: च आदीनां घटकानां ज्ञानं अत्यावश्यकम्

– ईदृशं पूर्वाभ्यासं कृत्वा पश्चात् टीकाया: अध्ययनं प्रारभणीयम् ।

## अध्ययनपद्धतिः

– टीकानाम् अध्ययनपद्धत्यां देशः भाषा, कालः, व्यक्तिः बुद्धिसामर्थ्यं च आदिभ्यः घटकेभ्यः वैविध्यं उत्पत्तुं शक्यते ।

– टीकायाः अध्ययनस्य द्वौ प्रकारौ स्तः ।

१) एकस्या टीकायाः अध्ययनम्

उदाहरणार्थम् चक्रपाणेः आयुर्वेददीपिका टीकायां अध्ययनम्

२) द्वयो अथवा अधिकानां टीकानां तौलनिकः अभ्यासः ।

उदाहरणार्थम् आयुर्वेददीपिका जल्पकल्पतरुः च एतयोः तुलितम् अध्ययनम् ।

### एकस्याः टीकायाः अध्ययनम्

– कस्यापि संहिताग्रन्थस्य एकस्याः टीकायाः सविस्तरम् अध्ययनम् ।

– अनेन अध्ययनेन टीकाकारस्य विविधानि वैशिष्ट्यानि ज्ञायन्ते ।

– संहिताग्रन्थस्थाः विषयांशाः सम्यक् अवगम्यन्ते ।

– टीकाकारस्य अध्ययनं ज्ञानं च तस्य टीकायाः प्रतीयेते ।

– तं टीकाकारम् अवगतः विषयः तस्य ज्ञानं विचारवैभवं वैविध्यं च एते घटकाः अपि ज्ञायन्ते ।

– यस्मिन् काले सा टीका लिखिता तद्कालगताः अग्रिमाः घटकाः अध्ययनपद्धतिः भाषा, चिकित्सापद्धतिः द्रव्यं कल्पः संज्ञा, आहारविहाराचारपद्धतयः आदयः च अवगम्यन्ते ।

– प्रायः टीकानाम् अभ्यासः अनया एव पद्धत्या भवति ।

– अध्ययनार्थं स्वीकृता टीका संपूर्णतया वाचनं कृत्वा अधीयते ।

### त्रुटयः

– केवलं एकस्य एव टीकाकारस्य विचाराणां ज्ञानं शक्यम् ।

– सः टीकाकारः तस्मिन् विषये यथा यावान् च पारंगतः तथा तावन्तम् एव अभ्यासकः अवगच्छति ।

– एकस्य एव देशस्य अथवा कालस्य पद्धतीः जानाति ।

– टीकाकारेण टीकां कुर्वता कुत्रचित् विस्तृतम् अव्याप्तम् पुनरुक्तं च इति पद्धत्या वर्णितं स्यात्

तर्हि अभ्यासकस्य ज्ञानमपि तद् तद् दोषैः युज्यते ।

उदाहरणार्थम् केवलं चक्रपाणिः अथवा केवलं डल्हणः अभ्यस्तः चेत् तर्हि चक्रपाणिः यावतीं चरकसंहितां ज्ञातवान् तस्याः तत्रभवतः अभिप्रेतान एव विषयान् स वर्णितवान् ।

तथैव चक्रपाणेः कालः ख्रिस्ताब्दस्य एकादशं शतकम् देशः वङ्गः च । तस्मात् तत्कालस्था देशस्थाः च तस्मिन् काले प्रचलिताः पद्धतयः एकया टीकया अध्येतुं शक्यम् भवति । चक्रपाणिः शरीरघटकानां वर्णनं विस्तारेण न करोति । तेन केवलं चक्रपाणेः अध्ययनेन शारीरज्ञानं विशेषेण न भवति ।

द्वे अथवा अधिकानां टीकायां तौलनिकः अभ्यासः –

– मम मतेन टीकानाम् अभ्यासस्य एषा सर्वेषु योग्या पद्धतिः ।अस्यां पद्धत्यां द्वौ उपप्रकारौ स्तः ।

१) नैकैः टीकाकारैः विभिन्ने काले एकस्मिन् ग्रन्थे लिखितानां टीकानाम् अभ्यासः ।

– उदाहरणार्थम्–चरकसंहितायां लिखितयोः चक्रपाणिगङ्गाधरयोः टीकानां तौलनिकः अभ्यासः ।

२) एकस्य एव टीकाकारस्य भिन्नेषु ग्रन्थेषु रचितानां टीकानां तौलनिकः अभ्यासः ।

– उदाहरणार्थम् चक्रपाणेः चरकसंहितायाः आयुर्वेददीपिका तथा सुश्रुतसंहितायाः भानुमतिः इति द्वयोः टीकयोः तौलनिकः अभ्यासः ।

– ईदृशस्य तुलनात्मकस्य अभ्यासस्य पद्धतिः अधोक्ता अस्ति ।

पूर्वाभ्यासः – संस्कृतम् तन्त्रयुक्तिः इत्यादयः

↓

टीकाकाराणां देशतः कालतः च ऐतिहासिकं ज्ञानम्

↓

एकं टीकाकारम् आधारस्थानं मत्वा अन्येषाम् अभ्यासः करणीयः ।

↓

अनन्तरं मूलसंहिताग्रन्थस्यः एक भागः अभ्यासार्थं निश्चितव्यः ।

उदा. एकं स्थानं अथवा एकः अध्यायः अथवा एकं प्रकरणम् ।

↓

तदधिकरणगतस्य प्रतिसूत्रस्य आदौ विवेचनं करणीयम् ।

उदा. चरकसंहितायाः निदानस्थाने तृतीये अध्याये गुल्मसम्प्राप्तेः प्रथमाधिकरणस्थस्य सूत्रस्य चरकस्य विवेचनम् अभ्यासनीयम् ।

↓

तद् विवेचनीये सूत्रे लिखिताः सर्वाः टीकाः क्रमेण अध्ययनीयाः ।

अस्मिन् या टीका आधारभूता स्यात् तत्रस्थविवेचनाय अग्रिमटीकाकाराणां विवेचनं तुलनीयम् ।

एषा तुलना प्रकारद्वयेन भवति ।

साधर्म्यम् → टीकाकारेषु यदि साधर्म्यं स्यात् तस्य विषयस्य अर्थः तथा विवेचनस्य निश्चयः भवति ।

↓

अध्यवसायः

↓

विज्ञानम्

↓

व्यवसायः

↓

सिद्धिः

वैधर्म्यम् → टीकाकारेषु यदि वैधर्म्यं स्यात् अग्रे अध्ययनीयम् ।

<u>टीकाकारेषु वैधर्म्यम्</u>

– वैधर्म्यं कास्मिन् विषयांशे अस्ति तद् विचारणीयम् ।

– वैधर्म्यं नैकेषु विषयेषु भवितुम् अर्हति ।

– सैद्धान्तिकं वैधर्म्यम् ।

– पदशः वैधर्म्यम् ।

– पदार्थशः वैधर्म्यम् ।

– पाठभेदजन्यं वैधर्म्यम् ।

– अर्थशः वैधर्म्यम् ।

– अन्वयपद्धतिषु वैधर्म्यम् ।

– द्रव्यशः वैधर्म्यम् ।

एवं आदौ वैधर्म्यस्य स्वरुपं निश्चितव्यम् ।

↓

वैधर्म्यस्य पदानां व्याकरणं प्रथमं निरीक्षणीयम् । (पदार्थतन्त्रयुक्तिः)

↓

व्याकरणदृष्ट्या कोशगता अर्थनिष्पत्तिः करणीया । तद् पदं कैः विविधैः अर्थैः युज्यते इत्यस्य निर्णयः करणीयः ।

यद् पदविषये वैधर्म्यम् अस्ति तद् पदस्य सन्दर्भान् संहिताग्रन्थात् प्राप्नुयात् ।

↓ (अतीतावेक्षणं तथा अनागतावेक्षणं तन्त्रयुक्ति:)

तेषु अन्येषु सन्दर्भेषु तस्य पदस्य शब्दयोजना अर्थयोजना च अभ्यसनीया ।

↓

तस्मिन् तस्मिन् सन्दर्भे उपलब्धा: टीका: अभ्यसनीया: ।

↓

वैधर्म्ययुक्तानां पदानां अन्य आयुर्वेदग्रन्थगत: सन्दर्भ: तथा तद्गता: टीका: एतेषां निर्णय: करणीय:

↓ (स्वतन्त्रप्रत्यय:)

वैधर्म्ययुक्तानां पदानाम् अन्यशास्त्रगता: सन्दर्भा: द्रष्टव्या: । उदाहरणार्थम् – दर्शनशास्त्रं, पाकशास्त्रं, साहित्यं, वेदाङ्गानि, वेदोपनिषद: च इत्यादय: । (परतन्त्रप्रत्यय:)

↓

एतस्मात् सर्वस्मात् सन्दर्भात् एतद् ज्ञायते यद् यद् विशिष्टं पदं सम्पूर्णे साहित्ये कथं, केन च अर्थेन योजितम् । तथैव सम्पूर्णे आयुर्वेदशास्त्रे अस्य पदस्य उपयोग: केन केन अर्थेन पद्धत्या च क्रियते । (ऊह्यतन्त्रयुक्ति:)

↓

पश्चात् तस्मिन् विशिष्टे अधिकरणे सूत्रगतानां पदानां परस्परेभ्य: अन्वयं विचार्य योजना करणीया ।

↓ ( युक्तितन्त्रयुक्ति: )

अनन्तरं सम्पूर्णस्य सूत्रस्य अर्थं निश्चिनुयात् तथा तद्गतस्य पदस्य तथा तदभूतस्य अर्थस्य स्थानमपि

↓

एतस्मात् सर्वस्मात् ऊहापोहात् तस्य पदस्य अर्थ: निश्चित: भवति ।

↓

यदि विभिन्नै: टीकाकारै: भिन्नै: अर्थै: तस्य पदस्य योजना कृता स्यात् अथवा विभिन्नप्रकारेण तस्य अर्थ: निष्पादित: स्यात् तर्हि प्रतिटीकाकारस्य अर्थानुसारं तद् सूत्रस्य अर्थ: निश्चितव्य: ।

↓

इदं सूत्राधिकरणं प्रकरणाधिकरणाय तथा प्रकरणाधिकरणम् अध्यायाधिकरणाय युज्यते वा न वा ? इति द्रष्टव्यम् ।

↓

एवं सम्पूर्णविवेचनानन्तरं योग्यं पदं पाठभेद: वैधर्म्यं च एते निश्चितव्या: ।

↓

एवं वैधर्म्यं निराकरणीयम् ।

– अस्मिन् अध्ययने विमानस्थानस्य अष्टाध्यायगतानां चतुर्णां टीकानां तौलनिक: अभ्यासं कुर्वता मया एषा एव पद्धति: अवलम्बिता ।

– अस्या: उपयोगेन अहं वैधर्म्याणि निराकर्तुं समर्थ: अभवं तथा विषयस्य अध्यवसायं कर्तुं अपि ।

<u>सारांशत:</u>




इमां सैद्धान्तिक अध्ययन पद्धतिं समावेशयन्ती पद्धति: अभ्यासकै: निश्चिता । अस्मिन् अध्ययने मया तस्या: उपयोग: कृत: । तस्मिन् विविधावस्थानुसारम् अध्ययनं क्रियते ।

वस्तुत: एषा पद्धति: हस्तलिखितानाम् अध्ययनाय उपयुज्यते । तथापि तस्या: उपयोग: अन्यसैद्धान्तिकं अध्ययनं कर्तुं शक्यते ।

तस्य अवस्था: अधोक्तवत् –

१) Collection of commentaries (टीकाया: निर्वाचनम् )

२) Comparative reading of commentaries of each Sutra –

३) Comparison –

i) Retrival – व्याकरणपदार्थ:, ग्रन्थशैलि: तन्त्रयुक्ति: इ.

ii) Revival – संहिता टीका: च अभ्यसनीया: तासां पूर्णरुपेण परिशीलनम्

iii) Transliteration – अतीतावेक्षणं / अनागतावेक्षणं स्वतन्त्रप्रत्यय:

iv )Technical correlation – परतन्त्रप्रत्यय:

v) Translation – सर्वासां टीकानां विवेचनम्

vi) Editing – वैधर्म्यस्थानस्य विवेचनम्

– अनावश्यकानां घटकानां निषेध:

– साधर्म्यस्य अध्यवसानम्

vii) Vetting – शास्त्रीयअनुसंधान: पद्धत्या निश्चय:

viii) Review – सर्वअध्ययनस्य पुनरवलोकनम्

ix) Publication – अध्ययननिष्कर्षस्य प्रकाशनम्

४. Interpretation – सर्वअध्ययनस्य ऊहापोह:

५. Critical comments – सर्वे अध्ययने शास्त्रोक्त: विवेचनात्मक: निर्णय:

– एवं टीकाकानाम् अध्ययनपद्धतय: सन्ति । एता: अनुसृत्य यदि अध्ययनं क्रियते तर्हि यथार्थज्ञानं प्राप्यते ।

## टीकालेखनस्य आवश्यकता – कालत: ऐतिहासिकं विवेचनम्

१)पुरा अध्ययनेन निरीक्षणेन प्रयोगेन अनुभवेन च प्राप्तं ज्ञानं कण्ठस्थीकरणम् इत्येव रीति: आसीत् । वेदा: तथा तद्गतं ज्ञानं च अनया मौखिक्या परंपरया वंशपरम्परया रक्षितम् ।

परं कालप्रवाहे ज्ञानमिदं तथा तस्य विषया: लिखितस्वरूपे रक्षणीया: इति आवश्यकता प्रादुर्भूता । तदनन्त लेखनकला प्रारब्धा । तात्कालीकायां व्यावहारिकायां भाषायां अस्य ज्ञानस्य लेखनं प्रारब्धम् ।

आयुर्वेदशास्त्रविषये अपि अनया एव पद्धत्या ग्रन्थलेखनं समारब्धम् ।

२) प्रत्यक्षम् अनुमानम् आप्तोपदेश: उपमानम् आदिभि: प्रमाणै: नैकै: शास्त्रज्ञै: विविधेषु स्थानेषु नैकानां परीक्षाणाम् आधारेण यद् सिद्धं ज्ञानम् आसीत् तद् संकलय्य यथाविषयं संगत्य संहिताग्रन्था: लिखिता: ।

३) चरकसंहिता, सुश्रुतसंहिता काश्यपसंहिता भेलसंहिता आदय: संहिताग्रन्था: अनया एव पद्धत्या लिखिता: सन्ति ।

४) आयुर्वेदस्य अष्टाङ्गानाम् अध्ययनं विविधासु परम्परासु प्रचलितम् आसीत् ।

उदा.– कायचिकित्साप्रधान: आयुर्वेद: – आत्रेय परम्परा ।

शल्यतन्त्रप्रधान: आयुर्वेद: – धन्वन्तरि परम्परा ।

कौमारभृत्यप्रधान: आयुर्वेद: – वृद्धजीवक परम्परा । इत्यादि

– प्रतिपरम्परं अध्ययनं चिकित्सा अध्यापनं संशोधनं च कुर्वद्भि: शास्त्रज्ञै: प्राप्ता: निष्कर्षा: निरीक्षणानि च लक्षित्वा तेषां पुन:पुन: अभ्यासं कृत्वा प्रत्यक्षप्रत्ययान् गृहीत्वा पश्चात् ते सिद्धान्तानां स्वरूपे स्थापिता: ।

– एवं शनै: शनै: एता: ज्ञानशाखा: विविधै: विषयै: सम्पन्ना: भूता: । अत: संहिताग्रन्थ: इति कस्यापि एकस्य पुरूषस्य निर्मिति: नास्ति । तासां ज्ञानशाखानां सङ्कलित: सञ्चलित: पुरस्कृत: ज्ञानग्रन्थ: भवति ।

५) कालौघे यदा इदं ज्ञानशाखानां विस्तारीकरणं तथा शास्त्रोद्बोधनकार्यं परिपूर्णं तदा एते संहिताग्रन्था: पूर्णरूपत्वं प्राप्तवन्त: ।

६) तथापि संहिताकारैः विविधेषु स्थानेषु नूतनान् विचारान् नूतनां कार्यप्रणालिम् नूतनां द्रव्ययोजनां च स्वीकारार्हतया वर्णितम् । यदि कस्मिन्नपि स्थाने अवर्णितः परं तत्र योग्यः विषयांशः वैद्यः स्वमत्या दर्शयति चेत् तर्हि तद् स्वीकृत्य तस्य उपबृंहणस्य पूर्णरूपेण अनुमतिः दत्ता अस्ति ।

तथैव कस्यापि वर्णितस्य विषयांशस्य अनुपलब्धता, देशकालतः व्यक्तिशः च घटितं परिवर्तनं, नूतनैः अध्ययननिरीक्षणसंशोधनैः कालबाह्यता अथवा अयोग्यता च एतानि कारणानि सतः अपवादः करणीयः इति पूर्णरूपेण बौद्धिकी स्वतन्त्रता शास्त्रकारैः प्रदत्ता अस्ति ।

उदा. अ) सिद्धिस्थाने द्वितीये अध्याये शोधनकर्मणाम् अनुषंगेन व्याधीनाम् अर्हानर्हत्वं वर्णितम् । तत्र संहिताकारैः स्पष्टं कथितम् यत् ''यत्र यद् कर्म अयोग्यम् इति वर्णितं तत्र यदि तदवस्था प्राप्ता तर्हि तत् कर्म करणीयम् तथा यत्र यद् कर्म योग्यं तत्र तदवस्था उत्पन्ना न स्याद् तर्हि तत् कर्म मा कुर्यात्'' एतद् वैद्येन स्वमत्या निर्णीतव्यम् ।

''येभ्यो यन्न हितं यस्मात् कर्म येभ्यश्च यद्धिहतम् ।
न चैकान्तेन निर्दिष्टेऽप्यर्थेऽभिनिविशेद् बुधः ।।
स्वयमप्यत्र वैद्येन तर्क्यं बुद्धिमता भवेत् ।
उत्पद्येत हि साऽवस्था देशकालबलं प्रति ।।
यस्यां कार्यमकार्यं स्यात् कर्म कार्यं च वर्जितम् ।
छर्दिहृद्रोगगुल्मानां वमनं स्वे चिकित्सिते ।।
अवस्थां प्राप्य निर्दिष्टं कुष्ठिना बस्तिकर्म च ।
तस्मात् सत्यपि निर्देशे कुर्यादूह्य स्वयं धिया । (च. सि. २।२४-२८)

आ) सूत्रस्थाने चतुर्थेऽध्याये महाकषायानां वर्णनम् अस्ति । तत्र चरकाचार्येण वैद्येभ्यः स्पष्टम् आदिष्टम् यत् यद् द्रव्यं कस्यामपि व्याध्याम् अयौगिकं स्यात् तदा तद् गणात् वर्जितव्यम् । प्रत्युत किमपि द्रव्यं महाकषाये न वर्णितं परं व्याध्यावस्थायां तद् यौगिकं तर्हि तद् गणे अवश्यं समावेशितव्यम् ।

इ) तेभ्यो भिषग्बुद्धिमान् परिसंख्यातमपि यद् द्रव्यमयौगिकं मन्येत तत्तदपकर्षयेत् । यद्यच्चानुक्तमपि यौगिकं मन्येत तत्तद्विदध्यात् वर्गमपि वर्गेणोपसंसृजेदेवमेकेनानेकेन वा युक्तिं प्रमाणीकृत्य ।

च.वि.८/१४९ – एवं संहिताकारैः भावि अध्ययनसंशोधनार्थं क्षेत्रविस्तारः कारयितः अस्ति ।

७) संहिताग्रन्थाः पूर्णरूपे प्राप्ते नैकानि शतकानि ते प्रचलिता आसन् । तासां तासां ज्ञानशाखानाम् अध्ययनाय उपयुक्ताः आसन् । अखिले भारतदेशे आयुर्वेदस्य अष्टविध ज्ञानशाखानाम् अध्ययनाध्यापने तथा चिकित्सां व्यवहरन्त्यः ज्ञानशाखाः प्रचलिताः आसन् । संशोधनस्य ऊर्ध्वम् अस्मिन् नूतनानां ग्रन्थानाम् अपि भरं भवति स्म । प्राचीनेषु प्रचलितेषु ग्रन्थेषु नूतनं संशोधनं समाविश्य तेषां संहिताग्रन्थानां उपबृंहणं भवति स्म ।

एषः सुवर्णकालः नैकानि शतकानि आसीत् । अस्मिन् काले आयुर्वेदस्य विद्याशाखा प्रस्थापिता ।

८) ख्रिस्ताब्दपूर्वे अष्टतः दशमे शतके भारतवर्षं शकैः आक्रान्तम् । तदनंतरं क्रमेण हूणाः यवनाः, रोमनाः मिस्त्राः पारसिकाः, युरोपदेशीयाः च एतेषां आक्रमणानि प्रायः २००० वर्षपर्यन्तं भारतेन सोढानि ।

९) एतैः दुराक्रमणैः भारतस्य सांस्कृतिकम् आर्थिकं राजकीयं सामाजिकं च वैभवं नष्टम् । नालन्दा विद्यापीठं मुहमदः घोरी ददाह । तदा तस्य ग्रन्थालयं त्रिमासपर्यंत् दहत् आसीत् इयन्ती ग्रन्थसंपद् तत्र आसीत् ।

१०) एभिः आक्रमणैः सह बौद्धजैनयोः धर्मयोः वर्धमानेन प्रभावेण शस्त्रकर्म, शवविच्छेदनम् अग्निकर्म, रक्तमोक्षणम् आदयः उपक्रमाः न्यूनीभूताः । चिकित्साशास्त्रम् गौणस्थानं प्राप्य समाजे वैद्यः त्याज्यः इति प्रचलितम् ।

११) आयुर्वेदस्य अध्ययनाध्यापनं तथा चिकित्साकर्म कुर्वत्सु वैद्यवृन्देषु अस्य घोरः विपरीतः परिणामः जातः । सामाजिक्याः व्यवस्थायाः अस्थैर्यात् शास्त्राभ्यासः शास्त्रव्यवहारः च एतौ दुर्बाधितौ ।

१२) अस्मिन् ऐतिहासिके काले विपर्ययावस्थया तथा द्विषताम् आक्रमणैः नैके ग्रन्थाः संपूर्णतया नष्टाः । उदाहरणार्थम् निमितन्त्रम् , क्षारपाणितन्त्रम् , पराशरतन्त्रम् जतुकर्णतन्त्रं हारिततन्त्रम् इत्यादयः । नैकानि तन्त्रानि खण्डितानि । उदाहरणार्थम् अग्निवेशतन्त्रम् , वृद्धजीवकतन्त्रम् भेलतन्त्रम् आदयः ।

अत: शास्त्राभ्यासं रक्षयमाणेषु केषुचित् दक्षेषु वैद्येषु तदुपरि प्रतिसंस्कारस्य आवश्यकता प्रस्फुरिता । अनया प्रक्रियया कानिचन तन्त्राणि प्रतिसंस्कारं प्राप्य संहिताग्रन्थरूपेण सिद्धानि ।

उदा. अग्निवेशतन्त्रम् – चरकसंहिता ।

वृद्धजीवकतन्त्रम् – काश्यपसंहिता ।

भेलतन्त्रम् – भेलसंहिता ।

वृद्धसुश्रुततन्त्रम् – सुश्रुतसंहिता ।

१३) अस्मिन एव काले सूत्ररूपेषु संहिताग्रन्थेषु विस्तृतस्य भाष्यरूपस्य विवरणस्य आवश्यकता समुद्भूता । परिणामत: तद् तद् कालीनै: आचार्यै: विविधेषु संहिताग्रन्थेषु टीकालेखनं प्रारब्धम् ।

१४) नूतनानां ग्रन्थानां लेखनापेक्षया उपलब्धेषु ग्रन्थेषु भाष्यात्मकं टीकालेखनं तेषां संरक्षणं च मूल्यतरम् आसीत् । अत: विविधानां टीकानां लेखनं कृतम् ।

उदाहरणार्थम् – चरक संहितायां भट्टार: हरिश्चन्द्र:, सैन्धव: स्वामीकुमार:, आषाढवर्मा, आङ्गिरी ब्रह्मदेव: क्षीरस्वामी दत्त:, भासदत्त:, भीमदत्त:, इत्यादिभि: नैका: टीका: लिखिता: । मूलै: ग्रन्थै: सह एतासामपि अध्ययने प्रारब्धम् ।

१५) तस्मिन् काले निर्मिता: उपरोक्ता: सर्वा: टीका: अद्य तु अनुपलब्धा: । केवलं भट्टार हरिश्चन्द्रस्य सूत्रस्थानस्य त्रिषु अध्यायेषु लिखिता टीका उपलभ्यते ।

आभट्टारं दृढबलपर्यंतम् – षड् शतानाम् अज्ञात: कठिन: काल:

१६) एतासां टीकानां प्रकाशनानन्तरं (ख्रिस्ताब्दस्य द्वितीयत: चतुर्थं शतकम्) प्राय: षड् शतवर्षानन्तरं दृढबलेन चरक संहिताया: संपूर्ण कृतम् ।

१७) इत्यर्थ: यदा भट्टार हरिश्चन्द्र: भासदत्त: भीमदत्त: इत्यादिभि: आचार्यै: टीका: लिखिता: तदा तत्रभवद्भ्य: मूलस्वरुपा चरकसंहिता उपलब्धा आसीत् ।

१८) तदा अस्मिन् षड् शतवर्षाणां मध्यकाले एवं किम् घटितं येन मूलसंहिता अपि खण्डिता अपि च उपलब्धा: सर्वा: टीका: अपि विनष्टा:? अयं प्रश्न: आयुर्वेदस्य ऐतिहासिकम् अध्ययनं संशोधनं च कुर्वद्भ्य: संशोधकेभ्य: चिन्तनाय अध्ययनाय च महत्वम् अर्हति ।

१९) अत्र मया लक्षिता: काश्चन ऐतिहासिका: महत्वपूर्णा: घटना: –

अ) ख्रिस्ताब्दस्य षष्ठे शतके दाहिर नाम्नि राजनि भूतं यवनानाम् आक्रमणम् ।

आ) शकाः हूणाः यवनाः रोमनाः आदीनाम् वर्धमानानि आक्रमणानि ।

इ) सम्राजः अशोकस्य धर्मान्तरप्रभावः ।

ई) अहिंसाप्रियस्य बौद्धधर्मस्य प्रभावः ।

एते केवलं चिन्तन योग्याः घटकाः । एतेषु निश्चितम् अध्ययनम् आवश्यकम् ।

२०) ख्रिस्ताब्दस्य दशमे शतके दृढबलेन चरकसंहितां संपूर्यं ताम् ऊर्जितावस्थां प्रापिता ।

२१) तत् पश्चात् पुनः दृढबलेन संपूरितायां संहितायां विविधेषु कालेषु विविधाः टीकाः अवतरिताः । उदा. चक्रपाणिः, जेज्ज्टः, शिवदास सेनः इत्यादयः ।

२२) तदनन्तरं युरोपदेशीयानां आक्रमणेन पाश्चात्यानां ज्ञानविज्ञानं भारते संक्रमितम् । मॅकोले इत्यस्य शिक्षणपद्धत्या प्राचीनाः भारतीयाः ज्ञानार्जनम् अध्यापनं व्यवहारः च इत्यादीनां प्रक्रियाः प्रनष्टाः । गुरुकुलानि ध्वंसितानि । छात्राः अपि पाश्चात्यज्ञानशाखाम् अभिमुखाः जाताः ।

२३) अस्मिन् आधुनिके काले पुनः गङ्गाधर रॉयः, रमाकान्त सेनः द्वारकानाथ सेनः, योगेन्द्रनाथ सेनः, हाराणचन्द्र चक्रवर्तिः, गङ्गाप्रसाद सेनः, गयनाथ सेनः, झण्डु विठ्ठल भटः, शंकरदाजी शास्त्री पदे, पी. एस् वारियरः, जीवराम कालिदास शास्त्री, इत्यादिभिः आचार्यैः ज्ञानपरंपरा संवर्धिता ।

२४) अस्मिन् अपि काले चरकसंहितायां बहवः टीकाः अवतरिताः । उदा. गङ्गाधरः, योगेन्द्रनाथ सेनः, ज्योतिषचन्द्र सरस्वतिः इत्यादयः

२५) एवं टीकालेखनं तस्य आवश्यकता च इति विषये एषः ऐतिहासिकः प्रवाह संक्षेपेन वर्णितः । टीकानाम् अध्ययनाय एषः अभ्यासः तस्य ज्ञानं च अतीव आवश्यकम् इति भाति ।

## ऐतिहासिकम् अध्ययनम् – भौगोलिकः सन्दर्भः ।

ऐतिहासिके अध्ययने तस्मिन् ग्रन्थे वर्णितः भौगोलिकः सन्दर्भः अपि अनन्यसाधारणं महत्त्वम् अर्हन्ति । अस्मिन् सन्दर्भे अग्रिमघटकानां निश्चयः कर्तुं शक्यते । –

१) ग्रन्थस्य कालनिश्चितिः ।

२) ग्रन्थकर्तृः कालनिश्चितिः ।

३) ग्रन्थकर्तृः देशस्य वा निवासस्य ज्ञानम् ।

४) तत्कालिकभौगोलिकपरिस्थितेः ज्ञानम् ।

५) ऐतिहासिकं महत्त्वम् ।

६) ग्रन्थस्य मौलिकत्वं सिध्यति ।

७) तत्कालिक– सांस्कृतिक–राजकीय–इतिहासः अनुमन्यते ।

८) तत्कालस्थस्य मानवस्य जीवनस्वरुपं शारीरस्वरुपं देशस्वरुपं च एतेषां ज्ञानं भवति ।

अस्मिन् अध्ययने चरकसंहितायाः विमानस्थानं इति अध्ययनाधिकरणम् अस्ति । अतः तस्मिन् प्राप्नुवतां देशानां सन्दर्भाः अधोक्तवत् –

१) पञ्चालक्षेत्रम् – सन्दर्भः – च. वि. ३/३

– चरकसंहितायाः ऐतिहासिकस्य अध्ययनस्य अनुषंगेन एषः सन्दर्भः अतीव महत्त्वपूर्णः अस्ति ।

– पञ्चालक्षेत्रस्य जनपदमण्डले काम्पिल्य नाम्नि राजधान्यां गङ्गायाः तटे वने सञ्चरन् पुनर्वसुः आत्रेयः स्वशिष्येभ्यः जनपदोद्ध्वंसः इति विषयस्य ज्ञानं दत्तवान् ।

– प्राचीने भारते पञ्चालः इति जनपदम् आसीत् ।

– कुरुक्षेत्रस्य पूर्वदिशि कनौजस्य समीपे चम्बलनद्यः उत्तरतटतः आहिमाचलम् इति प्रदेशं तत्कालिकं पञ्चालक्षेत्रम् आसीत् । महाभारते पञ्चालनरेशद्रुपदेन द्रोणाचार्यः अपमानितः । तस्य प्रतीकारार्थं पाण्डवैः विशेषतः अर्जुनेन द्रुपदः पराभूतः । पश्चात् तस्य राज्यार्धं द्रोणाचार्यं प्रापितम् । तस्मात् पञ्चालक्षेत्रम् द्विधा विभाजितम् ।

अ) गङ्गायाः उत्तरभागः – उत्तरपञ्चालः – अहिच्छत्रा राजधानी

आ) गङ्गायाः दक्षिणभागः – दक्षिणपञ्चालः – काम्पिल्य राजधानी

– अस्मिन् पञ्चालक्षेत्रे परिचक्रा काम्पिल्य अहिच्छत्रा च एता: त्रिनगर्या: इति प्रसिद्धा: आसन् ।

वंश: –




– एते पञ्च पुत्रा: राज्यशासनार्थं पर्याप्त: आसन् । एषां नामत: पञ्च अलम् इति पञ्चालम् इदृशं नाम अस्मै देशाय प्राप्तम् ।

– दक्षिणपञ्चालपरम्परायाम् ब्रह्मदत्त: राजा आसीत् । तेन ऋग्वेदाथर्ववेदयो: क्रमपाठ: निश्चित: ।

– शतपथब्राह्मणग्रन्थे पञ्चालदेशस्य प्राचीनं नाम 'क्रिवी' इति वर्णितम् ।

२) काम्पिल्यम् – सन्दर्भ – च. वि. ३/३

– दक्षिणपञ्चालक्षेत्रस्य राजधानी । अमरावतीसदृशा रमणीया नगरी ।

– महाभारतकाले राजा द्रुपदेन शासिता ।

– रामायणे बालकाण्डे ३३. ५. १९ इत्यत्र नामोल्लेख: ।

– प्रख्यात: प्राचीन: ज्योतिषशास्त्रज्ञ: वराहमिहीर: तथा त्रयोदश: जैन तीर्थङ्कर: विमलनाथ: एतौ अस्मिन् नगरे जनिम् अलभत: ।

– सद्य: उत्तरप्रदेशस्थितं फर्रुखाबादनगरम् एव प्राचीनं काम्पिल्यनगरम् अस्ति ।

३) चीन: – सन्दर्भ: – च. वि. १/१७

– अस्मिन् देशे क्षारस्य अतिसेवनम् आसीत् इति सन्दर्भ: अत्र अस्ति ।

– सद्य: सत: तिबेटस्य उत्तरदिशि सन् चीन: अयमेव चरककालस्य चीनदेश: इति ।

४) <u>प्राच्या:</u> – सन्दर्भ: – च. वि. १

– क्षारस्य अतिसेवन कुर्वाण: देश: । सर्वे पौर्वात्या: प्रदेशा: एनं प्राच्यदेश: इति सम्बोधयन्ति स्म ।

प्राच्या: कामरुपादिवासिन: । गङ्गाधर: ।

५) <u>बाल्हिक:</u> – सन्दर्भ: – च. वि. १/१८

– बाल्हिका: बाल्हिकदेशवासिनो जनपदा: । गङ्गाधर:

– अस्मिन् देशे लवणस्य अतिसेवनं कुर्वाण: जना: आसन् ।

– काङ्कायन नामा भिषक् अस्य देशस्थ: आसीत् । गान्धारादय: देश: बाल्हिकप्रान्तस्य विभाग: ।

– सद्यस्थित्याम् इराण: अफगाणिस्तान: च एतौ प्रदेशौ तात्कालिक: बाल्हिक: अस्ति ।

६) <u>सौराष्ट्र:</u> – सन्दर्भ: – च. वि. १/१८

– अस्मिन् देशे लवणस्य अतिसेवनं कुर्वाण: जना: आसन् ।

– सम्प्रति अपि अनेन नाम्ना एव एष: प्रदेश: प्रसिद्ध: ।

७) <u>सिन्धु:</u> – सन्दर्भ: – च. वि. १/१८

– अस्मिन् देशे अपि लवणस्य अतिसेवनं कुर्वाण: जना: आसन् ।

– सिन्धुनद्य: तटस्थं प्रदेशं सिन्धुप्रदेश: इति वदन्ति स्म ।

– सैन्धवं अत्रस्थ: लवणप्रकार: । सैन्धवजाते: अश्वा: अपि प्रसिद्धा: आसन् ।

– सद्यस्थितौ पाकिस्तान प्रदेश: तत्कालिक सिन्धुदेश: अस्ति ।

८) <u>सौवीर:</u> – सन्दर्भ: – च. वि. १/१८

– अस्मिन् देशेऽपि लवणस्य अतिसेवनं कुर्वाण: जना: आसन् ।

– ते दुग्धेन सह अपि लवणस्य सेवनं कुर्वन्ति स्म ।

९) <u>देशलक्षणवर्णनम्</u> –सन्दर्भ: – च. वि. ३/४७–४८

– अत्र त्रिविधानां देशानां स्वरुपलक्षणानि वर्णितानि ।

– जाङ्गल: – अल्पोदक: अल्पद्रुम: प्रवात: प्रचूरातप: स्वल्परोगतम:

– आनूप: – प्रचूरोदक: प्रचूरवृक्ष: निवात: दुर्लभातप: बहुदोष:

– साधारण: – समलक्षण:

१०) देशपरीक्षा – सन्दर्भः – च. वि. ८/१

दशविधपरीक्षाणां अन्तर्गन्तं आतुरपरिज्ञानहेतुना देशपरीक्षा सविस्तरं वर्णिता ।

११) मध्यदेशः – सन्दर्भः – चक्रपाणि टीका च. वि. ४/८

– देशतः भक्तिः अनुमन्तव्या । अस्य विषयस्य टीकायां मध्यदेशः उल्लिखितः अस्ति ।

''अयं मध्यदेशीयः तेन अस्य गोधूममाषादीषु इच्छा अनुमीयते ।''

१२) रुमानदी – सन्दर्भः – चक्रपाणि टीका च. वि. ८/१४१

– सन्दर्भ अतीव वैशिष्ट्यपूर्णः अस्ति । रोमकम् इति लवणप्रकारः रुमानद्यां उत्पद्यते ।

रुमानदीभवम् इति रोमकम् । चक्रपाणिः च. चि. ८/१४१

रोमकं रुमाह्रद्भवम् । चक्रपाणिः च. वि. १५/८५

१३) कामरुपः

''अम्लिका कन्दप्रधाना कामरुपे प्रसिद्धा अम्लिकाभेद एवेत्याहुः ।''

(चक्रपाणि च. वि. ८/१४०)

''प्राच्याः कामरुपादिवासिनः ।'' (गङ्गाधरः च. वि. १/१७)

अद्यतनीयः आसामप्रान्त नाम तत्कालिकः कामरुपप्रदेशः । महाभारते अपि कामरुपदेशस्य उल्लेखः दृश्यते । कामरुपस्य राजकन्या चित्रांगदा अर्जुनस्य पत्नी आसीत् । तयोः पुत्रः बभ्रुवाहनः तत्र शासनम् अकरोत् ।

चक्रपाणिना कन्दप्रधानं इति अम्लिकाद्रव्यं कामरुपे प्रसिद्धम् आसीत् इति व्याख्या कृता ।

१४) वङ्गः –

– चक्रपाण्यादयः चत्वारः अपि टीकाकारः वङ्गदेशीयाः सन्ति । तस्मात् तेषां टीकासु वङ्गदेशस्थानां द्रव्याणां अग्रिमसन्दर्भः प्राप्यन्ते ।

अ) धामार्गवः – घोषकभेदः 'तितधूमा' इति वङ्गे । ज्योतिषचन्द्रसरस्वतिः च.वि. ८/१३५

आ) काकनासा – केयोठुटी इति वङ्गेषु ख्याता । ज्योतिषचन्द्रसरस्वतिः च.वि.८/१३९

इ) आम्रातकः – आमडा इति वङ्गेषु प्रसिद्धः । योगीन्द्रनाथसेनः च.वि.८/१४०

ई) अजमोदा – बस्तमोदा रांधुनी इति वङ्गेषु ख्याता । योगीन्द्रनाथसेनः च. वि. ८/१४२

उ) मूषिकपर्णी–जलजो हठविशेषः 'इन्दुरकानीपाना' इति वङ्गे ।

ज्योतिषचन्द्रसरस्वतिः च.वि.७/२१

– ज्योतिषचन्द्रसरस्वतिना देशः अङ्गवङ्गादयः इति वर्णयित्वा वङ्गदेशः उल्लिखितः ।

१५) उत्तरवङ्गः –

– वङ्प्रदेशे उत्तरभागे अम्लवेतसः इति द्रव्यं थैकड इति नाम्ना प्रसिद्धः अस्ति । इति सन्दर्भः प्राप्यते । ''थैकड इत्युत्तरवङ्गे प्रसिद्धः फलविशेषः । ज्योतिषचन्द्रसरस्वतिः च. वि. ८/१४०

१६) शाकम्भरीयः देशः – रोमकं लवणं शाकम्भरीये देशे निर्मिमते इति योगीन्द्रनाथसेनः वर्णयति ।

१७) उत्तरपथिकः

– पीलु – उत्तरपथिकः फलमज्ञविशेषः 'अखरोट' इति भाषा ।

ज्योतिषचन्द्रसरस्वतिः च. वि. ७/१७

– उत्तरपथिकः नाम भरतभूमेः उत्तरे स्थिते भूभागे लभमानस्य पीलु इति फलविशेषस्य नैकः सन्दर्भाः प्राप्यन्ते । (उदा. – चक्रपाणि च. कल्प. ७/२०, चक्रपाणि च. सिद्धि. ७/६३)

१८) दिल्ली – कलिकाता

– ज्योतिषचन्द्रसरस्वतेः व्याख्यायां एते सन्दर्भः प्राप्यन्ते ।

– तत्र भवान् चरकसंहितायां टीकां लिखत्सु टीकाकारेषु आधुनिकतमः टीकाकारः ।

– तस्मात् तत्र भवतः टीकायाः एते आधुनिकाः सन्दर्भाः प्राप्यन्ते । ( कालः – विंशतितमं शतकम् )

नगरम् – नगराणि दिल्लीकलिकाताप्रभृतीनि । (ज्योतिषचन्द्रसरस्वतिः च. वि. ३/२०)

१९) ताम्रलिप्तः

– 'निगमाः ताम्रलिप्तादयो वाणिज्यभूमयः । (ज्योतिषचन्द्रसरस्वतिः च.वि. ३/२०)

– ताम्रलिप्तः इति वाणिज्यभूमिस्वरुपिणः निगमस्य उल्लेखं ज्योतिषचन्द्रसरस्वतिः करोति ।

२०) अङ्गदेशः

– देशः अङ्गवङ्गादयः । (ज्योतिषचन्द्रसरस्वतिः च.वि.३/२०)

– महाभारते सूर्यपूत्रः कर्णः अङ्गराजः इति प्रसिद्धः आसीत् ।

२१) पुलिनम् –

– अस्य भूविशेषस्य वर्णनं गङ्गाधरः ज्योतिषचन्द्रसरस्वतिः च एताभ्याम् अग्रिमवत् कृतम् –

पुलिनं तोयोत्थवालुकामयद्वीपम् । (गङ्गाधरः च. वि. ६/१७)

पुलिनं नद्यास्तीरम् । (ज्योतिषचन्द्रसरस्वतिः च. वि. ६/१७)

२२) गङ्गा –

– पञ्चालक्षेत्रस्था काम्पिल्यनगरी गङ्गायाः तीरे अवसत् ।

– गङ्गानद्या पञ्चालजनपदं उत्तरं दक्षिणं इति द्वयोः भागयोः विभाजितम् ।

गङ्गा ऋतुक्रमः च –

– विमानस्थानस्य ८/१८५ इति सूत्रे अतीव विशेषः सन्दर्भः चक्रपाणिः वर्णयति ।

– अस्मिन् सूत्रे शरीरशोधनप्रवृत्तेः अनुषंगेन ऋतुक्रमः वर्णितः । अत्र सः रसोत्पत्तेः अनुषंगेन न अपेक्षितः ।

– ''हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रयः ऋतवो भवन्ति तेषामन्तरेष्वितरे साधारणलक्षण स्त्रयः ऋतवः प्रावृट्शरद्वसन्ता इति ।''

– अस्मिन् क्रमे शिशिरऋतुः न उल्लेखितः । एतद् अन्तरं कस्मात् भवति ?

अस्य उत्तरम् अधोक्तम् –

– गङ्गानद्यः दक्षिणे प्रदेशे वर्षायाः प्रमाणमधिकम् । अतः तत्र प्रावृटादि ऋतुक्रमः अस्ति । तथैव गङ्गानद्यः उत्तरे प्रदेशे शैत्यस्य प्रमाणं अधिकं अतः तत्र हेमन्तशिशिरऋतुक्रमः अस्ति ।

– भारतस्य एषाः भौगोलिकः ऋतुक्रमः अतीवमहत्वपूर्णः सन्दर्भः अस्ति । इदृशः ऋतुक्रमः जगति अन्यत्र न लभते ।

## टीकानाम् अध्ययनस्य महत्त्वम्

मूलेन संहिताग्रन्थेन सह तदुपरि उपलब्धानां सर्वासां टीकानाम् अध्ययनम् आवश्यकम् । तस्य महती अधोक्तवत् अस्ति । –

१. सूत्ररुपेण वर्णितस्य मूलग्रन्थस्थानां विषयाणां ज्ञानं भवति ।

२. कालत: उद्भूतस्य ज्ञानान्तरस्य समन्वयं प्राप्नोति ।

३. संक्षेपेण वर्णितविषयस्य सविस्तरं ज्ञानं प्राप्यते ।

४. द्रव्याणां विशेषवर्णनं नामसंज्ञा: च ज्ञायन्ते ।

५. द्रव्याणां उपयोगस्य योग्या अवस्था ज्ञायते ।

६. नूतनानां विचारप्रवाहाणां बोध: भवति ।

७. कमपि विषयं आकलनस्य भिन्ना: दृष्टिकोणा: ज्ञायते ।

८. टीकाकारस्य स्वतन्त्राया: विचारपद्धत्या: बोधा: भवति ।

९. कापि अवस्था कथं निर्णयितव्या इत्यस्य पद्धति: ज्ञायते ।

१०. कस्यामपि विशिष्टायां व्याध्यवस्थायां करणीया उपचारपद्धति अवगम्यते ।

११. टीकाकारस्य तथा तस्य आधारेण मूलतन्त्रकर्तृ: चिन्तनपद्धति: अनुमीयते ।

१२. सविस्तरं द्रव्याभ्यास: भवति ।

१३. स्वशास्त्राभ्यास: दृढति ।

१४. सशास्त्राभ्यासं अन्यशास्त्राणि अपि अभ्यस्यन्ते ।

१५. क: अपि नूतन: विषय: अवबुध्यते ।

१६. आदौ पठतस्य विषयस्य सगभीरम् आकलनं भवति ।

१७. कस्यापि विषयस्य चिकित्सागतं महत्त्वं वेत्ति ।

१८. वैद्यस्य अधिकार: तथा नैतिकनिष्ठाया: ज्ञानं भवति ।

१९. मूलग्रन्थस्थस्य विषयस्य चिकित्सकीय महत्त्वं विद्यते ।

२०. टीकाकारस्य टीकालेखनपद्धति: शैली च ज्ञायेते ।

२१. तात्कालिकानां सामाजिक–राजकीय–ऐतिहासिक– भौगोलिक–अवस्थानां ज्ञानं भवति ।

२२. औषधनिर्माणशास्त्रस्थस्य विषयाणाम् अल्पाल्पांशांनां ज्ञानं भवति ।

२३. टीकाकाराणां स्वभाववैशिष्ट्यानि ज्ञायते ।

२४.टीकाकारैः योजिताः शब्दाः तेषां योजना ततः निष्पन्नः अर्थः एतेषां महत्त्वपूर्णं ज्ञानं प्राप्यते ।

२५. तन्त्रयुक्तिनाम् अध्ययनं भवति ।

२६. टीकाकाराणां बुद्धिवैभवम् आकल्पते ।

२७. स्वशास्त्रे श्रद्धा दृढाभवति ।

## टीकालेखनस्य उद्देश:

१) ज्ञानपरम्परा प्रतिष्ठापनीया ।

२) सूत्ररुपेषु ग्रन्थेषु भाष्यस्वरुपेण विवेचनम् ।

३) नूतनं संशोधनं विचारप्रवाह: च एतेषां प्रस्तुति: ।

४) सविस्तरं विषयांशस्य ऊहापोह: ।

५) अन्यशास्त्राणाम् अभ्यासस्य उपयोगेन स्वशास्त्रबृंहणम् ।

६) अनुक्तविषयाणां ज्ञानप्राप्ति: ।

७) शास्त्रस्य उपबृंहणम् ।

८) शब्दार्थानां ज्ञानं कारणीयम् ।

९) अभिप्रेतार्थस्य ज्ञानस्य वर्धनम् ।

१०) लेशोक्तविवरणस्य विस्तारणम् ।

११) विस्तृतस्य विवेचनस्य संक्षेप: ।

१२) स्वमतस्य स्थापना ।

१३) देशत: भूतानां परिवर्तनानां लेखनम् ।

१४) कालत: भूतानां परिवर्तनानां लेखनम् ।

१५) गुरुपरम्पराया उद्भूतानां स्वीकृत्य स्थिरीभूतानां संकल्पनानां वर्णनम् ।

१६) देशत: उत्पन्नद्रव्याणां वर्णनम् ।

१७) कालत: उत्पन्नद्रव्याणां वर्णनम् ।

१८) कालानुरुपं परिवर्तितानाम् आहार: विहार: आचार: च एतेषां वर्णनम् ।

१९) नूतनया ज्ञातद्रव्याणां स्वरुपोपयोगो: वर्णनम् ।

२०) कस्मिन् अपि विषये तत्तत् टीकाकारस्य तथा तस्य परम्पराया: चिन्तनस्य प्रस्तुति: ।

२१) अन्यतन्त्रस्थ विचाराणां प्रकटीकरणम् ।

२२) तत्कालिकस्य सर्वेषां विचारप्रवाहाणां समन्वयं ऊहापोहं च कृत्वा योग्यस्य सिद्धान्तस्य प्रस्थापना ।

२३) संशोधनोत्तरं प्राप्तं ज्ञानं सर्वेभ्य: प्रसारणीयम् ।

२४) तौलनिकम् अध्ययनम् ।

२५) साक्षात् व्यवहार्य सुकरता ।

एते केचन उदद्देशा: अत्र उपलक्षणमात्रम् वर्णिता: ।

## विमानस्थानस्य वैशिष्ट्यम्

चरकसंहितायां 'विमानस्थानम्' इति वैशिष्ट्यपूर्णं स्थानमस्ति । तस्य वैशिष्ट्यानि विविधैः अनुषङ्गैः अधोक्तानुसारं सन्ति ।

### रचनात्मकं वैशिष्ट्यम्

१) गद्यपद्यात्मकं वर्णनम् (चम्पूपद्धतिः)

२) मुस्तकम्, उत्कलिका, वृत्तसन्धिः तथा चूर्णकः एवं चतुर्धा गद्यं वर्णितम् ।

३) वृत्तं मात्रा च इति द्विविधं पद्यं वर्णितम् ।

४) वैदर्भी, लाटिका तथा पाञ्चाली गद्यात्मकानां रीतीनां वर्णनं प्राप्यते ।

५) पद्ये 'लाटिका' रीतेः वर्णनम् अधिकं लभ्यते ।

६) अध्यायसंख्या – ८

आकलय्य सूत्रसङ्ख्या – ३५५

आकलय्य गद्यसूत्रसङ्ख्या – २६७

आकलय्य पद्यसूत्रसङ्ख्या – ८८

आकलय्य शब्दसङ्ख्या – १३,७५७

आकलय्य जातिवृत्तानि – अनुष्टुप्, पुष्पिताग्रा, उपजातिः, रुचिरा.

७) वादमार्गपदानां दार्शनिकपद्धतीनां वर्णनम् ।

८) 'तत्रश्लोकः' तथा 'भवन्तिचात्र' इति संस्कर्तापद्धतेः वर्णनम् ।

### सैद्धान्तिकानि वैशिष्ट्यानि

१) चिकित्सायै आवश्यकानाम् अनेकानां मूलभूतानां सिद्धान्तानां वर्णनम् ।

२) प्रकृतिसमसमवायः, प्रकृतिविषमसमसमवायः, विकृतिसमसमवायः तथा विकृतिविषयमसमवसयः एतेषां विस्तृतं वर्णनम् ।

३) रसप्रभावः दोषप्रभावः द्रव्यप्रभावः विकारप्रभावः च एतेषां परस्परप्रभावस्य वर्णनम् ।

विशेषतः रसानां द्रव्येषु दोषाणां विकारेषु प्रभावस्य वर्णनम् ।

रसप्रभाव: → दोषप्रभाव:

रसप्रभाव: → द्रव्यप्रभाव:

रसप्रभाव: → विकारप्रभाव:

द्रव्यप्रभाव: → दोषप्रभाव:

द्रव्यप्रभाव: → विकारप्रभाव:

दोषप्रभाव: → विकारप्रभाव:

४) आहारविधिविधानस्य महत्त्वपूर्णं वर्णनम् ।

५) अष्टौ आहारविधिविशेषायतने ।

६) उत्तमारोग्यार्थं कुक्ष्या: त्रिविधान् अंशांन् कृत्वा आहारसेवनस्य निर्देश: ।

७) एते त्रिविधा: अंशा: समप्रविभागेन अनपेक्षिता: प्रत्युत प्रतिपुरुषं यथोचितप्रविभागेन अपेक्षिता: ।

८) जनपदोद्ध्वंसस्य अतिमहत्त्वपूर्णं वर्णनम् ।

९) निसर्गस्य परिणाम: मनुजे भवति तथैव मनुजस्य आचारविचाराणाम् अपि परिणाम: निसर्गे भवति, एवं महत्त्वपूर्णानां सन्दर्भाणां वर्णनम् । (च. वि. ३)

१०) त्रिविधा: ज्ञानोपाया: – अध्ययनम् अध्यापनं तद्विद्यसम्भाषा च एतेषां मौलिकं विवेचनम् ।
(च. वि. ८)

११) वादमार्गपदानां सविस्तरं मूलगामि वर्णनम् । (च. वि. ८)

१२) कृमिनिदान: सिद्धान्त: कृमिचिकित्सा सिद्धान्त: च एतयो: एकमेव वर्णनम् । (च. वि. ७)

१३) प्राकृतअग्ने: चतुर्विधप्रकारा: तेषां लक्षणानि तथाअग्ने: उत्पत्ति: मूलभूतं विवेचनम् ।(च.वि. ६)

१४) त्रया: आतुरा: पुरुषा: (वातल:, पित्तल:, श्लेष्मल: च) एतेषां वर्णनम् (च. वि. ६)

१५) हीना अधिका च अमात्रयो: लक्षणादीनां विवरणम् ।

१६) सर्वविकाराणाम् अपि च निग्रहे हेतुव्याधिविपरीतमौषधमिच्छन्ति कुशला: तदर्थकारि वा ।
(च. वि. २/१३)

१७) आमाशयस्य व्याख्या वर्णिता ।

१८) मात्रावत् आहारस्य लक्षणानि वर्णितानि ।

१९) योग्यायां मात्रायां पथ्यकरं भक्षित्वा अपि मानसभावविकृते: आहार: न सम्यक् पचति ।

(च.वि.२)

२०) काल: मृत्यु: तथा अकालमृत्यु: एतेषां वैशिष्ट्यपूर्णं विवेचनम् । (च. वि. ३)

२१) वाय्वादीनां वैगुण्याय 'अधर्म:' इति हेतुस्वरुप: इति । (च. वि. ३/२०)

२२) चतुर्विधानि युगानि, तेषां लक्षणानि, तेषु आयुष: प्रमाणं तथा धर्मस्य चतुर्विधा: पादा: च एतेषां विस्तारेण वर्णनम् । (च. वि. ३)

२३) विविधप्रकाराणां जनपदोद्ध्वंसानां वर्णनम् ।

२४) दैवपुरुषकारयो: वर्णनम् ।

२५) अपतर्पणस्य सिद्धान्तस्य विवरणम् ।

२६) शीतेन उष्णकृते: व्याधे: तथा उष्णेन शीतकृते: व्याधे: उपशमनं भवति । (च. वि. ३।४१)

२७) तदात्वं तथा अनुबन्धम् एव फलयो: वर्णनम् ।

२८) द्विविधानां त्रिविधानां च परीक्षाणां वर्णनम् । (च. वि. ४)

२९) आप्तोपदेशपूर्वकम् एव प्रत्यक्षानुमानेन परीक्षणीयम् ।

३०) प्रमाणस्य अप्रमाणस्य च वाक्यानां वर्णनम् ।

३१) न हि ज्ञानावयवेन कृत्स्ने ज्ञेये ज्ञानमुत्पद्यते । (च. वि. ४।५)

३२) उपदेशप्रत्यक्षानुमानै: परीक्ष्यभावानां वर्णनम् ।

३३) ज्ञानबुद्धिप्रदीपेन यो नाविशति तत्ववित् ।

आतुरस्यान्तरात्मानं न स रोगांश्चिकित्सति ।। (च. वि. ४ ।१२)

३४) कार्यतत्वे प्रतिपत्तौ विशेषज्ञ: पुरुष: न कदापि मोहग्रस्त: भवति ।

३५) 'स्त्रोतस' इति शारीरभावस्य सैद्धान्तिकं विवेचनम् ।

३६) मूलत: प्रकोपविज्ञानत: च उपलक्षणस्वरुपिणां १३ स्त्रोतसां विवरणं कृतम् । तदनुसारम् अन्येषाम् अनुक्तानां मूर्तिमतां भावपदार्थानां स्त्रोत: ज्ञानं बुद्धिमद्भि: करणीयम् ।

३७) स्त्रोतोमय: पुरुष: इति सङ्कल्पनाया: एकीयमतेन रचना तदनन्तरं स्वमतेन खण्डनम् ।

३८) यावन्त: मूर्तिमन्त: भावघटका: सन्ति तेषां स्त्रोतांसि सन्ति । नाम येषां मूर्ति: (परमाणुस्वरुपत्वं) नास्ति तस्य स्त्रोत: न भवति ।

३९) अर्थान्तरशब्द: (समानशब्द:) अनर्थान्तरशब्द: (पर्यायशब्द:) च एतेषां सङ्कल्पना वर्णिता ।

( च. वि. ६।४)

४०) शारीरमानसयो: दोषाणां विवरणम् ।

४१) स्वतन्त्रपरतन्त्रयो: (अनुबन्ध: तथा अनुबन्ध्य:) दोषाणां वर्णनम् ।

४२) संसर्गसन्निपातयो: व्याख्ये ।

४३) दोषा हि दूषणै: समाना: ।

४४) व्याधीनाम् अपरिसंख्येयत्वस्य तथा दोषाणां संख्येयत्वस्य वर्णनम् ।

४५) रोगभेदस्य समूहानां वर्णनम् ।

४६) प्रकोपणविशेषः, दूष्यविशेष: एतदनुसारं प्रकुपितानां दोषाणां विकाराणाम् अपरिसंख्येयत्वं निश्चितव्यम् ।

४७) निजागन्तव: विकारा: परस्परान् अनुवर्तन्ते ।

४८) प्राणपतिवैद्यस्य सङ्कल्पना । (च. वि. ६।१८)

४९) आचार्यशास्त्रशिष्याणां परीक्षा वर्णिता ।

५०) वैद्यानां ज्ञानार्थं कारणादीनां दशपरीक्षाणां वर्णनम् । (च. वि. ८)

५१) दशविधानां परीक्ष्यभावानां वर्णनम् ।

५२) सारत: परीक्षणस्य वैशिष्ट्यपूर्णं वर्णनम् ।

५३) दोषप्रकृते: उत्पत्तिपूर्वा: चतुर्विधा: प्रकृतय: (शुक्रशोणितप्रकृति:, कालगर्भाशयप्रकृति:, मातुराहारविहारप्रकृति:, महाभूतविकारप्रकृति:) एतेषां वर्णनम् ।

५४) देशपरीक्षया: विस्तरेण वैशिष्ट्यपूर्णं वर्णनम् ।

५५) भेत्ता हि भेद्यम् अन्यथा भिनत्ति । ( च. वि. ६)

५६)वमनविरेचनादय: सम्बध्येन नवप्रश्ना: तथा तेषाम् उत्तराणि एतेषां विशेषज्ञानार्थं वर्णनम्

(च.वि.८)

५७) गुरुलघुव्याधितयो: सिद्धान्तयो: विवरणे । द्विविधानां व्याधितरुपाणां पुरुषाणां वर्णनम् ।

५८) सामान्यविशेषयो: सिद्धान्तयो: नैकस्थाने वर्णनम् ।

नैदानिकम् वैशिष्ट्यम् –

१) कृमिकोष्ठस्य विशेषनिदानम् । कृमीणां प्रकाराणां लक्षणानां , स्वरुपाणां हेतूनां च विस्तारेण वर्णनम् । (च. वि. ७)

२)विकृतित: परीक्षणस्य विशेषं वर्णनम् । (च.वि.८/१०१)

अस्मिन् विकारस्य सर्वांगीणपरीक्षणस्य उल्लेख: ।

३) व्याधे: बलाबलत्वयो: वर्णनम् । (च. वि. ८।१०१)

४) सात्म्यत: परीक्षणे सात्म्यानुसारं लक्षणानां वर्णनम् । ( च. वि. ८ ।११८)

५) दोषप्रकृतिनां लक्षणै: सह विस्तृतं वर्णनम् ।

६) आतुरपरीक्षाया: आयुष: प्रमाणज्ञानार्थं तथा बलदोषप्रमाणज्ञानार्थं द्विविध: हेतुभ्यां वर्णनम् ।

७) दोषप्रमाणानुरुपो हि भेषजप्रमाणविकल्प: बलप्रमाणविशेषापेक्षो भवति । (च. वि. ८/९४)

८) रुग्णबलानुसारं ओषधप्रमाणं निश्चितव्यम् ।

९) नार्या: सौकुमार्यत्वं लक्षणै: सह वर्णितम् । (च. वि. ८ ।९४)

१०) आतुरपरिज्ञानहेतुना भूमिपरीक्षाया: सविस्तरं वर्णनम् ।

११) विकारोपशमनस्य लक्षणानि वर्णितानि । (च. वि. ८ । ८९)

१२) अग्ने: नैदानिकदृष्टिकोणात् वर्णनम् ।

१३) अनुबन्ध: तथा अनुबन्ध्य: दोषप्रकोपयो: वर्णनम् ।

१४) व्याधे: असंख्येयत्वस्यवर्णनम् ।

१५) स्त्रोतसां दुष्टिहेतूनां तथा दुष्टिलक्षणानां विशेषं विवेचनम् ।

१६) सामान्यस्त्रोतोदुष्टिहेतो: सामान्यस्त्रोतोदुष्टिलक्षणानां च महत्त्वपूर्णा: सन्दर्भा: ।

१७) यदि स्त्रोत: दुष्टं भवेत् तर्हि अन्यानि स्त्रोतांसि दुष्यति तथा दुष्टधातु: अन्यान् धातून् दुष्यति ।

१८) शरीरस्थान्सर्वान् भावपदार्थान् दुष्टवातपित्तकफा: दूषणस्वभावत् दुष्यन्ति ।

१९) स्थानस्थानां मार्गगानां च शरीरधातूनां वर्णनम् ।

२०) वातपित्तकफा: सर्वस्मिन् शरीरे सञ्चरन्ति तस्मात् तेषां वहनं सर्वेभ्य: स्त्रोतोभ्य: भवति ।

२१) अनुमानज्ञेयानां भावानां विशेषं वर्णनम् ।

२२) रसपरीक्षाव्यतिरिक्तम् अन्येषां चर्तुणाम् इन्द्रियार्थाणां प्रत्यक्षेण परीक्षणम् ।

२३) अपचारविशेषेण दोषप्रमाणविशेषस्य अनुमानं करणीयम् ।

२४) ग्रहण्या: मृदुदारुणत्वं तथा स्वप्नदर्शनस्य अभिप्राय: च एते प्रश्नपरीक्षया निश्चितव्यौ ।

२५) अग्निं जरणशक्त्या परीक्षेत् ।

२६) बलं व्यायामशक्त्या परीक्षेत् ।

२७) जनपदोद्ध्वंसस्य हेतूनां वर्णनम् ।

२८) अचिकित्सारुग्णस्य लक्षणानि वर्णितानि । (च. वि. ३ । ४५)

२९) आरोग्यानुवृत्तिकराणां हेतूनां वर्णनम् । (च. वि. ३ । ३६)

३०) वाय्वादीनां वैगुण्याय अधर्म: इति हेतु: अस्ति ।

३१) अलसकविसूचिकयो: निदानविवरणे ।

३२) दण्डालसकस्य वर्णनम् ।

३३) आमप्रदोषस्य निदानवर्णनम् ।

३४) अजीर्णाहारस्य हेतुस्वरुपस्य वर्णनम् ।

३५) दोषादीनाम् अमानज्ञो भिषक् व्याधिनिग्रहसमर्था: न भवति । (च. वि. १ । ३)

३६) दोषा: विकृतिमापन्ना: तु नानाविधै: विकारै: शरीरमुपतापयन्ति । ( च. वि. १ ।५)

<u>द्रव्यात्मकं वैशिष्ट्यम्</u>

१) अभ्यस्तत्रयाणां तथा अनभ्यस्त:त्रयाणां द्रव्याणां विवेचनम् ।

२) पिप्पली क्षार: तथा लवणम् एतेषां द्रव्याणां वैशिष्ट्यपूर्णं वर्णनम् ।

३) मधुतैलघृतानां दोषगतस्थ कार्यस्य वर्णनम् ।

४) द्रव्यप्रभावस्य तथा रसप्रभावस्य वर्णनम् ।

५) आहारौषधद्रव्याणां स्वाभाविक: गुण: नाम प्रकृते: वर्णनम् ।

६) उदाहरणस्वरुपार्थं माषशूकरयो: गुरुत्वस्य तथा मुद्गैणयो: लघुत्वस्य उल्लेखा: ।(च.वि.१/२२)

७) द्रव्येषु संस्कारेण उत्पन्नस्य गुणान्तराधानस्य सोदाहरणं वर्णनम् ।

८) द्वयो: बहूनां द्रव्याणां संहतिभाव: संयोग: अस्य वर्णनम् ।

९) द्रव्याणां सर्वग्रहानां परिग्रहानां च द्विविधयो: राश्योः वर्णनम् ।

१०) द्रव्याणां उत्पत्ते: प्रचारस्वरुपस्य देशस्य च वर्णनम् ।

११) विकृतदेशस्य वर्णनं तथा त्रिविधानां देशस्वरुपाणाम् अपि वर्णनं दृश्यते ।

१२) उष्णोदकस्य कार्यवर्णनम् ।

१३) पित्तलाया: अवजयनकर्मणि चन्दनादीनां द्रव्याणाम् उल्लेखा: ।

१४) कृमिणां चिकित्सायाम् अनेकविधानां द्रव्याणां वर्णनम् । उदा शैखरिकं मूलकपर्णी खरपुष्पा इ.

१५) अश्वशकृत् इति द्रव्यस्य कृमिचिकित्सायां वैशिष्ट्यपूर्णं वर्णनम् ।

१६) भल्लातकतिलविडङ्गानां द्रव्याणां कल्पस्य वर्णनम् ।

१७) अध्ययनविधौ ग्राह्यानां द्रव्याणां वर्णनम् ।

१८) भेषजरुपीकरणम् इति परीक्षाया: वर्णनम् । त्रिविधानां भेषजानाम् उल्लेख: । (च.वि. ८/८७)

१९) वमनं विरेचनं शिरोविरेचनम् अनुवासनं इत्यादिभ्य: कर्मभ्य: उपयुक्तानां द्रव्याणां वर्गाणाम् उल्लेखा: ।

२०) आस्थापनार्थम् उपयुक्त द्रव्याणां रसानुसारं षड् स्कन्धेषु वर्णनम् ।

२१) आस्थापनस्कन्धेषु यद् यद् द्रव्यम् अयौगिकं स्यात् तद् अपकर्षणीय: ।

२२) यद् द्रव्यम् अनुक्तं स्यात् किन्तु तद् यौगिकं स्यात् तद् युक्तिपूर्वकं समावेशितव्यम् ।

२३) गुढलिङ्गव्याधे: निदानम् उपशय–अनुपशयानुसारं करणीयम् ।

२४) ज्वर: आमाशयसमुत्थ: अस्ति इत्यस्य उल्लेख: । (च. वि. ३ । ४०)

२५) औपम्यस्य वर्णने धनुस्तम्भ: दण्डक: इत्यादीनां व्याधीनाम् उल्लेख: (च. वि. ८ । ४२)

<u>शारीरविषयकं वैशिष्ट्यम्</u> –

१) स्त्रोतसां स्वरुपलक्षणयो: वर्णनम् । (च. वि. ५ । २५)

२) स्त्रोतस् इति शरीरभावस्य विस्तारेण विवेचनम् ।

३) आमाशयस्य व्याख्या वर्णिता । नाभिस्तनान्तरं जन्तो: आमाशय इति स्मृत: ।(च. वि. २)

४) प्रमाणतः परीक्षणे अङ्गुलिप्रमाणस्य वर्णनम् अस्ति । सर्वेषां शारीरघटकानां प्रमाणस्य वर्णनम् ।

५) अष्टविधसाराणां तथा तेषां लक्षणानां वर्णनम् ।

६) दोषस्य दोषप्रकृतेः वर्णनम् ।

७) शिष्यपरीक्षायां अविकृतशारीरभावानां वर्णनम् ।

८) केशलोमश्मश्रुपक्ष्माणि इत्यत्र उत्पन्नानां मलजकृमीणां वर्णनम् ।

९) रक्तवाहिधमनी रक्तजकृमीणां स्थानमस्ति इति वर्णनं कृतम् ।

१०) श्लेष्मजकृमीणां स्थानं आमाशयः तथा पुरीषजकृमीणां स्थानं पक्वाशयः अस्ति ।

११) अग्निअधिष्ठानग्रहणीनाम् उल्लेखः । ( च. वि. ६ । १२)

१२) शारीरदोषाणाम् वर्णनम् ।

१३) स्त्रोतसां मूलस्थाने अनेकानां शारीरभावानां वर्णनमस्ति । उदाहरणार्थम् – क्लोमं वपावहनं, स्थूलगुदं हृदयं महास्त्रोतस् तालुः आमाशयः वामपार्श्वः यकृत् प्लीहा स्नायुः त्वचा दशधमन्यः वृक्कं जघनं अस्थिः सन्धिः वृषणः शेफः बस्तिः वंक्षणः पक्वाशयः लोमकूपं मेदः इत्यादयः ।

१४) परिणमनाय प्राप्तानां धातूनाम् अभिवहनं कुर्वन्ती प्रणाली नाम स्त्रोतस् इति ।

१५) अनुमानज्ञेयभावे ग्रहण्याः वर्णनं तथैव प्रत्यक्षज्ञेयभावे आन्त्रं सन्धिः अङ्गुलीपर्वं रक्तम् इत्यादीनां शारीरभावानां वर्णनम् ।

१६) ज्वरः इति आमाशयसमुत्थः अस्ति  एतस्य उल्लेखः । (च. वि. ३ । ४०)

१७) आमाशये चतुर्विधआहाराणां पचनं भवति ।(च. वि. २ ।१७)

१८) क्षारं केशअक्षिहृदयानि इत्यादीनां उपघातं करोति । (च. वि. १ । १७)

**भौगोलिकं वैशिष्ट्यम्**

१) देशपरीक्षायाः विस्तारेण वर्णनम् । (च. वि. ८)

२) त्रिविधदेशानां लक्षणानां वर्णनम् । (च. वि. ३)

३) ग्रामनगरनिगमजनपदानां उल्लेखः ।

४) प्राच्यं चीनः बाल्हिकः सौराष्ट्रः सिन्धुः सौविरकः इत्यादीनां देशानाम् उल्लेखः ।(च.वि.१/ १७)

५) ऊषरप्रदेशे वनस्पतीवानस्पत्ययोः लक्षणानि वर्णितानि (च. वि. १ ।१८)

६) पाञ्चालक्षेत्रेषु जनपदमण्डलेषु काम्पिल्यः नाम्नः राजधान्याः उल्लेखः। एषा काम्पिल्यनगरी गङ्गानद्याः तीरे आसीत् एतस्य सन्दर्भः । (च. वि. ३ । ३)

७) विकृतानां देशजलवायुकालानां लक्षणानां वर्णनम् ।

८) पित्तावजयनविधौ शैलान्तरं, पुलिनं, रम्योपवनम् इत्यादीनां वर्णनम् ।

९)दृष्टान्तस्य वर्णने आदित्यः प्रकाशकः अस्ति, पृथ्वी स्थिर वर्तते एतस्य उल्लेखः ।(च.वि.८/३४)

१०) ऋत्वनुसारं वर्षाशीतउष्णकाललक्षणानां वर्णनम् । (च. वि. ८ । १२५)

चिकित्सासम्बन्धितं वैशिष्ट्यम् –

१) चिकित्सां कर्तुम् अतिआवश्यकानां दोषादीनां विशेषज्ञानार्थम् आवश्यकम् अभ्यासनीयं स्थानम्

२) कृमिकोष्ठचिकित्सायां विशेषतः श्लेष्मजपुरीषजयोः कृमीणां चिकित्सायां रुग्णबलं दृष्ट्वा एकस्मिन्नेव दिने वमनविरेचननिरुहअनुवासनानि कर्माणि आदिष्टानि । अतिवैशिष्ट्यपूर्णा चिकित्सा प्रक्रिया ।

३) आहारविधिविधानं तथा अष्टौआहारविधिविशेषायतनानि एतेषां वर्णनम् ।

४) अलसकस्य चिकित्सायाः वर्णनम् ।

५) साध्यआमप्रदोषस्य चिकित्सा । साध्यप्रदूष्टम् अलसीभूते आमप्रदोषपूर्वम् उल्लेखनीयम् । पश्चात् उपवासः विरेचनं च दातव्ये ।

६) विसूचिकायां लङ्घनं कृत्वा विरेचनं करणीयम् ।

७)उपवासविरेचनादीनां चिकित्सायाः अनन्तरं शेषदोषपाचनार्थं अग्निसन्धुक्षणार्थं च औषधं दातव्यम् अन्यथा औषधं न दातव्यम् ।

८) आमप्रदोषेण दुर्बलः भूतः अग्निः दोषआहारऔषधानां पाचनं कर्तुम् असमर्थः ।

९) निमित्तविपरीतं तथा व्याधिविपरीतं एतयोः चिकित्सायाः उल्लेखः ।

१०) जनपदोद्ध्वंसस्य सामान्या चिकित्सा वर्णिता ।

११) आयुषः परिपालनार्थं रसायनादीनां विशेषचिकित्सा ।

१२) ज्वरे उष्णोदकम् इति मिथ्योपचारः नास्ति एतस्य स्पष्टीकरणम् ।

१३) प्राय: आमाशयसमुत्थानां विकाराणां पाचनवमनापतर्पणसमर्थानि भेषजानि भवन्ति, पाचनार्थं च पानीयम् उष्णम् ।

१४) उष्णोदकस्य गुणधर्मानां वर्णनम् ।

१५) त्रिविधापतर्पणचिकित्सा तथा तस्या: अवस्थानां वर्णनम् ।

१६) अचिकित्स्यानां रुग्णानां वर्णनम् । (च. वि. ३ । ४५)

१७) स्त्रोतसां सामान्यचिकित्साया: वर्णनम् ।

१८) हेमन्त: ग्रीष्म: तथा वर्षा इत्यादिषु ऋतुषु संशोधनस्य निषेधस्य सकारणं वर्णनम् ।

## टीकानां टीकाकाराणां च वैशिष्ट्यानि

चरकसंहितायां विभिन्ने काले: विभिन्नै: टीकाकारै: टीका: रचिता: सन्ति । तासां अभ्यासे तेषां टीकाकाराणां वैशिष्ट्यानि प्रतियन्ति ।

अस्मिन् अध्ययने चरकसंहिताया: विमानस्थाने रचितानां चतुर्णां टीकानां विशेष: ऊहापोह: कृत: । एतासां टीकानां तथा टीकाकाराणां यानि वैशिष्ट्यानि प्रतीतानि तेषां अत्र वर्णनं कृतम् ।

### चक्रपाणि: – आयुर्वेद दीपिका

१) अतीव क्लिष्टा । व्याकरणदृष्ट्या दुष्कराणां पदानां योजना ।

उदा. – उपेयुषे, परिपन्थिनी, उपकुड्येति इ.

२) सविस्तरं वर्णनं न करोति ।

३) तदधिकरणानुसारं यावद् आवश्यकं तावदेव वर्णनस्य पद्धति: ।

४) साहित्ये येषाम् उपयोग: अल्पप्रमाणेन भवति तादृशानां पदानां उपयोग: ।

५) संस्कृत भाषा व्याकरणं च एतयो: महाव्यासङ्ग: टीकात: प्रत्येति ।

६) त्रुटितै: स्वल्पपदै: अधिकतरं शास्त्रवर्णनस्य कौशल्यं प्रत्येति ।

७) मूलसूत्रस्थं गूढार्थं अभिप्रेतार्थं च निदर्श्य तस्य शास्त्रीयं विवेचनम् इति पद्धति: ।

८) चक्रपाणि: संस्कृतभाषाया: महापण्डित: तु आसीदेव परन्तु सार्धमेव उत्तमतया शास्त्रीयपद्धत्या चिकित्सां कुर्वाण: भिषगपि आसीत् ।

अस्य प्रत्यय: तत्रभवत: टीकात: नैकेषु सन्दर्भेषु प्राप्यते । उदा. –

अ) सूत्रस्थानस्य त्रयोदशे अध्याये एकपञ्चाशत् तमे रचिता टीका । अस्यां स्नेहनात् पूर्वं रक्षणार्थं शोधनचिकित्साया: शास्त्रीयं विवेचनं लक्षणीयम् अस्ति ।

आ) अशुद्धकोष्ठस्य स्नेहपानं व्याधिवर्धनं भवति । (च. चि. ७/४२)

इ) विमार्गगमनं यथा मलस्य मूत्रमार्गगमनम् । (च. वि. ५/२४)

ई)धातुभिर्विगुण इति धातुविरोधकेस्वभाव: इत्यर्थ: न तु धातुविपरीतगुणो विगुण:यथा दिवास्वप्न मेद्यादयो हि मेदसा समानगुणा एव मेदोदूषका: उक्ता: । (च. वि. ५/२३)

उ) च. वि. १/१० अत्रस्था टीका । यस्यां रसदोषप्रभावस्य अन्तर्गतं विकृतिविषमसमवेतादीनां विवेचनम् ।

ऊ) चरकसंहितायाः सूत्रस्थाने अष्टाविंशे अध्याये कृतं धातुपोषकन्यायानां वर्णनम् ।

९) वर्णने अनावश्यकानां घटकानां वर्णनं न भवति ।

१०) विषयवर्णनम् अतीव स्पष्टतया अस्ति ।

११) अभ्यासकः कांश्चन विषयान् पूर्वमेव जानाति इति गृहीत्वा विषयविवेचनस्य पद्धतिः ।

१२) तन्त्रयुक्तिनां प्रचुरमात्रायाम् उपयोगः कृतः ।अस्य विवरणं तन्त्रयुक्ति प्रकरणे सविस्तरं कृतम् ।

१३) प्रत्येकस्य विषयस्य चिकित्सकीयः दृष्टिकोणः वर्णितः । केवलं संस्कृतभाषायाः वा साहित्यविषयकं विवरणं नास्ति । अपि तु चिकित्साविषयः नाम एकं शास्त्रम् इति दक्षता प्रत्येकास्मिन् विवरणे यथायोग्यं पालितम् ।

१४) आवश्यकेषु स्थानेषु पदानां व्याकरणीयं विवेचनम् ससन्दर्भं दत्तम् ।

उदा. उपकुड्येति पाचयित्वा 'कुड् दाहे' इति धातुः पठ्यते । च. वि. ७/२१

गुणतः इति हेतौ पञ्चमी । च. वि. ८/८६

१५) केषुचित् विशिष्टेषु सन्दर्भेषु ग्रन्थलेखनस्य विशेष्यायाः शैल्याः उल्लेखाः सन्ति ।

उदा. तिस्रैषणीये प्रथममनुमानादिलक्षणन्युक्तानि पुनरिह 'तत्रोपदेशोऽनाम इत्यादिना आप्तोपदेशादिलक्षणाभिधानं प्रकरणागतत्वात् क्रियते । प्राकरणिको ह्यर्थोऽनुच्यमानो न्यूनो भवति ।

च. वि. ४/४

१६) नैकेषु सन्दर्भेषु समर्पकानां दृष्टान्ता उल्लेखाः विषयविवेचनार्थं कृताः ।

उदा. रत्नपरीक्षायाः दृष्टान्तः ।

१७) सिद्धान्तानाम् उपयोगेन विषयवर्णनस्य पद्धतिः ।

उदा. मधु इति द्रव्यस्य विवेचने अनेकान्तवादम् उपयुज्य मधु द्रव्यविषये नैकाः विचाराः वर्णिताः ।

१८) संपूर्णा टीका गद्यस्वरुपात्मका अस्ति । पद्यवर्णनं केवलं ग्रन्थारम्भे समाप्तौ च कृतम् ।

**कविराजः गङ्गाधर रायः – जल्पकल्पतरुः**

१) अतीव विस्तृतस्वरुपा महत्तमा उपलब्धा टीका ।

२) अतीव क्लिष्टा पदरचना, दीर्घदीर्घानि वाक्यानि तथा संस्कृत भाषाया: सुन्दरं वर्णनम् कृतम् ।

३) दर्शनशास्त्राणां विशेषत: न्यायवैशेषिकदर्शनानाम् आधारेण तौलनिकया दृष्ट्या विषयविवेचनस्य पद्धति: अवलम्बिता अस्ति । उदा. – वादमार्गपरे रचिता टीका

च. वि. ४ गता प्रमाणेषु टीका ।

४) काश्चन विशिष्टा: संकल्पना: अतीव सविस्तरं वर्णिता: । एष: विशेष: अन्येषां टीकाकाराणां टीकायां न दृश्यते । उदा.– प्रलयवर्णनम् (च. वि. ३)

– व्याधीनां प्राक् उत्पत्ति: । (च. वि. ३)

– द्रव्यादीनां कारणपदानां वर्णनम् । (च. वि. ८)

– प्रकृति विषयकं वर्णनम् । (च. वि. ६)

५) विभागश: वर्गीकरणेन वर्णनस्य पद्धति: । प्रत्येकस्मिन् स्थाने वर्णविषयं वर्गीकृत्य विभागश: वर्णनं कृतम् ।

६) दार्शनिक्यां भाषायां विवरणस्य नैका: सन्दर्भा: दृश्यन्ते ।

उदा. इति चेत् । च. वि. ४/४ एषा दार्शनिकी परिभाषा अस्ति ।

७) इति व्याख्येयम् इति योजना, इति ख्यापितम् इदृशी पद्धति: प्रचुरा उपयोजिता ।

८) अवग्रहस्य उपयोग: नगण्य: अस्ति ।

९) विवेचने आदौ प्रश्नम् उपस्थाय पश्चात् खण्डनमण्डनपद्धत्या स्वमतं स्थापनस्य विशेषा शैली अस्ति । उदा. च. वि. १/१३–१४

१०) नैकेषु स्थानेषु द्वयो: ग्रन्थकारयो: वैधर्म्यं दृश्यते । तदा तयो: अभिप्रेतार्थं कथयित्वा समन्वयार्थं प्रयतते । तद्गतं वैधर्म्यं नाशयित्वा समन्वयस्य पद्धति: अवलम्बिता ।

उदा. – पुरीषजकृमिवर्णनम् ।

– अङ्गुलीप्रमाणवर्णनम् ।

– वय परीक्षावर्णनम् ।

११) केषुचित् सन्दर्भेषु अतीव भिन्नया पद्धत्या विशिष्टानां घटकानां वर्णनम् ।

उदा. दशविधपरीक्षाणां वर्णने यज्ञविधि संवर्धेन दशविध परीक्षाणां विवेचनं कृतम् ।

१२) अतीव महती महती वाक्यरचना अस्ति । ल्यबन्त त्वान्तादीनां अवयवानां वाक्यरचनायां महाप्रमाणेन उपयोग: कृत: ।

<u>**कविराज: योगीन्द्रनाथसेन: – चरकोपस्कार:**</u>

१) अतीव सरला प्रमाणबद्धा वाक्यरचना ।

२) समासविरहितानां सरलानां पदानां योजना ।

३) चूर्णकपद्धत्या लघुलघुवाक्येषु वर्णनम् ।

४) मूलसूत्रस्थेषु प्रत्येकेषु पदेषु व्याख्या कृता ।

५) यत्र आवश्यक: तत्र व्याकरणस्य नियमा: उल्लिखिता: ।

६) न अवग्रहस्य उपयोग: ।

७) अन्येषाम् आचार्याणां सन्दर्भा: अधिकतरा: दत्ता:।

८) सुश्रुतसंहिता चरक संहिता च एतयो: भेदस्थं सामञ्जस्यं प्रस्थापयितुं नैकेषु स्थानेषु प्रयत्न: दृश्यते ।

९) न क्लिष्टपदानाम् उपयोग: अनुभूयते।

१०) अतीव सुगमा नादमयी गद्यरचना।

११) पद्यात्मकं विवरणम् अपवादेन दृश्यते।

१२) सिद्धान्तानां विस्तृतं विवेचनम्।

१३) विशेषत: सामान्यविशेषानां सिद्धान्तानां नैकेषु सन्दर्भेषु वर्णनम्।

<u>**कविराज: ज्योतिषचन्द्रसरस्वति: – चरकप्रदीपिका**</u>

१) आधुनिकतम: टीकाकार: ।

२) टीकायां मूलानि सूत्राणि न उल्लिखितानि। केवलं भाष्यात्मिका टीका वर्णिता ।

३) शारीरविषयाणां गभीरया पद्धत्या विशेषं विवेचनम् ।

उदा.– स्रोतस: विमानम् – शारीरभाव वर्णनम् ।

– क्लोम विवरणम् ।

– फुप्फुसयन्त्र वर्णनम् । – आमाशय विवेचनम् ।

४) केचन विशिष्टा: घटका: अतीव महत्वपूर्ण पद्धत्या वर्णिता: ।

उदा. कृमि: – सहजकृमिविवेचनम् । – च. वि. ७ , अग्नि:– च.वि.६

५) कासांचित् अतीव भिन्नानां संकल्पनानां विवरणं कृतम् उदा. कृमिकोष्ठचिकित्सायां त्रीणि दिनानि स्नेहपानं एकदिनं विश्राम: पश्चात् त्रिदिवसीयं स्नेहनम् इति अतीव विशेष: सन्दर्भ: वर्णित:।

६) स्वरचितस्य 'शारीरविनिश्चय:' इति पुस्तकस्य त्रिषु सन्दर्भेषु उल्लेख: कृत: ।

७) मृतविच्छेदनं करोति स्म इति तर्कयितुं शक्यम् ।

८) चक्रपाणि: गङगाधर: च एतयो: विचारप्रवाहाणां नैकेषु सन्दर्भेषु अनुकरणम् दृश्यते । तेषां विचाराणां पुरस्करणस्य प्रयत्न: अस्ति ।

उदा. चक्रपाणिमतस्य अनुकरणम् – च.वि.५।८

गङगाधरमतस्य अनुकरणम् – च.वि.५।२५

९) नैकानां विशिष्टपदानां अन्यशास्त्रगता: पद्यात्मिका: व्याख्या: उल्लिखिता: ।

उदा. पूपलिका विदाही अभिष्यन्दि इत्यादि ।

१०) इन्द्रियस्थानविषये विशेषा टीका – च.वि.८।१२४

११) काश्चन महत्वपूर्णा: टीका: – च.वि.१।२४

- 'जीर्णे अश्नीयात्' इत्युपरि टीका ।
- स्रोतोविमाने टीका ।
- ५।२३ दुष्टिहेतौ विशेषा टीका ।
- जनपदोद्ध्वंसस्य चत्वार: प्रकारा: (च.वि.३।२१)

१२) नैकविधानां न्यायदृष्टान्तानां उल्लेखा: ।

उदा– सूचिकटाह न्याय: । दीपतैलन्याय: ।

१३) विकृतिविषमसमवायस्य वर्णने अतीव वैशिष्टपूर्ण: दृष्टान्त: दत्त: ।

यथा पारदगन्धकसंयोगेन विशिष्टस्य गुणवत: द्रव्यस्य उत्पत्ति: भवति तथा विकृतिविषमसमवाये अस्ति। एष: मध्यकालस्थ: रसशास्त्रप्रभावस्य उदाहरणस्वरुप: सन्दर्भ: अस्ति ।

## वैधर्म्यम्–सारतरोच्चय:

अस्य अध्ययनस्य उद्दिष्टम् अग्रिमवत् अस्ति । चरकसंहितायाः विमानस्थाने टीकां लिखताम् चतुर्णां टीकाकाराणां ऊहनम् । तेषां तुलितम् अध्ययनं कृत्वा तस्मिन् स्थितानां वैधर्म्याणां विचारकरणम् , वैधर्म्येषु ऊहापोहं कृत्वा समन्वयं संसाध्य निश्चय करणम् ।

अस्य अध्ययनविषयस्य पद्धत्या चतुर्णां टीकाकाराणां ऊहनं तेषां तौलनिकम् अध्ययनं च कृत्वा तेषु आकलितानि ७७ वैधर्म्याणि सम्प्राप्तानि ।

एतेषां वैधर्म्याणां विषये अस्मिन् अधिकरणे चिन्तनं क्रियते ।

टीकाकाराणां विवरणे परस्परेषु यानि वैधर्म्याणि उपलभ्यन्ते तेषां द्वौ प्रकारौ स्त: ।

१) पाठभेद: तस्मात् उत्पन्नम् वैधर्म्यं च ।

२) कस्मिन् विषयविवेचने वैधर्म्यम् ।

एतयो: द्वयो: वैधर्म्यप्रकारयो: साकल्येन ऊहापोहं कुर्म: ।

१) पाठभेद: तस्मात् उत्पन्नं वैधर्म्यंम् –

– कस्यापि सूत्रे टीकां लिखन् टीकाकार: कमपि भिन्नं पाठं स्वीकरोति । तस्मात् सूत्रं भिन्नमेव स्वरुपं धारयति । अत: अर्थभिन्नता प्राप्यते ।

– अनेकवारं देशत: कालत: च परिणामात् पाठभेदा: जायन्ते अथवा हस्तलिखिते ग्रन्थे अशुद्धिकारणात् भिन्न: पाठ: प्रचलित: भवति ।

– अस्मात् पाठभेदात् टीकाकारेषु नैकेषु सन्दर्भेषु विचारवैधर्म्यं दृश्यते ।

उदा. १) सन्दर्भ: च. वि. ५/२४

– धातुभि: विगुणश्चापि स्त्रोतसां स प्रदूषक: । चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च

– ऋतुभि: विगुणश्चापि स्त्रोतसां स प्रदूषक: । गङ्गाधर:

२) सन्दर्भ: च. वि. १/१७

क्षार: पुनरौष्ण्यतैक्ष्ण्यलाघवोपपन्न: । चक्रपाणि:

क्षार: पुनरौष्ण्यतैक्ष्ण्यलवणोपपन्न: । गङ्गाधर:, योगीन्द्रनाथसेन:

३)सन्दर्भः  च. वि. २/१३

– ततः स्वेदनवर्तिप्रणिधानाभ्यामुपाचरेदुपवासययेत् । चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च

– ततः छेदनवर्तिप्रणिधानाभ्यामुपाचरेदुपवासयेत् । गङ्गाधरः

अस्मिन् अध्ययने ईदृशैः पाठभेदैः उत्पन्नानि वैधर्म्याणि ७३ प्राप्तानि । तस्मिन् वैधर्म्ये ३३ वैधर्म्याणि द्रव्यनामसंज्ञाविषयाणाम् अस्ति । एतत्  विवेचनं अस्मिन् अध्ययनस्य अधिकरणं नास्ति । तेन ४० वैधर्म्याणां विवेचनं अत्र कुर्मः । पाठभेदः तथा तज्जन्यं वैधर्म्यं च एतयो समन्वयं करणे अग्रिमवत् भेदं कृत्वा वर्णनीयं भवति ।

अ) पाठभेदाः तथा वैधर्म्याणि सन्ति । सर्वे पाठाः योग्याः ।

आ) पाठभेदाः वैधर्म्यं च अस्ति । सर्वे पाठाः योग्याः । परं तस्मात् एक पाठः युक्तियुक्ततरः भाति ।

इ) पाठभेदाः सन्ति । परं तदुपरि टीका न उपलब्धा । सर्वे पाठाः योग्याः ।

ई) पाठभेदाः सन्ति । तेषु शब्दशः वैधर्म्यं दृश्यते । परन्तु अभिप्रेतार्थे वैधर्म्यं नास्ति ।

उ) पाठभेदाः सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरम् एवं निष्कर्षः प्राप्यते यत् एकः पाठः अयोग्यः । अव्याप्तः सन् अन्ये पाठाः योग्याः ।

अस्मिन् अध्ययनविषये भेदविषयवत् पाठभेदानां तथा तज्जन्यानां वैधर्म्याणां समन्वयः साधितः । उपरोक्तानां भेदविषयाणां उपलक्षणमात्रं उदाहरणानि प्रस्तुतानि ।

अ) पाठभेदः वैधर्म्यं च अस्ति । सर्वे पाठाः योग्याः अतः वैधर्म्यं स्वीकरणीयम् ।

उदा.– १) सन्दर्भः च. वि. १/२५

अतिद्रुतं हि भुञ्जानस्य उत्स्नेहनमवसादनं..। चक्रपाणिः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च

अतिद्रुतं हि भुञ्जानस्य स्नेहनमवसादनं...। गङ्गाधरः

– अस्मिन् उत्स्नेहनं स्नेहनं च द्वौ पाठौ स्तः । तथा तदनुसारं टीकाकारेषु वैधर्म्याणि सन्ति । तथैव उत्स्नेहनं अस्मिन् पाठगतायां टीकायाम् अपि वैधर्म्यम् अस्ति ।

– एतौ द्वौ पाठौ तथा तदुपरिगतानां टीकानां वैधर्म्यं तन्त्रयुक्तेः निकषे योग्यं सत् स्वीकरणीयम् ।

२) सन्दर्भः  – च. वि. ४/८

उपधिम् अनुबन्धेन..। चक्रपाणिः

उपाधिम् अनुबन्धेन । गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च

– अत्र भिन्नौ द्वौ पाठौ स्तः । तथा तेषां विभिन्नाः चत्वारः अर्थाः चतुर्भिः टीकाकारैः निष्पादिताः ।

–ऊहनोत्तरं निष्कर्षः प्राप्यते यत् द्वौ अपि पाठौ तथा चत्वारि अपि वैधर्म्याणि च योग्यानि स्वीकरणीयानि च ।

आ) पाठभेदः अस्ति । तज्जन्यं वैधर्म्यम् अस्ति । सर्वे पाठाः योग्याः सन्तः तस्मिन् एकः पाठः युक्तियुक्ततरः ।

उदा. १) च. वि. ५/७

अप्रमाणं पुनः.......दुष्टादुष्टवचनमिति । चक्रपाणिः

अप्रमाणं पुनः.......दृष्टादृष्टवचनमिति ।गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च

– अत्र द्वौ पाठौ तथा तदनुसारं टीकाकारेषु वैधर्म्यम् अस्ति । निष्कर्षम् अनुसृत्य द्वौ पाठौ योग्यौ । परं अधिकरणानुसारं दृष्टादृष्ट इति पाठः योग्यतरः भाति ।

२) च. वि. १/२५

उष्णम् अश्नीयात् – श्लेष्माणं च परिऱ्हासयति । चक्रपाणिः ज्योतिषचन्द्रसरस्वतिः

उष्णम् अश्नीयात् – श्लेष्माणं च परिशोषयति । गङ्गाधरः योगीन्द्रनाथसेनः

अत्र द्वौ पाठौ तथा तदनुसारं टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरं निष्कर्षः कथयति यत् द्वयोः पाठयोः परिऱ्हासयति इति पाठः योग्यतरः अस्ति ।

इ) पाठभेदाः सन्ति । परंतु तेषु टीकाः न उपलभ्यन्ते । सर्वे पाठाः योग्याः ।

सन्दर्भः च. वि. ७/११

शोणितजानां प्रभावः केशश्मश्रुनखलोमपक्ष्मापध्वंसः । चक्रपाणिः

शोणितजानां प्रभावः केशश्मश्रुलोमपक्ष्मापध्वंसः ।गङ्गाधरः योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः

अस्मिन् सूत्रे 'नख' इति अधिकं पदं चक्रपाणिः वर्णयति । अस्मिन् कस्यापि टीकाकारस्य टीका नास्ति । परं द्वौ पाठौ योग्यौ ।

ई) पाठभेद: अस्ति । तस्मिन् शब्दश: वैधर्म्यम् अस्ति । परं ऊहनानन्तरं अभिप्रेतार्थे वैधर्म्यं नास्ति ।

अत्र टीकाकारा: पाठभेदवैधर्म्ययो: एक: विषय: कथनीय: भवति । तन्त्रयुक्त्यादौ निकषौ शब्दार्थश: वैधर्म्यं नश्यति । एवं पाठभेद: वैधर्म्यं च स्वीकरणीयौ ।

उदा. – सन्दर्भ: च. वि. २/१८

पक्व: सर्वाश्रयं पश्चाद्धमनीभि: प्रपद्यते । चक्रपाणि: ज्योतिषचन्द्रसरस्वति:

पक्व: सर्वाशयं पश्चाद्धमनीभि: प्रपद्यते । गङ्गाधर: योगीन्द्रनाथसेन:

– अत्र सर्वाश्रयम् सर्वाशयम् च इति द्वौ पाठौ स्त: । तस्मिन् चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एकसमाना 'सर्वशरीरम्' इति टीका कृता अस्ति ।

– परं गङ्गाधरेण 'रसरक्तादिधात्वाशयम्' इति टीका कृता । यद्यपि शब्दश: वैधर्म्यं दृश्यते तथापि तन्त्रयुक्तिम् अनुसृत्य इदम् एकस्य एव घटकस्य वर्णनम् अस्ति इति स्पष्टं भवति । गङ्गाधरस्य टीका अव्याप्ता भाति परं न अयोग्या ।

उ) पाठभेदा: सन्ति । टीकाकारेषु वैधर्म्यम् अस्ति । ऊहनोत्तरं निष्कर्षा: प्राप्यते यत् एक: पाठ: तथा तदुपरितना टीका अव्याप्ता अस्ति परं अन्ये पाठा: योग्या: सन्ति ।

उदा. – सन्दर्भ: च. वि. २/१३

तत: स्वेदनवर्तिप्रणिधानाभ्याम् -----। चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति:

तत: छेदनवर्तिप्रणिधानाभ्याम् ------ । गङ्गाधर:

अर्थ गङ्गाधरेण भिन्न: पाठ: गृहीत: । परं तन्त्रयुक्ते: अधिकरणम् अनुसृत्य एष: अयोग्य: इति सिध्यति ।

२) सन्दर्भ: च. वि. ३/७

उदकं तु.....उपक्षीणजलेशयम्......। चक्रपाणि: योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति:

उदकं तु ....उपक्षीणजलाशयम्......। गङ्गाधर:

एतयो: पाठभेदयो: तथा तज्ञन्ययो: वैधर्म्ययो: ऊहापोहं क्रियते चेत् इदं निष्कर्ष: प्राप्यते यत् गङ्गाधरस्य पाठ: योग्य: उत अन्येषां पाठ: अधिकरणानुसारं अयोग्या: ।

– इत:पर्यंतं सिद्धान्त: पदश: चिकित्सा च अनया दृष्ट्या दृश्यमाणानां पाठभेदजन्यानां वैधर्म्याणां ऊहनं कृतम् । परं द्रव्याणाम् उल्लेखे अपि नैकेषु सन्दर्भेषु पाठभेदा: दृश्यन्ते ।

द्रव्यनामसंज्ञायां पाठभेदा: तज्जन्यवैधर्म्याणि च

विमानस्थाने केषुचित् सन्दर्भेषु द्रव्याणाम् उल्लेखा: सन्ति । तेषु मूले सूत्रे एव टीकाकारा: पाठभेदान् स्वीकुर्वन्ति । तस्मात् विधर्मता जायते ।

एतादृशा: कलिता: ३३ पाठभेदा: प्राप्ता: । परं एतेषां वैधर्म्याणां समन्वये निराकरणे च प्रयोगशालापरीक्षणं रुग्णेषु प्रयोगादीनां उपयोग: करणीय: ।

अस्य अध्ययनस्य उद्देश: द्रव्यनिश्चयकरणम् नास्ति । अस्य अभावात् अत्र केवलं द्रव्यनामसंज्ञागतानां पाठभेदानां सूचि: पुरस्थापिता अस्ति ।

द्रव्यगुणविज्ञानम् इति ज्ञानशाखाया: संशोधकेभ्य: एकैके सन्दर्भे पृथक् पृथक् संशोधनार्थम् एषा सूचि: उपयुक्ता भवेत् । भाविसंशोधनकार्यार्थं एते क्षेत्रस्वरुपिण: सन्दर्भा: सन्ति ।

अस्मिन् द्रव्यनामसंज्ञापाठभेदसूचि: परिशिष्टे वर्णयन्ति ।

२) मूलसूत्रे पाठभेदा: न सन्ति परंतु विषयविवेचनेषु टीकाकाराणां वैधर्म्यं दृश्यते ।

– टीकाकाराणां विवेचनेषु दृश्यमानानां वैधर्म्याणां एष द्वितीय: वर्ग: अस्ति ।

– अस्मिन् टीकाकारा: मूलसूत्रे एकसमानं पाठं वर्णयन्ति । परं कस्मिन् अपि पदे अथवा वर्ण्यविषये टीकां कुर्वद्भि: तै: विभिन्ना: विचारा: प्रकटिता: । अत: टीकाकारेषु वैधर्म्यं दृश्यते ।

– ईदृशानां वैधर्म्याणां ऊहापोहं कुर्म: अत्र । चरकसंहिताया: विमानस्थाने अष्ट अध्यायेषु टीकाकाराणाम् ईदृशानि पाठभेदरहितानि वैधर्म्याणि कलित्वा १२५ प्राप्तानि ।

– तस्मिन् द्रव्यनामसंज्ञागतानि ८८ वैधर्म्याणि अध्ययनस्य अधिकरणं नासत्वात् अस्मिन् अध्ययने विवेचनार्थं न समावेशिता: । तस्मात् ३७ वैधर्म्याणां विवेचनम् अत्र कुर्म: । एतेषाम् वैधर्म्याणां अग्रिमवत् उपप्रकारेषु विभाजनं कृत्वा विवेचनं कुर्म: ।

अ) वैधर्म्यम् अस्ति । शब्दश: वैधर्म्यं दृश्यते । परं ऊहनोत्तरम् अभिप्रेतार्थे वैधर्म्यं न भवति ।

आ) वैधर्म्यम् अस्ति । एतेभ्य: वैधर्म्येभ्य: एक: विचार: अयोग्य: अव्याप्त: अस्ति उत अन्य: विचार: योग्य: ।

इ) वैधर्म्यं अस्ति । शब्दश: अभिप्रेतार्थत: च वैधर्म्यं अस्ति । एते सर्वे विभिन्नविचारप्रवाहा: योग्या: सन्ति ।

ई) वैधर्म्यम् अस्ति । एते विभिन्ना: विचारा: एकस्य एव विषयस्य विविधान् दृष्टिकोणान् विविधा: अवस्था: च दर्शयन्ति ।

उ) वैधर्म्याणि सन्ति । परं विषयाधिकरणानुसारं तानि न समन्वितानि । अत: भाविसंशोधनाय प्रेरकं वैधर्म्यम् अस्ति ।

सोदाहरणं अस्य विवेचनम् इत्थम् –

अ) वैधर्म्यम् अस्ति । शब्दश: वैधर्म्यम् दृश्यते । परं ऊहापोहोत्तरं अभिप्रेतार्थे वैधर्म्यं न भवति ।

– वैधर्म्य वर्गेषु अधिकतराणि वैधर्म्याणि अस्मिन् विभागे समाविष्टानि ।

– अत्र प्राप्तेषु वैधर्म्येषु तन्त्रयुक्त्यादीन् निकषान् संयोज्य तेषां विभिन्नमतानाम् अभिप्रतार्थ: एक: एव इति सिद्धुं शक्यम् ।

– टीकाकारा: विभिन्नषु पदेषु अथवा विभिन्नया पद्धत्या कस्यापि विषयस्य वर्णनं कुर्वन्ति ।

उदा.: सन्दर्भ – १) च. वि. ८/११९–अस्मिन् सूत्रे 'तन्त्रक' इति पदे भिन्नै: तन्त्रकारै: विभिन्नेन प्रकारेण टीका: लिखिता: । परं तेषाम् अभिप्रेतार्थ: समानम् एव अस्ति ।

२) च. वि. ५/७ – अस्मिन् सूत्रे महास्रोत: इत्यस्य विभिन्ना: व्याख्या: टीकाकारा: वर्णयन्ति । परं तेषाम् अभिप्रेतार्थ: समान: अस्ति ।

आ) वैधर्म्यम् अस्ति । एतेभ्य विभिन्नेभ्य: विचारेभ्य: एक: विचार: अव्याप्त: अस्ति । अन्य: विचार: योग्य: अस्ति ।

– अस्मिन् टीकाकाराणां विवेचने विधर्मता दृश्यते । परं अधिकरणादितन्त्रयुक्ति: तथा कोशा: एतेषाम् आधार: गृहीत: चेत् एतेभ्य: टीकाकारेभ्य: एक: विचार: अव्याप्त: भाति ।

उदा. सन्दर्भ: १) च. वि. ५/८ – अत्र क्लोम पदस्य व्याख्यायाम् वैधर्म्यम् अस्ति । अस्य सविस्तरम् ऊहापोहानन्तरं एवं निष्कर्ष: सिध्यति यत् योगीन्द्रनाथसेन: ज्योतिषचन्द्रसरस्वति: च एताभ्यां कृतं वर्णनं योग्यम् । चक्रपाणि: गङ्गाधर: च एतयो: विवेचनम् अव्याप्तम् ।

२)सन्दर्भ: च. वि. ८/४– अस्मिन् सूत्रे 'दक्ष' इति पदे विभिन्नानाम् अर्थानां टीका: सन्ति । ऊहनोत्तरं ताभ्य: चक्रपाणे: टीका अव्याप्ता भाति ।

इ) वैधर्म्यम् अस्ति । शब्दश: तथा अभिप्रेतार्थश: वैधर्म्यम् अस्ति । एते सर्वे विभिन्ना: विचारप्रवाहा: योग्या: सन्ति ।

– अत्र टीकाकारेषु स्पष्टं वैधर्म्यं दृश्यते । परं कोश: व्याकरणं तन्त्रयुक्ति: च एता: अनुसृत्य सर्वे अर्था: योग्या: भवन्ति ।

उदा.– १) च. वि. ८/९५ – अत्र 'कालगर्भाशय:' इति पदस्य विवरणे टीकाकारेषु षड् प्रकारका: विभिन्ना: विचारा: प्राप्यन्ते । एते सर्वे विचारा: योग्या: सन्ति ।

२) च. वि. ५/२४ – अस्मिन् विमार्गगमनम् पदस्य विभिन्ना: अर्था: टीकाभ्य: प्रतियन्ति । एते सर्वे अर्था: योग्या: ।

ई) वैधर्म्याणि सन्ति । एते विभिन्ना: विचारा: एकस्य एव विषयस्य घटकस्य विविधान् दृष्टिकोणान् अर्थान् अथवा विविधा: अवस्था: दर्शयन्ति ।

– अस्मिन् टीकां कुर्वन् टीकाकार: वर्ण्यविषयस्य कामपि भिन्नाम् अवस्थां प्रकाशयति । एष: विभिन्न: अर्थ: योग्य: भवति । अत: य: वर्ण्यविषय: अधिकतरं सविस्तरं च पृथक्प्रकारेण ज्ञायते ।

उदा.–१) च. वि. ३/२४ – परिग्रह: इति पदे टीकाकारै: कृतं विवेचनं परिग्रह: इति संकल्पनाया: विविधानाम् अवस्थानां द्योतकम् ।

२) च. वि. ४/८– व्यवसाय: इति पदस्य टीकाकाराणां विभिन्ना: अर्था: तस्या संकल्पनाया: विस्तारं कुर्वन्ति ।

उ) वैधर्म्यम् अस्ति । परं विषयाधिकरणानुसारं तेषां समन्वय: अत्र न कृत: । एतानि वैधर्म्याणि भाविसंशोधनाय प्रेरकाणि सन्ति ।

उदा.–

द्रव्यनामसंज्ञायां टीकाकाराणां वैधर्म्यत्वं अस्ति । चरकसंहिताया: विमानस्थाने द्रव्यनामसंज्ञागता: ८० वैधर्म्याणि प्राप्यन्ते । तेषां केवलं सूचि: अत्र प्रस्तुता अस्ति ।

– वैधर्म्याणां सूचि: परिशिष्टे वर्णनं कृतमस्ति ।

– एवं विभिन्ना: पाठभेदा: वैधर्म्याणि च एतेषां विषये ऊहापोह: कृत: ।

विषयानुसारं वैधर्म्यत्वम् –

– विषयविवेचने यत्र वैधर्म्यत्वं उत्पन्नम् तस्य वर्ण्यविषयस्य स्वरुपानुसारं तान् चिन्तयाम: ।

–अधोल्लिखितानि विभिन्नानां विषयाणाम् अनुषंगेण चरकसंहिताया: विमानस्थाने वैधर्म्याणि दृश्यन्ते

१) चिकित्सा दृष्टिकोण: – उदा – च. वि. ७/१७ – त्रिवारं त्रिरात्रं वा ।

च. वि. ७/१३ – कृमिकोष्ठे अपतर्पण चिकित्सा ।

२) चिकित्सा सिद्धान्त: – उदा – च. वि. २/१३ – स्वेदनं छेदनं वा ।

च. वि. ६/११ – अनुबन्ध्यानुबन्ध: विचार: ।

च. वि. २/१३ – अनुद्रिक्तं उद्रिक्तं वा आमप्रदोष: ।

३) सैन्धान्तिक: – च. वि. ३/७ – अत्यभिष्यन्दि

च. वि. १/६ – असंसृष्टरसकार्य:

च. वि. १/२२ – गुणान्तराधानम्

च. वि. ५/९ – स्थानस्थ दोष:

च. वि. ५/७ – प्रकुपितम्

४) परिभाषा विषयक: – च. वि. १/४ – अमधुरम्

च. वि. ४/६ – आत्मा

च. वि. ४/८ – उपधि:

च. वि. ४/८ – धृति:

च. वि. ७/१२ – हृदयचरा

च. वि. ८/४ – दक्षम्

५) संकल्पना विषयक: – च. वि. ५/२४ – विमार्गगमनम्

च. वि. ७/१२ – संकीर्णभोजनम्

च. वि. ८/८९ – प्रतिबोधनम्

च. वि. ८/८६ – क्षोभ:

च. वि. ८/४ – प्रकृतिज्ञ:

च. वि. १/२५ – उत्स्नेहनम्

च. वि. २/७ – विधमनम्

६) लक्षणबोधक: – च. वि. ३/७ – उपक्षीणजलाशयम्

च. वि. १/१७ – लाघवोपपन्न:

च. वि. ४/४ – अवितर्क:

च. वि. ८/११९ – तन्त्रक:

च. वि. ८/१०९ – शिखरीदशन:

च. वि. ८/९८ – जर्जरस्वर:

७) शारीरभाव: – च. वि. ८/१०९ – शिखरीदशन:

च. वि. ५/८ – क्लोमम्

च. वि. ५/७ – महास्रोत:

च. वि. ८/९५ – कालगर्भाशयप्रकृति

च. वि. ७/११ – नखम्

८) वनस्पति / द्रव्यात्मकम् – च. वि. ७/१९ – शैखरिक:

९) गुणबोधक: – च. वि. ७/३ अधमत्वम्

च. वि. ८/४ – जितहस्तम्

च. वि. ८/११० – कल्याणाभिनिवेश:

च. वि. ५/२३ – धातुभि: विगुण:

१०) कर्मबोधक: – च. वि. १/२५ – अवसादनम्

च. वि. १/२५ – उत्स्नेहनम्

च. वि. २/१३ – स्वेदनम्

च. वि. ८/७१ – विक्रियमाणा:

च. वि. ५/१२ – अतिमात्रम्

च. वि. ५/२४ – विमार्गगमनम्

११) सूत्रान्वये वैधर्म्यम् – च. वि. ५/२४ – गङ्गाधरकृत: विभिन्न: अन्वय:

१२) व्याकरण अनुषंगेन वैधर्म्यम् –

च. वि. ८/७९ – यद् / य:

च. वि. २/१३ – अनुद्रिक्तं वा उद्रिक्तम्

च. वि. ७/१३ – दीर्घोर्णांशुसंकाशम्

एवं विभिन्नेषु विषयेषु टीकाकारेषु वैधर्म्यं दृश्यते ।

## वनस्पतिजद्रव्यनामसंज्ञावैधर्म्यम्

– विमानस्थाने विषयवर्णने नैकानि द्रव्याणि उल्लिखितानि । एतासां वनस्पतीनां संज्ञानाम् अर्थ: पर्यायं च टीकाकारै: तस्मिन् सन्दर्भे कृत: च । नैकेषु सन्दर्भेषु एतासु नामसंज्ञासु टीकाकाराणां वैधर्म्यं दृश्यते ।

– अस्य अध्ययनस्य हेतु: न वनस्पतिजद्रव्याणां संज्ञानिश्चिति: । तस्मात् एतानि वैधर्म्याणि न समन्वितानि एतासां नामसंज्ञागतानां वैधर्म्याणाम् अभ्यास: तथा तस्मिन् समन्वयोत्तरा निश्चिति: इति अन्यस्य अध्ययनस्य विषय: अस्ति ।

– द्रव्यगुणविज्ञानशास्त्रज्ञा: संस्कृतभाषातज्ञा: आधुनिका: वनस्पतिशास्त्रज्ञा: जैवविज्ञानशास्त्रज्ञा: च एतै: समेत्य अध्ययनं कृत्वा द्रव्यसंज्ञानां निश्चितिकरणम् इति अन्य: विस्तृत: विषय: अस्ति । वनस्पतीनां प्रत्यक्षाभ्यास: प्रयोगशालायां परीक्षणं तथा अन्यासाम् अध्ययनपद्धतीनाम् आधारेण एष: अभ्यास: आवश्यक: ।

– अत: अत्र अस्मिन् अध्ययने चरकसंहिताया: विमानस्थाने विषयगतं वनस्पतिजं द्रव्यवर्णनं तथा तस्मिन् टीकाकारेषु सत् वैधर्म्यं च एतयो: केवलं सङ्कलनं कृतम् अस्ति । एतस्मात् सङ्कलनम् अस्मिन् विषये भाविनि काले संशोधनं कर्तुकाया: अभ्यासका: संशोधका: वा अध्ययनविषयान् प्राप्नुयु: ।

अस्मिन् प्रतिवैधर्म्यं विशेषाध्ययनं कृत्वा समन्वयसिद्धि: नाम स्वतन्त्रम् अध्ययनक्षेत्रं स्यात् ।

## पाठभेदविचारा: – Textual Version

– प्राचीने काले अध्ययनस्य ग्रन्था: मुखोद्गता: आसन् । मौखिकीपरम्पराया अध्ययनं सङ्क्राम्यति स्म । संहिताकाले एते मुखोद्गता: विषया: लिखितस्वरुपेण संरक्षणस्य पद्धति: प्रारब्धा । तस्या: एव विविधा: संहिता: निर्मिता: ।

– एते सर्वे लिखितविषया: हस्तलिखितस्वरुपे भूर्जपत्रे तालपत्रे इत्यादिषु आसन् । पश्चात् वस्त्रोपरि लेखनस्य पद्धति: उत्पन्ना । अस्यां सर्वप्रकियायां मूलसूत्रेषु पाठभेद: नाम उत्पत्ति: आरब्धा ।

– पाठभेद: नाम उत्पत्ते: कारणानि –

१) मुखोद्गतपद्धतिगत: उच्चारणदोष:

२) हस्तलिखितपद्धतिस्थ: लेखनदोष:

३) स्वविचारस्य स्थापना

४) कस्मिंश्चित् विषये कस्यचित् अभ्यासकस्य स्वतन्त्र: विचार: ।

५) ज्ञानसङ्क्रमणपद्धतिस्थ: दोष:

६) देशत: परिवर्तनम्

७) कालत: परिवर्तनम्

८) बाह्यघटकानां/संस्काराणां प्रभाव:

९) नूतनानां घटकानां प्रभाव:

१०)ऐतिहासिकं तथा भौगोलिकं स्थित्यन्तरम्

११) राजकीयपरिवर्तनम्

१२) धार्मिकपरिवर्तनम्

१३) सामाजिकपरिवर्तनम् इत्यादय:

– एभि: पाठभेदै: क्वचित् कश्चित् विषय: नूतनतया प्रकाशते ।

– नैकवारं सम्भ्रमावस्था उत्पद्यते ।

– टीकाकारै: अपि टीकां लिखद्भि: मूलसूत्रे नैकवारं पाठभेदा: स्वीकृता: ।

– अस्मिन् प्रकरणे विमानस्थाने सर्वस्मिन् अध्ययने पाठभेदा: सङ्कलिता: ।

– एषां पाठभेदानाम् अभ्यासानन्तरं निष्कर्ष: –

१) चक्रपाणि: (काल: ख्रिस्ताब्दस्य ११ शतकम्) तथा गङ्गाधर: (काल: ख्रिस्ताब्दस्य १९ शतकम्) अनयो: कालत: ८०० वर्षाणाम् अन्तरं सता नैकस्थाने पाठभेदा: दृष्यन्ते ।

२) गङ्गाधरेण नैकस्थाने चक्रपाण्यपेक्षया सम्पूर्णतया भिन्ना: पाठा: स्वीकृता: ।

उदाहरणार्थम् – अ) तत: स्वेदनवर्तिप्रणिधानाभ्याम् उपाचरेत् । चक्र. च. वि. २/१३

तत: छेदनवर्तिप्रणिधानाभ्याम् उपाचरेत् । गङ्गाधर: च. वि. २/१३

ब)उदकं तु .....अपक्रान्तजलचरविहङ्गम् उपक्षीणजलेशयमप्रीतिकरमपगतगुणं विद्यात् ।

चक्र. च. वि. ३/७

उदकं तु ....अपक्रान्तजलचरविहङ्गम् उपक्षीणजलाशयमप्रीतिकरमपगतगुणं विद्यात् ।

गङ्गाधर: च. वि. ३/७

क) तत् परस्परेण सह जल्पन् पिण्डेन विजिगीषुराह संहर्षात् । चक्र. च. वि. ८/१५

तत् परस्परेण सह जल्पन् पण्डेण विजिगाषुराह संहर्षात् । गङ्गाधर: च. वि. ८/१५

ड) धातुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषक: । चक्र. च. वि. ५/२३

ऋतुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषक: । गङ्गाधर: च. वि. ५/२३

एवं मूलसूत्रे चक्रपाणिगङ्गाधरयो: सम्पूर्णतया भिन्ना: पाठा: लभन्ते । तेषां पाठानां तथा तद्उपरिकृतानां टीकानां विवेचनं वैधर्म्यप्रकरणे कृतमस्ति ।

३) योगेन्द्रनाथसेन: गङ्गाधरस्य प्रशिष्य: अस्ति अत: असौ बहुवारं गङ्गाधरस्य पाठं स्वीकरोति ।

उदा.– च. वि. ५/८, च. वि. ८/१५, च. वि. ६/११

किन्तु नैकस्थाने अमुना गङ्गाधरस्य पाठम् अस्वीकृत्य चक्रपाणिसम्मत: पाठ: स्वीकृत: अस्ति ।

उदा.: च. वि. ५/२३, च. वि. २/९

४) ज्योतिषचन्द्रसरस्वतिना अधिकतर: चक्रपाणिना पाठः अध्यहृत: चेत् तथापि नैकस्थाने असौ गङ्गाधरम् अनुसरति ।

उदा.: च. वि. ८/१४, च. वि. ७/३

पाठभेदानाम् उपयोग:

१) एकस्य विषयस्य सन्दर्भेण अन्यविचारप्रवाहस्य ज्ञानं भवति ।

२) पाठस्य शुद्धेः – अशुद्धेः ऊहनार्थं गतिः लभते ।

३) टीकाकाराणां दृष्टिकोणः ज्ञायते ।

४) देशतः कालतः च भूतं परिवर्तनं ज्ञायते ।

५) कालतः प्राचीनटीकाकारस्य पाठस्थानां दोषाणां ज्ञानं भवति ।

उदा. – 'उपक्षीणजलेशयम्' इति चक्रपाणिना पाठः तन्त्रयुक्तिक्रमपक्षाणां निकषेषु अयोग्यः भवति प्रत्युत गङ्गाधरस्य 'उपक्षीणजलाशयम्' इति पाठः योग्यः भासते ।

६) एकसूत्रस्थेन पाठभेदेन तस्य सूत्रस्य अन्यप्रकारेण अर्थनिष्पत्तिः भवति ।

## टीकानां तौलनिकाभ्यासस्य महत्वम्

टीकाया: अध्ययनपद्धत्यां यथाविमर्शं टीकानाम् अध्ययनस्य प्रकारद्वयम् वर्तते ।

अ)एकस्या: टीकाया: समग्रम् अध्ययनम् ।

आ) एकस्मिन् ग्रन्थे उपलब्धानां सर्वासां टीकानां तौलनिकम् अध्ययनम् ।

– अस्मात् तौलनिकस्य अध्ययनस्य महत्वम् अत्र विमर्शाम ।

– तौलनिकम् अध्ययनमपि द्विविधा शक्यम् ।

अ) एकस्य टीकाकारस्य द्वयो: भिन्ने ग्रन्थे लिखितानां टीकानां तौलनिक: अभ्यास: ।

उदा. चक्रपाणे: चरकसंहितायां कृता आयुर्वेददीपिका सुश्रुतसंहितायां कृता 'भानुमति:' इति द्वयो: टीकयो: तौलनिक: अभ्यास: ।

आ) एकस्मिन् ग्रन्थे अथवा तस्य कस्मिन् अपि भागे उपलब्धानां टीकानां तौलनिक: अभ्यास: ।

उदा. चरकसंहिताया: विमानस्थाने उपलब्धानां चतस्त्रां टीकानां तौलनिक: अभ्यास: ।

– ईदृश: टीकाकाराणां तौलनिक: अभ्यास: प्रमाणत: अतीव अल्प: अस्ति । इदम् अध्ययनम् एवं तौलनिकरीत्या एव कृतम् ।

– तौलनिकाभ्यासस्य उपयोगं महत्वं च अग्रे लक्षितम् –

१) देशत: वैधर्म्यस्य ज्ञानम् ।

– एकस्मिन् एव ग्रन्थे विविधेषु प्रदेशेषु निवसद्भि: तथैव जातै: टीकाकारै: टीका: लिखिता: ।

– मनुज: यस्मिन् प्रदेशे जनिं लभते वर्धते तस्य परिगम: सांस्कृतिकी भौगोलिकी, राजकीया, सामाजिकी च अवस्था इत्यादय: मनुजे परिणमन्ति ।

– तथा एतेषां घटकानां परिणाम: तस्य अध्ययने लेखने च भवति एव ।

– ईदृशं देशत: वैधर्म्यं टीकाकारेषु अपि दृश्यते। उदा. चक्रपाणि: वङ्गदेशीय: आसीत् उत जेज्झट: काश्मीरवासी । एषा देशान्तरावस्थाया: परिणाम: तयो: लेखने दृश्यते ।

– ईदृशम् एव वैधर्म्यं वङ्गदेशस्थ: अरुणदत्त: तथा महाराष्ट्रवासी हेमाद्रि: एतयो: टीकासु लभ्यते । अत: अस्मिन् अध्ययने विमानस्थानस्य टीका: एकस्मिन् प्रदेशे निवसतां टीकाकाराणां निर्वाचिता:

चक्रपाणि दत्तः, गङ्गाधर रॉयः योगेन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एते चत्वारः अपि टीकाकाराः एकदेशीयाः नाम वङ्गदेशीयाः सन्ति । तेन तेषां विवरणे देशतः वैधर्म्यं न लभते ।

२) कालतः वैधर्म्यस्य ज्ञानम् ।

– विभिन्नकालीनानां टीकाकाराणां वर्णने कालतः परिवर्तनात् वैधर्म्यं दृश्यते ।

उदा.–

अ) चक्रपाणिः दशमे एकादशे शतके वङ्गप्रान्ते अवस्थितः उत ज्योतिषचन्द्र सरस्वतिः विंशे शतके तत्र आसीत् । मध्य नवशत (९००) वर्षाणां काले राजकीये, सामाजिके सांस्कृतिके क्षेत्रे बहुनि परिवर्तनानि अनुभूतानि ।

आंग्लाः डचाः पोर्तुगीझाः फ्रेंचाः च एतेषां आक्रमणेन पाश्चात्यस्य विज्ञानं भारते संक्रमितम्

आधुनिकी चिकित्सापद्धतिः शवविच्छेदनम् इत्यादीनां मूल्यं ज्ञातम् । ज्योतिषचन्द्र सरस्वतेः विवेचने इदं सर्वं कालगतं परिवर्तनं प्रतिबिम्बते ।

चरकसंहितायाः विमानस्थाने पञ्चमे अध्याये शारीरभावानां विवरणे चक्रपाणिः ज्योतिषचन्द्र सरस्वतिः च एतयोः लेखनवैधर्म्यं प्राप्यते ।

आ) तथैव टीकाकाराणां भाषायां पदयोजनायां च अपि कालतः वैधर्म्यं दृश्यते ।

उदा. चक्रपाणेः भाषाशैली क्लिष्टा अस्ति । साहित्ये अल्पोपयुक्तानां पदानां योजना दृश्यते । अतीव कठिनानि व्याकरणदृष्ट्या दुर्लभानि पदानि चक्रपाणिः प्रयुङ्क्ते ।

उदा उपेयुषे (च. सू. १ । १–२)

अस्य विपरीतं योगेन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतयोः भाषाशैली अतीव सुबोधा सुस्पष्टा च अस्ति । अक्लिष्टानि सुगमानि च पदानि तौ युञ्जाते ।

३) एकस्य विषयस्य विभिन्नानाम् अवस्थानां ज्ञानम्

– तौलनिकस्य अभ्यासस्य एतद् महत्वपूर्णं योगदानम् अस्ति । कस्मिन्नपि विषये वर्णनसमये विभिन्नाः टीकाकाराः विविधैः प्रकारैः अर्थैः च वर्णयन्ति ।

– तेषां सर्वेषां विचारौघाः समानाः एव सन्ति । परन्तु ते वर्ण्यविषयस्य विविधानि अङ्गानि अवस्थाः च प्रकाशयन्ते ।

– केचन विषयाः उपलक्षणमात्राः इति अत्र वर्णिताः ।

उदा.

अ) परिग्रहः –  सन्दर्भः च वि ३ । २४

चक्रपाणिः योगेन्द्रनाथ सेनः च ममता ( ममत्वरूपी परिग्रहः)

गङ्गाधरः – प्रतिग्रहः (येषुं ममत्वं तेषां वस्तूनां संग्रहः)

ज्योतिषचन्द्रसरस्वतिः – अन्योपार्जितस्य ग्रहणम्  (ममत्वं सतां वस्तूनां अन्येभ्यः चौर्येण परिग्रहः)

– शब्दशः विभिन्नत्वं यद्यपि भासते तथापि ममता, प्रतिग्रहः चौर्यं च एकस्यैव घटकस्य विभिन्नाः अवस्थाः सन्ति ।

– टीकाकाराणां तौलनिकेन अभ्यासेन एव परिग्रहः इति संकल्पनाविषये सर्वाभिः अवस्थाभिः सह परिपूर्णं ज्ञानं प्राप्तम् ।

– केवलं एकस्य टीकाकारस्य अध्ययनं कृतमासीत् चेत् परिग्रहः इति संकल्पनायाः ज्ञानम् अव्याप्तं लेशं जातं स्यात् ।

आ) व्यवसायः  सन्दर्भः च. वि. ४ । ८

विज्ञानं व्यवसायेन
↓
विकल्पा बुद्धिः (गङ्गाधरः)
↓
अध्यवसायः (योगेन्द्रनाथसेनः)
↓
अवधारणम् (योगेन्द्रनाथसेनः)
↓
कार्येषु प्रवृत्तिः (चक्रपाणिः)
↓
अनुष्ठानम् (ज्योतिषचन्द्रसरस्वतिः)
↓
तद् विषयस्य विज्ञानम्

} व्यवसायः

– अत्र व्यवसायः इति पदस्य चत्वारः विभिन्नाः अर्थाः टीकाकारैः स्वीकृतः । परं ऊहनोत्तरं एवं ज्ञायते यत् चत्वारः अपि अर्थाः व्यवसायः इति संकल्पनायाः अवस्थान्तरस्य द्योतकाः । एताः सर्वाः अवस्थाः मिलित्वा व्यवसायः संकल्पना सिद्ध्यति ।

इ) धृतिः – सन्दर्भः च. वि. ४ । ८

अचञ्चलत्वम् – नियमात्मिका बुद्धिः (गङ्गाधरः)
↓
अलोभः
↓
इन्द्रियनियमनम् (ज्योतिषचन्द्र सरस्वतिः)
↓
संपूर्णं स्वास्थ्यम्
↓
मनसः अचापलम्
↓
सन्तोषः (योगेन्द्रनाथ सेनः)

सर्वेषां टीकाकाराणां अभ्यासोत्तरं यदा उपरितना उपपत्तिः प्रस्तुता तदा धृतिः संकल्पना विभिन्नाभिः अवस्थाभिः ज्ञाता ।

४) कस्यापि विषयस्य अध्यवसायकरणम् ।

– अध्यवसायः इति निश्चयः । यदा सर्वे टीकाकाराः कस्यापि विषयस्य एकस्य एव प्रकारेण अर्थेन च विवरणं कुर्वन्ति तदा सः वर्ण्यविषयः अध्यवसायः भवति । तस्य ज्ञानगतं सम्भ्रमम् दूरीभवति ।

उदा– अ) प्राणवह पदे प्राण इत्यस्य अर्थं सर्वे टीकाकाराः एकसमानं वायुः इति एव कुर्वन्ति । तस्मात् अस्मिन् विषये सम्भ्रमः दूरी भवति ।

आ) वादमार्गपदानां विवरणे कस्यापि टीकाकारस्य कुत्रापि वैधर्म्यं न दृश्यते ।

५) कस्यापि संकल्पनायाः विशेषं ज्ञानं भवति ।

– टीकां लिखन् टीकाकारः स्वबलस्थानं तथा अध्ययनम् अनुसृत्य कस्मिंश्चित् विषये विशेषरूपेण पाण्डित्यं दर्शयितुं विशेषं विवरणं करोति ।

– तौलनिके अध्ययने एतद् प्रकर्षेण दृग्गोचरं भवति । तेन युगपद् सर्वेषां टीकाकाराणां बलस्थानानि अध्ययनविषयाः च दृश्यन्ते ।

उदा– अ)प्रलयः इति संकल्पनायां गङ्गाधरेण अतीव विस्तृता टीका कृता या अन्यैः न । तौलनिकेन अभ्यासेन प्रलय संकल्पनाविषये गङ्गाधरवर्णिते विशेषं ज्ञानं ज्ञाप्यते ।(च.वि. ३/२७)

आ) चक्रपाणिना च. वि. ८/८७ इति टीकायां अमूर्तभावाः विशेषेण वर्णिताः । तद् अन्य टीकाया न प्राप्यते ।

इ) सहजानां कृमिविषये ज्योतिषचन्द्रसरस्वतिः अतीव भिन्नं महत्वपूर्णं विवेचनं करोति । यद् अन्यत्र न प्राप्यते ।

ई) स्त्रोतस् संकल्पनाविषये चरकाचार्येण पूर्णतः भिन्नः अध्यायः लिखितः । तथापि टीकानां अध्ययनेन अस्याः संकल्पनाविषये विस्तृतं महत्वपूर्णं च ज्ञानं भवति ।

६) टीकाकाराणां चिकित्सायां प्रभुत्वं अनुभूयते ।

– टीकाकाराः केवलं संस्कृतज्ञाः आसन् न चिकित्सकाः इति महान् अपबोधः अस्ति । यदा टीकानाम् अध्ययनं भवति विशेषतः तौलनिकम् अध्ययनं तदा अयम् अपबोधः पूर्णतया नश्यति ।

– टीकाकाराः अतीव उच्चश्रेण्याः शास्त्राभ्यासकाः, पारंगताः चिकित्साव्यवहारकुशलाः च आसन् । प्रतिस्थानं अस्य प्रत्ययः अनुभूयते । गङ्गाधर रॉयः तु अतीव प्रसिद्धः चिकित्सकः आसीत् । तत्रभवतः चिकित्सापद्धतिः बहुसंख्याकैः छात्रैः भाविजनेषु अपि संक्रमिता ।

केचन उपलक्षणमात्राः विषयाः

अ) चक्रपाणिना च.वि. ५/२३ इत्यत्र विमार्गगमनस्य व्याख्या कुर्वता दत्तम् उदाहरणं अतीव दुर्मिल्लायाः व्याधेः अवस्थायाः अस्ति । मलस्य मूत्रमार्गगमनम् ।

एषा नैदानिकी अवस्था सम्प्रति अपिं दुष्प्राप्या अस्ति । परं नैकवारं दृश्यते ।

ईदृश्यायाः दुष्प्राप्याः घटनायाः उदाहरणं दत्वा चक्रपाणिः अस्मात् विस्मापयति । उदाहृताः नाम तत्रभवता ईदृशाः व्यथिताः पुरुषा दृष्टाः स्यात् ।

आ) अग्नेः विवरणेषु योगीन्द्रनाथसेनः ज्योतिषचन्द्रसरस्वतिः च एतयोः चिकित्सादृष्ट्या कृतं विवेचनम् अतुलनीयं अस्ति, तत्रभवतः चिकित्साकौशल्यस्य साक्ष्यं यच्छति । (च. वि. ६ । १२)

इ) 'कृमिकोष्ठ चिकित्सा' इति विवरणे चतुर्भिः टीकाकारैः कृतं विस्तृतं विवेचनं तेषां चिकित्सानुभवं द्योतयति । विशेषतः ज्योतिषचन्द्रसरस्वतिः अतीव गहनं विवेचनं कृतम् ।

(सन्दर्भ – च. वि. ७)

ई) रक्तजाः कृमयः कुष्ठस्य हेतुस्वरुपाः सन्ति इति गङ्गाधरस्य निष्कर्षः विना चिकित्सानुभवं सर्वथा अशक्यः ।

उ) 'विपरीतगुणाः विपरीतगुणभूयिष्ठापेक्षया विशेषं शमनकार्यं कुर्वन्ति । ( सन्दर्भः च. वि. १ । ६)

इदं चक्रपाणेः वचनं अतीव महत्वम् अर्हति । तदस्ति तत्रभवतः प्रदीर्घः चिकित्सानुभवः द्रव्याभ्यासः च एतयो फलस्वरुपम् ।

ऊ) आहारविधिविधानविषये टीका अपि सर्वेषां टीकाकाराणां रुग्णानुभवं दर्शयति ।

ए) आमप्रदोषजविकाराणां चिकित्सा चतुर्भिः टीकाकारैः विस्तृता घटकशः सुयोजिता वर्णिता अस्ति । (सन्दर्भः च. वि. २ । १३)

– यदि टीकाकाराः चिकित्सकाः न अभविष्यन् तर्हि एतस्मिन् सूत्रे टीकालेखनं तेभ्यः अशक्यम् अभविष्यन् । वस्तुतः विमानस्थानम् चिकित्सायाः उपक्रमेभ्यः आवश्यकानां दोषभेषजादीनां घटकानां विशेषज्ञानार्थं वर्णितम् ।

– अतः अत्र प्रतिविषयस्य टीकाभ्यः तस्य तस्य टीकाकारस्य चिकित्साक्षेत्रगतं प्रभुत्वम् प्रत्येति ।

७) विभिन्नानां टीकाकाराणां विभिन्नाः दृष्टिकोणाः ज्ञायन्ते ।

– टीकाकारः यस्यां ज्ञानपरंपरायां अधीतः स्यात् तथा सः यैः शास्त्रसंस्कारैः संस्कारितः स्यात् तदनुसारं शास्त्रसंकल्पनानां विषये दृष्टिकोणाः निश्चिताः भवन्ति । अनेन तौलनिकेन अध्ययनेन तेषां प्रत्ययः स्पष्टतया ज्ञायते ।

उदा. अ) कालगर्भाशयप्रकृतिः (च.वि. ८/९३) इत्यस्य विवरणे चतुर्भिः टीकाकारैः विभिन्नाः दृष्टिकोणाः प्रकटिताः एते चत्वारः अपि अर्थाः अतीव मूलगामिनः यथायोग्याः च सन्ति । एकायाः एव टीकायाः एव अभ्यासः कृतः चेत् एतद् ज्ञानं भवितुम् अशक्यम् ।

आ) रसद्रव्यप्रभावविषये अपि (च.वि. १/६) टीकाकाराणां महान्तः विभिन्नाः दृष्टिकोणाः प्राप्यन्ते

८) टीकाकारस्य वैशिष्ट्यं ज्ञायते ।

– प्रत्येकः टीकाकारः स्वज्ञानं स्वानुभवं स्वविचारप्रणालिं च एतान् अनुसृत्य टीकां लिखति । तस्य यद् वैशिष्ट्यं तद् टीकायाः प्रकाशते । उदा.– अ) आयुर्वेदशास्त्रस्य सैद्धान्तिकी पृष्ठभूमिः गङ्गाधरस्य टीकायाः एव सुस्पष्टा भवति । (च. वि. ८, च. वि. ४)

आ) भेषज्यकल्पनाविषये सिद्धान्ताः चक्रपाणेः टीकायाः प्रतियन्ति । ( च. वि. ७, च. सू. ४)

इ) शारीरविषयस्य यथायोग्यं ज्ञानाय ज्योतिषचन्द्रसरस्वतेः टीका वाचनीया एव ।

(च.वि.५, च.वि.८)

ई) अन्यतन्त्रकर्तार: तुलनया अभ्यस्य स्वशास्त्रपुष्ट्यर्थं अन्यशास्त्रस्य सन्दर्भाणां विवरणम् इति योगीन्द्रनाथसेनस्य वैशिष्ट्यम् ।

उ) प्रत्येकं घटकं वर्गीकृत्य तस्य वर्णनम् इति गङ्गाधरस्य वैशिष्ट्यम् ।

ऊ) आयुर्वेदन्यायशास्त्रयो: तुलनात्मकं विवेचनं गङ्गाधर: योगीन्द्रनाथसेन: च एतयो: वैशिष्ट्यम् ।

एवं टीकाकाराणां विशेष: अभ्यास: तेषां तौलनिकात् अध्ययनात् प्रत्येति ।

९) केचन विशिष्टा: विषया: ज्ञायन्ते ।

– टीकाकारस्य वर्णनपद्धत्य: केचन विशिष्टा: विषया: तत्रभवत: टीकाया: ज्ञायन्ते ।

| | | | |
|---|---|---|---|
| उदा. – | वादमार्गपदम् | – | गङ्गाधर: |
| | दोषविवेचनम् | – | चक्रपाणि: |
| | शारीरभाव: | – | ज्योतिषचन्द्र सरस्वति: |
| | कृमिविवरणम् | – | ज्योतिषचन्द्र सरस्वति: |
| | क्लोम | – | ज्योतिषचन्द्र सरस्वति: |
| | राशि: | – | योगीन्द्रनाथ सेन: |
| | महाभूतविचार: | – | योगीन्द्रनाथ सेन: |
| | रोगाणां प्राक् उत्पत्ति: | – | गङ्गाधर: |
| | प्रमाणविचार: | – | गङ्गाधर: |
| | शास्त्रलक्षणम् | – | चक्रपाणि: |
| | अमूर्तभाव: | – | चक्रपाणि: |
| | धातूनां द्रवरूपत्वम् | – | चक्रपाणि: ज्योतिषचन्द्र सरस्वति: च |

१०) टीकाकाराणां वर्णनपद्धति: शैली च ज्ञायते ।

– तौलनिक अध्ययनेन एकैकस्य टीकाकारस्य विषयस्य वर्णनपद्धति: भाषाशैली च एते प्रकर्षेण प्रत्येत: ।

– तस्मात् तेषां अध्ययनम्, अध्यापन सामर्थ्यं कौशल्यं तथा अन्यशास्त्राणां ज्ञानं च एतान् ज्ञातुं शक्यते ।

उदा – अ) चक्रपाणे: भाषा अतीव कठिना । अभ्यासक: नैकानां विषयाणां ज्ञाता अस्ति एव इति मनसि कृत्वा चक्रपाणि: विषयं वर्णयति । संक्षेपेण रचना तथा क्लिष्टदुर्बोधानां पदानां उपयोग: इति चक्रपाणे: वैशिष्ट्ये ।

आ) प्रत्युत सुगमा प्रमाणबद्धा, समासरहिता वाक्यरचना सुलभानि पदानि च इति योगीन्द्रनाथ सेनस्य भाषाशैली ।

इ)दीर्घातिदीर्घाणि वाक्यानि, प्रचुरमात्रायां ल्यबन्तादीनि अव्ययानि, कठिना वाक्यरचना, शास्त्रोक्ता परिभाषा, अपरिचितानि बहुनि पदानि इति गङ्गाधरस्य रचनावैशिष्ट्यानि ।

ई) विषयवर्णने तस्य अनुषंगेण अतीव विस्तृतं वर्णनम्, अन्यशास्त्रवचनानि च एतयो: उपयोगेन विषयान्तरं कारं कारं प्रदीर्घं विवेचनम् इति गङ्गाधरस्य पद्धति: ।

उ) प्रत्युत संक्षेपेण परं महत्वपूर्णं, साक्षात् विषयसम्बधिनां घटकानां च सुस्पष्टं वर्णनम् इति चक्रपाणे: पद्धति: ।

ऊ) नैकेषु आवश्यकस्थानेषु चक्रपाणि: टीकां न करोति उत नैकेषु स्थानेषु विस्तृतं विवेचनं करोति ।

ए) योगीन्द्रनाथसेनेन तु प्रत्येकं विषयं स्पृशता सममित्या टीका कृता । चक्रपाणि: गङ्गाधर: एतयो: समन्वयेन टीकाया: पद्धति: योगीन्द्रनाथसेनस्य अस्ति ।

ऐ) ज्योतिषचन्द्र सरस्वति: अतीव अल्पै: पदै: रचनां करोति । विशेषत: परिभाषाणां विवरणम् इति तत्रभवत: वैशिष्ट्यम् ।

ओ) व्याकरणदृष्ट्या दुष्कराणां पदानाम् उपयोग: तु चक्रपाणे: टीकाया: अतीव महत् वैशिष्ट्यम् ।

<u>११) टीकाकारै: योजितानां विशिष्टानां पदानां ज्ञानं भवति ।</u>

– टीकाकार: टीकां कुर्वन्त: नैकवारं विशिष्टानां पदानाम् उपयोगं कुर्वन्ति । तौलनिकात् अध्ययनात् विना न तेषां ज्ञानं भवति ।

अ) चक्रपाणि: – परिपन्थिनी – च. वि. १ । ६

उपचारगुण: – च. वि. १ । ७

आ) योगीन्द्रनाथसेन: – विचार: – च. वि. ३ । ३ (देशवाचक: अर्थ:)

इ) गङ्गाधरः – इति चेत् (दार्शनिकी भाषा) – च. वि. ४ । ४

ई) ज्योतिषचन्द्रसरस्वतिः – विनियोगप्रणालिः – च. वि. १ । ३४

– मरकः – च. वि. ३ । ३

– कुज्झटिका – च. वि. ३ । ७

– प्रणालिः – च. वि. ५ । ३

– उट्टंकनम् – च. वि. ५ । ५

– फुप्फुसयन्त्रम् – च. वि. ५ । ८

– घडाघडायनम् – च. वि. ५ । ८

– बस्तिशीर्षम् – च. वि. ५ । १४

– यथाविन्यस्तम् – च. वि. ६ । ३

– समष्टिः – च. वि. ६ । ५

१२) द्रव्याणां परिभाषाः ज्ञायन्ते ।

– देशतः कालतः च उत्पन्नात् वैधर्म्यात् द्रव्याणां पर्यायपरिभाषाणां वर्णने तस्य तस्य टीकाकारस्य वैशिष्ट्यं अवगम्यते ।

– टीकाकारम् अनुसृत्य द्रव्याणां परिभाषाः ज्ञायन्ते तेन द्रव्यपरिचयं द्रव्यस्वरुपं च ज्ञातुं साहाय्यं लभते । उदा.–

अ) विडङ्गकषायो हि वैद्यकव्यवहारात् शैखरिककषायः उच्यते । चक्रपाणिः च. वि. ७ । १९

आ) शलभाः पतङ्गाः शस्यभक्षकाः 'पङ्गपालः' इति लोके । ज्योतिषचन्द्रसरस्वतिः च.वि. ३/७

इ) राजादनः । क्षीरणी इति भाषा । ज्योतिषचन्द्रसरस्वतिः च. वि. ८ । १३९

ई) शाङ्गेष्टा महाकरञ्जः । ज्योतिषचन्द्रसरस्वतिः च. वि. ८ । १३९

१३) परिभाषाविज्ञानम्

– आयुर्वेदशास्त्रे वर्णितानां नैकानां विषयाणां विभिन्नपरिभाषाणाम् उल्लेखाः तु टीकाकाराणां अतीव महत्योगदानम् अस्ति ।

– तौलनिकेन अध्ययनेन एताः परिभाषाः विशेषरुपेण प्रतियन्ति ।

– अस्मिन् अध्ययने सर्वेषाम् उपलब्धानां टीकाकाराणां परिभाषा: संकलिता: । विस्तारेण तत्र अस्य महत्वं ज्ञायते । अस्मिन् परिभाषानां सूचि: परिशिष्टे वर्णनं कृतमस्ति ।

१४) मूलग्रन्थस्था: पाठभेदा: ज्ञायन्ते ।

– मूलग्रन्थेषु टीकां कुर्वद्भि: टीकाकारै: विविधा: पाठभेदा: स्वीकृता: सन्ति । नैकै: कारणै: पाठभेदा: उत्पद्यन्ते । परंतु एषा पाठभेदोत्पत्ति: प्राय: सम्भ्रामयति ।

– तौलनिकेन अध्ययनेन एतेषां पाठभेदानां ज्ञानं भवति । तस्मात् योग्यस्य पाठभेदस्य समन्वयं कृत्वा तदनन्तरम् अर्थयोजना अभिप्रेता भवति ।

– उपलक्षणमात्रं पाठभेदानां उल्लेख: अग्रिमवत्

अ) धातुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषक: । चक्रपाणि: च. वि. ५ । २३

ऋतुभिर्विगुणश्चापि स्त्रोतसां स प्रदूषक: । गङ्गाधर: च. वि. ५ । २३

अस्मिन् सन्दर्भे गङ्गाधर: अतीव भिन्नं पाठं स्वीकरोति । अत: ऋतुवैगुण्येन अपि स्त्रोतोदुष्टि: उत्पद्यते इति नूतन: विचार: ज्ञायते ।

आ) क्षार: पुनरौष्ण्यतैक्ष्ण्यलाघवोपपन्न:......। चक्रपाणि: च. वि. १ । १७

क्षार: पुनरौष्ण्यतैक्ष्ण्यलवणोपपन्न:.......। गङ्गाधर: योगीन्द्रनाथसेन: च. वि. १ । १७

एतयो: पाठयो: चक्रपाणे: पाठ: योग्यतर: । अस्य विवेचनं वैधर्म्यप्रकरणे कृतम् ।

इ) उदकं तु.......उपक्षीणजलेशयम्.....। चक्रपाणि: च. वि. ३ । ७ (२)

उदकं तु........उपक्षीणजलाशयम्......। गङ्गाधर: च. वि. ३ । ७ (२)

अत्र गङ्गाधरस्य पाठ: योग्यतर: ।

ई) तत् परस्परेण सह जल्पन् पिण्डेन विजिगीषुराह ....। चक्रपाणि: च. वि. ८ । १५

तत् परस्परेण सह जल्पन् पण्डेन विजिगीषुराह ––– । गङ्गाधर: च. वि. ८ । १५

अत्र द्वौ अपि पाठौ युक्तियुक्तौ स्त: ।

एवं पाठभेदा: नाम आयुर्वेदस्य साहित्ये अनुसंधानार्थं महत् कार्यक्षेत्रम् अस्ति । एतेषां ज्ञानं टीकानां तौलनिकेन अध्ययनेन एव भवितुं शक्यम् ।

१५) ग्रन्थकर्तृ: अभिप्राय: अभिप्रेतार्थ: ज्ञायते ।

– चरकसंहितायाम् एकम् सूत्रम् अतीव महत्वम् अर्हति ।

तन्त्रकर्तृरभिप्रायानुपायांश्चार्थमादिशेत् । (च. सू. २६ । ३७)

– तन्त्रकर्ता निश्चितरूपेण किम् वक्तुम् इच्छति? किं तस्य अभिप्राय:? शब्दार्थात् किम् अभिप्राय: प्राप्यते? अस्य अवबोधनस्य उपाय: नाम तन्त्रयुक्त्यादीनां शास्त्रोपायानां साहाय्येन अर्थनिश्चितिकरणम् ।

– एवमेव टीकाकारा: मूलग्रन्थस्य बोधविषये दृष्टिकोणं यच्छन्ति । ग्रन्थकार: किं वक्तुमिच्छति एतत् टीकानाम् अभ्यासेन त्वरितं ज्ञायते । तत्रापि विभिन्नानां टीकाकाराणां तौलनिकम् अध्ययनं क्रियते चेत् ग्रन्थकर्तृ: अभिप्राय: । अभिप्रेतार्थ: सविस्तरं ज्ञायते ।

उदा.–विमार्गगमनम् इति आयुर्वेद निदानस्था एका महती संकल्पना अस्ति । स्त्रोतोविमाने अध्याये स्त्रोतसां सामान्येषु दुष्टिलक्षणेषु विमार्गगमनं वर्णितम् । (सन्दर्भ: च. वि. ५ । २४)

– यदा टीकाकाराणां विमर्श: कृत: तदा विमार्गगमनम् इति संकल्पनाया: भिन्ना: भिन्ना: चतुर्दश अर्था: प्राप्ता: । एते च सर्वे अर्था: योग्या: सन्ति । भिन्नासु अवस्थासु एतेभ्य: चतुर्दश अर्थेभ्य: कापि घटना घटते । ताम् विमार्गगमनम् इति वक्तुं शक्यम् ।

– एष: मूल: अभिप्राय: टीकानां तौलनिकेन अध्ययनेन एव प्राप्त: ।

१६) संदिग्धविषयस्य निराकरणं भूत्वा अर्थनिश्चिति: भवति ।

– शास्त्रे नैका: विषया: अल्प वा मन्दमतिमतां कृते संदिग्धा: सन्ति । तीक्ष्णबुद्धिमान् ऊहनोत्तरं तं विषयम् आत्मसात् करोति । एतादृशं विषयं टीकाकार: स्वबुद्धिविभवेन प्रकाशयन्ति ।

– विशेषत: तौलनिकेन अध्ययनेन एतादृशानां विषयाणाम् ऊहनं निराकरणं च भूत्वा अर्थनिश्चिति: भवति । उदा. क्लोम इति विषये टीकाकाराणाम् अभिप्राय: गृह्यते चेत् तस्य संदिग्धता नश्यति ।

१७) परस्परेषु सन्त: आक्षेपा: ज्ञायन्ते तेन ज्ञानसंवर्धनं भवति ।

– टीकां कुर्वन्त: टीकाकारा: नैकेषु स्थानेषु परस्परेषु आक्षिपन्ति तथा खण्डयन्ति अपि ।

– अनया पद्धत्या अभ्यासकस्य ज्ञानवर्धनं भवति । भिन्नस्य विषयस्य वा दृष्टिकोणस्य अनुभूति: प्राप्यते ।

उदा. त्रिभिरनुबन्ध्यानुबन्धलक्षणसमन्वितैः दोषैरेकत्र मेलनं सन्निपातं द्वयोश्च संसर्गमाचक्षतेऽस्मिन् तन्त्रे । अत्र केचित् अनुबन्ध्यलक्षणसमन्विताः इति पठन्तः स च पाठः चक्रसम्मतः इत्याहुः । द्वित्राणामनुबन्ध्यत्वे क्रियासांकर्यात् असाध्यत्वमेव स्यादिति प्रायः अनुबन्ध्यानुबन्धभावेनैव संसर्गः सन्निपातो वा भवितुमर्हति । चक्रोऽपि तेनाप्रधानानुगमनीये सन्निपाते इत्युक्त्वा तमेवार्थं समर्थयति । नापि तथाविधः पाठस्तेन कृतः । (ज्योतिषचन्द्रसरस्वतिः च. वि. ६/११)

१८) एकैकस्य टीकाकारस्य ऊहनसामर्थ्यं बुध्यते ।

– सूत्ररूपिणि ग्रन्थे भाष्यं लिखन्तं टीकाकारं ऊहनस्य प्रक्रियां अतीव आवश्यकी भवति । ऊहनोत्तरं एव विषयस्य विस्तृतं विवेचनं शक्यं भवति ।

– अध्ययन सामर्थ्यं परंपरागता अध्ययनपद्धतिः, विषयसामग्री चिकित्सानुभवः च एतेषां सर्वेषां परिणामः तस्य टीकाकारस्य ऊहनं भवति । कालः गुरुपरम्परा बुद्धिविभवं च एतान् अनुसृत्य टीकाकाराणां ऊहनस्य केचन विशेषाः स्वविषयाः सन्ति । तस्मिन् विषयवर्णने तेषां प्रतिभा प्रफुल्लिता सती तत्रभवतां चिकित्सानुभवः वर्णनात् प्रत्येति ।

उदा. अ) चक्रपाणिः चिकित्सातत्वसन्दर्भेण विशेषम् ऊहनं कृत्वा विषयस्य रचनां कुर्वन् दृश्यते ।

आ) गङ्गाधरः रॉयः सर्वत्र न्यायवैशेषिकाभ्यां सह तौलनिकं विवेचनं कृत्वा तस्मात् स विषयं चिकित्सायै युनक्ति ।

इ) योगीन्द्रनाथसेनस्य सिद्धान्तेषु ऊहनं सर्वत्र दृश्यते ।

१९) विचारप्रवाहेषु सद् अन्तरं ज्ञायते ।

– एकैकस्मिन् ज्ञानशाखायां तस्याः सिद्धान्तानां विभिन्नाः विचारप्रवाहाः विभिन्नाभ्यः परम्पराभ्यः प्रवाहिताः सन्ति । तेषां अन्तिमं ध्येयं स्वशास्त्रस्य उपबृंहणम् एव ।

– आयुर्वेदशास्त्रे अपि एतादृशाः नानाविधाः विचारप्रणाल्यः प्राचीनकालारभ्य प्रवाहिताः सन्ति ।

उदा. कायचिकित्साप्रधानप्रणाली । – आत्रेय परम्परा ।

शल्यचिकित्साप्रधानप्रणाली । – धन्वन्तरि सम्प्रदायः ।

कौमारभृत्यप्रधानप्रणाली । – काश्यपपरंपरा । इत्यादयः

– एतासां सर्वासां प्रणालीनां अन्तिमं ध्येयं आयुर्वेदस्य विभिन्नाङ्गानाम् उपबृंहणं तथा रुग्णाय स्वास्थ्यलाभ: इत्येव अस्ति ।

– एतादृशानां भिन्नविचारप्रणालीनां ज्ञानं टीकाकाराणां तौलनिके अध्ययनेन ज्ञायते ।

– एतेषु विचारप्रवाहेषु कालस्य अपि परिणाम: दृश्यन्ते ।

उदा.– अ) गङ्गाधर रॉयस्य काले पाश्चात्या शिक्षणप्रणाली अङ्कुरिता । एवम् आधुनिकाभि: ज्ञानशाखाभि: प्रभाविता: भारतीया: युवका: तां प्रति प्रारब्धा: । आकृष्यमाणा: अभवन् । एतादृशे काले गङ्गाधरेण प्राचीनस्य दर्शनशास्त्रस्य अभ्यासस्य परम्परा तथा तस्य आवश्यकता स्वटीकाया: पुन: प्रस्थापिता ।

आ) योगीन्द्रनाथसेन: गङ्गाधरस्य शिष्यस्य शिष्य: (प्रशिष्य:) तस्मात् अमुष्य लेखने विचारशैल्याम् च गङ्गाधरस्य प्रभाव: अनुभूयते ।

२०) तन्त्रयुक्तीनां अभ्यास: तथा तासाम् उपयोगस्य महत्वं ज्ञायते ।

– तन्त्रयुक्तय: ग्रन्थलेखनवाचनयो: साधनस्वरुपा: । तन्त्रयुक्तय: अभ्यस्य यदि ग्रन्थवाचनं कृतं चेत् तत्रस्थ: अभिप्रेतार्थ: त्वरितं ज्ञायते ।

– टीकाकारै: अपि टीकां लिखद्भि: अथवा मूलग्रन्थगतविषयस्य विवेचनं कुर्वद्भि: सर्वत्र तन्त्रयुक्तीनां आधार: गृहीत: । सम्प्रति तन्त्रयुक्तीनाम् अध्ययनं न्यूनीभूतम् । एतादृश्यां परिस्थितौ टीकानाम् अध्ययनेन तन्त्रयुक्तीनां महत्व स्पष्टतया ज्ञायते । तन्त्रयुक्तिभि: ग्रन्थलेखनस्य विशिष्टा शैली बोधते तेन ग्रन्थस्य नाम विषयस्य साकल्येन ज्ञानं भवति । उदा. भट्टार हरिश्चन्द्रेण टीकां लिखता आदौ तन्त्रयुक्तीनामेव वर्णनं कृतम् । पश्चात् असौ ग्रन्थविवरणं प्रारभते ।

– टीकाकारै: योजितानां तन्त्रयुक्तीनां भिन्नं प्रकरणं अस्मिन् अध्ययने समावेशितम् । तत्र अस्य विस्तृतं ऊहापोहं कुर्म: ।

२१) संस्कृतभाषाया: व्याकरणज्ञानस्य उपयोग: तथा एकैकस्य टीकाकारस्य तस्मिन् अभिप्राय: ज्ञायते ।

– आयुर्वेदस्य सर्वे मूलग्रन्था: संस्कृतभाषायां निबद्धा: सन्ति । तेषु टीका: अपि टीकाकारै: संस्कृतभाषायामेव विरचिता: ।

– टीकानां लेखनसमये तैः विभिन्नेषु स्थानेषु संस्कृतव्याकरणस्य प्रमाणानि दत्वा तत्रस्थान् नियमान् वर्णयित्वा तेषां महत्वं प्रस्थापितम् ।

– संस्कृतव्याकरणज्ञानात् विना ग्रन्थस्य वा टीकायाः वा वाचनं चिन्तनं च अशक्यम् । तस्मात् टीकाकारस्य अध्ययनं महत्वं भजते । उदा.–

अ) आहारविकाराणाम् इति करणे सौहित्ययोगात् षष्ठी । चक्रपाणिः च. वि. २/ ७

आ) मात्रावदिति प्रशंसायां मतुप् , तेन प्रशस्तमात्रमित्यर्थः । चक्रपाणिः च. वि. १/२५ (३)

इ) इति ग्रन्थेऽर्थे छः । गङ्गाधरः च. वि. ४ । ३

ई) गरीय इति नपुंसकनिर्देशः प्रथमतो वाताज्जलम् इत्यस्य नपुंसकजलशब्दस्यान्वयानुरोधात् पश्चाल्लिङ्गविपरिणामेनान्वेतव्यम् । गङ्गाधरः च. वि. ३ । ८

उ) भवति हि प्रधानं संबोध्य गणसम्पाद्य क्रियायां बहुवचनं यथा सेनापते युध्यध्वमिति ।

चक्रपाणिः – च. वि. ३ । ४

ऊ) एषु सर्वत्रैव तृतीयान्तातसिल । ज्योतिषचन्द्रसरस्वतिः च. वि. ८ । ९४

ए) य इति विधेयप्राधान्यात् पुल्लिंगम् । ज्योतिषचन्द्रसरस्वतिः च. वि. ८ ।

ऐ) वदन्तीति विदः विदेः क्विप् । योगीन्द्रनाथसेनः च. वि. ३ । ४१

ओ) एवं सर्वत्र बहुब्रीहिः । योगीन्द्रनाथसेनः च. वि. ४ । ६

२२) विविधाः न्यायाः सिद्धान्ताः प्रमाणानि च ज्ञायन्ते ।

– ग्रन्थलेखने ग्रन्थकाराः विभिन्नान् न्यायान् सिद्धान्तान् च अनुसृत्य तेषाम् आधारेण लिखति । तथैव स्वविवेचने तस्य अन्तर्भावं करोति ।

– तस्मात् विभिन्नानां न्यायानां सिद्धान्तानां च ज्ञानं । स्वयमेव टीकावाचनं उपयुज्यते ।

सिद्धान्तः – उदा.–

| | | |
|---|---|---|
| अ) सामान्यविशेष सिद्धान्तः | योगीन्द्रनाथसेनः | च. वि. ६।१० |
| आ) कार्यकरण सिद्धान्तः | योगीन्द्रनाथसेनः | च. वि. ७।१५ |
| कार्यकरण सिद्धान्तः | गङ्गाधरः | च. वि. ७।१२ |
| कार्यकरण सिद्धान्तः | ज्योतिषचन्द्रसरस्वतिः | च. वि. १।६ |

| | | |
|---|---|---|
| इ) प्राकरणिक पुनरुक्तिः | चक्रपाणिः | च. वि. ४।४ |
| ई) क्रमपरिणाम पक्षः | योगीन्द्रनाथसेनः | च. वि. ४।३ |
| | ज्योतिषचन्द्रसरस्वतिः | च. वि. ४।३ |
| उ) सत्कार्यवादः | चक्रपाणिः | च. वि. ८/४९ |

– तथैव विविधेषु सन्दर्भेषु परीक्षणार्थं प्रमाणाम् उपयोगः च कृतः ।

उदा. – च. वि. ४/४–५ – त्रिविधप्रमाणम्

च. वि. ३/३६ – दिव्यचक्षुः

च. वि. ८/१४९ – युक्तिः वितर्कः च

च. वि. १/७ – युक्तिः

च. वि. १/३३ – चतुर्विधप्रमाणानि ।

– विविधानां न्यायानाम् उल्लेखं कृत्वा तस्याधारेण वर्णविषयस्य विवेचनं इति तु टीकाकाराणां वैशिष्ट्यम् अस्ति ।

– चत्वारैः अपि टीकाकारैः विविधेषु सन्दर्भेषु नैकानां न्यायानाम् उल्लेखः कृतः ।

उदाहरणार्थम् – दीपतैलन्यायः – ज्योतिषचन्द्रसरस्वतिः च. वि. १/२५

श्रृंगग्राहिकन्यायः – चक्रपाणिः च. वि. १/१३

सूचीकटाहन्यायः – गङ्गाधरः च. वि. ८/८७

सन्तानन्यायः – चक्रपाणिः च. वि. ५/३

– सिद्धान्तः न्यायः प्रमाणं च इत्यादयः साधनस्वरुपेण उपयुज्यन् वर्ण्यविषयस्य गूढार्थः अभिप्रेतार्थः च सविस्तरं ज्ञापनीया इति टीकाकाराणां वैशिष्ट्यम् ।

२३) छन्दः वृत्तम् अलङ्कारः च एतेषाम् उल्लेखः ।

– बहुवंशेन टीकाः गद्ये वर्णिताः । तस्मात् पद्यस्य छन्दांसि तस्मिन् न योजितानि ।

– गद्यस्य चूर्णकं मुस्तकं च इति प्रकारेषु अधिकांशं वर्णनम् अस्ति ।

– गद्यस्थानाम् अक्षरगणनास्वरुपिणां छन्दसां टीकासु उल्लेखः अस्ति ।

– केवलं गद्यवर्णनम् अस्ति । तस्मात् वृत्तालङ्काराणां टीकायां उल्लेखः न सन्ति ।

२४) विविधेषु ग्रन्थकारेषु सन् समन्वयः

– वर्ण्यविषयस्य विवेचनं कुर्वन्तः टीकाकाराः तस्य विषयस्य अन्यशास्त्रगतां सन्दर्भान् यच्छन्ति ।

– द्वयोः शास्त्रयोः तथा ग्रन्थकारेषु विवेचनस्य समन्वयः साधयितव्यः इति प्रयतन्ते ।

– नैकेषु सन्दर्भेषु टीकाकारः इदृशं समन्वयं साधयितुं प्रयतन्ते ।

– अनेन माध्यमेन विविधेषु ग्रन्थकारेषु सत् दृश्यमानं वैधर्म्यं निराक्रियते ।

उदाहरणार्थम् –

अ) वयसः परीक्षायाः वर्णने चरकः सुश्रुतः च एतयोः विवेचनगतस्य वैधर्म्यस्य समन्वयः गङ्गाधरयोगीन्द्रनाथसेनाभ्यां कृतः । (सन्दर्भः – च. वि. ८)

आ) सुश्रुतचरकयोः अङ्गुलिप्रमाणतः परीक्षागतस्य वैधर्म्यस्य निराकरणं गङ्गाधरः करोति ।

इ) स्रोतसां संख्येयत्वम् असंख्येयत्वं च इति द्वयोः पक्षयोः सामंज्यस्यं ज्योतिषचन्द्रसरस्वतिः करोति । (च. वि. ५/५)

ई) वयसः परीक्षायां चरकभेलयोः समन्वयः ज्योतिषचन्द्रसरस्वतिना कृतः ।

२५) शास्त्रगुणदोषयोः विवेचनम् ।

– टीकासमये नैकेषु सन्दर्भेषु तस्य वर्ण्यविषयस्य अनुषंगेन शास्त्रदोषाणां वा गुणानां उल्लेखः टीकाकाराः कुर्वन्ति ।

– कस्मिन् अपि विषये दृश्यमानानां शास्त्रदोषाणां निराकरणं टीकाकाराणां विवेचनैः भवति ।

उदाहरणार्थम् –

अ)''तिस्रैषणीये प्रथममनुमानादिलक्षणान्युक्तानि पुनरिह तत्रोपदेशो नाम' इत्यादिना आप्तोपदेशादि लक्षणाभिधानं प्रकरणागतत्वात् क्रियते प्राकरणिको ह्यर्थोऽनुच्यमानो न्यूनो भवति ।''

(चक्रपाणि च. वि. ४/४)

अत्र 'पुनरुक्तिः' इति शास्त्रदोषः नास्ति एतद् चक्रपाणिना स्पष्टीकृता ।

आ)''अत्र एवंशब्दस्पर्शरुपरसगन्धमित्युपदेशं कृत्वा शब्दानन्तरं चक्षुग्राह्यं रुपं दर्शयित्र् शब्दादिपरीक्षायाः च क्रमनियमाभावं सूचयति ।. (चक्रपाणि च. वि. ४/७)

क्रमनियमस्य अभावदोषत्वं चक्रपाणिः स्पष्टीकरोति ।

२६) टीकाकारेषु अन्यशास्त्राणां प्रभाव: ज्ञायते ।

– प्राचीने काले दर्शनशास्त्रव्याकरणादिनाम् अन्यशास्त्राणां परिपूर्णम् अभ्यासं कृत्वा पश्चात् आयुर्वेदस्य अध्ययनम् इति पद्धति: आसीत् ।

– टीकाकाराणाम् अन्यशास्त्राभ्यास: तेषां टीकाभ्य: प्रत्येति ।

उदा. – गङ्गाधर: – न्यायवैशेषिक दर्शनम् जैमिने: पूर्वमीमांसा

– ज्योतिषचन्द्रसरस्वति: – व्याकरणं वैशेषिकदर्शनं च

– योगीन्द्रनाथसेन: – सर्वत्र अष्टांगसंग्रह: तथा सुश्रुतस्य सन्दर्भ: उल्लिखित: ।

– चक्रपाणि: – तर्कभाषा ।

२७) वैद्यानां नैतिकनिष्ठा: तथा च अधिकार: एतेषां उल्लेख: प्राप्यन्ते ।

– नैकेषु सन्दर्भेषु मूलग्रन्थकर्त्रा तथा टीकाकारै: वैद्यानां नैतिकनिष्ठा: वर्णिता ।

– वैद्य: किं कुर्यात् अथवा किं न कुर्यात् इति विवेचनं टीकाकारा: कुर्वन्ति ।

उदाहरणर्थम् – समवातपित्तश्लेष्माणमित्यादिना अस्ति तावदारोग्यं पुरुषेषु वैद्यव्यवहारसिद्धमिति दर्शयति । (चक्रपाणि च. वि. ६/१३)

– एवं टीकाकाराणां तौलनिक: अभ्यास: अतीव महत्वम् अर्हति ।

– कालौघेन टीकावाचनस्य महत्वं न्यूनीभूतम् । परंतु तस्य अनन्या वर्तते इति उपरोक्तेन विवेचनेन ज्ञायते ।

## Knowledge Gaps – ज्ञानविकल्पभेदं अन्तरम् ।

– सर्वेषु शास्त्रीयेषु अध्ययनेषु महाविषय: अस्ति ज्ञानविकल्पभेदं अन्तरम् । विशेषत: प्राचीनानां शास्त्रेतिहासादीनां अध्ययने अस्य घटकस्य विचार: अतीव आवश्यक: ।

ज्ञानविकल्पभेदं अन्तरम् नाम किम् ?– एकस्या: व्यक्ते: अन्यं व्यक्तिं अथवा एकस्मात् घटकान् (ग्रन्थ: ज्ञानं साधना) अन्यं घटकं (व्यक्ति: समाज:) यदा ज्ञानं संक्रमति तदा तस्मिन् संक्रमणे ज्ञानविकल्पभेदं अन्तरम् उत्पद्यते । उदाहरणार्थम् – कोऽपि आचार्य: कस्मै शिष्याय एकं विषयांशं पाठयति ।

तस्मिन् मूलग्रन्थस्य: वर्ण्य विषय: ।
↓
आचार्य: यावत् ज्ञातवान्
↓
तस्मात् कति अंशान् स: छात्रेभ्य पाठयितुं शक्तवान् ?
↓
तस्मात् कति अंशा: छात्रेण सात्मीकृता: ।
↓
सात्मीकृतेभ्य: अंशेभ्य: कति अंशं छात्र: ज्ञानवान् निश्चयवान् च अभवत् ।

– एवं प्रतिअवस्थायां ज्ञानविकल्पभेदं अन्तरम् उत्पन्ना: भवन्ति । शतकानुशतकानां प्रदीर्घां परम्परां प्राप्तवत: आयुर्वेदशास्त्रस्य अध्ययने तत्वनिश्चये च ज्ञानान्तरस्य अतीव महान् सहभाग: भवति । तथा एतासां ज्ञानविकल्पभेदं अन्तरानां निराकरणमपि महत्वपूर्णमेव ।

– अस्मिन् अध्ययने य: विषयांश: निर्वाचित: अध्ययनार्थं तस्य अग्रिमा: अवस्था: सन्ति ।

पुनर्वसु आत्रेय: (मूल: उपदेष्टा) – ख्रिस्ताब्दपूर्वं ३०००
↓
अग्निवेश महर्षि: (तन्त्रकर्ता) – ख्रिस्ताब्दपूर्वं ३०००
↓
महर्षि: चरक: (प्रतिसंस्कर्ता) – ख्रिस्ताब्दपूर्वं ३ त: ८ शतकम्
↓
दृढबल: (संपूरणम्) – ख्रिस्ताब्दस्य दशमं शतकम् १०
↓
चक्रपाणि: (टीका) – ख्रिस्ताब्दस्य एकादशंशतकम् ११
↓
गङ्गाधर: (टीका) – ख्रिस्ताब्दस्य अष्टदशंशतकम् १८
↓
योगेन्द्रनाथ: सेन: (टीका) – ख्रिस्ताब्दस्य नवदशंशतकम् १९
↓
ज्योतिषचन्द्र: सरस्वति: (टीका) – ख्रिस्ताब्दस्य विंशंशतकम् २०
↓
अध्ययन कर्ता – ख्रिस्ताब्दस्य एकविशंशतकम् २१

– अस्यां सर्वायां प्रदीर्घायां परम्परायां ज्ञानान्तरं प्रकर्षेण विचारः आवश्यकः ।

– पुनर्वसु आत्रेयस्य तथा अग्निवेशस्य कालः देशश्च, चरकाचार्यस्य कालः देशश्च दृढबलस्य कालः देशश्च टीकाकाराणां कालः देशश्च तथा अध्ययनकर्तुः कालः देशश्च अस्मिन् महत्तमं अन्तरमस्ति ।

**''भाषाविज्ञानसम्मतं कालकृतपरिवर्तनानुसारं प्रतिसहस्रवर्षं भाषायाः १/४ भागे परिवर्तनं भवति ।''**

– मूलः तन्त्रकर्ता

↓ २५००० – ३००० वर्षाणि

प्रतिसंस्कर्ता

↓ १००० वर्षाणि

संपूरण कर्ता

– चरकसंहितायाः निर्मिति अवस्थासु एवम् अन्तरं सदपि चरकसंहितायाः रचनायां विषयवर्णने च महदन्तरं न भासते ।

– दृढबलेन स्वयं लिखितं तेन एवं ज्ञातं यत् तत्रभवता १७ अध्यायानां नूतनतया पुनर्लेखनं कृत्वा संपूरणं कृतम् ।

– अन्यथा सर्वसंहितायाः मुकुटमणिरुपेण शोभमानः ग्रहणीचिकित्साअध्यायः अग्निवेशस्य अथवा चरकस्य लिखितः नास्ति प्रत्युत सः दृढबलस्य संपूरितः अध्यायः अस्ति अस्मिन् विश्वसितुं कठिनम् ।

– अतः तन्त्रकर्ता, प्रतिसंस्कर्ता च एतेषु ज्ञानविकल्पभेदं अन्तरम् न लभते । क्वचित् विशेषानां पदानां उपयोगः दृश्यते । उदाहरणम् खुड्डाकः ।

– किन्तु इदं प्रमाणतः नगण्यम् ।

– एव ज्ञानविकल्पभेदं अन्तरम् किमर्थं न दृश्यते अस्य विचारः आवश्यकः ।

– अस्य विपरीतं टीकाकारेषु नैकेषु स्थानेषु विभिन्नानां प्रकाराणां वैधर्म्यं दृश्यते ।

चरक: (प्रतिसंस्कर्ता)

↓ ११०० वर्षाणि (एकादश सहस्त्र)

चक्रपाणि:

↓ ८०० वर्षाणि

गङ्गाधर:

↓ १०० वर्षाणि

योगीन्द्रनाथ सेन:

↓ ५० वर्षाणि

ज्योतिषचन्द्र सरस्वति:

– एवं प्रतिसंस्कर्तात: अग्रिमटीकाकाराणां मध्ये कालत: अन्तरम् अस्ति ।

– आदौ तन्त्रकर्ता प्रतिसंस्कर्ता संपूरणकर्ता च एतेषां विवेचने तथा वर्णनपद्धत्यां ज्ञानविकल्पभेदं अन्तरम् न दृश्यते । तस्य कारणानाम् ऊहापोहं कुर्म: ।

१) <u>तन्त्रयुक्ति:</u> – ग्रन्थलेखनं ग्रन्थाभ्यासं च एतदर्थं आवश्यक्य: साधनस्वरुपिण्य: शास्त्रीयपद्धतय: प्राचीने काले विकसिता: आसन् । ता: तन्त्रयुक्ति नाम्ना ख्याता: ।

– तर्कभाषाया: तन्त्रयुक्ति: उत्पन्ना । अस्या तन्त्रयुक्त्या: अभ्यास: तस्मिन् काले सर्वे विद्वांस: कुर्वन्ति स्म । तस्याधारेण च ग्रन्थरचनां कुर्वन्ति स्म ।

– चरकसंहिताया: निर्माणे अपि अस्या: तन्त्रयुक्ते: अवलम्ब: अतीव समर्पकतया कृत: ।

– अस्या: तन्त्रयुक्ते: उपयोगेन एव तन्त्रकर्ता, प्रतिसंस्कर्ता संपूरणकर्ता च एतेषां वर्णने महत् वैधर्म्यं न दृश्यते ।

२) <u>ग्रन्थरचनाशैलि:</u> – प्रतिग्रन्थं तस्य शैलि: ग्रन्थस्य आत्मस्वरुपा वर्तते । यस्यां शैल्यां ग्रन्थरचना कृता तस्या: अभ्यासं कृत्वा पश्चात् अर्थनिष्पादनम् एव महत्वम् अर्हति ।

– चरकसंहिताया: रचनाशैलि: चम्पु ग्रन्थ पद्धत्या: अस्ति । य: ग्रन्थ: गद्यपद्यात्मकया पद्धत्या रचित: तं चम्पुग्रन्थ: इति वदन्ति ।

– ग्रन्थकर्ता प्रतिसंस्कर्ता संपूरणकर्ता च एतै: त्रीभि: एषा एव रचनाशैलि: अवलम्बिता ।

३) भाषाशैलि: –

–अस्मिन् गद्यपद्यात्मके चम्पुग्रन्थे गद्यरचना पद्यरचना च एतयो: विशेषा भाषाशैलि: अनुसृता अस्ति

–गद्यवर्णनं त्रिविधम् अस्ति ।

अ) चूर्णकम् – लघुलघुपदानाम् उपयोग: । सामासिकशब्दयुक्ता क्लिष्टा रचना न वर्तते । सुगमा तनुतनुका रचना अस्ति । उदाहरणार्थम् च. चि. ९/२२, च. चि. १३/३१

आ) वृत्तगन्धि: – वृत्तस्य कोऽपि भाग: अस्ति । उदा – च. सू. २९ । ६

इ) उत्कलिका – दीर्घदीर्घानि वाक्यानि सन्ति । समासयुक्तै: पदै: वाक्यं दीर्घम् भवति । 'कादम्बरी' इति बाणभट्टस्य ग्रन्थवत् रचना अस्ति । उदा.–च. चि. २/२/३, च. चि.१४/९,११

ई) आविद्धम् – समासरहिता सरला वाक्यरचना वर्तते ।

उदाहरणार्थम् – च. सू. २६/४३ (रसनां वर्णनम्), च.सू. २६/८४, च. सू. २७/३२५

– पद्यवर्णनम् अपि नानाविधै: छंदांसि, वृत्तानि, अलङ्कारा: वृत्तय: उपमा: च एताभि: सम्पन्नम् अस्ति । एते सर्वे विशेषा: प्रचुरमात्रायां ग्रथिता: दृश्यन्ते ।

४) वाक्यश: वाक्यार्थश: तथा अर्थावयवश: कृता रचना भवति ।

– इत्यादीभि: नैकै: कारणै: तन्त्रकर्ता प्रतिसंस्कर्ता संपूरणकर्ता च एतेषु ज्ञानविकल्पभेदं अन्तरम् न दृश्यते । एष: अन्यतम: भिन्न: अभ्यासविषय: अस्ति । अस्य अध्ययनस्य अधिकरणं टीकाकाराणाम् अभ्यास: इति अस्ति । तस्मात् उपरितने विषये सविस्तरं विवेचनं न कृतम् । आयुर्वेदस्य सैद्धान्तिके क्षेत्रे तथा साहित्यक्षेत्रे कार्यं कुर्वते संशोधकाय एष: अस्पृष्ट: विषय: अत: अत्र संशोधनाय अवसर: अस्ति ।

## टीकाकारेषु दृश्यमाना ज्ञानविकल्पभेदं अन्तरम्

चरकसंहितायां विभिन्ने काले विभिन्ने देशे च टीकाकारै: टीका लिखिता: । तत्र द्वाभ्यां कारणाभ्यां ज्ञानविकल्पभेदं अन्तरम् भवति ।

१) देशत: ज्ञानविकल्पभेदं अन्तरम्

२) कालत: ज्ञानविकल्पभेदं अन्तरम्

चरक संहितायां टीकानां देशकालत: विवरण: इत्थम् –

देशकालत: उत्पन्ना: ज्ञानविकल्पभेदम् अन्तरम्




– अत्र सर्वेषु टीकाकारेषु ज्ञानविकल्पभेदं अन्तरम् दृश्यते ।

देशत: ज्ञानविकल्पभेदं अन्तरम्

– टीकाकार: यस्मिन् देशे वसेत् स्म तत्रस्थं वातावरणम् आहारविहारपद्धति: आचारपद्धति: वनस्पतिद्रव्याणि प्राणिजद्रव्याणि च एतान् अनुसृत्य वैधर्म्यरुपिणी ज्ञानविकल्पभेदं अन्तरम् भवितुम् अर्हति ।

उदाहरणार्थम् – काश्मीरस्थ: जेज्जट: तथा वङ्गस्य चक्रपाणि: एतयो: वर्णने नैकेषु स्थानेषु पाठभेदा: वा वैधर्म्याणि दृश्यन्ते । तयो: देशभिन्नता इति तत्र महत्कारणम् ।

करीरधवनिम्बार्कबूकपुल्लासजाम्बवै: । जेज्जट: च. चि. ३० । ८२

करीरधवनिम्बार्कवेणूकोशाम्रजाम्बवै: । चक्रपाणि: च. चि. ३० । ८२

कालत: ज्ञानविकल्पभेदं अन्तरम्

– भाषाविज्ञानशास्त्रम् अनुसृत्य कालकृत परिवर्तनानुसारं एकसहस्त्रवर्षसु भाषाया: १/४ अंशे परिवर्तनं भवति ।

– कालक्रमेण विशेषत: शब्दार्थेषु वैधर्म्यं प्राप्यते ।

– टीकाकार: यस्मिन् काले जीवति तस्य अपि संस्कार: टीकाकारस्य साहित्ये भवति ।

– कालत: सैद्धान्तिकं द्रव्यात्मकं पदार्थात्मकं च एवं विविधै: प्रकारै: वैधर्म्यं उत्पत्तुं शक्यम् ।

– एतद् वैधर्म्यं ज्ञातुं कालिकः इतिहासः टीकाकाराणाम् इतिहासः च अभ्यासनीयः अवश्यम् ।

<u>अस्मिन् अध्ययनगतं वैधर्म्यस्य विवेचनम् ।</u>

– अस्य अध्ययनस्य अधिकरणम् एव अस्ति यत् टीकाकारेषु दृश्यमानस्य वैधर्म्यस्य अभ्यासः ।

– तथैव तेषां वैधर्म्याणाम् ऊहापोहं कृत्वा समन्वयं निष्पाद्य वैधर्म्यं निराकरणीयम् ।

पूर्वं दृष्टं यत् वैधर्म्यं द्विविधम् । – १) देशतः २) कालतः

– अस्मिन् अध्ययने अधोक्तानां चतुर्टीकाकाराणां टीकाः अभ्यासाय स्वीकृताः ।

| | |
|---|---|
| चक्रपाणि दत्तः | – आयुर्वेद दीपिका |
| कविराजः गङ्गाधर रॉयः | – जल्पकल्पतरुः |
| कविराजः योगीन्द्रनाथ सेनः | – चरकोपस्कारः |
| कविराजः ज्योतिषचन्द्र सरस्वतिः | – चरकप्रदीपिका |

– एते चत्वारः अपि टीकाकाराः वङ्गदेशीयाः सन्ति । तस्मात् देशतः वैधर्म्यस्य उत्पत्तिः इति विचारः निराकृतः । एकदेशवासित्वात् देशतः वैधर्म्यम् नैव उत्पद्यते ।

– एवं वैधर्म्यस्य अर्थं सम्भावितं वैधर्म्यं तथा तस्य विवेचनम् अव्याप्तं भवति ।

– अत्र केवलं कालतः वैधर्म्यं विचारार्थं क्रमयोगेन प्राप्तम् ।

| <u>टीकाकारः</u> | <u>कालः</u> |
|---|---|
| चक्रपाणिः | ख्रिस्ताब्दस्य एकादशं शतकम् । |
| गङ्गाधरः | ख्रिस्ताब्दं १७९९ तः १८८५ पर्यंतम् |
| योगीन्द्रनाथसेनः | ख्रिस्ताब्दं १८७१ तः १९१८ पर्यंतम् |
| ज्योतिषचन्द्रसरस्वतिः | ख्रिस्ताब्दस्य विंशं शतकम् |

– एतेषु चतुर्षु टीकाकारेषु केवलं चक्रपाणिः त्रयाणाम् अपेक्षया कालतः दूरं वर्तते ।

तथैव,

गङ्गाधरः

↓ हाराणचन्द्रचक्रवर्तिः → ↓ ज्योतिषचन्द्रसरस्वतिः

↓ द्वारकानाथसेनः → ↓ योगीन्द्रनाथसेनः

एवं ज्योतिषचन्द्रसरस्वतिः योगीन्द्रनाथसेनः च द्वौ अपि कविराजस्य गङ्गाधरस्य प्रशिष्यौ स्तः ।

– अत: एकया एव परंपरया तथा कालसामीप्यात् तयो: वैधर्म्यं न्यूनं दृश्यते ।

– तस्मात् उत्पद्यमाने वैधर्म्ये अधोक्तानां घटकानाम् ऊहापोहं कृत्वा वैधर्म्ये समन्वय: साधनीय: इति निर्णेतुं शक्यते ।

– संस्कृतभाषाया ज्ञानम् ।

– संस्कृतस्य व्याकरणम् ।

– तन्त्रयुक्ति: ।

– अर्थाश्रयादय: ।

– स्वतन्त्रप्रत्यय: ।

– परतन्त्रप्रत्यय: ।

– आधुनिका: वैज्ञानिका: सिद्धान्ता: । (यत्र आवश्यक: तत्रैव)

– इति वैधर्म्यविषयकं सविस्तरं 'विवरणं ' तेषाम् अधिकरणे कृतम् ।

– टीकाकारेषु उत्पद्यमानासु ज्ञानविकल्पभेदं अन्तरेषु समन्वयं साधयित्वा तासां निराकरणं शक्यम् । निश्चयेन निर्णयमपि कर्तुं शक्यते ।

अस्मिन् अधिकरणे तादृश: प्रयास: कृत: ।

## अध्ययन निष्कर्षः – Conclusion

१) चरकसंहितायाः विमानस्थानस्य अष्ट अध्यायेषु रचितानां चतस्त्रां टीकानां तौलनिकम् अध्ययनं पूर्णं कृतम् ।

२) चक्रपाणिकृता आयुर्वेददीपिका गङ्गाधररॉयकृता जल्पकल्पतरुः योगीन्द्रनाथसेनकृता चरकोपस्कारः ज्योतिषचन्द्रसरस्वतिकृता चरकप्रदीपिका एतासां चतस्त्रां टीकानां तौलनिकः अभ्यासः अत्र कृतः ।

३) एतस्मात् अध्ययनात् विवरणस्य प्रकारद्वयौ प्राप्तौ । तेषां तौलनिकम् अध्ययनम् एतादृशम् –

तौलनिकम् अध्ययनम्

- टीकाकारेषु साधर्म्यम् → अध्यवसायः (निश्चयः)
- टीकाकारेषु वैधर्म्यम् → तन्त्रयुक्त्यादीनां तन्त्रगुणानां साहाय्येन निश्चयः निर्णयः समन्वयः च कृतः → निष्कर्षः

४) विविधानां विषयाणाम् अनुषंगेण आकलय्य १९० वैधर्म्यस्थानानि अध्ययने प्राप्तानि ।

५) तस्मात् ८० द्रव्यनामसंज्ञाविषयकानि वैधम्यानि विषयस्य अधिकरणम् अनुसृत्य अत्र विवेचनार्थं न गृहीतानि ।

द्रव्यसंज्ञानिश्चयः इति अध्ययनस्य अधिकरणं नास्ति । तस्मात् एतेषां वैधर्म्याणां केवलं सूचिः अत्र वर्णिता ।

६) उपलक्षणमात्रं इति शैखरिकः द्रव्यस्थं वैधर्म्यं अत्र विवेचितम् ।

७) वैधर्म्याणां निराकरणार्थं तथा समन्वयार्थं तन्त्रयुक्तिः अर्थाश्रयः व्याख्या व्याकरणं कोशः च एतेषां साधनम् इति उपयोजितः ।

८) विमार्गगमनम् क्लोम च एतयो विवेचने आधुनिकस्य चिकित्साशास्त्रस्य विचारः अपि साधनसाहाय्यार्थं कृतः ।

९) विशेषतः चक्रपाणेः विमार्गगमनम् इति पदेषु 'मलस्य मूत्रमार्गगमनम्' इति विवेचनस्य प्रतिष्ठापनार्थं आधुनिकस्य चिकित्साशास्त्रगतानां संकल्पनानां आधारः गृहीतः ।

तन्त्रयुक्तीनां महत्वम्

१०) ग्रन्थाध्ययने तन्त्रयुक्तीनां महत्वं अस्मिन् अध्ययने प्रकर्षेण ज्ञातम् । एतत् महत्वं प्रस्थापितुं प्रयतितम् ।

११) तन्त्रयुक्तीनां साहाय्येन सर्वेषां स्वरुपाणां वैधर्म्याणां समन्वयं कर्तुम् शक्यम् इति अस्मात् अध्ययनात् प्रतीतम् ।

तौलनिकस्य अध्ययनपद्धत्या: महत्वम् ।

१२) एकस्मिन् विषये वा स्थाने वा अध्याये रचितानां भिन्नानां टीकानां तौलनिकेन अभ्यासेन तत्सूत्रस्थं अभिप्रेतार्थं सविस्तरं बोधित्वा गूढार्थ: अपि प्रकाश्यते ।

१३) तौलनिकेन अध्ययनेन देशत: कालत: च उत्पन्नानि वैधर्म्याणि प्रतियन्ति ।

१४) कस्यापि विषयस्य दृष्टिकोणत: विविधाभि: पद्धतिभि: अध्ययनं भवति ।

१५) तौलनिकेन अध्ययनेन टीकाकारै: स्वीकृता: विविधा: पाठभेदा: तथा तज्जन्यानि वैधर्म्याणि ज्ञायन्ते ।

टीका अध्ययन पद्धति:

१६) एकस्मिन् ग्रन्थे रचिता एका टीका समग्रा अध्ययनीया इति रूढा पद्धति: अस्ति एव ।

परं एकस्मिन् ग्रन्थे रचिता: उपलब्धा: विभिन्ना: टीका: तुलनया अध्यैयत तर्हि तद् अध्ययनम् अधिकं परिणामकरं फलदायकं गूढार्थप्रकाशकं च भवति ।

टीका अध्ययनस्य महत्वम्

१७) टीका: सूत्ररुपे ग्रन्थे भाष्यं कुर्वन्ति । टीकानाम् अध्ययनेन मूलसूत्रस्थ: अर्थ: प्रकाशित: भवति तेन प्रबोधनं च ।

१८) मूलानां संहिताग्रन्थानाम् अध्ययनेन सह उपलब्धानां टीकानाम् अध्ययनम् आवश्यकम् ।

टीकानां तथा टीकाकाराणां महत्वम्

१९) तौलनिकेन अध्ययनेन टीकाकाराणां विविधेषु विषयेषु अधिकारा: तथा वैशिष्ट्यानि प्रकट्यन्ते ।

उदा– गङ्गाधर रॉय: – न्यायवैशेषिक दर्शनशास्त्रे तथा आयुर्वेद: एतेषां तौलनिक: अभ्यास:

– सविस्तरं क्लिष्टवर्णनपद्धति: ।

– वर्गीकरणं कृत्वा खण्डनमण्डनस्वरुपात्मिका वर्णनपद्धति: ।

चक्रपाणि: – चिकित्साशास्त्रस्य अतीव मौलिकं वर्णनम् ।

– द्रव्यगुणविज्ञानं भैषज्यकल्पना च इति विषये प्रभुत्वम् ।

– अर्थगौरवम् अल्पपदेभ्य: महदर्थस्य प्रकटीकरणम् ।

योगीन्द्रनाथ सेन: – सिद्धान्तानां सविस्तरं ऊहनम् ।

– लघुभि: समासविरहितै पदै: वर्णनम् ।

– सूत्रस्थे प्रत्येकं पदे भाष्यम् ।

– चक्रपाणि: गङ्गाधर: च एतयो: समन्वयं कृत्वा विषयवर्णनम् ।

ज्योतिषचन्द्र सरस्वति: – शारीरभावानां विशेषं वर्णनम् ।

– विविधानां न्यायानाम् उल्लेखा: ।

– मौलिक्यां भाषायां संक्षेपेण वर्णनम् ।

२०) केषांचन विशिष्टानां विषयाणां वर्णनं टीकाकारा: विशेषेण कुर्वन्ति ।

उदा – गङ्गाधर:– प्रलयम् । वादमार्गपदम् । संसृष्ट रस कार्यम् । प्रमाणम्

चक्रपाणि: – दोषविवेचनम् । कृमिचिकित्सा । स्त्रोतस् । त्रिविधा: ज्ञानोपाया: । सन्निपात: ।

योगीन्द्रनाथसेन: – आहारविधिविधानम् । दशविधपरीक्षा: । सम्भाषा

ज्योतिषचन्द्रसरस्वति: – स्त्रोतस् । क्लोमादय: शारीरभावा: । सहज कृमि: ।

२१) अनेन अध्ययनेन अधोल्लिखिते विषये सविस्तरं ज्ञानं प्राप्तम् ।

– विमार्गगमनस्य १४ विविधा: अवस्था: ।

– क्लोमनिश्चितिकरणम् ।

– परिग्रहस्य चतस्त्र: अवस्था: ।

– व्यवसायसंकल्पनाया: विस्तार: ।

– धृति अलौल्यं च एतयो: सम्प्राप्ति: ।

– आमप्रदोषजा चिकित्सा ।

– अनुबन्ध्यानुबन्धविचार: ।

– असंसृष्टरसकार्यम् ।

– धातुवैगुण्यम् ।

– कालगर्भाशयप्रकृति: ।

– जितहस्तता लक्षणम् । इत्यादय:

२२) काश्चन परिभाषा: टीकाकाराणाम् अनुषंगेन परामर्शिता: ।

उदा– गुणान्तराधानम् जनपदम् स्त्रोतस् अमधुरम् यापनम् विधमनम् अभिष्यंद: गुप्ति: आत्मा उपाधि: महास्त्रोत: क्लोम प्राणवह: वैगुण्यम् प्रकोप: अतिमात्रम् संकीर्णभोजनम् तन्त्रक: दक्ष: क्षोभ: भक्ति: परिधि: उपसृत: प्रकृतिज्ञ: सक्त: प्रतिबोधनम् इत्यादय:

२३) वैधर्म्याणि संख्यात्मकं विवरणम्

| | | |
|---|---|---|
| पाठभेदजन्यानि वैधर्म्याणि | – | ४० |
| विषयविवरणे वैधर्म्याणि | – | ३७ |
| समन्वयं निराकरणं च कृतानि वैधर्म्याणि | – | १९ |
| (अभिप्रेतार्थ वैधर्म्यं नास्ति) | | |
| सर्वपाठयोग्यानि वैधर्म्याणि | – | ०४ |
| सर्वेषां टीकाकाराणां विभिन्नविचारयोग्यानि | – | १३ |
| एक: पाठभेद: अयोग्य: /अव्याप्त: – | – | १० |
| एकं विचारवैधर्म्यम् अयोग्यं /अव्याप्तम् | – | ०९ |
| द्रव्यनामसंज्ञासु पाठभेदा: | – | ३३ |
| द्रव्यनामसंज्ञाविषये टीकाकारेषु वैधर्म्यम् | – | ८० |
| चरकविमानस्थाने प्राप्तानि आकलय्य वैधर्म्याणि | – | १८८ |
| वर्ण्यविषय: पाठभेद: च | – | ७७ |

द्रव्यनामसंज्ञा पाठभेदाः – ३३

द्रव्यनामसंज्ञा वैधर्म्याणि – ८०

२४) केचन विशेषाः उल्लेख्याः निष्कर्षाः

– वादमार्गपदेषु वैधर्म्यं न दृष्टम् ।

– देशतः वैधर्म्यं नास्ति । यतः चत्वारः अपि टीकाकाराः वंगदेशीयः ।

– कालतः वैधर्म्ये भाषाशैली पदयोजना च एतयोः विशेष दृश्यते ।

– टीकाकाराः चिकित्सकाः आसन् इत्यस्य अनेकाः सन्दर्भाः प्राप्ताः । चिकित्साशास्त्रस्य गहनाभ्यासेन सह संस्कृतस्य तथा दर्शनशास्त्रादीनां अन्यशास्त्राणां अभ्यासेन ज्ञानसंपन्नाः आसन् ।

– टीकाकाराणाम् ऊहनसामर्थ्यं प्रकर्षेण प्रतीयते ।

२५) पाठभेदः तज्जन्य निष्कर्षः च ।

पाठभेदस्य कारणं किं इति तस्य निष्कर्षः परिवर्तन्ते ।

अ) यदि हस्तलिखितैः प्रमादैः पाठभेदः उत्पन्नः स्यात् तर्हि कोशः तन्त्रयुक्तिः च एताभ्याम् आधारेण तस्य निराकरणं समन्वयः च कर्तुं शक्यते ।

आ) परं, विशेषः पदशः पाठभेदः अस्ति चेत् न प्रमादात् उत्पन्नः उत भिन्नं विचारं प्रस्थापितुं पाठभेदः उत्पद्यते ।

उदा. धातुभिः विगुणश्चपि स्त्रोतसां स प्रदूषकः । चक्रपाणि योगीन्द्रनाथसेनः

ज्योतिषचन्द्रसरस्वतिः

ऋतुभिः विगुणश्चापि स्त्रोतसां स प्रदूषकः । गङ्गाधरः

– अस्मिन् उदाहरणे पदशः अतीव महत् पाठभेदः अस्ति । तदनुसारं एव गङ्गाधरेण अस्मिन् भिन्ने पाठे व्याख्या अपि कृता ।

– एतादृशे प्रसङ्गे संहिता अस्मान् नूतनं रुपं दर्शयति ।

– अन्येषां परम्पराणां कश्चन् प्रभावः एतेषु टीकाकारेषु आसीत् वा ? चरकसंहितायाः पाठे अपि विविधाः परम्पराः आसन् वा ? इत्यादयः प्रश्नः अत्र उपस्थियन्ते ।

– आयुर्वेदस्य साहित्यिकसंशोधनार्थं एतद् क्षेत्रं अस्ति । अत्र अधिकं संशोधनम् आवश्यकम् ।

२६) **चतुर्भिः टीकाकारैः लिखितेषु टीकासु विभिन्नेषु वैधर्म्येषु परिशीलनोत्तरं अग्रिमाः निष्कर्षाः प्राप्ताः ।**

१) पाठभेदानां निराकरणम्

केषुचित् सन्दर्भेषु उहापोहोत्तरं यः निर्णयं प्राप्तः यत् एकः पाठः योग्यतरः ।

अ) च.वि.७/८ अत्र ''पुरीषसंश्रयाणाम्'' पाठापेक्षया ''पुरुषसंश्रयाणाम्'' एषः पाठः योग्यतरः अस्ति ।

आ) च.वि.६/११ ''अनुबन्धलक्षणसमन्विताः'' पाठः योग्यतरः ।

इ) च.वि.८/१५२ ''अध्येयाध्यापन पाठः योग्यः ।

ई) च.वि.२/१३ स्वेदनम्'' पाठः पूर्णरुपेण योग्यतरः ।

उ) च.वि.३/७ उपक्षीणजलाशयम्'' इति गंगाधरस्य पाठः योग्यतरः ।

ऊ) च.वि. ८/७ कल्यः कृतक्षणः इति पाठः योग्यतरः ।

ए) च.वि.८/१०९ स्त्रीप्रियाः प्रियोपभोगाः इति पाठः योग्यः ।

ऐ) च.वि.२/१३ विमुक्तामप्रदोषः इति पाठः योग्यः ।

उत केषुचित् सन्दर्भेषु विवेचनोत्तरं यः निष्कर्षः प्राप्तः यत् सर्वेऽपि पाठाः अधिकरणानुसारं युक्तियुक्ताः भान्ति ।

अ) च.वि. ७/३ अधमत्वम् अल्पत्वम् यौ उभौ पाठौ योग्यौ ।

आ) च.वि. ८/११० कल्याणाभिनिवेशिनः कल्पनाभिनिवेशिनः च

इ) च.वि.८/८९ प्रतिबोधनम् प्रबोधनम् च ।

ई) च.वि.८/४ उपस्कृतविद्यम् अनुपस्कृतविद्यम् च ।

उ) च.वि.८/१५ पिण्डेन पण्डेन च ।

ऊ) च.वि.५/२३ धातुभिः ऋतुभिः च ।

ए) च.वि.४/८ उपधिः उपाधिः च ।

ऐ) च.वि.२/१८ सर्वाश्रयम् सर्वाशयम् च ।

२) सर्वे विचारा: युक्तियुक्ता: ।

केषुचित् टीकाकारै: पाठभेदं स्वीकृत्य वर्णिता: सर्वे विचारा: योग्या: सन्ति इति निष्पन्ना: ।

अ) च.वि.७/१३ – दीर्घा: ऊर्णांशुसंकाशा: तथा दीर्घोर्णांशुसंकाशा: इति उभयपाठयो: य: निष्कर्ष: प्राप्त: यत् एतत् द्वयानां कृमिणाम् बोधकम् अस्ति । तेन उभौ पाठौ योग्यौ तथा स्वीकरणीयौ ।

आ) च. वि. ७/१२ – श्लेष्मजकृमिणां नामसंज्ञावर्णने हृदयाद: तथा हृदयचरा: इति द्वौ पाठौ प्राप्तौ । उभौ अपि योग्यौ ।

इ) च. वि. ८/९५ – अस्मिन् सूत्रस्य टीकायाम् कालगर्भाशयप्रकृति इति पदस्य षड्विध: अर्था: प्राप्ता: । सर्वेऽपि विचारा: योग्या: ।

ई) च.वि.५/२३ – विमार्गगमनम् इति पदस्य चतुर्दशा: अर्था: प्राप्ता: ।

उ) च.वि.४/८ – उपधि तथा उपाधि: इति द्वयानाम् पाठानाम् सर्वे अर्था: योग्या: ।

३) विशिष्टानां वर्ण्यविषयाणां ऊहापोह: कृतमस्ति ।

| | |
|---|---|
| च.वि.६/११ अनुबन्ध्यानुबन्धविचार: | च.वि.२/१३ आमप्रदोष चिकित्सासिद्धान्त: |
| च.वि.८/९३ भक्तिसंकल्पना | च.वि.५/२३ वैगुण्यम् |
| च.वि.८/७१ विक्रियमाण | च.वि.५/७ प्रकोप: |
| च.वि.८/९५ कालगर्भाशयप्रकृति: | च.वि.५/२४ विमार्गगमनम् |
| च.वि. ८/९८ वातलप्रकृते: स्वरविशेषा: | च.वि.५/८ क्लोम: |
| च.वि.८/१०९ शुक्रसारलक्षणा | च.वि. ५/७ प्राणवहस्रोतस |
| च.वि.८/१५ संभाषा | च.वि.५/२३ दोषवहस्रोतसा: |
| च.वि.५ स्रोत: संकल्पना | च.वि.४/४ अवितर्क: |
| च.वि.३/२४ परिग्रह: | च.वि.४/८ धृति: |
| च.वि.४/८ अविभ्रम: | च.वि.४/८ व्यवसाय |
| च.वि. ५/९ स्थानस्था मार्गगा: च शरीरधातव: | |

५) स्वशास्त्रसंज्ञा: चिन्तयित्वा निष्कर्षा: प्राप्ता: ।

| | |
|---|---|
| सन्निपात: च.वि.६/११ | उपक्रमयुक्ति: च.वि.७/७ |
| संसर्ग: च.वि.६/११ | क्लोम: च.वि.५/८ |
| अनुबन्ध्यानुबन्ध: च.वि.६/११ | अतिमात्रम् च.वि.५/१२ |
| अध्येय: च.वि.८/१५२ | प्रकोप: च.वि.५/७ |
| व्यापत्ति: च.वि.८/८९ | विमार्गगमनम् च.वि.५/२४ |
| भक्ति: च.वि.८/९३ | स्थानस्थ च.वि.५/९ |
| कल्य: च.वि.८/७ | वितर्क: च.वि.४/४ |
| दक्ष: च.वि.८/४ | व्यवसाय: च.वि.४/८ |
| प्रबोधनम् च.वि.८/८९ | आत्मा च.वि.४/८ |
| क्षोभ: च.वि.८/९६ | गुप्ति: च.वि.४/८ |
| सन्न च.वि.८/९८ | अभिष्यन्दि: च.वि.३/७ |
| जर्जर: च.वि.८/९८ | जलेशयम् च.वि.३/७ |
| विक्रिय च.वि.८/७१ | जलाशयम् च.वि.३/७ |
| सक्त: च.वि.८/९८ | आशय: च.वि.२/१८ |
| परिधि: च.वि.८/९ | आश्रय: च.वि.२/१८ |
| शिखरदशन: च.वि.८/१०९ | विधमनम् च.वि.२/७ |
| ऱ्हास: च.वि.२/७ | तन्त्रक: च.वि.८/११९ |

६) एकस्य विषयस्य विविधावस्थानाम् ज्ञानम् प्राप्तम् । तेन तेषां पदानां विभिन्नानां दृष्टिकोणम् ज्ञात्वा तेषां व्याप्ति: ज्ञायते ।

अ) जितहस्तम् – च.वि.८/४

आ) विक्रियमाणा: – च.वि.८/७१

इ) धृतिम् अलौल्येन – च.वि.४/८

ई) व्यवसाय: – च.वि.४/८

उ) गुप्ति: – च.वि.३/१५

ऊ) परिग्रह: – च.वि.३/२४

७) केषुचित् परिभाषाणां अवस्था: निश्चिता: सन्ति ।

अ) अस्थानस्था: – च.वि.५/९

आ) विमार्गगा: – च.वि.५/२३

इ) स्थान – च.वि.५/९

ई) वितर्क: – च.वि.४/४

उ) धृति: – च.वि.४/८

ऊ) परिग्रह: – च.वि.३/२४

ए) अलौल्यम् – च.वि.४/८

ऐ) विमुक्त: – च.वि.२/१३

ओ) कालगर्भाशयप्रकृति: – च.वि.८/९५

८) विशेषविचाराणां ज्ञानम् प्राप्ता: ।

अ) च.वि.७/१७ – दोषबलानुसारेण त्रिवारम् उत रुग्णबलानुसारेण त्रिरात्रम् आस्थापयेत् इति ज्योतिषचन्द्रसरस्वते: विशेष: चिन्तनम् प्राप्त: ।

आ) च.वि.७/१६ – कृमिकोष्ठे शोधनात् पूर्वं त्रय: दिने स्नेहनं तदनन्तरं त्रय: दिने स्वेदनं दद्यात् तत: एके दिने विश्रान्त: शोधनम् उपाचरेत् ।

इ) च.वि.८/४ – गंगाधरस्य उपस्कृतविद्यम् इति पदे विशेषा टीका ।

ई) च.वि.५/८ – क्लोमस्य विवरणम् ।

उ) च.वि.५/२३ – गंगाधरस्य ऋतुभि: विगुण: इति पाठ: तदुपरि टीका च ।

ऊ) च.वि.५/७ – ज्योतिषचन्द्रसरस्वतेः महास्रोतः पदस्य विशेषः वर्णनम् ।

ए) च.वि.५/२४ – विमार्गगमनम् पदे चतुर्विधानां टीकाकाराणां विवेचनम् ।

९) टीकाकाराणां वर्णनस्य सहाय्येन क्लोम इति शारीरभावस्य निश्चितीकरणम् प्रमाणम् परिमाणम् कार्यं च स्पष्टीकरोत् ।

१०) विमार्गगमनस्य चतुर्दशाः अर्थाः प्राप्ताः तेषां ऊहापोहः कृतः ।

११) महास्रोतः इति शारीरभावस्य वर्णनं कृतम् ।

१२) जितहस्तः इति पदस्य सन्दर्भः केवलं चरकसंहितायां प्राप्तः ।

१३) विमार्गगमनपदस्य चक्रपाणेः टीकायाम् आक्षेपस्य निराकरणं कृतम् । चक्रपाणेः टीका चिकित्सानिदानसिद्धान्तदृष्ट्या समर्पकः सन्ति इति निष्पन्नः ।

१४) गंगाधरयोगीन्द्रनाथसेनज्योतिषचन्द्रसरस्वतिस्वीकृतः पाठः उपाधिः अन्य संहितायां तथा चरकसंहितायां अन्यसन्दर्भे न प्राप्तः । उत चक्रपाणिस्वीकृतः उपधिः पाठः अन्यत्र प्राप्तः ।

## summary

## सारतरोच्चय:

चरकसंहिताया: विमानस्थानं इत्यस्मिन् चक्रपाणिकृता आयुर्वेददीपिका, गङ्गाधररायेण कृता जल्पकल्पतरू:, योगीन्द्रनाथसेनकृता चरकोपस्कार: तथा ज्योतिषचन्द्रसरस्वतिकृता चरकप्रदीपिका इति चतस्त्राणां टीकानां तौलनीकम् अध्ययनम् पूर्णं कृतम् ।

अस्मात् अध्ययनात् प्राप्तानां आकलय्य ७७ वैधर्म्याणां समन्वयस्य प्रयत्न: कृत: । द्रव्यनामसंज्ञाविषयक: ३३ पाठभेद: तथा ८० (अशीति) वैधर्म्याणि केवलं उल्लिखितानि यत: द्रव्यसंज्ञानिश्चयम् इति अध्ययनस्य अधिकरणं नास्ति ।

अस्मात् अध्ययनात् टीकाकाराणां तौलनिकस्य अध्ययनस्य एका पद्धति: प्रस्थापिता । वैधर्म्याणां समन्वयेन विमार्गगमनं सन्निपात: आमप्रदोषजा चिकित्सा कृमिचिकित्सा स्त्रोतसां शारीरभावा: धातुवैगुण्यं क्लोम कालगर्भाशयप्रकृति: अव्यापत्ति: एतादृशानां संकल्पनानां सविस्तरं ज्ञानं प्राप्तम् । तथैव परिग्रह: व्यवसाय: आत्मा विधमनं धृति: महास्त्रोत: प्रकोप: शैखरिक: क्षोभ: दक्ष: भक्ति: उपस्कृतम् इदृश: परिभाषा: विमर्शिता: ।

टीकाकारै: वर्णिता: विविधा: परिभाषा: तन्त्रयुक्तिनां व्याकरणस्य च सन्दर्भा: द्रव्यनामसंज्ञावर्णनं इत्यादीनि परिशिष्टानि संकलितानि ।

तौलनिकस्य अध्ययनस्य महत्त्वं तथा टीकाकाराणां महत्त्वम् अनेन अध्ययनेन प्रकाशितम् ।

मूलसंहिताग्रन्थानां टीकाकारै: सह सर्वांशेन अध्ययनम् चिकित्सकोत्तमं भवितुम् अतीव आवश्यकम् ।

एतदेव अस्य अध्ययनस्य सारम् अस्ति ।

एकस्मिन् ग्रन्थे रचितानां भिन्नानां टीकानां तौलनिक: अभ्यास: कृत: चेत् तेषां सूत्राणां अभिप्रेतार्थ: गूढार्थ: च विस्तारेण ज्ञायते ।

इदृशेन अध्ययनेन प्रेरित: वैद्योत्तम: समाजहिताय महत्त्वपूर्णं स्थानं अर्हति ।

# परिशिष्टानि

## परिभाषा

टीकाकार: विविध: परिभाषा: वर्णयन्ति । ताभ्यां देशत: कालत: च परिवर्तनानां प्रभाव: अनुभूयते ।

एतादृशानां परिभाषाणां सूचि: अत्र दीयते ।

प्रथमोऽध्याय:

| पद | व्याख्या | टीका | अ. | सूत्र |
|---|---|---|---|---|
| इष्ट | इष्टे स्वमनोऽनुकूले । | गंगाधर राय | १ | २४ |
| इष्ट | इष्टे अभिमते । | योगेन्द्रनाथ सेन | १ | २५ |
| ऊषरा | ऊषरा इति लवणप्रधाना: । | चक्रपाणि दत्त | १ | १८ |
| ऊष्माणम् | ऊष्माणं वह्निम् । | चक्रपाणि दत्त | १ | २५ |
| उदीरयति | उदीरयति वर्धयति । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| उदीरयति | उदीरयति संधुक्षयति । | योगेन्द्रनाथ सेन | १ | २५ |
| उदर्कम् | उदर्कं उत्तरकालीनं फलम् । | चक्रपाणि दत्त | १ | २३ |
| उपदिष्ट: | उपदिष्ट: संक्षेपेण कथित: । | चक्रपाणि दत्त | १ | १३ |
| उपपादयेत् | उपपादयेत् अभ्यसेत् । | ज्योतिषचन्द्र सरस्वति | १ | २० |
| उपसृजत् | उपसृजत् मेलयत् । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| उपतापयन्ति | उपतापयन्ति क्लेशयन्ति । | योगेन्द्रनाथ सेन | १ | ५ |
| उपयोक्ता | उपयोक्ता भोक्ता । | ज्योतिषचन्द्र सरस्वति | १ | २२ |
| उपयोक्ता | उपयोक्ता भोक्ता । | योगेन्द्रनाथ सेन | १ | २२ |
| उपयोगनियम: | एवमाहारोपयोग: कर्तव्य एवं न कर्तव्य इत्युपयोगनियम: । | चक्रपाणि दत्त | १ | २२ |
| उपयोगसंस्था | उपयोगसंस्था उपयोगव्यवस्था । | योगेन्द्रनाथ सेन | १ | २१ |
| उत्स्नेहनम् | उत्स्नेहनम् उन्मार्गगमनम् । | चक्रपाणि दत्त | १ | २५ |
| उत्स्नेहनम् | उत्स्नेहनम् उन्मार्गगमनम् । | योगेन्द्रनाथ सेन | १ | २५ |
| आहारविधि विशेषायतनानि | आहारप्रकारस्य हितत्वमहितत्वं च प्रकृत्यादिहेतुकमित्यर्थ: । | चक्रपाणि दत्त | १ | २१ |
| आहारविधि विधानम् | आहारविधिविधानम् आहारक्रमस्य विनियोगप्रणाली । | ज्योतिषचन्द्र सरस्वति | १ | २४ |
| आहारजातम् | आहारजातम् आहारसमूह: । | ज्योतिषचन्द्र सरस्वति | १ | २५ |

| | | | | |
|---|---|---|---|---|
| आन्ध्यम् | आन्ध्यं अक्ष्युपघात: । | योगेन्द्रनाथ सेन | १ | १७ |
| औदर्यमग्निम् | औदर्यमग्निं पाचकाग्निम् । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| ओक: | ओकात् इति अभ्यासात् । | चक्रपाणि दत्त | १ | २० |
| ओक: | ओक: अभ्यास: । | योगेन्द्रनाथ सेन | १ | २२ |
| ओकसात्म्यम् | ओकसात्म्यम् अभ्याससात्म्यम् । | चक्रपाणि दत्त | १ | २२ |
| ओकसात्म्यम् | ओकसात्म्यं यस्य यदुचिततया सहात्मना युज्यते तदोकसात्म्यम् । | गंगाधर राय | १ | २२ |
| ओषध: | ओषध्य: फलपाकान्ता: । | योगेन्द्रनाथ सेन | १ | १८ |
| आपातभद्रा: | आपातभद्रा: सद्योमंगलप्रद: | ज्योतिषचन्द्र सरस्वति | १ | १६ |
| आपातभद्रा: | आपाते तत्काले भद्रा: शुभा: । | योगेन्द्रनाथ सेन | १ | १६ |
| आधीयन्ते | आधीयन्ते उत्पद्यन्ते । | योगेन्द्रनाथ सेन | १ | २२ |
| आवस्थिक: | आवस्थिक इति रोगित्वबाल्याद्यवस्थाविशेषत इत्यर्थ: । | चक्रपाणि दत्त | १ | २२ |
| आयतनम् | आयतनम् हेतु: । | चक्रपाणि दत्त | १ | २१ |
| अभ्यस्यमाना: | अभ्यस्यमाना: इति न सकृदुपयुज्यमाना: | चक्रपाणि दत्त | १ | ७ |
| अभिनिविश्य | अभिनिविश्य विविच्य । | गंगाधर राय | १ | ३ |
| अचिन्त्यकर्म | स खलु भावानामुत्पत्तिकाले तद्भावारम्भकद्रव्यसंयोगे तद्द्रव्यनिष्ठकर्मभिर्यद्विजातीयं कर्मारभ्यते तदचिन्त्यं कर्म । | गंगाधर राय | १ | ६ |
| अधिकम् | अधिकमिति क्रियाविशेषणं तेन सततमित्यर्थो न त्वधिकपरिमितमित्यर्थ: | गंगाधर राय | १ | १५ |
| अविरुद्धगुण | यस्यैकस्य द्रव्यस्य यै: गुणै: यदपरद्रव्यस्य ये गुणा न विरुध्यन्ते ते अविरुद्धगुणा इति । | गंगाधर राय | १ | १४ |
| अमानज्ञ: | अमानज्ञो मानानभिज्ञो । | गंगाधर राय | १ | ३ |
| अमधुरम् | अमधुरमिति रौक्ष्यलाघवावृष्यत्वादिना मधुरविपरीतं कटुरसमित्यर्थ: । | चक्रपाणि दत्त | १ | १३ |
| अमधुरम् | अमधुरमिति मधुरविपरीतं तिक्तं विदग्धमम्लम् । | गंगाधर राय | १ | १४ |
| अमधुरम् | अमधुरं मधुरविपरीतं कटुकं अम्लम् | योगेन्द्रनाथ सेन | १ | १४ |
| अनुप्रविश्य | अनुप्रविश्य इति बुद्ध्वा । | चक्रपाणि दत्त | १ | ३ |
| अनुरुध्येत | अनुरुध्यते सेवेत । | ज्योतिषचन्द्र सरस्वति | १ | २० |
| अप्रतिष्ठानम् | अप्रतिष्ठानं हृदयस्थत्वेन कोष्ठाप्रवेश: । | चक्रपाणि दत्त | १ | २५ |

| | | | | |
|---|---|---|---|---|
| अपगमनम् | अपगमनं परिहार: । | ज्योतिषचन्द्र सरस्वति | १ | १९ |
| अपरिणतम् | अपरिणतमिति असम्यग्जातम् । | चक्रपाणि दत्त | १ | २५ |
| अर्थ: | अर्थ: प्रयोजनम् । | चक्रपाणि दत्त | १ | १३ |
| अर्थ: | अर्थ अभिधेय: | चक्रपाणि दत्त | १ | २० |
| अर्थ: | अर्थ: प्रयोजनम् । | योगेन्द्रनाथ सेन | १ | २७ |
| अध्यवसातुम् | अध्यवसातुं अवधारयितुम् । | योगेन्द्रनाथ सेन | १ | १० |
| असुखोदर्कम् | असुखोदर्कम् औत्तरकालिकं फलमसुखं दु:खं यस्य तत् । | गंगाधर राय | १ | २३ |
| असुखोदर्कम् | असुखोदर्कम् अहितभाविफलम् । | ज्योतिषचन्द्र सरस्वति | १ | २३ |
| असुखम् | असुखं दु:खरुपम् । | चक्रपाणि दत्त | १ | २३ |
| अत्यूषरा: | अत्यूषरा: लवणबहुला: । | ज्योतिषचन्द्र सरस्वति | १ | १८ |
| अवजीयते | अवजीयते पराभूयते । | योगेन्द्रनाथ सेन | १ | १४ |
| अवसादनम् | अवसादनम् अवसादकरत्वम् । | योगेन्द्रनाथ सेन | १ | २५ |
| अवसदनम् | अवसदनं अवसाद: । | चक्रपाणि दत्त | १ | २५ |
| अवसदनम् | अवसदनं अव मार्गमतिक्रम्य सदनं गमनम् | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| अक्ष्युपघात: | अक्ष्युपघात: आन्ध्यम् । | गंगाधर राय | १ | १७ |
| बाल्हिका | बाल्हिका बाल्हिकदेशवासिनो जनपदा: । | गंगाधर राय | १ | १८ |
| भाजनम् | भाजनं पात्रम् । | योगेन्द्रनाथ सेन | १ | २२ |
| बलम् | बलमिह व्यायामशक्ति: । | योगेन्द्रनाथ सेन | १ | ३ |
| द्रव्यप्रभावम् | द्रव्यप्रभावमिति यद् द्रव्यं यत् कर्म कर्तुं यथा प्रभवति तत् कर्मकरत्वेन तस्य प्रभुत्वं प्रभावस्तम् । | गंगाधर राय | १ | १३ |
| दोष: | दोषा: वातादय: । | योगेन्द्रनाथ सेन | १ | ३ |
| देश: | देश: भूमि: आतुरश्च । | योगेन्द्रनाथ सेन | १ | ३ |
| देश: | देश: स्थानम् । | योगेन्द्रनाथ सेन | १ | २२ |
| श्रेय: | श्रेय: कल्याणकर: । | ज्योतिषचन्द्र सरस्वति | १ | १९ |
| ग्राम: | विप्राश्च विप्रप्रभृत्याश्च यत्र चैव वसन्ति हि । स तु ग्राम इति प्रोक्त: शूद्राणां वास। | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| गुदमनुपर्येति | गुदमनुपर्येति परिणतं सदनुरुपतया नि:सरतीत्यर्थ: । | चक्रपाणि दत्त | १ | २५ |
| गुण: | गुण: भूत: । | योगेन्द्रनाथ सेन | १ | ६ |
| गुणाधानम् | गुणाधानमिति ये गुणा न स्वाभाविकास्तेषां योग आधानमित्युरकालं गुणयोग: करणम् । | गंगाधर राय | १ | २२ |

| | | | | |
|---|---|---|---|---|
| गुर्वादिगुणयोग: | समुदायत्वेऽपूर्वे ये गुर्वादयोऽसाधारणा गुणा आनुलोमिकादीनि च यानि कर्माणि युज्यन्ते यत् स गुर्वादिगुणयोग इति । | गंगाधर राय | १ | २२ |
| ग्लानि: | ग्लानि: मांसापचयो हर्षक्षयो वा । | चक्रपाणि दत्त | १ | १८ |
| ग्लास्नव: | ग्लास्नवो ग्लानिशीला: । | गंगाधर राय | १ | १८ |
| हृदयोपघात: | हृदयोपघातो वक्षसि कर्तनवत्पीडा । | गंगाधर राय | १ | १७ |
| हृदयापकर्तिन: | वक्षसि कर्तनवत् पीडावन्त: । | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| भिनत्ति | भिनत्ति दारयति । | योगेन्द्रनाथ सेन | १ | १७ |
| हि | हि यस्मात् । | गंगाधर राय | १ | ३ |
| हि | हि यस्मात् । | गंगाधर राय | १ | ८ |
| हि | हि अवधारणे । | ज्योतिषचन्द्र सरस्वति | १ | १८ |
| हि | अवधारणार्थोऽयं हि शब्द: इतरं व्यवच्छिद्य तमेवार्थं समर्थयति । | ज्योतिषचन्द्र सरस्वति | १ | २० |
| क्रिया | क्रिया इति चिकित्सा | चक्रपाणि दत्त | १ | ३ |
| मिथ्या | मिथ्याशब्द इह अयोगातियोगमिथ्यायोगेषु वर्तते | चक्रपाणि दत्त | १ | ४ |
| मिथ्या | मिथ्या अन्यथा | योगेन्द्रनाथ सेन | १ | ४ |
| निगम: | निगमो नगरपुरोवर्त्तिग्राम: । | गंगाधर राय | १ | १८ |
| निगम: | निगमस्तु प्राकारादिना दुर्गं योजनविस्तीर्णं नगरमेव । | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| निगम: | नगरासन्न: निगम: । | योगेन्द्रनाथ सेन | १ | १७ |
| निमित्तम् | निमित्तं निदानम् । | योगेन्द्रनाथ सेन | १ | ३ |
| नित्यग: | नित्यग इति अहोरात्रादिरुप: । | चक्रपाणि दत्त | १ | २२ |
| नित्यग: | नित्यग: संवत्सररुप: काल: । | गंगाधर राय | १ | २२ |
| प्रियम् | प्रियम् आपातत: स्वादनादिना प्रियम् । | गंगाधर राय | १ | २३ |
| स्निग्धम् | स्निग्धं घृतादिस्नेहयुक्तम् । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| विधि: | विधि: प्रकारो विधानं वा । | चक्रपाणि दत्त | १ | २१ |
| विकृति: | विकृति: विकार: । | योगेन्द्रनाथ सेन | १ | ३ |
| विकल्पनम् | विकल्पनं भेदक: । | चक्रपाणि दत्त | १ | १० |
| विमानम् | विशेषेण मीयते ज्ञायते दोषभेषजाद्यनेनेति विमानम् । | चक्रपाणि दत्त | १ | १ |
| विमानम् | विशेषेण यथायोग्यता मीयतेऽनेनेति विमानम् । | गंगाधर राय | १ | १ |
| विमानम् | विमानम् रसादीनां विशेषमानम् । | योगेन्द्रनाथ सेन | १ | १ |

| | | | | |
|---|---|---|---|---|
| विमानस्थानम् | विमानमभिधेयतया यत्र तिष्ठति तद्विमानस्थानम् । | चक्रपाणि दत्त | १ | १ |
| विरुद्ध: | विरुद्ध: विपरीत: । | चक्रपाणि दत्त | १ | १३ |
| विरुद्धगुण | यस्यैकस्य द्रव्यस्य यै: गुणै: यदपरद्रव्यस्य ये गुणा विरुध्यन्ते ते विरुद्धगुणा इति । | गंगाधर राय | १ | १४ |
| विस्रंसनसमर्थम् | विसंस्रनसमर्थं शरीरभेदनसमर्थम् । | ज्योतिषचन्द्र सरस्वति | १ | १८ |
| विशेष: | विशेष: हितत्वमहितत्वम् । | चक्रपाणि दत्त | १ | २१ |
| क्षिप्रम् | क्षिप्रं नातिद्रुतं नातिविलम्बितमिति डल्लण:। | योगेन्द्रनाथ सेन | १ | २४ |
| जनपद: | जनपदा जनसमूहा । | गंगाधर राय | १ | १७ |
| जनपद: | जनपदस्तु बहुग्रामपूर्ण: प्रदेश: | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| जनपद: | जनपद: देश: । | योगेन्द्रनाथ सेन | १ | १७ |
| खालित्यम् | खालित्यम् इन्द्रलुप्तरोग: केशस्य च्यवनादपुनर्भाव: । | गंगाधर राय | १ | १७ |
| खालित्यम् | खालित्यं केशानां प्रच्युति: । | योगेन्द्रनाथ सेन | १ | १७ |
| क्लेदयति | क्लेदयति शरीरं क्लिन्नं करोति आदौ निपात एव पश्चात् पाकं गत्वा तं क्लेदं विशोषयति । | ज्योतिषचन्द्र सरस्वति | १ | १६ |
| क्लेदयति | क्लेदयति आर्द्रीकरोति । | योगेन्द्रनाथ सेन | १ | १६ |
| केशोपघात: | केशोपघात: अकालपालित्यं खालित्यं च। | गंगाधर राय | १ | १७ |
| केवलम् | केवलमिति पूर्णतया । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| काल: | काल: नित्यग: आवस्थिकश्च । | योगेन्द्रनाथ सेन | १ | ३ |
| मानम् | मानमिति प्रभावादिविशेष: । | चक्रपाणि दत्त | १ | ३ |
| मोह: | मोहात् इति अज्ञानात् । | चक्रपाणि दत्त | १ | २३ |
| मोह: | मोहोऽत्र प्रकृत्याद्यष्टकाज्ञानम् । | गंगाधर राय | १ | २३ |
| मोह: | मोहात् अज्ञानात् । | ज्योतिषचन्द्र सरस्वति | १ | २३ |
| मोह: | मोहात् अज्ञानात् । | योगेन्द्रनाथ सेन | १ | २३ |
| मनोविघातकर: | मनोविघातकर: चित्तोपतापकर: । | योगेन्द्रनाथ सेन | १ | २५ |
| नगर: | नगर: आढयानां निवास: । | योगेन्द्रनाथ सेन | १ | १७ |
| नगरम् | नगरं महावसति: भूपालाद्याढयसमूहवासस्थानम् । | गंगाधर राय | १ | १८ |
| प्राच्या: | प्राच्या: कामरुपादिवासिन: । | गंगाधर राय | १ | १७ |
| प्राच्या: | प्राच्या: कामरुपादय: । | योगेन्द्रनाथ सेन | १ | १७ |

| | | | | |
|---|---|---|---|---|
| प्रभाव: | प्रकृष्टो भाव: प्रभाव: शक्तिरित्यर्थ: । | चक्रपाणि दत्त | १ | ४ |
| प्रभाव: | प्रभावशब्देन सामान्येन द्रव्यशक्तिरुच्यते। | चक्रपाणि दत्त | १ | १३ |
| प्रभाव: | प्रभवन्ति प्रभवो भवन्ति भावा: कर्मसमर्था भवन्त्येतै: स्वभावैर्वा गुणैर्वा कर्मभिर्वेति | गंगाधर राय | १ | ४ |
| प्रभाव: | प्रभाव: अचिन्त्य: उक्त: । | गंगाधर राय | १ | ६ |
| प्रक्लेदिनी | प्रक्लेदिन्यो रसप्रभावात् श्लेष्मोत्क्लेशकत्वेन । | ज्योतिषचन्द्र सरस्वति | १ | १६ |
| प्रक्लेदिनी | प्रक्लेदिन्य: शरीरधातूनां क्लेदजनन्य: । | योगेन्द्रनाथ सेन | १ | १६ |
| प्रकृतिभूता | प्रकृतिभूता इति अविषमा । | गंगाधर राय | १ | ५ |
| प्रकृतिभूता | प्रकृतिभूता: इति स्वप्रमाणे स्थिता: समा: | योगेन्द्रनाथ सेन | १ | ४ |
| प्रमाद: | प्रमादादिति ज्ञात्वाऽपि रागादित्यर्थ: । | चक्रपाणि दत्त | १ | २३ |
| प्रमाद: | प्रमादोऽत्र प्रकृत्याद्यष्टकानवधानम् । | गंगाधर राय | १ | २३ |
| प्रमाद: | प्रमादात् अनवधानात् । | ज्योतिषचन्द्र सरस्वति | १ | २३ |
| प्रमाद: | प्रमादात् अनवधानात् । | योगेन्द्रनाथ सेन | १ | २३ |
| प्रशमनम् | प्रशमनं प्रकृष्टशमनम् । | योगेन्द्रनाथ सेन | १ | १६ |
| पालित्यम् | पालित्यम् अकाले केशपक्वता । | गंगाधर राय | १ | १७ |
| पालित्यम् | पालित्यम् अकाले केशपक्वता । | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| पालित्यम् | पालित्यं केशानां पाक: । | योगेन्द्रनाथ सेन | १ | १७ |
| परि | परिरत्र सर्वार्थे । | योगेन्द्रनाथ सेन | १ | २२ |
| परिह्वासयति | परिह्वासयतीति भिन्नसंघातं करोति । | चक्रपाणि दत्त | १ | २५ |
| परिग्रह: | एकैकद्रव्यापेक्षया परिग्रह: । | योगेन्द्रनाथ सेन | १ | २२ |
| परित: | परित: सर्वत: । | योगेन्द्रनाथ सेन | १ | २२ |
| पुंस्त्वोपघात: | पुंस्त्वोपघात: षाण्डयम् । | गंगाधर राय | १ | १७ |
| राशि: | राशि: प्रमाणम् । | चक्रपाणि दत्त | १ | २२ |
| राशि: | राशिरत्र मानम् । | ज्योतिषचन्द्र सरस्वति | १ | २२ |
| राशि: | राशि: मात्रा । | योगेन्द्रनाथ सेन | १ | २२ |
| रस | अत्र रसशब्देन रसाश्रयद्रव्यं विवक्षितम् । | गंगाधर राय | १ | ३ |
| रस: | रसा: मधुरादय: । | योगेन्द्रनाथ सेन | १ | ३ |
| रसदोषसन्निपात | रसदोषसन्निपाते रसदोषयो: अन्त:शरीरे मेलने सति । | ज्योतिषचन्द्र सरस्वति | १ | ७ |
| सत्त्वम् | सत्त्वं मन: । | योगेन्द्रनाथ सेन | १ | ३ |
| साद्गुण्यम् | साद्गुण्यमिति प्रशस्तगुणयोगिताम् । | चक्रपाणि दत्त | १ | २५ |
| साद्गुण्यम् | साद्गुण्यं सद्गुणत्वम् । | गंगाधर राय | १ | २४ |

| | | | | |
|---|---|---|---|---|
| साद्गुण्यम् | साद्गुण्यं सद्गुणसमूहान् । | ज्योतिषचन्द्र सरस्वति | १ | २४ |
| साद्गुण्यम् | साद्गुण्यं सद्गुणकारित्वम् । | योगेन्द्रनाथ सेन | १ | २५ |
| शौचम् | शौचं धावनादिना मलापकर्षणम् । | ज्योतिषचन्द्र सरस्वति | १ | २२ |
| सन्निपात | सन्निपाते इति अन्त:शरीरमेलके । | चक्रपाणि दत्त | १ | ७ |
| सन्निपात: | सन्निपाते मेलके । | चक्रपाणि दत्त | १ | १३ |
| सन्निपात: | सन्निपात: इह समसमवेततया । | योगेन्द्रनाथ सेन | १ | ७ |
| सन्निपात: | सन्निपात: संयोग: । | योगेन्द्रनाथ सेन | १ | १४ |
| समानगुणा: | समानगुणा: समानप्रकृतिका: । | योगेन्द्रनाथ सेन | १ | ७ |
| समुदय: | समुदय: मेलक: । | चक्रपाणि दत्त | १ | ११ |
| समवेत | समवेतानामिति मिलितानाम् । | चक्रपाणि दत्त | १ | १० |
| संघातम् | संघातम् अस्थ्यादि दृढसंश्लेष: । | ज्योतिषचन्द्र सरस्वति | १ | १७ |
| संघातम् | संघातं पिण्डितं शोफादिकम् | योगेन्द्रनाथ सेन | १ | १७ |
| संहतीभाव: | संहतीभाव: योग: संयोग: । | योगेन्द्रनाथ सेन | १ | २२ |
| शैथिल्यम् | शैथिल्यमिति शरीरे मांसादिश्लथभाव: । | गंगाधर राय | १ | १८ |
| शैथिल्यम् | शैथिल्यं मांसादीनां श्लथत्वम् । | योगेन्द्रनाथ सेन | १ | १८ |
| शरीरोपचयम् | शरीरोपचयं शरीरधातुवर्धनम् । | ज्योतिषचन्द्र सरस्वति | १ | २५ |
| शरीरोपकारका: | शरीरोपकारका: आरोग्याय क्लृप्ता भवन्ति | गंगाधर राय | १ | ५ |
| सद्य | सद्य इति अनभ्यासे । | चक्रपाणि दत्त | १ | १६ |
| सर्व | सर्व: समुदाय: । | योगेन्द्रनाथ सेन | १ | २२ |
| सर्वग्रह: | सर्वग्रह: समुदितद्रव्यापेक्षया परिमाणम् । | योगेन्द्रनाथ सेन | १ | २२ |
| सर्वत: | सर्वत: इति प्रत्येकावयवत: । | चक्रपाणि दत्त | १ | २२ |
| अवदातम् | अवदातं निर्मलमङगम् । | गंगाधर राय | ८ | ९६ |
| अव्यापत्तिः | अव्यापत्तिः सम्पत् । | गंगाधर राय | ८ | ८९ |
| अव्यापत् | अव्यापत् सुखम् । | योगेन्द्रनाथ सेन | ८ | ८९ |
| अव्यंगम् | अव्यंगं अविकलांगम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| अयनभूतम् | अयनभूतमिति अभ्यासान्मार्गीभूतमिव अभ्यस्तमित्यर्थः । | चक्रपाणि दत्त | ८ | २५ |
| ब्रुवति | ब्रुवति कथयति । | योगेन्द्रनाथ सेन | ८ | १४ |
| बार्हस्पत्यम् | बार्हस्पत्यं नीतिशास्त्रम् | चक्रपाणि दत्त | ८ | ५४ |
| भाष्यम् | भाष्यं विस्तरेण तद्विवृत्तिः । | योगेन्द्रनाथ सेन | ८ | ३ |
| भाष्यम् | सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।। | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| भगः | भगः इति स्त्रीलिङ्गम् । | गंगाधर राय | ८ | ११७ |
| भक्तिः | भक्तिः इच्छा । | योगेन्द्रनाथ सेन | ८ | ९३ |
| भक्तिः | भक्तिः भजनशीलता । | गंगाधर राय | ८ | ९३ |
| बस्तिशिरः | बस्तिशिरः इन्द्रबस्तिः । | गंगाधर राय | ८ | ११७ |
| भेदाग्रम् | भेदाग्रं भेदपरिमाणम् । | चक्रपाणि दत्त | ८ | ८१ |

| | | | | |
|---|---|---|---|---|
| भेदपरिमाणम् | भेदपरिमाणं च इह भेदसंख्यापरिच्छेद एव। | चक्रपाणि दत्त | ८ | ८१ |
| बुद्धिः | बुद्धिः अत्र मनः । | योगेन्द्रनाथ सेन | ८ | ७७ |
| भूतम् | भूतम् स्वरुपम् । | योगेन्द्रनाथ सेन | ८ | ८७ |
| भूयः | भूयः बहुलः | गंगाधर राय | ८ | १२५ |
| च | चशब्दः समुच्चये । | गंगाधर राय | ८ | १२५ |
| च | च शब्दः पुनरर्थे । | गंगाधर राय | ८ | ११८ |
| चेष्टा | चेष्टेति वाङ्मनःशरीराणां प्रवर्तनम् । | गंगाधर राय | ८ | ७७ |
| चेष्टा | चेष्टा क्रिया । | गंगाधर राय | ८ | ९६ |
| चपलाः | चपलाः अस्थिराः । | योगेन्द्रनाथ सेन | ८ | ९८ |
| छलम् | छलं हि अभिप्रेतार्थात् अर्थान्तरं परिकल्प्य परवचनोपघाताय प्रतिकल्प्यते । | चक्रपाणि दत्त | ८ | ५६ |
| द्रुतम् | द्रुतं द्रवम् । | गंगाधर राय | ८ | ९७ |
| दोषाः | दोषाः वातदयः । | योगेन्द्रनाथ सेन | ८ | १०१ |
| दाक्ष्यम् | दाक्ष्यं दक्षता । | योगेन्द्रनाथ सेन | ८ | ८ |
| दक्षिणम् | दक्षिणं अनुकूलम् । | योगेन्द्रनाथ सेन | ८ | ४ |
| दक्षिणम् | दक्षिणं अनुकूलम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| दक्षिणम् | दक्षिणम् अनुकूलस्वभावम् । | गंगाधर राय | ८ | ४ |
| दन्दशूकाः | दन्दशूकाः पुनः पुनः भक्षणशीलाः । | चक्रपाणि दत्त | ८ | ९७ |
| दन्दशूकाः | दन्दशूकाः पुनः पुनः भक्षणशीलाः । | योगेन्द्रनाथ सेन | ८ | ९७ |
| देशः | कार्यानुगुणोऽननुगुणो वा आधाररुपो देशः । | चक्रपाणि दत्त | ८ | ७५ |
| दैवम् | दैवम् अदृष्टम् । | योगेन्द्रनाथ सेन | ८ | ८७ |
| दृष्टान्तः | लौकिकानां पण्डितानां च योऽर्थोऽविवादसिद्धः स दृष्टान्तो भवति न पण्डितमात्रसिद्धः । | चक्रपाणि दत्त | ८ | ३४ |
| दृष्टान्तः | दृष्टान्तः उदाहरणम् । | योगेन्द्रनाथ सेन | ८ | ३१ |
| दृष्टार्थः | दृष्टार्थः इति प्रमाणान्तरोपलब्धियोग्यार्थः । | चक्रपाणि दत्त | ८ | ३८ |
| दृढता | दृढता आयत्तीकरणम् । | योगेन्द्रनाथ सेन | ८ | ५ |
| दूष्याः | दूष्याः धातवः । | योगेन्द्रनाथ सेन | ८ | १०१ |
| दक्षम् | दक्षमिति अवामबुद्धिम् । | चक्रपाणि दत्त | ८ | ४ |
| दक्षम् | दक्षं कर्मसु कुशलम् । | योगेन्द्रनाथ सेन | ८ | ४ |
| दक्षम् | दक्षं स्वभ्यस्तकर्माणं कर्मकुशलम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| दक्षम् | दक्षं वमनादिसर्वक्रियासु कुशलम् । | गंगाधर राय | ८ | ४ |
| श्रीमत् | श्रीमदिति शोभायुक्तम् । | चक्रपाणि दत्त | ८ | १०४ |

| | | | | |
|---|---|---|---|---|
| श्रुतम् | श्रुतं शास्त्रज्ञानम् । | योगेन्द्रनाथ सेन | ८ | ४ |
| श्रुतम् | श्रुतं शास्त्रम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| श्रुतम् | श्रुतं शब्दम् अर्थम् च । | योगेन्द्रनाथ सेन | ८ | १५ |
| श्रुतम् | श्रुतं गुरुमुखात् शास्त्रस्य श्रवणम् । | योगेन्द्रनाथ सेन | ८ | १८ |
| एकरसम् | एकरसमिति शुद्धैकरसम् । | चक्रपाणि दत्त | ८ | १३८ |
| ऐतिह्यम् | इति ह ऊचुर्वृद्धाः इति ऐतिह्यम् । | योगेन्द्रनाथ सेन | ८ | ४१ |
| ऐश्वर्यम् | ऐश्वर्यं प्रभुत्वम् । | योगेन्द्रनाथ सेन | ८ | १०६ |
| ऐश्वर्यम् | ऐश्वर्यं प्रभुत्वम् । | गंगाधर राय | ८ | १०६ |
| फलम् | फलन्तु प्रयोजनहेतुर्व्यापारनिष्पाद्यं धातुनोच्यते । | गंगाधर राय | ८ | ६९ |
| ग्रामः | ग्रामः समूहः । | गंगाधर राय | ८ | १२७ |
| गन्धहस्तः | गन्धेन युक्तो हस्तः पंचागुलो गन्धहस्तः । | चक्रपाणि दत्त | ८ | ९ |
| घृष्टः | घृष्टः गन्धः । | योगेन्द्रनाथ सेन | ८ | ९ |
| गुल्फः | गुल्फः पादग्रन्थिः । | योगेन्द्रनाथ सेन | ८ | १०७ |
| गूढः | गूढः अव्यक्तः । | गंगाधर राय | ८ | १२७ |
| हानिः | हानिः त्यागः । | योगेन्द्रनाथ सेन | ८ | ६१ |
| हृदयम् | षडङ्गाङ्गविज्ञानेन्द्रियतदर्थसगुणात्ममनसां स्थानम् । | गंगाधर राय | ८ | ९४ |
| हृदयम् | हृदयं जीवात्मधारणस्थानम् । | गंगाधर राय | ८ | ११७ |
| हेम | हेमशब्देन च घटितम् हेम गृह्यते । | चक्रपाणि दत्त | ८ | ९ |
| हेतुः | हेतुः उदाहरणस्य साधर्म्यवैधर्म्याभ्यां साध्यस्य साधनम् । | योगेन्द्रनाथ सेन | ८ | ३१ |
| हेतुः | हेतुः निदानम् | योगेन्द्रनाथ सेन | ८ | १०१ |
| हेतुः | हिनोतेधातोस्तुनिप्रत्यये कृदन्तपदम् । | गंगाधर राय | ८ | ६४ |
| हेतुमत् | हेतुमत् उपपत्तिमत् । | चक्रपाणि दत्त | ८ | १५७ |
| हेत्वाभासाः | हेतुवत् आभासन्तः इति हेत्वाभासाः । | चक्रपाणि दत्त | ८ | ५९ |
| त्रिकम् | त्रिकमिति गुदास्थ्नः प्रभृति कटीकपालोर्ध्वपर्यन्तम् | चक्रपाणि दत्त | ८ | ११७ |
| भिन्नस्वरः | भिन्नस्वरः भग्नपात्रध्वनिसमः स्वरः । | योगेन्द्रनाथ सेन | ८ | ९८ |
| भिन्नस्वरः | भिन्नस्वरः भङ्गरुपः | गंगाधर राय | ८ | ९८ |
| भिषग्बुभूषुः | भिषग्बुभूषुः तथाविधो भिषक् भवितुमिच्छेत् | योगेन्द्रनाथ सेन | ८ | ३ |
| भिषग्वादमार्गः | भिषजां वादमार्गो भिषग्वादमार्गः । | चक्रपाणि दत्त | ८ | २७ |
| भिषजः | यज् ज्ञानात् भिषजः । | योगेन्द्रनाथ सेन | ८ | १ |
| भिषज्यति | भिषज्यति चिकित्सति । | चक्रपाणि दत्त | ८ | ८६ |

| | | | | |
|---|---|---|---|---|
| भिषक् | यः भेषति रुजं जयति शमयति स भिषक् । भिष् रुग्जये । सौत्रधातुरयम् । ततः औणादिकः अजक्प्रत्ययः । यः सूत्रार्थे आयुर्वेदीयसूत्रार्थे प्रयोगे कर्मणि च कुशलः | योगेन्द्रनाथ सेन | ८ | ८६ |
| भिषक् | यो भेषतीति भिष रुग्जये सौत्रधातुरौणादिकप्रत्ययेन व्युत्पन्नार्थः यः सूत्रार्थप्रयोगकुशलः प्रकरणात् आयुर्वेदीयसूत्रार्थप्रयोगयोर्दक्षः यस्य चायुर्यथावत् सर्वथा विदितं पूर्वत्रासिद्धीयविधेरनित्यत्वात् क्तान्तप्रयोगेऽपि कर्त्तरि षष्ठी स भिषक् । | गंगाधर राय | ८ | ८६ |
| चिबुकम् | चिबुकम् अधरादधोभागः । | योगेन्द्रनाथ सेन | ८ | १०७ |
| चिकीर्षुः | चिकीर्षुः इच्छुः । | योगेन्द्रनाथ सेन | ८ | ७९ |
| हि | हि यस्मात् | गंगाधर राय | ८ | ११९ |
| हि | हि यतः । | योगेन्द्रनाथ सेन | ८ | १३ |
| हिरण्य | हिरण्यशब्देन अघटितं हेम गृह्यते । | चक्रपाणि दत्त | ८ | ९ |
| हिरण्य | हिरण्यं हेम । | योगेन्द्रनाथ सेन | ८ | ९ |
| जिगीषुः | जिगीषुः जेतुमिच्छुः । | योगेन्द्रनाथ सेन | ८ | १५ |
| जितहस्तम् | जितहस्तं शस्त्रोपचारादिषु क्षिप्रहस्तम् । | योगेन्द्रनाथ सेन | ८ | ४ |
| जितहस्तम् | जितहस्तं शस्त्राद्यवचारणाय मनोऽनुगतहस्तपरिचालनसमर्थम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| जितहस्तता | जितहस्तता शस्त्रोपचारादिषु हस्तलाघवम् | योगेन्द्रनाथ सेन | ८ | ८६ |
| किष्कुः | किष्कुः इह हस्तप्रमाणम् । | चक्रपाणि दत्त | ८ | ११ |
| किष्कुः | किष्कुः हस्तप्रमाणम् । | योगेन्द्रनाथ सेन | ८ | ११ |
| मिन्मिनः | मिन्मिनः अनुनासिकवाक् । | योगेन्द्रनाथ सेन | ८ | ८ |
| निभृतम् | निभृतम् इति विनीतम् । | चक्रपाणि दत्त | ८ | ८ |
| निभृतम् | निभृतम् विनीतम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| निभृतम् | निभृतम् विनीतम् । | योगेन्द्रनाथ सेन | ८ | १३ |
| निभृतम् | निभृतं गुप्तरुपम् । | गंगाधर राय | ८ | ८ |
| निर्देशः | विस्तरकथनं निर्देशः । | योगेन्द्रनाथ सेन | ८ | ६६ |
| निश्चारयितव्याः | निश्चारयितव्याः प्रकाशयितव्याः । | योगेन्द्रनाथ सेन | ८ | १३ |
| निग्रहः | निग्रहः पराजयः । | चक्रपाणि दत्त | ८ | ६५ |
| निग्रहः | निग्रहः पराजयः । | योगेन्द्रनाथ सेन | ८ | १७ |

| | | | | |
|---|---|---|---|---|
| निग्रहस्थानम् | निग्रहस्य पराजयस्य स्थानमिव स्थानं कारणमिति निग्रहस्थानम् । | चक्रपाणि दत्त | ८ | ६५ |
| निगमनम् | निगमनं हेत्वपदेशात् प्रतिज्ञाया: पुनर्वचनम् | योगेन्द्रनाथ सेन | ८ | ३१ |
| निहितम् | निहितं स्थापितम् । | योगेन्द्रनाथ सेन | ८ | ८७ |
| निर्णय: | निर्णीयत इति निर्णय: । | चक्रपाणि दत्त | ८ | ३७ |
| नित्यम् | नित्यमिति सर्वदा । | चक्रपाणि दत्त | ८ | ६० |
| निष्ठा | निष्ठा निश्चय: । | चक्रपाणि दत्त | ८ | ८० |
| निष्ठा | निष्ठायां पक्षव्यवस्थायाम् । | चक्रपाणि दत्त | ८ | १३४ |
| निष्ठा | निष्ठा निश्चय: । | योगेन्द्रनाथ सेन | ८ | ८० |
| पित्तम् | पित्तम् मत्स्यादिपित्तम् । | गंगाधर राय | ८ | १४१ |
| पिण्ड | पिण्डेन इति सारोद्धारेण । | चक्रपाणि दत्त | ८ | १५ |
| शिखरदशना: | शिखरदशना: इति शोभनदशना: । | चक्रपाणि दत्त | ८ | १०९ |
| शिरोधरा | शिरोधरा ग्रीवा । | गंगाधर राय | ८ | ११७ |
| सिद्धान्त: | सिद्धान्त: सिद्धस्य संस्थिति: । | योगेन्द्रनाथ सेन | ८ | ३७ |
| स्थिरम् | स्थिरम् अचलम् । | गंगाधर राय | ८ | ९६ |
| स्तिमितम् | स्तिमितं स्थिर: । | योगेन्द्रनाथ सेन | ८ | १३ |
| तिष्य: | तिष्य: पुष्यनक्षत्रम् | चक्रपाणि दत्त | ८ | ९ |
| तिष्य: | तिष्य: पुष्यनक्षत्रम् | योगेन्द्रनाथ सेन | ८ | ९ |
| विज्ञानहीनम् | विज्ञानहीनमिति अज्ञातार्थम् । | चक्रपाणि दत्त | ८ | २१ |
| विज्ञानम् | विज्ञानम् अवबोध: । | योगेन्द्रनाथ सेन | ८ | ५ |
| विज्ञानम् | विज्ञानं शास्त्रान्तरज्ञानम् । | योगेन्द्रनाथ सेन | ८ | १७ |
| विज्ञानम् | विज्ञानम् अवबोध: । | योगेन्द्रनाथ सेन | ८ | १८ |
| वित्रासनम् | वित्रासनं भयोत्पादनम् । | योगेन्द्रनाथ सेन | ८ | २१ |
| वित्तम् | वित्तं धनम् । | योगेन्द्रनाथ सेन | ८ | १०६ |
| वित्तम् | वित्तं धनम् । | गंगाधर राय | ८ | ९७ |
| विद्रुम: | विद्रुम: प्रवालम् । | योगेन्द्रनाथ सेन | ८ | ९ |
| विश्रब्ध: | विश्रब्ध: विश्वस्त: । | योगेन्द्रनाथ सेन | ८ | १७ |
| विगृह्यसंभाषा | विगृह्य विग्रहं कृत्वा संभाषा विगृह्यसंभाषा । | योगेन्द्रनाथ सेन | ८ | १६ |
| विहार: | विहार: परिस्पन्दनव्यापार: । | गंगाधर राय | ८ | ९३ |
| विक्रियमाणा: | विकृतिम् अवस्थान्तरमापद्यमाना । | योगेन्द्रनाथ सेन | ८ | ७१ |
| विक्रियमाणा: | विक्रियमाणा विकृतिमापद्यमाना । | गंगाधर राय | ८ | ७१ |
| विक्लिप्ति: | विक्लिप्ति: द्रव्यान्तरसंयोग: । | चक्रपाणि दत्त | ८ | १३६ |
| विधिभेद: | विधिरुपो भेदो विधिभेद: । | चक्रपाणि दत्त | ८ | ८१ |

| | | | | |
|---|---|---|---|---|
| विविध: | विविधानि अगणितानि । | चक्रपाणि दत्त | ८ | ३ |
| विज्ञल: | विज्ञल: पिच्छिल: । | योगेन्द्रनाथ सेन | ८ | ९६ |
| विज्ञल: | विज्ञल: पिच्छिल: । | गंगाधर राय | ८ | ९६ |
| विक्रान्तम् | विक्रान्तं विक्रमपूर्वकम् । | योगेन्द्रनाथ सेन | ८ | ११० |
| विक्लवम् | विक्लवं स्तोकक्लेशाभिभवनीयम् अनेन च दुर्बल चेतस्त्वमुक्तम् । | चक्रपाणि दत्त | ८ | ९४ |
| विक्लवम् | विक्लवं विशिष्टभयशीलम् । क्लव ष् भये इति क्लव्धातो रुपं विक्लवम् । | गंगाधर राय | ८ | ९४ |
| विकृति: | विकृति: विकार: धातुवैषम्यम् । | योगेन्द्रनाथ सेन | ८ | १०१ |
| विकार: | विकार: मनसो वा शरीरस्य वैषम्यम् । | गंगाधर राय | ८ | ९६ |
| विलयनम् | विलयनं द्रवीभावम् । | गंगाधर राय | ८ | १२७ |
| विमानम् | दोषादयो विशेषेण मीयन्ते ज्ञायन्ते एभिरिति विमानम् । | चक्रपाणि दत्त | ८ | १५७ |
| विप्रतिपत्ति: | विपरीता कुत्सिता वा प्रतिपत्ति: । | योगेन्द्रनाथ सेन | ८ | ६५ |
| विध: | विध: प्रकार: । | योगेन्द्रनाथ सेन | ८ | ८० |
| विधूय | विधूय दूरीकृत्य । | योगेन्द्रनाथ सेन | ८ | ३ |
| विस्रम् | विस्रम् आमगन्धि । | योगेन्द्रनाथ सेन | ८ | ९७ |
| विस्रम् | विस्रम् आमगन्धि । | गंगाधर राय | ८ | ९७ |
| विशदा | विशदा अपिच्छिला । | योगेन्द्रनाथ सेन | ८ | ८ |
| विशदम् | विशदं परिस्फुटम् । | योगेन्द्रनाथ सेन | ८ | १७ |
| विस्मापनम् | विस्मापनं विस्मयजननम् । | योगेन्द्रनाथ सेन | ८ | ८७ |
| विस्तार: | विस्तार: व्यास: । | योगेन्द्रनाथ सेन | ८ | ११७ |
| वितर्क: | वितर्क: ऊह: । | योगेन्द्रनाथ सेन | ८ | ८ |
| वियत् | वियत् नभोमण्डलम् | गंगाधर राय | ८ | १२७ |
| क्षिप्रम् | क्षिप्रं शीघ्रभाविन: । | योगेन्द्रनाथ सेन | ८ | ९७ |
| जत्रु | जत्रु भुजसन्धि | योगेन्द्रनाथ सेन | ८ | १०७ |
| जागरुका: | जागरुका: जागरणशीला: अल्पनिद्रा । | योगेन्द्रनाथ सेन | ८ | ९८ |
| जाल: | जाल: समूह: । | गंगाधर राय | ८ | १२७ |
| जानु: | जानु: जंघोरुसन्धि: । | चक्रपाणि दत्त | ८ | ११७ |
| जङ्घा | जङ्घा पादस्य उपरि जानुन: अध: । | योगेन्द्रनाथ सेन | ८ | ११७ |
| जर्जर: | जर्जर: भग्नपात्रध्वनिसम: । | चक्रपाणि दत्त | ८ | ९८ |
| जर्जर: | जर्जर: असंहत: । | योगेन्द्रनाथ सेन | ८ | ९८ |
| जर्जर: | जर्जर: असंहत: । | गंगाधर राय | ८ | ९८ |

| | | | | |
|---|---|---|---|---|
| जल्पान्तरम् | जल्पान्तरमिति सामयिकसर्वार्थादिविशेषितं जल्पकविशेषमित्यर्थ: । | चक्रपाणि दत्त | ८ | १८ |
| जंघा | जंघा जान्वधस्तात् उच्यते । | चक्रपाणि दत्त | ८ | ११७ |
| जरणम् | जरणं परिपाक: । | योगेन्द्रनाथ सेन | ८ | ८९ |
| क्रमागतार्थम् | क्रमागतार्थमिति परिपाठयागतार्थम् । | चक्रपाणि दत्त | ८ | ३ |
| क्रमागतार्थम् | क्रमागतार्थमिति उद्देशक्रमेण प्राप्ता: निर्दिष्टा: अर्था: । | योगेन्द्रनाथ सेन | ८ | ३ |
| क्रमागतार्थम् | क्रमागतार्थं प्रक्रमभंगदोषरहितम् । | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| क्लेशक्षमम् | क्लेशक्षमं क्लेशसहम् । | योगेन्द्रनाथ सेन | ८ | ४ |
| केवलम् | केवलं कृत्स्नम् । | गंगाधर राय | ८ | १३७ |
| कृत्रिमगुणोपाधानम् | कृत्रिमगुणोपाधानम् कल्पनेन उपपाद्य निर्म्माय । | गंगाधर राय | ८ | १२७ |
| कृकाटिका | कृकाटिका घाटा । | योगेन्द्रनाथ सेन | ८ | १०५ |
| कृकाटिका | कृकाटिका घाटा । | गंगाधर राय | ८ | १०५ |
| कृतोपवास: | कृतोपवास: उपोषित: । | योगेन्द्रनाथ सेन | ८ | ९ |
| कृतक्षण: | कृतक्षण: इति अनन्यव्यापारत्वेनाध्ययनाय कृतकालपरिग्रह: । | चक्रपाणि दत्त | ८ | ७ |
| कृतक्षण: | कृतक्षण: कृतकालनियम: । | योगेन्द्रनाथ सेन | ८ | ७ |
| कुशला: | कुशला: बुद्धिमन्ता: । | योगेन्द्रनाथ सेन | ८ | १५ |
| कारण | इह कारणशब्देन स्वतन्त्रकारणं कर्तृलक्षणमुच्यते | चक्रपाणि दत्त | ८ | ६९ |
| कारणम् | कारणं साधनम् । | योगेन्द्रनाथ सेन | ८ | ३३ |
| काषायवस्त्र: | काषायवस्त्र: रक्तवास: । | योगेन्द्रनाथ सेन | ८ | ९ |
| कार्यदेश: | कार्यदेश इति कर्तव्यधातुसाम्याधार इत्यर्थ: | चक्रपाणि दत्त | ८ | ९४ |
| कार्यगौरवम् | कर्तव्यस्य बहुप्रयाससाध्यत्व । | चक्रपाणि दत्त | ८ | ३ |
| कार्यगौरवम् | कार्यस्य गौरवं बहुप्रयाससाध्यत्वेन । | योगेन्द्रनाथ सेन | ८ | ३ |
| कार्यलाघवम् | कर्तव्यस्य स्वल्पप्रयाससाध्यत्व । | चक्रपाणि दत्त | ८ | ३ |
| कार्यलाघवम् | कार्यस्य लाघवं अल्पप्रयाससाध्यत्वेन । | योगेन्द्रनाथ सेन | ८ | ३ |
| कार्यम् | कार्यम् कर्तव्यम् । | चक्रपाणि दत्त | ८ | ३ |
| कार्ययोनि: | कार्यस्य योनि: समवायिकारणं कार्ययोनि: | चक्रपाणि दत्त | ८ | ७१ |
| कल्प: | कल्पनं कल्प: प्रयोग: । | चक्रपाणि दत्त | ८ | १३५ |
| कल्पना | कल्पना क्लृप्तीकरण: । | गंगाधर राय | ८ | ११० |
| कल्य: | कल्य: नीरोग: । | चक्रपाणि दत्त | ८ | ७ |
| कल्य: | कल्य: नीरोग: । | योगेन्द्रनाथ सेन | ८ | ७ |

| | | | | |
|---|---|---|---|---|
| कल्य: | कल्य: प्रात:काल: । | गंगाधर राय | ८ | ७ |
| कल्याणम् | कल्याणम् शुभम् । | योगेन्द्रनाथ सेन | ८ | ११० |
| कल्याणम् | कल्याणम् शुभम् । | गंगाधर राय | ८ | १११ |
| कर्म | कर्म भारवहनादि । | चक्रपाणि दत्त | ८ | १२१ |
| कर्मफलम् | कर्मफलं कार्यफलम् । | चक्रपाणि दत्त | ८ | ३ |
| कर्मफलम् | कर्मण: फलं कर्मफलम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| कर्मशक्ति: | कर्म भारवहनादि तत्र शक्ति: कर्मशक्ति: । | चक्रपाणि दत्त | ८ | १२१ |
| कथयितव्यम् | कथयितव्यमिति वक्तव्यम् । | चक्रपाणि दत्त | ८ | २० |
| कथयेत् | कथयेदिति ब्रूयात् । | चक्रपाणि दत्त | ८ | १७ |
| करणम् | करणं बवबालवादि । | योगेन्द्रनाथ सेन | ८ | ९ |
| करणम् | यत्तु कर्त्रधीनव्यापारे साधकतमं तत् करणम् । | चक्रपाणि दत्त | ८ | ७० |
| कक्षा | कक्षा अंसाधोभाग: । | गंगाधर राय | ८ | ११७ |
| कष्टशब्दम् | कष्टशब्दमिति नातिप्रसिद्धार्थम् | चक्रपाणि दत्त | ८ | २० |
| लौक्यम् | लौक्यं लोकानुमतम् । | चक्रपाणि दत्त | ८ | १४ |
| ललाट: | ललाटो ललाटस्य मध्यदेश: । | गंगाधर राय | ८ | १०५ |
| लक्षणम् | लक्षणम् ज्ञानम् । | चक्रपाणि दत्त | ८ | १३७ |
| लक्षणम् | लक्षणम् हि शास्त्रमुच्यते । | चक्रपाणि दत्त | ८ | १५२ |
| लक्षणम् | लक्षणं तन्त्रम् । | गंगाधर राय | ८ | १५२ |
| मोह: | मोहस्तमोगुणात्मकस्तस्य पक्षा: मिथ्याज्ञानं विचिकित्सा मान: प्रमाद: इति । | गंगाधर राय | ८ | ७३ |
| मोह: | मिथ्याप्रवृत्तिलक्षणो मोह: । | गंगाधर राय | ८ | ७३ |
| महत् | महत् असंक्षिप्तम् । सर्वै: स्थानै: उपेतमित्यर्थ: | योगेन्द्रनाथ सेन | ८ | ३ |
| मनपुर:सर: | मनपुर:सराभिरिति एकाग्रमन:प्रणीताभि: । | चक्रपाणि दत्त | ८ | ७ |
| मनपुर:सर: | मनपुर:सराभि: मनोयोगपूर्वाभि: वाग्भि: पुन: पुन: आवर्तयेत् अभ्यस्येत् । | योगेन्द्रनाथ सेन | ८ | ७ |
| मन्द | मन्दशब्दोऽल्पवचन: । | गंगाधर राय | ८ | १२६ |
| मन्द: | मन्द: अल्प: । | गंगाधर राय | ८ | ९६ |
| मन्द: | मन्द: अल्प: । | गंगाधर राय | ८ | १११ |
| मैत्रे मुहूर्त | मैत्रे मुहूर्ते इति अनुकूले मुहूर्ते । | चक्रपाणि दत्त | ८ | ९ |
| मैत्रे मुहूर्त | मैत्रे मुहूर्ते इति अनुकूले मुहूर्ते । | योगेन्द्रनाथ सेन | ८ | ९ |
| मधुरप्राय: | मधुरप्रायाणि इति उत्कृष्टमधुररसानि । | चक्रपाणि दत्त | ८ | १३८ |
| मृदुविवृतम् | मृदुविवृतं अगम्भीरम् । | चक्रपाणि दत्त | ८ | ९४ |

| | | | | |
|---|---|---|---|---|
| मृदुत्वम् | मृदुत्वं जलकृतम् । | चक्रपाणि दत्त | ८ | ९६ |
| मुक्तः | मुक्तः इति प्रत्यासन्नमुक्तिः । | चक्रपाणि दत्त | ८ | ३७ |
| मुक्तः | मुक्तः जीवन्मुक्तः पुरुषः । | योगेन्द्रनाथ सेन | ८ | ३७ |
| मुहूर्तः | मुहूर्ताश्च शिवभूजगादयः । | चक्रपाणि दत्त | ८ | ९ |
| मुहूर्तः | मुहूर्तः शिवभूजगादयः । | योगेन्द्रनाथ सेन | ८ | ९ |
| मुक्तिः | मुक्तिः निःसरणम् । | योगेन्द्रनाथ सेन | ८ | ८९ |
| मुक्तिः | मुक्तिः त्यागः । | गंगाधर राय | ८ | ८९ |
| मुण्डः | मुण्डः कृतवापनः । | चक्रपाणि दत्त | ८ | ९ |
| मुण्डः | मुण्डः कृतकेशवपनः । | योगेन्द्रनाथ सेन | ८ | ९ |
| मर्यादा | मर्यादा सीमा । | योगेन्द्रनाथ सेन | ८ | २६ |
| मर्यादा | मर्यादा सीमा । | गंगाधर राय | ८ | २६ |
| नामलक्षणार्थम् | नामलक्षणार्थमिति नामज्ञानार्थम् । | चक्रपाणि दत्त | ८ | १३७ |
| नैष्ठिकम् | निष्ठा निश्चयः तद्भवं नैष्ठिकम् । किं निश्चयेन कर्तव्यमित्यर्थः । | चक्रपाणि दत्त | ८ | ८० |
| हृदय | हृदयशब्देन हृदयस्थं मन इति ज्ञेयम् । | चक्रपाणि दत्त | ८ | ९४ |
| प्रादक्षिण्यम् | प्रादक्षिण्यं सर्वत्रानुकूलत्वम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| प्राक् | प्राक् पूर्वम् । | योगेन्द्रनाथ सेन | ८ | १८ |
| प्राप्तम् | प्राप्तमिति उचितम् । | चक्रपाणि दत्त | ८ | ८२ |
| प्रावृट् | वर्षासु पूर्वभागं प्रावृट्कालः । | गंगाधर राय | ८ | १२७ |
| प्रायः | प्रायः शब्दो नियमेन निषेधयति । | चक्रपाणि दत्त | ८ | १११ |
| प्रबोधनम् | प्रबोधनं ज्ञेयेष्वर्थेषु ज्ञानं भवति । | गंगाधर राय | ८ | ८९ |
| प्रभावः | प्रभावः द्रव्यस्य अचिन्त्यशक्तिः । | योगेन्द्रनाथ सेन | ८ | ८७ |
| प्रभूतः | प्रभूतः बहवः । | योगेन्द्रनाथ सेन | ८ | ९७ |
| प्रचरणम् | प्रचरणं भिक्षामूलं तण्डुलादि पात्रस्थम् । | चक्रपाणि दत्त | ८ | १४९ |
| प्रदेशिनी | प्रदेशिन्यास्तु मध्यमानामिकाकनिष्ठाः । | गंगाधर राय | ८ | ११७ |
| प्रहर्षः | प्रहर्षः मेहनोच्छ्रायः । | योगेन्द्रनाथ सेन | ८ | १०९ |
| प्रहर्षबहुलः | प्रहर्षबहुलः मैथुनबहुलः । | गंगाधर राय | ८ | १०९ |
| प्रति | प्रति शब्दः विपरीतार्थम् इति । | चक्रपाणि दत्त | ८ | ३२ |
| प्रतिज्ञाहानिः | प्रतिज्ञायाः हानिः त्यागः प्रतिज्ञाहानिः । | योगेन्द्रनाथ सेन | ८ | ६१ |
| प्रतिभा | प्रतिभा प्रत्युत्पन्नमतित्वम् । | योगेन्द्रनाथ सेन | ८ | १८ |
| प्रतिभाहीनः | प्रतिभाहीनो ह्यनेकार्थ नावधारयति यत् केनाभिप्रायेणायं प्रयुक्तोऽनेन शब्द इति । | चक्रपाणि दत्त | ८ | २१ |
| प्रतिबोधनम् | प्रतिबोधनं जागरणम् । | योगेन्द्रनाथ सेन | ८ | ८९ |

| | | | | |
|---|---|---|---|---|
| प्रतिकर्म | प्रतिकर्म चिकित्सा । | चक्रपाणि दत्त | ८ | ८४ |
| प्रतिकर्म | प्रतिकर्म चिकित्सा । | चक्रपाणि दत्त | ८ | १२९ |
| प्रतिकर्म | प्रतिकर्मः व्याधिप्रतिकारः लंघनाद्युपक्रमः । | गंगाधर राय | ८ | १२९ |
| प्रतिपत्तव्यः | प्रतिपत्तव्यः अनुष्ठानेन योजयितव्यः । | चक्रपाणि दत्त | ८ | १३२ |
| प्रतिपत्तिज्ञम् | प्रतिपत्तिज्ञं कर्तव्याकर्तव्यकुशलम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| प्रतिपत्तिः | यो विकारः यथा प्रतिपत्तव्यः तस्य तथा अनुष्ठानं प्रतिपत्तिः । | योगेन्द्रनाथ सेन | ८ | ४ |
| प्रतिपत्तिः | प्रतिपत्तिः यथावदनुष्ठानम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| प्रतिपत्तिः | उत्पन्नायामापदि झटिति कर्तव्यकरणम् | चक्रपाणि दत्त | ८ | ८६ |
| प्रतिपत्तिः | प्रतिपद्यतेऽनेनेति प्रतिपत्तिः शास्त्रम् । | गंगाधर राय | ८ | १३२ |
| प्रतिवचनम् | प्रतिवचनम् उत्तरवचनम् । | योगेन्द्रनाथ सेन | ८ | १७ |
| प्रतिष्ठापना | प्रतिष्ठापनापदं प्रथमं संप्रत्यवसरप्राप्ता प्रतिष्ठापनेति दर्शयति द्वितीयं तु प्रतिष्ठापना नामेति तस्या एवेत्यादिना वक्ष्यमाणस्य लक्षणस्योपदर्शनार्थम् । | चक्रपाणि दत्त | ८ | ३२ |
| प्रविचारितव्यम् | प्रविचारितव्यमिति चिकित्सार्थं व्यवहर्तव्यम् | चक्रपाणि दत्त | ८ | ११ |
| प्रकृति | प्रकृति कारणम् । | चक्रपाणि दत्त | ८ | ८१ |
| प्रकृतिज्ञम् | शिष्यप्रकृतिं समीक्ष्याध्यापनकुशलम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| प्रकृतिम् | प्रकृतिमिति स्वभावम् । | चक्रपाणि दत्त | ८ | ९५ |
| प्रकृत | प्रकृत इति साध्यत्वेन प्रतिज्ञातः । | चक्रपाणि दत्त | ८ | ५४ |
| प्रकृत्यन्तरम् | प्रकृत्यन्तरम् कारणान्तरम् । | चक्रपाणि दत्त | ८ | ८१ |
| प्रकाशयति | प्रकाशयति बोधयति । | योगेन्द्रनाथ सेन | ८ | ३ |
| प्रकरणम् | प्रक्रियते साध्यत्वेनाधिक्रियत इति व्युत्पत्त्या प्रकरणं पक्षः । | चक्रपाणि दत्त | ८ | ५७ |
| प्रकरणम् | प्रकरणं पक्षम् । | योगेन्द्रनाथ सेन | ८ | ५७ |
| प्रमाणम् | प्रमीयतेऽनेनेति प्रमाणं ज्ञानमात्रमीप्सितम् । | चक्रपाणि दत्त | ८ | ७ |
| प्रपाणिः | प्रपाणिः कफोभ्यधस्तात् । | चक्रपाणि दत्त | ८ | ११७ |
| प्रधानम् | प्रधानं निःसंदिग्धार्थज्ञापकम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| प्रसादम् | प्रसादात् अनुग्रहात् । | ज्योतिषचन्द्र सरस्वति | ८ | ५ |
| प्रशान्तम् | प्रशान्तं सौम्याकृतिम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| प्रसहेति | प्रसहेत इति मारयेत इत्यर्थः | चक्रपाणि दत्त | ८ | ४४ |
| प्रशंसा | प्रशंसा गुणः । | योगेन्द्रनाथ सेन | ८ | ५५ |
| प्रततः | प्रततः प्रसृतः । | चक्रपाणि दत्त | ८ | ९८ |
| प्रततम् | प्रततं निरन्तरं विस्तरेण वा । | गंगाधर राय | ८ | ९८ |

| | | | | |
|---|---|---|---|---|
| प्रत्यवर: | प्रत्यवर: हीनगुण: । | चक्रपाणि दत्त | ८ | १९ |
| प्रवृत्ति: | प्रवृत्तय इति वार्ता: । | चक्रपाणि दत्त | ८ | १३ |
| प्रवृत्ति: | प्रवृत्ति: वाग्बुद्धिशरीराम्भ: । | गंगाधर राय | ८ | ७३ |
| पार्ष्णि: | पार्ष्णि: गुल्फयोरध: पादस्य पश्चाद्भाग: । | योगेन्द्रनाथ सेन | ८ | १०७ |
| पौष्टिकम् | पौष्टिकं पुष्टिजननम् । | योगेन्द्रनाथ सेन | ८ | १४ |
| पापीयस: | पापीयस: पापस्य सहाय: सहचर: । | योगेन्द्रनाथ सेन | ८ | १३ |
| पदम् | पदानि अर्थवन्ति वर्णात्मका: शब्दा: । | गंगाधर राय | ८ | २७ |
| पदम् | पदश्च नामाख्यातोपसर्गनिपाता: । | गंगाधर राय | ८ | ६४ |
| परि | परिशब्दो विशेषार्थम् । | चक्रपाणि दत्त | ८ | ९३ |
| परिदृष्टकर्माणम | पुन: पुन: सम्यग्दृष्टचिकित्सितम् | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| परिधि | परिधय: होमकुण्डचतु:पार्श्वे स्थाप्या: हस्तप्रमाणा पालाशादिदण्डा । | योगेन्द्रनाथ सेन | ८ | ९ |
| परिक्षिप: | परिक्षिप: परिणाह: । | गंगाधर राय | ८ | ११७ |
| परिधी | परिधयो हस्तप्रमाणा होमकुण्डचतु:पार्श्वे स्थाप्या: पालाशादिदण्डा उच्यन्ते । | चक्रपाणि दत्त | ८ | ९ |
| परिशठम् | परिशठमिति वञ्चनाप्रवृत्तम् । | चक्रपाणि दत्त | ८ | ५६ |
| परिशठम् | परिशठं वञ्चनाप्रयुक्तम् । | योगेन्द्रनाथ सेन | ८ | ५६ |
| परिक्षेपिकम् | परिक्षेपिकमिति प्रतिक्षेपिकशब्दम् । | चक्रपाणि दत्त | ८ | २० |
| परिक्षेप: | परिक्षेप: परिणाह: । | चक्रपाणि दत्त | ८ | ११७ |
| परिक्षेप: | परिक्षेप: विस्तार: । | योगेन्द्रनाथ सेन | ८ | ११७ |
| पण्ड | पण्डेन स्वपाण्डित्यप्रकाशनेन । | योगेन्द्रनाथ सेन | ८ | १५ |
| पुनरुक्तम् | अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् । | गंगाधर राय | ८ | ५४ |
| पुष्कलाभिधानम् | पुष्कलाभिधानमिति सम्यगर्थसमर्पकवाक्यम् | चक्रपाणि दत्त | ८ | ३ |
| पुष्कलाभिधानम् | पुष्कलं प्रशस्यतरं अभिधानम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| पुष्कलाभिधानम् | पुष्कलाभिधानं श्रेष्ठाभिधेयम् । | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| पय: | पयो दुग्धम् | गंगाधर राय | ८ | १३९ |
| पर्याप्तिम् | पर्याप्तिम् साध्यसिद्धिम् । | चक्रपाणि दत्त | ८ | १२८ |
| पर्यवदातम् | पर्यवदातं अमलम् | योगेन्द्रनाथ सेन | ८ | ४ |
| पर्यवदातम् | पर्यवदातं सम्यगधीतम् । | ज्योतिषचन्द्र सरस्वति | ८ | ४ |
| ऋजु | ऋजु: सरलम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| धातुवैषम्यम् | धातुवैषम्यमिति विषमतां गता धातव: । | चक्रपाणि दत्त | ८ | ८३ |
| धन्यम् | धन्यं पुण्यवत् । | योगेन्द्रनाथ सेन | ८ | १३ |
| धृतिम् | धृतिम् संतोष: धैर्यम् वा । | योगेन्द्रनाथ सेन | ८ | ८ |

| | | | | |
|---|---|---|---|---|
| रुक्ष: | रुक्ष: कर्कश: । | गंगाधर राय | ८ | ९८ |
| राग: | रागो रजोगुणात्मकस्तस्य पक्षा: कामो मत्सर: स्पृहा लोभ इति । | गंगाधर राय | ८ | ७३ |
| राग: | आसक्तिलक्षणो राग: । | गंगाधर राय | ८ | ७३ |
| राजद्विष्ट: | राज्ञो द्विष्टो राजद्विष्ट: । | चक्रपाणि दत्त | ८ | १३ |
| राजद्वेषी | यस्तु राजानं द्वेष्टि स राजद्वेषी । | चक्रपाणि दत्त | ८ | १३ |
| रोगभिग्जितीय | रोगभिषग्जितं चिकित्सितमधिकृत्य कृतोऽध्याय: रोगभिषग्जितीय: | चक्रपाणि दत्त | ८ | १ |
| रोगभिग्जितीय | रोगाणा भिषग्जितं चिकित्सितं तदधिकृत्य कृतं विमानं रोगभिषग्जितीयम् । | योगेन्द्रनाथ सेन | ८ | १ |
| स्त्रीप्रिया: | स्त्रीप्रिया: स्त्रीणां प्रिया: । | गंगाधर राय | ८ | १०९ |
| सत्त्वम् | सत्त्वम् मन: । | गंगाधर राय | ८ | १०२ |
| सक्त: | सक्त: बद्ध: । | चक्रपाणि दत्त | ८ | ९८ |
| सक्तस्वर: | सक्तस्वर: बद्ध: स्वर: । | योगेन्द्रनाथ सेन | ८ | ९८ |
| सक्तस्वर: | सक्तस्वर: अव्यक्त: । | गंगाधर राय | ८ | ९८ |
| सादृश्यम् | सादृश्यं साधर्म्यम् । | गंगाधर राय | ८ | ४२ |
| साम्यं भवति | साम्यं भवतीति परस्परतुल्यगुणता भवति । | चक्रपाणि दत्त | ८ | १०१ |
| शौचम् | शौचं बहिरन्त:शुचिता । | योगेन्द्रनाथ सेन | ८ | ८ |
| शौण्ड: | शुण्डा मद्यशाला तत्प्रचारी शौण्ड: । | चक्रपाणि दत्त | ८ | १३ |
| शौण्ड: | शौण्ड: मत्त: । | योगेन्द्रनाथ सेन | ८ | १३ |
| सौष्ठवम् | सौष्ठवं सुष्ठु कृतत्वम् । | योगेन्द्रनाथ सेन | ८ | १४ |
| सौष्ठवम् | सुष्ठुत्वं कर्त्रादीनां कार्यानुगुण योगित्वम् । | चक्रपाणि दत्त | ८ | ७८ |
| सौष्ठवम् | सौष्ठवं सुष्ठुत्वं साधुत्वमित्यर्थ: । | गंगाधर राय | ८ | ७८ |
| साधारण: | साधारण इति अनतिशीतोष्णवर्ष: । | चक्रपाणि दत्त | ८ | १२५ |
| साधना: | साधना: इति भेषजा: । | चक्रपाणि दत्त | ८ | ११८ |
| सार | सारशब्देन विशुद्धतरो धातु: उच्यते । | चक्रपाणि दत्त | ८ | १०२ |
| सारम् | सारं प्रसादरुपम् । | गंगाधर राय | ८ | ९६ |
| शास्त्रम् | शास्त्रम् आयुर्वेदतन्त्रम् । | ज्योतिषचन्द्र सरस्वति | ८ | ५ |
| शब्द | संकेतबलादर्थप्रकाशिका वर्णमाला उच्यते | चक्रपाणि दत्त | ८ | ३८ |
| शब्द | वर्णात्मक: लौकिकवैदिकसाधारणवाक्यरुप: | योगेन्द्रनाथ सेन | ८ | ३८ |
| शब्द: | श्रोत्रग्रहणो योऽर्थ: शब्द: । | गंगाधर राय | ८ | ३८ |
| शब्दसन्धि: | शब्दस्य वाक्ये योजनं शब्दसन्धि: । | चक्रपाणि दत्त | ८ | १५५ |
| शङ्ख : | शङ्खो ललाटैकदेश: । | गंगाधर राय | ८ | १०५ |
| शीलम् | शीलं सच्चरितम् । | योगेन्द्रनाथ सेन | ८ | ८ |

| | | | | |
|---|---|---|---|---|
| समिति | समिति सभा । | योगेन्द्रनाथ सेन | ८ | २३ |
| समिध: | समिध: पलाशादीनाम् । | योगेन्द्रनाथ सेन | ८ | ९ |
| सम | सम: अनीचोच्च: । | योगेन्द्रनाथ सेन | ८ | ७ |
| शर्म: | शर्म: सुखमारोग्यलक्षणम् । | योगेन्द्रनाथ सेन | ८ | १३ |
| समाहितम् | समाहितं संहतम् । | गंगाधर राय | ८ | १११ |
| समाम्नाय | समाम्नाय: मेलक: । | चक्रपाणि दत्त | ८ | ३८ |
| समाम्नाय: | समाम्नाय: उपदेश: । | योगेन्द्रनाथ सेन | ८ | ३८ |
| समारम्भ: | सम्यक् वाङ्मन:शरीराणां प्रवृत्तिरुपक्रम: । | गंगाधर राय | ८ | १२९ |
| समायोग: | समायोग: समवाय: । | गंगाधर राय | ८ | १२९ |
| समम् | समं यथायोग्यम् । | गंगाधर राय | ८ | ११६ |
| समरविक्रान्त योधिन: | समरे विक्रम्य युध्यन्तीति समरविक्रान्त योधिन:। | चक्रपाणि दत्त | ८ | ११० |
| समवेक्ष्य | समवेक्ष्य सम्यक् परीक्ष्य । | योगेन्द्रनाथ सेन | ८ | २१ |
| समय: | समय: नियमकरणम् । | योगेन्द्रनाथ सेन | ८ | ५४ |
| समय: | समयो नियमकरणम् । | गंगाधर राय | ८ | ५४ |
| संभाषा | संभाषा संभाषणम् । | योगेन्द्रनाथ सेन | ८ | ६ |
| संभव: | संभवति विद्यते अस्मादिति संभव: । | चक्रपाणि दत्त | ८ | ४९ |
| संभव: | संभव: कारणम् । | योगेन्द्रनाथ सेन | ८ | ४९ |
| संगतार्थम् | संगतार्थमिति प्रतिपादितार्थम् । | चक्रपाणि दत्त | ८ | ३ |
| संगतार्थम् | संगता: संगत्या उपपादिता: अर्था: । | योगेन्द्रनाथ सेन | ८ | ३ |
| संगतार्थम् | संगतार्थम् असंगतिरहितम् । | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| संहति: | संहतिरिति निबिडसन्धानतेत्यर्थ: । | चक्रपाणि दत्त | ८ | ११६ |
| संहतम् | संहतं निबिडम् । | गंगाधर राय | ८ | ९६ |
| संहर्ष: | संहर्ष: स्पर्धा । | चक्रपाणि दत्त | ८ | १५ |
| संधायसंभाषा | संधाय संधिं कृत्वा संभाषा संधायसंभाषा । | योगेन्द्रनाथ सेन | ८ | १६ |
| संसार्य | संसार्य संसरणं कारयित्वा । | योगेन्द्रनाथ सेन | ८ | ८४ |
| संवाद | सन्धायसंभाषा नये 'संवाद' इत्युच्यते । | चक्रपाणि दत्त | ८ | १६ |
| संवाहनम् | संवाहनम् अंगमर्दनम् । | योगेन्द्रनाथ सेन | ८ | ८७ |
| संवृद्धम् | संवृद्धं इति वर्धित: । | चक्रपाणि दत्त | ८ | ९३ |
| शर्म्यम् | शर्म्यं सुखकरम् । | योगेन्द्रनाथ सेन | ८ | १३ |
| सन्न: | सन्न: हीन: । | चक्रपाणि दत्त | ८ | ९८ |
| शेफ: | शेफ: शिश्न: । | गंगाधर राय | ८ | ११७ |
| सधर्माण: | सधर्माण: सदृशा: । | चक्रपाणि दत्त | ८ | ३६ |

| | | | | |
|---|---|---|---|---|
| शश्वत् | शश्वत् सर्वदा । | योगेन्द्रनाथ सेन | ८ | १४ |
| सूत्रम् | सूत्रं सूत्रणं संक्षेपेण अर्थानां ग्रहणम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| सूत्रम् | स्वल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् । अस्तोभमनवद्यश्च सूत्रं सूत्रविदो विदुः । | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| सुखावाप्तिः | सुखावाप्तिः इति अरोग्यावाप्तिः । | चक्रपाणि दत्त | ८ | ८४ |
| सुखावाप्तिः | सुखावाप्तिः इति आत्मगुणसुखप्राप्तिः । | चक्रपाणि दत्त | ८ | ९० |
| शुक्लम् | शुक्लं निर्दोषम् । | योगेन्द्रनाथ सेन | ८ | १३ |
| सुकुमारम् | सुकुमारं मृदुभूतम् । | गंगाधर राय | ८ | ९६ |
| शुण्डा | शुण्डा मद्यशाला । | चक्रपाणि दत्त | ८ | १३ |
| सुप्रणीताः | सुप्रणीताः सुष्ठुः निबद्धाः । | योगेन्द्रनाथ सेन | ८ | ३ |
| सुपरिहितम् | सुपरिहितमिति सुवेष्टितम् । | चक्रपाणि दत्त | ८ | ११ |
| सव्यभिचारः | सह व्यभिचारेण वर्त्तते इति सव्यभिचारः । | गंगाधर राय | ८ | ४५ |
| सव्यभिचारम् | सव्यभिचारमिति अनैकान्तिकमित्यर्थः । | चक्रपाणि दत्त | ८ | ४५ |
| स्फुटिताः | स्फुटिताः पाटिताः । | योगेन्द्रनाथ सेन | ८ | ९८ |
| स्कन्धः | स्कन्धः समूहः । | चक्रपाणि दत्त | ८ | १३७ |
| श्लक्ष्णः | श्लक्ष्णः अकर्कशः । | योगेन्द्रनाथ सेन | ८ | ९६ |
| श्लक्ष्णम् | श्लक्ष्णं मसृणम् । | योगेन्द्रनाथ सेन | ८ | १३ |
| स्मृतिः | स्मृतिः अनुभूतार्थस्मरणम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| स्थापना | स्थापयति सिद्धमर्थं परं प्रति साधयतीति | चक्रपाणि दत्त | ८ | ३१ |
| स्थापना | स्थापना स्थिरीकरणम् । | गंगाधर राय | ८ | ३१ |
| स्तनान्तरम् | स्तनान्तरं स्तनतटम् । | गंगाधर राय | ८ | ११७ |
| स्वाधारम् | स्वाधारमिति शोभनाभिधेयम् । | चक्रपाणि दत्त | ८ | ३ |
| स्वाधारम् | स्वाधारं सुष्ठु आधारः अधिकरणम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| स्वाधारम् | स्वाधारं सु सुन्दरः आधारः उपजीव्यत्वेन वेदादिः यस्य तत् । | ज्योतिषचन्द्र सरस्वति | ८ | ३ |
| स्वयम् | स्वयम् इति साक्षात् । | चक्रपाणि दत्त | ८ | ३९ |
| तत्त्वाभि निवेशिनम् | तत्त्वाभिनिवेशिनम् तत्त्वग्रहणे अवहितम् । | योगेन्द्रनाथ सेन | ८ | ८ |
| तत्त्वम् | तत्त्वम् लिंगम् । | चक्रपाणि दत्त | ८ | ३३ |
| तद्विद्याः | तद्विद्याः तच्छास्त्राध्यायिनः । | योगेन्द्रनाथ सेन | ८ | ६ |
| तद्विद्यसंभाषा | तच्छास्त्राध्यायिना सह संभाषणम् । | चक्रपाणि दत्त | ८ | ६ |
| तद्विद्यसंभाषा | समानविद्ययोरुभयोः तच्छास्त्रमधिकृत्य आलापः । | योगेन्द्रनाथ सेन | ८ | १५ |
| तमः | तमः अज्ञानम् । | योगेन्द्रनाथ सेन | ८ | ३ |

| | | | | |
|---|---|---|---|---|
| तम: | तम: अन्धकारम् । | योगेन्द्रनाथ सेन | ८ | ३ |
| तन्त्रकम् | तन्त्रकमिति प्रेरकं धारकं च । | चक्रपाणि दत्त | ८ | ११९ |
| तन्त्रकम् | तन्त्रकं नियामकम् । | गंगाधर राय | ८ | ११९ |
| तनु: | तनु: अस्थूल: । | योगेन्द्रनाथ सेन | ८ | ८ |
| तैलम् | तैलमिति तैलभूतं सर्षपस्नेहादि । | चक्रपाणि दत्त | ८ | १५० |
| तैलम् | तैलं तिलप्रभवस्नेह: । | गंगाधर राय | ८ | १५० |
| तुष्टि: | तुष्टि: परितोष: । | योगेन्द्रनाथ सेन | ८ | ९० |
| तुष्टि: | तुष्टि: परितोष: । | गंगाधर राय | ८ | ९० |
| वाद | वादशब्देन च इह विगृह्यपक्षप्रतिपक्षवचनमात्रमुच्यते | चक्रपाणि दत्त | ८ | २६ |
| वाद | संधायसंभाषया तु तत्त्वबुभुत्सो: वाद: उक्त: | चक्रपाणि दत्त | ८ | २६ |
| वाद | इह वादशब्देन विगृह्यवादोऽभिप्रेत: तत्त्वबुभुत्सुवादस्तु सन्धायसंभाषया एव । | चक्रपाणि दत्त | ८ | २८ |
| वार्ता | वार्ता रहस्य: । | योगेन्द्रनाथ सेन | ८ | १३ |
| वातोपद्रव: | वातोपद्रव: वातजनित उपद्रव: । | गंगाधर राय | ८ | १२७ |
| वचनम् | वचनं पूर्वपक्षोक्ति: । | योगेन्द्रनाथ सेन | ८ | १७ |
| वचनशक्ति: | वचनशक्तौ अर्थकीर्तनसामर्थ्ये । | चक्रपाणि दत्त | ८ | ५ |
| वचनशक्ति: | वचनशक्ति: वाक्पटुता । | योगेन्द्रनाथ सेन | ८ | ५ |
| वचनशक्तिहीन: | वचनशक्तिहीन: अर्थोक्तवाक्याक्षेपान्न पुनर्वक्तुं क्षमो भवतीति दृष्टम् । | चक्रपाणि दत्त | ८ | २१ |
| वर्तिक्रिया | वर्तिक्रिया वर्तिरुपदीर्घभक्ष्यकरणम् । | चक्रपाणि दत्त | ८ | १३५ |
| वर्णसमाम्नाय: | वर्णानां समानासमानानाम् आ सम्यङ् म्नाय इति वर्णसमाम्नाय: । | गंगाधर राय | ८ | ३८ |
| वैधर्म्यम् | वैधर्म्यं वैसादृश्यम् । | चक्रपाणि दत्त | ८ | ३६ |
| वैशारद्यम् | वैशारद्यमिति परवचनाभिभवपाण्डित्यम् । | चक्रपाणि दत्त | ८ | १५ |
| वैशारद्यम् | वैशारद्यं पाण्डित्यम् । | योगेन्द्रनाथ सेन | ८ | १५ |
| वृषणौ | वृषणौ मुष्कद्वयम् । | योगेन्द्रनाथ सेन | ८ | ११७ |
| वश: | वश: सामर्थ्यम् । | गंगाधर राय | ८ | ३५ |
| व्याहार: | व्याहार: वाच: । | गंगाधर राय | ८ | ९६ |
| व्यापार: | व्यापारस्तु प्रयत्नजनिता चेष्टा । | गंगाधर राय | ८ | ६९ |
| व्यापन्न: | व्यापन्न: विकल: । | योगेन्द्रनाथ सेन | ८ | ८ |
| व्यभिचार: | व्यभिचार: एकत्राव्यवस्था । | योगेन्द्रनाथ सेन | ८ | ४५ |
| व्यभिचार: | व्यभिचार: एकत्राव्यवस्था । | गंगाधर राय | ८ | ४५ |
| व्यसनम् | व्यसनं द्यूतस्त्रीमृगयादिकम् । | योगेन्द्रनाथ सेन | ८ | ८ |

| | | | | |
|---|---|---|---|---|
| द्वेषः | द्वेषश्च रजोगुणात्मकस्तस्य पक्षाः क्रोधः ईर्ष्यासूया द्रोहोऽमर्ष इति । | गंगाधर राय | ८ | ७३ |
| द्वेषः | अमर्षलक्षणो द्वेषः । | गंगाधर राय | ८ | ७३ |
| क्षामः | क्षामः क्षीणः । | गंगाधर राय | ८ | ९८ |
| क्षोभः | क्षोभः मनसोऽकस्मात् क्षुब्धता । | गंगाधर राय | ८ | ९६ |
| क्षौमम् | क्षौमं पट्टवस्त्रम् । | योगेन्द्रनाथ सेन | ८ | ९ |
| क्षारः | क्षारः दग्धभस्मकृतः क्षारः । | गंगाधर राय | ८ | १४१ |
| योनिः | योनिः प्रकृतिः समवायिकारणम् । | योगेन्द्रनाथ सेन | ८ | ७१ |
| युक्ति | युक्तिः उपपत्तिः । | योगेन्द्रनाथ सेन | ८ | ३ |
| युक्तिः | युक्तिः योगः । | योगेन्द्रनाथ सेन | ८ | ८७ |

## पाठभेदाः

टीकाकारैः अपि टीकां लिखद्भिः मूलसूत्रे नैकवारं पाठभेदाः स्वीकृताः ।

अस्मिन् प्रकरणे विमानस्थाने सर्वस्मिन् अध्ययने पाठभेदाः सङ्कलिताः ।

### अध्याय १

सूत्र ३ :

चक्रपाणि : निमित्तपूर्वरुपरुपोपशयसंख्याप्राधान्यविधिविकल्पबलकालविशेषाननुप्रविश्यानन्तरं...।

गंगाधर : निमित्तपूर्वरुपरुपोपशयसंख्याप्राधान्यविधिविकल्पबलकालविशेषानभिनिविश्य...।

योगेन्द्रनाथ सेन : निमित्तपूर्वरुपरुपोपशयसंख्याप्राधान्यविधिविकल्पबलकालविशेषानभिनिविश्य...।

ज्योतिषचन्द्र सरस्वति

: निमित्तपूर्वरुपरुपोपशयसंख्याप्राधान्यविधिविकल्पबलकालविशेषाननुप्रविश्यानन्तरं...।

सूत्र ३ :

चक्रपाणि : दोषभेषजदेशकालबलशरीरसाराहारसात्म्यसत्त्वप्रकृतिवयसां...।

गंगाधर : रसद्रव्यदोषविकारभेषजदेशकालबलशरीरसाराहारसात्म्यसत्त्वप्रकृतिवयसां...।

योगेन्द्रनाथसेन : रसद्रव्यदोषविकारभेषजदेशकालबलशरीरसाराहारसात्म्यसत्त्वप्रकृतिवयसां...।

ज्योतिषचन्द्रसरस्वति : रसद्रव्यदोषभेषजदेशकालबलशरीरसाराहारसात्म्यसत्त्वप्रकृतिवयसां...।

सूत्र ३ : चक्रपाणि : दोषादिमानज्ञानायत्तत्वात् क्रियायाः ।

गंगाधर : दोषादिमानज्ञानायत्तत्वात् क्रियायाः ।

योगेन्द्रनाथसेन : रसादिमानज्ञानायत्तत्वात् क्रियायाः ।

ज्योतिषचन्द्रसरस्वति : रसादिमानज्ञानायत्तत्वात् क्रियायाः ।

सूत्र ३ : चक्रपाणि : न ह्यमानज्ञो दोषादीनां...।

गंगाधर : न ह्यमानज्ञो दोषादीनां...।

योगेन्द्रनाथ सेन : न ह्यमानज्ञो रसादीनां...।

ज्योतिषचन्द्र सरस्वति : न ह्यमानज्ञो रसादीनां...।

सूत्र ३ : चक्रपाणि : तस्माद् दोषादिमानज्ञानार्थं...।

गंगाधर : तस्माद् दोषादिमानज्ञानार्थं...।

योगेन्द्रनाथ सेन : तस्माद् रसादिमानज्ञानार्थं...।

ज्योतिषचन्द्र सरस्वति : तस्माद् रसादिमानज्ञानार्थं...।

सूत्र ६ : चक्रपाणि : मधुराम्ललवणास्त्वेनं शमयन्ति...।

गंगाधर : मधुराम्ललवणास्तं शमयन्ति...।

योगेन्द्रनाथसेन : मधुराम्ललवणास्त्वेनं शमयन्ति...।

ज्योतिषचन्द्रसरस्वति : मधुराम्ललवणास्त्वेनं शमयन्ति...।

सूत्र ६ : चक्रपाणि : मधुरतिक्तकषायास्त्वेनच्छमयन्ति ...।

गंगाधर : मधुरतिक्तकषाया: पुनरेनत् शमयन्ति...।

योगेन्द्रनाथसेन : मधुरतिक्तकषाया: पुनरेनच्छमयन्ति...।

ज्योतिषचन्द्रसरस्वति : मधुरतिक्तकषाया: पुनरेनच्छमयन्ति...।

सूत्र ८ : चक्रपाणि : संसर्गविकल्पविस्तरो ह्येषामपरिसंख्येयो भवति...।

गंगाधर : संसर्गविकल्पविस्तरो ह्येषामपरिसंख्येयभेदो भवति...।

योगेन्द्रनाथसेन : संसर्गविकल्पविस्तरो ह्येषामपरिसंख्येयो भवति...।

ज्योतिषचन्द्रसरस्वति : संसर्गविकल्पविस्तरो ह्येषामपरिसंख्येयो भवति...।

सूत्र १० : चक्रपाणि : परस्परेण चोपहतानामन्यैश्च...।

गंगाधर : परस्परेण चोपहतप्रकृतिकानाम् अन्यैश्च...।

योगेन्द्रनाथ सेन : परस्परेण चोपहतप्रकृतिकानामन्यैश्च...।

ज्योतिषचन्द्र सरस्वति : परस्परेण चोपहतप्रकृतिकानाम् अन्यैश्च...।

सूत्र १३ : चक्रपाणि : तैलसर्पिमधूनि वातपित्तश्लेष्मप्रशमनार्थानि द्रव्याणि भवन्ति ।

गंगाधर : तैलसर्पिमधूनि वातपित्तश्लेष्मप्रशमनानि द्रव्याणि भवन्ति ।

योगेन्द्रनाथ सेन : तैलसर्पिमधूनि वातपित्तश्लेष्मप्रशमनानि द्रव्याणि भवन्ति ।

ज्योतिषचन्द्र सरस्वति : तैलसर्पिमधूनि वातपित्तश्लेष्मप्रशमनानि द्रव्याणि भवन्ति ।

सूत्र १४ : चक्रपाणि : तत्र तैलं स्नेहौष्ण्यगौरवोपपन्नत्वाद्वातं जयति ...।

गंगाधर : तत्र तैलं स्नेहोष्ण्यगौरवोपपन्नत्वाद्वातं शमयति...।

योगेन्द्रनाथ सेन : तत्र तैलं स्नेहौष्ण्यगौरवोपपन्नत्वाद्वातं जयति ...।

ज्योतिषचन्द्र सरस्वति : तत्र तैलं स्नेहौष्ण्यगौरवोपपन्नत्वाद्वातं जयति ...।

सूत्र १४ : चक्रपाणि : माधुर्याच्छैत्यान्मन्दत्वाच्च ।

गंगाधर : माधुर्यात् शैत्यान्मन्दवीर्यत्वाच्च ।

योगेन्द्रनाथ सेन : माधुर्यात् । शैत्यात् । मन्दवीर्यत्वाच्च ।

ज्योतिषचन्द्र सरस्वति : माधुर्यात् शैत्यान्मन्दवीर्यत्वाच्च ।

सूत्र १४ : चक्रपाणि : श्लेष्मा हि स्निग्धो मन्दो मधुरश्च ।

गंगाधर : श्लेष्मा हि स्निग्धो मन्दो मधुरश्चेति विपरीतगुण: ।

योगेन्द्रनाथ सेन : श्लेष्मा हि स्निग्धो मन्दो मधुरश्चेति विपरीतगुण: ।

ज्योतिषचन्द्र सरस्वति : श्लेष्मा हि स्निग्धो मन्दो मधुरश्चेति विपरीतगुण: ।

सूत्र १५ : चक्रपाणि : अथ खलु त्रीणि द्रव्याणि नात्युपयुञ्जीताधिकमन्येभ्यो...।

गंगाधर : अथ खलु त्रीणि द्रव्याणि नाभ्युपयुञ्जीताधिकमन्येभ्यो...।

योगेन्द्रनाथ सेन : अथ खलु त्रीणि द्रव्याणि नाभ्युपयुञ्जीताधिकमन्येभ्यो...।

ज्योतिषचन्द्र सरस्वति : अथ खलु त्रीणि द्रव्याणि नात्युपयुञ्जीताधिकमन्येभ्यो...।

सूत्र १६ : चक्रपाणि : न च वातप्रशमनायोपकल्पन्ते

गंगाधर : न च वातप्रशमनाय कल्पन्ते

योगेन्द्रनाथ सेन : न च वातप्रशमनाय कल्पन्ते ।

ज्योतिषचन्द्र सरस्वति : न च वातप्रशमनाय कल्पन्ते ।

सूत्र १६ : चक्रपाणि : पिप्पलीर्नात्त्युपयुञ्जीत ।

गंगाधर : पिप्पलीर्नाभ्युपयुञ्जीत ।

योगेन्द्रनाथ सेन : पिप्पलीर्नात्त्युपयुञ्जीत ।

ज्योतिषचन्द्र सरस्वति : पिप्पलीर्नात्त्युपयुञ्जीत ।

सूत्र १७ : चक्रपाणि : क्षार: पुनरौष्ण्यतैक्ष्ण्यलाघवोपपन्न:

गंगाधर : क्षार: पुनरौष्ण्यतैक्ष्ण्यलवणोपपन्न:

योगेन्द्रनाथ सेन : क्षार: पुनरौष्ण्यतैक्ष्ण्यलवणोपपन्न:

ज्योतिषचन्द्र सरस्वति : क्षार: पुनरौष्ण्यतैक्ष्ण्यलवणोपपन्न:

सूत्र १७ : चक्रपाणि : क्लेदयत्यादौ पश्चाद्विशोषयति स पचनदहनभेदनार्थमुपयुज्यते

गंगाधर : क्लेदयति त्वादौ पश्चादुपशोषयति दहति पचति भिनत्ति संघातम् । स पचनदहनभेदनार्थमुपयुज्यते ।

योगेन्द्रनाथ सेन : क्लेदयत्यादौ पश्चाद्विशोषयति दहति पचति भिनत्ति संघातम् । स पचनदहनभेदनार्थं प्रयुज्यते ।

ज्योतिषचन्द्र सरस्वति : क्लेदयत्यादौ पश्चाद्विशोषयति दहति पचति भिनत्ति संघातम् । स पचनदहनभेदनार्थं प्रयुज्यते ।

सूत्र १७ : चक्रपाणि : ये ह्येनं

गंगाधर : ये ह्येनन्तु

योगेन्द्रनाथ सेन : य एनं

ज्योतिषचन्द्र सरस्वति : य एनं

सूत्र १७ : चक्रपाणि : त आन्ध्यषाण्ढयखालित्यपालित्यभाजो...।

गंगाधर : तेऽप्यान्ध्यषाण्ढयखालित्यभाजो...।

योगेन्द्रनाथ सेन : त आन्ध्यषाण्ढयखालित्यपालित्यभाजो...।

ज्योतिषचन्द्र सरस्वति : त आन्ध्यषाण्ढयखालित्यपालित्यभाजो...।

सूत्र १७ : चक्रपाणि : तस्मात् क्षारं नात्युपयुञ्जीत ।

गंगाधर : तस्मात् क्षारं नाभ्युपयुञ्जीत ।

योगेन्द्रनाथ सेन : तस्मात् क्षारं नात्युपयुञ्जीत ।

ज्योतिषचन्द्र सरस्वति : तस्मात् क्षारं नात्युपयुञ्जीत ।

सूत्र १८ : चक्रपाणि : तद्रोचनपाचनोपक्लेदन।

गंगाधर : तद्रोचनपचनोपक्लेदन...।

योगेन्द्रनाथ सेन : तद्रोचनपाचनोपक्लेदन...।

ज्योतिषचन्द्र सरस्वति : तद्रोचनपाचनोपक्लेदन।

सूत्र १८ : चक्रपाणि : ते हि पयसाऽपि सह लवणमश्नन्ति ।

गंगाधर : ते हि पयसापि सह सदा लवणमश्नन्ति ।

योगेन्द्रनाथ सेन : ते हि पयसापि सह सदा लवणमश्नन्ति ।

ज्योतिषचन्द्र सरस्वति : ते हि पयसापि सह सदा लवणमश्नन्ति ।

सूत्र १८ : चक्रपाणि : तस्माल्लवणं नात्युपयुञ्जीत ।

गंगाधर : तस्माल्लवणं नाभ्युपयुञ्जीत ।

योगेन्द्रनाथ सेन : तस्माल्लवणं नात्युपयुञ्जीत ।

ज्योतिषचन्द्र सरस्वति : तस्माल्लवणं नात्युपयुञ्जीत ।

सूत्र १८ : चक्रपाणि : ये ह्यतिलवणसात्म्या: पुरुषास्तेषामपि खालित्यपालित्यानि तथा वलयश्चाकाले ।

गंगाधर : ये ह्यतिलवणसात्म्या: पुरुषास्तेषामपि खालित्यपालित्यानि वलयश्चाकाले भवन्ति ।

योगेन्द्रनाथ सेन : ये ह्यतिलवणसात्म्या: पुरुषास्तेषामपि खालित्यपालित्यानि वलयश्चाकाले

ज्योतिषचन्द्र सरस्वति : ये ह्यतिलवणसात्म्या: पुरुषास्तेषामपि खालित्येन्द्रलुप्तपालित्यानि वलयश्चाकाले

सूत्र १९ : चक्रपाणि : सात्म्यमपि हि क्रमेणोपनिवर्त्यमानमदोषमल्पदोषं वा भवति ।

गंगाधर : सात्म्यमपि हि क्रमान्निवर्त्यमानमदोषमल्पदोषं वा भवति ।

योगेन्द्रनाथ सेन : सात्म्यमपि हि क्रमेणोपनिवर्त्यमानमदोषमल्पदोषं वा भवति ।

ज्योतिषचन्द्र सरस्वति : सात्म्यमपि हि क्रमेणोपनिवर्त्यमानमदोषमल्पदोषं वा भवति ।

सूत्र २० : चक्रपाणि : सर्वरसमपि च सात्म्यमुपपन्न: प्रकृत्याद्युपयोक्त्रष्टमानि सर्वाण्याहार...।

गंगाधर : सर्वरसमपि द्रव्यं सात्म्यम् उपपन्नं सर्वाण्याहार...।

योगेन्द्रनाथ सेन : सर्वरसमपि सात्म्यमुपपन्नं सर्वाण्याहार...।

ज्योतिषचन्द्र सरस्वति : सर्वरसमपि सात्म्यमुत्पन्नं सर्वाण्याहार...।

सूत्र २२ :  चक्रपाणि : संस्कारो हि गुणान्तराधानमुच्यते ।

गंगाधर : संस्कारो हि गुणाधानमुच्यते ।

योगेन्द्रनाथ सेन : संस्कारो हि गुणान्तराधानमुच्यते ।

ज्योतिषचन्द्र सरस्वति : संस्कारो हि गुणान्तराधानमुच्यते ।

सूत्र २२ : चक्रपाणि : ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवासनभावनादिभिः ...।

गंगाधर : ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवशेन भावनादिभिः ...।

योगेन्द्रनाथ सेन : ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवशेन भावनादिभिः ...।

ज्योतिषचन्द्र सरस्वति : ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवशेन भावनादिभिः

सूत्र २२ : चक्रपाणि : परिग्रहः पुनः प्रमाणग्रहणमेकैकश्येनाहारद्रव्याणाम् ।

गंगाधर : परिग्रहः पुनः प्रमाणग्रहणमेकैकत्वेनाहारद्रव्याणाम् ।

योगेन्द्रनाथ सेन : परिग्रहः पुनः प्रमाणग्रहणमेकैकत्वेनाहारद्रव्याणाम् ।

ज्योतिषचन्द्र सरस्वति : परिग्रहः पुनः प्रमाणग्रहणमेकैकत्वेनाहारद्रव्याणाम् ।

सूत्र २५ : चक्रपाणि : श्लेष्माणं परिह्रासयति ...।

गंगाधर :श्लेष्माणञ्च परिशोषयति...।

योगेन्द्रनाथ सेन : श्लेष्माणं च परिशोषयति...।

ज्योतिषचन्द्र सरस्वति : श्लेष्माणं परिशोषयति ।

सूत्र २५ : चक्रपाणि : शरीरमुपचिनोति दृढीकरोतीन्द्रियाणि बलाभिवृद्धिमुपजनयति

गंगाधर : दृढीकरोति शरीरोपचयं बलाभिवृद्धिञ्चोपजनयति

योगेन्द्रनाथ सेन : शरीरमुपचिनोति दृढीकरोतीन्द्रियाणि बलाभिवृद्धिमुपजनयति

ज्योतिषचन्द्र सरस्वति : शरीरमुपचिनोति दृढीकरोतीन्द्रियाणि बलाभिवृद्धिमुपजनयति

सूत्र २५ : चक्रपाणि : मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुरेव विवर्धयति केवलं

गंगाधर : मात्रावद्धि भुक्तं वातपित्तकफानप्रपीडयदायुरेव विवर्द्धयति केवलं

योगेन्द्रनाथ सेन : मात्रावद्धि भुक्तं वातपित्तकफान् अप्रपीडयदायुरेव विवर्धयति केवलं

ज्योतिषचन्द्र सरस्वति : मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुरेव विवर्धयति केवलं

सूत्र २५ : चक्रपाणि : विरुद्धवीर्याहारजैर्विकारैर्नोपसृज्यते

गंगाधर : विरुद्धवीर्याहारजैविकारैर्नायमुपसृज्यते

योगेन्द्रनाथ सेन : विरुद्धवीर्याहारजैर्विकारैर्नोपसृज्यते

ज्योतिषचन्द्र सरस्वति : विरुद्धवीर्याहारजैर्विकारैर्नोपसृज्यते

सूत्र २५ : चक्रपाणि : अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च ।

गंगाधर : अतिद्रुतं हि भुञ्जानस्य तत्स्नेहनस्वादनभोजनस्याप्रतिष्ठानं ।

योगेन्द्रनाथ सेन : अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च ।

ज्योतिषचन्द्र सरस्वति : अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च

सूत्र २५ : चक्रपाणि : नातिविलम्बितमश्नीयात्.....विषमं च पच्यते

गंगाधर : नातिविलम्बितमश्नीयात्.....विषमपाकश्च भवति ।

योगेन्द्रनाथ सेन : नातिविलम्बितमश्नीयात्.....विषमपाकं च भवति ।

ज्योतिषचन्द्र सरस्वति : नातिविलम्बितमश्नीयात्.....विषमं च पच्यते

सूत्र २६ : चक्रपाणि : वेद यो देशकालौ च शरीरं च स नो भिषक् ।

गंगाधर : वेद यो देशकालौ च शरीरश्च स ना भिषक् ।

योगेन्द्रनाथ सेन : वेद यो देशकालौ च शरीरं च स ना भिषक् ।

ज्योतिषचन्द्र सरस्वति : वेद यो देशकालौ च शरीरं च स नो भिषक् ।

## अध्याय २

सूत्र ४ : चक्रपाणि : प्रकृत्यादीनामष्टानामाहारविधिविशेषायतनानां प्रविभक्तफलत्वात् ।

गंगाधर : प्रकृत्यादीनामष्टानामाहारविधिविशेषायतनानां प्रविभक्तफलकत्वात् ।

योगेन्द्रनाथ सेन : प्रकृत्यादीनामष्टानामाहारविधिविशेषायतनानां प्रविभक्तफलकत्वात् ।

ज्योतिषचन्द्र सरस्वति :

प्रकृत्यादीनामष्टानामाहारविधिविशेषायतनानां प्रविभक्तफलकत्वात् ।

सूत्र ६ : चक्रपाणि : अनतिगौरवमुदरस्य ।

गंगाधर :  नातिगौरवम् उदरस्य ।

योगेन्द्रनाथ सेन: अनतिगौरवमुदरस्य ।

ज्योतिषचन्द्र सरस्वति : अनतिगौरवमुदरस्य ।

सूत्र ६ : चक्रपाणि : स्थानासनशयनगमनोच्छ्वासप्रश्वासहास्यसंकथासु सुखानुवृत्तिः ।

गंगाधर :  स्थानासनशयनगमनोच्छ्वासहास्यसंकथासु सुखानुवृत्तिः ।

योगेन्द्रनाथ सेन: स्थानासनशयनगमनोच्छ्वासप्रश्वासहास्यसंकथासु सुखानुवृत्तिः ।

ज्योतिषचन्द्र सरस्वति : स्थानासनशयनगमनोच्छ्वासप्रश्वासहास्यसंकथासु सुखानुवृत्तिः ।

सूत्र ७ : चक्रपाणि : अनायुष्यवृष्यमनौजस्यम् ।

गंगाधर :  अनायुष्यमवृष्यमनौजस्यम् ।

योगेन्द्रनाथ सेन: अनायुष्यमवृष्यमनौजस्यम् ।

ज्योतिषचन्द्र सरस्वति : अनायुष्यमवृष्यमनौजस्यम् ।

सूत्र ७ : चक्रपाणि : शरीरमनोबुद्धीन्द्रियोपघातकरम् ।

गंगाधर :  मनोबुद्धीन्द्रियोपघातकरम् ।

योगेन्द्रनाथ सेन: मनोबुद्धीन्द्रियोपघातकरम् ।

ज्योतिषचन्द्र सरस्वति : मनोबुद्धीन्द्रियोपघातकरम् ।

सूत्र ७ : चक्रपाणि : वातविकाराणामायतनमाचक्षते ।

गंगाधर :  वातजानां विकाराणामायतनमाचक्षते ।

योगेन्द्रनाथ सेन: वातजानां विकाराणामायतनमाचक्षते ।

ज्योतिषचन्द्र सरस्वति : वातजानां विकाराणामायतनमाचक्षते ।

सूत्र ७ : चक्रपाणि : द्रवैस्तृप्तिमापद्यते ।

गंगाधर :  द्रवैस्तृप्तिमापद्यते ।

योगेन्द्रनाथ सेन: द्रवैस्तृप्तिं गच्छति ।

ज्योतिषचन्द्र सरस्वति : द्रवैस्तृप्तिमापद्यते ।

सूत्र ७ : चक्रपाणि :

तत्र वात: शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमाग्निवैषम्यपार्श्वपृष्ठकटिग्रहसिराकुञ्चनस्तम्भनानि करोति ।

गंगाधर : तत्र वात: शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमाग्निवैषम्यसिराकुञ्चनसंस्तम्भनानि करोति ।

योगेन्द्रनाथ सेन:

तत्र वात: शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमाग्निवैषम्यपार्श्वपृष्ठकटिग्रहसिराकुञ्चनसंस्तम्भनानि करोति

ज्योतिषचन्द्र सरस्वति :

तत्र वात: शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमाग्निवैषम्यपार्श्वपृष्ठकटिग्रहसिराकुञ्चनस्तम्भनानि करोति ।

सूत्र ७ : चक्रपाणि : पित्तं पुनर्ज्वरातीसारान्तर्दाहतृष्णामदभ्रमप्रलपनानि ।

गंगाधर : पित्तं पुनर्ज्वरातीसारान्तर्दाहतृष्णामदभ्रमप्रलपनानि ।

योगेन्द्रनाथ सेन : पित्तं पुनर्ज्वरातीसारान्तर्दाहतृष्णामदभ्रमप्रलापान् ।

ज्योतिषचन्द्र सरस्वति : पित्तं पुनर्ज्वरातीसारान्तर्दाहतृष्णामदभ्रमप्रलपनानि ।

सूत्र ८ : चक्रपाणि : न च केवलमतिमात्रमेवाहारराशिमामप्रदोषकरमिच्छन्ति ।

गंगाधर : न केवलमतिमात्रमेवाहारराशिमामप्रदोषकारणमिच्छन्ति ।

योगेन्द्रनाथ सेन: न च केवलमतिमात्रमेवाहारराशिमामप्रदोषकरमिच्छन्ति ।

ज्योतिषचन्द्र सरस्वति : न च केवलमतिमात्रमेवाहारराशिमामप्रदोषकरमिच्छन्ति ।

सूत्र ८ : चक्रपाणि : अपि तु खलु गुरुरुक्षशीतशुष्कद्विष्टविष्टम्भिविदाह्यशुचिविरुद्धानामकाले ।

गंगाधर : अपि तु खलु गुरुरुक्षशीतशुष्कविष्टम्भिविदाह्यशुचिविरुद्धानामकाले ।

योगेन्द्रनाथ सेन: अपि तु खलु गुरुरुक्षशीतशुष्कद्विष्टविष्टम्भिविदाह्यशुचिविरुद्धानामकाले

ज्योतिषचन्द्रसरस्वति:

अपि तु खलु गुरुरुक्षशीतशुष्कद्विष्टविष्टम्भिविदाह्यशुचिविरुद्धानामकाले

सूत्र ९ : चक्रपाणि : चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै: ।

गंगाधर : चिन्ताशोकभयक्रोधदु:खमोहप्रजागरै:।

योगेन्द्रनाथ सेन: चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै:।

ज्योतिषचन्द्र सरस्वति : चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै:।

सूत्र ९ : चक्रपाणि : चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै: ।

गंगाधर : चिन्ताशोकभयक्रोधदु:खमोहप्रजागरै:।

योगेन्द्रनाथ सेन: चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै:।

ज्योतिषचन्द्र सरस्वति : चिन्ताशोकभयक्रोधदु:खशय्याप्रजागरै:।

सूत्र १० : चक्रपाणि : तं द्विविधमामप्रदोषमाचक्षते भिषज: विसूचिकाम् अलसकं च ।

गंगाधर : तं द्विविधमामप्रदोषमाचक्षते भिषजो विसूचिकामलसश्च ।

योगेन्द्रनाथ सेन: तं द्विविधमामप्रदोषमाचक्षते भिषज: विसूचिकाम् अलसकं च ।

ज्योतिषचन्द्र सरस्वति : तं द्विविधमामप्रदोषमाचक्षते भिषज: विसूचिकाम् अलसक: च ।

सूत्र १२ : चक्रपाणि : ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयत्यतिमात्राणि ।

गंगाधर : ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिसंदर्शयत्यतिमात्राणि ।

योगेन्द्रनाथ सेन: ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयत्यतिमात्राणि ।

ज्योतिषचन्द्र सरस्वति : ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयत्यतिमात्राणि ।

सूत्र १२ : चक्रपाणि : ततस्तं दण्डालसकमसाध्यं ब्रुवते ।

गंगाधर : अतस्तमलसकमसाध्यं ब्रुवते ।

योगेन्द्रनाथ सेन: अतस्तमलसकमसाध्यं ब्रुवते ।

ज्योतिषचन्द्र सरस्वति : अतस्तमलसकमसाध्यं ब्रुवते ।

सूत्र १२ : चक्रपाणि : पुनरामदोषमामविषमित्याचक्षते ।

गंगाधर : पुनरेवं दोषम् आमविषमित्याचक्षते ।

योगेन्द्रनाथ सेन: पुनरेवं दोषम् आमविषमित्याचक्षते ।

ज्योतिषचन्द्र सरस्वति : पुनरेवं दोषम् आमविषमित्याचक्षते ।

सूत्र १२ : चक्रपाणि : तत: स्वेदनवर्तिप्रणिधानाभ्याम् ।

गंगाधर : तत: छेदनवर्तिप्रणिधानाभ्याम् ।

योगेन्द्रनाथ सेन: तत: स्वेदनवर्तिप्रणिधानाभ्याम् ।

ज्योतिषचन्द्र सरस्वति : तत: स्वेदनवर्तिप्रणिधानाभ्याम् ।

सूत्र १३ : चक्रपाणि : विमुक्तामप्रदोषस्य पुन: ।

गंगाधर : अनुद्रिक्तामप्रदोषस्य पुन: ।

योगेन्द्रनाथ सेन: विमुक्तामप्रदोषस्य पुन: ।

ज्योतिषचन्द्र सरस्वति : विमुक्तामप्रदोषस्य पुन: ।

सूत्र १३ : चक्रपाणि : पक्व: सर्वाश्रयं पश्चाद्धमनीभि: प्रपद्यते ।

गंगाधर : पक्व: सर्वशयं पश्चाद्धमनीभि: प्रपद्यते ।

योगेन्द्रनाथ सेन: पक्व: सर्वाशयं पश्चाद्धमनीभि: प्रपद्यते ।

ज्योतिषचन्द्र सरस्वति : पक्व: सर्वाशयं पश्चाद्धमनीभि: प्रपद्यते ।

## अध्याय ३

सूत्र ४ : चक्रपाणि : दिशां चाप्रकृतिभूतानामृतुवैकारिका: भावा:...।

गंगाधर : दिशाश्च प्रकृतिभूतानाम् ऋतुवैकारिका: भावा:...।

योगेन्द्रनाथ सेन : दिशां च प्रकृतिभूतानामृतुवैकारिका: भावा:...।

ज्योतिषचन्द्र सरस्वति : दिशां च प्रकृतिभूतानामृतुवैकारिका: भावा:...।

सूत्र ४ : चक्रपाणि: ...भूमेर्विरसीभावादुद्धरध्वं सौम्य !....।

गंगाधर : ...भूमेर्विरसीभावादुद्धर सौम्य ....।

योगेन्द्रनाथ सेन : ...भूमेर्विरसीभावादुद्धर सौम्य ....।

ज्योतिषचन्द्र सरस्वति : ...भूमेर्विरसीभावादुद्धरध्वं सौम्य....।

सूत्र ७ : चक्रपाणि: उदकं तु....अपक्रान्तजलचरविहङ्गमुपक्षीणजलेशयम्...।

गंगाधर : उदकं तु....अपक्रान्तजलचरविहङ्गमुपक्षीणजलाशयम्...।

योगेन्द्रनाथ सेन : उदकं तु....अपक्रान्तजलचरविहङ्गमुपक्षीणजलेशयम्...।

ज्योतिषचन्द्र सरस्वति : उदकं तु....अपक्रान्तजलचरविहङ्गमुपक्षीणजलेशयम्...।

सूत्र ७ : चक्रपाणि: ...प्रततोल्कापातनिर्घातभूमिकम्पमतिभयारावरुपं....।

गंगाधर : ...प्रततोल्कापातनिर्घातभूमिकम्पश्च प्रतिभयावाररुपं....।

योगेन्द्रनाथ सेन : ...प्रततोल्कापातनिर्घातभूमिकम्पं चातिभयारावरुपं....।

ज्योतिषचन्द्र सरस्वति : ...प्रततोल्कापातनिर्घातभूमिकम्पश्च प्रतिभयारावरुपं....।

सूत्र १० : चक्रपाणि: विद्याद्दुष्परिहार्यत्वाद्गरीयस्तरमर्थवित् ।।

गंगाधर : विद्यादपरिहार्यत्वाद्गरीयः परमार्थवित् ।।

योगेन्द्रनाथ सेन : विद्यादपरिहार्यत्वाद्गरीयः परमार्थवित् ।।

ज्योतिषचन्द्र सरस्वति : विद्यादपरिहार्यत्वाद्गरीयः परमार्थवित् ।।

सूत्र २० : चक्रपाणि: तत उद्ध्वंसन्ते जनपदाः स्पृश्याभ्यवहार्यदोषात् ।

गंगाधर : तत उद्ध्वंसन्ते जनपदाः स्पर्श्याभ्यवहार्यदोषात् ।

योगेन्द्रनाथ सेन : तत उद्ध्वंसन्ते जनपदाः स्पर्श्याभ्यवहार्यदोषात् ।

ज्योतिषचन्द्र सरस्वति : तत उद्ध्वंसन्ते जनपदाः स्पर्श्याभ्यवहार्यदोषात् ।

सूत्र २० : चक्रपाणि: तन्मूलं वाऽसत्कर्म पूर्वकृतम्...।

गंगाधर : तन्मूलश्चासत्कर्म पूर्वकृतम्...।

योगेन्द्रनाथ सेन : तन्मूलं चासत्कर्म पूर्वकृतम्...।

ज्योतिषचन्द्र सरस्वति : तन्मूलं चासत्कर्म पूर्वकृतम्...।

सूत्र २१ : चक्रपाणि: येऽतिप्रवृद्धलोभक्रोधमोहमानास्ते...।

गंगाधर : येऽतिप्रवृद्धलोभरोषमानास्ते...।

योगेन्द्रनाथ सेन : येऽतिप्रवृद्धलोभक्रोधमानास्ते...।

ज्योतिषचन्द्र सरस्वति : येऽतिप्रवृद्धलोभक्रोधमोहमानास्ते...।

सूत्र २३ : चक्रपाणि: नियतप्रत्ययोपलम्भादनियताश्चापरे ।

गंगाधर : नियतप्रत्ययोपलम्भान्नियताश्च परेऽनियतप्रत्ययोपलम्भादनियताश्च परे ।

योगेन्द्रनाथ सेन : पाठः नास्ति ।

ज्योतिषचन्द्र सरस्वति : नियतप्रत्ययोपलम्भादनियताश्चापरे ।

सूत्र २४ : चक्रपाणि: तेषामुदारसत्त्वगुणकर्मणामचिन्त्यरसवीर्यविपाकप्रभावगुणसमुदितानि...।

गंगाधर :

तेषामुदारसत्त्वगुणे कर्मणां धर्मणामचिन्त्यत्वात् रसवीर्यविपाकप्रभावगुणसमुदितानि...।

योगेन्द्रनाथ सेन :

तेषामुदारसत्त्वगुणे कर्मणां धर्मणां चाचिन्त्यत्वाद्रसवीर्यविपाकप्रभावगुणसमुदितानि...।

ज्योतिषचन्द्र सरस्वति :

तेषामुदारसत्त्वगुणकर्मणामचिन्त्यरसवीर्यविपाकप्रभावगुणसमुदितानि...।

सूत्र २४ : चक्रपाणि: ..हीयमानगुणपादैराहारविहारैरयथापूर्वमुपष्टभ्यमानान्यग्निमारुतपरीतानि...।

गंगाधर : ..हीनगुणपादैर्हीयमानगुणैश्चाहारविकारैरयथापूर्वमुपष्टभ्यमानाग्निमारुतपरीतानि...।

योगेन्द्रनाथ सेन : ..हीयमानानि हीयमानगुणपादैर्हीयमानगुणैश्चाहारविहारैरयथापूर्व मुपष्टभ्यमानाग्निमारुतपरीतानि...।

ज्योतिषचन्द्र सरस्वति : .हीयमानानि हीयमानगुणपादैर्हीयमानगुणैश्चाहारविहारैरयथापूर्व मुपष्टभ्यमानाग्निमारुतपरीतानि...।

सूत्र २८ : चक्रपाणि: एवंवादिनं भगवन्तमग्निवेश उवाच...।

गंगाधर : एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच...।

योगेन्द्रनाथ सेन : एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच...।

ज्योतिषचन्द्र सरस्वति : एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच...।

सूत्र ३० : चक्रपाणि: दैवमात्मकृतं विद्यात् कर्म यत् पौर्वदैहिकम् ।

गंगाधर : दैवमात्मकृतं विद्यात् कर्म यत् पूर्व्वदैहिकम् ।

योगेन्द्रनाथ सेन : दैवमात्मकृतं विद्यात् कर्म यत् पौर्वदैहिकम् ।

ज्योतिषचन्द्र सरस्वति : दैवमात्मकृतं विद्यात् कर्म यत् पौर्वदैहिकम् ।

सूत्र ३६ : चक्रपाणि: ...क्रिया इष्टयश्च प्रयोज्येरन्...।

गंगाधर : ...क्रिया इष्टयश्च प्रयुज्येरन्...।

योगेन्द्रनाथ सेन : ...क्रिया इष्टयश्च प्रयोज्येरन्...।

ज्योतिषचन्द्र सरस्वति : ...क्रिया इष्टयश्च प्रयोज्येरन्...।

सूत्र ३६ : चक्रपाणि: नापीन्द्रो नियतायुषं शत्रुं वज्रेणाभिहन्यात् नाश्विनावार्तं भेषजेनोपपादयेतां न महर्षयो...।

गंगाधर : नापीन्द्रो नियतायुष्कं शत्रुं वज्रेणाभिहन्यान्नाश्विनावेनं भेषजेनोपचरेताम् न वर्षयो...।

योगेन्द्रनाथ सेन : नापीन्द्रो नियतायुष्कं शत्रुं वज्रेणाभिहन्यात् नाश्विनावार्तं भेषजेनोपाचरेतां न वर्षयो...।

ज्योतिषचन्द्र सरस्वति : नापीन्द्रो नियतायुष्कं शत्रुं वज्रेणाभिहन्यात् नाश्विनावार्तं भेषजेनोपाचरेतां न वर्षयो...।

सूत्र ३६ : चक्रपाणि: ...परं यदैन्द्रं चक्षु: इदं चाप्यस्माकं ...।

गंगाधर : ...परं यद्दिव्यचक्षु: इदं चाप्यस्माकं ...।

योगेन्द्रनाथ सेन : ...परं यद्दिव्यं चक्षु: इदं चाप्यस्माकं ...।

ज्योतिषचन्द्र सरस्वति : ...परं यद्दिव्यं चक्षु: इदं चाप्यस्माकं ...।

सूत्र ३६ : चक्रपाणि : यथा पुरुषसहस्राणामुत्थायोत्थायाहवं...।

गंगाधर : यथा पुरुषसहस्राणामुत्थायोत्थायाहारं...।

योगेन्द्रनाथ सेन : यथा पुरुषसहस्राणामुत्थायोत्थायाहवं...।

ज्योतिषचन्द्र सरस्वति : यथा पुरुषसहस्राणामुत्थायोत्थायाहवं...।

सूत्र ३६ : चक्रपाणि: त्याग: सर्वस्य चातियोगायोगमिथ्यायोगानां सर्वातियोगसंधारणम् असंधारणमुदीर्णानां च ।

गंगाधर : त्याग: सर्वस्य चायोगमिथ्यायोगातियोगानां सन्धारणमनुदीर्णानामसन्धारणम् उदीर्णानाश्च ।

योगेन्द्रनाथ सेन : त्याग: सर्वस्य चायोगमिथ्यायोगातियोगानां संधारणमनुदीर्णानामसंधारणमुदीर्णानां च ।

ज्योतिषचन्द्र सरस्वति : त्याग: सर्वस्य चायोगमिथ्यायोगातियोगानां संधारणमनुदीर्णानामसंधारणमुदीर्णानां

सूत्र ३८ : चक्रपाणि: ...पर्यसनाच्चान्तराऽवसानमापद्यते...।

गंगाधर : ...पर्य्यासनात् चान्तरावसानं गच्छति...।

योगेन्द्रनाथ सेन : ...पर्यसनाच्चान्तरावसानमापद्यते...।

ज्योतिषचन्द्र सरस्वति : ...पर्य्यासनात् चान्तरावसानं गच्छति...।

सूत्र ३८ : चक्रपाणि:

..अयथाग्न्यभ्यवहरणाद्विषमाभ्यवहरणाद्विषमशरीरन्यासादतिमैथुनादसत्संश्रयादुदीर्ण वेगविनिग्रहाद्विधार्यवेगाविधारणात्....।

गंगाधर : ..अयथाग्न्यभ्यवहराद् विधार्य्यवेगाविधारणाद् विषमशरीरन्यासात् असत्संश्रयाद्

योगेन्द्रनाथ सेन : ...अयथाग्न्यभ्यवहारादतिमैथुनादुदीर्णवेगविधारणाद्विधार्य वेगाविधारणाद्विषमशरीरन्यासादसत्संश्रयात्....।

ज्योतिषचन्द्र सरस्वति : ...अयथाग्न्यभ्यवहारादतिमैथुनादुदीर्णवेगविधारणाद्विधार्य वेगाविधारणाद्विषमशरीरन्यासादसत्संश्रयात्....।

सूत्र ४० : चक्रपाणि : प्रायो भेषजानि चामाशयासमुत्थानां विकाराणां पाचनवमनापतर्पणसमर्थानि भवन्ति ।

गंगाधर : प्रायशो भेषजानि चामाशयासमुत्थानां विकाराणां विरेचनवमनापतर्पणसंशमनान्येव भवन्ति ।

योगेन्द्रनाथ सेन : प्रायशो भेषजानि चामाशयासमुत्थानां विकाराणां पाचनवमनापतर्पणसंशमनान्येव भवन्ति

ज्योतिषचन्द्र सरस्वति : प्रायशो भेषजानि चामाशयासमुत्थानां विकाराणां पाचनवमनापतर्पणसंशमनान्येव भवन्ति

सूत्र ४४ : चक्रपाणि: लङ्घनपाचने तु मध्यबलदोषाणां ....।

गंगाधर : लङ्घनपाचनं तु मध्यबलदोषाणां ....।

योगेन्द्रनाथ सेन : लङ्घनपाचने तु मध्यबलदोषाणां ....।

ज्योतिषचन्द्र सरस्वति : लङ्घनपाचने तु मध्यबलदोषाणां ....।

सूत्र ४५ : चक्रपाणि: तद्यथा अनपवादप्रतीकारस्य....।

गंगाधर : तद् यथा अल्पवादप्रतिकारस्य....।

योगेन्द्रनाथ सेन : तद्यथा अनपवादप्रतीकारस्य....।

ज्योतिषचन्द्र सरस्वति : तद्यथा अनपवादप्रतीकारस्य....।

## अध्याय ४

सूत्र ३ : चक्रपाणि : त्रिविधं खलु रोगविशेषविज्ञानं भवति; तद्यथा आप्तोपदेशः प्रत्यक्षम् अनुमानं च

गंगाधर : त्रिविधं खलु रोगविशेषविज्ञानं भवति; तद्यथा उपदेशः प्रत्यक्षम् अनुमानं चेति

योगेन्द्रनाथ सेन : त्रिविधं खलु रोगविशेषविज्ञानं भवति; तद्यथा उपदेशः प्रत्यक्षम् अनुमानं चेति

ज्योतिषचन्द्र सरस्वतिः त्रिविधं खलु रोगविशेषविज्ञानं भवति; तद्यथा उपदेशः प्रत्यक्षम् अनुमानं

सूत्र ४ : चक्रपाणि : तत्राप्तोपदेशो नामाप्तवचनम् ।

गंगाधर : तत्रोपदेशो नामाप्तवचनम् ।

योगेन्द्रनाथ सेन : तत्रोपदेशो नामाप्तवचनम् ।

ज्योतिषचन्द्र सरस्वति : तत्रोपदेशो नामाप्तवचनम् ।

सूत्र ४ : चक्रपाणि : अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति ।

गंगाधर : अप्रमाणं पुनर्मत्तोन्मत्तमूर्खवक्तृ दृष्टादृष्टवचनमिति ।

योगेन्द्रनाथ सेन : अप्रमाणं पुनर्मत्तोन्मत्तमूर्खवक्तृ दृष्टादृष्टवचनमिति ।

ज्योतिषचन्द्र सरस्वतिः अप्रमाणं पुनर्मत्तोन्मत्तमूर्खवक्तृ दृष्टादृष्टवचनमिति ।

सूत्र ४ : चक्रपाणि : प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते ।

गंगाधर : प्रत्यक्षं तु नाम खलु तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते ।

योगेन्द्रनाथ सेन : प्रत्यक्षं नाम तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते ।

ज्योतिषचन्द्र सरस्वति : प्रत्यक्षं तु नाम खलु तद्यत् स्वयमिन्द्रियैरात्मना चोपलभ्यते ।

सूत्र ५ : चक्रपाणि : त्रिविधेन खल्वनेन ज्ञानसमुदायेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमथोत्तरकालमध्यवसानमदोषं भवति ।

गंगाधर : त्रिविधेन खल्वनेन ज्ञानसमुदयेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमेवोत्तरकालमध्यवसानमदोषं भवति ।

योगेन्द्रनाथ सेन : त्रिविधेन खल्वनेन ज्ञानसमुदायेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमेवोत्तरकालमध्यवसानमदोषं भवति ।

ज्योतिषचन्द्र सरस्वति : त्रिविधेन खल्वनेन ज्ञानसमुदायेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमथोत्तरकालमध्यवसानमदोषं भवति ।

सूत्र ६ : चक्रपाणि : रोगमेकैकमेवं प्रकोपणमेवं योनिमेवमुत्थानमेवमात्मानमेवमधिष्ठानमेवं वेदनम्...

गंगाधर : रोगमेकैकमेवं प्रकोपणमेवं योनिम् एवमात्मानमेवमधिष्ठानमेवं वेदनम्... ।

योगेन्द्रनाथ सेन : रोगमेकैकमेवं प्रकोपणमेवं योनिम् एवमात्मानमेवमधिष्ठानमेवं वेदनम्... ।

ज्योतिषचन्द्रसरस्वति: रोगमेकैकमेवं प्रकोपणमेवं योनिमेवमुत्थानमेवमात्मानमेवमधिष्ठानमेवं वेदनम्...

सूत्र ७ : चक्रपाणि : प्रत्यक्षतस्तु खलु रोगतत्त्वं बुभुत्सुः ।

गंगाधर : प्रत्यक्षन्तु खलु रोगतत्त्वं बुभुत्समानः ।

योगेन्द्रनाथ सेन : प्रत्यक्षतस्तु खलु रोगतत्त्वं बुभुत्सुः ।

ज्योतिषचन्द्र सरस्वति : प्रत्यक्षतस्तु खलु रोगतत्त्वं बुभुत्सुः ।

सूत्र ७ : चक्रपाणि : चक्षुवैषयिकाणि यानि चान्यान्यनुक्तानि तानि चक्षुषा परीक्षेत ।

गंगाधर : चक्षुवैषयिकाणि यानि चान्यानि कानि च तानि चक्षुषैव परीक्षेत ।

योगेन्द्रनाथ सेन : चक्षुवैषयिकाणि यानि चान्यान्यनुक्तानि तानि चक्षुषा परीक्षेत ।

ज्योतिषचन्द्र सरस्वति: चक्षुवैषयिकाणि यानि चान्यान्यनुक्तानि तानि चक्षुषा परीक्षेत ।

सूत्र ८ : चक्रपाणि : वीर्यमुत्थानेन ।

गंगाधर : वीर्यमुत्साहेन ।

योगेन्द्रनाथ सेन : वीर्यमुत्साहेन ।

ज्योतिषचन्द्र सरस्वति : वीर्यमुत्साहेन ।

सूत्र ८ : चक्रपाणि : उपधिमनुबन्धेन ।

गंगाधर : उपाधिमनुबन्धेन ।

योगेन्द्रनाथ सेन : उपाधिमनुबन्धेन ।

ज्योतिषचन्द्र सरस्वति : उपाधिमनुबन्धेन ।

सूत्र ८ : चक्रपाणि : द्विष्टेष्टसुखदु:खानि चातुरपरिप्रश्नेनैव विद्यादिति ।

गंगाधर : द्विष्टेष्ष्वसुखसुखानि चातुरपरिप्रश्नेनैव विद्यादिति ।

योगेन्द्रनाथ सेन : द्विष्टेष्टेषु सुखासुखानि चातुरपरिप्रश्नेनैव विद्यादिति ।

ज्योतिषचन्द्र सरस्वति : द्विष्टेष्ष्वसुखसुखानि चातुरपरिप्रश्नेनैव विद्यादिति ।

सूत्र १२ : चक्रपाणि : ज्ञानबुद्धिप्रदीपेन यो नाविशति तत्त्ववित् ।

गंगाधर : ज्ञानबुद्धिप्रदीपेन यो नाविशति योगवित् ।

योगेन्द्रनाथ सेन : ज्ञानबुद्धिप्रदीपेन यो नाऽऽविशति योगवित् ।

ज्योतिषचन्द्र सरस्वति : ज्ञानबुद्धिप्रदीपेन यो नाविशति योगवित् ।

## अध्याय ५

सूत्र ३ : चक्रपाणि : यावन्त: पुरुषे मूर्तिमन्तो ।

गंगाधर : यावन्त: एव पुरुषे मूर्तिमन्तो ।

योगेन्द्रनाथ सेन : यावन्त: पुरुषे मूर्तिमन्तो ।

ज्योतिषचन्द्र सरस्वति : यावन्त: पुरुषे मूर्तिमन्तो ।

सूत्र ३ : चक्रपाणि : सर्वे हि भावा: ।

गंगाधर : सर्वभावा: हि ।

योगेन्द्रनाथ सेन : सर्वे हि भावा: ।

ज्योतिषचन्द्र सरस्वति : सर्वे हि भावा: ।

सूत्र ४ : चक्रपाणि : अपि चैके स्रोतसामेव समुदयं पुरुषमिच्छन्ति ।

गंगाधर : अपि चैके महर्षय: स्रोतसामेव समुदयं पुरुषमिच्छन्ति ।

योगेन्द्रनाथ सेन : अपि चैके स्रोतसामेव समुदयं पुरुषमिच्छन्ति ।

ज्योतिषचन्द्र सरस्वति : अपि चैके स्रोतसामेव समुदयं पुरुषमिच्छन्ति ।

सूत्र ४ : चक्रपाणि : यस्य हि स्रोतांसि यच्च वहन्ति यच्चावहन्ति ।

गंगाधर : यस्य च हि स्रोतांसि यच्च वहन्ति यथा वहन्ति सर्वभावा: हि ।

योगेन्द्रनाथ सेन : यस्य हि स्रोतांसि यद्वहन्ति यथा वहन्ति सर्वे हि भावा: ।

ज्योतिषचन्द्र सरस्वति : यस्य हि स्रोतांसि यच्च वहन्ति यच्च अवहन्ति सर्वे हि भावा: ।

सूत्र ६ : चक्रपाणि : ये भविष्यन्त्यलमनुक्तार्थज्ञानाय ज्ञानवतां ।

गंगाधर : ये भविष्यन्त्यलमनुक्तज्ञानाय ज्ञानवतां ।

योगेन्द्रनाथ सेन : ये भविष्यन्त्यलमनुक्तज्ञानाय ज्ञानवतां ।

ज्योतिषचन्द्र सरस्वति : ये भविष्यन्त्यलमनुक्तार्थज्ञानाय ज्ञानवतां ।

सूत्र ६ : चक्रपाणि : विज्ञानाय चाज्ञानवताम् ।

गंगाधर : विज्ञानाय चाज्ञानवताम् ।

योगेन्द्रनाथ सेन : विज्ञानाय चाज्ञानाम् ।

ज्योतिषचन्द्र सरस्वति : विज्ञानाय चाज्ञानवताम् ।

सूत्र ६ : चक्रपाणि : तद्वदतीन्द्रियाणां ।

गंगाधर : तत्तदतीन्द्रियाणां ।

योगेन्द्रनाथ सेन : तद्वदतीन्द्रियाणां ।

ज्योतिषचन्द्र सरस्वति : तद्वदतीन्द्रियाणां ।

सूत्र ७ : चक्रपाणि : अतिसृष्टमतिबद्धं कुपितं ।

गंगाधर : अतिसृष्टं प्रतिबद्धं प्रकुपितं ।

योगेन्द्रनाथ सेन : अतिसृष्टमतिबद्धं प्रकुपितं ।

ज्योतिषचन्द्र सरस्वति : अतिसृष्टमतिबद्धं प्रकुपितं ।

सूत्र ८ : चक्रपाणि : मेदोवहानां स्रोतसां वृक्कौ मूलं वपावहनं च ।

गंगाधर : मेदोवहानां स्रोतसां बुक्कौ मूलं वपावहनं च ।

योगेन्द्रनाथ सेन : मेदोवहानां स्रोतसां वुक्कौ मूलं वपावहनं च ।

ज्योतिषचन्द्र सरस्वति : मेदोवहानां स्रोतसां वृक्कौ मूलं वपावहनं च ।

सूत्र ८ : चक्रपाणि : पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलगुदं च ।

गंगाधर : पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलगुदं च ।

योगेन्द्रनाथ सेन : पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलान्त्रं गुदं च ।

ज्योतिषचन्द्र सरस्वति : पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलान्त्रं गुदं च ।

सूत्र ९ : चक्रपाणि : स्थानानि आशया: निकेताश्चेति ।

गंगाधर : स्थानान्याशया: क्षया: निकेताश्चेति ।

योगेन्द्रनाथ सेन : स्थानान्याशया: निकेताश्चेति ।

ज्योतिषचन्द्र सरस्वति : स्थानान्याशया: क्षया: निकेताश्चेति ।

सूत्र ९ : चक्रपाणि : धातवश्च धातूनेव प्रदूषयन्ति प्रदुष्टा: ।

गंगाधर : धातवश्च सर्वधातूनेव प्रदूषयन्ति प्रदुष्टा: ।

योगेन्द्रनाथ सेन : धातवश्च सर्वधातूनेव प्रदूषयन्ति प्रदुष्टा: ।

ज्योतिषचन्द्र सरस्वति : धातवश्च धातूनेव प्रदूषयन्ति प्रदुष्टा: ।

सूत्र २० : चक्रपाणि : मूत्रवाहीनि दुष्यन्ति क्षीणस्याभिक्षतस्य च ।

गंगाधर : मूत्रवाहीनि दुष्यन्ति क्षीणस्यातिकृशस्य च ।

योगेन्द्रनाथ सेन : मूत्रवाहीनि दुष्यन्ति क्षीणस्यातिकृशस्य च ।

ज्योतिषचन्द्र सरस्वति : मूत्रवाहीनि दुष्यन्ति क्षीणस्याभिक्षतस्य च ।

सूत्र २१ : चक्रपाणि : संधारणादत्यशनादजीर्णाध्यशनात्तथा ।

गंगाधर : विधारणादत्यशनादजीर्णाध्यशनात्तथा ।

योगेन्द्रनाथ सेन : संधारणादत्यशनादजीर्णाध्यशनात्तथा ।

ज्योतिषचन्द्र सरस्वति : विधारणादत्यशनादजीर्णाध्यशनात्तथा ।

सूत्र २२ : चक्रपाणि : व्यायामादतिसंतापाच्छीतोष्णाक्रमसेवनात् ।

गंगाधर : व्यायामादतिसंक्षोभाच्छीतोष्णाक्रमसेवनात् ।

योगेन्द्रनाथ सेन : व्यायामादतिसंक्षोभाच्छीतोष्णाक्रमसेवनात् ।

ज्योतिषचन्द्र सरस्वति : व्यायामादतिसंक्षोभाच्छीतोष्णाक्रमसेवनात् ।

सूत्र २३ : चक्रपाणि : धातुभिर्विगुणश्चापि ।

गंगाधर : ऋतुभिर्विगुणश्चापि ।

योगेन्द्रनाथ सेन : धातुभिर्विगुणश्चापि ।

ज्योतिषचन्द्र सरस्वति : धातुभिर्विगुणश्चापि ।

## अध्याय ६

सूत्र ३ : चक्रपाणि : द्वे रोगानीके निमित्तभेदेन स्वधातुवैषम्यनिमित्तम् आगन्तुनिमित्तं च ।

गंगाधर : द्वे रोगानीके निमित्तभेदेन धातुवैषम्यनिमित्तञ्चागन्तुजञ्च ।

योगेन्द्रनाथ सेन : द्वे रोगानीके निमित्तभेदेन धातुवैषम्यनिमित्तमागन्तुनिमित्तं च ।

ज्योतिषचन्द्र सरस्वति : द्वे रोगानीके निमित्तभेदेन धातुवैषम्यनिमित्तमागन्तुनिमित्तं च ।

सूत्र ३ : चक्रपाणि : एकत्वं तावदेकमेव रोगानीकं दु:खसामान्यात् ।

गंगाधर : एकत्वं तावदेकमेव रोगानीकं रुक्सामान्यात् ।

योगेन्द्रनाथ सेन : एकत्वं तावदेकमेव रोगानीकं रुक्सामान्यात् ।

ज्योतिषचन्द्र सरस्वति : एकत्वं तावदेकमेव रोगानीकं रुक्सामान्यात् ।

सूत्र ३ : चक्रपाणि : बहुत्वमपि संख्येयं स्यादसंख्येयं वा ।

गंगाधर : बहुत्वमपि संख्येयं स्यादसंख्येयं वा स्यात् ।

योगेन्द्रनाथ सेन : बहुत्वमपि संख्येयं स्यादसंख्येयं वा ।

ज्योतिषचन्द्र सरस्वति : बहुत्वमपि संख्येयं स्यादसंख्येयं वा ।

सूत्र ३ : चक्रपाणि : महारोगाध्याये रुग्वर्णसमुत्थानादीनामसंख्येयत्वात् ।

गंगाधर : महारोगाध्याये रुग्वर्णसमुत्थानादीनाम् अपरिसंख्येयत्वात् ।

योगेन्द्रनाथ सेन : महारोगाध्याये रुग्वर्णसमुत्थानादीनामपरिसंख्येयत्वात् ।

ज्योतिषचन्द्र सरस्वति : महारोगाध्याये रुग्वर्णसमुत्थानादीनामसंख्येयत्वात् ।

सूत्र ४ : चक्रपाणि : न चाविगीतिरित्यत: स्याददोषवती ।

गंगाधर : न चाविगीति: इत्यतो दोषवती स्यात् ।

योगेन्द्रनाथ सेन : न ह्यविगीतिरित्यतो दोषवती ।

ज्योतिषचन्द्र सरस्वति : न चाविगीतिरित्यत: स्याददोषवती ।

सूत्र ४ : चक्रपाणि : समानायामपि खलु भेदप्रकृतौ प्रकृतानुप्रयोगान्तरमपेक्ष्यम् ।

गंगाधर : समानायामपि तु भेदप्रकृतौ प्रकृत्यनुप्रयोगान्तरमपेक्ष्यम् ।

योगेन्द्रनाथ सेन : समानायामपि तु भेदप्रकृतौ प्रकृत्यनुप्रयोगान्तरमपेक्ष्यम् ।

ज्योतिषचन्द्र सरस्वति : समानायामपि तु भेदप्रकृतौ प्रकृत्यनुप्रयोगान्तरमपेक्ष्यम् ।

सूत्र ५ : चक्रपाणि : तस्माद्यथाचित्रं विकारानुदाहरणार्थम् अनवशेषेण च दोषान् व्याख्यास्याम: ।

गंगाधर : तस्माद् यथोचितं विकारानुदाहरणार्थमनवशेषेण च दोषान्
यथावदनुव्याख्यास्याम: ।

योगेन्द्रनाथ सेन : तस्माद् यथोचितं विकारानुदाहरणार्थमनवशेषेण च दोषान्
यथावदनुव्याख्यास्याम: ।

ज्योतिषचन्द्र सरस्वति : तस्माद् यथोचितं विकारानुदाहरणार्थमनवशेषेण च दोषान्
यथावदनुव्याख्यास्याम: ।

सूत्र ५ : चक्रपाणि : तयोर्विकारा: कामक्रोधलोभमोहेर्ष्यामानमदशोकचितो(न्तो)द्वेगभयहर्षादय: ।

गंगाधर : तयोर्विकारा: कामक्रोधलोभमोहमानमदशोकचिन्तोद्वेगभयहर्षादय: ।

योगेन्द्रनाथ सेन : तयोर्विकारा: कामक्रोधलोभमोहेर्ष्यामानमदशोकचिन्तोद्वेगभयहर्षादय: ।

ज्योतिषचन्द्र सरस्वति : तयोर्विकारा:
कामक्रोधलोभमोहेर्ष्यामानमदशोकचिन्तोद्वेगभयहर्षादय: ।

सूत्र ७ : चक्रपाणि : प्रकुपितास्तु खलु ते प्रकोपणविशेषाद्...।

गंगाधर : प्रकुपितास्तु खलु प्रकोपणविशेषाद्...।

योगेन्द्रनाथ सेन : प्रकुपितास्तु खलु ते प्रकोपणविशेषाद्...।

ज्योतिषचन्द्र सरस्वति : प्रकुपितास्तु खलु ते प्रकोपणविशेषाद्...।

सूत्र ९ : चक्रपाणि : नियतस्त्वनुबन्धो रजस्तमसो: परस्परं न ह्यरजस्कं तम: प्रवर्तते ।

गंगाधर : नियतस्त्वनुबन्धो रजस्तमसो: परस्परं न ह्यरजस्कं तम: ।

योगेन्द्रनाथ सेन : नियतस्त्वनुबन्धो रजस्तमसो: परस्परं न ह्यरजस्कं तम: ।

ज्योतिषचन्द्र सरस्वति : नियतस्त्वनुबन्धो रजस्तमसो: परस्परं न ह्यरजस्कं तम: ।

सूत्र ११ : चक्रपाणि : अनुबन्ध्यलक्षणसमन्वितास्तत्र यदि दोषा भवन्ति...।

गंगाधर : अनुबन्ध्यानुबन्धलक्षणसमन्विता यदि तत्र दोषा भवन्ति...।

योगेन्द्रनाथ सेन : अनुबन्ध्यानुबन्धलक्षणसमन्विता यदि तत्र दोषा भवन्ति...।

ज्योतिषचन्द्र सरस्वति : अनुबन्ध्यानुबन्धलक्षणसमन्विता यदि तत्र दोषा भवन्ति...।

सूत्र ११ : चक्रपाणि : दोषेषु व्याधिषु च नानाप्रकृतिविशेषव्यूहः ।

गंगाधर : दोषेषु चैव व्याधिषु च नानाप्रकृतिविशेषाद् व्यूहः

योगेन्द्रनाथ सेन : दोषेषु व्याधिषु च नानाप्रकृतिविशेषाद्व्यूहः ।

ज्योतिषचन्द्र सरस्वति : दोषेषु व्याधिषु च नानाप्रकृतिविशेषाद्व्यूहः ।

सूत्र १३ : चक्रपाणि : तस्य तस्य किल दोषस्याधिक्यात्...।

गंगाधर : तस्य तस्य हि दोषस्याधिक्यात्...।

योगेन्द्रनाथ सेन : तस्य तस्य किल दोषस्याधिक्यात् ।

ज्योतिषचन्द्र सरस्वति : तस्य तस्य किल दोषस्याधिक्यात् ।

सूत्र १४ : चक्रपाणि : तान् विस्तरेणानुव्याख्यास्यामः ।

गंगाधर : तानि विस्तरेणानुव्याख्यास्यामः ।

योगेन्द्रनाथ सेन : तानि विस्तरेणानुव्याख्यास्यामः ।

ज्योतिषचन्द्र सरस्वति : तानि विस्तरेणानुव्याख्यास्यामः ।

सूत्र १५ : चक्रपाणि : तद्यथा वातलः पित्तलः श्लेष्मलश्चेति ।

गंगाधर : तद् यथा वातलश्च पित्तलश्च श्लेष्मलश्चेति ।

योगेन्द्रनाथ सेन : तद्यथा वातलश्च पित्तलश्च श्लेष्मलश्चेति ।

ज्योतिषचन्द्र सरस्वति : तद्यथा वातलश्च पित्तलश्च श्लेष्मलश्चेति ।

सूत्र १५ : चक्रपाणि : व्याधयः प्रायेण बलवन्तश्च भवन्ति ।

गंगाधर : व्याधयः स्युर्बलवन्तश्च ।

योगेन्द्रनाथ सेन : व्याधयः स्युर्बलवन्तश्च प्रायेण भवन्ति ।

ज्योतिषचन्द्र सरस्वति : व्याधयः स्युर्बलवन्तश्च प्रायेण भवन्ति ।

सूत्र १६ : चक्रपाणि : तत्र वातलस्य वातप्रकोपणान्यासेवमानस्य...।

गंगाधर : तत्र वातलस्य वातप्रकोपणोक्तान्यासेवमानस्य...।

योगेन्द्रनाथ सेन : तत्र वातलस्य वातप्रकोपणान्यासेवमानस्य...।

ज्योतिषचन्द्र सरस्वति : तत्र वातलस्य वातप्रकोपणान्यासेवमानस्य...।

सूत्र १६ : चक्रपाणि : अभ्यङ्गोपनाहनोद्वेष्टन...।

गंगाधर : अभ्यज्यान्युपनाहोद्वेष्टन...।

योगेन्द्रनाथ सेन : अभ्यज्यानि उपनाहोद्वेष्टन...।

ज्योतिषचन्द्र सरस्वति : अभ्यज्यानि उपनाहोद्वेष्टन...।

सूत्र १७ : चक्रपाणि : परमशिशिरवारिसंस्थितानां ।

गंगाधर : पवनशिशिरवारिसंस्थितानां ।

योगेन्द्रनाथ सेन : परमशिशिरवारिसंस्थितानां ।

ज्योतिषचन्द्र सरस्वति : पवनशिशिरवारिसंस्थितानां ।

सूत्र १७ : चक्रपाणि : क्षणे क्षणेऽग्यचन्दन...।

गंगाधर : क्षणे क्षणे स्रक्चन्दन...।

योगेन्द्रनाथ सेन : क्षणे क्षणे अग्यचन्दन...।

ज्योतिषचन्द्र सरस्वति : क्षणे क्षणे स्रक्चन्दन...।

सूत्र १७ : चक्रपाणि : शीतोपहितांशुकस्रग्धारिणीभिः ।

गंगाधर : शीतोपहितांशुकस्रग्दामहारधारिणीभिः ।

योगेन्द्रनाथ सेन : शीतोपहितांशुकस्रग्दामहारधारिणीभिः ।

ज्योतिषचन्द्र सरस्वति : शीतोपहितांशुकस्रग्दामहारधारिणीभिः ।

सूत्र १७ : चक्रपाणि : पवनसेवनं...।

गंगाधर : पवनसेवा...।

योगेन्द्रनाथ सेन : पवनसेवा...।

ज्योतिषचन्द्र सरस्वति : पवनसेवा...।

सूत्र १७ : चक्रपाणि : सुखशिशिरसुरभिमारुतोपहितानामुपसेवनं...।

गंगाधर : सुखशिशिरसुरभिमारुतोपवातानामुपसेवनम्...।

योगेन्द्रनाथ सेन : सुखशिशिरसुरभिमारुतोपहितानामुपसेवनं...।

ज्योतिषचन्द्र सरस्वति : सुखशिशिरसुरभिमारुतोपवातानामुपसेवनम्...।

सूत्र १८ : चक्रपाणि : तस्यावजयनं विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि...।

गंगाधर : तस्यावजयनं विधियुक्तानि संशोधनानि...।

योगेन्द्रनाथ सेन : तस्यावजयनं विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि...।

ज्योतिषचन्द्र सरस्वति : तस्यावजयनं विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि...।

सूत्र १८ : चक्रपाणि : नियुद्ध...।

गंगाधर : युद्ध...।

योगेन्द्रनाथ सेन : युद्ध...।

ज्योतिषचन्द्र सरस्वति : युद्ध...।

सूत्र २१ : चक्रपाणि : दोषसंख्याविकाराणामेकदेश: प्रकोपणम् ।

गंगाधर : दोषसंख्याविकाराणामेकदोषप्रकोपणम् ।

योगेन्द्रनाथ सेन : दोषसंख्याविकाराणामेकदेश: प्रकोपणम् ।

ज्योतिषचन्द्र सरस्वति : दोषसंख्याविकाराणामेकदेश: प्रकोपणम् ।

सूत्र २१ : चक्रपाणि : जरणं प्रति चिन्ता च कायाग्नेर्धुक्षणानि च ।

गंगाधर : जरणं प्रति चिन्ता च देहाग्ने रक्षणानि च ।

योगेन्द्रनाथ सेन : जरणं प्रति चिन्ता च देहाग्ने रक्षणानि च ।

ज्योतिषचन्द्र सरस्वति : जरणं प्रति चिन्ता च देहाग्ने रक्षणानि च ।

## अध्याय ७

सूत्र ३ : चक्रपाणि : लघुव्याधितोऽपर: सत्त्वादीनामधमत्वाद् गुरुव्याधित इव दृश्यते ।

गंगाधर : लघुव्याधितोऽपर: सत्त्वादीनामल्पत्वाद् गुरुव्याधित इव दृश्यते ।

योगेन्द्रनाथ सेन : लघुव्याधितोऽपरः सत्त्वादीनामल्पत्वाद् गुरुव्याधित इव दृश्यते ।

ज्योतिषचन्द्र सरस्वति : लघुव्याधितोऽपरः सत्त्वादीनामल्पत्वाद् गुरुव्याधित इव दृश्यते

सूत्र ४ : चक्रपाणि : ते यदा गुरुव्याधितं लघुव्याधितरुपमासादयन्ति तदा तमल्पदोषं मत्वा...।

गंगाधर : ते यदा गुरुव्याधितं लघुव्याधितरुपमासादयन्ति तमल्पदोषं मत्वा...।

योगेन्द्रनाथ सेन : ते यदा गुरुव्याधितं लघुव्याधितरुपमासादयन्ति तमल्पदोषं मत्वा...।

ज्योतिषचन्द्रसरस्वति : ते यदा गुरुव्याधितं लघुव्याधितरुपमासादयन्ति तमल्पदोषं ।

सूत्र ४ : चक्रपाणि : ....प्रयच्छन्तो दोषानतिनिर्हृत्य शरीरमस्य क्षिण्वन्ति ।

गंगाधर : ....प्रयच्छन्तो दोषानतिनिर्हृत्यैव शरीरमस्य क्षिण्वन्ति ।

योगेन्द्रनाथ सेन : ....प्रयच्छन्तो दोषानतिनिर्हृत्यैव शरीरमस्य क्षिण्वन्ति ।

ज्योतिषचन्द्र सरस्वति : ....प्रयच्छन्तो दोषानतिनिर्हृत्यैव शरीरमस्य क्षिण्वन्ति ।

सूत्र ५ : चक्रपाणि : सत्त्वादीनां विकल्पेन व्याधिरुपमथातुरे ।

गंगाधर : सत्त्वादीनां विकल्पेन व्याधिनां रुपमथातुरे ।

योगेन्द्रनाथ सेन : सत्त्वादीनां विकल्पेन व्याधिनां रुपमथातुरे ।

ज्योतिषचन्द्र सरस्वति : सत्त्वादीनां विकल्पेन व्याधिनां रुपमथातुरे ।

सूत्र ८ : चक्रपाणि : इति व्याधितरुपाधिकारे व्याधितरुपसंख्याग्रसंभवं ।

गंगाधर : इति व्याधितरुपाधिकारे श्रुत्वा व्याधितरुपसंख्याग्रसंभवं ।

योगेन्द्रनाथ सेन : इति व्याधितरुपाधिकारे व्याधितरुपसंख्याग्रसंभवं ।

ज्योतिषचन्द्र सरस्वति : इति व्याधितरुपाधिकारे व्याधितरुपसंख्याग्रसंभवं ।

सूत्र ८ : चक्रपाणि : सापवादं सम्प्रतिपत्तिकारणं चानपवादं निशम्य भगवन्तम्...।

गंगाधर : सापवादं सम्प्रतिपत्तिकारणञ्च अनपवादं भगवन्तम्...।

योगेन्द्रनाथ सेन : सापवादं सम्प्रतिपत्तिकारणं चानपवादं निशम्य भगवन्तम्...।

ज्योतिषचन्द्र सरस्वति : सापवादं सम्प्रतिपत्तिकारणं चानपवादं निशम्य भगवन्तम्...।

सूत्र ८ : चक्रपाणि : सर्वक्रिमीणां पुरीषसंश्रयाणां समुत्थान.....।

गंगाधर : सर्वक्रिमीणां पुरुषसंश्रयाणां समुत्थान.....।

योगेन्द्रनाथ सेन : सर्वक्रिमीणां पुरुषसंश्रयाणां समुत्थान.....।

ज्योतिषचन्द्र सरस्वति : सर्वक्रिमीणां पुरुषसंश्रयाणां समुत्थान.....।

सूत्र १० : चक्रपाणि : तत्र बाह्यमलजातान् मलजान् संचक्ष्महे ।

गंगाधर : तत्र बाह्यमलजातान् मलजान् व्याचक्ष्महे ।

योगेन्द्रनाथ सेन : तत्र बाह्यमलजातान् मलजान् व्याचक्ष्महे ।

ज्योतिषचन्द्र सरस्वति : तत्र बाह्यमलजातान् मलजान् प्रचक्ष्महे ।

सूत्र ११ : चक्रपाणि : प्रभावः केशश्मश्रुनखलोमपक्ष्मापध्वंसः ।

गंगाधर : प्रभावः केशश्मश्रुलोमपक्ष्मापध्वंसः ।

योगेन्द्रनाथ सेन : प्रभावः केशश्मश्रुलोमपक्ष्मापध्वंसः ।

ज्योतिषचन्द्र सरस्वति : प्रभावः केशश्मश्रुनखलोमपक्ष्मापध्वंसः ।

सूत्र ११ : चक्रपाणि : अतिवृद्धानां च त्वक्सिरा.... ।

गंगाधर : अतिप्रवृद्धानाञ्च त्वक्सिरा.... ।

योगेन्द्रनाथ सेन : अतिप्रवृद्धानां च त्वक्सिरा.... ।

ज्योतिषचन्द्र सरस्वति : अतिवृद्धानां च त्वक्सिरा.... ।

सूत्र १२ : चक्रपाणि : नामानि अन्त्रादाः उदरादाः हृदयचराः....।

गंगाधर : नामानि अन्त्रादाः उदरादाः हृदयचराः....।

योगेन्द्रनाथ सेन : नामानि अन्त्रादाः उदरादाः हृदयादाः....।

ज्योतिषचन्द्र सरस्वति : नामानि अन्त्रादाः उदरादाः हृदयचराः....।

सूत्र १३ : चक्रपाणि : यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः ।

गंगाधर : यस्य पुनरामाशयोन्मुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासः ।

योगेन्द्रनाथ सेन : यस्य पुनरामाशयोन्मुखाः स्युस्तस्योद्गारनिःश्वासः ।

ज्योतिषचन्द्र सरस्वति : यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासः ।

सूत्र १३ : चक्रपाणि : ...श्वेता दीर्घा ऊर्णांशुसंकाशाः केचित् ......।

गंगाधर : ...श्वेता दीर्घोर्णांशुसंकाशा: केचित् ......।

योगेन्द्रनाथ सेन : ...श्वेता दीर्घोर्णांशुसंकाशा: केचित् ......।

ज्योतिषचन्द्र सरस्वति : ...श्वेता दीर्घा ऊर्णांशुसंकाशा: केचित् ......।

सूत्र १४ : चक्रपाणि : तत्र सर्वक्रिमीणामपकर्षणमेवादित: कार्यं....।

गंगाधर : तत्र क्रिमीणामपकर्षणमेवादित: कर्तव्यम्.....।

योगेन्द्रनाथ सेन : तत्र क्रिमीणामपकर्षणमेवादित: कर्तव्यम्.....।

ज्योतिषचन्द्र सरस्वति : तत्र सर्वक्रिमीणामपकर्षणमेवादित:....।

सूत्र १५ : चक्रपाणि : हस्तेनाभिगृह्य विमृश्योपकरणवताऽपनयनमनुपकरणेन वा...।

गंगाधर : हस्तेनाभिगृह्य विमृश्योपकरणवता वाप्यपनयनम् अनुपकरणवता वा...।

योगेन्द्रनाथ सेन : हस्तेनाभिगृह्यापकर्षणमुपकरणवता वाप्यनुपकरणेन वा...।

ज्योतिषचन्द्र सरस्वति : हस्तेनाभिगृह्य विमृश्योपकरणवताऽपनयनमनुपकरणेन वा...।

सूत्र १५ : चक्रपाणि : यदुक्तं निदानविधौ तस्य विवर्जनं तथाप्रायाणां चापरेषां द्रव्याणाम् ।

गंगाधर : यदुक्तं निदानविधौ तस्य वर्जनं तथाविधप्रयोगाणाञ्चापरेषां द्रव्याणाम् ।

योगेन्द्रनाथ सेन : यदुक्तं निदानविधौ तस्य वर्जनं तथाप्रायाणां चापरेषां द्रव्याणाम् ।

ज्योतिषचन्द्रसरस्वति:यदुक्तं निदानविधौ तस्य विवर्जनं तथाप्रायाणां चापरेषां द्रव्याणाम्

सूत्र १७ : चक्रपाणि : तमुपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु....।

गंगाधर : तस्मिन् शीतीभूते तूपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु....।

योगेन्द्रनाथ सेन : तमुपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु....।

ज्योतिषचन्द्र सरस्वति : तमुपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु....।

सूत्र १७ : चक्रपाणि : मदनफलादिसंयोगसंपादितेन त्रिवारं सप्तरात्रं वाऽऽस्थापयेत् ।

गंगाधर : मदनफलादिसंयोगयोजितेन त्रिरात्रं सप्तरात्रं वा स्थापयेत् ।

योगेन्द्रनाथ सेन : मदनफलादिसंयोग योजितेन त्रिरात्रं सप्तरात्रं वास्थापयेत् ।

ज्योतिषचन्द्र सरस्वति : मदनफलादिसंयोगयोजितेन त्रिरात्रं सप्तरात्रं वा आस्थापयेत् ।

सूत्र २१ : चक्रपाणि : मूलकपर्णी समूलाग्रप्रतानामाहृत्य.....।

गंगाधर : मूषिकपर्णी समूलाग्रप्रतानामाहृत्य.....।

योगेन्द्रनाथ सेन : मूषिकपर्णी समूलाग्रप्रतानामाहृत्य.....।

ज्योतिषचन्द्र सरस्वति : मूषिकपर्णी समूलाग्रप्रतानामाहृत्य.....।

सूत्र २१ : चक्रपाणि : तेन रसेन लोहितशालितण्डुलपिष्टं समालोडय ।

गंगाधर : तेन रसेन लोहितशालितण्डुलपिष्टमालोडय ।

योगेन्द्रनाथ सेन : तेन रसेन लोहितशालितण्डुलपिष्टमालोडय ।

ज्योतिषचन्द्र सरस्वति : तेन रसेन लोहितशालितण्डुलपिष्टमालोडय ।

सूत्र २१ : चक्रपाणि : पूपलिकां कृत्वा विधूमेष्वङ्गारेषूपकुडय...।

गंगाधर : पूपलिकां कृत्वा विधूमेष्वङ्गारेषु विपाच्य...।

योगेन्द्रनाथ सेन : पूपलिकां कृत्वा विधूमेष्वङ्गारेषु विपाच्य...।

ज्योतिषचन्द्र सरस्वति : पूपलिकां कृत्वा विधूमेष्वङ्गारेषु विपाच्य...।

सूत्र २२ : चक्रपाणि : वाऽऽतपे सुपरिभावितानि भावयित्वा दृषदि ।

गंगाधर : वातपे सुपरिभावितानि दृशदि ।

योगेन्द्रनाथ सेन : वातपे भावितानि दृशदि ।

ज्योतिषचन्द्र सरस्वति : वाऽऽतपे सुपरिभावितानि भावयित्वा दृषदि ।

सूत्र २३ : चक्रपाणि : सूक्ष्मानेकच्छिद्रब्रध्ने शरीरमुपवेष्ट्य मृदावलिप्ते ।

गंगाधर : सूक्ष्मानेकच्छिद्रब्रध्ने मृदावलिप्ते ।

योगेन्द्रनाथ सेन : सूक्ष्मानेकच्छिद्रब्रध्ने मृदावलिप्ते ।

ज्योतिषचन्द्र सरस्वति : सूक्ष्मानेकच्छिद्रब्रध्ने शरीरमुपवेष्ट्य मृदावलिप्ते ।

सूत्र २३ : चक्रपाणि : साधु दग्धानि गोमयानि विगतस्नेहानि च ।

गंगाधर : साधु दग्धानि गोमयानि गलितस्नेहानि च ।

योगेन्द्रनाथ सेन : साधु दग्धानि गोमयानि गलितस्नेहानि च ।

ज्योतिषचन्द्र सरस्वति : साधु दग्धानि गोमयानि विगतस्नेहानि च ।

सूत्र २५ : चक्रपाणि : तानाहृत्य सुनिष्पूतान्निष्पूय सुशुद्धान् शोधयित्वा ।

गंगाधर : आहृत्य सुनिष्पूतान् शोधयित्वा ।

योगेन्द्रनाथ सेन : आहृत्य सुनिष्पूतान् शोधयित्वा ।

ज्योतिषचन्द्र सरस्वति : तानाहृत्य सुनिष्पूतान्निष्पूय सुशुद्धान् शोधयित्वा ।

सूत्र २५ : चक्रपाणि : सुप्रलूनान् प्रलुञ्च्य ।

गंगाधर : सुप्रशूनान् प्रलुच्य ।

योगेन्द्रनाथ सेन : सुप्रलूनान् प्रलुच्य ।

ज्योतिषचन्द्र सरस्वति : सुप्रलूनान् प्रलुञ्च्य ।

सूत्र २५ : चक्रपाणि : पुनरेव सुनिष्पूतान् निष्पूय सुशुद्धान् शोधयित्वा ।

गंगाधर : पुनरेव निष्पूतान् शोधयित्वा ।

योगेन्द्रनाथ सेन : पुनरेव निष्पूताञ्छोधयित्वा ।

ज्योतिषचन्द्र सरस्वति : पुनरेव सुनिष्पूतान् निष्पूय सुशुद्धान् शोधयित्वा ।

सूत्र २५ : चक्रपाणि : विडङ्गकषायेण त्रि:सप्तकृत्व: सुपरिभावितान् भावयित्वा आतपे शोषयित्वा ।

गंगाधर : विडङ्गकषायेण त्रि:सप्तकृत्व: सुभावितानातपे शोषयित्वा ।

योगेन्द्रनाथ सेन : विडङ्गकषायेण त्रि:सप्तकृत्व: सुभावितानातपे शोषयित्वा ।

ज्योतिषचन्द्र सरस्वति : विडङ्गकषायेण त्रि:सप्तकृत्व: सुपरिभावितान् भावयित्वा आतपे शोषयित्वा ।

सूत्र २६ : चक्रपाणि : ततस्तमवतार्य शीतीभूतम् ।

गंगाधर : ततस्तम् अवहृत्य शीतीभूतम् ।

योगेन्द्रनाथ सेन : ततस्तमहृत्य शीतीभूतम् ।

ज्योतिषचन्द्र सरस्वति : ततस्तमवतार्य शीतीभूतम् ।

सूत्र २६ : चक्रपाणि : अपकर्षणमेवादौ क्रिमीणां भेषजं स्मृतम् ।

गंगाधर : अपकर्षणमेवादौ क्रिमीणां भेषजं भवेत् ।

योगेन्द्रनाथ सेन : अपकर्षणमेवादौ क्रिमीणां भेषजं भवेत् ।

ज्योतिषचन्द्र सरस्वति : अपकर्षणमेवादौ क्रिमीणां भेषजं स्मृतम् ।

सूत्र २६ : चक्रपाणि : अयमेव विकाराणां सर्वेषामपि निग्रहे ।

गंगाधर : एष एव विकाराणां सर्वेषामपि निग्रहे ।

योगेन्द्रनाथ सेन : एष एव विकाराणां सर्वेषामपि निग्रहे ।

ज्योतिषचन्द्र सरस्वति : अयमेव विकाराणां सर्वेषामपि निग्रहे ।

## अध्याय ८

सूत्र ३ : चक्रपाणि : बुद्धिमानात्मनः कार्यगुरुलाघवं...।

गंगाधर : बुद्धिमानात्मनः कार्यगुरुलाघवे...।

योगेन्द्रनाथ सेन : बुद्धिमानात्मनः कार्यगुरुलाघवं...।

ज्योतिषचन्द्र सरस्वति : बुद्धिमानात्मनः कार्यगुरुलाघवं...।

सूत्र ४ : चक्रपाणि : प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं....।

गंगाधर : प्रकृतिज्ञं प्रतिपत्तिज्ञमुपस्कृतविद्यम् अनहङ्कृतम् अनसूयकमकोपनं....।

योगेन्द्रनाथ सेन : प्रकृतिज्ञं प्रतिपत्तिज्ञमुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं....।

ज्योतिषचन्द्र सरस्वति : प्रकृतिज्ञं
प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं....।

सूत्र ७ : चक्रपाणि : तत्रायमध्ययनविधिः कल्यः कृतक्षणः प्रातरुत्थायोयपव्यूषं वा ।

गंगाधर : तत्रायमध्ययनविधिः कल्यकृतक्षणः प्रातरुत्थायोयपव्यूषं वा ।

योगेन्द्रनाथ सेन : तत्रायमध्ययनविधिः कल्यः कृतक्षणः प्रातरुत्थायोयपव्यूषं वा ।

ज्योतिषचन्द्र सरस्वति : तत्रायमध्ययनविधिः कल्यकृतक्षणः प्रातरुत्थायोयपव्यूषं वा ।

सूत्र ७ : चक्रपाणि : देवर्षिगोब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य... ।

गंगाधर : देवर्षिगोब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य... ।

योगेन्द्रनाथ सेन : देवर्षिगोब्राह्मणगुरुवृद्धसिद्धाचार्यान् नमस्कृत्य... ।

ज्योतिषचन्द्र सरस्वति : देवर्षिगोब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य... ।

सूत्र ७ : चक्रपाणि : सुखोपविष्टो मनःपुरःसराभिर्वाग्भिः सूत्रमनुक्रामन्.....।

गंगाधर : सुखोपविष्टो मनःपुरःसरीभिर्वाग्भिः सूत्रमनुपरिक्रामन्.....।

योगेन्द्रनाथ सेन : सुखोपविष्टो मनःपुरःसराभिर्वाग्भिः सूत्रमनुक्रामन्....।

ज्योतिषचन्द्र सरस्वति : सुखोपविष्टो मनःपुरःसराभिर्वाग्भिः सूत्रमनुक्रामन्.....।

सूत्र ७ : चक्रपाणि : स्वदोषपरिहारार्थं परदोषप्रमाणार्थं च..... ।

गंगाधर : स्वदोषपरिहाराय परदोषप्रमाणार्थम्..... ।

योगेन्द्रनाथ सेन : स्वदोषपरिहारार्थं परदोषप्रमाणार्थं च..... ।

ज्योतिषचन्द्र सरस्वति : स्वदोषपरिहारार्थं परदोषप्रमाणार्थं च..... ।

सूत्र ८ : चक्रपाणि : सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्रतिकरमनुरक्तं च... ।

गंगाधर : सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्रतिपत्तिकरम् अनुरक्तं ... ।

योगेन्द्रनाथ सेन : सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्रतिपत्तिकरमनुरक्तं ... ।

ज्योतिषचन्द्र सरस्वति : सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्रतिपत्तिकरमनुरक्तं ... ।

सूत्र ९ : चक्रपाणि : एवंविधमध्ययनार्थिनम्.....।

गंगाधर : एवंविधमध्ययनार्थिनम्.....।

योगेन्द्रनाथ सेन : एवंगुणसमुदितमध्ययनार्थिनम्.....।

ज्योतिषचन्द्र सरस्वति : एवंविधमध्ययनार्थिनम्.....।

सूत्र ९ : चक्रपाणि : माल्यदामदीपहिरण्यहेमरजतमणिमुक्ताविद्रुमक्षौमपरिधीन्.....।

गंगाधर : माल्यदामदीपहिरण्यरजतमणिमुक्ताविद्रुमक्षौमपरिधींश्च.....।

योगेन्द्रनाथ सेन : माल्यदामदीपहिरण्यरजतमणिमुक्ताविद्रुमक्षौमपरिधीन्.....।

ज्योतिषचन्द्र सरस्वति : माल्यदामदीपहिरण्यहेमरजतमणिमुक्ताविद्रुमक्षौमपरिधीन्.....।

सूत्र ११ : चक्रपाणि : कुशास्तीर्णं सुपरिहितं....।

गंगाधर : कुशास्तीर्णं सूपविहितं....।

योगेन्द्रनाथ सेन : कुशास्तीर्णं सूपविहितं....।

ज्योतिषचन्द्र सरस्वति : कुशास्तीर्णं सुपरिहितं....।

सूत्र ११ : चक्रपाणि : यथोक्तचन्दनोदकुम्भक्षौमहेमहिरण्यरजतमणिमुक्ताविद्रुमालङ्कृतं....।

गंगाधर : यथोक्तचन्दनोदकुम्भक्षौमहेमरजतमणिमुक्ताविद्रुमालङ्कृतं....।

योगेन्द्रनाथ सेन : यथोक्तचन्दनोदकुम्भक्षौमहेमरजतमणिमुक्ताविद्रुमालङ्कृतं....।

ज्योतिषचन्द्रसरस्वति : यथोक्तचन्दनोदकुम्भक्षौमहेमहिरण्यरजतमणिमुक्ताविद्रुमालङ्कृतं ।

सूत्र १३ : चक्रपाणि : दु:खशीलाचारोपचाराणामनवादप्रतिकाराणां....।

गंगाधर : दु:खशीलाचारोपचाराणामल्पवादप्रतिकाराणां....।

योगेन्द्रनाथ सेन : दु:खशीलाचारोपचाराणामल्पवादप्रतिकाराणां....।

ज्योतिषचन्द्र सरस्वति : दु:खशीलाचारोपचाराणामल्पवादप्रतिकाराणां....।

सूत्र १४ : चक्रपाणि : न चैव ह्यस्ति सुतरमायुर्वेदस्य पारं....।

गंगाधर : न चैव ह्यस्त्यायुर्वेदस्य पारम्...।

योगेन्द्रनाथ सेन : न चैव ह्यस्त्यायुर्वेदस्य पारम्...।

ज्योतिषचन्द्र सरस्वति : न चैव ह्यस्त्यायुर्वेदस्य पारम्...।

सूत्र १४ : चक्रपाणि : ..पौष्टिकं लौक्यमभ्युपदिशतो वच:...।

गंगाधर : ..पौष्टिकं लौकिकम् अभ्युपदिशतो वच:...।

योगेन्द्रनाथ सेन : ..पौष्टिकं लौकिकमभ्युपदिशतो वच:...।

ज्योतिषचन्द्र सरस्वति : ..पौष्टिकं लौकिकमभ्युपदिशतो वच:....।

सूत्र १४ : चक्रपाणि : एवंभूयश्च वृत्तसौष्ठवमनसूयता परेभ्योऽप्यागमयितव्यं...।

गंगाधर : एवंभूय: प्रवृत्तस्य सौष्ठवम् अनसूयता परेभ्यो वाप्यागमयितव्यम्...।

योगेन्द्रनाथ सेन : एवं भूय: प्रवृत्तस्य सौष्ठवमनसूयता च परेभ्योऽप्यागमयितव्यम्...।

ज्योतिषचन्द्रसरस्वति :एवं भूय: प्रवृत्तस्य सौष्ठवमनसूयता च परेभ्योऽप्यागमयितव्यम्...।

सूत्र १५ : चक्रपाणि : परस्परेण सह जल्पन् पिण्डेन विजिगीषुराह....।

गंगाधर : परस्परेण सह जल्पन् पण्डेन विजिगीषुराह....।

योगेन्द्रनाथ सेन : परस्परेण सह जल्पन् पण्डेन विजिगीषुराह....।

ज्योतिषचन्द्र सरस्वति : परस्परेण सह जल्पन् पण्डेन विजिगीषुराह....।

सूत्र १७ : चक्रपाणि : सम्यक् चानुनयेनानुनयेत् तत्र चावहित: स्यात् ।

गंगाधर : सम्यक् चानुनयेनानुनीयेत् अनुनयाच्च परं तत्र चावहित: स्यात् ।

योगेन्द्रनाथ सेन : सम्यक् चानुनयेनानुनीयेत् अनुनयाच्च परं तत्र चावहित: स्यात् ।

ज्योतिषचन्द्रसरस्वति : सम्यक् चानुनयेनानुनीयेत् अनुनयाच्च परं तत्र चावहित: स्यात् ।

सूत्र १८ : चक्रपाणि : अत ऊर्ध्वमितरेण सह विगृह्य संभाषायां जल्पेत्...।

गंगाधर : अत ऊर्ध्वमितरेण सह विगृह्य संभाषेत...।

योगेन्द्रनाथ सेन : अत ऊर्ध्वमितरेण सह विगृह्य संभाषेत...।

ज्योतिषचन्द्र सरस्वति : अत ऊर्ध्वमितरेण सह विगृह्य संभाषेत...।

सूत्र १८ : चक्रपाणि : एतान् गुणान् गुरुलाघवत: परस्य....।

गंगाधर : एतान् द्वयानपि गुणान् गुरुलाघवत: परस्य....।

योगेन्द्रनाथ सेन : एतान् गुणान् गुरुलाघवत: परस्य....।

ज्योतिषचन्द्र सरस्वति : एतान् गुणान् गुरुलाघवत: परस्य....।

सूत्र २० : चक्रपाणि : ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणाप्यदीप्तयशसा....।

गंगाधर : ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणापि दीप्तयशसा....।

योगेन्द्रनाथ सेन : ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणापि दीप्तयशसा....।

ज्योतिषचन्द्र सरस्वति : ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणापि दीप्तयशसा....।

सूत्र २१ : चक्रपाणि : प्रतिभाहीनं पुनर्वचनेनैकविधेनानेकार्थवाचिना...।

गंगाधर : प्रतिभाहीनं पुनर्वचनेनानेकविधेनानेकार्थवाचिना...।

योगेन्द्रनाथ सेन : प्रतिभाहीनं पुनर्वचनेनानेकविधेनानेकार्थवाचिना...।

ज्योतिषचन्द्र सरस्वति : प्रतिभाहीनं पुनर्वचनेनानेकविधेनानेकार्थवाचिना...।

सूत्र २१ : चक्रपाणि : ...वाक्यस्याक्षेपेण...।

गंगाधर : ...वाक्यस्याक्षेपणेन...।

योगेन्द्रनाथ सेन : ...वाक्यस्य क्षेपणेन...।

ज्योतिषचन्द्र सरस्वति : ...वाक्यस्याक्षेपेण...।

सूत्र २५ : चक्रपाणि : सन्धाय पर्षदाऽयनभूतमात्मन:...।

गंगाधर : सन्धाय परिषदाऽयनभूतमात्मनः...।

योगेन्द्रनाथ सेन : सन्धाय परिषदाऽयनभूतमात्मनः...।

ज्योतिषचन्द्र सरस्वति : सन्धाय परिषदाऽयनभूतमात्मनः...।

सूत्र २७ : चक्रपाणि : इमानि तु खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति.... ।

गंगाधर : इमानि तु पदानि खलु भिषग्भिर्वादमार्गज्ञानार्थमधिगन्तव्यानि भवन्ति.... ।

योगेन्द्रनाथ सेन : इमानि खलु पदानि भिषग्भिर्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति.... ।

ज्योतिषचन्द्रसरस्वतिःइमानि तु खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति....

सूत्र ३१ : चक्रपाणि : पूर्वं हि प्रतिज्ञा .....।

गंगाधर : पूर्वं हि लोके प्रतिज्ञा .....।

योगेन्द्रनाथ सेन : पूर्वं हि लोके प्रतिज्ञा .....।

ज्योतिषचन्द्र सरस्वति : पूर्वं हि प्रतिज्ञा .....।

सूत्र ३१ : चक्रपाणि : उपनयः यथा चाकृतकमाकाशं तच्च नित्यं तथा पुरुष इति... ।

गंगाधर : उपनयो यथा चाकृतकमाकाशं तथा पुरुष इति... ।

योगेन्द्रनाथ सेन : उपनयः यथा चाकृतकमाकाशं तच्च नित्यं तथा पुरुष इति... ।

ज्योतिषचन्द्र सरस्वति : उपनयः यथा चाकृतकमाकाशं तच्च नित्यं तथा पुरुष इति... ।

सूत्र ३२ : चक्रपाणि : प्रतिष्ठापना नाम या तस्या एव परप्रतिज्ञाया विपरीतार्थस्थापना ।

गंगाधर : प्रतिष्ठापना नाम या तस्या एव प्रतिज्ञायाः प्रति विपरीतार्थस्थापना ।

योगेन्द्रनाथ सेन : प्रतिष्ठापना नाम या तस्या एव प्रतिज्ञाया प्रति विपरीतार्थस्थापना ।

ज्योतिषचन्द्रसरस्वति :प्रतिष्ठापना नाम या तस्या एव परप्रतिज्ञाया विपरीतार्थस्थापना ।

सूत्र ३२ : चक्रपाणि : यथा अनित्यः पुरुषः इति प्रतिज्ञा ।

गंगाधर : यथा अनित्यः पुरुषः इति विपरीतार्थप्रतिज्ञा ।

योगेन्द्रनाथ सेन : यथा अनित्यः पुरुषः इति विपरीतार्थप्रतिज्ञा ।

ज्योतिषचन्द्र सरस्वति : यथा अनित्यः पुरुषः इति प्रतिज्ञा ।

सूत्र ३४ : चक्रपाणि : दृष्टान्तो नाम यत्र मूर्खविदुषां बुद्धिसाम्यं यो वर्ण्यं वर्णयति ।

गंगाधर : दृष्टान्तो नाम स यत्र मूर्खविदुषां बुद्धिसाम्यं तेनैव यो वर्ण्यं वर्णयतीति ।

योगेन्द्रनाथ सेन : दृष्टान्तो नाम स यत्र मूर्खविदुषां बुद्धिसाम्यं तेनैव यद्वर्ण्यं वर्णयतीति ।

ज्योतिषचन्द्र सरस्वति : दृष्टान्तो नाम यत्र मूर्खविदुषां बुद्धिसाम्यं यो वर्ण्यं वर्णयति ।

सूत्र ३७ : चक्रपाणि : सन्ति सिद्ध्युपायाः साध्यानामिति ।

गंगाधर : सन्ति सिद्ध्युपायाः साध्यानां व्याधीनामिति ।

योगेन्द्रनाथ सेन : सन्ति सिद्ध्युपायाः साध्यानां व्याधीनामिति ।

ज्योतिषचन्द्र सरस्वति : सन्ति सिद्ध्युपायाः साध्यानामिति ।

सूत्र ३७ : चक्रपाणि : वीर्यं प्रधानमिति कृत्वा वक्ष्यामः इत्येवमादिः ।

गंगाधर : कर्म प्रधानमिति कृत्वा वक्ष्यामः इत्येवमादिः ।

योगेन्द्रनाथ सेन : कर्म प्रधानमिति कृत्वा वक्ष्यामः इत्येवमादिः ।

ज्योतिषचन्द्र सरस्वति : कर्म प्रधानमिति कृत्वा वक्ष्यामः इत्येवमादिः ।

सूत्र ३८ : चक्रपाणि : तत्र दृष्टार्थो नाम त्रिभिर्हेतुभिर्दोषाः प्रकुप्यन्ति....।

गंगाधर : तत्र दृष्टार्थो नाम त्रिभिर्हेतुभिर्दोषाः प्रकोपमापद्यन्ते....।

योगेन्द्रनाथ सेन : तत्र दृष्टार्थो नाम त्रिभिर्हेतुभिर्दोषाः प्रकुप्यन्ति....।

ज्योतिषचन्द्र सरस्वति : तत्र दृष्टार्थो नाम त्रिभिर्हेतुभिर्दोषाः प्रकुप्यन्ति....।

सूत्र ४३ : चक्रपाणि : संशयो नाम सन्देहलक्षणानुसन्दिग्धेष्वर्थेष्वनिश्चयः....।

गंगाधर : संशयो नाम सन्दिग्धेष्वर्थेष्वनिश्चयः....।

योगेन्द्रनाथ सेन : संशयो नाम सन्दिग्धेष्वर्थेष्वनिश्चयः....।

ज्योतिषचन्द्र सरस्वति : संशयो नाम सन्देहलक्षणानुसन्दिग्धेष्वर्थेष्वनिश्चयः....।

सूत्र ४३ : चक्रपाणि : यथा दृष्टा ह्यायुष्मल्लक्षणैरुपेताश्चानुपेताश्च तथा सक्रियाश्चाक्रियाश्च...।

गंगाधर : यथा किमकालमृत्युरस्ति नास्तीति । दृष्टाश्चायुष्मल्लक्षणैरुपेताश्च अनुपेताश्च तथाक्रियाः सक्रियाश्च...।

योगेन्द्रनाथ सेन : यथा किमकालमृत्युरस्ति उत नास्तीति ।

दृष्टाश्चायुष्मल्लक्षणैरुपेताश्चानुपेताश्च तथाऽक्रियाः सक्रियाश्च...।

ज्योतिषचन्द्र सरस्वति : यथा दृष्टा ह्यायुष्मल्लक्षणैरुपेताश्चानुपेताश्च तथा सक्रियाश्चाक्रियाश्च...।

सूत्र ४७ : चक्रपाणि : यथा वातिक एवायं व्याधि: इदमेवास्य भेषजं चेति ।

गंगाधर : यथा वातिक एवायं व्याधिरिदमेवात्र भेषजं चेति ।

योगेन्द्रनाथ सेन : यथा वातिक एवायं व्याधि: । इदमेवात्र भेषजं चेति ।

ज्योतिषचन्द्र सरस्वति : यथा वातिक एवायं व्याधि: इदमेवास्य भेषजं चेति ।

सूत्र ५४ : चक्रपाणि : यथा चक्रन(त)क्रवंशवज्रनिशाकरा इति ।

गंगाधर : यथा तक्रचक्रवंशरक्तनिशाकरा इति ।

योगेन्द्रनाथ सेन : यथा तक्रचक्रवंशवज्रनिशाकरा इति ।

ज्योतिषचन्द्र सरस्वति : यथा तक्रचक्रवंशरक्तनिशाकरा इति ।

सूत्र ५७ : चक्रपाणि : शरीरं ह्यनित्यमतो विधर्मिणा चात्मना भवितव्यमित्येष चाहेतु...।

गंगाधर : शरीरं ह्यनित्यमतो विधर्मिणा चानेन भवितव्यमित्येष चाहेतु...।

योगेन्द्रनाथ सेन : शरीरं ह्यनित्यमतो विधर्मिणानेन च भवितव्यमित्येष चाहेतु...।

ज्योतिषचन्द्रसरस्वति : शरीरं ह्यनित्यमतो विधर्मिणा चात्मना भवितव्यमित्येष चाहेतु...।

सूत्र ५८ : चक्रपाणि : पूर्वं वा निग्रहप्राप्तमनिगृह्य...।

गंगाधर : परं वा निग्रहप्राप्तमनिगृह्य...।

योगेन्द्रनाथ सेन : परं वा निग्रहप्राप्तमनिगृह्य...।

ज्योतिषचन्द्र सरस्वति : पूर्वं वा निग्रहप्राप्तमनिगृह्य...।

सूत्र ६५ : चक्रपाणि : तच्च त्रिरभिहितस्य वाक्यस्यापरिज्ञानं....।

गंगाधर : तच्च त्रिरुक्तस्य वाक्यस्याविज्ञानं.....।

योगेन्द्रनाथ सेन : तच्च त्रिरुक्तस्य वाक्यस्याविज्ञानं.....।

ज्योतिषचन्द्र सरस्वति : तच्च त्रिरभिहितस्य वाक्यस्यापरिज्ञानं....।

सूत्र ६७ : चक्रपाणि : वादस्तु खलु भिषजां प्रवर्तमानो प्रवर्तेतायुर्वेद एव नान्यत्र ।

गंगाधर : वादस्तु खलु भिषजां वर्तमानो वर्तेतायुर्वेद एव न त्वन्यत्र ।

योगेन्द्रनाथ सेन : वादस्तु खलु भिषजां प्रवर्तमानः प्रवर्तेतायुर्वेद एव । न त्वन्यत्र ।

ज्योतिषचन्द्र सरस्वति : वादस्तु खलु भिषजां प्रवर्तमानो प्रवर्तेतायुर्वेद एव नान्यत्र ।

सूत्र ६७ : चक्रपाणि : नाप्रकृतकमशास्त्रमपरीक्षितमसाधकमाकुलमव्यापकं वा ।

गंगाधर : नाप्रकृतकमशास्त्रमपरीक्षितमसाधकमाकुलमज्ञापकं वा ।

योगेन्द्रनाथ सेन : नाप्रकृतकमशास्त्रमपरीक्षितमसाधकमाकुलमज्ञापकं वा ।

ज्योतिषचन्द्र सरस्वति : नाप्रकृतकमशास्त्रमपरीक्षितमसाधकमाकुलमव्यापकं वा ।

सूत्र ६९ : चक्रपाणि : तत्र कारणं नाम तद् यत् करोति स एव हेतुः स कर्ता ।

गंगाधर : तत्र कारणं नाम तद् यः करोति स एव हेतुः स कर्ता ।

योगेन्द्रनाथ सेन : तत्र कारणं नाम तद्यः करोति स एव हेतुः स कर्ता ।

ज्योतिषचन्द्र सरस्वति : तत्र कारणं नाम तद् यः करोति स एव हेतुः स कर्ता ।

सूत्र ७८ : चक्रपाणि : उपायः पुनस्त्रयाणां कारणादीनां सौष्ठवमभिविधानं च...।

गंगाधर : उपायः पुनस्त्रयाणां कारणादीनां सौष्ठवमभिसन्धानं च...।

योगेन्द्रनाथ सेन : उपायः पुनस्त्रयाणां कारणादीनां सौष्ठवमभिसन्धानं च...।

ज्योतिषचन्द्र सरस्वति : उपायः पुनस्त्रयाणां कारणादीनां सौष्ठवमभिसन्धानं च...।

सूत्र ७८ : चक्रपाणि : सम्यक् कार्यकार्यफलानुबन्धवर्ज्यानां....।

गंगाधर : सम्यक् कार्यकार्यफलानुबन्धोपायवर्ज्यानां....।

योगेन्द्रनाथ सेन : सम्यक् कार्यकार्यफलानुबन्धवर्ज्यानां....।

ज्योतिषचन्द्र सरस्वति : सम्यक् कार्यकार्यफलानुबन्धवर्ज्यानां....।

सूत्र ८० : चक्रपाणि : प्रवृत्तिनिवृत्तिलक्षणसंयोगे च किं नैष्ठिकं ....।

गंगाधर : प्रवृत्तिनिवृत्तिसंयोगेन च किं नैष्ठिकं ....।

योगेन्द्रनाथ सेन : प्रवृत्तिनिवृत्तिसंयोगे च किं नैष्ठिकं ....।

ज्योतिषचन्द्र सरस्वति : प्रवृत्तिनिवृत्तिसंयोगे च किं नैष्ठिकं ....।

सूत्र ८१ : चक्रपाणि : कतमेन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्षया केन वा...।

गंगाधर : कतमेन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्ष्य केन वा...।

योगेन्द्रनाथ सेन : कतमेन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्षया केन वा...।

ज्योतिषचन्द्र सरस्वति : कतमेन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्षया केन वा...।

सूत्र ८१ : चक्रपाणि : .....परीक्ष्यं भित्वाऽन्यथाऽऽचक्षाण इच्छां पूरयेयमिति ।

गंगाधर : .....परीक्ष्यं भित्वार्थमाचक्षाण इच्छाश्च प्रपूरयेयमिति ।

योगेन्द्रनाथ सेन : .....परीक्ष्यं भित्वार्थमाचक्षाण इच्छां पूरयेयमिति ।

ज्योतिषचन्द्र सरस्वति : .....परीक्ष्यं भित्वार्थमाचक्षाण इच्छां पूरयेयमिति ।

सूत्र ८५ : चक्रपाणि : तस्य यो यो विशेषो यथा यथा च परीक्षितव्यः....।

गंगाधर : तस्य यो यः परीक्ष्यविशेषो यथा यथा च परीक्षितव्यः....।

योगेन्द्रनाथ सेन : तस्य यो यः परीक्ष्यविशेषो यथा यथा च परीक्षितव्यः....।

ज्योतिषचन्द्र सरस्वति : तस्य यो यः परीक्ष्यविशेषो यथा यथा च परीक्षितव्यः....।

सूत्र ८७ : चक्रपाणि :

मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि ।

गंगाधर :

मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासदानस्वस्त्ययनप्रणिपातगमनादि ।

योगेन्द्रनाथ सेन :

मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासदानस्वस्त्ययनप्रणिपात गमनादि ।

ज्योतिषचन्द्र सरस्वति :

मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासदानस्वस्त्ययनप्रणिपात गमनादि ।

सूत्र ८७ : चक्रपाणि :

उपायो नाम भयदर्शनविस्मापनविस्मारणक्षोभणहर्षणभर्त्सनवधबन्धस्वप्नसंवाहनादिरमूर्तो भावविशेषो यथोक्ताः सिद्ध्युपायाश्चोपायाभिप्लुता इति ।

गंगाधर : उपायो नाम भयदर्शनविस्मापनक्षोभणहर्षणभर्त्सनबन्धनस्वप्नसंवाहनादिः अमर्त्यो भावविशेषो यथोक्ताः सिद्ध्युपायाश्चेति ।

योगेन्द्रनाथ सेन :

उपायो नाम भयदर्शनविस्मापनक्षोभणहर्षणभर्त्सनबन्धनस्वप्नसंवाहनादिरमूर्तो भावविशेषो यथोक्ता: सिद्ध्युपायाश्च ।

ज्योतिषचन्द्र सरस्वति :

उपायो नाम भयदर्शनविस्मापनक्षोभणहर्षणभर्त्सनबन्धनस्वप्नसंवाहनादिरमूर्तो भावविशेषो यथोक्ता: सिद्ध्युपायाश्च ।

सूत्र ८९ : चक्रपाणि : सुखेन च प्रतिबोधनं....।

गंगाधर : सुखेन च प्रबोधनं....।

योगेन्द्रनाथ सेन : सुखेन च प्रतिबोधनं....।

ज्योतिषचन्द्र सरस्वति : सुखेन च प्रतिबोधनं....।

सूत्र ९३ : चक्रपाणि : ...इमे व्याधय: हितमिदम् अहितमिदमिति प्रायोग्रहणेन ।

गंगाधर : ...इमे व्याधयो हितमिदमहितमिदमिति ।

योगेन्द्रनाथ सेन : ...इमे व्याधयो हितमिदमहितमिदमिति ।

ज्योतिषचन्द्र सरस्वति : ..इमे व्याधयो हितमिदमहितमिदमिति ।

सूत्र ९४ : चक्रपाणि : दोषप्रमाणानुरुपो हि भेषजप्रमाणविकल्पो...।

गंगाधर : दोषप्रमाणानुरुपो हि भैषजप्रमाणविशेषो...।

योगेन्द्रनाथ सेन : दोषप्रमाणानुरुपो हि भेषजप्रमाणविशेषो...।

ज्योतिषचन्द्र सरस्वति : दोषप्रमाणानुरुपो हि भेषजप्रमाणविशेषो...।

सूत्र ९४ : चक्रपाणि : एतच्चैव कारणमपेक्षमाणा....।

गंगाधर : एतच्चैव कारणमवेक्षमाणा....।

योगेन्द्रनाथ सेन : एतच्चैव कारणमवेक्षमाणा....।

ज्योतिषचन्द्र सरस्वति : एतच्चैव कारणमवेक्षमाणा....।

सूत्र ९४ : चक्रपाणि : सुकुमार्योऽबला: परसंस्तभ्याश्च ।

गंगाधर : सुकुमारा: अबला: परमसंस्तभ्याश्च ।

योगेन्द्रनाथ सेन : सुकुमारा: अबला: परमसंस्तभ्याश्च ।

ज्योतिषचन्द्र सरस्वति : सुकुमाराः अबलाः परमसंस्तभ्याश्च ।

सूत्र ९५ : चक्रपाणि : तत्र प्रकृत्यादीन् भावाननुव्याख्यास्यामः ।

गंगाधर : तत्रेमान् प्रकृत्यादीन् भावाननुव्याख्यास्यामः ।

योगेन्द्रनाथ सेन : तत्रेमे प्रकृत्यादयो भावाः ।

ज्योतिषचन्द्र सरस्वति : तत्र प्रकृत्यादीन् भावाननुव्याख्यास्यामः ।

सूत्र ९५ : चक्रपाणि : एतानि हि येन येन दोषेणाधिकेनैकेनानेकेन वा समनुबध्यन्ते ।

गंगाधर : एता हि येन येन दोषेण एकेन अधिकेन समेन अनुबध्यन्ते ।

योगेन्द्रनाथ सेन : एता हि येन येन दोषेणाधिकेनैकेनानेकेन वा समनुबध्यन्ते ।

ज्योतिषचन्द्र सरस्वति : एतानि हि येन येन दोषेणाधिकेनैकेनानेकेन वा समनुबध्यन्ते ।

सूत्र ९५ : चक्रपाणि : वातलाः केचित् संसृष्टाः केचित् समधातवः केचिद्भवन्ति ।

गंगाधर : वातलाः केचित् समधातवः केचिद् भवन्ति ।

योगेन्द्रनाथ सेन : वातलाः केचित् । संसृष्टाः केचित् । समधातवः केचिद्भवन्ति ।

ज्योतिषचन्द्र सरस्वति : वातलाः केचित् संसृष्टाः केचित् समधातवः केचिद्भवन्ति ।

सूत्र ९६ : चक्रपाणि : मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः ।

गंगाधर : मृदुत्वाद् दृष्टिसुखसुकुमारावदाताङ्गाः ।

योगेन्द्रनाथ सेन : मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः ।

ज्योतिषचन्द्र सरस्वति : मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः ।

सूत्र ९६ : चक्रपाणि : गुरुत्वात् साराधिष्ठितावस्थितगतयः ।

गंगाधर : गुरुत्वात् साराधिष्ठितगतयः ।

योगेन्द्रनाथ सेन : गुरुत्वात् साराधिष्ठितगतयः ।

ज्योतिषचन्द्र सरस्वति : गुरुत्वात् साराधिष्ठितगतयः ।

सूत्र ९७ : चक्रपाणि : पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकं च ।

गंगाधर : पित्तमुष्णं तीक्ष्णं द्रुतं विस्रमम्लं कटुकश्च ।

योगेन्द्रनाथ सेन : पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकं च ।

ज्योतिषचन्द्र सरस्वति : पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकं च ।

सूत्र ९७ : चक्रपाणि : तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा उष्णमुखाः सुकुमारावदातगात्राः ।

गंगाधर : तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा शुष्कसुकुमारावदातगात्राः ।

योगेन्द्रनाथ सेन : तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहाः । शुष्कसुकुमारावदातगात्राः ।

ज्योतिषचन्द्र सरस्वति : तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा उष्णमुखाः सुकुमारावदातगात्राः ।

सूत्र ९८ : चक्रपाणि : प्रततरुक्षक्षामसन्नसक्तजर्जरस्वरा...।

गंगाधर : प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वरा...।

योगेन्द्रनाथ सेन : प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वरा...।

ज्योतिषचन्द्र सरस्वति : प्रततरुक्षक्षामभिन्नसक्तजर्जरस्वरा...।

सूत्र ९८ : चक्रपाणि : लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहाराः ।

गंगाधर : लघुत्वाल्लघुचपलगतिचेष्टाहारविहाराः ।

योगेन्द्रनाथ सेन : लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहाराः ।

ज्योतिषचन्द्र सरस्वति : लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहाराः ।

सूत्र ९८ : चक्रपाणि : शैत्याच्छीतासहिष्णवः....।

गंगाधर : शीतत्वाच्छीतासहिष्णवः....।

योगेन्द्रनाथ सेन : शीतत्वाच्छीतासहिष्णवः....।

ज्योतिषचन्द्र सरस्वति : शीतत्वाच्छीतासहिष्णवः....।

सूत्र १०१ : चक्रपाणि : यस्य हि व्याधेर्दोषदूष्यप्रकृतिदेशकालबलसाम्यं भवति ।

गंगाधर : यस्य हि व्याधेर्दोषदूष्यप्रकृतिदेशकालसाम्यं भवति ।

योगेन्द्रनाथ सेन : यस्य हि व्याधेर्दोषदूष्यप्रकृतिदेशकालसाम्यं भवति ।

ज्योतिषचन्द्र सरस्वति : यस्य हि व्याधेर्दोषदूष्यप्रकृतिदेशकालसाम्यं भवति ।

सूत्र १०६ : चक्रपाणि : सा सारता वित्तैश्वर्यसुखोपभोगप्रदानान्यार्जवं....।

गंगाधर : सा सारता वित्तैश्वर्यसुखोपभोगदैन्यार्ज्जवं....।

योगेन्द्रनाथ सेन : सा सारता वित्तैश्वर्यसुखोपभोगार्जवं....।

ज्योतिषचन्द्र सरस्वति : सा सारता वित्तैश्वर्यसुखोपभोगार्जवं....।

सूत्र १०९ : चक्रपाणि : स्निग्धवृत्तसारसमसंहतशिखरदशनाः ।

गंगाधर : स्निग्धवृत्तसारसमसंहतशिखरदशनाः ।

योगेन्द्रनाथ सेन : स्निग्धवृत्तसारसमसंहतशिखरिदशनाः ।

ज्योतिषचन्द्र सरस्वति : स्निग्धवृत्तसारसमसंहतशिखरिदशनाः ।

सूत्र १०९ : चक्रपाणि : ते स्त्रीप्रियोपभोगा बलवन्तः........।

गंगाधर : ते स्त्रीप्रियाः प्रियोपभोगा बलवन्तः........।

योगेन्द्रनाथ सेन : ते स्त्रीप्रियाः प्रियोपभोगा बलवन्तः........।

ज्योतिषचन्द्र सरस्वति : ते स्त्रीप्रियाः प्रियोपभोगा बलवन्तः........।

सूत्र ११० : चक्रपाणि : कल्याणाभिनिवेशिनश्च सत्त्वसाराः ।

गंगाधर : कल्पनाभिनिवेशिनश्च सत्त्वसाराः ।

योगेन्द्रनाथ सेन : कल्याणाभिनिवेशिनश्च सत्त्वसाराः ।

ज्योतिषचन्द्र सरस्वति : कल्याणाभिनिवेशिनश्च सत्त्वसाराः ।

सूत्र १११ : चक्रपाणि : सानुनादस्निग्धगम्भीरमहास्वराः...।

गंगाधर : सानुनादस्निग्धगम्भीरमहानिस्वनाः...।

योगेन्द्रनाथ सेन : सानुनादस्निग्धगम्भीरमहानिस्वनाः...।

ज्योतिषचन्द्र सरस्वति : सानुनादस्निग्धगम्भीरमहास्वराः...।

सूत्र ११६ : चक्रपाणि : मध्यत्वात् संहननस्य मध्यबला भवन्ति ।

गंगाधर : प्रवरावरमध्यत्वात् संहननस्य मध्यबला भवन्ति ।

योगेन्द्रनाथ सेन : मध्यत्वात् संहननस्य मध्यबला भवन्ति ।

ज्योतिषचन्द्र सरस्वति : मध्यत्वात् संहननस्य मध्यबला भवन्ति ।

सूत्र ११७ : चक्रपाणि : तत्र पादौ चत्वारि षट् चतुर्दशाङ्गुलानि ।

गंगाधर : तत्र पादौ चतुर्दशाङ्गुलौ ।

योगेन्द्रनाथ सेन : तत्र पादौ चतुर्दशाङ्गुलौ ।

ज्योतिषचन्द्र सरस्वति : तत्र पादौ चत्वारि षट् चतुर्दशाङ्गुलानि ।

सूत्र ११७ : चक्रपाणि : दशाङ्गुलविस्तारं द्वादशाङ्गुलमुदरं ।

गंगाधर : द्वादशाङ्गुलमुदरं दशाङ्गुलिविस्तीर्णश्च ।

योगेन्द्रनाथ सेन : द्वादशाङ्गुलमुदरं दशाङ्गुलिविस्तीर्णश्च ।

ज्योतिषचन्द्र सरस्वति : दशाङ्गुलविस्तारं द्वादशाङ्गुलमुदरं ।

सूत्र ११७ : चक्रपाणि : द्व्यङ्गुलं हृदयम्

गंगाधर : त्र्यङ्गुलं हृदयम्

योगेन्द्रनाथ सेन : त्र्यङ्गुलं हृदयम्

ज्योतिषचन्द्र सरस्वति : त्र्यङ्गुलं हृदयम्

सूत्र ११७ : चक्रपाणि : षोडशङ्गुलौ प्रबाहू ।

गंगाधर : षोडशङ्गुलौ बाहु ।

योगेन्द्रनाथ सेन : षोडशङ्गुलौ प्रबाहू ।

